मम्मटकृतोऽलकपूरितः

काव्यप्रकाशः

कौण्डिन्न्यायनाचार्यशिवराजकृतया

हैमवत्या विवृत्या विवृतः

व्याख्याकार

आचार्य-शिवराजः कौण्डिन्न्यायनः,

एम० ए० (संस्कृते, दर्शनशास्त्रे च),

आचार्य (साहित्ये, वेदान्ते च), विशिष्टशास्त्री (आङ्ग्ल-

भाषायाम्), शास्त्री (आयुर्वेद)

मोतीलाल बनारसीदास

दिल्ली वाराणसी · पटना

विषयानुक्रमणिका

■

प्रस्तावना

'काव्यप्रकाशस्य कृता गृहे गृहे टीकास् तथाप्येष तथैव दुर्गमः' इति महेश्वरभट्टाचार्येण पुरैवोक्तम् । काव्यप्रकाशस्य टीकाः बह्व्यः सन्त्येव । तत्र मुद्रणेन प्रकाशमागता संस्कृत-भाषामय्यः टीका एव षोडश, प्रटीकाश्च चतस्रः सन्ति । अमुद्रितानामपि प्रसिद्धतराणां कासाञ्चिद् [illegible] तु संस्कृत-काव्य-नाट्यविद्या-तदाचार्यादिपरिचयप्रसङ्गेऽत्र करिष्यते । भाषान्तरेष्वपि अस्य ग्रन्थस्य अनेकाष् टीकाः सन्ति । तथापि संस्कृतभाषा-मयी एवाऽधुनापि अस्माभिरेषा टीका विरचिता । तत्रास्माकं प्रवृत्तौ निमित्तमिदम् । प्राचीनाष् टीकाः प्रायेण कठिनानां स्थलानामेव व्याख्याने लग्ना इति ता मन्दमतीनां बुभुत्सूनां विद्यार्थिनां कृते नातीवोपकारिण्यः । वामनाचार्यझलकीकरकृताऽपि टीका उक्त-दोषरहिताऽपि पुनरुक्तिमती महाकाया विद्यार्थिक्लेशकारी च । वामनटीकामेव सर्वथोप-जीव्य रचिता स्वल्पकाया नागेश्वरी तु न विषयस्पष्टीकरणक्षमा । भाषान्तरटीकास्तु न [illegible] । वामनाचार्यसमये नाट्यशास्त्राभिनवभारत्या अनुपलभ्यमानत्वात् तेन तस्या अनुपयुक्तत्वाद् महाकायाऽपि तत्कृता टीका रसप्रकरण-व्याख्याने नैव विशदा । पुनश्च वामनेनानुपलब्धा अपि बह्व्यः काव्यप्रकाशटीका एतर्हि मुद्रिता उपलभ्यन्ते । अतो [illegible] विदुषां प्रमोदाय च वामनकृतां टीकाम्, नागेश्वरीम्, विश्वेश्वरकृतां हिन्दिभाषामयीं टीकाम्, सत्यव्रतसिंहकृतां हिन्दिभाषामयीं टीकां च पठित्वा, वामनोपयुक्ताः [illegible] महेश्वरभट्टा-चार्यकृताः टीकाः नागोजिभट्टकृतां प्रटीकां च स्वयमपि साक्षादुपयुज्य, वामनेन अनुप-युक्ताः [illegible] सङ्केत-[illegible] टीकाश्च यथालाभं विमृश्य, ध्वन्यालोकलोचनं रसाध्यायाभिनवभारती चानुसृत्य, नव्यानां विदुषां भारतीय-साहित्यशास्त्रविमर्शांश्च विलोक्य, स्वधिया चार्थतत्त्वमनुप्रविश्य, आवश्यकान् मूलेऽनुक्ता-नपि विषयान् (विषयानुक्रमणिकायां तारकाभिश्चिह्नितान्) सङ्कलय्य स्थाने स्थाने प्रदर्श्य, यद्यपि अन्ये काव्यप्रकाशसम्पादका इव परीखोऽपि व्याकरणस्याऽज्ञानात् प्रमादाद् वा **विजहित** इति (उदा० ८१) शुद्धं पाठं टिप्पण्यां निक्षिप्य **विजहतेति** अशुद्धं पाठं मूले पठति तथापि [illegible] श्रीधरसम्मतं च काव्यप्रकाशमूलपाठं विविच्य, इदानीन्तनमन्दमतिपरीक्षार्थिजनानां कृते एम्० ए० परीक्षार्थिनां च कृते मूलमपि अर्थ-बोधसौकर्यार्थं सन्धिविश्लेषादिकं कृत्वा खण्डिकाविभाजनादिकं च विधाय लिखित्वा, विदुषाम् अद्यावधिकम् अलङ्कारशास्त्रकारसिद्धान्तेतिहासाध्ययनमुपयुज्य स्वमनीषया च रचितेन सङ्क्षिप्तेन संस्कृत-काव्य-नाट्यविद्यातदाचार्यादिपरिचयनिबन्धेन च संयोज्य अस्माभिरियं टीका विरचिता ।

तत्र नवरसरुचिरामित्यस्य व्याख्याने, प्रभुसम्मितशब्दप्रधान-वेदादिशास्त्रेभ्य इत्यस्य स्फुटीकरणे, छन्दोव्याकरणाभिधानकोषादिशास्त्राणां परिचयस्य प्रदाने, काव्यलक्षण-व्याख्याने, काव्यलक्षणपरीक्षायाम्, उदाहरणव्याख्यानपद्धतौ, [illegible] चित्र-काव्यनिरूपणे, [illegible], आर्थ्या व्यञ्जनाया प्रतिपादने, [illegible]-सङ्गतिप्रदर्शने, रसभावतदाभासेत्यादिकारिकाव्याख्याने, रसप्रकरणव्याख्याने, स्थायिभाव-[illegible], रसनद्वन्द्व्यसम्प्रकारणे, [illegible], रसाभास-[illegible]निर्धारणे, सख्यः शपामीत्यादौ विशिष्टे स्थले व्याकरणटिप्पणी-करणे, प्राकृतपदानां समीचीनतरसंस्कृतच्छायाप्रदाने, अपराङ्गकाङ्क्ष्या-ऽलङ्कारविषय-विवेके, गुणीभूतव्यङ्ग्यसमासोक्त्याद्यलङ्कारविषयविवेके, [illegible]सङ्गतिप्रदर्शने, शब्दार्थालङ्कारस्वरूपाच् चित्रकाव्यस्वरूपस्य विशिष्टताया प्रतिपादने, दोषविचारविकास-क्रमसूचने, अनेकेषां दोषाणाम् [illegible], रसगुणभेदाभेदविचारणे, [illegible], अर्थालङ्कारविचारक्रमसूचने, अर्थालङ्कार-विशेषाणां भेदविशेषाणां [illegible] अन्यत्र च स्थाने स्थाने अस्याष्टी-काया अन्याभ्यष्टीकाभ्यो वैशिष्टयं सुस्फुटम् ।

तामिमां टीकां समुपस्तुवता विद्यार्थिवर्गो बोधाय विद्वद्वर्गश्च प्रमोदायेति निवेद्य,

"दोषो विचारसुलभो यदि दूष्यतां तद्
दूये न तत्र शृणुतैकमिदं तु धीराः ।
[illegible]
व्याख्या मम प्रथममेव न दूषणीया॥"

इति महेश्वरभट्टाचार्योक्तिसारमपि स्मर्तुं विदुषः प्रार्थयमानो

'मन्दो विद्वद्यशः प्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥
तथापि कृतवाग्द्वारे ग्रन्थेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥
तत् सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ॥'

इति च स्वं धार्ष्टर्यमाविष्कुर्वाणो विरमति—

आचार्य-शिवराजः कौण्डिन्न्यायनः ।

अथ सङ्क्षिप्तः संस्कृतकाव्यनाट्यविद्यातदाचार्यादिपरिचयः

[(क) काव्यविद्यानामानि, (ख) काव्यविद्याविषयाः, (ग) काव्यविद्याध्ययनफलम्, (घ) काव्यविद्योत्पत्तिविपये राजशेखरोक्तिः, (ङ) उक्तराजशेखरोक्तिसमीक्षा, (च) काव्यविद्यायाः प्राचीनता, प्राचीनानां तद्ग्रन्थानामनुपलभ्यमानता च, (छ) निरुक्तादौ उपमारूपकविचाराः, (ज) [illegible] काव्यविद्याया अन्तर्भावः, (झ) उपलभ्यमानग्रन्थकः प्रथमः काव्यविद्याचार्यः (ञ) प्रायेण मुद्रित[illegible]नामेव काव्यनाट्यविद्याचार्याणां कालक्रमानुसारी परिचयः, (ट) तेषां कालस्य विभागः, (ठ) प्रकारान्तरेण तेषां कालस्य विभागः, (ड) तेषां सिद्धान्तमनुसृत्य तेषां वर्गीकरणम्, तत्तत्सिद्धान्तसंक्षिप्तपरिचयश्च, (ढ) काव्यलक्षणकक्षाविचारः]

(क) संस्कृते काव्यविवेचनशास्त्रं क्रियाकल्प इति, काव्यक्रियाकल्प इति, काव्यलक्ष्मेति, काव्यलक्षणम् इति, काव्यविद्येति, साहित्यविद्येति, काव्यमीमांसेति, अलङ्कारशास्त्रम् इति, अलङ्कारतन्त्रमिति च उच्यते । तत्र **क्रियाकल्पशब्दो** वाल्मीकीये रामायणे उत्तरकाण्डे (९४।७) प्रयुक्तोऽस्ति । किन्तु स काव्यविचारशास्त्रार्थको नेति [illegible] भणति स्म । कामसूत्रटीकायां जयमङ्गलाख्यायां यशोधरेण तु (१।३।१५) 'क्रियाकल्प इति काव्यकरणविधिः काव्यालङ्कार इत्यर्थः' इत्युक्तम् । **काव्यक्रियाकल्प** शब्दो 'वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्' (१।९) इति काव्यादर्शोक्तिं 'काव्यकरणविधिः' इति यशोधरोक्तिं च उपजीवति । **काव्यलक्ष्म**शब्दो भामहेन (६।६४) आनन्दवर्धनेनापि 'काव्यलक्ष्मविधायिभिः' इत्यत्र (१।३ वृत्तौ) प्रयुक्तः । **काव्यलक्षणशब्दो**ऽपि दण्डिना (१।२) आनन्दवर्धनेन 'काव्यलक्षणविधायिभिः' इत्यादौ (१।१ वृत्तौ) प्रयुक्तः । **काव्यविद्या**शब्दो राजशेखरेण काव्यमीमांसायाः प्रथमेऽध्याये 'तं (काव्यपुरुषं) च ···प्रजापतिः काव्यविद्याप्रवर्तनायै प्रायुङ्क्त' इत्यत्र प्रयुक्तः । **साहित्यविद्याशब्दो**ऽपि 'पञ्चमी साहित्यविद्येति यायावरीयः' 'शब्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्या' (द्वितीयेऽध्याये) इत्यादौ तेनैव प्रयुक्तः । विश्वनाथेन च स्वस्य काव्यलक्षणग्रन्थस्य नाम साहित्यदर्पण इति कृतम् । यद्यपि सोमनाथः साहित्यप्रदीपनामके नैपालकभाषाग्रन्थे साहित्यशब्दं काव्यलक्षणैकविषयं मन्यते स्म (प्रथमप्रकाशे, पृ० २४, प्र० संस्क०) तत्र युक्तिं च राजशेखरकथित [illegible] प्रस्तौति, तथापि 'साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः' 'साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले तर्के वा मयि संविधातरि समं लीलायते भारती' इत्यादौ काव्यार्थकत्वेनापि साहित्यशब्दः प्रयुज्यते । काव्यविचारशास्त्रार्थकः साहित्यशब्दोऽपि "व्याकरण-मीमांसा-तर्क-साहित्यात्मकेषु चतुर्षु शास्त्रेषु' ([illegible] पृ. २२) इत्यादौ दृश्यते । "शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि । अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः । ····साहि-

त्यमनयोः शोभाशालितां प्रति काप्यसौ। अ[illegible]रिक्त[illegible]हारि[illegible]स्थितिः” इति कुन्तकोक्तिश्च (१।९, १७) काव्यविचारशास्त्रार्थे साहित्यविद्याशब्दप्रयोगं सम्यक् समर्थयते। **काव्यमीमांसा**शब्दो राजशेखरेण स्वग्रन्थनामत्वेन प्रयुक्तः, शास्त्रनामताऽप्यस्य तेन 'अथातः काव्यं मीमांसिष्यामहे' इत्युक्त्वा सूचिता। जगन्नाथेनाऽप्ययं शब्दो 'रसगङ्गाधरनाम्नी करोति कुतुकेन काव्यमीमांसाम्' इत्यत्र प्रयुक्तः। **अलङ्कारशास्त्र**शब्दस्तु "प्रणम्य सार्वं सर्वज्ञं मनोवाक्कायकर्मभिः। काव्यालङ्कार इत्येष यथाबुद्धि विधास्यते" इति भामहोक्तिम् (१।१), "प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया। काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते" इति वामनोक्तिम्, "काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते" इति कुन्तकोक्तिम्, एवमेवान्येषां चोक्तीरुपजीवति। [illegible] प्राचीनैर्बहुभिर्ग्रन्थकारैः स्वकाव्यलक्षणग्रन्थनाम काव्यालङ्कार इत्येव कृतम्। एवं च **काव्यालङ्कार**शब्दोऽपि काव्यविचारशास्त्रार्थक एवेति विज्ञायते। तथा च कामधेनुकारोऽपि "योऽयमलङ्कारः काव्यग्रहणहेतुत्वेनोपन्यस्यते तद्व्युत्पादकत्वाच्छास्त्रमपि अलङ्कारनाम्ना व्यपदिश्यते" इति प्राह (काव्यालङ्कारसूत्रवृत्तिव्याख्या १।१।२)। काव्यालङ्कारशास्त्रमित्यस्यार्थश्च काव्यसौन्दर्यशास्त्रम् इत्येव, 'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते' (काव्यादर्शे २।१) इति, "सौन्दर्यमलङ्कारः" (काव्यालङ्कारसूत्रम् १।१।२) इति चोक्तत्वात्। तस्यैतस्यालङ्कारतन्त्रस्य शास्त्रत्वं च कविगुरूणां [illegible]नुशासनात्, काव्यं बुभुत्सूनां सत्काव्यरहस्यशंसनाच्च। यद्यपि "प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसा येनोपदिश्येत तच्छास्त्रमभिधीयते" इति "शास्त्रत्वं हितशासनात्" इति च शास्त्रलक्षणं वदन्ति तथापि वस्तुतः सर्वाण्येव शास्त्राणि पुरुषार्थोपायप्रकाशनपराणि न प्रवर्तकानि निवर्तकानि वा, प्र[illegible] तु रागद्वेषावेवेति न विस्मरणीयम्। **आलङ्कारिकतन्त्र**शब्दोऽपि अलङ्कारशास्त्रार्थे रसगङ्गाधरे [illegible] प्रयुक्तोऽस्ति, काव्यमीमांसायां च दशमाध्यायप्रारम्भे। चित्रकला-मूर्तिकला-नाट्यकला-काव्यालङ्कारप्रतिपादकं [illegible] **चित्रसूत्र**मित्युच्यते इति यद्यपि काव्यालङ्कारोऽपि चित्रसूत्रान्तर्गतः तथापि चित्रसूत्रमिति तु न काव्यविद्यायाः स्वतन्त्रं नाम। **काव्यशास्त्र**शब्दस्तु काव्यविचारार्थे आधुनिकैः प्रयुज्यते, [illegible] उपपद्यते चायं प्रयोगः, तथापि प्राचीनैस्त्वयं शब्दोऽस्मिन्नर्थे प्रयुक्तो नोपलभ्यते। यद्यपि प्राचीनैरपि काव्यशास्त्रमितिशब्दः प्रयुक्तस्तथापि तस्याऽर्थोऽन्य एव; "शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदतः। चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः।" इत्यत्र, "काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च। काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्" इत्यादौ च काव्यशास्त्रशब्दो भट्टिकाव्य-धातुकाव्य-वासुदेवविजय[illegible]प्रभृतिकस्य शास्त्रार्थनिधानप्रधानस्य काव्यस्य (काव्यरूपेण प्रतिपादितस्य व्याकरण-धर्म-दर्शनादिशास्त्रस्य) एव वाचको बोध्यो न तु काव्यालङ्कार(शास्त्र)स्य। एवं च काव्यालङ्कारार्थकतया काव्यशास्त्रशब्दो भोजराजेन प्रयुक्त इति विश्वेश्वरादिजल्पितममदेव बोध्यम्।

(ख) काव्यलक्षणशास्त्रे च काव्यप्रयोजनम्, काव्यहेतुः, काव्यलक्षणम्, काव्यत्व-प्रयोजकं तत्त्वं रसादिकम्, गुणालङ्कारोपादान-दोषहानादीनि कविसमयज्ञानादीनि च तदङ्गानि, अभिधादिकाःशब्दवृत्तयः, वाच्याद्यर्थविशेषाः, उत्तममध्यमाधमकाव्यविशेषाः, तदन्तर्गता अन्ये च महाकाव्यादिकाः काव्यप्रकाराश्च प्रतिपाद्यन्ते। नाट्यानामपिपाठ्यं तु काव्यरूपमेव भवतीति अथवा अभिनेयार्थमपि काव्यं भवतीति तत्प्रसङ्गान्नाट्यविषया अपि क्वचित् काव्यलक्षणशास्त्रेऽपि प्रतिपाद्यन्ते, यथा साहित्यदर्पणे, क्वचित् केवलं सूच्यन्ते, यथा—'नाटकं द्विपदीशम्या-रासक-स्कन्धकादि यत्। उक्तं तदभिनेयार्थ-मुक्तोऽन्यैस्तस्य विस्तरः' इति भामहकृते काव्यालङ्कारे (१।२४), क्वचित्तु तेषामुल्लेख एव न क्रियते, यथा-काव्यप्रकाशे। काव्यलक्षणग्रन्थाश्च केचन आकरग्रन्थरूपाः साङ्गो-पाङ्गकाव्यलक्षणप्रतिपादकाः भामहकृतकाव्यालङ्कार-रुद्रटकृतकाव्यालङ्कार-काव्यप्रकाशा-दयः, केचन साङ्गोपाङ्गपूर्णत्वाभावेऽपि सूत्ररूपेण पूर्णा आकरग्रन्था ध्वन्यालोकादयः, केचन प्रकरणग्रन्थरूपाः कतिपयालङ्कारभेदप्रतिपादकाः उद्भटकृतालङ्कारसर्वस्वप्रभृतयः, शृङ्गारतिलक-रसमञ्जरीप्रभृतयश्च, केचन तु कविसमुपकारकसामग्रीनिर्देशनपराः कवि-शिक्षात्मकाः प्रकरणग्रन्थाः काव्यमीमांसा-कविकण्ठाभरण-कविकल्पलतादयः एवं च तेषु तेषु आकरादिग्रन्थेषु तदनुरूपा एव विषयाः प्रतिपाद्यन्ते।

(ग) काव्यलक्षणशास्त्राध्ययनेन तदनुसारमभ्यासेन च कवीनां रचनाशक्तिः परिष्कृता भवति, शास्त्रकवीनामपि लोकग्राह्यतया हृद्यतया च काव्यशास्त्रादिरचना-कौशलं वर्धते, अन्येषां च काव्यरहस्यबोधशक्तिरुदेति, काव्यास्वादनशक्तिश्च परिष्कृता भवति। यत् तु "नेह प्रयोगनियम आरभ्यते। किं तर्हि। संस्कृत्य संस्कृत्य पदानि उत्सृज्यन्ते। तेषां यथेष्टमभिसम्बन्धो भवति। तद् यथा—आहर पात्रम्, पात्रमाहर" (महाभाष्ये १।१।१) इति, "सूरिभिः कथित इति विद्वदुपज्ञेयमुक्तिः, न तु कथञ्चित् प्रवृत्ता, इति प्रतिपाद्यते; प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्या-नाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति" (ध्वन्यालोके १।१३ वृत्तौ) इति, "बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थ-युगलस्य" (काव्यप्रकाशे वृत्तौ १।४) इत्यादि च श्रुत्वा 'व्याकरणेन पदसंस्कारः क्रियते, पदप्रयोगनियमस्तु काव्यलक्षणशास्त्रेण क्रियते इति काव्यलक्षणशास्त्रमपि शब्दप्रयोगनियम-ज्ञानाय अध्येतव्यमिति व्याकरणपरिशेष (पुच्छ) भूतमिदं शास्त्रमिति झड़कीकरादयो मन्यन्ते, तदसत्, काव्यलक्षणशास्त्रात् शब्दप्रयोगकौशलपरिष्कारेऽपि लभ्यमानेऽपि, व्याकरण-काव्यलक्षणशास्त्रे परस्परमुपकारके सती अपि मुख्येन प्रयोजनेन तु सुदूरं भिन्ने; व्याकरणशास्त्रं हि भाषाशास्त्रम् तत्र च तत्तद्भाषागत-स्वाभाविक-शब्दरूप-तदर्थसम्बन्धा-देरेव विचारो भवति, न तु शब्दगतसौन्दर्यासौन्दर्ययोः; काव्यलक्षणशास्त्रं तु काव्यरूप-शब्दसौन्दर्यशास्त्रम्, तत्र च शब्दार्थादेः सौन्दर्यासौन्दर्ययोर्विचारो भवति इति। जगन्नाथे-

नापि उत्प्रेक्षास्थलशाब्दबोधविचारादौ 'न च वैयाकरणमतविरोधो दूषणमिति वाच्यम्, स्वतन्त्रत्वादालङ्कारिकतन्त्रस्य तद्विरोधस्यादूषणत्वात्'' इत्यादि कथयता अलङ्कार-शास्त्रस्य काव्यव्याकरणस्य पुच्छभूतत्वं निरस्तम्। अपि च काव्यलक्षणशास्त्रं काव्यप्रयो-जनेनैव प्रयोजनवत् काव्यप्रयोजनमौलिभूतश्च ब्रह्मास्वादसहोदरो विगलितवेद्यान्तर आनन्द इति न विस्मरणीयम्। एवं च—**यः काव्यसौन्दर्यनिरूपकेऽस्मिन् शास्त्रे स्वतन्त्रेऽपि पदप्रयोगे। व्युत्पत्तिमग्र्यं फलमाह नम्यो दूरादधि सौन्दर्यपराङ्मुखोऽसौ।**

(घ) अतः परं काव्यालङ्कारशास्त्रस्येतिवृत्तं संक्षेपेण निरूप्यते। तत्र काव्यमीमा-सायां राजशेखरेण काव्यविद्या-(काव्यलक्षणशास्त्र-) प्रारम्भ इत्थं वर्णितः—श्रीकण्ठः (महेश्वरः) ब्रह्मविष्णुप्रभृतिभ्यः चतुष्टये शिष्येभ्यः काव्यविद्यामुपदिदेश [illegible] पुत्रेभ्यः काव्यविद्यामुपदिदेश। तेषु ब्रह्मणो मानसेषु पुत्रेषु एकः सारस्वतेयः काव्यपुरुषोऽपि बभूव। तमेव ब्रह्मा त्रिषु लोकेषु काव्यविद्याप्रवर्तनायै प्रयुयुजे। सोऽष्टादशाधिकरणीं काव्यविद्यां दिव्येभ्यः काव्यविद्यास्नातकेभ्यः सप्रपञ्चं प्रोवाच। तत्र कविरहस्यम् इन्द्रः समामम्नौ (पपाठ), औक्तिकम् उक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्रचेताः, यमकं यमः, चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यम् औपकायनः, अतिशयं पराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपक-निरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणौपादानिक-मुपमन्युः, औपनिषदिकं कुचुमार इति। ततस्ते पृथक्-पृथक् स्वशास्त्राणि विरचयाञ्चक्रुः। इत्थङ्कारं च प्रकीर्णत्वात् सा किञ्चिदुच्चिच्छिदे। [illegible] सङ्क्षिप्य मुनीना मत-विस्तरम्। व्याकरोत् काव्यमीमांसां कविभ्यो राजशेखरः॥ इति।

(ङ) स्वविद्या गौरवख्यापनाय राजशेखरेणेयं काव्यविद्यापरम्परा उल्लिखिता, तथापि इन्द्रादिसम्प्रदायग्रन्था नोपलभ्यन्ते इति इतिवृत्तरूपेण तस्याः परम्पराया उल्लेखस्य महत्त्वं बहु नास्ति। [illegible] उपलभ्यते, मुद्रितश्चासौ, तथापि कतमस्य नन्दिकेश्वरस्यासौ ग्रन्थ इति निश्चेतुं न शक्यते।

(च) उपलभ्यमानेषु काव्यलक्षणशास्त्रग्रन्थेषु निरूपिता रस-ध्वनि-गुणा-ऽलङ्कारादयो विषयाः वेदरामायणमहाभारतपुराणादिषु अपि प्रयुज्यमाना उपलभ्यन्ते, ''देवस्य पश्य काव्यं न ममार न जीर्यति'' (अथर्व १०।८।३२) इति काव्यमाहात्म्यमपि वेदे श्रूयते, तथा च तत्प्रतिपादकग्रन्थानामपि तदाऽपि [illegible] तथापि रसादिविवेचनपरा ग्रन्थास्तु प्राचीना नैवोपलभ्यन्ते। यद्यपि राजशेखरेण काव्यमीमांसाया द्वितीयेऽध्याये ''आन्विक्षिकी-त्रयी-वार्ता-दण्डनीतयश्चतस्रो विद्या इति कौटल्यः'' इत्युक्त्वा ''पञ्चमी साहित्यविद्येति यायावरीयः, सा हि चतसृणामपि विद्यानां निस्यन्दः'' इत्युक्तम्, ''शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिः ज्यौतिषं च षडङ्गानि इत्याचार्याः'' इत्युक्त्वा ''उपकारकत्वादलङ्कारः सप्तमम् अङ्गम् इति यायावरीयः, ऋते च तत्स्वरूपपरिज्ञानाद् न वेदार्थावगतिः'' इति च प्रतिज्ञातम्, तथापि अन्यत्र प्राचीनेषु ग्रन्थेषु पञ्चमविद्यात्वेन

सप्तनवेदाङ्गत्वेन वा येन केनाऽपि रूपेणापि महत्त्वपूर्णविद्यात्वेन साहित्यविद्या नोल्लिखिता दृश्यते ।

(छ) यास्ककृते निरुक्तग्रन्थे (३।१८) पाणिनीये व्याकरणे च (२।१।५५-५६; ३।१।१०; ५।१।११५-१६) उपमाया रूपकस्य च विचारः प्राप्यते तथापि स न काव्याङ्गतया प्रस्तुतः, किन्तु भाषाङ्गतयैव ।

(ज) यद्यपि काव्यलक्षणशास्त्रं नाटचशास्त्रात् पृथक्, तथापि नाट्ये वाचिकाभिनयस्य (पाठस्य) अपि मुख्यं स्थानमस्तीति, तत्र पाठ्येनापि मनोहारिणा काव्यरूपेणैव भाव्यमिति कथावस्तुगुणास्तु नाटकादिषु अभिनेयार्थासु कविकृतिषु महाकाव्यादिषु च प्रायः सजातीया एव अपेक्षिता भवन्तीति च तत्प्रतिपादके नाटचक्रियाकल्पे काव्यक्रियाकल्पोऽपि प्रायेण सर्वोऽप्यन्तर्भवति ।

(झ) अत एव काव्यलक्षणशास्त्रस्य बहवो महत्त्वपूर्णा विषया भरतनाटचशास्त्रे उपलभ्यन्ते । तत्र षष्ठेऽध्याये रसानां विचारः, सप्तमे भावानां विचारः, षोडशे लक्षणाऽलङ्कार-काव्यदोष-गुण-विचारः, ऊनविंशे च कथावस्तुनः पञ्चानां सन्धीनां तदङ्गानां च विचारः प्राप्यते । तथा च यस्य ग्रन्थोऽपि उपलभ्यते तादृशः काव्यविद्याया अपि प्रथम आचार्यः भरतमुनिः एव गण्यते । यत् तु झड़कीकरेण "दण्डिना भामहेन वेदं शास्त्रं (काव्यालङ्कारशास्त्रं) प्रथममाविष्कृतम्" इति प्रस्तावनायां द्वितीये प्रघट्टके उक्तं तदसत्, "पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च । यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्" (१।२) इति, "अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः । वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम् । तैः शरीरं च काव्यानामलङ्काराश्च दर्शिताः ।" (१।९-१०) इति, "किन्तु बीजं विकल्पानां पूर्वाचार्यैः प्रदर्शितम् । तदेव प्रतिसंस्कर्तुमयमस्मत्परिश्रमः ।" (२।२) इति, "इति [illegible] दर्शिताः पूर्वसूरिभिः" (२।७) इति च दण्डिना; "रूपकादिमलङ्कारं बाह्यमाचक्षते परे । सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्" (१।१४) इति, "वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे । तदेव च किल ज्यायः सदर्थमपि नापरम्" (१।३१) इति, "यदुक्तं त्रिप्रकारत्वं तस्याः (उपमायाः) कैश्चिन्महात्मभिः । निन्दाप्रशंसाचिख्यासाभेदादत्राभिधीयते । सामान्यगुणनिर्देशात् त्रयमप्युदितं ननु । मालोपमादिः सर्वोऽपि न ज्यायान् विस्तरो मुधा" (२।३७-३८) इति, "हीनताऽसम्भवो लिङ्गवचोभेदो विपर्ययः । उपमानाधिकत्वं च तेनाऽसदृशताऽपि च । त इमे उपमादोषा सप्त मेधाविनोदिताः । सोदाहरणलक्ष्माणो वक्ष्यन्तेऽत्र च ते पृथक्" (२।३९-४०) इति "अवलोक्य मतानि सत्कवीनामवगम्य स्वधिया च काव्यलक्ष्म" (६।६४) इति च भामहेनैवोक्तत्वात्, भामहेन अन्यत्राऽपि (२।८६, ८८, ९३, ९४; ३।४,१२; ४।१२; ५।६९) परमतानां प्रदर्शितत्वाच्च ।

(ञ) अतः परं प्रायेण मुद्रितप्रकाशितग्रन्थकानां केषां चनाऽन्येषामपि महत्त्वपूर्णानां

काव्यनानाट्यविद्याग्रन्थकाराणां [illegible] यथामति कृत्वा परिचयः संक्षेपेण लिख्यते—

१. **शिलाली**—अयं नटसूत्रकारः पाणिनिना 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४।३।११०) इत्यत्र स्मृतः। अस्यान्यत्र उल्लेखो न दृश्यते।

२. **कृशाश्वः**—अयमपि नटसूत्रकारः पाणिनिना "कर्मन्दकृशाश्वादिनिः" (४।३।१११) इत्यत्र स्मृतः। अस्याप्यन्यत्र उल्लेखो न प्राप्यते।

३. **वृद्धभरतः**—अयं प्रसिद्धनाट्यशास्त्रकाराद् भरतात् प्राचीनो नाट्यशास्त्राचार्यः। अस्य ग्रन्थोऽधुना स्वतन्त्रो नोपलभ्यते। प्रसिद्धे भरतनाट्यशास्त्रे आनुवंश्याः (वंशपरम्परागताः) श्लोका आर्याश्च उल्लिखिताः सन्ति। ते चास्यैव वृद्धभरतस्य सम्भाव्यन्ते। प्रसिद्धे नाट्यशास्त्रे दशरूपकादौ च उपरूपकाणि [illegible]-मूलकानि नृत्यगेयरूपकादिरूपाणि च न सङ्गृहीतानि। तानि च वृद्धभरतकोहलादिग्रन्थानुसारेणैव भामहेन सूचितानि, अभिनवगुप्तेन नाट्यरूपत्वेन प्रतिपादितानि, हेमचन्द्रेण काव्यानुशासने प्रोक्तानि, [illegible] नाट्यदर्पणवृत्तौ सङ्गृहीतानि, शारदातनयेन भावप्रकाशने प्रतिपादितानि, विश्वनाथेन च साहित्यदर्पणे प्रोक्तानीति विद्वांसः सम्भावयन्ति। तथा हि भामहः—"नाटकं द्विपदी-शम्या-रासक-स्कन्धकादि यत्। उक्तं तदभिनेयार्थमुक्तोऽन्यैस्तस्य विस्तरः" (१।२४) इति। अभिनवगुप्तोऽपि नाट्यशास्त्रस्य चतुर्थेऽध्याये २६०—२७० श्लोकव्याख्यानावसरे डोम्बिका-प्रस्थान-शिङ्गक-भाणिका-राग-काव्यादेः [illegible] भरतासङ्गृहीतस्यापि नाट्यरूपत्वमुक्तवान्, तदुक्तं चिरन्तनैरित्युक्त्वा डोम्बिकादिलक्षणानि च प्रदर्शितवान्। हेमचन्द्रोऽपि काव्यानुशासने—पाठ्यं (प्रेक्ष्यं काव्यम्)— नाटक-प्रकरण-नाटिका-[illegible]-ईहामृग-डिम-व्यायोग-उत्सृष्टिकाङ्क—प्रहसन-भाण-वीथी-सट्टकादि, गेयं (प्रेक्ष्यं काव्यम्)-डोम्बिका-भाण-प्रस्थान-शिङ्गक-भाणिका-प्रेरण-रामाक्रीड-हल्लीसक-रासक-गोष्ठी-श्रीगदित-राग-काव्यादि इत्यत्रोल्लिखितवान्, वृत्तौ लक्षणैः प्रतिपादितवांश्च। रामचन्द्रगुणचन्द्रौ च नाट्यदर्पण-वृत्त्यन्ते यदाहुरित्युक्त्वा सट्टकादिलक्षणानि प्रदर्शितवन्तौ। सङ्कलने च प्राचीनैरुक्तानि उपरूपकाणि अष्टादशतोऽधिकानि भवन्ति, विश्वनाथेन तु कथम् "अष्टादश प्राहुरुपरूपकाणि मनीषिणः" (६।६) इत्युक्तमिति न विज्ञायते।

४. **तण्डुः**—अयं नाट्याचार्यो भरतमुनिना उल्लिखितः (४।२६०)। ताण्डवं नाम नाट्यमनेनैव प्रचारितत्वात् तेन नाम्ना व्यवहृतं भवतीति च विज्ञायते। भरतपुत्रेष्वप्येकस्तण्डुरस्ति (ना. शा. १।२६)।

५. **नन्दिभरतो नन्दिकेश्वरो वा**—काव्यमालासंस्करणे नाट्यशास्त्रस्य पश्चाद्भागो नन्दिभरतकृतत्वेनोल्लिखितः। नन्दिभरतोक्तसङ्करहस्ताध्यायो मद्रासग्रन्थसूच्यामुल्लिखितोऽस्ति। नन्दिकेश्वरमते तालाध्याय इति भरतार्णव इति च ग्रन्थौ श्रूयेते। नन्दि-

ोऽभिनयदर्पणश्च कलिकातानगरे (१९३४ खैस्ताब्दे) मुद्रितः प्रकाशितश्च।
न्नभिनयदर्पणे भरतस्य (वृद्धस्य ?) उल्लेखः प्राप्यते (श्लो. १२, १२८, १४९,
६२ इत्यादौ)। अयं नन्दिभरतो नन्दिकेश्वर एवेति विद्वांसः सम्भावयन्ति।
अभिनवभारत्यामपि उल्लिखितमस्ति (गायकवाडसंस्करणे भा० १, पृ०
नन्दिकेश्वरश्च रसाचार्यत्वेन राजशेखरेणोल्लिखितोऽस्ति। कामसूत्राचार्यत्वेन
चरो नन्दी मल्लनागेन वात्स्यायनेनोल्लिखितोऽस्ति। (१।१।८)। एतेषामैक्यं
ति सुधीभिर्विवेक्तव्यम्।

मतङ्गभरतः—मतङ्गमुनेः द्वौ श्लोकौ अभिनवभारत्यां त्रिंशेऽध्याये उल्लिखितौ
शार्ङ्गदेवेनापि सङ्गीतरत्नाकरे अयं स्मृतः (१।३।२४-२५; १।४।९; १।८।१९)।
न ... वा नृत्ताभिमतिनाऽप्ययं स्मृतः (१।५१)। अस्य बृहद्देशी
नो ग्रन्थः त्रिवेन्द्रमग्रन्थमालायां (१९२८ खैस्ताब्दे) मुद्रितः प्रकाशमायातः।

भरतः—अस्योल्लेखः कालिदासेन विक्रमोर्वशीये—"मुनिना भरतेन यः प्रयोगो
टरसाश्रयः प्रयुक्तः। ललिताभिनयं तमद्य भर्ता मरुता द्रष्टुमनाः सलोकपाल."
। अतो भरतः कालिदासात् प्राचीनः। भरतनाट्यशास्त्रे शकयवनपल्लवादीनां
... नाट्यशास्त्रस्य वर्तमानं रूपं विक्रमाब्दानां द्वितीये शतके
ति विवेचकाः सम्भावयन्ति। भरतः खैस्ताब्दानां तृतीयाच् शतकाद् अर्वाचीनो
महाशयः। भरतनाट्यशास्त्रे च गायकवाडसंस्करणे सप्तत्रिंशदध्यायाः सन्ति।
म्बासंस्करणे प्रथमेऽध्याये—नाट्योत्पत्तिः, द्वितीये—नाट्यमण्डपस्वरूपम्, तृतीये-
ूजनम्, करणा- (हस्तपादसमायोगा-) ऽङ्गहार-रेचक-(भावमुद्रा) स्वरूपाणि,
र्वरङ्गविधानम् नान्द्यादिकम्, षष्ठे—रसस्वरूपसङ्ख्यानामादिकम्, सप्तमे—भाव-
पम्, अष्टमे—अङ्गाभिनयः, नवमे दशमे च—उपाङ्गाभिनयः, एकादशे—चारी-
(एकपादप्रचारविधानम्), ... च, द्वादशे—मण्डलसङ्ख्या-
योदशे—गतिप्रचारः (नटादिरङ्गभूमिप्रवेशप्रकारादिकम्), चतुर्दशे—कक्षाविभाग,
... अङ्कनियमाः, चतस्रः प्रवृत्तयः, सुकुमाराविद्धौ
गौ, लोकधर्मिणी नाट्यधर्मिणी च अभिनयपद्धतिः, पञ्चदश-षोडश-सप्तदशेषु—
भिनयः, स्वर-व्यञ्जन-सञ्ज्ञा-क्रिया-धातूपसर्ग-सन्ध्यादिविचाराः, छन्दांसि,
पा...रूपस्य काव्यस्य षट्त्रिंशल् लक्षणानि, ..., काव्यदोषाः,
श्च, अष्टादशे—भाषाविधानम्, ऊनविंशे—सम्बोधनप्रकार-नामनियन-समस्वरो-
त्र-काकु-वृत्तयः; ... एकविंशे-वस्त्ववस्था-ऽर्थप्रकृतिपञ्च-
नेरूपणम्, द्वाविंशे-भारत्यादिवृत्तिनिरूपणम्, त्रयोविंशे—आहार्याभिनयः (वेषभूषा-
चतुर्विंशे—वाचिकाङ्गिकसात्त्विकसामान्याभिनयः, भाव-हाव-हेला-लीला-विलास-
न्त्यादयः, आलाप-प्रलाप-विलापादयः, स्त्रीभेदाः, दश कामावस्थाः, नायिका-
पञ्चविंशे—वैशिक-वेश्या-गुण-प्रेमविह्वलतादिलक्षण-यौवनाद्यवस्था-प्रेमिलक्षण-

प्रकार-स्त्रीवशीकरणोपायाः, षड्विंशे-चित्राभिनयः, सप्तविंशे-अभिनयसिद्धिः, अष्टाविंशे-वाद्यप्रकाराः, सप्त स्वराः, ग्रामाः, मूर्छनाः, श्रुतयश्च, [illegible] स्वरजाति-विशेषादेर्विधानम्; त्रिंशे-सुषिरवाद्यम्, एकत्रिंशे-ताललयौ, द्वात्रिंशे-ध्रुवाणां विधानम्, तद्भाषागायकादिविधानम् त्रयस्त्रिंशे-मृदङ्ग-पणव-दर्दुरादयोऽवनद्धवाद्यभेदाः, चतुस्त्रिंशे-पुरुषाणां स्त्रीणां चोत्तममध्यमाधमप्रकृतयः, धीरोद्धतादयो नेतारः, महादेवी-देव्यादयः स्त्रियः, कञ्चुकीयवर्षवरादयः, नृपसेनापति-पुरो[illegible]-कुमाराः; पञ्चत्रिंशे—नटप्रकाराः, [illegible] सुकुमाराविद्धौ अभिनयौ, सूत्रधार-[illegible], षट्त्रिंशे-नाट्यविद्यायाः पृथिव्याम् अवतरणे आख्यायिका च प्रतिपादितानि। भरतनाट्यशास्त्रस्य टीकाकाराश्च उद्भट-भट्टलोल्लट-श्रीशङ्कुक-भट्टनायक-[illegible] मातृगुप्त-नान्यदेवादय। [illegible] टीका महत्त्वपूर्णा भूम्नांशेन प्रकाशिता च गायकवाडसंस्कृतग्रन्थमालायाम्। सागरनन्दिनो नाटकलक्षणरत्नकोशे तु "श्रीहर्ष-विक्रमनर[illegible]-राणाम्। एषां मतेन भरतस्य मतं विगाह्य घुष्टं मया समनुगच्छत रत्नकोशम्" इत्युक्तमिति राजा विक्रमः, गर्गः, अश्मकुट्टः, नखकुट्टः, बादरश्च भरतनाट्यशास्त्रस्य टीकाकाराः प्रतीयन्ते। भरतनाट्यशास्त्रमिदं काव्यमालायाम्, चौखम्बासंस्कृतग्रन्थमालायाम्, गायकवाडसंस्कृत-ग्रन्थमालायां च मुद्रितम्। तत्र च पाठेषु विसंवादो बहुषु स्थलेषु दृश्यते इति परीक्षकाः।

८. **कोहलः**—अयं भरतमुनिपुत्रेष्वेकतमः (ना० शा० १।२६) भरतनाट्यशास्त्रे "शेषं प्रस्तारतन्त्रेण कोहलः कथयिष्यति" इति "[illegible]। एतच्छास्त्रं प्रयुक्तं तु नराणां बुद्धिवर्धनम्" इति चास्योल्लेखोऽस्ति (३६।२४)। अयं कोहलो भरतसमकालोऽभिनवभारत्यां च स्थाने-स्थाने उल्लिख्यते (ना० शा० १।५६, २।१; ६।१०; गायकवाडसंस्करणे, प्रथमभागे १८०-८१-८२ पृष्ठेषु च)। दामोदरगुप्त-कृते कुट्टिनीमते (श्लो० ८१) शार्ङ्गदेवकृते सङ्गीतरत्नाकरे (१।१।१५), भावप्रकाशने, सिंहभूपालग्रन्थे, मल्लिनाथकृतकुमारसम्भवटीकायां चास्य उल्लेखोऽस्ति। हेमचन्द्रादिभिः कोहलः उपरूपककल्पयितृत्वेन चोक्तः। कोहलरहस्यम् (त्रयोदश अध्याय एव) कोहलीयाभिनयशास्त्रं चेति द्वौ कोहलग्रन्थौ मद्रासग्रन्थसूच्यां दृश्येते।

९. **दत्तिलः**—अयमपि भरतपुत्रेष्वेकतमः (ना० शा० १।२६)। अयं कुट्टनीमते (श्लो० १२२-२३) अभिनवभारत्याम् अष्टाविंशेऽध्याये, निश्शङ्कशङ्करेण सङ्गीतरत्नाकरे (१।१।१६) सिंहभूपालेन रसार्णवसुधाकरे चाऽयमुल्लिखित। अभिनवगुप्तेन दत्तिलस्य ध्रुवाविषयिका एक कारिका उद्धृताऽस्ति (गायकवाडसंस्करणे १ भा० २०५ पृ०)। दत्तिलकोहलीयम् इत्याख्यस्य ग्रन्थस्योल्लेखनमानन्दं देशराजेनोल्लिखितम्। दत्तिलस्यैकः सङ्गीतग्रन्थस्तु त्रिवेन्द्रम-संस्कृत-ग्रन्थमालायां (१९३० खैस्ताब्दे) मुद्रितः प्रकाशमागतोऽस्ति।

१०. **नखकुट्टः**—अयमपि भरतपुत्रेष्वेकतमः (ना० शा० १।३३)। सागरनन्दिनाऽपि पूर्वोदाहृते (भरतपरिचयान्ते) श्रीहर्षविक्रमेत्यादिके श्लोकेऽयं स्मृतः। विश्वनाथेनाप्यस्य नाममुद्धृतम् (६।३९–४०)।

११. **अश्मकुट्टः**—अयमपि भरतपुत्रेष्वेकतमः (ना० शा० १।३३)। सागरनन्दिनाऽयमपि पूर्वोदाहृते पद्ये उल्लिखितः।

१. **विष्णुगुप्तः कौटल्यः (चाणक्यः)**—अयं मौर्यचन्द्रगुप्तमन्त्री अर्थशास्त्रकारो विक्रमाब्दप्रारम्भात् प्राक् तृतीये शतके बभूव। अनेन स्वतन्त्रः काव्यशास्त्रग्रन्थो न कृतः, तथापि अर्थशास्त्रस्य अध्यक्षप्रचाराधिकरणे दशमेऽध्याये—"अर्थक्रमः सम्बन्धः परिपूर्णता माधुर्यम् औदार्यं स्पष्टत्वमिति लेखसम्पत्। तत्र यथावदनुपूर्वक्रिया प्रधानस्यार्थस्य पूर्वमभिनिवेश इत्यर्थस्य क्रमः। [illegible] उत्तरस्य विधानमासमाप्तेरिति सम्बन्धः। अर्थपदाक्षराणामन्यूनातिरिक्तता [illegible] परिपूर्णता। [illegible] माधुर्यम्। [illegible]। प्रतीतशब्दप्रयोगः स्पष्टत्वम्।" इति लेखसम्पत् प्रतिपादिता। इयञ्च लेखसम्पत् सर्वांशेन काव्येऽपि उपयुज्यते एव। एवं चोक्तः सन्दर्भो विष्णुगुप्तसमये [illegible] प्रतिनिधित्वं करोति, तस्या विद्यायाः प्रचारं च सूचयति।

१३. **रुद्रदामाभिलेखकारः**—अयं लेखकः १५० मिते खैस्ताब्दे आसीत्। अभिलेखोऽयं गुर्जरदेशस्य जुनागढमण्डलस्य गिरिनारपर्वतप्रदेशे प्राप्तः, उत्कीर्णलेखाञ्जलौ चायं प्रकाशितोऽस्ति। अयं च शिलालेखः द्विसप्तत्यां (७२) शकान्ताब्देषु गतेषु (वै०स० २०७) रचितः। अत्र च अभिलेखकारः स्फुटलघुमधुरचित्रकान्तशब्दसमयोदारालङ्कृतगद्यपद्यगोरुल्लेखं करोति। स चायमुल्लेखस्तदानीन्तन्याः काव्यविद्यायाः प्रतिनिधित्वं करोति, तदा तस्या विद्यायाः प्रचाराधिक्यं च सूचयति।

१४–१७. **काश्यपः, वररुचिः, ब्रह्मदत्तः, नन्दिस्वामी**—एते चत्वारो दण्डिनः प्राचीनाः अलङ्कारशास्त्रकाराः काव्यादर्शहृदयङ्गमायां [illegible] च यथायथम् उल्लिखिताः। किन्तु तेषां ग्रन्था नोपलभ्यन्ते, समयोऽपि न विज्ञायते।

१८. **मेधाविरुद्रो मेधावी वा**—अयं भामहेन 'त एत उपमादोषा सप्त मेधाविनोदिताः' (२।४०) इत्यत्र 'सङ्ख्यानमिति मेधाविनोत्प्रेक्षाऽभिहिता क्वचित्' (२।८८) इत्यत्र चोल्लिखितः। राजशेखरेण च चतुर्थेऽध्याये—'प्रतिभावतः पुनरपश्यतोऽपि प्रत्यक्ष इव, यतो [illegible] जात्यन्धाः कवयः श्रूयन्ते' इति [illegible] कृतः। नमिसाधुना च रुद्रटटीकाकारेण 'ननु दण्डि-मेधाविरुद्र-भामहादिकृतानि सन्त्येवालङ्कारशास्त्राणि तत् किमर्थमिदं पुनरिति पौनरुक्त्यदोषं क्रियाविशेषेण निरस्यन्नाह—यथा-युक्तीति' इत्यत्र (१।२), 'एत एव (नामाख्यातोपसर्गनिपाताः) चत्वारः शब्दविधा इति येषां सम्यङ् मतं तत्र तेषु नामादिषु मध्ये तैर्मेधाविरुद्रप्रभृतिभिः कर्मप्रवचनीयाः नोक्ता

भवेयुः' इत्यत्र (२।२), उन्मादे परिचारे च (११।२४) उल्लिखितोऽयम् । अयमलङ्कार-शास्त्रकारो बभूव, अस्य नमिसाधुसमये ('पञ्चविंशतिसंयुक्तैरेकादशसमाशतैः [११२५] । विक्रमात् समतिक्रान्तैः प्रावृषीदं समर्थितम्' इत्युक्तो नमिसाधुस[illegible]) उपलभ्यमानोऽभूदिति प्रतीयते । इदानी त्वस्य ग्रन्थो नोपलभ्यते । त्रिकाण्डशेषकारेण पुरुषोत्तमदेवेन व्याडेर्नामान्तरं मेधाविरुद्र[illegible] (२।७।२५), कालिदासस्य नामान्तरं च मेधारुद्र इत्युक्तम् (२।७।२६) । अयं मेधावी मेधाविरुद्रो वा व्याडिर्वा कालिदासो वेति तु वक्तुं न शक्यते ।

१९. **विष्णुधर्मोत्तरचित्रसूत्रकारः**—अस्य समयः ३५०–५७५ ख्रैस्ताब्दानां मध्ये इति काणे महाशयस्य मतम् । विष्णुधर्मोत्तरे सप्तदशैवालङ्काराः प्रतिपादिता इति विष्णुधर्मोत्तरचित्रसूत्रकारो भरतात् पश्चाद् दण्डिनश्च प्रागभूदिति काणेः । किन्त्वयं तर्को नातिसमीचीनः, उत्तरवर्त्तिनि ग्रन्थकारेऽपि 'मालोपमादिः सर्वोऽपि न ज्यायान् विस्तरो मुधा' (२।३८) इति वदति भामहे इव हेमचन्द्रे इव [illegible] संक्षेपरुचित्वस्य सम्भवात्, चित्रसूत्रसदृशे संग्रहात्मके ग्रन्थे संक्षेपस्य समुचितत्वाच्च । विष्णुधर्मोत्तरस्य उद्धरणानि अलबेरुनिना (१०३०ख्रै०), वल्लालसेनेन (११६९ ख्रै०), हेमाद्रिणा (१२६० ख्रै०) च दत्तानि । विष्णुधर्मोत्तरपुराणस्य तृतीये खण्डे (अंशे) अलङ्कारशास्त्रविषयाणां प्रतिपादनमस्ति । तत्र नाट्यशास्त्रविषये काव्यालङ्कारविषये च सङ्कलने १००० श्लोकाः सन्ति । तदतिरेकेण [illegible] गद्यरूपाः सन्तिः, यत्र [illegible] सन्ति । तत्र चित्रकला-मूर्तिकला-नाट्यकला-काव्यालङ्कारप्रतिपादकं शास्त्रं चित्रसूत्रमित्युच्यते । अयमंशो १८३४ शकाब्दे वेङ्कटेश्वरमुद्रणालयमुद्रिते विष्णुधर्मोत्तरपुराणे प्रकाशितोऽस्ति । इदानीमयं भागः पृथगपि प्रकाशितः । तत्र [illegible] सम्बन्धः, संस्कृत-प्राकृतापभ्रंशभेदविचारश्च; तृतीये-छन्दः, चतुर्थे-वाक्यपरीक्षा, पञ्चमे-अनुमानावयवाः, सूत्रव्याख्या, त्रीणि प्रमाणानि, स्मृतिः, उपमानम्, अर्थापत्तिः, षष्ठे तन्त्रयुक्तयः, सप्तमे–प्राकृतभेदाः, अष्टमे–देवादि-पर्यायशब्दाः, नवमे दशमे च–नामकोशः, एकादशे द्वादशे त्रयोदशे च लिङ्गानुशासनम्, चतुर्दशे–अलङ्काराः (सप्तदश एव), पञ्चदशे-काव्यलक्षणादिकम्, षोडशे–प्रहेलिकाः, सप्तदशे–रूपकाणि (द्वादश), नायिकाभेदाश्च, अष्टादशे गद्यप्रचुरे–स्वरग्राम-मूर्छनादयः. ऊनविंशे गद्यरूपे–वाद्यानि, मण्डलानि, अङ्गहाराः (अत्र-३६, भरते तु ३२ [४–२७]), करणानि (१०८), पिण्डीबन्धः, वृत्तयः, प्रवृत्तयश्च; विंशे–नाट्य-नृत्तभेदः, अभिनयाः, एकविंशे द्वाविंशे त्रयोविंशे च–शय्यासनस्थानकवर्णनम्, चतुर्विंश-पञ्चविंशयोः–आङ्गिकाभिनयाः, षड्विंशे–सङ्केताः, सप्तविंशे-आहार्याभिनयाः, अष्टाविंशे-सामान्याभिनयाः, ऊनत्रिंशे–रङ्गभूमौ नटानां गतिप्रचाराः, त्रिंशे-रसाः (नव नाट्ये रसाः स्मृताः), एकत्रिंशे–ऊनपञ्चाशद् भावाः, तत्र च त्रिपञ्चाशत्तमः श्लोकः—"बहूनां समवेतानां रूपं यस्य भवेद् बहु । स मन्तव्यो रसः स्थायी शेषाः सञ्चारिणः स्मृताः" इति; द्वात्रिंशे–

हस्तमुद्राः, त्रयस्त्रिंशे—नृत्यशास्त्रसम्बन्धिन्यो मुद्राः, चतुस्त्रिंशे—नृत्योत्पत्तिविचारः, पञ्च-त्रिंशे-चित्रसूत्रसम्प्रदायः, अवशिष्टेषु अध्यायेषु चित्रकलादयो विषयाः (३६-४३-चित्रकला, ४४-८५-मूर्तिकला, ८६-स्थापत्यम्) इति विषयाः सन्ति ।

२०. **श्रीमत्स्थविरः**—अनुयोगद्वारसूत्रकारोऽयं जैनः । अस्य ग्रन्थश्च प्राकृतगाथा-मयः । तस्य व्याख्यानं मलधारिणा हेमचन्द्रेण संस्कृते कृतम् । तत्र च नवसु काव्यरसेषु भयानकस्थाने व्रीडनको गण्यते । अस्य उल्लेखः अस्मदध्यापकश्रीयुत[illegible] [illegible] काव्यात्ममीमांसानामके ग्रन्थे कृतः (पृ० ८३, ३३४) ।

२१. **भट्टिः**—अस्य समयः ५९०—६५९ ख्रै० इति काणेमहाशयः । अयं वलभ्यां निवसति स्म । इयं च वलभी काठियावाडप्रान्तस्थम् आधुनिकं वलानगरमिति संभाव्यते । अयं वत्सभट्टितो भर्तृहरितश्च भिन्न एवेति विवेचकाः । अनेन यद्यपि स्वतन्त्रोऽलङ्कार-ग्रन्थो न कृतस्तथापि [illegible] भट्टिकाव्यप्रसन्नकाण्डो (१०-१३ सर्गात्मकः) विरचितः । तत्राऽनुप्रासादयोऽलङ्काराः (काण्डस्यैव प्रसन्नत्वात् प्रसादगुणश्च), प्रबन्धविषयो भाविकालङ्कारः [illegible] विशेषेण समावेशिता इति अलङ्कारशास्त्र-स्येतिहासेऽपि भट्टेरुल्लेखः कार्यो भवति । भामहग्रन्थे भट्टिकाव्यप्रसन्नकाण्डे च अलङ्का-राणा क्रमः प्रायेण समानः, तथापि कुत्रचिद् विशेषोऽप्यस्ति । अप्रस्तुतप्रशंसा भट्टिना नोदाहृता भामहेन तु प्रतिपादिता, हेतुः वार्ता चालङ्कारौ भट्टिना उदाहृतौ (१०।४६, ७३), भामहस्तु तौ न स्वीचक्रे (२।८६।८७) । भट्टिना सूक्ष्मोऽलङ्कारो नोदाहृतो दण्डिना तु स उत्तमालङ्कारतया प्रतिपादितः (२।२६४), लेशोऽपि तथा (२।२६५—७२) । [illegible] भामहेन—'काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् । उत्सवः सुधियामेव हन्त दुर्मेधसो हताः' (२।२०) इत्युक्तम् । भट्टिरपि—'व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् । हता दुर्मेधसश्चात्र विद्वत्प्रियतया मया' (२२।३४) इत्युवाच । अत्र कस्मात् कः प्रेरणां प्राप्तवानिति निर्णयो दुष्करः । भट्टिरेव प्रथमागामीति काणेमहाशयस्य मतम् ।

२२. **भामहः**—भामहदण्डिनोः पौर्वापर्ये महान् विवादोऽस्ति । तथापि अभिनवगुप्तेन लोचने (१।१, १३; २।५ इत्यादौ), मम्मटेन 'रूपकादिरलङ्कारः' इत्यादौ 'सैषा सर्वत्र वक्रोक्तिः' इत्यादौ च, रुय्यक-विद्यानाथादिभिश्च स्वस्वग्रंथे भामहस्योल्लिखितत्वात्, नमि-साधुनोल्लिखितत्वेऽपि पूर्वोक्तैर्ग्रन्थकारैर्दण्डिनस्त्वनुल्लिखितत्वाद् भामह एव अभ्यर्हिततया ज्येष्ठ इति तस्यैवाऽत्र प्रथममुल्लेखः क्रियते । भामहदण्डिनोः पौर्वापर्येऽधिकं जिज्ञासवः काणेमहाशयस्य ग्रंथं पठन्तु । भामहस्य समयो दिङ्नागवसुबन्ध्वोर्मध्ये (५००-६२०ख्रै०) इति केचित् । काणेमहाशयस्तु ६५०-७५० ख्रैस्ताब्दमध्ये दण्डिभामहौ बभूवतुरिति मन्यते स्म । भामहेन मङ्गलाचरणे—"प्रणम्य सार्वं सर्वज्ञम्" इत्युक्तमिति स बौद्ध इति केचित् ।

अन्ये तु 'भूभृता पीतसोमाना न्याय्ये वर्त्मनि तिष्टताम्' (४।४८) इत्युदाहृत्य भामहेन स्वस्य वैदिकधर्मानुरागित्व मूचितम्, मङ्गलपद्यमपि शिवनमस्कारवत्त्वेनापि उपपन्नमिति तथैव व्याख्येयमिति च स वैदिकधर्मानुयायी एवेति मन्यन्ते। भामहस्य ग्रन्थास्तु—(क) छन्दोग्रन्थ कश्चन भामहेन रचित इति राघवभट्टकृताभिज्ञानशाकुन्तलटीकातो वृत्त-रत्नाकरटीकातश्च ज्ञायते। (ख) प्राकृतप्रकाश प्राकृतमनोरमापरपर्यायो वररुचिकृत-प्राकृतलक्षणसूत्रव्याख्यानरूपो ग्रन्थोऽप्यनेनैव कृत इति केचिद् वदन्ति। भामहस्य काव्यालङ्कारस्तु उपलभ्यमानेषु स्वतन्त्रेषु काव्यालङ्कारग्रन्थेषु प्रथम इति प्राय सर्वैर्विद्वद्भि स्वीक्रियते। अस्मिन् ग्रन्थे च—काव्यप्रयोजनम्, काव्यहेतु, शब्दार्थालङ्कारौ, सर्गबन्धादिकाव्यभेदा, वैदर्भगौडौ मार्गौ, नेयार्थादयो दोषा, दोषपरिहारा, गुणा, अनुप्रासादय शब्दालङ्कारा, रूपकादयोऽर्थालङ्कारा, (उपमादोषा), प्रेय प्रभृतयोऽलङ्कारा, अपार्थादयो दोषा, प्रतिज्ञाहीनतादयो दोषा प्रमाणानि, प्रमाणदोषा, प्रतिज्ञाभेदा, काव्यहेतुदोषा अज्ञानसशयादय, दोषाणा हेयत्वम्, वक्रोक्त्यपेक्षा, व्याकरणज्ञानावश्यकतेति प्रमुखा विषया प्रतिपादिता। अस्य च काव्यालङ्कारग्रन्थस्य भट्टोद्भटेन भामहविवरणनाम्नी टीका कृतेति प्रतीहारेन्दुराजेन काव्यालङ्कारसारसग्रहटीकायाम् अभिनवगुप्तेन ध्वन्यालोकलोचने च उल्लेख कृत, सा तु टीका अद्यावधि अनुपलभ्यमानैव।

२३ **दण्डी**—अय प्रसिद्धो गद्यकवि अलङ्कारशास्त्रकारश्च। **अस्य समय**—अनेन अवन्तिसुन्दरीकथाप्रारम्भे "भिन्नस्तीक्ष्णमुखेनापि चित्र बाणेन निर्व्यथ। व्याहारेषु जहौ लीला न मयूरो (मनागपि)" इति लिखितमित्यय बाणादर्वाचीन। बाणाश्रयस्य हर्षवर्धनस्य समय खैस्ताब्दाना सप्तमस्य शतकस्य पूर्वार्धम् (६०६-६४८)। तस्माद् दण्डी अर्वाचीन। दण्डिन प्रपितामहो दामोदरो भारवेर्मित्र बभूवेति केचिद् वदन्ति। अन्ये तु भारविर्दण्डिन प्रपितामह एवेति मन्यन्ते। दण्डिन पितामहो मनोरथ, पिता च वीरदत्त इत्यवन्तिसुन्दरीकथातो ज्ञायते। **अस्य देश**—अस्य पूर्वजा आनन्दपुरे (गुर्जरदेशे) निवसन्ति स्म। ततस्ते अचलपुर (वर्तमानबरारमण्डलान्तर्गतम् एचिलपुरम्) गता। तत पल्लववशस्य सिंहविष्णोरामन्त्रणात् ते काञ्ची गता। दण्डी काञ्च्यामेव जातः। **अस्य ग्रन्था**—अवन्तिसुन्दरीकथा, द्विसन्धानकाव्यम्, दशकुमारचरितम्, काव्यादर्शश्च। तत्र काव्यादर्शे प्रथमे परिच्छेदे—काव्यमाहात्म्यम्, काव्यशरीरम्, गद्यपद्यमिश्र-सर्गबन्धादिकाव्यभेदाः, आख्यायिकाकथाभेदविचार, भाषाविचार, प्रेक्ष्यार्थश्रव्यकाव्य भेदौ, वैदर्भगौडीयमार्गौ, वैदर्भमार्गस्य दश गुणाः, (अनुप्रासयमकौ अग्राम्यता च), काव्यहेतु', वागुपासनफलम्, द्वितीये परिच्छेदे—अलङ्कारलक्षणम्, स्वभावोक्त्यादयोऽर्थालङ्कारा' पञ्चत्रिंशत्, तेषा प्रभेदाश्चानेका, सन्ध्यङ्ग-वृत्त्यङ्ग-लक्षणादीनामप्यलङ्कारत्वम्, तृतीये परिच्छेदे—यमकानि, गोमूत्रिकाबन्धा, अर्धभ्रम, सर्वतोभद्रम्, स्वरनियमा, स्थाननियमा, वर्णनियमा', प्रहेलिकाभेदा., अपार्थादयो दश काव्यदोषा, प्रतिज्ञा हेतु-दृष्टान्तहानाना विचारस्य कर्कशत्वेन अकार्यत्वम्, काव्यदोषलक्षणोदाहरणानि, पाषाणा

क्वचिददोषत्वम्, ग्रन्थप्रतिपादितार्थनिर्देश, ग्रन्थोपयोगफल चेति विषया सन्ति। काव्यादर्शस्य बौद्धरत्नश्री (१०७५-५०) कृता टीका दर्भङ्गाया प्रकाशिता (१९५७ ख्री०), प्रो० रङ्गाचार्यसम्पादिता तरुणवाचस्पतिकृता टीका, हृदयङ्गमा टीका, वादिजङ्घालकृता श्रुतानुपालनी टीका च श्रीनिवासमुद्रणालये तिरुवय्यरुप्रदेशे मुद्रिता, वादिसिंहजैनेन त्रिभुवनचन्द्रोपनामकेन कृता टीका वङ्गलिप्या मुद्रिता, रामचन्द्रमिश्रकृता प्रकाशटीका वाराणस्या मुद्रिता, अन्या अप्रकाशिता टीकाश्च सन्ति। सिंहलभाषामये सियवसलकरे (स्वभाषालङ्कारे), कन्नडभाषामये कविराजमार्गे च दण्डिन काव्यादर्शस्य महान् प्रभावो दृश्यते इति परीक्षका वदन्ति। द्विसन्धानकाव्य दण्डिन प्रसिद्धस्तृतीयो ग्रथ (न तु अवन्तिसुन्दरीकथा) इति भोजराजस्य शृङ्गारप्रकाशे उक्तमिति काणेमहाशय। प्रसिद्धेषु त्रिषु ग्रन्थेषु अगणिताऽपि अवन्तिसुन्दरीकथा दण्डिन एव कृतिरित्यपि स एव वदति।

२४ **उद्भटो भट्टोद्भटो वा**—अय कश्मीरदेश। अय राज्ञो जयापीडस्य पण्डित-सभापति इति कश्मीरराजतरङ्गिण्या कल्हणेनोल्लिखितमस्ति यथा—"विद्वान् दीनारलक्षेण प्रत्यह कृतवेतन। भट्टोऽभूदुद्भटस्तस्य भूमिभर्तु सभापति।" इति (४।४९५), जयापीडस्य समयश्च ख्रैस्ताब्दानाम् अष्टमनवमशतकयो सन्धि (७७९–८१३ ख्रै०) इति अस्याऽपि स एव समय। अनेन भामहविवरणम्, कुमारसम्भवकाव्यम्, काव्यालङ्कारसारसङ्ग्रहश्चेति त्रयो ग्रन्था कृता। तत्र भामहविवरण नामशेषमित्युक्तमेव। कुमारसम्भवकाव्यमपि सम्पूर्णं तु नोपलभ्यते, किन्तु भट्टोद्भटेन अलङ्कारसारसङ्ग्रहे सर्वाण्यप्युदाहरणानि स्वकाव्यादेवोद्धृतानि इति तत्काव्यस्य बहव श्लोकास् तत्रोपलभ्यन्ते। अय सङ्गीतरत्नाकरकारेण शार्ङ्गधरेण भरतनाट्यशास्त्रटीकाकारत्वेनाप्युल्लिखित, अभिनवभारत्यामप्युद्भटसम्मता नाट्यशास्त्रपाठा निर्दिष्टा, किन्तु साऽपि टीकाऽनुपलब्धैव। काव्यालङ्कारशब्देन यद्यपि काव्यलक्षणशास्त्रमपि उच्यते तथापि भट्टोद्भटग्रंथे गुणदोषयोर्विचारस्याप्यभावाद् अलङ्कारसम्प्रदायानुसारमपि तस्य ग्रन्थ पुनरुक्तवदाभासाद्यलङ्कारमात्रप्रतिपादक प्रकरणग्रथ एव। 'गड्डरिकाप्रवाहेणैवैषा (गुणालङ्काराणाम्) भेद' इति सिद्धान्ताद् गुणानामनुल्लेखेऽपि काव्ये परिहर्तव्या दोषास्तु तत्र प्रतिपादनीया एव। अभावस्य सामग्रीघटकत्वाभावाद् दोषाभावस्यापि काव्यसामान्यघटकत्वेन तन्निरूपण विनाऽपि काव्यलक्षणनिरूपण सम्पूर्णमेवेति चेद् अस्तु तथा सति आकरग्रथत्व काव्यालङ्कारसारसङ्ग्रहस्यापि। तत्र काव्यालङ्कारसारसङ्ग्रहे प्रथमे वर्गे—पुनरुक्तवदाभास, छेकानुप्रास, परुषा, उपनागरिका, कोमला (ग्राम्या) च वृत्ति (त्रिविधानुप्रासत्वेनोक्ता), लाटानुप्रास, चतुर्विधानि रूपकाणि, उपमा, आदिमध्यान्तदीपका, प्रतिवस्तूपमा, द्वितीये—आक्षेप, अर्थान्तरन्यास, व्यतिरेक, विभावना, समासोक्ति, अतिशयोक्ति, तृतीये—यथासङ्ख्यम्, उत्प्रेक्षा, स्वभावोक्ति, चतुर्थे—प्रेय, रसवत्, ऊर्जस्वि, पर्यायोक्तम्, समाहितम्, द्विविधम् उदात्तम्, द्विविध श्लिष्टम्, पञ्चमे—अपह्नुति, विशेषोक्ति, विरोध, तुल्ययोगिता, अप्रस्तुतप्रशसा,

व्याजस्तुति', निदर्शना, उपमेयोपमा, सहोक्ति, चतुर्विध' सङ्कर', परिवृत्ति, षष्ठे—अनन्वय, ससन्देह, संसृष्टि, भाविकम्, काव्यलिङ्गम्, दृष्टान्त इति विषया सन्ति। तत्र उद्भटेन भामहोक्ता स्वरूप-यमकोपमारूपकोत्प्रेक्षावयवादय केचनालङ्कारास्त्यक्ता, भामहेनास्पष्ट प्रतिपादिताना श्लिष्ट-रसवत्-प्रेय-उर्जस्वि-समाहितालङ्काराणा स्पष्टीकरण सम्यक् कृतम्, पुनरुक्तवदाभास-छेकानुप्रास-लाटानुप्रास-प्रतिवस्तूपमा-दृष्टान्त-काव्यहेतु-(काव्यलिङ्ग) सङ्करालङ्कारा स्वोपज्ञतया प्रकाशिता। काव्यालङ्कारसार-सङ्ग्रहे कौङ्कणस्य मुकुलभट्टशिष्यस्य प्रतीहारेन्दुराजस्य टीकाऽस्ति। सा च निर्णयसागर-मुद्रणालये मुद्रिता प्रकाशमागता, बम्बइ-संस्कृत-ग्रन्थमालाया च सा मुद्रिता अयं प्रतीहारेन्दुराज उद्भटानुगामी ध्वनिमलङ्कारेऽन्तर्भावयति। अतोऽयं ध्वनिवादिनोऽभिनवगुप्तोपाध्यायाद् भट्टेन्दुराजाद् भिन्न एवेति सुशीलकुमारदेमहाशय' प्रतिपादयति।

२५ **वामन**—अयं कश्मीरराजस्य जयादित्य (जयापीड)स्य मन्त्री बभूवेति अस्यापि समयो जयापीडस्यैव समय (७७९–८१३ ख्रै०), उक्त हि कश्मीरराजतरङ्गिण्याम्—"मनोरथ शङ्खदत्तश्चटक सन्धिमास्तथा। बभूवु कवयस्तस्य वामनाद्याश्च मन्त्रिण" इति (४।४९७)। अस्य देशश्च कश्मीर एव। अस्य एक एव ग्रन्थ काव्यालङ्कारसूत्र-नामकः सोदाहरणवृत्तिसहित उपलभ्यते। अयं वामन, काशिकाया अष्टाध्यायीवृत्ते प्रथमद्वितीयपञ्चमषष्ठाध्यायाना कर्ता वामन, विश्रान्तविद्याधरव्याकरणस्य प्रवक्ता वामन, स्वोपज्ञवृत्तियुतस्य लिङ्गानुशासनस्य कर्ता वामनश्च एक एव पुरुषो भिन्ना पुरुषा वेत्यत्र केचन सशेरते, केचन भ्राम्यन्ति, किन्तु काव्यालङ्कारसूत्रकार-लिङ्गानुशासनकारयोरैक्य सम्भवति नान्ययोरितिविवेचका। काव्यालङ्कारसूत्राणा तद्वृत्तेश्च रचयिता वामन एव, उक्त हि तेन—"काव्यालङ्कारसूत्राणा स्वेषा वृत्तिर्विधीयते" इति। उदाहरणानि तु तेन महता ग्रन्थेभ्य सङ्कलितानि, कानि चित् तु स्वान्येव पद्यान्यपि उपन्यस्तानि। काव्यालङ्कारसूत्रे शरीराधिकरणम्, दोषदर्शनाधिकरणम्, गुणविवेचनाधिकरणम्, अलङ्कारिकाधिकरणम्, प्रायोगिकाधिकरणम् इति पञ्च अधिकरणानि सन्ति। पञ्चस्वप्यध्यायेषु अध्यायविभागोऽपि अस्ति। तत्र शरीराधिकरणे काव्यस्य प्रयोजनम्, अधिकारी, आत्मा, रीतिभेदा, काव्यप्रकाराश्च निरूपिता। प्रायोगिकाधिकरणे शब्दप्रयोगविषयको विचार, शुद्धाशुद्धशब्दविचारश्च कृतोऽस्ति। अन्येषु अधिकरणेषु नामानुसार विषया सन्ति। काव्यशरीर-दोष-गुणा-ऽलङ्काराणा युक्तियुक्तक्रमविभागादिना विवेचने वामन अग्रेसरो दृश्यते। ध्वनिवादोदयात् पूर्वमस्य विवेचनम् अतीव युक्तियुक्त दृश्यते स्मेति विज्ञायते।

२६ **रुद्रट**—अस्य समय ख्रैस्ताब्दाना नवमस्य शतकस्य मध्यो भाग। राज-शेखर-प्रतीहारेन्दुराज-धनिक-मम्मटादिभिरस्य उल्लेख कृत इत्ययम् अलङ्कारशास्त्रे मान्य आचार्य'। अस्य पितु' नाम वामुकभट्ट इति। अस्य नामान्तरं शतानन्द इति। रुद्रट-नाम्नाऽयं काश्मीर प्रतीयते। अस्य काव्यालङ्कारो नाम काव्यलक्षणशास्त्रग्रन्थोऽस्ति। आर्यामयोऽय ग्रन्थ'। अत्र च षोडश अध्यायाः सन्ति। तत्र प्रथमेऽध्याये—काव्यप्रयो-

जनम्, काव्यहेतु-शक्ति-व्युत्पत्त्यभ्यासा , द्वितीये—काव्यलक्षणम्, तिस्रो रीतय , काव्योपयुक्त वाक्यम्, प्राकृतसस्कृतादयो भाषा , वक्रोक्त्यनुप्रासयमकश्लेषचित्रालङ्कारा , अनुप्रासस्य मधुरा ललिता प्रौढा परुषा भद्रा चेति वृत्तय , तृतीये—यमकानि, चतुर्थं—श्लेप , पञ्चमे—चित्रालङ्कारा , मात्राबिन्दुच्युतकादयश्च, षष्ठे—शब्ददोपा , सप्तमे—शब्दार्थविचार , अर्थालङ्कारमूलतत्त्वपरिगणनम्, वास्तवमूलास्त्रयोविंशतिरलङ्काराः, अष्टमे—औपम्याश्रिता. एकविंशति अलङ्कारा , नवमे—अतिशयमूला द्वादश अलङ्कारा , दशमे—श्लेषमूला अलङ्कारा (दश शुद्धश्लेपभेदा), अलङ्कारसङ्करप्रकाराश्च, एकादशे—नव अर्थदोषाः, चत्वार उपमादोषाः, द्वादशे—दशाना रसाना लक्षणानि (दशमो रस प्रेयान्), शृङ्गारभेदौ, नायकगुणसहायाश्च, त्रयोदशे-सम्भोग-शृङ्गारो नायिकाचेष्टाश्च, चतुर्दशे-विप्रलम्भशृङ्गार , नायिकाप्रसादनोपाया , पञ्चदशे-वीरादयो रसा , षोडशे-महाकाव्यकथाख्यायिकादिकाव्यप्रकारा इति विषया सन्ति । रुद्रटेन सर्वप्रथम सालङ्कारत्वात् पृथगेव सरसत्व काव्यस्यावश्यकमिति सामान्येनोक्तम् (१।४; १३।१, २, १४।३८ १५।२१) (सर्गबन्धप्रसङ्गे तु भामहेनाऽपि—"युक्त लोकस्वभावेन रसैश्च सकलै पृथक्" (१।२१) इत्युक्तम्, दण्डिनापि—"रसभावनिरन्तरम्" (१।१८) इत्युक्तमेव अत एव चानेन रसवदादयोऽलङ्कारा पृथक् न प्रतिपादिता , अर्थालङ्काराणा वामनससूचित समुचित वर्गीकरण सम्यक् कृतम्, प्रेयानिति दशमो रस प्रतिपादित , निर्वेदादौ अपि रसत्वमनुमतम्, समुच्चय-भाव-(वस्तुध्वनि)-विषमा-ऽनुमान-परिकर-परिसङ्ख्या-कारणमाला-ऽन्योन्यो-त्तर-सारा-ऽवसर-मीलितै-ऽकावली-मत-प्रतीपो-ऽभयन्यास-भ्रान्तिमत् - प्रत्यनीक-पूर्व-साम्य-स्मरण-विशेष-तद्गुणा-ऽधिका-ऽसङ्गति-विहित-व्याघात-हेत्व-ऽर्थश्लेपाणामलङ्काराणा स्वोपज्ञ प्रतिपादन कृतम् अनेन व्याजस्तुतिः व्याजश्लेष इति (१०।१०), स्वभावोक्ति जाति इति (९।३), उदात्तोऽवसर इति (७।१०३) उच्यते । अस्य टीकाकारा काश्मीरको वल्लभदेव , नमिसाधु , आशाधरश्चेति त्रय । तत्र ११२५ वैक्रमाब्दे (१०६८ ख्रै०) नमिसाधुना कृता टीका उपलभ्यते, काव्यमालाया प्रकाशिता च ।

२७. **रुद्रभट्ट**—अय रुद्रटादन्य इति काणे । अनन्य इति केचित् । भट्टवामुकसूनो रुद्रटस्य रुद्रभट्टत्व नाऽसम्भाव्यम् । अन्यत्वपक्षेऽस्य समय ख्रैस्ताब्दाना दशमशतकोत्तरार्धम् एकादश शतक वा (९५९–११०० ख्रै०) । अस्य ग्रन्थ शृङ्गारतिलकमिति । तत्र प्रथमे परिच्छेदे—शृङ्गाररसभावनायकादिनिरूपणम्, द्वितीये-विप्रलम्भभेदाना नायिकाप्रसाधनविधीना च निरूपणम्, तृतीये—अन्येषा रसाना कैशिक्यादिवृत्तीना च निरूपणमस्ति ।

२८ **आनन्दवर्धन**—अयं कश्मीरराजस्याऽवन्तिवर्मण समयेऽभूदिति अस्य समयोऽपि अवन्तिवर्मणः समय एव (८५५–८८४ ख्रै०), तदुक्त कश्मीरराजतरङ्गिण्याम्—"मुक्ताकण शिवस्वामी कविरानन्दवर्धन । प्रथा रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मण. ।" इति (५।४) । अय कश्मीरज एव । अस्य ग्रन्था—देवीशतकम् (स्तुतिकाव्यम्), विषमबाणलीला, अर्जुनचरितम्, तत्त्वालोक. (ब्रह्माद्वैतग्रन्थ.), प्रमाणविनिश्चयटीकाविवृतिर्नाम

बौद्धग्रन्थटीका, ध्वन्यालोकश्चेति षड् विज्ञायन्ते। तत्र ध्वन्यालोके ध्वनिविरोधिन सिद्धान्तान् निराकृत्य ध्वनि सम्यक् सप्रपञ्च प्रतिपादित। काव्ये रसगुणालङ्काराणा रसध्वनिवाद्यभिमता महत्त्वतारतम्यव्यवस्थाऽपि सम्यक् कृता। गुणाना त्रित्व रसधर्मत्व च सम्यग् व्यवस्थापितम्। काव्ये रस-कथावस्तु-सन्धि-सन्ध्यङ्ग-घटनादिव्यवस्थाया समीचीन सिद्धान्त स्थिरीकृत। काव्ये नवनवार्थस्य सृष्टेरुपाय प्रदर्शित। अनुकरणेऽपि नवीनतासम्भव सूचित। ध्वन्यालोके आनन्दवर्धनस्य शैली प्राञ्जला, पाण्डित्य प्रौढम्, प्रतिपादन विशदम्, विचार स्वोपज्ञश्च। भारतवर्षीयकाव्यविचारशास्त्रे ध्वन्यालोकतुल्योऽन्यो ग्रन्थो नास्ति। राजशेखरेणाऽपि पुरैवोक्तम्—"ध्वनिनाऽतिगभीरेण काव्यतत्त्वप्रवेशिना। आनन्दवर्धन कस्य नासीदानन्दवर्धन।" इति, (जह्लणस्य सूक्तिमुक्तावलौ राजशेखरस्येतीद पद्य पठ्यते, गायकवाडग्रन्थमालासस्करणे, पृ० ४६)। ध्वनिसम्प्रदायपरमाचार्य कवि आनन्दवर्धन पण्डितराजजगन्नाथेनाऽपि आलङ्कारिकसरणिव्यवस्थापक इति सम्मान्यते (आक्षेपप्रकरणे)। ध्वन्यालोके त्रयो विभागा सन्ति—कारिका, वृत्ति, उदाहरण चेति। तत्र कारिका-वृत्त्यो कर्ता एक एवाऽऽनन्दवर्धन इति सातकडिमुखोपाध्यायप्रभृतय केचित् मन्यन्ते। ते च 'इति काव्यार्थविवेको योऽय चेतश्चमत्कृतिविधायी। सूरिभिरनुसृतसारैरस्मदुपज्ञो न विस्मार्य' इति पद्य ध्वन्यालोकवृत्तिस्थ प्रमाणत्वेनोपन्यस्यन्ति, तत्समर्थनाय राजशेखर-कुन्तक-महिमभट्ट-क्षेमेन्द्राद्युक्तीश्च निर्दिशन्ति। उक्ते पद्ये आनन्दवर्धनेन ध्वनिसिद्धान्तोऽस्मदुपज्ञ इत्युक्तमिति सर्वथा ध्वनिसिद्धान्तोद्भावक स एव नाऽन्य इत्यपि तेषामभिप्राय किन्तु 'इति काव्यार्थविवेक इत्यादिक पद्य प्राचीनेषु बहुषु हस्तलिखितेषु पुस्तकेषु नोपलभ्यते इति काणेमहाशयो भणति। 'काव्यस्यात्मा ध्वनिरिति बुधैर्य समाम्नातपूर्व' इत्यनेन सहाऽपि अस्य 'इति काव्यार्थविवेक' इत्यादे. समन्वयो दुष्कर। काणेमहाशयेन कारिकाकारवृत्तिकारयोर्भेदस्य प्रतिपादकानि प्रमाणानि सङ्कलितानि। तानि च लोचनटीकाया प्रदेशविशेषा (१।१९, २।१, २।२३, ३।१, ३।३-४, ३।६), 'विच्छित्तिशोभिना–' 'अव्युत्पत्तिकृतो दोष'—'अनौचित्यादृतेनास्ति'–'अपारे काव्यससारे–' 'शृङ्गारी चेत् कवि काव्ये'–इत्यादीना परिकरश्लोकानाम् अतीव महत्त्वपूर्णानामपि कारिकासु असमावेश, 'प्रतीयमान–' 'समर्पकत्व काव्यस्य'- 'रसस्य स्याद् विरोधाय–' इत्यादौ कारिकाभिप्रायवृत्त्यभिप्राययो सुसवादाभावश्चेत्यादीनि। ध्वन्यालोकस्य सहृदयालोक:, सहृदयहृदयालोक, काव्यालोक: काव्यालङ्कार, ध्वनि इति च नामान्तराणि हस्तलिखितेषु प्राप्यन्ते इतिकाणे। 'काव्यालोक.' इत्यपि ग्रन्थनाम लोचने प्रयुक्तम् (लोचनप्रस्तावनाया द्वितीये पद्ये, लोचनोपसहारे द्वितीये पद्ये च)। कारिकाकारस्य नाम सहृदय इत्यपि केचित् कल्पयन्ति। ध्वन्यालोकस्य टीकाश्च—चन्द्रिका लोचनादपि प्राचीना इदानीमनुपलभ्यमाना, लोचनम् अभिनवगुप्तकृतम्, दीधिति बदरीनाथकृता च। लोचनस्य टीका कौमुदी नाम उदयोत्तुङ्गकृता, सा च कुप्पुस्वामिशास्त्रिणा मद्रासे मुद्रिता प्रकाशिता च।

२९—३५ **श्यामदेव** (अनिर्ज्ञात , चतुर्थे पञ्चमे चाऽध्याये), **मङ्गलः** (अनिर्ज्ञात , चतुर्थे पञ्चमे चाऽध्याये), **अवन्तिसुन्दरी** (राजशेखरगेहिनी, पञ्चमे, नवमे, एकादशे चाऽध्याये), **द्रौहिणि** (अनिर्ज्ञात , नाट्यशास्त्रकारभरतत्वेन सम्भावित , द्वितीये नवमे चाऽध्याये), **आपराजिति** (भट्टलोल्लट ? नवमेऽध्याये), **पाल्यकीर्ति** (अभिनवशाकटायन नव्यशाकटायनव्याकरणकार , नवमेऽध्याये), **सुरानन्दः** (यायावरकुलोत्पन्न , राजशेखर-पूर्वज , चेदिदेशराज-रणविग्रह-सभारत्नम्, 'नदीना मेकलसुता नृपाणा रणविग्रह । कवीना सुरानन्दश्चेदिमण्डलमण्डनम्' इति सूक्तिमुक्तावलौ जल्हणेन उल्लिखित , त्रयोदशेऽध्याये) इत्येते सप्त पूर्वमश्रुता काव्यविद्याविचारका राजशेखरेण काव्यमीमासायामुल्लिखिता ।

३६ **राजशेखर**—अय महोदय (कान्यकुब्ज) राजयो प्रतिहारवशभवयो महेन्द्र-पाल-महीपालयो उपाध्याय (बालरामायणे (१।१८) इति , अनेन आनन्दवर्धनोद्भटवा-मनादीनामुल्लेख. कृतः, अस्य च अभिनवगुप्तेन उल्लेख कृत (अभिनवभारत्याम्, अ १९, श्लो. १३०, भा ३, पृ १७२, ना शा , गा स ग्र मा) इति चाय खैस्ता-ब्दाना नवमशतकस्यान्ते दशमशतकस्यादौ च बभूव । अय महाराष्ट्राभिजनो यायावर-कुलोत्पन्नो महोदयनिवासी ब्राह्मण । अस्य वृद्धप्रपितामहोऽकालजलद , पिता दर्दुक (दुहिको वा), माता शीलवती । अस्य गेहिनी च चहुआनवशजा अवन्तिसुन्दरी (कर्पूर-मञ्जर्याम् १–११) क्षत्रिया बभूव । राजशेखरसमयपर्यन्तमपि आर्याणा समाजे अनुलोमो विजातीययोर्विवाहोऽनिन्द्योऽभूदिति धर्मशास्त्रेतिहासकारस्यापि काणेमहाशयस्य निर्णय । अस्य ग्रन्था षट् इति "यद्यस्ति स्वस्ति तुभ्य भव पठनरुचिर्विद्धि न षट् प्रबन्धान्" (बालरामायणे १।१२, काव्यमालासस्करणे) इति तेनैवोक्तत्वाद् ज्ञायते । किन्तु बाल-रामायणरचनानन्तरमपि तेन ग्रन्था कृता स्युरित्यन्ये मन्यन्ते । तथा च तस्य कृतय'— कर्पूरमञ्जरी (सट्टकम्), विद्धशालभञ्जिका (नाटिका), बालभारतम् । (पचण्डपाण्डव वा नाटकम्), बालरामायणम् (नाटकम्), काव्यमीमासा चेति पञ्च प्राप्यन्ते । षष्ठ हरविलासम् महाकाव्यमिति केचित् । अस्योल्लेखो हेमचन्द्रेण काव्यानुशासनविवेके "स्वनामाङ्कता यथा राजशेखरस्य हरविलासे" इत्युक्त्वा कृत । उज्ज्वलदत्तेनाऽपि हरविलासम् उल्लिखितम् (उणादिवृत्तौ २।२८) सूक्तिमुक्तावलौ सङ्गृहीता कवि-विशेषवर्णनात्मका राजशेखरश्लोका हरविलासस्य कविवर्णनरूपादुपोद्घातादेव उद्धृता स्युरिति च केचन कल्पयन्ति । अन्ये तु कविविमर्शाख्यो ग्रन्थोऽपि राजशेखरेण कृत , तस्मादेव ते श्लोका उद्धृता इति मन्यन्ते । स्वकीयो भुवनकोशग्रन्थ काव्यमीमासाया सप्तदशाध्यायान्ते राजशेखरेणैवोल्लिखित , किन्तु सोऽपीदानी नोपलभ्यते । तत्र राज-शेखरकृतिषु काव्यमीमासा विलक्षणा काव्यहेतुभूतसामग्रीनिर्देशनपरा कविशिक्षारूपा । काव्यमीमासाया च अष्टादश अधिकरणानि प्रतिपिपादयिषितानि । किन्तु तानि सर्वाणि प्रतिपादितानि न वेति निश्चय कर्तुं न शक्यते । कविरहस्य नाम प्रथमम् अधिकरणम् एव अष्टादशाध्यायात्मकम् एतर्हि उपलभ्यते । तत्र प्रथमे—काव्यविद्योत्पत्ति , दिव्या.

काव्यविद्यास्नातका, कविरहस्याधिकरणाध्यायनिर्देशश्च, द्वितीये—शास्त्रकाव्यरूपौ वाङ्मतभेदौ, शास्त्राणि, तेषा लक्षणानि, विद्या, सूत्र-वृत्ति-पद्धति-भाष्य-समीक्षाटीका-पञ्जिका-कारिका-वार्त्तिक-प्रकरणलक्षणानि, साहित्यविद्या च, तृतीये—सरस्वतीपुत्र-काव्यपुरुषोत्पत्तिकथा काव्यपुरुषवशीकरणाय गौरीपुत्र्या साहित्यविद्यावध्वा तदनुगमनम्, प्रवृत्ति-वृत्ति-रीति-विशेषोत्पत्ति-कथा, काव्यपुरुष-साहित्यविद्यावध्वोर्गान्धर्वविवाह, तयो तुषारगिरौ आगमनम्, कविस्वर्गकल्पन च, चतुर्थे—शिष्य-समाध्य-ऽभ्यास-शक्ति-प्रतिभा-व्युत्पत्ति-सारस्वता-ऽभ्यासिकौ-ऽपदेशिककव्य-ऽरोचकि-सतृणाभ्यवहारि-मत्सरि-तत्त्वाभिनिवेशिभावका, पञ्चमे—व्युत्पत्तिप्रतिभाव्याख्या, शास्त्रकवि, काव्यकवि, उभयकवि, शास्त्रकविभेदा, काव्यकविभेदा, कवेरवस्था, काव्यपाका, षष्ठे—पदम् तद्वृत्तय, देशविशेषजनाना पदवृत्तिविशेषप्रियता, वाक्यम्, वाक्यप्रकारा, काव्यलक्षणम्, काव्यस्य अनुपदेश्यत्वे, सप्तमे—प्रणेतृभेदकृता वाक्यभेदा, ब्रह्मादिका: श्रुत्यादय, वैबुधादयो दिव्यवाच, तिस्र: रीतय, काकुभेदा, पाठमाहात्म्यम्, पाठगुणा, मगधादिपाठगुण-विशेषा, अष्टमे—श्रुतिस्मृतीतिहासपुराणादय षोडश काव्यार्थयोनय, नवमे—दिव्यादय सप्तप्रकारका अर्था, रसवतोऽर्थस्य कविनिबध्यत्वम्, रसवद्वर्णनोदाहरणानि, मुक्तकप्रबन्धगताद्यर्थभेदा, भाषास्ववधानम्, दशमे-काव्यविद्याङ्गानि, काव्यमातर, कविचर्या, योषितामपि कवित्वम्, प्रबन्धादर्शकरणम्, प्रबन्धोच्छेदहेतव, कवे राज्ञ चर्या, काव्यशास्त्रपरीक्षार्था ब्रह्मसभा, एकादशे—परकीयशब्दहरणोपाया, मूल्येन काव्यस्य क्रयणस्यापि हरणत्वम्, कवेरचौरत्वाभाव, उत्पादकादय कविभेदा, द्वादशे—पर-कीयार्थहरणोपाया, अर्थहरणप्रकारभेदा, हरणशीला भ्रामक-कर्षकद्रावक-कवय:, चिंता-मणि कविश्च, हृतार्थरूपस्य प्रतिबिम्बस्य प्रकारा व्यस्तकादय., प्रतिबिम्बकल्पस्य हेयता, त्रयोदशे—आलेख्यप्रख्यादयोऽर्थहरणभेदा, चतुर्दशे पञ्चदशे षोडशे च—कवि-समय-(प्रसिद्धि) विशेषा, सप्तदशे—जगत एकत्व द्वित्व त्रित्व सप्तत्व चतुर्दशत्वम् एकविंशतित्वम् वा, भूलोकस्य द्वीपा, समुद्राश्च, जम्बूद्वीपस्य वर्षाणि, भारतवर्षस्य नव भेदा, सम्राज चक्रवर्तिनश्च परिभाषे, आर्यावर्त-पूर्वदेश-दक्षिणापथ-पश्चाद्देशो-ऽत्तरापथ-मध्यदेशा, अन्तर्वेदी दिग्विभागश्च, तत्तद्दिग्गतमनुष्यदेहवर्णा, अष्टादशे—काल-विभागा, सौर-चान्द्रे माने ऋतुविशेषवायुदिश, वर्षादिऋतुधर्मा, ऋतूना सन्ध्यादयोऽ-वस्था, पुष्पोपयोगा, अन्तर्व्याजादिफलभेदा इति विषया सन्ति ।

३७ **मुकुलभट्ट**—कल्लटपुत्रेणानेन काव्यविद्याया. स्वतन्त्रो ग्रन्थो यद्यपि न रचित, तथापि काव्यविद्योपयोगी शब्दवृत्तिनिरूपक अभिधावृत्तिमातृका नाम ग्रन्थो विरचित, अय ग्रन्थ निर्णयसागरमुद्रणालये मुद्रित: प्रकाशं चायात (१९१६ ख्री०); प्रतीहारेन्दुराजस्य उद्भटग्रन्थटीकाकारस्य गुरुश्चायमिति काव्यविद्येतिहासप्रसङ्गेऽय स्मर्यते । मम्मटादीना शब्दवृत्तिविचारेऽस्य ग्रन्थस्य विध्यात्मक (Positive), निषेधा-

त्मकश्च (Negative) प्रभावो दृश्यते। अस्य समयश्च कश्मीरराजतरङ्गिण्यनुसार (५।६६) अवन्तिवर्मण समय (८५५-८८४ख्री०)।

३८ **भट्टतोत**—अयमभिनवगुप्तगुरु नाट्यवेदाचार्य। अभिनवगुप्तेन भरतनाट्यशास्त्रटीकायामस्य विशिष्टानि मतानि सादरमुल्लिखितानि। माणिक्यचन्द्रश्रीधरादिभिरप्ययमुल्लिखित। अस्य स्वतन्त्रो ग्रन्थ काव्यकौतुकम् अभूदिति अभिनवभारतीतो ज्ञायते। तस्य विवरणमपि अभिनवगुप्तेन कृतम्। किन्तु तौ द्वावेव ग्रन्थौ इदानी नोपलभ्येते। भट्टतोतस्य काव्यकौतुकम् अलङ्कारशास्त्रनिबन्धग्रन्थेषु प्रथम बभूवेति प्रतीयते। काव्यप्रकाशकारो भट्टतोतस्य काव्यकौतुकाद् बहूनि वस्तून्यपहरतीति शिवप्रसादभट्टाचार्यमहाशयो मन्यते (Three Lost Masterpieces in the Alankārasāstra, J A S. Letters Vol XXII, No 1)।

३९ **भट्टनायक**—अयम् आनन्दवर्धनाऽभिनवगुप्तयोर्मध्ये स्थित। अनेन हृदयदर्पणो नाम काव्यलक्षणग्रन्थ कृत। किन्त्वय ग्रन्थो नोपलभ्यते। ध्वनिध्वसने प्रसितस्याऽस्य मतानि लोचने विस्तरेणोद्धृतानि सोपहास खण्डितानि च। काव्यप्रकाशकारेणास्य रससूत्रव्याख्यानम् उद्धृतम्। अतोऽयं भरतनाट्यशास्त्रटीकाकारोऽपि इति केचन मन्यन्ते, अन्ये तु काव्यलक्षणशास्त्रग्रन्थे हृदयदर्पणे एव अनेन भरतसूत्राभिप्रायसार प्रतिपादित इति कल्पयन्ति।

४० **कुन्तक (राजानककुन्तलको वा)**—अनेन आनन्दवर्धनसिद्धान्त खण्डित (वृत्तौ ३।१०), राजशेखर उल्लिखित (१।५३), महिमभट्टेन चाय कटाक्षित 'काव्यकाञ्चनकषाश्ममानिना कुन्तकेन निजकाव्यलक्ष्मणि' इत्यादौ इति, अभिनवगुप्तोऽपि परिचितकुन्तकरचन इव दृश्यते (कुन्त० २।२२, लोचनम् ३।१६ वृत्त्यशव्याख्याने) इति चाऽयं तन्मध्यवर्ती ख्रैस्ताब्दाना दशमस्य शतकस्य प्रारम्भे बभूव। अस्य देश क इति न ज्ञायते। राजानकोपाधिस्तु इम कश्मीरज सूचयति। अस्य ग्रन्थश्चैक एव वक्रोक्तिजीवित नाम काव्यालङ्कार (१।२, वृत्तिश्च द्रष्टव्या)। अय ग्रन्थश्चिराय अनुपलब्धोऽभूत्। व्यक्तिविवेके, अलङ्कारसर्वस्वे, साहित्यदर्पणे च अस्य ग्रन्थस्योल्लेखो विदुषामेतद्ग्रन्थान्वेषणे प्रेरकोऽभूत्। अतएवाय ग्रन्थ इदानी प्राप्यते मुद्रितश्चानेकवारम्। अस्मिश्च ग्रन्थे वक्रोक्तिरेव काव्यस्य जीवितम् (आत्मा) इति प्रतिपादितम्, तथाहि—"शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि। बन्धे व्यवस्थितौ काव्य तद्विदाह्लादकारिणि" (१।७,१०) इति। इयञ्च वक्रोक्ति भामहमते (२।८५) इव, आनन्दवर्धनमते (३।३६) इव, मम्मटमते (१० उ०, १३६ का० वृत्तौ) इव वा नाऽतिशयोक्तिमात्रम्, नापि वा वामनमते (४।३।८) इव, रुद्रटमते (२।१४) इव च अलङ्कारविशेषवक्रोक्तिमात्रम्। अत्र तु वक्रोक्ति विचित्ररमणीयोक्ति (१।१८ वृत्तौ) इति बोध्यम्। अस्मिन् ग्रन्थे चत्वार उन्मेषा सन्ति। तत्र प्रथमे उन्मेषे ग्रन्थप्रतिपाद्य सर्वोऽपि विषय-

सक्षेपेण प्रतिपादित , मार्गभेदश्च प्रव्यक्त प्रदर्शित । द्वितीयादुन्मेपात् प्रभृति आ समाप्ते 'वर्णविन्यासवक्रत्व पदपूर्वार्धवक्रता । वक्रताया परोऽप्यस्ति प्रकार प्रत्ययाश्रय ' (१।१९) 'वाक्यस्य वक्रभावोऽन्यो भिद्यते य सहस्रधा । यत्राऽलङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति' (१।२०) 'बक्रभाव प्रकरणे प्रबन्धो वाऽस्ति यादृश । उच्यते सहजाहार्यसौकुमार्यमनोहर ' (१।२१) इत्युद्दिष्टा पड् वक्रताप्रकारा विस्तरेण निरूपिता । अय ग्रन्थो यद्यपि स्थाने स्थाने त्रुटित., तथाप्यस्य प्रतिपादनशैली स्फुटा विशदा च, ग्रन्थकारस्य विचारश्च प्रौढः स्वोपज्ञो हृदयस्पर्शी च ।

४१ **धनञ्जय**—अय मुञ्जस्य द्वितीयवाक्पतिराजस्य राजसभापण्डित इति अस्य समयोऽपि मुञ्जस्यैव समय खैस्ताब्ददशमशतकोत्तरार्धम् (९७४-९९४) । अस्य पिता विष्णुरित्यनेनैवोक्तम्—'विष्णो सुतेनाऽपि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतु । आविष्कृत मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत्' (४।८६) इति । अनेन दशरूपक नाम नाटयशास्त्रग्रन्थ कृत । ग्रन्थनाम तु दशरूपकमिति कृत रूपकाणि तु "लक्ष्यते नाटिकाऽप्यत्र सङ्कीर्णान्यनिवृत्तये' (३।४३) इत्युक्त्वा नाटिकाऽपि निरूपितेति एकादश रूपकाणि प्रतिपादितानि । तत्र रसविषयेऽनेन ध्वनिसिद्धान्त (व्यञ्जनावाद) खण्डित । अय भट्टनायकमतानुयायी प्रतीयते । न चानेनाभिनवगुप्त उल्लिखितो नाप्यभिनवगुप्तेन ध्वनिध्वसनप्रसितोऽप्ययमिति अनयो' समकालभवत्व प्रतीयते इति विवेचका ।

४२ **धनिकः**—अय धनञ्जयस्य कन्यसो भ्राता । अनेन दशरूपकस्य अवलोकाख्या टीका कृता । इय टीकाऽपि महत्त्वपूर्णा प्रकाशिता चास्ति । अनेन काव्यनिर्णयाख्यो ग्रन्थोऽपि कृत इति साहित्यदर्पणभूमिकाया दुर्गाप्रसादद्विवेद । उल्लिखितश्चाय ग्रन्थो धनिकेन—"यथाऽवोचाम काव्यनिर्णये—तात्पर्यानतिरेकाच्च व्यञ्जकत्वस्य न ध्वनि । किमुक्त स्यादश्रुतार्थतात्पर्येऽन्योक्तिरूपिणि" इति अवलोके (४।३७) । "यच्च धनिकेनोक्तम्—तात्पर्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनि । यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्" इतिरूपेणाऽस्योल्लेख साहित्यदर्पणेऽपि कृतः (५।१, वृत्तौ) ।

४३ **अजितसेनाचार्य (अजितसेनदेवयतीश्वरो वा)**—अय खैस्ताब्दाना दशमस्य शतकस्यान्ते बभूव । अनेन अलङ्कारचिन्तामणि , शृङ्गारमञ्जरी चेति द्वौ ग्रन्थौ कृतौ ।

४४ **अभिनवगुप्त**—काव्यविद्यायामस्य स्वतन्त्रो ग्रन्थो नास्ति तथापि अयमत्र स्वतन्त्रमुल्लेखमर्हतितमाम् । अय काश्मीर । अस्य समय खैस्ताब्दाना दशमस्य शतकस्योत्तरार्धम्, एकादशस्य प्रथम पादश्च (९५०–१०१४) । अस्य पिता चुलुखक पितामहो वराहगुप्त । अस्य पूर्वपुरुपश्चात्रिगुप्त । एतेषामुल्लेखस्तन्त्रालोकेऽभिनवगुप्तेन कृत । अभिनवगुप्त. कान्यकुब्जाभिजन कश्मीरनिवासी । अभिनवगुप्तेन तात्कालिकेभ्य. प्रसिद्धेभ्यो विद्वद्भ्यो नरसिंहगुप्त-वामनाथ-भूतिराजतनय-लक्ष्मणगुप्त-भट्टेन्दुराजभूतिराज-भट्टतोतेभ्यो व्याकरण-द्वैताद्वैततन्त्र-द्वैतशैवदर्शन-प्रत्यभिज्ञा-ध्वनिसिद्धान्तब्रह्मविद्या-

नाट्यशास्त्राणि अधीतानि । मातुर्बाल्ये एव निधनात् पितुश्च तदनन्तर झटित्येव काल-धर्मप्राप्ते विरक्तोऽभिनवगुप्तो महेशभक्तौ दर्शनशास्त्राध्ययने च प्रवृत्तो नैष्ठिको ब्रह्म-चारी दशमी गतो द्वादशभि शतै शिष्यै विदा दत्तो भैरवगुहा प्रविश्य महायात्रा गत इति प्रसिद्धिरस्ति । अस्य च शैवदर्शनादौ तन्त्रालोकादय सप्तत्रिंशद् ग्रन्था सन्ति, काव्यालङ्कारविषये तु– ध्वन्यालोकलोचनम्, अभिनवभारती (नाट्यशास्त्रटीका), काव्य-कौतुकविवरणम्, घटकर्परकुलकविवृतिश्चेति चत्वार एव ग्रन्था । आद्यौ द्वौ ग्रन्थौ काव्या-लङ्कार-नाट्यशास्त्रयोरतीव मान्यौ ग्रन्थौ । तृतीयस्तु ग्रन्थोऽनुपलभ्यमान भट्टनायकादि-कृत ध्वनिध्वसनप्रयास वितथीकृत्य ध्वनिसिद्धान्तस्य व्यवस्थापन सम्यक् कृतवान् इत्यय ध्वनिव्यवस्थापनपरमाचार्य इत्युच्यते ।

४५ **राजानको महिमभट्ट** —अय कुन्तकमुल्लिखति "काव्यकाञ्चनकषाश्ममानिना कुन्तकेन निजकाव्यलक्ष्मणि । यस्य सर्वनिरवद्यतोदिता श्लोक एप स निर्दशितो मया" (द्वितीये विमर्शे, सङ्ग्रहश्लोक –२९) इत्यत्र । अय च मम्मटेन नाम अगृहीत्वैव खण्डित पञ्चमोल्लासे व्यङ्ग्यार्थानुमेयताखण्डने । रुय्यकेण चायमुल्लिखितोऽलङ्कारसर्वस्ववृत्त्युप-क्रमे अलङ्कारशास्त्रकारमतभेदप्रदर्शनप्रसङ्गे । अतोऽस्य समय खैस्ताब्दानाम् एकादशस्य शतकस्य पूर्वार्धम् (१०२०–१०५०) इति विवेचका मन्यन्ते । अस्य पितुर्नाम श्रीधैर्य इति, गुरोर्नाम श्यामल इति । अनेन द्वौ ग्रन्थौ विरचितौ । तत्रैकस्य तत्त्वोक्तिकोशस्य व्यक्तिविवेके उल्लेख प्राप्यते (द्वितीये विमर्शे सङ्ग्रहश्लोक-११९), ग्रन्थस्त्वनुपलभ्य-मानोऽस्ति । व्यक्तिविवेकस्तूपलभ्यते । अय च ग्रन्थस्तेन स्वस्य नप्तॄणा व्युत्पत्तिमाधातु कृत (तृतीयविमर्शान्ते) इत्युल्लिखितम् । तत्र ग्रन्थप्रारम्भे तेन च प्रतिज्ञा कृता—"अनु-मानेऽन्तर्भाव सर्वस्यैव ध्वने प्रकाशयितुम् । व्यक्तिविवेक तनुते प्रणम्य महिमा परा वाचम्" इति । ततश्च प्रथमे विमर्शे आनन्दवर्धनकृतानि ध्वनिलक्षणानि अन्यैश्च दोपैर्दूषयित्वा अनुमानेनैव तानि गतार्थानि भवन्ति न लक्षणा न वा व्यञ्जना उपास्या इति प्रदर्श्य खण्डितानि । द्वितीये विमर्शे—काव्यस्यात्मा ध्वनिरिति बुधैरित्यादौ दोपान् प्रदर्शयितुम् प्रथमम् अनौचित्यरूपस्य दोषस्य शब्दगता (बहिरङ्गा) विधेयाविमर्श-प्रक्रमभेद-क्रमभेद-पौनरुक्त्य-वाच्यावचनरूपा दोषा विस्तरेण प्रतिपादिता , ततश्चान्ते ते काव्यस्यात्मेत्यादिके आनन्दवर्धनपद्ये यथासम्भव योजिता । तृतीये विमर्शे च- ध्वन्या-लोके ध्वनिकाव्यत्वेनोदाहृतेषु चत्वारिंशति उदाहरणेषु व्यङ्ग्यत्वेनाभिमताना रसादीना-मपि सर्वेषामर्थानाम् अनुमितिविषयत्व प्रदर्शितम् । व्यक्तिविवेक पाण्डित्यपूर्णोऽस्ति । काव्यप्रकाशस्य दोषनिरूपण व्यक्तिविवेकोपजीवि दृश्यते । महिमभट्टेन दोषविवेचने स्वोपज्ञा विचारा प्रदर्शिता । वामन विहायान्येपु एतत्पूर्ववर्तिषु काव्यालङ्कारकारेषु एतादृशी दोषज्ञता नोपलभ्यते । व्यक्तिविवेकस्य टीका राजानकरुय्यककृता द्वितीय-विमर्शान्ता मुद्रिता प्रकाशमागताऽस्ति । सरयूतटे चामुण्डसिंहेन राज्ञा लेखिता तिलकरत्ना नाम अन्याऽपि टीका काणेमहाशयेनोल्लिखिताऽस्ति ।

४६. **राजा भोज (धाराधीशः)**—अस्य १०७८ सवद् दानपत्र प्राप्यते। अतोऽय खैस्ताब्दानाम् एकादशस्य शतकस्य पूर्वार्धे बभूवेति ज्ञायते। अय मालवेश्वरो धारेश्वर इति प्रसिद्ध। अस्य राजधानी धारा नगरी। अय प्रमार (परमार) वशज, तथाहि विक्रमाङ्कदेवचरिते गुर्जरराजो भीम 'प्रमारपृथ्वीपतिकीर्तिधारा धारामुदारा कवलीचकार' (१।९१) इत्युल्लेख प्राप्यते। अय प्रसिद्धेपु भारतवर्षीयेषु राजसु एक प्रसिद्धतमो राजा। अय च कवि, कवीना विदुषा च आश्रयस्य दाता, देवकुलाना निर्माता, महत पुस्तकालयस्य सङ्ग्रहीता, विविधविषयाणा महता ग्रन्थाना निर्माता च बभूव किल। अनेन ८४ ग्रन्था कृता इति वदन्ति। विज्ञानविषयेऽप्यनेन ग्रन्था कृता समराङ्गणसूत्रधारादय। तत्र व्याकरणे-सरस्वतीकण्ठाभरणम् (दण्डनाथनारायणकृतव्याख्यासहितम्, मद्रासविश्वविद्यालयसस्कृतग्रन्थमालाया त्रिवेन्द्रमसस्कृतग्रथमालाया च मुद्रित प्रकाशमागतम्), धर्मशास्त्रे-भूपालकृत्यसमुच्चय, भुजबलनिबन्ध, युक्तिकल्पतरुप्रभृतयश्च, वास्तुशिल्पादिशास्त्रे—समराङ्गणसूत्रधार. (मुद्रित), वैद्यके-राजमार्तण्ड (मुद्रित), योगशास्त्रे-योगसूत्रवृत्ति (भोजवृत्ति), काव्यलक्षणशास्त्रे—सरस्वतीकण्ठाभरणम् (मुद्रितम्), शृङ्गारप्रकाशश्च (मुद्रित)। तत्र सरस्वतीकण्ठाभरण यद्यपि सङ्ग्रहात्मक तथापि तत्रास्य विशिष्टानि मतान्यपि उपलभ्यन्ते, तथाहि-तत्र पददोषा: षोडश, वाक्यदोषा अपि पोडश, शब्दगुणा चतुर्विंशति वाक्यार्थगुणा अपि चतुर्विंशति, रीतय. षट्, वृत्तय षट्, मुद्रा अपि षट्, उपमाक्षेपसमासोक्त्यपह्नुत्यादे शब्दार्थोभयालङ्कारत्वम्, शृङ्गाराख्य एक एव रसो न बहवो रसा इति च, उक्त हि—"शृङ्गारवीरकरुणाद्भुतरौद्रहास्यबीभत्सवत्सलभयानकशान्तनाम्नः। आम्नासिषुर्दश रसान् सुधियो वय तु शृङ्गारमेव रसनाद् रसमामनाम" इति (शृङ्गारप्रकाशे १।६)। परन्त्वय शृङ्गारो नान्येषा शृङ्गारेण तुल्य किन्त्वभिमानरूप इति नैव विस्मरणीयम्, उक्त हि—'रसोऽभिमानोऽहङ्कार शृङ्गार इति गीयते। योऽर्थस्तस्यान्वयात् काव्य कमनीयत्वमश्नुते' इति (स० क० ५।१)। शृङ्गारप्रकाशे च षट्त्रिंशत् प्रकाशा सन्ति। तत्र आद्येषु अष्टसु प्रकाशेषु शब्दविचार., अवशिष्टेपु चतुर्विंशतौ प्रकाशेषु सोदाहरणा रसा निरूपिताः।

४७ **अग्निपुराणालङ्कारकार**—यद्यपि महेश्वरभट्टाचार्येण काव्यप्रकाशटीकायाम् "अग्निपुराणादुद्धृत्य [illegible] कारिकाभि सक्षिप्य भरतमुनि प्रणीतवान्" इत्युक्तम्, तथापि अधुना उपलभ्यमानस्य अग्निपुराणस्य (३३६-३४७ अध्यायात्मक) काव्यालङ्काराशोऽर्वाचीनो न प्राचीन, भरतस्य तत्रोल्लेखात् (३३९।६) इति विवेचका। दण्डिन काव्यादर्शस्य बहूनि रूपकोत्प्रेक्षाविशेषोक्तिविभावनापह्नुत्याद्यलङ्कारलक्षणानि (२।६६, २२१, ३२३, १९९, ३०४) अग्निपुराणे (३४३।२३, २४-२५, २६-२७, २७-२८, ३४४।१८) प्राप्यन्ते। भामहकृतानि आक्षेपाप्रस्तुतप्रशसासमासोक्तिपर्यायोक्तादिलक्षणानि (२।६८, ३।२९, २।७९, ३।८) अग्निपुराणे (३४४।१५, १६, १८, १७) प्राप्यन्ते, भामहेन च मयैव निर्मितानि लक्षणानीत्युक्तम् (३।५८) इति भाम-

हृस्यैवाग्निपुराणकाव्यालङ्काराशे प्रभाव स्वीकर्तव्य । अग्निपुराणे—'एषामेकतमस्यैव समाख्या ध्वनिरित्यत ' (३४४।१८) इत्युक्त्वा पर्यायोक्तापह्नुतिसमासोक्त्यप्रस्तुतप्रशसा-क्षेपेषु ध्वनिरन्तर्भवतीत्युक्तम् । अतो ध्वन्यालोकान्नातिपश्चाद्भवमग्निपुराणमिति काणे-महाशयस्य मतम् । शृङ्गारीचेत् कविरित्याद्यौ द्वौ श्लोकौ ध्वन्यालोके (३।४२ परिकर-श्लोकौ) अग्निपुराणे च (विब्लियोथिका-इण्डिका-सस्करणे ३३८।१०-११, आनन्दाश्रम-सस्करणे च ३३९।१०-११) प्राप्येते । "अक्षर परम ब्रह्म सनातनमज विभुम् । वेदान्तेषु वदन्त्येक चैतन्य ज्योतिरीश्वरम् । आनन्द सहजस्तस्य व्यज्यते स कदाचन । व्यक्ति सा तस्य चैतन्यचमत्काररसाह्वया । आद्यस्तस्य विकारो य सोऽहङ्कार इति स्मृत । ततोऽ-भिमानस्तत्रेद समाप्त भुवनत्रयम् । अभिमानाद् रति सा च परिपोषमुपेयुषी । व्यभिचा-र्यादिसामान्याच् छृङ्गार इति गीयते । तद्भेदा काममितरे हास्याद्या अप्यनेकश " इति (अग्निपुराणे ३३।१-५, ३४१।३) भोजराजीय (स० क० ५।१, शृ० प्र० १।६) अभि-मानशृङ्गाराख्य प्रकृतिरसोऽप्यग्निपुराणे वर्णित इति, प्राचीनेनाऽलङ्कारशास्त्रकारेण केनाऽपि अग्निपुराण काव्यालङ्कारे प्रमाणत्वेन नोद्धृतम्, केवल (विश्वनाथेन १३००-१३८४ खै०) उद्धृतमिति च अग्निपुराणस्य काव्यालङ्काराशो भोजादप्यर्वाचीन इति काणेमहाशयो मन्यते । अग्निपुराणे च ३३६ अध्याये—काव्यलक्षणम्, सस्कृत-प्राकृत-गद्य पद्य-मिश्रादिका तद्भेदा , कथाख्यायिकामहाकाव्यलक्षणानि, ३३७ अध्याये—नाट्यविषया , ३३८ अध्याये—रस-स्थायिभावा-ऽनुभाव-व्यभिचारिभावा-ऽऽलम्बनविभावो-द्दीपनविभाव-नायकभेद-नायकसहचर-नायिकाभेद-नायकगुण-नायिकाविभावा , ३३९ अध्याये-रीतयो वृत्तयश्च, ३४० अध्याये—नृत्तनिरूपणम्, ३४१ अध्याये—आङ्गिकादयश्चत्वारोऽभिनया , ३४२ अध्याये—शब्दालङ्कारा , ३४३ अध्याये—उपमादयोऽर्थालङ्कारा , ३४४ अध्याये—उभयालङ्कारा प्रतिपाद्या इत्युक्तम्, किन्तु तत्र आक्षेप-समासोक्ति-पर्यायोक्त्यादय एव प्रतिपादिता , ३४५-४६ अध्याययो —काव्यगुणदोषा इति काव्यालङ्कारविषया सन्ति । तत्र सर्वे श्लोका सङ्कलिता ३६२ सन्ति । अयमश पृथगपि मुद्रित प्रकाशमागत ।

४८ **क्षेमेन्द्रः**—अस्य समय 'तस्य श्रीमदनन्तराजनृपते काले किलाय कृत ' इत्यौ-चित्यविचारचर्चायाम्, 'राज्ये श्रीमदनन्तराजनृपते काव्योदयोऽय कृत ' इति कविकण्ठा-भरणे च अस्यैव लेखात् खैस्ताब्दानामेकादशस्य शतकस्य मध्यम् (१०२८–१०६३) इति ज्ञायते । अय काश्मीर एव । अस्य पिता प्रकाशेन्द्र , पितामह सिन्धु । क्षेमेन्द्रस्य नामान्तर व्यासदास इति क्षेमेन्द्रेणैव दशावतारचरितान्ते उक्तम् । अस्य साहित्यविद्या-गुरु अभिनवगुप्त इति "श्रुत्वाऽभिनवगुप्ताख्यात् साहित्य बोधवारिधे " इति बृहत्कथा-मञ्जरीस्थात्तस्यैव लेखाद् ज्ञायते । अस्य ग्रन्था –भारतमञ्जरी, बृहत्कथामञ्जरी, समयमातृका, औचित्यविचारचर्चा, कविकण्ठाभरणम्, सुवृत्ततिलकम् इत्यादयो बहव । तत्र औचित्यविचारचर्चायाम् आनन्दवर्धनप्रोक्ता "अनौचित्यादृते नास्ति रस-भङ्गस्य कारणम् । औचित्योपनिबन्धस्तु रसस्योपनिषत् परा' (३।१४, वृत्तौ) इति

उपनिपदेव प्रतिपादिता । कविकण्ठाभरणे कवित्वप्राप्ते कवित्वोत्कर्षप्राप्तेश्च उपाया पञ्चभि सन्धिभि प्रतिपादिता । सुवृत्ततिलके च केषा चित् छन्दसा प्रसिद्धानि वृत्तानि लक्षणोदाहरणप्रदर्शनेन निरूप्य तेपा लक्षणयुक्तानामपि गुणदोषविशेपा , रसादिविनियोगविशेषा , कविविशेपस्य वृत्तविशेपप्रयोगे सिद्धहस्ततया तत्प्रयुक्तेषु वृत्तेपु चारुत्वोत्कर्षप्राप्तिश्चेत्यादय अतीव उपयोगिनो विपया प्रतिपादिता ।

४९ **मम्मट**—अयम् अभिनवगुप्त समुल्लिखति, हेमचन्द्रेण (११४३ खै०) अयमुल्लिखित , माणिक्यचन्द्रेण काव्यप्रकाशस्य टीका १२१६ सवत् (११५९ खै०) विरचिता, तस्या टीकाया तत्पूर्ववर्तिनीना टीकानामप्युल्लेखोऽस्तीति मम्मटस्य समय १०५०—११०० खैस्ताब्दा इति काणेमहाशयस्य मतम् । अय नैषधीयचरितस्य कर्तु श्रीहर्षस्य माम. इति काश्मीरकाणा प्रवाद , अय कय्यटोव्वटयोर्ज्येष्ठो भ्राता इति सुधासागरकारस्य भीमसेनस्य (१७७९ सवत्) प्रलापश्च न प्रामाण्यपदवीमारुहत । मम्मटस्य व्याकरणे विशिष्ट पाण्डित्य दृश्यते । अनेन शब्दभेदा उपमाभेदाश्च व्याकरणानुसारमेव प्रतिपादिता । अय राजानक इत्युपाधिना विभूष्यते । राजानक इत्यस्यार्थश्च राजतुल्य:, राजकल्प , राजोपोद्वलक इति मन्त्री इति वा सम्भाव्यते । राजानक इति काश्मीरब्राह्मणाना सम्मानोपाधिरिति केचित् । अस्य च द्वौ एव ग्रन्थौ विज्ञायेते । तत्र प्रथमो लघु शब्दव्यापारविचाराख्य' अभिधालक्षणादिविचारपरो निर्णयसागरमुद्रणालये मुद्रितश्च । द्वितीयस्तु काव्यप्रकाश एव । तत्र कारिका, वृत्ति , उदाहरणम् चेति त्रयो विभागा सन्ति । तत्र उदाहरणानि अन्यैरेव कृतान्यपि वृत्तौ एवान्तर्भावितानीति तानि वृत्तिकुक्षेवोपन्यस्तानि । कारिका-वृत्त्योस्तु नैक कर्ता इति केचन अर्वाचीना महेश्वरभट्टाचार्य-वैष्णवबलदेवविद्याभूषणादय टीकाकारा मन्यन्ते । वृत्तेरादौ मङ्गलाचरणस्याऽभावात्, वृत्तौ परकृतग्रन्थस्य वृत्ति क्रियते इत्युल्लेखस्य कुत्राप्यनुपलम्भात् कारणान्यथ कार्याणीत्यादे (का० २६, २७) भरतप्रणीतत्वे तत्समर्थनाय तदुक्त भरतेनेति कथने औचित्यस्याभावात् (न हि तस्यैव कथन तस्यैव वचनान्तरेण समर्थ्यते, किन्तु अभियुक्तान्तरस्य वचनेनैव तथा क्रियते इति), 'माला तु पूर्ववत्' (का० ९३) इत्यस्य कारिकाशस्य मालोपमाया वृत्तौ एव निरूपितत्वेन वृत्त्युपजीवित्वाच्च कारिकावृत्त्यो समान कर्ता इति पक्षो दृढो भवति । तत्र च काव्यप्रकाश सम्पूर्ण एव मम्मटालकयो कृतिरिति केचिद् मन्यन्ते, तत्र प्रमाण च—एस्० आर्० भण्डारकरमहाशयेन एकस्य (१२२५ सवत् १५५८ खै० लिखितस्य) काव्यप्रकाशपुस्तकस्य पुष्पिकाया 'कृती राजानकमम्मटालकयो ' इति दृष्टम् इति, (द्रष्टव्यम्-प्रो० एस्० आर्० भण्डारकर रिपोर्ट १९०५—६), लीलातामरसेत्याद्यमरुकश्लोकव्याख्याने अर्जुनवर्मदेवेन (१२११) खै०) 'अत्र केचिद् वायुपदेन जुगुप्साश्लीलमिति दोषमाचक्षते । · · · · तदा वाग्देवतादेश इति व्यवसितव्य एवासौ । किन्तु ह्लादैकमयीवरलब्धप्रसादो काव्यप्रकाशकारौ प्रायेण दोषदृष्टी' इत्युक्तम्, 'भवतु विदितम्' इत्यादिश्लोकव्याख्याने च

दोषनिर्णये मम्मटालकाभ्याम् प्रसादे वर्तस्वेत्यादि' इत्युक्तमिति च उपस्था-
ान्ये तु 'इत्येष मार्गो विदुषाम्' इत्यादे काव्यप्रकाशान्तिमपद्यस्य व्याख्याने
राजानकमम्मटेन कथमप्यसमाप्तत्वाद् राजानकतिलकेन च पूरितशेषत्वाद्
'' इति रुचक-माणिक्यचन्द्र-श्रीधरादीना लेखस्य दर्शनात्, ''कृत श्रीमम्मटा-
ारिकरावधि । प्रबन्ध पूरित शेषो विधायालकसूरिणा'' इति राजानका-
६५ ख्री०) काव्यप्रकाशनिदर्शनायामुक्तत्वाच्च परिकरावधे पूर्वस्य ग्रन्थस्य
ट परस्य च कर्तार तिलकम्, अलकम्, अलटम्, अल्लट वा मन्यते ।काव्यप्रका-
ानन्दवर्धनेन काव्य-रस-ध्वनि-गुण-दोषा-ऽलङ्कारादिविषये येषा सिद्धान्ताना
कृत तेषामेव विस्तरेण प्रतिपादक परमतसङ्कलन-समायोजन-व्यवस्थापनरूप-
एव । काव्यलक्षणविषये तु अय भूम्ना वामनस्य 'काव्य ग्राह्यमलङ्कारात्'
सौन्दर्यमलङ्कार ' (१।१।२) 'स दोषगुणालङ्कारहानोपादानाभ्याम्' (१।१।३)
ऽय गुणालङ्कारसस्कृतयो शब्दार्थयोर्वर्तते' (१।१।१, वृत्तौ) युत्युक्तीरुपजीवति ।
ंपादने आनन्दवर्धनग्रन्थमेवोपजीवति, चित्रमानन्दवर्धनेनाकाव्यत्वेनोक्तमपि
त्र अधमकाव्यत्वेन सङ्गृहीतमित्येव विशेष । व्यञ्जनास्थापनेऽपि भूम्नाऽऽनन्द-
ोपजीवति। दोषविषये आनन्दवर्धनोक्तम् (२।११, १४, १५, ३।१८ १९) वामन-
ट्टग्रथ च उपजीवति, 'सूक्तिसहस्रद्योतितात्मना महात्मना दोषोद्घोषणमात्मन एव
ाति (तद्) न विभज्य दर्शितम्' (२।१८–१९) इति आनन्दवर्धनोक्त तूपेक्षित-
षयेऽलङ्कारविषये च प्रायेणानन्दवर्धनोक्तम् (२।६–१०, ३।२–९), अभिनव-
न च (लोचने २।९–१०) उपजीवति, अलङ्कारविशेषास्तु भरत-भामह-
-वामन-रुद्रटप्रतिपादिता एव काश्चित् परित्यज्य काश्चिच्च परिष्कृत्योपस्था-
ल विनोक्ति, सम, सामान्यम्, अतद्गुण इति चत्वार एव नवीना अलङ्कारा
काव्यप्रकाशे स्वतन्त्रो विचार शब्दवृत्तिनिरूपणादिरूप, परिवृत्तिसहत्वास-
ोग-प्रधान-मूलकव्यपदेशन्यायप्रयोगादिरूपश्च स्वल्प एव ग्रन्थकारस्य, तेन
ादिविषयाणा सङ्कलने विवेचने परिष्कृतया शैल्या उपस्थापने च श्रमस्तु
थापि तेषा समायोजने कला तु तस्य न स्वकीया, सा सर्वाऽप्यानन्दवर्धनोपज्ञा
ता च, अभिनेयार्थकाव्यविषये भामहादिभि ससूचितेऽपि (भामह० १।२४,
११, वामन० १।३।२७, ३०, ३२, आनन्द० ३।७–१४ वृत्तौ), महाकाव्यादि-
विशेषविषये च मौनमवलम्बते इत्यपूर्णश्चाय ग्रन्थस्तथापि काव्यसम्बन्धिना-
पा विषयाणा सङ्ग्राहक आनन्दवर्धनप्रकल्पितकाव्यविद्यायोजनाकार्यरूपोऽय
ा प्रियोऽस्ति । यद्यपि 'काव्यस्यात्मा ध्वनि ' इति काव्यप्रकाशे न स्वीक्रियते
ध्वनि (व्यञ्जना) सिद्धान्तस्य महिमभट्टाद्यवकीर्णस्य पुन सम्यक् समर्थ्य
ृत पञ्चमोल्लासोत्तरार्धे इति ध्वनिसमर्थन (संस्थापन) परमाचार्य इत्युच्यते
ाकार । विद्वत्प्रियत्वाद् गम्भीरार्थाल्पाक्षरग्रन्थत्वाद् दुर्गमत्वेन विद्वत्परीक्षा-

निकषोपलत्वाच्चाय ग्रन्थो नानादेश्यैर्बहुभिर्विद्वद्भिर्व्याख्यातः, अस्माभिश्चात्र चापलं प्रदर्शितम्, तदुक्तमस्माभि स्वकृतटीकोपसहारे—"काश्मीरकैर्वाङ्गकैश्च मैथिलै काशिकैरपि । दाक्षिणात्यैर्मध्यदेश्यैर्विद्वद्भिर्विविधैरपि । मीमासकैस्तार्किकैश्च यतिभिर्धर्मशास्त्रिभि । काव्यप्रकाशो व्याख्यातो नैव नैपालकेन तु । इति मे कौतुकमभूद् व्याख्यानेऽत्र प्रवर्तितुम् । तदिद कौतुक चाद्योपशान्तिमगमन् मम ।" इति ।

परश्शता खलु काव्यप्रकाशटीका , तथापि प्रायेण मुद्रिता प्रसिद्धतरा सुलभाश्चेति। जिज्ञासुभि परिश्रमेणोपयुक्त शक्या एवात्र सक्षेपेणोल्लिख्यन्ते। तत्र प्रथमा टीका रुय्यकापराभिधरुचककृत काव्यप्रकाशसङ्केत (११३४-६० ख्री०) मुद्रितश्च (Calcutta Oriental gournal, Vol II, p 1–75), द्वितीया-माणिक्यचन्द्रकृत काव्यप्रकाशबृहत्सङ्केत (११५९-६० ख्री०) मुद्रितश्च आनन्दाश्रमग्रन्थमालायाम् मैसूरे च, तृतीया-श्रीधरकृत काव्यप्रकाशविवेक १२२५ ख्री०), मुद्रितश्च कालिकातानगरे, चतुर्थी—सोमेश्वरकृत काव्यप्रकाशादर्श काव्यप्रकाशसङ्केतो वा, मुद्रितश्च राजस्थानपुरातनग्रन्थमालायाम्, जोधपुरे, पञ्चमी-(नरहरि-) सरस्वती-तीर्थकृता बालचित्तानुरञ्जनी वाराणस्या कृता (टीकाकृज्जन्म १२९८ वै०), षष्ठी—गुर्जरदेशजपुरोहित-जयन्तभट्टकृता दीपिका जयन्ती वा (१२९४ ख्री०), ७ गोपालभट्टकृत साहित्य-चूडामणि , त्रिवेन्द्रमनगरे सम्प्रदायप्रकाशिन्या सह मुद्रित (१९२६ ख्री०), ८ चण्डीदासकृता दीपिका (१३०० ख्री०) वाराणस्या सरस्वतीभवनग्रन्थमालाया मुद्रिता, ९ विश्वनाथकृत काव्यप्रकाशदर्पण (१३००-१३८० ख्री०), १० श्रीविद्याचक्रवर्तिकृता सम्प्रदायप्रकाशिनी-त्रिवेन्द्रमनगरे साहित्यचूडामणिना सह मुद्रिता; ११ परमानन्दकृता विस्तारिका-वाराणसेयसस्कृतविश्वविद्यालयेन मुद्रिता, १२ गोविन्दठक्कुरकृतः प्रदीप निर्णयसागरमुद्रणालये आनन्दाश्रमे च मुद्रित , (प्रदीपस्य नागेशकृता उद्योतटीका आनन्दाश्रमे, वैद्यनाथतत्सत्कृता प्रभाटीका च काव्यमालाया मुद्रिता), १३ श्रीवत्सलाञ्छनकृता सारबोधिनी, १४ महेश्वरभट्टाचार्यकृतो भावार्थचिन्तामणि आदर्शो वा, कलिकातानगरे मुद्रित , १५ कमलाकरभट्टकृता टीका वाराणस्या मुद्रिता, १६ नरसिंह-ठक्कुरकृता नरसिंहमनीषा, १७ गोकुलनाथकृत विवरणम् (१६०९ ख्री०), अपूर्णपञ्चमोल्लासान्तमुपलब्ध मुद्रित च सरस्वतीभवनग्रन्थमालायाम्; १८ भीमसेनदीक्षितकृतः सुधासागर (१७२३ ख्री०) चौखम्बासस्कृतग्रन्थमालाया मुद्रित , १९. चैतन्यमतानुयायिना बलदेवविद्याभूषणेन कृता साहित्यकौमुदी नाम टीका तथाकथितभरतसूत्र-रूपाणा काव्यप्रकाशकारिकाणामेव वृत्तिरूपा व्याख्या (१७६० ख्री०), अनेनैव कृता कृष्णानन्दिनी प्रटीका च काव्यमालाया मुद्रिता, २० महेशचन्द्रदेवेन कृता तात्पर्यविवृति (१८८२ ख्री०) कलकत्ताया मुद्रिता, २१ वामनाचार्यझळकीकरकृता बालबोधिनी (१८८२ ख्री०) पूनानगरे प्रकाशिता, २२ प हरिशङ्करसङ्गृहीता सर्वथा बालबोधिन्युपजीविनी बालमात्रोपकारिका नागेश्वरी टीका (१९२४ ख्री०) काशीसंस्कृतग्रन्थमालाया

प्रकाशिता, २३ अस्मत्कृता हैमवती टीका (५०७५ यौधिष्ठिराब्दा, १९७४ ख्रै०) प्रकाश्यमाना इति ।

५० **अलक अल्लटो वा**—अय काव्यप्रकाशपूरक अतो मम्मटात् पश्चाद् भूत । किन्तु रुचकेन (रुय्यकेण) सर्वस्मिन् काव्यप्रकाशे सङ्केत' कृत इति रुय्यकात् प्राचीन एव । काव्यप्रकाशे अस्य कीदृश कृतित्वमिति काव्यप्रकाशकारविचारे पूर्वमेव विचारितम् ।

५१ **शातकर्णि**—सागरनन्दिना स्वकीये नाटकलक्षणरत्नकोशे शङ्करेण शाकुन्तल-टीकाया च सूत्रधारविषयेऽयमुल्लिखित ।

५२ **सागरो नन्दी**—अस्य समय ख्रैस्ताब्दानामेकादश शतकमिति विद्वासो मन्यन्ते । नन्दिवशजेन अनेन "श्रीहर्ष-विक्रमनराधिप-मातृगुप्त-गर्गा-ऽश्मकुट्ट-नखकुट्टक-बादराणाम् । एषा मतेन भरतस्य मत विगाह्य घुष्ट मया समनुगच्छत रत्नकोशम्" इतिवदता महत्त्व-पूर्णो नाटकलक्षणरत्नकोशाख्यो ग्रन्थ कृत । अय च ग्रन्थ सौन्दरनन्दादिग्रन्था इव नेपालपुस्तकालयेष्वेव सुरक्षितोऽभूत् । सिल्वाँलेविमहाशयेनास्य प्रचार कृत , लण्डन-नगर १९३० ख्रैस्ताब्दे मुद्रितश्चाय ग्रन्थ । इदानी तु वाराणस्यामपि मुद्रित ।

५३ **राजानक तिलक**—रुय्यकपिताऽयम् उद्भटविवेककार । अस्यैव मत बहुपु स्थलेपु अलङ्कारसर्वस्वे रुय्यकेण प्रतिपादितम् इति विमर्शिन्या जयरथ प्रतिपादयति । उद्भटविवेकश्चाय गायकवाडग्रन्थयालाया मुद्रित (१९३१ ख्रै०) ।

५४ **रुय्यको रुचको वा**—काव्यप्रकाशकारेण रुय्यकमत खण्डितमिति नागोजिभट्ट-वामनाचार्यझडकीकराद्युक्तमसङ्गतम् इति इदानीमितिहासज्ञा भणन्ति । रुय्यकेण अलङ्का-रसर्वस्वे भावोदयादय अलङ्कारा उक्ता , काव्यप्रकाशे च "यद्यपि भावोदयभावसन्धिभा-वशबलत्वानि नालङ्कारतया उक्तानि तथापि कश्चिद् ब्रूयादित्येवमुक्तम्" इति पञ्चमो-ल्लासे दृश्यते इति, अन्वयव्यतिरेकाभ्याम् अलङ्काराणा शब्दगतत्वेन अर्थगतत्वेन वा व्यवस्थेति मम्मटमत रुय्यकेण अलङ्कारसर्वस्वान्ते खण्डितमिति च उक्तग्रन्थद्वयविवेचने-नैव काव्यप्रकाशकारो रुय्यकात् प्राचीन इति निर्णेतु शक्यते । रुय्यक-रुचकयो पर्याय-त्वाद् इदानी रुचककृता काव्यप्रकाशटीका चोपलब्धेति उक्तो निर्णय सुदृढो भवति । रुय्यकेण स्वशिष्यमङ्खककृतश्रीकण्ठचरितात् पञ्च श्लोका उद्धृता , श्रीकण्ठचरितरचना-समयश्च ११४५ ख्रै० इति रुय्यक ख्रैस्ताब्दाना द्वादशे शतके बभूवेति ज्ञायते । अस्य पिता राजानकस्तिलक । अस्य च रुय्यक इति रुचक इति च द्वे नामनी । तथाहि सहृ-दयलीलाख्यग्रन्थस्योपसहारे 'कृति श्रीविपश्चिद्वरराजानकतिलकात्मज(स्य) श्रीमदा-लङ्कारिकसमाजाग्रगण्यस्य श्रीराजानकरुय्यकस्य राजानकरुचकापरनाम्नोऽलङ्कारसर्वस्व-कृत' इत्युपलभ्यते । अस्य ग्रन्था—१. अलङ्कारानुसारिणी जयरथोल्लिखिता, २ काव्यप्रकाशसङ्केतो जयरथोल्लिखित उपलभ्ययानो मुद्रितश्च, ३ नाटकमीमासा, ४ व्यक्तिविवेकविचारोऽपूर्ण उपलभ्यमानो मुद्रितश्च, ५ श्रीकण्ठस्तव (अलङ्कारसर्वस्वे

उल्लिखितः), ६ सहृदयलीला (मुद्रिता), ७ साहित्यमीमासा (अनन्तशयनग्रन्थमालायां १९३६ ख्रै० मुद्रिता ?), ८ हर्षचरितवार्तिकम्, ९ अलङ्कारसर्वस्व च । तत्र सहृदय-लीलाया सौन्दर्य-तद्वर्धनसाधनादीना प्रतिपादनमस्ति । साहित्यमीमासायामनन्तशयनमु-द्रिताया शब्दवृत्त्यादय , दोषा गुणा , क्रम-मुद्रा-दीपक-युक्ति-पठिति-गुम्फनादय शब्दाल-ङ्कारा , अर्थालङ्कारा , रसा , भावा , वृत्तयः, लक्षणानि, कविसाधनाभेदा कविभेदाः, कविसमया , वेद-पाणिनीयव्याकरण-वार्तिक-भाष्य-निरुक्त-सूत्र-स्मृत्यादिषु प्रयुक्ताना शब्दाना कविभि प्रयोज्यत्वम्, कालिदास-बाणादिप्रयोगाणा च कविभिरनुसरणीयत्वम्, ऋतूत्सवा , ऋतुक्रीडा , काव्यपाठकलाभाश्च प्रतिपादितानि । अलङ्कारसर्वस्वे च केवला-नामलङ्काराणा प्रतिपादनमस्ति । अय ग्रन्थः सूत्रवृत्त्युदाहरणरूप प्रौढ सुव्यवस्थितश्च । अस्य ग्रन्थस्य टीकाश्च जयरथकृता विमर्शिनी (काव्यमालाया मुद्रिता), समुद्रबन्धकृता टीका (अनन्तशयनग्रन्थमालाया मुद्रिता), श्रीविद्याचक्रवर्तिकृता सञ्जीविनी (मुद्रिता) उपलभ्यन्ते ।

५५ मङ्खः मङ्खक मङ्खुको वा—मङ्खुस्य अलङ्कारसूत्रम् अस्मदध्यापकश्रीयुत-जयमन्तमिश्रप्रणीते हिन्दिभाषामये काव्यात्ममीमासाग्रन्थे उल्लिखितम् अस्ति । कोऽयम् मङ्खुक ? रुय्यकशिष्यो मङ्खक एव वा अन्यो वेति न विज्ञायते ।

५६ शङ्ख शङ्खधर शङ्खचूड शङ्करो वा—कान्यकुब्जस्थ-महामाण्डलिकाधि-राजगोविन्दनृपतिरक्षितोऽय खैस्ताब्दाना द्वादशे शतके बभूव । अनेन कविकर्पटी (कविकर्पटिकारचना वा) कृता । तत्र कर्पटीशब्दो न जीर्णपटखण्डवाचको यथा देमहाशयो मन्यते (प्र० ख० पृ० ३०९), किन्तु विलासिग्राह्यसूक्ष्मश्लक्षणकरपट (handkerchief) वाचक । लटकमेलकप्रहसनस्य कर्ताऽपि अयमेव ।

५७ शोभाकरमित्र—अय रुय्यकादर्वाक् जयरथात् प्राक् खैस्ताब्दाना द्वादश-त्रयोदशशतकयो सन्धौ बभूव । अस्य जनपदश्च कश्मीरा एव । अयम् अप्पय्यदीक्षितेन जगन्नाथेन च स्मृत । अस्य ग्रन्थोऽलङ्काररत्नाकर सूत्रवृत्त्युदाहरणात्मक पूनानगरे १९४२ खैस्ताब्दे मुद्रित ।

५८ हेमचन्द्र—अय खैस्ताब्दानामेकादशस्य शतकस्य चतुर्थे चरणे द्वादशस्य शतकस्य आद्येषु त्रिपु चरणेषु च बभूव (१०८८–११७२ खै०) । अय जैन साधु । अस्य जन्म गुर्जरदेशस्य अहमदावादमण्डलस्य धुन्धुकग्रामे बभूव । जयसिंहसिद्धराजोत्त-राधिकारिण कुमारपालस्य (११४३–११७२ खै०) अय गुरु । अस्यैव कुमारपालस्य प्रार्थनया हेमचन्द्रेण बहवो ग्रन्था कृता । ते यथा—शब्दानुशासनम्—सिद्धहेमचन्द्रव्या-करणापराभिधम्—स्वोपज्ञवृत्तिसहितम्, काव्यानुशासनम्, प्रमाणमीमासा, योगशास्त्रम्, द्व्याश्रयकाव्यम्, स्तोत्राणि चेति । काव्यानुशासनस्य विवेकाख्या टीकाऽपि अनेन कृता । तत्र प्रकृते काव्यानुशासने सूत्रवृत्त्युदाहरणात्मके प्रथमेऽध्याये—काव्यप्रयोजनहेतु-लक्षणानि, शब्दार्थाश्च, द्वितीये—रसादय 'तृतीये—दोषा , चतुर्थे-त्रयो गुणा , पञ्चमे-

पट् शब्दालङ्कारा', पष्ठे-ऊन-त्रिंशद् अर्थालङ्कारा (रसवदादिवर्जिता), सप्तमे—नायक नायिका) प्रकारगुणा, अष्टमे-प्रेक्ष्य-श्रव्य-काव्यभेदा प्रतिपादिताः सन्ति। अय सङ्ग्रहात्मक एव ग्रन्थ ।

५९-६० रामचन्द्र-गुणचन्द्रौ—इमौ हेमचन्द्रशिष्यौ जैनौ। अनयो समयोऽपि हेमचन्द्रसमयेनैव प्राय समान । एताभ्या नाट्यदर्पण कृत । मुद्रितश्चायं ग्रन्थोऽनेकवारम्। एतस्य वृत्तिरपि एताभ्यामेव कृता। रामचन्द्रस्य तेनैकेन कृता अपि बहवो रूपकरूपा ग्रन्था सन्ति, गुणचन्द्रस्य तु तेनैकेनैव विरचितोऽन्यो ग्रन्थो नास्ति। नाट्यदर्पणे च चत्वारो विवेका सन्ति। तत्र क्रमेण नाटकम्, प्रकरणादीनि, रसा भावाभिनयादयश्च निरूपितानि। वृत्तौ अन्ते उपरूपकाण्यपि सक्षेपेण प्रतिपादितानि।

६१ वाग्भट (प्रथम)—वाग्भटनामका बहव पुरुषा बभूवुः। तत्र अष्टाङ्गहृदयनामकस्याऽऽयुर्वेदग्रन्थस्य कर्तु वाग्भटस्य पितामहोऽपि वाग्भटनामक एव बभूव (अष्टाङ्गसङ्ग्रहे उत्तरतन्त्रे अ० ५०)। अष्टाङ्गसङ्ग्रहा-ऽष्टाङ्गहृदय (वाग्भट) योः कर्ता वाग्भट ख्रैस्ताब्दाना सप्तमे शतके भारतवर्पं परिभ्रमता चीनजयात्रिणा इत्सिङाख्येन नवीनायुर्वेदाचार्यत्वेनोल्लिखित, तद्ग्रन्थप्रचारश्चोल्लिखित इति च स ख्रैस्ताब्दाना पञ्चमे षष्ठे वा शतके बभूवेति आयुर्वेदेतिहासज्ञाः। अतोऽयम् अलङ्कारशास्त्रग्रन्थकाराभ्या द्वाभ्यामपि वाग्भटाभ्यां भिन्न एव। अलङ्कारशास्त्रग्रन्थस्य कर्तारौ द्वौ वाग्भटौ प्रसिद्धौ। तत्र प्रथमो वाग्भटालङ्कारस्य कर्ता। अय जैन । अस्य समयश्च ख्रैस्ताब्दाना द्वादशशतकस्य मध्यम् (११२५–११५६)। अस्य ग्रन्थे च प्रथमे परिच्छेदे काव्यलक्षणादिकम्, द्वितीये—सस्कृतप्राकृतादिभाषाविवरणम्, गद्य-पद्य-चम्पू-प्रभृतिकाव्यभेद निरूपणम्, पदवाक्यार्थदोषविवरण च, तृतीये—दशाना गुणाना विवरणम्, चतुर्थे—चित्रादिशब्दाल्ङ्कारविवरणम्, पञ्चत्रिंशतोऽर्थालङ्काराणा विवरणम्, वैदर्भ्या गौड्याश्च रीत्योर्वर्णनम्, पञ्चमे—रस-नायक (नायिका)-भेदविवरण च सन्ति। वाग्भटालङ्कारटीकाकारेण सिंहदेवगणिना (४।१७८) वाग्भटोऽय महाकवि, महामात्य, सोमसुत इत्युक्तम्। एव चाऽय वाग्भटो महाकविरिति, नेमिनिर्वाणमहाकाव्यस्य एक श्लोको महायमकोदाहरणत्वेन वाग्भटालङ्कारे धृतश्चेति तस्याऽपि महाकाव्यस्य कर्ता अयमेव वाग्भट इति काणेमहाशयस्य मतम्। अस्य वाग्भटालङ्कारस्य जिनवर्धनसूरि-गणेश-क्षेम-हंसगणि- राजहंसोपाध्यायादिकृता अन्या अपि टीका सन्ति। तत्र जिनवर्धनकृता मद्रासे बम्बईग्रन्थमालाया च; सिंहदेवगणिकृता काव्यमालायाम् मुद्रिता। राजाज्ञापरवशतया अनीप्सितमपि राजान्त पुर गन्तु लग्नाया परमसुन्दर्या विदुष्या कन्याया "तात वाग्भट मा रोदी कर्मणा गतिरीदृशी। दुषधातोरिवास्माक गुणो दोषाय केवलम्" इति सान्त्वन रसिकेषु प्रसिद्ध तु क वाग्भट प्रतीति विशेषतो न ज्ञायते।

६२ मलधारी नरेन्द्रप्रभसूरि—१२४२ ख्रैस्ताब्दे मृतस्य वास्तुपालस्य अनुरोधाद्

अनेन अलङ्कारमहोदधि विरचित । अय च ग्रन्थो गायकवाडसस्कृतग्रन्थमालाया मुद्रित (वडोदा, १९४२) ।

६३-६४ **अरिसिंहा-ऽमरचन्द्रौ**—अनयो समय खैस्ताब्दाना त्रयोदशस्य शतकस्य मध्यमो भाग । एताभ्या कविरहस्यापराभिधा काव्यकल्पलता कृता, सा च चतुर्षु प्रतापेषु विभक्ता, कविकण्ठाभरणादिसदृशी कविशिक्षा, मुद्रिता चेय चौखम्बासस्कृतग्रन्थ-मालायाम् ।

६५ **धर्मदाससूरिः**—अय खैस्ताब्दाना त्रयोदशस्य शतकस्य चतुर्थात् पादात् प्रागेव बभूव । केचनाऽय खैस्ताब्दानामेकादशे शतके बभूवेति वदन्ति । अनेन विदग्धमुखमण्डन कृतम् । अस्मिन् ग्रन्थे चत्वार परिच्छेदा सन्ति । तेषु प्रहेलिका चित्रकाव्यानि च निरूपितानि । मुद्रितश्चाय ग्रन्थो निर्णयसागरमुद्रणालयेऽन्यत्र च ।

६६ **देवेश्वर**—अस्य समयोऽमरचन्द्रात् पश्चात् शार्ङ्गधरपद्धतित (१३६३ खै०) प्राक् खैस्ताब्दाना चतुर्दशस्य शतकस्यारम्भे निश्चितोऽस्ति । अय जैन । अनेन कविकल्प-लता कृता । सा च सर्वथा काव्यकल्पलतामुपजीवति । मुद्रिता चेयम् ।

७६ **वाग्भट (द्वितीय)**—अयम् अलङ्कारशास्त्रग्रन्थकारं प्रथम वाग्भटमुल्लिखति इत्यस्य समय खैस्ताब्दाना चतुर्दश शतकमित्यनुमीयते । अयमपि जैन । अनेन काव्यानु-शासन कृतम् । ग्रन्थकृदुपज्ञव्याख्यासहितोऽय ग्रन्थ काव्यमालाया मुद्रित (सङ्० ४१) । अनेन छन्दोऽनुशासनम्, ऋषभदेवचरित च कृतम् ।

६८ **जयदेवः पीयूषवर्षापराभिध**—अस्य समय शार्ङ्गधरपद्धतित (१३६१ खै०) प्राक् प्रसन्नराघवपद्याना तत्रोद्धृतत्वात् । अस्य पिता महादेव, माता सुमित्रा । अस्य ग्रन्थौ चन्द्रालोक, प्रसन्नराघव च । **पक्षधर** इत्यप्यस्यैव नाम, तन्नाम्ना च मण्यालोका-दयो ग्रन्था अनेन कृता । गीतगोविन्दकारो जयदेवोऽप्ययमेवेति विश्वेश्वरसिद्धान्तशिरो-मणिर्मन्यते, भिन्न स इति काणेप्रभृतयो वदन्ति । चन्द्रालोक संक्षिप्त प्राय सरलो बालोपयोगोचित इति केचिद् मन्यन्ते । वस्तुतस्तु चन्द्रालोक कठिन प्रौढश्च, सक्षिप्त-त्वात् कुत्रचिदतीव दुर्बोधश्च । दोषप्रकरणम् अलङ्कारप्रकरण च प्रायेण सरलम् । तत्र प्रथमे मयूखे—काव्यहेतुलक्षणे, पदभेदा, वाक्यप्रकाराश्च, द्वितीये—दोषा, तृतीये—लक्षणानि, चतुर्थे—दशगुणा ; पञ्चमे—अलङ्कारा, षष्ठे-रसा, सप्तमे-शब्दवृत्तयो व्यञ्जना च, अष्टमे-ध्वनिगुणीभूतव्यङ्ग्यभेदा, नवमे—लक्षणा; दशमे—अभिधा इति विषया सन्ति । चन्द्रालोकटीकाश्च—प्रद्योतनभट्टाचार्यकृता शरदागमटीका, वैद्यनाथ-पायगुण्डेकृता रमा, गागाभट्टाख्यविश्वेश्वरभट्टकृता राकागमाख्या टीका, नन्दकिशोरकृता पौर्णमासी च मुद्रिता, दीपिका, शारदशर्वरी, वाजचन्द्रकृतटीका च अमुद्रिता ।

६९. **विद्याधरः**—अस्य समय खैस्ताब्दाना त्रयोदशस्य शतकस्य चतुर्थ पाद चतुर्दशस्य शतकस्य प्रथम पादश्चेति निश्चीयते (१२८५-१३२५ खै०) । अयमुत्कल-

देशज । अनेन एकावली कृता । इय काव्यप्रकाशमलङ्कारसर्वस्व च उपजीवति । अस्य ग्रन्थस्य मल्लिनाथेन तरलाख्या टीका कृता । इय च टीका बम्बइ-सस्कृत-ग्रन्थमालाया मुद्रिता । विद्याधरेण केलिरहस्याख्य कामशास्त्रग्रन्थोऽपि कृत ।

७० **विद्यानाथ**—अस्य समय ख्रैस्ताब्दाना चतुर्दशस्य शतकस्य प्रथम पाद । मुहम्मदतुगलकसेनया प्रतापरुद्र १३२३ ख्रैस्ताब्दे निगृहीत, विद्यानाथेन च प्रतापरुद्रय-शोभूषण नाम काव्यालङ्कारग्रन्थ कृत इति इति विद्यानाथस्य समयस्य निर्धारण सुकरम् । प्रतापरुद्रयशोभूषणे च—नायक-काव्य-नाटक-रस-दोष-गुण-शब्दालङ्कारा-ऽर्था-लङ्कार-मिश्रालङ्कारा प्रतिपादिता नवसु प्रकरणेषु । अस्य ग्रन्थस्य टीका च मल्लि-नाथसुतकुमारस्वामिकृताऽस्ति। तस्या नाम रत्नापण इति । सरत्नापण प्रतापरुद्रयशोभूषण बम्बइ-सस्कृत-ग्रन्थमालाया (१९०९ ख्रै०) मद्रासे च (१९५० ख्रै०, तृ० म०) मुद्रितम् ।

७१ **शारदातनयः**—अय शिङ्ग (सिंह) भूपालात् प्राग् बभूवेति केचित् । भाव-प्रकाशनसम्पादकस्तु अय विश्वनाथादपि प्राग् बभूवेति मन्यते । काणेमहाशयस्तु अय ख्रैस्ताब्दाना द्वादशस्य शतकस्य चतुर्थे पादे त्रयोदशस्य शतकस्य पूर्वार्धे च बभूवेति (११७५-१२४० ख्रै०) प्रतिपादयति । अय भट्टगोपालस्य पुत्र । काव्यप्रकाशटीकाकारो भट्टगोपालो मम्मटादर्वाचीन कमपि नोल्लिखति, स तु पञ्चदशशतकपूर्वार्धस्थेन कुमार-स्वामिना उल्लिखित इति सोऽय शारदातनयपितेति न न सम्भाव्यते । शारदातनयेन च भावप्रकाशन नाम नाट्यशास्त्रग्रन्थ कृत । सञ्चारिभावाना निरूपणे अन्येषु विषयेषु च महत्त्वपूर्णोऽय ग्रन्थ । पद्यमयेऽस्मिन् ग्रन्थे च प्रथमेऽधिकारे—भावा, अनुभावा, स्त्रीणा मानसानुभावा भावहावादय, गात्रारम्भानुभावा लीलाविलासादय, पौरुषा गात्रारम्भा-नुभावा शोभाविलासादय, वागारम्भानुभावा आलाप-प्रलाप-विलापादय, द्वितीये—रसस्वरूपाश्रयवृत्तय, तृतीये—रसभेदा, चतुर्थे—शृङ्गारालम्बननायक (नायिका) दिस्वरूपाणि, पञ्चमे—नायक(नायिका)-भेदतत्तदवस्थादय, षष्ठे—शब्दार्थसम्बन्धतद्भे-दादय, काव्यभेदाश्च, सप्तमे—नाटचेतिवृत्तशरीरलक्षणादय, अष्टमे—दशरूपकलक्ष-णानि (तोटक-नाटिका-सट्टकलक्षणानि च), नवमे—नृत्यभेदा, डोम्बी-गोष्ठी-सल्ँला-पक-शिल्पक-श्रीगदित-नन्दिमालिभाण-भाणिका-प्रस्थानक-काव्य-प्रेक्षणक-पिण्डीबन्धादिना-टचरासक-चर्चरीरासक-रासकापसारकत्रयो-ऽल्लोप्यक-हल्लीस-दुर्मल्लिका (मतल्लिका)-मल्लिका-कल्पवल्ली-पारिजातकादय (इति नानामतेनोक्ता नृत्यभेदा. प्रदर्शिता । वैकल्पिक लक्ष्म तेषा न क्वचिच्च निषिध्यते—पृ० २६९, पङ् २०-२१); भाषानियम, छन्दोनिपातार्थादय, आख्यायिका-सर्गबन्धादिकाव्यानि च, दशमे—नाटचप्रयोगभेदप्रकार-विशेषा, मार्ग-देशी-नृत्य-नृत्त-विभाग, नाटचवेदावतार, भरतादिनामनिर्वचनम्, आन्त -पुरिका-सञ्चारिका-ऽऽयुक्तिका-निर्मुण्डादिस्वरूपाणि, रङ्गमण्डप, लास्य-ताण्डव-गुण्डली-वृन्द-ध्रुवालक्षणानि, रसभावाना वाक्यार्थत्वम्, भारतवर्षस्वरूप-तदाश्रयणावश्यक-दक्षिणा-

पथ-जनपदभाषा-शकारा-ऽऽभीरादिगोष्ठीलक्षणादिकम् इति विषया प्रतिपादिता । अयं च ग्रन्थो गायकवाडसस्कृतग्रन्थमालाया मुद्रित (१९३० ख्री०) ।

७२ **विश्वनाथ कविराज**—अनेन अल्लावदीननृपते (अलाउद्दीन खिलजी, राज्य-कालोऽस्य १२९६—१३१६ ख्री०) उल्लेख कृत (सा० द० ४।१४ उदाहरणे) इति, जम्मूनगरस्थ साहित्यदर्पणादर्श (कोश, प्रतिलिपि, प्रतिकृति) १३८४ ख्रैस्ताब्दे लिखित इति चास्य समय ख्रैस्ताब्दाना चतुर्दशस्य शतकस्य पूर्वो भाग (१३००—१३६४ ख्री०) इति इतिहासज्ञा वदन्ति । अस्य पिता चन्द्रशेखर, पितामहो नारायण-दास । अय च उत्कलब्रह्म (कलिङ्गदेशजो वा ब्राह्मण) अस्य ग्रन्था —काव्यप्रकाश-दर्पण, साहित्यदर्पण, राघवविलास महाकाव्यम्, कुवलयाश्वचरित प्राकृतकाव्यम्, प्रभावती-परिणयम् (नाटिका), चन्द्रकला (नाटिका), नरसिंहविजय काव्यम्, प्रशस्ति-रत्नावली (करम्भकम्) इति । तत्र साहित्यदर्पणे बहवो दोषा पूर्वापरसन्दर्भशुद्धिरहित-त्वादयस्तथापि काव्यनाटच विद्याविषयकसर्वविषयसङ्ग्रहरूपत्वात् स्फुटत्वात् सरलत्वाच्च लोकप्रियोऽय ग्रन्थ । साहित्यदर्पणटीकाश्च—विश्वनाथपुत्रानन्तदासकृता लोचनाख्या, महेश्वरभट्टाचार्यकृता विज्ञप्रिया च (लाहौरनगरे १९३८ ख्रैस्ताब्दे मोतीलालेन प्रका-शिते), रामचरणकृता टीका च दुर्गाप्रसादकृतटिप्पणीभि सह निर्णयसागरमुद्रणालये मुद्रिता, रामचरणटीका-दुर्गाप्रसादकृतटिप्पन्युपजीविनी कृष्णमोहनशास्त्रिकृता लक्ष्मीटीका च काशीसस्कृतग्रन्थमालाया प्रकाशिता ।

७३ **शिङ्गभूपाल सिंहभूपालो वा**—अस्य समय १३३० ख्रैस्ताब्दानाम् आसन्न काल । अस्य विन्ध्याचलात् प्रभृति आश्रीशैलाद् राज्य बभूव किल । अय रसार्णवसुधा-करारम्भे आत्मान शूद्रमुद्घोषयति । अनेन रसार्णवसुधाकरो नाम नाटचलक्षणग्रन्थ कृत किल । शार्ङ्गदेवकृतस्य सङ्गीतरत्नाकरस्य सङ्गीतसुधाकरनाम्नी टीका च अनेन कृतेति इतिहासज्ञा वदन्ति ।

७४ **भोगनाथः सायण**—सायण इति कुलनाम्नैव प्रसिद्धस्य वेदाना व्याख्यातृत्वेन माधवीयधातुवृत्तिकारत्वेन च प्रसिद्धस्य सायणाचार्यस्य कनिष्ठो भ्राताऽयम् । अनेन १३८५ ख्रैस्ताब्दानामासन्ने समये अलङ्कारसुधानिधिर्नाम अलङ्कारग्रन्थ कृत । अयं च ग्रन्थोऽप्पय्यदीक्षितेन वृत्तिवार्त्तिके (१९ पृ) रत्नापणाख्याया मल्लिनाथसुतकुमार-स्वामिकृताया प्रतापरुद्रयशोभूषणटीकायाँ (४४ पृ) च उल्लिखितोऽस्ति ।

७५. **भावदेवसूरिः**—काव्यालङ्कारसारकारोऽय काव्यात्ममीमासानामके हिन्दीभाषा-मये ग्रथेऽस्मदध्यापकश्रीयुतजयमन्तमिश्रमहाशयेनोल्लिखित (३४७ पृ०) ।

७६ **अमृतानन्दयोगी**—अनेन अलङ्कारसङ्ग्रहो मन्वभूपत्यादेशेन कृत । अस्मिन् ग्रथे एकादश अध्याया. सन्ति काव्यनाटचयोर्विचारोऽस्ति । अय ग्रथ ख्रैस्ताब्दाना चतुर्दशस्य शतकस्योत्तरार्धे कृत., मुद्रितश्च अड्यारग्रन्थमालाया बटकेश्वरप्राच्यग्रन्थ-मालाया च ।

७७ **अल्लराजो मल्लराजो वा**—राज्ञो हम्मीरस्य पुत्रेण अल्लराजेनानेन खैस्ताब्दाना चतुर्दशे शतके भूतेन रसरत्नप्रदीपिका कृता। मुद्रितश्चाय ग्रन्थो बम्बइनगरे (१८८५ खैस्ताब्दे)।

७८ **अणुरत्नमण्डनो रत्नमण्डनगणिर् वा**—अय १४६० खैस्ताब्दे कालधर्मं प्राप्तस्य रत्नशेखरसूरे शिष्य । अनेन जल्पकल्पलता कृता।

७९ **धर्मसुधी धर्मसूरिः वा**—अनेन खैस्ताब्दाना पञ्चदशस्य शतकस्यारम्भे भूतेन पर्वतनाथपुत्रेण साहित्यरत्नाकरो नाम ग्रन्थ कृत । मुद्रितश्चाय ग्रन्थो मद्रासे (१८७१), नलौरप्रदेशे च।

८० **श्रीवत्सलाञ्छन.**—अनेन कृतायाः काव्यपरीक्षाया १५५० खैताब्दे लिखितो हस्तलेख प्राप्यते। डा पी एल् वैद्यसम्पादिता काव्यपरीक्षा दर्भङ्गानगरे मुद्रिता। अनेन काव्यप्रकाशटीकाया सारबोधिन्या विद्यानाथ उल्लिखित । अय च जगन्नाथेन रसगङ्गाधरे उल्लिखित ।

८१. **भानुदत्त**—अस्य समय खैस्ताब्दाना पञ्चदशस्य शतकस्योत्तरार्धम् (१४५०-१५०० खै०)। अय मिथिलानिवासी गणेश्वरपुत्र । अस्य ग्रन्था—रसमञ्जरी, रसतरङ्गिणी, अलङ्कारतिलकम्, रसपारिजातम् (प वदरीनाथ सम्पादितम्), गीतगौरीपति. (गीतगोविन्दानुकरणरूपम्)। रसमञ्जर्या एकादश टीका प्राप्यन्ते, तत्र त्र्यम्बकपुत्रकृता व्यङ्ग्यार्थकौमुदी शिवभट्टसुतनागेशभट्टकृता प्रकाशाख्या च वाराणसीसस्कृतग्रन्थमालाया मुद्रिते।

८२ **मधुसूदन सरस्वती**—अनेन भक्तिरसायन नाम रसविवेचनपरो ग्रथ कृत । मुद्रितश्चाय ग्रथ ।

८३ **रूपगोस्वामी**—अस्य समय खैस्ताब्दाना पञ्चदश-षोडशयो. शतकयो सन्धि । अय मुकुन्दपौत्र कुमारपुत्र. चैतन्यमहाप्रभुशिष्य । अस्य ग्रथा—हसदूतम् उद्धवसन्देश च काव्ये, विदग्धमाधवम्, ललितमाधवम्, उत्कलिकावल्लरी, दानकेलिकौमुदी, नाटकचन्द्रिका, भक्तिरसामृतसिन्धु, उज्ज्वलनीलमणिश्चेत्यादय सप्तदश जीवगोस्वामिना लघुतोषिण्या परिगणिता । तत्र नाटकचन्द्रिकाया नाटकविषया. प्रतिपादिता', साहित्यदर्पणो भरतनाट्यशास्त्रविरुद्ध इति तत्रोक्तम्, अङ्क (दृश्य) विभागादिव्यवस्थाऽपि तत्र प्रतिपादिता। मुद्रितश्चाय ग्रन्थ । भक्तिरसामृतसिन्धौ भक्तिरस. सम्यक् प्रतिपादित । तत्र पूर्वभागे—भक्तिलक्षणम्, भक्तिभेदाश्च; दक्षिणविभागे—विभावानुभावादय, पश्चिमविभागे—शान्तभक्ति, प्रीतभक्ति, प्रेयोभक्ति, वत्सलभक्ति; मधुरभक्तिश्च; उत्तरविभागे—हास्याद्भुतवीरकरुणरौद्रबीभत्सभयानकाना गौणरसत्वम्, भक्तिरसस्य मुख्यरसत्वम्, रसमैत्रीविरोधौ, रसाभासाश्च प्रतिपादितानि। अस्य ग्रथस्य रचना १६६३ शाकान्ताब्दे (१५४१ खैस्ताब्दे) कृता। उज्ज्वलनीलमणौ भक्तिरसा-

मृतसिन्धुपरिशिष्टरूपे उज्ज्वलाख्यस्य मधुर (शृगार) रसस्य विस्तरेण विवेचन कृतम्। उज्ज्वलनीलमणे प्रथमा टीका रूपभ्रातुर्वल्लभस्य पुत्रेण जीवगोस्वामिना कृता लोचनरोचनाख्या मुद्रिता च, द्वितीया च विश्वनाथचक्रवर्तिना गौडवैष्णवाचार्येण कृता आनन्दचन्द्रिका उज्ज्वलनीलमणिकिरणापराभिधा।

८४ **गङ्गानन्द कविराज**—अय मैथिल। अनेन बिकानेरराजस्य श्रीकर्णस्य समये (१५०५–१५२६ ख्रै) कर्णभूषण कृतम्। तत्र पञ्चसु अध्यायेषु विभावानुभावव्यभिचारिभावरसाना विवेचन कृतम्। अत्र उदाहरणानि कर्णविषयकाणि सन्ति। मुद्रितश्चाय ग्रन्थो निर्णयसागरमुद्रणालये। अनेन काव्यडाकिनी अपि कृता। तत्र च पञ्चसु दृष्टिषु काव्यदोषा प्रदर्शिता। मुद्रितश्चाय ग्रन्थ सरस्वतीभवनग्रन्थमालाया वाराणस्याम् (१९२४ ख्रै)।

८५ **केशवमिश्र**—अय काँगडाराज माणिक्यचन्द्रम् आश्रित। अतोऽस्य समयो माणिक्यचन्द्रस्य राज्यकालेन (१५६३–१५७३ ख्रै) सूचितः। तस्यैव राज्ञोऽनुरोधादनेन अलङ्कारशेखरः कृत। अय च ग्रन्थः शौद्धोदनिकृतकारिकाव्याख्यारूप। शौद्धोदनिश्चाय महिमभट्टमुल्लिखति, "काव्य रसादिमद् वाक्य श्रुत सुखविशेषकृद्" इति काव्यलक्षण च प्रतिपादयति। किन्तु कोय शौद्धोदनिः कदा चाऽभूदिति विशेषेण न ज्ञायते। कारिका शौद्धोदनिकृता इति तु "अलङ्कारविद्यासूत्रकारो भगवाञ्छौद्धोदनि परमकारुणिक स्वशास्त्रे प्रवर्तयिष्यन् प्रथम काव्यस्वरूपमाह" इति केशवमिश्रलेखादलङ्कारशेखरादेव ज्ञायते। कारिकावृत्त्युदाहरणरूपे खलु अस्मिन् ग्रन्थे अष्ट रत्नानि, द्वाविशतिर्मरीचयश्च सन्ति। तत्र १ काव्यलक्षणादिकम्, २ तिस्रो रीतय, उक्तिः मुद्रा च, ३ शब्दवृत्तय, ४. पददोषाः, ५ वाक्यदोषा, ६ अर्थदोषा, ७ सक्षिप्तोदात्तप्रसादोक्तिसमाधय. शब्दगुणा, ८ भाविकत्व-सुशब्दत्वपर्यायोक्त-सुधर्मित्वादि अर्थगुणा ९ दोषाङ्कुशा, १० शब्दालङ्कारा अष्टौ, ११ अर्थालङ्कारा उपमादयश्चतुर्दश (दश उपमाभेदा); १२ रूपकस्योपभेदा, उत्प्रेक्षादयोऽलङ्कारा, १४ नायकशरीरवर्णनशिक्षा, १५. सादृश्यवाचका शब्दा, कविसमयाश्च, १६ राजादिवर्ण्यविषयगुणा, १७ प्राकृताना पदार्थाना वर्णा, १८. सङ्ख्यानिदेशका शब्दा (१—१००), भाषासमकाश्च, १९ समस्यापूर्ति, २० काव्यात्मा रस, २१ रसदोषा, २२ रसानुकूला वर्णा इति विषयाः प्रतिमरीचि प्रतिपादिता। मुद्रितश्चाय ग्रन्थ काव्यमालायाम् अन्यत्र च।

८६ **कविः कर्णपूरः परमानन्ददाससेनापराभिधः**—शिवानन्दसेनपुत्रोऽय १५२४ ख्रैस्ताब्दे बङ्गदेशस्य नदियामण्डले जात। १५५२ ख्रैस्ताब्देऽनेन चैतन्यचन्द्रोदयनाटक कृतम्। अलङ्कारशास्त्रेऽनेन अलङ्कारकौस्तुभ कृतः। तत्र दश किरणा सन्ति। तेषु च काव्यलक्षणम्, शब्दशक्ति, ध्वनि, गुणीभूतव्यङ्ग्यम्, रसा भावाश्च, गुणा, शब्दालङ्कारा, अर्थालङ्काराः, रीतय, दोषाश्च क्रमेण प्रतिपादितानि। वाङ्कना प्रियोऽय ग्रन्थो विश्वनाथचक्रवर्तिकृतया सारबोधिन्या टीकया सह मुद्रितोऽस्ति।

८७ **पद्मसुन्दर**—अयम् अकबरमाहिशृङ्गारदर्पणकारो जैन । अस्मिन् ग्रन्थे चत्वार उल्लासा सन्ति । मुगलसम्राजोऽकबरस्योदाहरणपूल्लेखोऽस्ति । अकबरस्य समयश्च १५५६–१६०५ ख्रै० । अस्य ग्रन्थकारस्य समयोऽप्यनेनैव सूच्यते । बिकानेरनगरे गङ्गाप्राच्यग्रन्थमालाया मुद्रितश्चाय ग्रन्थ ।

८८ **प्रभाकरभट्ट**—अनेन रामेश्वरपौत्रेण ऊनविंशतिवर्षेण १६४० वैक्रमाब्दे (१५८३ ख्रै०) रसप्रदीप कृत. । अनेन अलङ्काररहस्य नाम अन्योऽपि ग्रन्थ कृत । अय ग्रन्थो रसप्रदीपे उल्लिखित । रसप्रदीपश्च सरस्वतीभवनग्रन्थमालाया मुद्रित (१९२५ ख्रै०) ।

८९ **अप्पदीक्षित, अप्पयदीक्षितः, अप्पय्यदीक्षितो वा**—विजयनगराधिपतिं वेङ्कटमाश्रितोऽय तमिलो भरद्वाजमगोत्र शैवो ब्राह्मणो वेङ्कटसमये (१५५४–१६२६ ख्रै०) बभूवेति काणे मन्यते । अप्पय्यवशजो महालिङ्गशास्त्री तु अप्पय्यसमय १५२०–१५९३ ख्रै० इति मन्यते । डा० राघवन्महाशयेन 'एकस्मिन्नेव कुले त्रिषु पुरुषेषु अप्पय्यनामान त्रय पुरुषा अभूवन्' इत्युक्तम् । अत कतमोऽयमिति निर्णये भ्रमो जातोऽस्ति । अनेन परश्शता ग्रन्था कृता इति प्रसिद्धिरस्ति । मद्रासविश्वविद्यालयमुद्रितस्य अप्पय्यकृतशिवाद्वैतनिर्णयस्य भूमिकायाम् अनेन कृताना ग्रन्थाना पूर्णा सूची अस्तीति काणेमहाशय । तत्र वेदान्ते सिद्धान्तलेशसङ्ग्रह, वेदान्तकल्पतरुपरिमलश्च प्रसिद्धतमौ, अलङ्कारशास्त्रे तु—वृत्तिवार्त्तिकम् अभिधालक्षणानिरूपणात्मकम् (काव्यमालाया मुद्रितम्), कुवलयानन्द, चित्रमीमामा चेति । तत्र कुवलयानन्दश्चन्द्रालोकमूलकोऽलङ्कारप्रकरणात्मक तत्सदुपाख्यवैद्यनाथकृतया अलङ्कारचन्द्रिकाख्यया व्याख्यया सहितो निर्णयसागरमुद्रणालये मुद्रित । चित्रमीमासाया तु प्रथम ध्वनि, गुणीभूतव्यङ्ग्यानि, चित्रकाव्यमिति त्रयो भेदाः प्रदर्शिता, ततोऽर्थचित्राणि वर्णितानि । इय काव्यमालाया मुद्रिता । नाट्यविषयकलक्षणाना प्रतिपादिका लक्षणरत्नावलिश्च अनेन कृतेति काणेमहाशयो भणति ।

९० **यज्ञनारायणदीक्षित**—अस्य १६१४-३३ ख्रैस्ताब्देषु सत्ता विज्ञायते । अनेन अलङ्काररत्नाकर साहित्यरत्नाकरश्च कृतौ । तत्र साहित्यरत्नाकर टि० आर्० चिन्तामणिना सम्पादितो मद्रासनगरे १९३२ ख्रैस्ताब्दे मुद्रित इति देमहाशय ।

९१ **राजचूडामणिदीक्षित**—श्रीनिवासपुत्र कामाक्षीगर्भजोऽय १६३६ ख्रैस्ताब्दे बभूव किल । अनेन काव्यदर्पण कृत । सुब्रह्मण्यशास्त्रिसम्पादितोऽय ग्रन्थ श्रीरङ्गम्-नगरे वाणीविलासमुद्रणालये मुद्रितश्च । रविपण्डितकृता टीका चास्याऽस्ति अनेन अलङ्कारचूडामणि अलङ्कारशिरोमणि वा नाम अन्योऽपि ग्रन्थ कृत ।

९२ **पण्डितराजो जगन्नाथ**—अयम् आन्ध्रदेशजस्तैलङ्गो ब्राह्मण पेरु (पेरम)-भट्टात्मज । अस्य गुरव शेषोपाख्यवीरेश्वरादयो रसगङ्गाधरारम्भे उल्लिखिता । अनेन दिल्लीवल्लभपाणिपल्लवतले नीत नवीन वय । अस्य ग्रन्थरचनासमय

१६२०–१६५५ खृ० इति काणेमहाशयस्य मतम् । अथ यवनकन्यामनुरक्त इति प्रवादो मिथ्यैवेति च स एव कथयति । अस्य ग्रन्था —भामिनीविलास , गङ्गालहरी, करुणा-लहरी, सुधालहरी, अमृतलहरी, लक्ष्मीलहरी, आसफविलासम् (आसफखान प्रशसा), जगदाभरणम् (दारासिकोहप्रशसा), प्राणाभरणम् (असमराजप्राणाभरणप्रशसा), यमुनावर्णनचम्पूश्चेति काव्यानि, प्रौढमनोरमाकुचमर्दिनी भट्टोजिकृतप्रौढमनोरमाखण्ड-नात्मक व्याकरणप्रकरणम्, चित्रमीमासाखण्डन रसगङ्गाधरश्चेति द्वौ अलङ्कारशास्त्र-ग्रन्थौ चेति । तत्र रसगङ्गाधरो गम्भीर प्रौढो विशदश्च । तत्र प्रथमे आनने—काव्य-लक्षणम्, काव्यहेतु , काव्यस्य चतस्र श्रेणय , रसा (सत्यवीर-पाण्डित्यवीरादयश्च), शब्दार्थयोरपि माधुर्यादयस् त्रयो गुणा (शब्दगुणा दश, अर्थगुणाश्च दश), माधुर्यव्यञ्जक-वर्णादिविचार , वैदर्भी रीति , भावध्वनय , व्यभिचारिभावा , रसाभासा , भावोदया-दयश्च विषया , द्वितीये आनने—सलक्ष्यक्रमध्वनिकाव्यभेदा , व्यञ्जनाभिधालक्षणा-विचारा , उपमादय सप्ततिरलङ्कारा इति विषया प्रतिपादिता । रसगङ्गाधरे काले इत्युपाख्येन नागेशेन कृता गुरुमर्मप्रकाशाख्या टीका काव्यमालाया (बम्बइसस्कृतग्रन्थ-मालाया च) मुद्रिता । मैथिलश्रोत्रियपण्डितवदरीनाथझाकृता टीका च प्रथमानने, श्रीमदनमोहनझाकृता च द्वितीयानने वाराणस्या मुद्रिता ।

९३ **विद्याराम**—अनेन पञ्चभि सोपानैर्युता रसदीर्घिका १६४९–५० खृस्ताब्दे (१७०६ वै०) विरचिता । इय च मुद्रिता उपलभ्यते ।

९४ **अकबरसाह (बडे-साहेब)**—सुल्तानाब्दुलहसनस्य गुरो सन्तस्य अस्य समय १६४६–१६७२-७५ खृ० इति देमहाशयो मन्यते । अनेन च तेलुगुभाषायाम् 'अकबर-साहिशृङ्गारमञ्जरी' कृता । तस्या सस्कृतरूपान्तर च 'अकबरसाहिशृङ्गारमञ्जरी' इति नाम्नैव अङ्कितम् उपलभ्यते । ग्रन्थश्चाय डा० राघवन्महाशयसम्पादितो विस्तृत-टिप्पणीयुक्तः पुरातत्त्वविभागेन हैदराबादनगरे मुद्रितः (१९५१ खृ०)

९५ **चिरञ्जीवी भट्टाचार्य रामदेवो (वामदेवो) भट्टाचार्यो वा**—राघवेन्द्रपुत्रेण अनेन १७०३ खृस्ताब्दे काव्यविलासो रचित. । तत्र द्वौ परिच्छेदौ स्त । तयोश्च रसा-लङ्कारयो प्रतिपादनमस्ति । बटुकनाथशास्त्रि-जगन्नाथशास्त्रिभ्या सम्पादितोऽय ग्रन्थ. सरस्वतीभवनग्रन्थमालाया मुद्रित । अस्य शृङ्गारतटिनी नाम अन्योऽपि ग्रन्थोऽस्ति ।

९६ **भूदेवशुक्ल**—शुकदेवपुत्रेणानेन रसविलासो नाम रसगङ्गाधरोपजीवीग्रन्थ· कृत । तत्र चतुर्षु स्तबकेषु रस-भाव-गुण-दोष-शब्दवृत्तिविचारा कृता । प्रेमलतया सम्पादितोऽय ग्रन्थ. पुण्यनगरप्राच्यविद्यागृहे मुद्रितश्च (१९५२ खृ०) । अस्य ग्रन्थस्य रचनाकाल. १६६०–१७२० खृस्ताब्दान्तर्गत इति देमहाशयस्य भणितिरस्ति, काणे-महाशयोऽप्येवमेव मन्यते, किन्तु तेन भूदेवपरिचये १५५० खृस्ताब्दासन्नोऽस्य काल इत्युक्तम् । भूदेवेन धर्मविजय नाम रूपकमपि कृतम् ।

९७ आशाधरभट्ट —रुद्रटकाव्यालङ्कारस्य व्याख्यातु १२३६ खैस्ताब्दे त्रिपष्टिस्मृतिचन्द्रिका कृतवतो जैनाद् आशाधराद् भिन्नोऽयम् आशाधरभट्ट । अस्य गुरु धरणीधर, पिता रामजिभट्ट । आशाधरकृताया त्रिवेणिकाया शब्दशक्तिविषये भट्टोजिदीक्षितकृतवैयाकरणसिद्धान्तकारिकाणा कौण्डभट्टकृतवैयाकरणभूषणाख्यस्य तद्व्याख्यानस्य च प्रभावो दृश्यते नागोजिभट्टकृतव्यञ्जनास्वीकारस्य प्रभावो न विलोक्यते इति तयोर्मध्ये खैस्ताब्दाना सप्तदशस्य शतकस्योत्तरेऽर्धे अष्टादशस्य शतकस्य आरम्भे च अय बभूवेति अनुमीयते। अस्य ग्रन्था —१ कोविन्दानन्द शब्दव्यापारविषयक स्वोपज्ञया कादम्बिन्या टीकया युत, कलकत्तास्थया सस्कृत-साहित्य-परिषद पत्रिकया अनेकेषु अङ्केषु क्रमेण मुद्रित, २ त्रिवेणिका अभिधालक्षणाव्यञ्जनानिरूपणपरा सरस्वतीभवनग्रन्थमालाया मुद्रिता, ३ अलङ्कारदीपिका कुवलयानन्दव्याख्या निर्णयसागरमुद्रणालये मुद्रिता।

९८ शिवरामस्त्रिपाठी—त्रिलोकचन्द्रपौत्रेण कृष्णरामपुत्रेण अनेन रसरत्नहारोनाम ग्रन्थ कृत । अय च ग्रन्थो भानुदत्तग्रन्थ दशरूपक चोपजीवति। तत्र नायक (नायिका) रसा एव प्राधान्येन प्रतिपादिता । मुद्रितश्चाय ग्रन्थ काव्यमालाया षष्ठे गुच्छके १८९० खैस्ताब्दे। अनेन अलङ्कारसमुद्गकादयोऽन्येऽपि त्रयस्त्रिशद् ग्रन्था कृता । अस्य समय खैस्ताब्दानाम् अष्टादशस्य शतकस्य प्रथम पाद इति काणेमहाशय ।

९९ गङ्गारामो जडि—अनेन १७३२ खैस्ताब्दे भानुदत्तकृतरसतरङ्गिण्या नौका नाम टीका कृतेति स एव तस्य समयस्य सूचक काल । अनेन रसमीमासा नाम स्वतन्त्रो ग्रन्थोऽपि कृत । रसमीमासा च वाराणस्या मुद्रिता उपलभ्यते (का० म० ग्र० मा०, १८८५ खै०)।

१०० नरसिंहो नृसिंहकविर् वा—शिवरामपुत्रेण अभिनवकालिदासापराभिधेन अनेन महीशूरराजस्य द्वितीयकृष्णराजवाडियरस्य श्वशुरस्य सर्वाधिकारिण सेनापते नञ्जराजस्य नाम्नाङ्कितो नञ्जराजयशोभूषणं नाम अलङ्कारग्रन्थ कृतः। नञ्जराजस्य सर्वाधिकरणाधिकारसमयश्च १९२९–१९५९ खैस्ताब्दा इति अस्य समयोऽपि अनेनैव समयेन सूच्यते। अय च ग्रन्थो गायकवाडप्राच्यग्रन्थमालाया मुद्रित (१९३० खै०)।

१०१ रामराजदीक्षितः—अनेन नरहरिविन्दुपुरन्दरपुत्रेण श्रीरामचरित नाम नाटक १६८१ खैस्ताब्दे विरचितमिति अस्य समयस्तेनैव सूच्यते। अय मथुरानिवासी। अनेन भानुदत्तग्रन्थमुपजीव्य शृङ्गारामृतलहरी नाम ग्रन्थ कृत । तत्र रसाना सात्त्विकभावाना च विवेचने तैत्तिरीयोपनिषद (२।७) 'रसो वै स' इति वाक्यमभ्युद्धृतम्। अय ग्रन्थ काव्यमालाया चतुर्दशे गुच्छके मुद्रित । रतिकल्लोलिन्या कर्ता सामराजदीक्षितस्त्वन्य एव भातीति काणेमहाशयस्य मतम्।

१०२ विश्वेश्वरपण्डित—अल्मोडामण्डलान्तर्गतपटियाग्रामाभिजनोऽय लक्ष्मीधरपुत्र खैस्ताब्दानाम् अष्टादशशतकस्य पूर्वार्धे बभूव किल। अस्य ग्रन्था -वैयाकरणसिद्धान्तसुधानिधि वाराणस्याम् अपूर्णो मुद्रित, इदानी सम्पूर्णो हस्तलेखोऽस्य उपलब्धोऽस्ति,

तर्के–तर्ककुतूहलम्, दीधितिप्रवेशश्च, अलङ्कारशास्त्रे–अलङ्कारकौस्तुभ स्वोपज्ञया व्याख्यया सह काव्यमालाया (६६) मुद्रित , कवीन्द्रकर्णाभरणम् चित्रकाव्यनिरूपणपर काव्यमालायाम् (८, १८९१ खृ०) मुद्रितम्, अलङ्कारमुक्तावलि , रसचन्द्रिका, अलङ्कार-ग्रन्थमालाया मुद्रिता (१९२६ खृ०) ।

१०३ **देवशङ्करपुरोहित** —नाहनाभाइपुत्रेण गुर्जरब्राह्मणेन सूरतनिकटस्थरानेर-निवासिनाऽनेन प्रथमपेशवा-माधवरावस्य तत्पितृव्य-रघुनाथरावस्य च प्रशसया युक्तानि उदाहरणानि उपन्यस्यता अलङ्कारमञ्जूषा नाम ग्रन्थ खृस्ताब्दानान् अष्टादशस्य शत-कस्य उत्तरार्धे कृत । तत्र मुख्यरूपेणालङ्काराणामेव निरूपणमस्ति । एस्० एल्० कत्रे-महाशयसम्पादितोऽय ग्रन्थ सिङ्धिया-प्राच्यग्रन्थमालाया (१) मुद्रित (१९४०खृ०) ।

१०४ **बलदेवो विद्याभूषण** —अय चैतन्यमहाप्रभुमतानुयायी ब्रह्मसूत्रगोविन्दभाष्य-कारो वैष्णवोऽचिन्त्यभेदाभेदवादी खृस्ताब्दानामष्टादशे शतके काव्यकौस्तुभाख्य ग्रन्थमपि कृतवान् । तत्र च नव प्रभा । तासु काव्यफलादि–शब्दार्थवृत्ति-रस-गुणरीति-दोष-ध्वनि-भेद-मध्यमकाव्य-शब्दार्थालङ्कारविचारा सन्ति । मुद्रितश्चाय ग्रन्थो नवद्वीपे वङ्गदेशे हरिदासेन (१९५७ खृ०) । अनेन “सूत्राणा भरतमुनीशनिर्मिताना वृत्तीना मितवपुषा कृतौ ममास्याम्” इति, “मम्मटाद्युक्तिमाश्रित्य मिता साहित्यकौमुदीम् । वृत्ति भरत-सूत्राणा श्रीविद्याभूपणो व्यधात्” इति च वदता काव्यप्रकाशकारिकाणा साहित्यकौमुदी नाम वृत्ति (टीका), तस्या कृष्णानन्दिनी व्याख्या च कृता । सटीका साहित्यकौमुदी काव्यमालाया मुद्रिता च ।

१०५. **अच्युतरायमोडक , अच्युतशर्मा वा**—नासिक्यनगरसमीपस्थ-पञ्चवटीनिवा-सिनाऽनेन १८३१ खृस्ताब्दे द्वादशभि रत्नैर्युक्त साहित्यसार कृत , अस्यैव ग्रन्थस्य व्याख्यान सरसामोदश्च कृत । सटीक साहित्यसारो निर्णयसागरमुद्रणालये मुद्रितोऽ-स्ति (१९०६ खृ०) ।

१०६ **कृष्णशर्मा कृष्णावधूतो वा**—अस्य समय १८३५–१९०९ खृस्ताब्दान्तर्गत इति देमहाशयो मन्यते । खृस्ताब्दाना षोडशात् शतकाद् अर्वाचीन इति काणेमहाशयस्य मतम् । गुहपुरनिवासिनो वासुदेवयोगीश्वरस्य शिष्येण अनेन मन्दारमरन्दचम्पू , काव्य-लक्षणम्, सारस्वतालङ्कार (सूत्रभाष्यरूप) इति त्रयो ग्रन्था कृता इति देमहाशयो भणति । काणेमहाशयेन तु अस्य रसप्रकाशकारत्व च प्रतिपादितम्, मन्दारमरन्दचम्पूश्च चन्द्रदेवशर्मण कृष्णशर्मणश्च कृतित्वेन उल्लिखिता तत्र मन्दारमरन्दचम्प्वाम् एकादश बिन्दव सन्ति, तेषु छन्द , अलङ्कारा , रूपकाणि तदङ्गानि च नायक , नायिका, रसा , वृत्तयश्चेत्यादयो विपया प्रतिपादिता । अस्या चम्प्वा स्वोपज्ञा माधुर्यरञ्जनी टीका चाऽस्ति । सटीकेय चम्पू निर्णयसागरमुद्रणालये मुद्रिताऽस्ति ।

१०७ **चन्द्रकान्त** —अस्य समय खृस्ताब्दानाम् ऊनविंश शतकम् । अनेन अलङ्कार-सूत्रं कृतम् । मुद्रित चेद कल्कत्तानगरे (१८९९ खृ०) ।

!०८ **रामकर्णः मुरारिदानः सुब्रह्मण्य वा**—अस्यापि समय खैस्ताब्दानाम् ऊन-
ातकम् । अनेन राजपुतानाराजपुत्रकस्तवयुक्त यशवन्तयशोभूपण कृतम् । मुद्रित
ाधारपुरे (१८९७ खै०) ।

०९ **हरिकृष्णो ब्रह्मचारी कृष्णब्रह्मतन्त्रपरकालस्वामी वा**—अस्याऽपि समयः
ब्दानाम् ऊनविंश शतकम् । अनेन अलङ्कारमणिहार कृत । मुद्रितश्चाय ग्रन्थो
गरे ग ओ मि (प्राच्यपुस्तकालयग्रन्थमालायाम्) ४ भागे, ५१, ६८, ७२, ८५
।

१० **कान्तिचन्द्रो मुखोपाध्याय**—अस्याऽपि समय खैस्ताब्दानाम् ऊनविंश शतकम्
नम्मटादिग्रन्थोपजीविनी काव्यदीपिका कृता । जीवानन्दविद्यासागरकृतटीकासहितेय
ानगरे (१८७०, १८८६ खै०) लाहोरनगरे च (१९३९ खै०) मुद्रिता ।

११ **वल्लभभट्ट**—अनेन अलङ्कारकौमुदी कृता । सा च बम्बइग्रन्थमालाया
भागे मुद्रिता । समयश्चास्य १८८९ खैस्ताब्दा ।

१२ **मण्डनमन्त्री**—अनेन १९१८ खैस्ताब्दे अलङ्कारमण्डन कृतम् । मुद्रित चेदम्
ावादनगरे ।

थ कतिपये अनिर्ज्ञातसमया मुद्रितग्रन्थका काव्यविद्याग्रन्थकारा —

१३ **अरुणगिरिकवि**—अनेन अर्थालङ्कारान् अधिकृत्य गोदवर्मयशोभूपण कृतम् ।
चेद त्रिवेन्द्रम्-नगरे (१९४६ खै०) ।

१४ **कन्दलार्य**—अनेन रामानुजाचार्यपुत्रेण अलङ्कारशिरोभूषण कृतम् । हैदरा-
ग्ये (वर्तमाने आन्ध्रप्रदेशे) मुद्रितञ्चेदम् ।

१५ **कृष्णसूरि**—गोपालाचार्यपुत्रेणानेन अलङ्कारमीमासा कृता । मुद्रिता चेय
ण्याम् (१८९७–९८ खै०) ।

१६ **प्रकाशवर्ष**—अनेन रसार्णवालङ्कारो नाम ग्रन्थ कृत । तत्र दोपगुणालङ्का-
रूपणानि सन्ति । अस्य समय १०५० खैस्ताब्दात् पश्चाद् इति काणेमहाशयो
। निश्चित कालस्तु न ज्ञायते । रसार्णवालङ्कारश्च वेङ्कटरामशर्मणा १९२९
ब्दे मुद्रितः ।

१७ **रामचन्द्रो न्यायवागीश**—विद्यानिधिपुत्रेण अनेन अलङ्कारचन्द्रिका काव्य-
वा नाम ग्रन्थ कृत । स च ग्रन्थ कोमिल्लानगरे १८८५ खिस्ताब्दे मुद्रित ।
ुवलयानन्दटीका काव्यमञ्जरी अपि कृता ।

१८ **रामसुधीः सुधीश्वरो वा**—नृसिंहपुत्रेण अनेन अलङ्कारमुक्तावलि कृता ।
तेलुगुलिप्या विशाखापत्तने १८९७–९८ खिस्ताब्दयोर्मुद्रिता ।

१९ **सर्वेश्वर**—अनेन साहित्यसार कृत । मुद्रितश्चाय ग्रन्थ ।

२० **हरिदास सिद्धान्तवागीश**—अनेन काव्यकौमुदी कृता मुद्रिता चेयम् ।

२१ **हर्ष**—अनेन शृङ्गारहारावली कृता । मुद्रिता चेयम् ।

(ट) उपरि एकविंशस्य शतस्य काव्यनाट्यविद्याचार्याणा सक्षिप्त परिचय उपस्थापित । दुर्लभनवनवप्रकाशितग्रन्थे सुदुर्लभतद्विद्यसम्भाषे च स्थाने स्थित्वा अल्पसमयसाधनेन मया चापलमात्राल् लिखितेऽस्मिन् विवरणे या न्यूनता त्रुटिर्वा स्यात् सा कृपया स्वय पूरणीया सशोधनीया च विद्वद्भि । उक्ताना काव्यनाट्यविद्याचार्याणा विषयेऽधिक जिज्ञासव पाण्डुरङ्गवामनकाणेमहाशयस्य सुशीलकुमारदेमहाशयस्य च History of Sanskrit Poetics इति समाननामकौ ग्रन्थौ अन्याश्च एतद्विषयकान् ग्रन्थान् पठन्तु। अथ तेषा कालस्यैव विभाग क्रियते—(१) प्रारम्भकाल —अज्ञाताच् चिरन्तनात् कालात् प्रभृति भरतात् प्राक्, (२) उत्थानकालो रचनात्मककालो वा भरतात् प्रभृति आनन्दवर्धनात् प्राक (३) विवेचनकालो निर्णयात्मककालो वा आनन्दवर्धनात् प्रभृति मम्मट यावत्, (४) व्याख्याकालो मम्मटात् प्रभृति अद्य यावत् । अयम् वा कालविभाग , प्रायिक , सम्भवति हि अद्यापि केनचित् प्रकारेण नव्यवादस्य कल्पना, प्राचीनवादविवेचन-तद्गतसारासारव्यवस्थापना वा प्रकारान्तरेणेति ।

(ठ) ध्वनिसिद्धान्तम् अवधीकृत्य (१) ध्वनिपूर्वकाल आनन्दवर्धनात् प्राक्, (२) ध्वनिकाल आनन्दवर्धनात् प्रभृति मम्मट यावत्, (३) ध्वन्युत्तरकालो मम्मटोत्तर जगन्नाथ यावत् इति च प्रकारान्तरेणापि कालविभाग कैश्चित् क्रियते ।

(ड) सिद्धान्तानुसार (सम्प्रदायानुमार) तु उक्ताना काव्यनाट्यविद्याचार्याणा वर्गीकरणम् एव क्रियते—

१ रसवादिन —नन्दिकेश्वर–भरत-रुद्रट–धनञ्जय–धनिक–भट्टनायका-ऽभिनवगुप्त-शारदातनय-सिंह (शिङ्ग) भूपाल-भानुदत्त-मधुसूदनसरस्वती-रूपगोस्वामिप्रभृतय ।
२ अलङ्कारवादिन —भामह-दण्डि-भट्टोद्भट-प्रतीहारेन्दुराजप्रभृतय ।
३ रीतिवादी—वामन ।
४ ध्वनिवादी—आनन्दवर्धन ।
५ वक्रोक्तिवादी—कुन्तक ।
६ औचित्यवादी-क्षेमेन्द्र ।
७ कविशिक्षावादिन —राजशेखर-क्षेमेन्द्रा-ऽरिसिंहा-ऽमरचन्द्र-देवेश्वरप्रभृतय ।
८ मिश्रसिद्धान्तवादिन —भोज-मम्मट-हेमचन्द्र-जयदेव-विश्वनाथ-जगन्नाथादय ।

तत्र रसवादिना रस एव सार्वलौकिक आस्वादनीयो दशरूपकादिनाटचकाव्यजीवितम् इत्यभिप्राय स्फुट ।

विदग्धभणितिभङ्गीविशेषसारेषु अनिबद्धेष्वपि काव्येषु असत्यपि दशरूपकेष्विव रसपरिपोषे वैचित्र्यस्य दर्शनाद् रस एव काव्यजीवित न, किन्तु विदग्धभणितिभङ्गीविशेषजन्य सौन्दर्यम् अपि, अनिबद्धेष्वपि काव्येषु क्वचिदशेन प्रतीयमानोऽपि रसो

विदग्धभणितिभङ्गीसमागतस्तत्परिष्कारकस्तदन्तर्गत एवेति च अलङ्कारवादिना मतं विज्ञायते ।

शब्दार्थधर्मगुणसमन्वितशैली (मार्ग-) विशेषविचित्रा पदगुम्फना (वाक्यरचना) एव काव्यस्यात्मेति वदतो रीतिवादिनो वामनस्य तु लौकिकेनैवार्थेन युक्ताऽपि लौकिकवाक्य-रचनाविलक्षणा सौन्दर्यवती वाक्यरचनैव काव्यजीवितमित्यभिप्राय । आह च— "किन्त्वस्ति काचिदपरैव पदानुपूर्वी यस्या न किञ्चिदपि किञ्चिदिवाऽवभाति" इति (१।२।२१ वृत्तौ) ।

ध्वनिवादिन आनन्दवर्धनस्यापि प्राकृतजनप्रयोज्यवाचकशब्द-सङ्केतितसूक्तार्थविल-क्षणौ विदग्धजनप्रयोज्यव्यञ्जकशब्द-व्यङ्ग्यार्थौ एव काव्यस्यात्मा इति मतम् । यदि तु अभिनवगुप्तव्याख्यानानुसारं (लोचने १।५) रसध्वनिरेव आनन्दवर्धनमते काव्यस्यात्मेति स्वीक्रियते तर्हि तु सोऽपि रसवादी एव, रसस्य ध्वननीयत्वस्य प्रतिपादने एव तस्य वैशिष्ट्यम् इति मन्तव्यम् ।

वक्रोक्तिवादिन कुन्तकस्य तु अलङ्कारवादिमततुल्य हि मतमन्तस्तले, तन्मतेऽपि विदग्धभणितिभङ्गीविशेषस्यैव (का० अ० १।१०) काव्यजीवितत्वात् । आनन्दवर्धनप्रति-पादनमुपजीवता तेन सर्वोऽपि ध्वनिप्रपञ्चो विदग्धभणितिभङ्गीविशेषान्तर्गतत्वेन (वक्रोक्त्यन्तर्गतत्वेन) प्रदर्शित इत्येव विशेष ।

औचित्यवादिन क्षेमेन्द्रस्य तु "अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम् । प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा" (परिकरश्लोक ३।१४ वृत्तौ) इति आनन्द-वर्धनप्रतिपादिता परोपनिपदेव उपनिषत् । किन्तु इदमौचित्य न काव्यस्येतरव्यावर्तक लक्षण भवितुमर्हति यथा सुन्दरस्य मृद्घटस्यापि जीवनदायिनी अपि मृत्तिका सुन्दरस्य मृद्घटस्य असुन्दराद् मृद्घटाद् व्यावर्तक लक्षण नैव भवति ।

कविशिक्षावादिना तु काव्यलक्षणविशेषे अनत्यभिनिविष्टाना कवेरुपकारिकाणा सामग्रीणा निर्देशे एव सरम्भ इति काव्यजीवितविशेषवादिना प्रसङ्गे अनुल्लेख्या एव ते, तथापि इमामेव टिप्पणी कर्तुं मयाऽत्र तेऽपि उल्लिखिता ।

मिश्रसिद्धान्तवादिनस्तु यद्यपि काव्यलक्षणविषये वस्तुतोऽलङ्कारवादिभिस्तुल्या एव, तेषा मते रसत्व-ध्वनित्वादिनाऽविशेषितस्य रमणीयत्वस्यैव काव्यजीवितत्वस्या-वश्यकात्, तथापि तै स्वस्वप्रदर्शितकाव्यलक्षणालिङ्गितकाव्यविशेषविभाजनोपाधित्वेन वस्त्वलङ्काररसध्वनित्वादीन्यपि उक्तानि, तदनुसार च काव्यस्य उत्तममध्यमादिकक्षा-विभागोऽपि कृत इति अस्ति तेषामलङ्कारवादिभ्य किञ्चिद् वैशिष्ट्यम् । तत्र मम्मटो ध्वनिप्रपञ्च सर्वं काव्यान्तर्गत कुर्वाणोऽपि चित्रमपि काव्यत्वेन स्वीकुर्वाणस्तत्सङ्ग्रहाय काव्यलक्षणे ध्वनिं रस वा न निवेशयतीति न खलु स शुद्धो ध्वनिवादी रसवादी वा । विश्वनाथस्तु ध्वनिप्रपञ्च सर्वं काव्यान्तर्गत कुर्वाणश्चित्र च काव्याद् बहिष्कुर्वाणोऽत

एव ध्वनिवादीव दृश्यमानोऽपि काव्यलक्षणे ध्वन्येकदेश रस निवेशयति न ध्वनिमिति न सर्वथा ध्वनिवादी, वस्त्वलङ्कारध्वनीन् अपि काव्यविशेषनिरूपणावसरे प्रतिपादयतीति नाऽप्यय सर्वथा रसवादी। तत्प्रतिपादितेषु वस्त्वलङ्कारध्वनिषु रसादेर्व्यपदेशविशेषनिमित्तत्वकोटिसमारूढत्वेन सत्त्वे रसादिध्वनित्वमेव तेषामपि, तदभावे च कथ तेषु तदुक्तरसात्मकवाक्यरूपकाव्यलक्षणसङ्गतिरिति पूर्वापरसन्दर्भशुद्धिमन्दकोऽप्यय मिश्रसिद्धान्तानुयायित्वेन कल्प्यते रसे ध्वनौ च तस्य विशिष्टस्याग्रहस्य दर्शनात्। जगन्नाथस्तु प्रतिपादने नव्यन्यायानुसारिण्या शैल्या विशिष्टोऽपि अन्येषु विषयेषु प्रायेण मम्मटेन तुल्य एव। रसगुणव्यञ्जनादिविषये अलङ्कारक्रमविषये च तस्य किञ्चिद् वैशिष्टचमप्यस्ति। काव्यलक्षण तु स तदीयसिद्धान्तानुसार मम्मटप्रोक्तकाव्यलक्षणात् समुचिततर चकारेति च विशेष ।

(ढ) अथ सक्षेपेण काव्यलक्षणकक्षा (कोटि) विचार क्रियते। तत्र काव्यस्य प्रीतिविशेषजनकत्वम् आविद्वदङ्गनाबालविदित तत्त्वम्। प्रीतिश्च लौकिकी चतुर्विधा, तदाह—"अभ्यासादभिमानाच्च तथा सम्प्रत्ययादपि। विषयेभ्यश्च तन्त्रज्ञा प्रीतिमाहुश्चतुर्विधाम्" इति (कामसूत्रे २।१।३९)। तत्र आभ्यासिकी प्रीतिर्मृगयाद्यूतादिषु, आभिमानिकी च अतथाविधेऽपि प्रीतिदोऽयमिति मानससङ्कल्पेन भवित्री, यथा सम्प्रयोगे नखच्छेद्य-दशनच्छेद्य-प्रहणनादौ, सम्प्रत्ययात्मिका च अतस्मिन् सोऽय मम प्रीतिहेतुरिति अध्यारोपादागता प्रियपुत्रभ्रातृभगिन्यादिसादृश्यादिमूला प्रियपुत्रादिसदृशेषु जायमाना प्रीति, वैषयिकी च शब्दरूपरसादीष्टविषयसयोगजा प्रसिद्धा मुख्या च। काव्यजा अलौकिकी प्रीतिरपि प्रायेण उक्तप्रकारानुरूपैव विविधा भवति। तत्र अक्षरडम्बरादिषु अन्येषु च रसनिरपेक्षेषु अलङ्कारेषु या प्रीति सा आभ्यासिकप्रीत्यनुरूपा, खड्ग-मुरज पद्म-बन्धादिषु कष्टेषु काव्येषु या प्रीति साऽभिमानिकप्रीत्यनुरूपा, मधुरा-प्रौढा-परुषा-ललिता-भद्रादिवृत्तिषु वैदर्भी-गौडीया-पाञ्चालीप्रभृतिषु रीतिषु (मार्गेषु) वा या प्रीति सा सम्प्रत्ययात्मकप्रीत्यनुरूपा, रसादिषु या प्रीतिः सा विषयप्रीत्यनुरूपा। एव च सति अलङ्कार-रीति-वक्रोक्ति-वादिभि मिश्रसिद्धान्तानुयायिभिश्च सर्वा अप्येताः प्रीती काव्यजीवितायितप्रीतित्वेन सङ्ग्रहीतु वाञ्छद्भिस्तदनुरूपमेव रसादिनिवेशरहित प्रीतिकोटिविवेकेन रहित सहित वा काव्यलक्षण कृतम्। ध्वनिवादिना तु रसादिनिरपेक्षालङ्कारजन्यप्रीतिं बहिष्कुर्वाणेनाऽपि विदग्धभणितिभङ्ग्यागतवस्त्वलङ्कारप्रतीतिप्रीति क्रोडीकुर्वाणेन वस्तुत सर्वा अप्युक्ता प्रीतय काव्यजीवितायितप्रीतित्वेन सङ्गृहीता एव, तदनुरूपमेव च काव्यलक्षण ससूचितम्। रीतिवादिना तु रसाऽभूमौ अपि रसभूमिसदृश्या पदरचनाया काव्यत्व दृष्टमिति सम्प्रत्ययात्मकप्रीत्यनुरूपप्रीतौ एव अभिनिवेश कृत, काव्यस्यालौकिकत्वाभिमानेन वञ्चितेन च तेन तदनुरूपमेव च काव्यलक्षण कृतम्। रसवादिभिस्तु विजयप्रीत्यनुरूपा प्रीतिरेव काव्यजीवितत्वेन आस्थिता, तदनुरूपमेव च रसादिनिवेशयुक्त काव्यलक्षण कृतम्। रसप्रतीतिप्रीते' विषय-

सयोगजप्रीतिमदृशत्व रसप्रकरणव्याख्यानेऽस्माभि प्रदर्शित तत्रैव द्रष्टव्यम्। एव च काव्यजन्या प्रीति कीदृशी, कीदृशी कीदृशी प्रीतिम् उपादाय (सङ्ग्रहीतु) काव्यलक्षण करणीयमिति विद्वासो विविञ्चन्तु। अस्माभिस्तु प्रायसम्प्रतीताया (मार्वलौकिक्या) विषयप्रीत्यनुरूपाया रसादिप्रीतेरेव काव्यजीवितत्व तदनुरूपस्यैव च काव्यलक्षणस्य करणीयत्व च मम्मटोक्तकाव्यलक्षणव्याख्यानानन्तर काव्यलक्षणपरीक्षावसरे प्रतिपादित, तत् तत्रैव द्रष्टव्यम् इति शम् ॥

आचार्य शिवराजस्य कौण्डिन्न्यायनस्य।

२०३३।४।२८

विषयानुक्रमणी

(तारकाङ्किता विषया विवृतौ आगता ज्ञेयाः)

प्रथम उल्लास

द्वितीय उल्लास

विषया	पृष्ठाङ्का
७ अभिधानिरूपणम्	४६
८ लक्षणानिरूपणम्	४७
❀ ९ लक्षणाशरीरविमर्श	४७
१० उपादानलक्षणाया लक्षणलक्षणायाश्च निरूपणम्	५०
११ उपादानलक्षणोदाहरणविवेचनम्	५१
१२ उपादानलक्षणा-लक्षणलक्षणयो शुद्धत्वस्य प्रतिपादनम्	५४
१३ सारोप-साध्यवसानलक्षणानिरूपणम्	५५
१४ गौणशुद्धलक्षणाविवेक	५६
१५ सारोपसाध्यवसानलक्षणाप्रयोजनविचार	६०
१६ प्रयोजनवल्लक्षणाभेदगणना	६१
१७ लक्षणाया व्यङ्ग्यकृता भेदा	६४
१८ लाक्षणिकशब्दनिरूपणम्	६६
१९ शाब्दी लक्षणामूला व्यञ्जना	,,
२० शाब्दी अभिधामूला व्यञ्जना	७०
२१ शब्दस्य व्यञ्जकत्वे अर्थस्य सहकारिता	७७

तृतीय उल्लास

१ आर्थव्यञ्जनानिरूपणप्रस्ताव	७८
२ आर्थी वक्तृ-बोद्धव्यादिवैशिष्ट्यमूला व्यञ्जना	७८
❀ ३ आर्थी विभावादिमूला व्यञ्जना	७९
❀ ४ व्यञ्जनासामान्यलक्षणम्	७९
५ वक्तृवैशिष्ट्यमूलाया आर्थ्या व्यञ्जनाया उदाहरणम्	७९
६ बोद्धव्य- ,, ,, ,, ,, ,,	८०
७ काकु- ,, ,, ,, ,, ,,	८०
८ वाक्य- ,, ,, ,, ,, ,,	८१
९ वाच्य- ,, ,, ,, ,, ,,	८२
१० बोद्धव्यान्यसन्निधिवैशिष्ट्यमूलाया आर्थ्या व्यञ्जनाया उदाहरणम्	८२
११ प्रस्ताववैशिष्ट्यमूलाया आर्थ्या व्यञ्जनाया उदाहरणम्	८३
१२ देश- ,, ,, ,, ,, ,,	८३
१३ काल- ,, ,, ,, ,, ,,	८४
१४ चेष्टा- ,, ,, ,, ,, ,,	८४
१५ वक्तृबोद्धव्यद्वयवैशिष्ट्यमूलाया आर्थ्या व्यञ्जनाया उदाहरणम्	८५

विषयाः **पृष्ठाङ्का**

चतुर्थ उल्लास

विषयाः	पृष्ठांका

पञ्चम उल्लास

षष्ठ उल्लास

विषया	पृष्ठाङ्का

काव्यप्रकाशः

मम्मटविरचिते अलकपूरिते

काव्यप्रकाशे

प्रथम उल्लासः

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवता ग्रन्थकृत् परामृशति—

नियतिकृतनियमरहिता ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥ ❀ ॥

नियतिशक्त्या नियतरूपा सुखदु खमोहस्वभावा परमाण्वाद्युपादान-कर्मादि-सहकारिकारणपरतन्त्रा षड्रसा, न च हृद्यैव तै, तादृशी ब्रह्मणो निर्मिति-र्निर्माणम् ।

अथ हैमवती काव्यप्रकाशविवृति. प्रारभ्यते ।

प्रतिपाद्यविपयैक्यसूत्रसन्दृब्धानि वाक्यानि **ग्रन्थः** । द्वात्रिंशदक्षरात्मको ग्रन्थस्त्वन्य । वाक्य च निराकाङ्क्षस्यार्थस्य वृत्तिद्वारा प्रतिपादक शब्द । **आरम्भ**शब्दोऽत्रारम्भ-प्राक्काल लक्षयति, आद्यकृतिरूपस्य मुख्यस्यार्थस्य बाधितत्वात् । चिरन्तनोऽप्याचार्यो विघ्नध्वसमेव मङ्गलस्य फल स्वीकुर्वन्नाह—**विघ्नविघातायेति** । विघ्न प्रतिबन्धकोऽदृष्ट-विशेष । **समुचिता** प्रतिपाद्यविपयानुरूपा **इष्टदेवता** अभिमता देवता ताम् परामृशति स्मरति स्तवीति वा ।

शिष्यशिक्षार्थं प्रवक्तॄणा श्रोतॄणा च मङ्गलाय च ग्रन्थे मङ्गलपद्य निबध्नाति—**नियतिकृतेत्यादि** । तथाहि भूवादिसूत्रस्थस्य वार्त्तिकस्य व्याख्याने भगवान् पतञ्जलि'—"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि आयुष्मत्पुरुपाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्ति" इति । **ह्लादैकमयीम्** ह्लादेन एक (वस्तु) ह्लादैकम् । ह्लादेनेत्यत्र अभेदे तृतीया 'धान्येन धनवान्' इत्यत्र 'अर्थेनैव विशेपो हि निराकारतया धियाम्' इत्यादौ च तथा दर्शनात्, 'प्रकृत्यादिभ्य उपसङ्ख्यानम्' इति वार्त्तिकस्य प्रामाण्याच्च । एकशब्द प्रायेण सङ्ख्येयवचन "सङ्ख्येये ह्यादश त्रिषु" इति कोशात् । "द्व्येकयोर्द्विवचनैकवचने" इत्यत्र सङ्ख्यापरोऽपि दृष्ट इति प्रायेणेत्युक्तम् । एकपद दु खमोहव्यवच्छेदाय । ह्लादैक (वस्तु) प्रचुर यस्या सा ह्लादैकमयी, "तत्प्रकृतवचने मयट्" (अष्टा० ५।४।२१) इत्यस्य द्वितीयव्याख्यानस्य प्रामाण्यात् । **अनन्यपरतन्त्राम्** अनन्याधीनाम्, समवाय्यादिकारणनिरपेक्षामित्यर्थ । पर-तन्त्रशब्दोऽत्र अधीनपर्याय । **नवरसरुचिराम्** नवावयवो रसो नवरस, शाकपार्थिवादि-समासवृत्तिप्रामाण्यात् । रसशब्देनाऽत्र उद्भूतावयवभेदको रससमुदायो विवक्षित ।

एतद्विलक्षणा तु कविवाङ्निर्मिति, अत एव जयति, जयत्यर्थेन च नमस्कार आक्षिप्यते इति ता प्रत्यस्मि प्रणत इति लभ्यते।

अथवा 'न हि रसाद् ऋते कश्चिदर्थ प्रवर्तते' इति भरतमुने सूत्रस्य व्याख्याने "पूर्व च बहुवचनमत्र चैकवचन प्रयुञ्जानस्यायमाशय—एक एव तावत् परमार्थतो रस सूत्रस्थानीयत्वेन रूपके प्रतिभाति, तस्यैव पुनर्भागदृशा विभाग" इति वदतोऽभिनवगुप्तस्य, "मनोऽनुकूलेषु दु खादिषु आत्मन सुखाभिमानो रस। स तु पारम्पर्येण सुखहेतुत्वाद् रत्यादिभूमसूपचारेण व्यवह्रियते" इति वदतो भोजराजस्य, अलङ्कारकौस्तुभे "रसस्यानन्दधर्मत्वाद् ऐकध्य भाव एव हि। उपाधिभेदान्नानात्व रत्यादय उपाधय" इति वदत कर्णपूरस्य च विवेचनमनुसृत्य वस्तुतो रसस्य एकत्वमेवेति उपाधिभिरेव तस्य नानात्वप्राप्तिरिति वक्तु शक्यते इति अस्यापि ग्रन्थकारस्य नवोपाधिको रसो नवरस इत्यर्थो विवक्षितो बोध्य। एवञ्चात्र द्विगुत्वाभावान्न महाभाष्यकारेष्टचा "अकारान्तोत्तरपदो द्विगु स्त्रियामिष्ट" इत्यस्या विषयता। तेन रुचिरा मनोहारिणी। ह्लादैकमयीमिति पदेन अलङ्कारादिजन्याह्लादजनकत्वमुक्तमिति नैतस्य विशेषणस्य पुनरुक्तता शङ्क्या। **आदधती** आविष्कुर्वती। **कवे** काव्यकारस्य **भारती** काव्यरूपा वाणी; 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' (छान्दोग्योपनिषदि ६।२।३।४) इत्यादिषु प्रयोगेष्विव अधिष्ठात्रधिष्ठेययोरभेदस्याध्यवसायात् काव्याधिष्ठात्री देवता च जयति उत्कर्षेण वर्तते। कवेर्भारतीत्यत्र कवेरिति काव्यपक्षे जन्यजनकभावरूप सम्बन्धो देवतापक्षे आराध्याराधकभावरूप, स षष्ठचर्थ, "षष्ठी स्थानेयोगा" (अष्टा० १।१।४२) इति सूत्रे भाष्ये 'एकशत षष्ठ्यर्था' इति वदता मुनिना पतञ्जलिना षष्ठ्या अनेकसम्बन्धविशेषार्थकत्वस्य प्रतिपादितत्वात्।

स्तुतिगाथा विवृणोति—**नियतिशक्त्येत्यादिना।** ब्रह्मनिर्मितजगत्त कविभारतीनिर्मितजगतो व्यतिरेक मङ्गलगाथाध्वनित प्रदर्शयितु पूर्व ब्रह्मनिर्मितजगत स्वभावमाह। **नियति**रदृष्ट नियामकमसाधारणो धर्मो वा तस्या शक्त्या स्वभावेन। **नियतरूपा** नियत निजनिजसम्स्थानमानवर्णादिना व्यवस्थित रूप यस्या सा। **सुखदु खमोहस्वभावा** सुखदु खमोहसम्भिन्ना इत्यर्थ। लोकायतकदर्शनाश्रयेण कार्यकारणभाव प्रदर्शयन्नाह—**परमाण्वादीत्यादि।** परमाण्वाद्युपादानकारणस्य कर्मादिसहकारिकारणस्य चाधीना। षड्रसा मधुराम्लादय षड् रसा यस्या सा। **न च हृद्यैव तै।** हृदे मनसे हिता (अनुकूला) हृद्या। तैर्मधुरादिभि तिक्तकषाययो प्रायेणाहृद्यत्वाद् मधुरादेरपि कदाचित् कस्यचिदहृद्यत्वस्य सम्भवात्, तै षड्भी रसैर्न हृद्यैव न सर्वदा सर्वस्य मनसोऽनुकूलैवेति भाव। **निर्मितिर्निर्माणम्**, जगदित्यर्थ। निर्मितिरिति कर्मणि क्तिन्, निर्माणमित्यत्र कर्मणि ल्युट्, "कृतो बहुलमिति वक्तव्यम्" इति वार्त्तिकस्य प्रामाण्यात्। ब्रह्मनिर्मितित कविवाङ्निर्मितेराधिक्यमाह—**एतद्विलक्षणेति।** काव्यससारे दु खात्मकघटनाया अपि करुणादौ सुखजनकत्वस्य दर्शनात्, अचेतनस्यापि मेघादेर्दूत्यादिकरणस्य दर्शनाच्च

इहाभिधेय सप्रयोजनमित्याह—

(सू० १) **काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**
सद्य परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥१॥

नियतिकृतनियमरहिता सुखैकमयी उपादानादिविविधकारणसङ्घटनानिरपेक्षा शृङ्गारादिभिर्नवभी रसै सर्वस्य सर्वदा हृद्या मेधाद्यात्मकदूतादिरूपा कवेर्वाचो निर्मितिरस्ति, **अत एव जयति** उत्कर्षण वर्तते । निरवधिकस्योत्कर्षस्य चोक्त्या भारत्या सर्वेभ्य उत्कृष्टत्वमुपलभ्यते । तादृशेन जयत्यर्थभूतेन चोत्कर्षेण सर्वस्ता प्रत्यस्ति प्रणत इति गम्यते उत्कृष्टस्य नमस्कार्यत्वात् । नमस्कार प्रणति , स्वकीयापकृष्टत्वज्ञानाविष्करणानुकूलो व्यापार । अपकृष्टत्व चेद नमस्कार्यात् । ततश्चाह ता प्रत्यस्मि प्रणत इति लभ्यते अर्थात् । वृत्तौ प्रथम **इति**शब्दो हेत्वर्थको द्वितीयस्तु प्राकाश्यार्थक , "इति हेतुप्रकरणप्रकाशादिसमाप्तिषु" इति नामलिङ्गानुशासनकोपात् । अत्र नियतिकृतेत्यादिभिरुत्कर्षहेतुगर्भैर्विशेषणैर्ब्रह्मभारतीनिर्मित्योरुपमानोपमेयभावे आक्षिप्ते उपमानभूतविधिनिर्मितित उपमेयाया कविभारतीनिर्मितेराधिक्य प्रतीयते, ततश्च ब्रह्मत कविभारत्या आधिक्यमिति व्यतिरेकालङ्कारो व्यज्यते । "उपमानाद् यदन्यस्य व्यतिरेक स एव स" इति हि व्यतिरेकालङ्कारलक्षणम् । अलङ्कार्यस्य व्यङ्ग्यस्यापि अलङ्कारशब्देन व्यवहारो ब्राह्मणश्रमणन्यायादिति ग्रन्थकृदेव प्रतिपादयिष्यति । श्रमणो बौद्धो भिक्षु । श्रमणीभूतस्य न ब्राह्मणत्व तथापि भूतपूर्वगत्या तथोच्यते तथैवात्रापि । पर्यन्ते च ग्रन्थकृतो भारतीविषयको रत्याख्यो भाव स्फुट प्रतीतिपथमवतरति । तेन चास्या गाथाया ध्वनिकाव्यत्वम् ॥ ❀ ॥

ग्रन्थप्रयोजनप्रतिपादनमावश्यकमित्याह—**इहे**त्यादिना । इतिर्हेत्वर्थ । लोके प्रेक्षावतामभिधेय प्रयोजनसहित भवतीति हेतोरस्य ग्रन्थस्यापि प्रयोजनमाहेत्यर्थ । अथवा इह ग्रन्थे यत् प्रतिपाद्य तत् प्रयोजनसहित विद्यते इति काव्य यशसे इत्यादिना प्रतिपादयतीत्यर्थ । अस्य ग्रन्थस्य काव्य (कवि) शिक्षात्मकत्वेन एतदनुसारमभ्यास काव्यहेतुघटक इति ग्रन्थस्यास्य काव्योपकारकत्वम्, उपकारकस्य चोपकार्यफलेनैव फलवत्त्वमत काव्यफलेनैवाय ग्रन्थोऽपि फलवानिति काव्यप्रयोजनान्याह—**काव्य**मित्यादिना । अर्थकृते व्यवहारविदे उपदेशयुजे इति सर्वत्र भावार्थकप्रातिपदिकानि तादर्थ्यचतुर्थ्यन्तानि सम्पदादिभ्य क्विबिति कात्यायनव्याकृते , सम्पदादेराकृतिगणत्वस्य स्वीकाराच्च । अर्थकरणाय व्यवहारवेदनाय उपदेशयोगाय इति तेषामर्था । कृदभिहितो भावो द्रव्यवद् भवतीति हि सार्वधातुके यगिति सूत्रे (३।१।६७) महाभाष्यकार । **कान्तासम्मिततया** कान्तातुल्यतया । भवतीति शेष । एवञ्च काव्य यशसे भवति, काव्यम् अर्थकृते भवतीत्यादयोऽप्यर्था , प्रत्येकमपि वाक्यपरिसमाप्ते ॥ १ ॥

कारिकामुदाहरणपूर्वक व्याचष्टे—**कालिदासादीना**मित्यादिना । काव्य कवे, कालि-

कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनम्, राजादिगतो-चिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, सकलप्रयोजन-मौलिभूत समनन्तरमेव रसास्वादनसमुद्भूत विगलितवेद्यान्तरमानन्दम्, प्रभु-

---

दासादीनामिव यश धावकादीनामिव धन करोति, सहृदयस्य राजादिगतोचिताचारपरि-ज्ञान करोति, कवे सहृदयस्य च मयूरादीनामिवाऽनर्थनिवारण करोति, आस्वादकत्वे सहृदयत्वस्यैव प्रयोजकत्वात् कवेरपि सहृदयस्यैव विगलितवेद्यान्तरमानन्द रामादिवद् वर्तितव्य न रावणादिवद् इति उपदेशश्च करोतीत्यर्थ । **इति** अस्माद् हेतो **सर्वथा** सर्व-प्रकारेण दोषपरिहारेण रससन्निवेशादिना **तत्र** काव्ये **यतनीयम्** करणाय यत्न कार्य इति भाव । आस्वादनायापि यत्न कार्य इत्यर्थ इति केचित् ।

कालिदास' काल्या दास , ङ्यापो सञ्ज्ञाछन्दसोर्बहुलम् (६।३।६३) इति पाणिनि-व्याकृते । अत्र वाल्मीक्यादीनामिति वक्तव्ये सति कालिदासादीनामित्युक्ति वाल्मीक्या-दीना दिव्यादिव्यप्रकृतित्वान्न काव्यमात्रकृत तेषा यश. कालिदासादीनान्तु अदिव्यप्रकृती-नामज्ञातकुलशीलाना काव्यमात्रकृत यश इति विवेकादिति ज्ञेयम् । **श्रीहर्षादे**रिति पञ्चम्य-न्तम् । **धावक**नामा कवी रत्नावली नाटिका कृत्वा श्रीहर्षाय राज्ञे समर्पयामास, श्रीहर्षश्च धावकाय प्रचुर धन दत्त्वा ता नाटिका स्वकृतत्वेन ख्यापयामासेति सहृदयनिकाये प्रसिद्धि । अत्र केचित् **श्रीहर्षादेर्बाणादीनामिव धनमिति** पाठ मन्यन्ते, तदसत्, यद्यपि "हेम्नो भार-शतानि वा मदमुचा वृन्दानि वा दन्तिना श्रीहर्षेण समर्पितानि कवये बाणाय कुत्राद्य तत् । या बाणेन तु तस्य सूक्तिनिकरैरुट्टङ्किता कीर्तयस्ता कल्पप्रलयेऽपि यान्ति न मनाङ् मन्ये परिम्लानताम्" (रुय्यककृते व्यक्तिविवेकव्याख्याने) इति बाणेन श्रीहर्षाद बहु धन लब्ध-मित्यपि विज्ञायते, तथापि बाण काव्येन न केवल धन लब्धवान् अपितु प्रचुर यशोऽपि "बाणोच्छिष्ट जगत् सर्वम्" इत्यादिप्रसिद्धे , धावकस्य तु न यश केवल धनमिति अस्य ग्रन्थकारस्य शैलीवैशिष्टचानुरोधाद् **'धावकादीनामिव धनम्'** इत्येव मौलिक पाठ इति बुध्यते । **राजादिगतोचिताचाराः** राजादे समुचिता व्यवहारा राजादिविषयका अन्येषा वा उचिता आचारा । **आदित्यादेरिति** पञ्चम्यन्तम् । मयूराख्य कवि पद्याना शतेनादित्य स्तुत्वा कुष्ठरोगादुल्लाघता जगामेति सहृदयनिकाये प्रसिद्धि । प्रसिद्ध च मयूरशतकाख्य सूर्यशतकापरनामक काव्यम् । अलौकिक आनन्द एव काव्यस्य मुख्य फलमिति स्वीकुर्वाण आह—**सकले**त्यादि । **मौलिः** मुकुटम् "मौलि किरीटे धम्मिल्ले चूडा-कङ्कोलि-मूर्द्धसु" इति हैमानेकार्थसङ्ग्रह । मौलिभूत मुख्यमित्यर्थ । **समनन्तरमेव** काव्यश्रवणानन्तरमेव । रस्यते इति **रस** स्थायिभावस्त**दास्वादनेना**ऽऽस्वादकरणभूतेन विभावानुभावव्यभिचारि-सयोगेन **समुद्भूत** व्यक्तम् । **विगलित** तिरोहित विलीनमित्यर्थ । अन्यद् वेद्य वेद्यान्तरम् मयूरव्यसकादोना तथा व्याकरणस्योपदिष्टत्वात् । विगलित वेद्यान्तर यस्मिन् स तम्, विज्ञेयान्तरसम्पर्कशून्यमित्यर्थ । विषयान्तरभानरहितमिति भाव । काव्यफलभूतस्योपदेश-

सम्मितशब्दप्रधानवेदादिशास्त्रेभ्य सुहृत्सम्मितार्थतात्पर्यवत्-पुराणादीतिहासे-भ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षण यत् काव्य लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य

सम्मितेत्यादि । **प्रभुसम्मितानि** प्रभुतुल्यानि शब्दप्रधानानि वेदादिशास्त्राणि । यथा प्रभु आज्ञाबोधकस्य शब्दस्य परिवृत्तिमाज्ञाभङ्ग न सहते तथैव वेदादिशास्त्राण्यपि शब्दपरिवृत्त्य-महानि सर्वत्रा विधिपराणि च, आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् (धर्ममीमा-सासूत्रे १।२।१)इति शास्त्रविदामुपक्रमणात् । शब्दस्य शब्देन सह नित्य सम्बद्धस्य वाच्यार्थस्य विवेश्च "अनुवादे च लक्षणा न्याय्या न विधौ" (न विधौ पर शब्दार्थ) [शावरभाष्ये ४।८।१९] इति न्यायात् कथमप्यन्यथाऽकरणीयत्वाद् वेदादिशास्त्रस्य शब्दप्रधानत्वम् । "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध " (ध०मी०सू० १।१।५) इति हि शास्त्रविदो वदन्ति । औत्पत्तिक उत्पत्तित एव आगत , अविनाभूतो नित्य इति यावत् । तेभ्यो वेदादिशा-स्त्रेभ्यो विलक्षणमित्यन्वय । **सुहृत्सम्मिता** मित्रतुल्या **अर्थतात्पर्यवन्तो** वस्तुस्थितिबोधनेन तात्पर्यार्थप्रकाशनमात्रे सलग्ना **पुराणादय इतिहासाश्च** तेभ्यश्च विलक्षणमित्यन्वय । यथा मित्राणि इदम् इत्थम् इदम्, इत्थम्, एव कृते एव भवति एव कृते एव भवति, अमुकेन इत्थ कृत तस्य इत्थ जातम्, तुभ्य-यथा रोचते तथा वर्तस्वेति अवगमयन्ति तथैव पुराणा-दीतिहासाश्च केवलमर्थानर्थौ बोधयन्ति न नियोजयन्ति इति ते मित्रतुल्या । **शब्दार्थ-योर्गुणभावोऽ**प्राधान्यम्, गुणा द्रव्यपारतन्त्र्येण अप्रधानानि तेषा भावोऽप्राधान्यम् तेन । **रसस्याङ्गीभूतो व्यापारो** व्यञ्जना, रसस्य केवलव्यञ्जनाविषयत्वाद् व्यञ्जनाया एव साक्षाद् रसाङ्गत्वम्, व्यापारान्तरस्य तु परम्परया । तत्र **प्रवणम्** आसक्तम् अनुकूल वा तस्य भावस्तया । व्यञ्जनावृत्तिप्रधानतयेति फलितोऽर्थ । न च काव्ये व्यापारप्राधान्यस्य स्वीकाराद् आचार्यमम्मटे भट्टनायकमतदीक्षा प्रसञ्जनीया शब्दव्यापाराणा मध्ये काव्ये व्यञ्जनाया प्राधान्येऽपि तद्विपयस्य व्यङ्ग्यार्थस्यैव मम्मटमते विश्रान्तिधामत्वेन काव्ये प्राधान्यात् । **विलक्षणम्** असदृशम् । **काव्यं** कविकर्म, "गुणवचनब्राह्मणादिभ्य कर्मणि च" (५।१।१२४) इति पाणिनिना व्याकृतत्वात् । ननु तत्र पाणिनिसूत्रे कर्मशब्द क्रियावचन इति वृत्तेर्दर्शनात् काव्यस्य च कविकृतग्रन्थत्वेनेष्टत्वात् कथ कवे साधनकर्मणि काव्यशब्द-वृत्ति ? अत्र हरदत्त आह—"अत्राहु क्रियाकर्मण्येव प्रत्ययविधानम् औपचारिकस्तु तत्कृते प्रयोग इति । अपर आह—सूत्रे य कर्मशब्दो यश्च वृत्तौ क्रियाशब्दस्तदुभयमपि कर्मसाधन कर्म क्रियाकार्यमित्यर्थ , तेन कृतिसाधनकर्मण्येव प्रत्यय इति ।" **लोकोत्तरा** आह्लादजनकबोधजनिका **वर्णना** वर्णनम्, "ण्यासश्रन्थो युच्" (३।३।१०७) इति व्याकृते । तत्र **निपुणो** निष्णातस्तस्य **कवेस्तादृग्**वर्णनात्मक **कर्म** । लोकोत्तरवर्णना-निपुण कविकर्म इत्यपि कश्चित् । कर्मयोजन न तूच्चारणमपि मौनिपद्यासङ्ग्रहप्रसङ्गा-दित्यपि कश्चित् । कर्मत्व चात्र शब्दानित्यतावादिमते प्रथमोच्चारणनिष्पाद्यत्वम्, उच्चा-रण च मानसमपि, शब्दनित्यतावादिमते तु प्रथमोच्चारणनिष्पाद्यत्व शब्दस्य कर्मत्वम्,

रामादिवद् वर्तितव्य न रावणादिवदित्युपदेश च यथायोग कवे सहृदयस्य च करोतीति सर्वथा तत्र यत्तनीयम् ॥

अर्थस्य तु कविसमवेतरसालङ्कारान्यतरजन्यचमत्काराभिव्यक्त्युपायभूतसामग्रीमङ्घटन-विषयकज्ञानकर्मत्वेन कर्मत्वम् । एवञ्च न लाम्याज्ञाना काव्यत्वापत्ति । **कान्तेव** वनितेव जनितात्यर्थानुरागा योपिदिवेत्यर्थ । **सरसतापादनेन** रसवत्त्वसम्पादनेन **अभिमुखीकृत्य** आवर्ज्येत्यर्थ । यथा कान्ता प्रिय सरसतामापाद्य स्वाभिमुखीकृत्य विनैवाज्ञा स्वाभीप्सिते पथि प्रवर्तयति तथैव काव्यमपि शृङ्गारादिरसेन श्रोतृमनो वशीकृत्य तत् सत्पथे प्रवर्तयति त्वया रामादिवद् वर्तितव्य न रावणादिवदित्युपदेशस्वरूपकाटव परिहृत्य निभृत प्रयुक्तेन ध्वनितेन सर्वैर्मयाऽपि रामादिवद् वर्तितव्य न रावणादिवदिति सहृदयचित्ते स्वत स्फुरितेन उपदेशेन । एतच्च काव्यप्रयोजन राष्ट्रस्य पर वरणीयम्, प्रेयसोऽविरोधेन श्रेयसोऽपि साधकत्व काव्यस्य यदि न कलुपीकृत धूर्तैस्तदा नरस्यापि वरणीयमेव । **यथायोगं** यथा-युक्ति । एतेषा प्रयोजनाना मध्ये यस्य यस्य कविना सहृदयेन उभाभ्या वा योगो लोके दृश्यते उपपद्यते वा तदनुसारमित्यर्थ ।

विश्वनाथस्तु अल्पधियामपि सुखादेव चतुर्वर्गफलप्राप्ति काव्यप्रयोजन मन्यते । कुन्त-कस्तु 'चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् । काव्यामृतरसेनान्तश्चमत्कारो वितन्यते' इति ब्रुवाणोऽलौकिकमानन्दमेव काव्यस्य परम प्रयोजन मन्यते । भामहवामनौ तु प्रीति कीर्त्ति च काव्यप्रयोजन मन्येते । अन्येषान्तु मतानि आचार्यमम्मटमतेनैव गतार्थानि ।

अत्रेदमप्याकलनीयम्—'स्तेमस्तोकोऽपि नाङ्गे श्वसितमविकल चक्षुषा सैव वृत्तिर् मध्येक्षीराब्धिमग्ना स्फुटमथ च वय कोऽयमीदृक् प्रकार । इत्थ दिग्भित्तिरोधक्षतप्रसर-तया मासलैस्त्वद्यशोभि स्तोकावस्थानदु स्थैस्त्रि त्रिजगति धवले विस्मयन्ते मृगाक्ष्य'' इत्यादेरसत्यस्यार्थस्याभिधायित्वाद्, "वयम् बाल्ये डिम्भाँस्तरुणिमनि यून परिणतावपी-च्छामो वृद्धान् परिणयविधेस्तु स्थितिरियम् । त्वयाऽऽरब्ध जन्म क्षपयितुममार्गेण किमिद न नो गोत्रे पुत्रि क्वचिदपि सतीलाञ्छनमभूत्'' इत्यादे असदर्थस्योपदेशकत्वात्, "नित्य त्वयि प्रचुरचित्रकपत्रभङ्गीताटङ्कताडनविपाण्डुरगण्डलेखा । स्निह्यन्तु रत्नरशनारणनाभि-रामकामार्तिनर्तितनितम्बतटास्तरुण्य'' इत्यादेरसभ्यस्यार्थस्याभिधायित्वात्, "काव्याला-पाँश्च वर्जयेत्'' इति किरातार्जुनीयटीकारम्भे मल्लिनाथेन धृतात् स्मृतिवचनात्, "शास्त्रेषु भ्रष्टा कवयो भवन्ति'' "काव्येन हन्यते शास्त्रम्'' इत्यादिभ्य काव्यनिन्दावचनेभ्य, ऋषिभिरप्रणीतत्वात्, प्रयोजनाभावाच्च **काव्ये न यत्तनीयम्** इति केचित्, अर्थवादरूपस्या-सत्यार्थाभिधानस्य "पुष्पिण्यो चरतो जङ्घे भूष्णुरात्मा फलेग्रहि । शेरेऽस्य सर्वेपाप्मान श्रमेण प्रपथे हता'' (ऐतरेयब्राह्मणे ३३।३।१५) इतिप्रभृतिश्रुतिषु अन्येषु शास्त्रेषु चोप-लब्धेस्तस्य तादृशस्य न्याय्यत्वात्, असतोऽपि निषेध्यत्वेनोपदेशस्योचितत्वात्, असभ्यार्था-भिधायित्वस्य च 'अह रोमशा (अर्थान्मैथुनयोग्या) अस्मि, अतो मा सम्भोगायोपेत्य

इति, "शास्त्रत्व हितशसनात्" इति वा शास्त्रलक्षण तथा च वेदाना तन्मूलकाना ग्रन्था-नामेव परमार्थत शास्त्रत्व तथापि लक्षणाश्रयणेन परम्परया शास्त्रोपकारकानपि आह— **छन्दोव्याकरणेत्यादि** । **छन्दोग्रन्था** स्वरावच्छेदविशेषनियमबोधका ग्रन्था पिङ्गलाचार्यादिभि कृता, अर्वाचीनैर्दण्डिकेदारभट्टगङ्गादासकालिदासादिभि कृताश्च । **व्याकरण-ग्रन्था** पदतदर्थ-वाक्यतदर्थ-सम्बन्धज्ञानस्य प्रकृतिप्रत्ययादिविश्लेषणद्वारेण उपकारका पाणिन्यादिभि कृता, ते चाष्टौ इति प्रसिद्धि, तथाहि—"ऐन्द्र चान्द्र काशकृत्स्न कौमार शाकटायनम् । सारस्वत चापिशल शाकल पाणिनीयकम् ।" इति । वाल्मीकीये रामायणे तु (७।३६।४७) नव व्याकरणानि उल्लिखितानि । इदानी तु सस्कृतभाषाया पाणिनीय-कातन्त्र (कौमार [कालाप])—चान्द्र—जैनेन्द्र-विश्रान्तविद्याधर-सारस्वताऽभि-नवशाकटायन—सरस्वतीकण्ठाभरण—बुद्धिसागर—हैम—सक्षिप्तसार(जौमर)—मुग्धबोध—सुपद्मादय प्राचीना व्याकरणग्रन्था उपलभ्यन्ते । **अभिधानकोशग्रन्था** नामादिशब्दसङ्ग्राहका द्विरूपकोशाऽमरकोशाख्यनामलिङ्गानुशासनादयो ग्रन्था, ते च प्राचीना अर्वाचीनाश्च बहव, अनेकार्थसमुच्चयाऽभिधानरत्नमाला-नाममालिका-वैजयन्ती-त्रिकाण्डशेष-हारावली-शब्दभेदप्रकाशा-ऽभिधानचिन्तामण्यगस्त्यनिघण्टु-विश्वप्रकाश-धरणि-नाममाला- मेदिनिकर-नानार्थमञ्जरी-विश्वलोचन-कोशावतस-शब्दकल्पद्रुम-वाचस्पत्य-सेण्ट्पिटर्स्बर्ग् (सस्कृत) व्रर्तर्बूखाऽऽख्यातचन्द्रिकादय । **कलाग्रन्था** दण्डनीति-गान्धर्ववेद-धनुर्वेदा-ऽऽयुर्वेद-कामशास्त्रादिसम्बद्धकलाग्रन्था । कला च "यद् यत् स्याद् वाचिक सम्यक् कर्म विद्याभि-सज्ञितम् । शक्तो मूकोऽपि यत् कर्तु कलासज्ञ तु तन् मतम्" इति शुक्रनीतिसारे (४।२६५) विद्यातो विविक्ततया परिभाषिता । इयन्तु परिभाषा कामशास्त्रावयविनीषु कलासु न सर्वथा समन्वेतीति बोध्यम् । 'कामोपचारबहुल हि वस्तु काव्यस्येति' (वामन १।३।८ वृत्तो) कामसूत्रावयविन्य कला अत्र मल्लनागवात्स्यायनकृतात् कामसूत्राद् (१।३।१५) उद्धृत्य सक्षेपेण प्रतिपाद्यन्ते, ताश्च चतुष्षष्टि । ता यथा—१ गीतम्, २ वाद्यम्, ३. नृत्यम्, ४ आलेख्यम् (चित्रलेखनम्), ५ विशषकच्छेद्यम् (भूर्जादिपत्रमयाना तिलकानामनेकप्रकारक छेदनम्), ६ तण्डुल-कुसुम-वलि-विकारा (अक्षततण्डुलाना कुसुममाल्यादीना च भक्तिविशेषस्य रचना) ७ पुष्पास्तरणम्, ८ दशनवसनाङ्गरागा, ९ मणि-भूमिकाकर्म (मरकतादिमयकुट्टिमभूमिरचना), १०, शयनरचनम्, ११ उदकवाद्यम् (उदकस्य मुरजादिवद् वादनम), १२ उद्काघात (हस्तयन्त्रमुक्तजलधाराभिस्ताडनेन क्रीडा), अद्भुतदर्शनवेदिता (परातिसन्धानार्था पलितीकरणादयश्चित्रा योगा) १४. माल्य-ग्रथनविकल्पा, १५ शेखरकापीडयोजनम् (शेखरकस्य शिखास्थाने प्रलम्बन्यायेन परिधापनस्य, आपीडस्य च मण्डलाकारेण ग्रथितस्य काण्ठिकायोगेन परिधापनस्य च कौशलम्) १६ नेपथ्यप्रयोगा, १७. कर्णपत्रभङ्गा (हस्तिदन्तशङ्खादिकृता कर्णपत्रविकल्पा) १८ गन्धयुक्तिः (वसनादौ सुगन्धस्य योजनम्, उत्सादनानुलेपनधूपनादीना गन्धद्रव्याणा योजन वा), १९ भूषणयोजनम्, २० इन्द्रजालम् (सैन्यदेवकलादिप्रदर्शनेन विस्मापनम्)

२१ कौचुमारयोगा (वाजीकरणाना [बलवीर्यौजोवर्धकानाम्] औषधाना निर्माणस्य प्रयोगा), २२ हस्तलाघवम् (सर्वकर्मसु क्षिप्रहस्तता),-२३ चित्रशाकयूपभक्ष्यविकार-क्रिया , २४ पानक-रस-रागा-ऽऽसव-योजनम्, २५ सूचीवानकर्म (सूचीकर्म त्रिविधम्-कञ्चुकादीना सीवनम्, प्रतिकृष्ट (पारित) वस्त्राणाम् ऊतनम्, कुथास्तरणादीना विरचनञ्चेति, वानकर्म (वयनम्), २६ सूत्रक्रीडा (सूत्रस्य छिन्नस्येव दग्धस्येवेति प्रदर्शनम्, पुनस्तस्यैव अच्छिन्नत्वेन अदग्धत्वेन च प्रदर्शनम्, सूत्रैर्देवकुलाद्याकाराणा रचना चेति), २७ वीणाडमरुकवाद्यानि, २८ प्रहेलिका, २९ प्रतिमाला (अन्त्याक्षरिकेति प्रसिद्धा), ३० दुर्वाचकयोगा (शब्दतोऽर्थतश्च दु खेन वक्तु शक्या रचनाः, यथा काव्यादर्शे-'दंष्ट्राग्रद्धर्चा प्राग्यो द्राक्ष्मामम्बव्वन्त स्थामुच्चिक्षेप । देवध्रुट्क्षिद्वचृत्विक्स्तुत्यो युष्मान् सोऽव्यात् सर्पात्केतु ' इति यशोधर), ३१ पुस्तकवाचनम्, ३२ नाटकाख्यायिकादर्शनम् (नाटकाख्यायिकाविशेषपरिज्ञानम्) ३३ काव्यसमस्यापूरणम्, ३४ पट्टिकावेत्रवानविकल्पा (पट्टिकाभिर्वेत्रविदलैश्च खट्वादेर्वयनस्य प्रकारा), ३५ तर्कुकर्माणि (सूत्रकर्तनादीनि), कुन्दनकर्माणि (शाणकर्माणि) वा, ३६ तक्षणम्, ३७ वास्तुविद्या, ३८ रूप्यरत्नपरीक्षा, ३९ धातुवाद (क्षेत्रवादा मृत्प्रस्तररत्नधातूना पातनशोधन-मेलनज्ञानरूपा), ४० मणिरागाकरज्ञानम् (स्फटिकमणीना रञ्जनस्य विज्ञानम्, पद्मरागादिमणीनामुत्पत्तिस्थानादेर्ज्ञान च), ४१ वृक्षायुर्वेदयोगा , ४२ मेषलावककुक्कुटयुद्धविधि , ४३ शुकसारिकाप्रलापनम्, ४४ उत्सादन-सवाहन-केशमर्दनकौशलम्, ४५ अक्षरमुष्टिकाकथनम् (अक्षरच्युतकम्), ४६ म्लेच्छितकविकल्पा (गूढवस्तुमन्त्रणार्था अस्पष्टार्था आलापप्रकारा) ४७ देशभाषाज्ञानम्, ४८ पुष्पशकटिका (अर्धरात्रे उपश्रुतिशब्दग्रहणस्य कला, पुष्पवप्रप्रकाराणा रचने कौशल वा) ४९ निमित्तज्ञानम् (उत्पातादिनिमित्तज्ञानम्), ५० यन्त्रमातृका (यन्त्रनिर्माणयोजनादिकला), ५१ धारणमातृका (स्मृतिदृढीकरणोपाययोगा), ५२ सम्पाठ्यम् (बहूना सम्भूय सुस्वरेण पठनम्), ५३ मानसी काव्यक्रिया, ५४ अभिधानकोषज्ञानम्, ५५ छन्दोवृत्तज्ञानम्, ५६ क्रियाकल्प (काव्यक्रियाकल्प काव्यालङ्कारशास्त्रमित्यर्थ), ५७ छलितकयोगा (स्वरूपमन्यरूपेण प्रकाश्य वञ्चन परव्यामोहनार्थम्), ५८ वस्त्रगोपनानि (वस्त्रसरक्षणानि, पाटितस्य वस्त्रस्य अपाटितस्येव परिधानमिति च), ५९ द्यूतविशेषा , ६० आकर्षक्रीडा (पाशकक्रीडा), ६१ बालक्रीडनकानि (गृहक-गेन्दुक-पुत्रिकादीनि), ६२ वैनयिकविद्याज्ञानम् (मनुष्यविनयार्थमाचारशास्त्राणा गजाश्वादिविनयार्थ तत्तच्छास्त्राणा च ज्ञानम्), ६३ वैजयिकविद्याज्ञानम् (अपराजितादीना दिव्यविद्याना विजयफलाना शस्त्रविद्याना च ज्ञानम्), ६४ व्यायामिकविद्याज्ञानम् इति। एतासु कलासु श्रीमद्भागवतव्याख्याने (१०।४५।३६) श्रीधरेण काश्चिदन्यथा प्रतिपादिता । **चतुर्वर्गग्रन्था** धर्मार्थकाममोक्षग्रन्था । तत्र **धर्मग्रन्था** प्राधान्येन **वेदा**, ते च चतुर्धा विभक्ता ऋग्-यजु-सामा-ऽथर्वनामभि ख्याता , तेषा च प्रवचनभेदात् प्रतिवेद भिन्ना भूयस्य शाखा , तत्र एकशतमध्वर्युशाखा , सहस्रवर्त्मा सामवेद ,

एकविंशतिधा बाह्‌वृच्यम्, नवधाऽऽथर्वणो वेद इति महाभाष्ये उक्ता । वेद-स्वरूपा-ऽर्थ-प्रयोग-रहस्य-व्यञ्जकानि **वेदाङ्गान्यपि** धर्मग्रन्थेष्वेव गण्यन्ते । तानि च शिक्षा कल्पो व्याकरण निरुक्त छन्दो ज्यौतिषम् इति मुण्डकोपनिषदि उक्तानि । तत्र **शिक्षाग्रन्था** वर्ण-स्वर-मात्रा-बल-साम (साम्य)-सन्ताना (सहिता)-दि प्रतिपादका ग्रन्था षार्षद-प्रातिशाख्या-दिनामानो बहव , पाणिन्यापिशलिप्रभृतिभि कृता शिक्षाश्च । **कल्पग्रन्थाः** चरणान्तरस्थ-गुणोपसहारपूर्वक वैदिकानुष्ठानक्रमविशेषादिकस्य कल्पका (ज्ञापकाः) ग्रन्था , तत्र आध्व-र्यवप्रयोगप्रतिपादका बौधायना-ऽऽपस्तम्ब-सत्याषाढ (हिरण्यकेशि)-वैखानस-भारद्वाज-मानव-कात्यायनादिप्रणीता , हौत्रप्रयोगप्रतिपादका आश्वलायन-शाङ्खायन-कौषीतकादि-प्रणीता , औद्‌गात्रप्रयोगप्रतिपादका मशक-लाट्यायन-द्राह्यायण-जैमिनिप्रभृतिभि प्रणीता , शान्तिक-पौष्टिका-ऽऽभिचारिकादिप्रयोगप्रतिपादका वैतानश्रौतसूत्रादयश्च । विवाहादि-सस्कारादिप्रतिपादका गृह्यकल्पाश्च प्राय पूर्वोक्तै श्रौतकल्पकारैरेव मुनिभि प्रणीता । **व्याकरण** तु सस्कृतकाव्यप्रणयने इदानी पदे पदे आवश्यकमिति पूर्वमेव पृथगेवोक्तम् । **निरुक्तग्रन्था** व्याकर्तुमशक्ययो पदपदार्थयो सम्बन्धस्य निरूपणाय सैद्धान्तिकाना नियमाना प्रदर्शका , तादृगकतिचनपदपदार्थयो सम्बन्धस्य मुख्यतया देवतावाचकपदपदार्थसम्बन्धस्य प्रदर्शका देवविद्याग्रन्थत्वेन (छान्दोग्योपनिषदि ७।१।२) च व्यवह्रियमाणा ग्रन्था यास्कादि-प्रणीता । **छन्दोग्रन्था** अपि पूर्वमेवोक्ता । **ज्योतिषग्रन्था** आर्च-याजुषादिज्यौतिषग्रन्था लग-धादिप्रणीता , सूर्यसिद्धान्तादयो गर्गसहितादयश्च । **धर्ममीमासा** विधिपरकवेदभागवाक्यार्थ-निर्णयिनो जैमिनिप्रभृतिभि कृता, **सङ्कर्षकाण्डश्च** विधिपरकप्रकीर्णकवेदवाक्यविचारपरम् । **स्मृतिग्रन्थाः** गौतम-बौधायना-ऽऽपस्तम्ब-शङ्खादिकृता धर्मसूत्रग्रन्था , मनुयाज्ञवल्क्यविष्णु-यमाङ्गिरोवसिष्ठदक्षसवर्तशातातपपराशरगौतमशङ्खलिखितहारीतापस्तम्बोशनोव्यासका-त्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिभि कृता स्मृतिग्रन्थाश्च । पुराणग्रन्था यद्यपि चतुर्वर्गग्रन्थास्तथापि प्राधान्येन तेऽपि धर्मग्रन्था एव । तत्र च पुराणसहिता पराशरद्वै-पायनवैशम्पायनसूतकृता । तत्र द्वैपायनसहिताया ब्रह्म-पद्म-विष्णु-शिव (वायु)-भागवत-नारद-मार्कण्डेया-ऽग्नि-भविष्य-ब्रह्मवैवर्त-लिङ्ग-वराह-स्कन्द-वामन-कूर्म-मत्स्य-गरुड-ब्रह्माण्ड-पुराणानि, सनत्कुमार-नरसिंह-स्कन्द-शिवधर्मा-ऽऽश्चर्य (दुर्वासो)-नारद-कपिल-वामनो-ऽ[1] शनस-ब्रह्माण्ड-वरुण-कालिका-महेश्वर-साम्ब-सौर-पराशर-मारीच-भास्करपुराणानि उप-पुराणाख्यानि, सनत्कुमार-बृहन्नारदीया-ऽऽदित्य-मानव-नन्दिकेश्वर-कौर्म-भागवत-वासिष्ठ-भार्गव-मुद्‌गल-कल्कि-देवी-महाभागवत-बृहद्धर्म-परानन्द-वह्नि-पशुपति-हरिवश पुराणानि औपपुराणत्वेन कैश्चिदुक्तानि । श्रुति-स्मृति-मूलपुराणतात्पर्यमादाय पुराणशैल्या विद्वद्भी रचितानाम् आत्मपुराणादीनामन्येषामपि ग्रन्थाना सत्त्वादिद दिक्प्रदर्शनमेव । एतेषा पुरा-णाना धर्मे प्रामाण्य च वेदमूलकत्ववेदाविरोधित्वान्यतरत्वाधीनमितिबोध्यम् । **अर्थग्रन्था**

१. अत्र इ-उ-ऋ-ए-ऐ-ओ-औ-स्वराणा प्रतिनिधित्वेनापि एतच्चिह्न (ऽ) प्रयुक्तम् ।

काव्याना च महाकविसम्बन्धिनाम्, आदिग्रहणादितिहासादीना च विमर्शनाद् व्युत्पत्ति, काव्य कर्तुं विचारयितु च ये जानन्ति तदुपदेशेन करणे योजने च

बार्हस्पत्यनीतिशास्त्र-शुक्रनीतिप्रभृतयो नीतिग्रन्था, विष्णुगुप्तप्रणीतोऽर्थशास्त्रग्रन्थ, कामन्दकीयनीतिसारपञ्चतन्त्रप्रभृतयश्च। आयुर्वेद-धनुर्वेदो विमानादिग्रन्था स्थापत्यादि-ग्रन्था, वार्ताशास्त्रग्रन्थाश्च विषयसाजात्येनार्थग्रन्थमध्ये गणनीया। **कामग्रन्था** नन्दि-श्वेतकेतु-बाभ्रव्यादिभि प्रणीता, मल्लनाग-वात्स्यायनकृत कामसूत्राख्यञ्च। कुचुमार-तन्त्र-कोकशास्त्र-रतिरहस्य-नागरसर्वस्वादयस्तज्जातीया ग्रन्थाश्च। गान्धर्ववेदश्च देवतो-पासनादावुपयुज्यमानोऽपि रागवर्धकत्वात् कामग्रन्थमध्ये गणनीय। **मोक्षग्रन्था** प्राधा-न्येन ईशावास्य-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीयै-ऽतरेय-छान्दोग्य-बृहदारण्यकादय उपनिषदो वेदान्तनाम्ना प्रसिद्धा। दूरत समीपतश्च तदुपकारकाणि वैशेषिक-न्याय-साङ्ख्य-योग-धर्ममीमासा-ब्रह्ममीमासाख्यानि दर्शनानि षट् शास्त्राणीति प्रसिद्धानि, वस्तु-तस्तु षट्शास्त्राणि षड् वेदाङ्गान्येव। शैव-शाक्तवैष्णवादयो वेदमूलका वेदाविरोधिनो वा आगमाश्च। 'मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति, तेभ्य एत तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूहमभ्यूढम्। तस्माद् यदेव किञ्चानूचानोऽभ्यूहत्यार्ष तद् भवति" (निरुक्ते परिशिष्टे १-१२) इत्युक्तत्वाद्, "प्रदीप सर्वविद्यानाम् उपाय सर्वकर्मणाम्। आश्रय सर्वधर्माणा शश्वदान्वीक्षिकी मता" (काटलीये-ऽर्थशास्त्रे प्रथमेऽधिकरणे, द्वितीयेऽध्याये) इति वचनाच्च आन्वीक्षिकी नाम तर्कविद्या हैतुकी वा चतुर्वर्गशास्त्रोपकारिका। तत्र च "साङ्ख्य योगो लोका-यत चान्वीक्षिकी" इति कौटल्य। गौतमप्रणीत न्यायशास्त्रमपि परमार्थतत्त्व-विद्यारूपेण अप्रामाणिकमपि लोकायततर्कविद्यात्वेनोपादेयम्। **गजलक्षणग्रन्थ** पाल-काप्यादि, बृहत्सहिताशादयश्च, गजलक्षणानि विष्णुधर्मोत्तरादौ पुराणेऽप्यागतान्येव तथापि प्राधान्यादुक्तम्। **तुरगलक्षणग्रन्थ** शालिहोत्रग्रन्थ अन्ये चार्वाचीना जयदत्तादि-कृता अश्वशास्त्रादिग्रन्था पराशरसहिताबृहत्सहिताशादय प्राचीनग्रन्थाशाश्च। **खड्गल-क्षणग्रन्था** विष्णुधर्मोत्तराशा देवीपुराणाशा बृहत्सहिताशा धनुर्वेदाशाश्च। आदिपदात् स्त्री-पुरुषलक्षणादिप्रतिपादकसामुद्रादि-चार्वाक-बौद्ध-जैनादि-धर्मदर्शनग्रन्थादीना सर्वेषा सङ्ग्रह। एतेन सर्वाणि शास्त्राणि काव्याङ्गानीत्युक्त भवति। उक्त च—"विद्या समस्ता यत्राङ्गमहो भारो महान् कवे" इति, "न स शब्दो न तद् वाच्य न स न्यायो न सा कला। जायते यन्न काव्याङ्गमहो भारो महान् कवे" (भामहकृते काव्यालङ्कारे ५।४) इति च। लक्षयन्ति ज्ञापयन्तीति लक्षणा, लक्षणा ग्रन्था **लक्षणग्रन्थास्तेषाम्**। महाकवयो मन्त्रद्रष्टार ऋषयो भृग्वङ्गिरोगौतमभरद्वाजात्रिविश्वामित्रकश्यपवसिष्ठागस्त्या-दयो वाल्मीकि-व्यास-भास-कालिदास-भारवि-भवभूति-माघ-श्रीहर्षादय **तत्सम्बन्धीनि** तत्कृतानि तेषा **काव्यानाम्** ऋग्वेदादि-रामायण-महाभारत-रघुवश-कुमारसम्भवाऽभिज्ञान-

पौन पुन्येन प्रवृत्तिरिति त्रय समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतव ॥२॥

शाकुन्तल-किरातार्जुनीयो-ऽत्तररामचरित-शिशुपालवध-नैषधीयचरितादीनाम् । **इतिहासा** "धर्मार्थकाममोक्षाणामुपदेशेन सयुतम् । पूर्ववृत्तकथायुक्तमितिहास प्रचक्षते" इति परिभाषिता महाभारतादयोऽन्ये च लौकिकपुरावृत्तप्रतिपादका ग्रन्थास्तेषाम् । **अवेक्षणाद् विमर्शनात्** पुन पुन पठनाद् विचारणाच्च । **व्युत्पत्तिर्बहुज्ञता** वर्णनीयविषयोपयोगिसमस्तवस्तुपौर्वापर्यपरामर्शकौशलमिति केचित्, उचितानुचितविवेक इत्यन्ये, शास्त्रचिन्ताजन्य सस्कारविशेष इत्यपरे, प्रतिभानविशेष एव व्युत्पत्तिरिति अस्माक पक्ष । **कर्तुं** विरचयितुम् । **विचारयितुं** सदसद् वेति परीक्षितुम् । **तदुपदेशेन** तेषा शिक्षया कविसमयशिक्षासहितया । **कविसमयश्च असदपि** पद्मादि नदीषु, हस्त्यादि आकाशगङ्गायाम्, हसादि जलाशयमात्रे, स्वर्णरत्नादि यत्र तत्राद्रिषु, सूचीभेद्यत्वमुष्टिग्राह्यत्वे तमसि, कुम्भोपवाह्यत्व ज्योत्स्नायाम्, शौक्ल्य यशोहासादौ, काष्र्ण्यमयश पापादौ, रक्तत्व क्रोधरागयो, चन्द्रिकापान चकोरेषु, निशि भिन्नतटाश्रयण चक्रवाकयुग्मेषु **वर्णयेदि**ति, सदपि पुष्पफल चन्दनद्रुमेषु, फलमशोकेषु, मालती वसन्ते, ज्योत्स्नातमसी कृष्णशुक्लपक्षयो, रक्तत्व कामिदन्त-कुन्दकुड्मलयो, हरितत्व कमलमुकुलादौ, पीतत्व प्रियङ्गुपुष्पेषु, दिवा नीलोत्पलाना विकासम्, शेफालिकापुष्पेषु निशानिमित्तक विस्रसन **न वर्णयेदि**ति, कृष्णनीलयोः, कृष्णश्यामयो, पीतरक्तयो, शुक्लगौरयो चन्द्रे शशमृगयो, कामध्वजे मकरमत्स्ययो, अत्रिनेत्रसमुद्रोत्पन्नयोश्चन्द्रयो, द्वादशानामप्यर्काणाम्, नारायण-विष्णु-दामोदर-कूर्मादे, कमलासम्पदो, नागसर्पयो, क्षीरक्षारसमुद्रयो, दैत्यदानवासुराणा च **ऐक्य**मिति, चक्षुरादे शुक्लश्यामकृष्णमिश्रानेकवर्णत्वम्, चिरकालजन्मनोऽपि शिवशेखरचन्द्रस्य बालत्वम्, कामस्य मूर्तत्वामूर्तत्वे चेत्यादि । कविसमयश्चाय "पूर्वे हि विद्वास सहस्रशाख साङ्ग च वेदमवगाह्य शास्त्राणि चावबुध्य देशान्तराणि द्वीपान्तराणि च परिभ्रम्य यानर्थानुपलभ्य प्रणीतवन्तस्तेषा देशकालान्तरवशेन अन्यथात्वेऽपि तथात्वेनोपनिबन्धो य स कविसमय" इति राजशेखरेण काव्यमीमासाया चतुर्दशेऽध्याये व्याख्यात । एतद्विषये उदाहरणादिक तत्रैव द्रष्टव्यम् । एतर्हि तु प्रकृतिरेवानुसरणीया प्रायेण न कविसमय । वाक्यार्थरहितवृत्तरचनम्, परकीयपद्यपादाद्युपजीविपद्यरचना, परोक्त्युपजीविपद्यरचना, समस्यापूरण चेत्यादिप्रकारा **अभ्यासा** प्राथमिका । **करणे** विभिन्नवस्तुरसादिविषयकसन्दर्भाणा सृष्टौ, **योजने** तेषा सन्दर्भाणा परस्पर परमोपकारकतया सन्निवेशे, यथाऽभिज्ञानशाकुन्तले षष्ठेऽङ्के धनवृद्धेरनपत्यस्य वृत्तान्त स्वय नातिरमणीयोऽपि दुष्यन्तगतविप्रलम्भशृङ्गारस्य दुष्यन्तचरित्रस्य च परमपोषकतया योजित । कारिकास्थम् **इतिपद** मिलितोपस्थापनायेति प्रदर्शयन् व्याचष्टे-**त्रय समुदिता न तु व्यस्ता** इति । **समुदिता** परस्परसापेक्षा इत्यर्थ । **व्यस्ता** पृथक् पृथक् स्थिता परस्परनिरपेक्षा इत्यर्थ । **समुल्लासे** सम्यक् प्रसृतौ । **हेतु** काव्यरूपकार्योपहित इत्यर्थ । शक्तिनिपुणताभ्यासाना मेलक सर्वदा काव्यस्योत्पादक

एवमस्य कारणमुक्त्वा स्वरूपमाह—

(सू० ३) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन क्वापि ।

एव तु न भवतीति विवेक्तव्यम् । हेतुरित्यत्र एकवचन दण्डचक्रचीवरन्यायेन हेतुत्वमिति ध्वनयितुम् अतएव शक्तिनिपुणताभ्यासा हेतुरिति विशेष्यविशेषणयोर्भिन्नवचनत्व सङ्गच्छते । दण्डचक्रचीवरादे समुदितस्य यथा घटत्वाद्येकधर्मावच्छिन्न प्रति हेतुत्व तथैव (दण्डचक्रचीवरन्यायेन) शक्तिनिपुणताभ्यासाना समुदिताना काव्य प्रतीति ज्ञेयम् । **न तु हेतव** इति तृणारणिमणिन्यायेन शक्त्यादे काव्य प्रति हेतुत्व निराचष्टे । यथा तृणजवह्नि प्रति तृणस्य अरणिजवह्नि प्रति अरणे , मणिजवह्नि प्रति मणेश्च पृथक् पथक् हेतुत्व (न तु वह्नित्वावच्छिन्न प्रति तृणादेर्हेतुत्व परस्परव्यभिचारात्) तथा शक्त्यादे काव्य प्रति पृथक् पृथग् हेतुत्व न इत्यभिप्राय ।

रसगङ्गाधरकारस्तु काव्यस्योद्भवे प्रतिभैव हेतु , नैपुण्यशिक्षाभ्याससिद्धदेवताप्रसादादीना तु क्वचिदेव प्रतिभाजननद्वारा परम्परया हेतुत्व न साक्षादिति मन्यते । चन्द्रालोककारस्यापीदमेव मतम् । सूक्ष्मेक्षिकायुक्त चैतन्मतम् ॥२॥

एवम्उक्तप्रकारेण **अस्य** काव्यस्य कारणमुक्त्वा **स्वरूप** लक्षणमाह-**तददोषा**वित्यादिना । **अदोषौ** रसाद्युद्देश्यप्रतीतिप्रतिबन्धकदोषरहितौ, **सगुणौ** प्रातिभासिकेन सत्येन वा माधुर्यौज'प्रसादान्यतमगुणेन तादृशाभ्या गुणाभ्या वा सहितौ **क्वचित्** स्फुटरससहितस्थले तु **अनलङ्कृती** स्फुटालङ्काररहितौ **अपि** । नञोऽल्पार्थकत्वेन अनलङ्कृती इत्यस्य स्फुटालङ्काररहितौ इत्यर्थ उपपद्यते । नञर्थाश्च—"तत्सादृश्यमभावश्च तदन्यत्व तदल्पता । अप्राशस्त्य विरोधश्च नञर्था षट् प्रकीर्तिता " इति । **अपि**शब्दात् सर्वत्र सालङ्कारौ इति लभ्यते । **शब्दार्थौ** शब्दश्च अर्थश्च । शब्द प्रतीतपदार्थको ध्वनि , तथाहि महाभाष्यकार "अथवा प्रतीतपदार्थको लोके ध्वनि शब्द इत्युच्यते" इति । **अर्थो**ऽत्र शब्दवृत्तिजन्यज्ञानविषय । शब्दार्थाविति शब्दार्थयोर्जात्यर्थकत्वेन एकवचनान्तत्वात् । तथा च वाच्यलक्ष्यव्यङ्ग्या सर्वेऽप्यर्था सङ्गृहीता भवन्ति । **तत्** काव्यमित्यर्थ । रसाद्युद्देश्यप्रतीतिप्रतिबन्धकदोषरहितौ प्रातिभासिकेन सत्येन वा गुणेन सहितो सर्वत्र सालङ्कारौ स्फुटरससहितस्थले तु अस्फुटालङ्कारौ अपि शब्दार्थौ काव्यमिति प्रव्यक्तोऽर्थ ।

सदोषयोरतिव्याप्तिवारणाय **अदोषौ** इति । ननु उत्तमकाव्यत्वेन स्वेनैवोदाहृते 'निश्शेषच्युतचन्दन स्तनतटम्' इत्यादौ काव्ये वाक्यगतविधेयाविमर्शदोषस्य 'स्तनतट निश्शेषच्युतचन्दनम्' इत्यादौ वक्तव्ये तथाऽवचनाज् जातस्य सत्त्वादिद काव्यलक्षणम् अव्याप्तिदोषयुक्तम् उदाहरणविरोधो वा इति चेद् ? अत्र वदन्ति—दुष्टांशे अकाव्यत्वमेव, न च काव्यपदस्याविषयत्वप्रसङ्गोऽदुष्टपादमात्रमप्यादाय तस्य सविषयत्वात्, निश्शेषेत्यादौ उत्तमत्वप्रयोजकस्य उपाधे. वाच्यातिशयिव्यङ्ग्यस्यैव उदाहृतत्वान्न उदाहरण-

विरोधोऽपि, काव्यञ्च विरलविषयमेव, तथाहि ध्वन्यालोककार "अस्मिन्नतिविचित्रकविपरम्परावाहिनि समारे कालिदासप्रभृतयो द्वित्रा पञ्चषा वा महाकवय इति गण्यन्ते [१–६]" इति ब्रुवाण सूचयति । अन्ये तु अत्र दोषशब्देन रसाद्युद्देश्यप्रतीतिप्रतिबन्धको दोषोविवक्षितस्तथा च निश्शेषच्युतचन्दन स्तनतटम् इत्यादौ दोषे वर्तमानेऽपि तथाविधस्य-दोपस्याभावान्न काव्यत्वहानि , अतो नास्य काव्यलक्षणस्य अव्याप्तिदोषदूषितत्व न वा उदाहरणविरोध इति समादधति ।

निर्गुणयोरतिव्याप्तिवारणाय **सगुणौ** इति । ननु गुणस्य रसधर्मत्वाद् "रसादिस्तु व्यङ्ग्योऽर्थोऽलङ्कारान्तर च सर्वत्राव्यभिचारीत्यगणयित्वैव तद् अलङ्कारा उदाहृता तद्-रहितत्वेन तु उदाह्रियमाणा विरमतामावहन्तीति पूर्वापरविरुद्धाभिधान न चोदनीयम् [का० प्र० सू० १२७ वृत्तौ] इति ग्रन्थकृता सूचिते नीरसे चित्रकाव्ये स्वच्छन्दोच्छल-दित्यादौ स्फुटरसरहिते काव्ये च रसधर्मस्य गुणस्याभावाद् अव्याप्तिर्लक्षणस्येति चेन् न, तत्र प्रातिभासिकान् रसपर्यन्तविश्रान्तप्रतीतिबन्ध्यै शब्दाश्रितत्वेन गृहीतान् गुणान् (माधुर्याद्याभासरूपान्) आदाय लक्षणस्य प्रवृत्तः । अयञ्च ग्रन्थकृतोऽभिप्राय आविष्कृत एवास्माभि स्वोपज्ञतया सगुणौ इत्यस्य व्याख्यानेऽपि । भवन्ति हि माधुर्याद्यन्यतमगुण-व्यञ्जकवर्णसाजात्ययुक्ता वर्णा तादृश्यो वृत्तयो वा सर्व॰ काव्येषु । एव च विश्वनाथेन यदपि चोदितम्—"तयो काव्यस्वरूपेणाभिमतयो शब्दार्थयो रसोऽस्ति न वा । नास्ति चेद् गुणवत्त्वमपि नास्ति, गुणाना तदन्वयव्यतिरेकानुविधायित्वात्, अस्ति चेत् कथ नोक्त रसवन्तौ (सरसौ) इति विशेपणम् । गुणवत्त्वान्यथानुपपत्त्यैतल्लभ्यते इति चेत् तर्हि सरसावित्येव वक्तु युक्तम्, न सगुणाविति, न हि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादि-मन्तो देशा इति केनाप्युच्यते" इति, तदप्यकाण्डताण्डवायितम्, आचार्यमम्मटमते नीर सयोरपि प्रातिभासिकगुणयुक्तयो शब्दार्थयोरन्यलक्षणयुक्तयो काव्यत्वस्येष्टत्वात् ।

अनलङ्कृतयो "अद्रावत्र प्रज्वलत्यग्निरुच्चै प्राज्य प्रोद्यन्नुल्लसत्येष धूम (उदा० ४१) इत्याद्यो शब्दार्थयो ओजोव्यञ्जकवर्णसाजात्ययुक्तवर्णाना सत्त्वात् प्रातिभासिकस्य ओजोगुणस्य उपस्थित्या काव्यत्व प्रसज्येत तथा चातिव्याप्तिर्लक्षणस्य स्यादिति तद्-वारणाय सर्वत्र सालङ्कारौ इति सूचितम् । ननु तत्र अनुप्रासस्यापि दर्शनात् तत् काव्य-मेवेति चेन् न, चमत्कारे जननीये रसादिसहकारित्वस्य अलङ्कारत्वस्य तस्मिन्ननुप्रासेऽ-भावात् । ननु मम्मटमते "अलङ्कारा यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसायिन" (का० प्र० सू० ७९, वृत्तौ) इति । "वैचित्र्यञ्चालङ्कार" (स्वप्नेऽपि समरेषु त्वामित्यादे-रुदाहरणस्य [उदा० ४७४] वृत्तौ श्लेषविवेचने ४६२ उदाहरणानन्तर च) इति च रसाद्यघटितमेव अलङ्कारसामान्यलक्षणमिति अयमप्यनुप्रासोऽलङ्कार एवेति चेद् अस्तु तर्हीदमपि चित्र काव्यम् । यद्वा अत्र प्रातिभासिकगुणविविक्तत्वेनाऽलङ्कारस्याभावात् अथवा सत्यपि शब्दालङ्कारे अर्थालङ्कारसहयोगाभावात्, गुणप्राधान्यत शब्दार्थचित्रयो ,

दोषगुणालङ्कारा वक्ष्यन्ते। क्वापीत्यनेन एतदाह यत् सर्वत्र सालङ्कारौ क्वचित् तु स्फुटालङ्कारविरहेऽपि न हानि, यथा—

स्फुटालङ्काररहिते य कौमारहर इत्यादौ अव्याप्ति स्याल्लक्षणस्येति स्फुटरस-सहितस्थले तु स्फुटालङ्काररहितावपीति सूचनाय **अनलङ्कृती पुनः क्वापीत्युक्तम्**।

अभिनेयेऽर्थे अतिव्याप्ति स्यादिति **शब्द**ग्रहणम्, रागेऽतिव्याप्ति स्यादिति **अर्थ**ग्रहण-मिति केचित्। शब्दार्थौ इत्यत्र शब्दस्यार्थाश्रयत्वात् तस्य प्रागुक्ति, तथा च महाकवि-रपि वागर्थाविवेत्याह। दाक्षिणात्यास्तु वागर्थाविवेत्यादि पद्य प्रक्षिप्त मन्यन्ते किल।

एवञ्च सति "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन क्वापि" इति वाक्य काव्य-लक्षणवाक्यत्वेनैव आचार्यमम्मटस्याभिप्रेतमिति ज्ञेयम, प्राचीनैर्व्याख्यातृभिस्तथारूपेणैव गृहीतत्वाच्च।

तथा च सति "तददोषावित्यादिवाक्य न लक्षणवाक्य तत्र चमत्कारासाधारण-कारणान्येव परिगणितानि, लक्षणन्तु चमत्कारनिपुणकविकर्मत्वम्, तन्नैपुण्योपपादक चैतत्" इति, "परमानन्दप्रयोजनक काव्य, काव्यप्रयोजनकञ्चेद शास्त्रम् इति प्रयोजन-सम्बन्धे दर्शितम्, तत्र काव्यज्ञशिक्षाभूतस्य अस्य शास्त्रस्य काव्यजनने सहकारिचक्र पूर्व-कारिकया निरूपितम्, इदानी तु शब्दार्थोभयरूपेण काव्येन कथ परमानन्दो जन्यत इत्या-काङ्क्षाया तत्र सहकारिचक्र निरूप्यते" इति, "काव्यलक्षण तु वृत्तिकृता पूर्वमेव (लोकोत्तरवर्णनानिपुणकविकर्म इति) दर्शितम्" इति च मैथिलपण्डितगोकुलनाथोक्तम् आचार्यमम्मटाभिप्रायप्रतिकूलमेव, मुख्यतया प्रतिपाद्यस्य काव्यलक्षणस्य कारिकासु अनु-ल्लेखस्य अविश्वसनीयत्वाच्च। एतेन आचार्यमम्मटेन तददोषावित्यादिना काव्यस्यादर्श-भूत प्रायिक वा स्वरूप प्रतिपिपादयिषित न तु इतरव्यावृत्तिव्यवहारान्यतरफलक लक्षण-मुक्तम् इत्यभिप्रायक पण्डितबलदेवोपाध्यायोक्त तज्जातीयकमन्यदपि व्याख्यातम्, परोक्तौ स्वाभिप्रायारोपो युक्तो न वेति विद्वास एव विदाङ्कुर्वन्तु, वयन्तु काव्यलक्षणविषये स्वाभिप्राय स्वाभिप्रायत्वेनैव अनुपद प्रकाशयिष्याम।

वाक्यार्थज्ञानस्य पदार्थज्ञानाधीनत्वाद्, अभावज्ञानस्य प्रतियोगिज्ञानाधीनत्वाच्चाह— **दोषगुणालङ्कारा वक्ष्यन्ते** इति। दोषा सप्तमे उल्लासे, गुणा अष्टमे, अलङ्कारा नवमे दशमे च निरूपयिष्यन्ते इत्यर्थ। कारिकास्थस्य क्वापीत्यस्याभिसन्धिमाविष्करोति— **क्वापीत्यनेने**त्यादिना। **सर्वत्र** सालङ्कारौ इत्यस्यायमभिप्रायो यत् काव्ये सालङ्कारत्वम् उत्सर्गत एव भवतीति, **क्वचित्तु** स्फुटरसयुक्तस्थलेषु तु कुत्रचित् **स्फुटालङ्कारविरहेऽपि** प्रव्यक्तालङ्काराभावेऽपि **न काव्यत्वहानि** नाकाव्यत्वम्। एतेन स्फुटरसयुक्तस्थलेऽपि उत्सर्ग प्राप्तो लङ्कारयोग आवश्यक एव, किन्तु कुत्रचित् तादृशस्थले स्फुटोऽलङ्कारो नोपलभ्यते तथापि काव्यत्व हानिरेवतु न भवति इत्येतावन्मात्रम् उक्त भवति। तत्रापि अलङ्कारविरहेऽपीत्येतावन्मात्रमनुक्त्वा **स्फुटालङ्कारचमत्कार** आवश्यक एवेत्यभिप्राय,

य कौमारहर स 'एव हि वरस्ता एव चैत्रक्षपा-
स्ते ... प्रौढा कदम्बानिला ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेत समुत्कण्ठते ॥१॥

अत्र स्फुटो न कश्चिदलङ्कार , रसस्य हि प्रधान्यान्नालङ्कारता ।

प्रतिभाति । अलङ्कारमात्रकृत चमत्कारमपि शब्दार्थयो काव्यत्वस्य प्रयोजक मन्वानस्य आचार्यस्य इदमपि शोभते एव । एवञ्च आचार्याभिप्रायमबुद्ध्वा वृथैव कटाक्षित आचार्यो जयदेवेन—"अङ्गीकरोति य काव्य शब्दार्थावनलङ्कृती । असौ न मन्यते कस्मादनुष्ण-मनल कृती" इति चन्द्रालोके (१।८) ब्रुवाणेन ।

स्फुटालङ्कारविरहित काव्यमुदाहरति—**य कौमारहर** इत्यादि । स्वाधीनपतिकाया सखी प्रत्युक्तिरियम् । शिलाभट्टारिकाया पद्यमिदमिति शार्ङ्गधर । **यः** कौमार बाल-भाव हरतीति **कौमारहर** प्रथम सम्भोक्ता इत्यर्थ । **वरः** प्रिय **हि** यद्यपि, निपातानामने-कार्थत्वात्, **स एव** चिरात् सम्भुक्त एवेत्यर्थ । **चैत्रक्षपा** मधुरात्रय **ता** एव पूर्वमनुभूता एव, **उन्मीलिता** विकसिता **मालती** वासन्ती तया **सुरभयः** सुगन्धय प्रौढा प्रगल्भा **कदम्बस्य** हलिप्रियवृक्षस्य सम्बन्धिन **अनिला** वाता ते **च** ते एवेत्यर्थ , चोऽवधारणे निपाताना नानार्थत्वात्, **अस्मि च** अहमपि, अस्मीति अहमर्थक विभक्तिप्रतिरूपकमव्ययम्, **सा एव** उत्कण्ठाहेतुभूतमवस्थान्तरमप्राप्ता एव, **तथापि** तत्तदुपभोगसामग्रीणामुपभुक्त-पूर्वत्वेऽपि **तत्र** तस्मिन् उपभुक्तपूर्वे **रेवारोधसि** नर्मदातीरे **वेतसीतरुतले** वानीरस्तम्ब-मध्यस्थे तले इत्यर्थ , यद्यपि वेतसी न तरुस्तथापि काव्ये सहनीय एष प्रयोग , **सुरतस्य व्यापार** आलिङ्गनादिका क्रिया तस्य **लीलारूपो विधिः** इतिकर्तव्यता तस्मिन् विचित्र-क्रीडामये रते इत्यर्थ , **तत्रेत्यस्य** रेवारोधसि, वेतसीतरुतले, सुरतव्यापारलीलाविधौ इति त्रिभिरेवान्वय इति त्रयाणामपि उपभुक्तपूर्वत्व लभ्यते, **चेत** हृदय **समुत्कण्ठते** भृश-मुत्सुक भवतीत्यर्थ । षट्सप्तत्यक्षरायाम् अतिधृत्या छन्दसि **शार्दूलविक्रीडितं वृत्तम्, न तु शार्दूलविक्रीडितं छन्दः**, तथाहि पिङ्गल "छन्द" (२।१) इत्यधिकृत्य "गायत्री" (२।२) इत्यादि प्रतिपाद्य "धृत्यष्टिशक्वरी" जगत्य (४।५), "पृथक् पृथक् पूर्वत एतान्ये-वैषाम्" (४।६), "द्वितीय द्वितीयमतित" (४।७) इत्युक्त्वा अतिजगत्यादीनि अतिच्छन्दासि निरूप्य "वृत्तम्" (५।१) इत्यधिकृत्य "तनुमध्या त्यौ" (६।२) इत्यादिना गायत्र्यादि-छन्दोगतानि वृत्तानि निरूपयन् "शार्दूलविक्रीडित म्सौ ज्सौ तौ गादित्यऋषय" (७।२२) इति अतिधृत्या छन्दसि शार्दूलविक्रीडित वृत्त निरूपयति । गायत्र्यादीना छन्दसा प्रस्तारात् वृत्तो (जाजो) भेदविशेषो हि वृत्तम्, तथा च हलायुधोऽपि-"गायत्र्यादौ छन्दसि वर्तते इति वृत्तम्" इति (५।१), स्पष्ट चेद लीलावती-वृत्तरत्नाकर-छन्दोमञ्जर्यादावपि । "सूर्याश्वैर्यदि म सजौ सततगा शार्दूलविक्रीडितम्" इति शोभन गङ्गादासोक्त शार्दूल-विक्रीडितलक्षणम् ॥उदा० १॥

उदाहरण - इगमयति—अत्रेत्यादिना । **स्फुटो** झटिति प्रतीयमान । हरम् वरम् इत्यनुप्रासस्य प्रकृतशृङ्गारस्यप्रतीत्यननुकूलोष्मानुगतरेफघटितनया अलङ्कारत्वाभावात्, अथवा सकृद् एवस्यैव पुन श्रवणे वैचित्र्यानुदयेनालङ्कारत्वाभावात् । ननु अत्र वरापकरणयोरुपभुक्तपूर्वकत्वेन उत्कण्ठाकारणस्य अभावेऽपि उत्कण्ठारूपस्य कार्यस्य उत्पत्ते कथनाद् विभावनालङ्कार, "क्रियाया प्रतिषेधेऽपि फलव्यक्तिर्विभावना" [का० प्र० सू० १६३] इति लक्षणात् अथवा वरोपकरणयोरुपभुक्तपूर्वत्वस्य उत्कण्ठाभावकारणस्य सत्त्वेऽपि कार्यस्य उत्कण्ठाऽभावस्य अभावस्य अर्थाद् उत्कण्ठाया वर्णनाद विशेषोक्तिरलङ्कार, "विशेषोक्तिरखण्डेषु कारणेषु फलावच" [का० प्र० सू० १६४] इति लक्षणात्, अत्र अनयोरलङ्कारयो कतर स्वीकार्य इत्यत्र साधकबाधकमानाभावात् सन्देहसङ्कर स्फुट, तत् कथमत्र स्फुटालङ्काराभाव इति चेद्, उच्यते—हेत्वभावे नञादिपदेन प्रतिपादिते सत्येव विभावनाया, फलाभावे नञादिपदेन प्रतिपादिते सत्येव विशेषोक्ते स्फुटत्वस्य स्वीकाराद् अत्र च हेत्वभाव-फलाभावयो नञादिपदेन अप्रतिपादितत्वात् तयोरस्फुटत्वम्, तयोरस्फुटत्वे च तन्मूलकसन्देहसङ्करस्यापि अस्फुटत्वमेव । नान्योऽपि कश्चन स्फुटोऽलङ्कारोऽत्र ।

ननु विप्रलम्भशृङ्गारोऽत्र स्पष्ट, स एव स्फुटो रसवदाख्योऽलङ्कारोऽत्र, उक्त हि अलङ्कारशास्त्रप्रवक्तृमूर्धन्येन सुचिरन्तनेन आचार्यभामहेन—"रसवद् दर्शितस्पष्टशृङ्गारादिरसम्" [काव्यालङ्कारे ३-६] इति चेत् तत्राह—**रसस्य** चेत्यादि । व्यज्यमानस्यापि रसस्य वाच्यार्थोपस्कारकत्व स्वीकुर्वाणै प्राचीनैरालङ्कारिकै रसस्याऽलङ्कारत्वमेव सर्वत्र काव्येषु इति प्रतिपादितम्, किन्तु तन्निराकृतम् आचार्यानन्दवर्धनेन—"प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्ग तु रसादय । काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मति" [ध्वन्यालोके—२।५] इति वदता । तथा चाऽत्र रसस्य प्राधान्यान्नालङ्कारत्वम् आलङ्कारिकसरणिव्यवस्थापकस्याचार्यस्य मतेनाऽपि, अस्माभिस्तु रसस्यालङ्कारत्व कदाऽपि न स्वीक्रियत एव, तस्मादपि अत्र वर्तमानस्यापि रसस्य नैवालङ्कारतेति भाव ।

अथ सक्षेपेण काव्यलक्षणपरीक्षा । सुचिरन्तनेन आलङ्कारिकमूर्धन्येन **भामहेन** "**शब्दार्थौ सहितौ काव्यम्**" इति काव्यलक्षण कृतम्, तत्र सहितौ इति पद व्यर्थ मा भूदिति तस्य 'परस्परशोभाकरत्वेन मिलितौ' इति "चमत्कारे जननीये परस्परानुकूल्येन मिलितौ' इति वा अथ कल्पनीय इति नातिदुष्टमिद लक्षणम्, तथापि सहितत्वस्य तेन विशेषेण अव्याकृतत्वाद् अस्फुटत्व लक्षणस्य । तेन च अलङ्कारा निरूपिता इति, "श्रव्य नातिसमस्तार्थ काव्य मधुरमिष्यते । आविद्वदङ्गनाबालप्रतीतार्थ प्रसादवत्" इति च प्रतिपादितमिति च सालङ्कारतया सगुणतया च शब्दार्थौ सहितौ काव्यमिति निष्कृष्ट काव्यलक्षण तस्याभिप्रेतमिति कल्प्यते । तत्र सर्वालङ्कारयोगप्रयुक्ते सहितत्वे काव्यत्वमुत यत्किञ्चिदलङ्कारयोगप्रयुक्तेऽपि । आद्ये असम्भवित्व लक्षणस्य, अन्त्ये नीरसयमकानुप्रासादियोगप्रयुक्तेऽपि सहितत्वे काव्यत्व स्यात्, ननु तत्र माधुर्याद्यभावात् सहितत्वानुदयादेव

त्रा न काव्यलक्षणप्रवृत्तिरिति चेत् तर्हि माधुर्यादि महिलत्वस्य न तेनानिरूपितत्वादस्फुट-त्वमेव तदुक्तकाव्यलक्षणदूषणमस्तु । सर्गबन्धप्रसङ्गे [१।१८–२३] सर्गबन्धे सकलाना रसाना सन्निवेश आवश्यक इति प्रदर्शयता तेन काव्यात्मभूतो रसादि काव्यात्मत्वेन अस्फुट दृष्टोऽपि काव्यलक्षणे तथात्वेन न गृहीत इति काव्यतत्त्वप्रतीतिवन्ध्यमेव तदुक्त काव्यलक्षणम् । आचार्यदण्डिना त—"**शरीर तावदिष्टार्थव्यवच्छिन्ना पदावलि**" [१–१०] इति काव्यशरीर काव्यादर्शे प्रतिबिम्बित कृतम् । तत्र त—"काश्चित् मार्गविभागार्थमुक्ता प्रागप्यलङ्क्रिया साधारणमलङ्कारजातमन्यत् प्रकाश्यते" इति [२–३] सूचिता श्रुत्यनुप्रासवत्तानुप्रासयमकादयो मार्गविशेषेण सह विशेषत सम्बद्धा, सर्वमार्गसाधारणाश्च उपमादय अलङ्कारा निरूपिता अलङ्कारेभ्यो विविक्तताया सम्पादकस्य गुणधर्मस्य दण्डिनाऽनिरूपितत्वेऽपि श्लेषादयो गुणा तेन निरूपिता [१।४१–१०२] इति गुणालङ्कारयुक्ता मनोहरार्थप्रतिपादिका पदावली काव्यमिति, महाकाव्य प्रसङ्गे तेन गुणानाम् अनुल्लिखितत्वाद् [१।१८–२२] सदलङ्कारयुक्ता मनोहरार्थप्रति-पादिका पदावली काव्यमित्येव वा तन्मते काव्यलक्षण परिनिस्तिष्ठति. महाकाव्याङ्ग-त्वेन [१–१८] रसवदलङ्कारत्वेन [२।२७५] च रसा अपि दण्डिना यद्यप्युल्लिखिता-स्तथाऽपि तेषामिष्टार्थत्वेन काव्यात्मत्वेन वा प्रतिपादन तेन न कृत न चान्यथाऽपि कयाचिद् रीत्या इष्टार्थो व्याख्यात इति तदुक्त लक्षणमपि सम्यगनुन्मीलितमेव । न च रसादय एव इष्टार्थत्वेनोपात्तु शक्या, तेन इष्टार्थस्य शरीरकोटौ रसादीना चालङ्कार-कोटौ निक्षिप्तत्वात् । **वामनो**क्तेषु "काव्य ग्राह्यमलङ्कारात्" [१–१–१], "सौन्दर्य-मलङ्कार" [१–१–२], "स दोषगुणालङ्कारहानोपादानाभ्याम्" [१–१–३], "रीति-रात्मा काव्यस्य" [१–२–६], "विशिष्टपदरचना रीति" [१–२–७], "विशेषो गुणा-त्मा" [१–२–८], "ओज प्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्यक्तिकान्तयो बन्धगुणा" [३–१–४], "ते एवार्थगुणा" [३–२–१], "समग्रगुणा वैदर्भी" [१–२–११], "ओज कान्तिमती गौडीया" [२–१–१२], "माधुर्यसौकुमार्योपपन्ना पाञ्चाली" [१–२–१३], इति सूत्रेषु "काव्यशब्दोऽय गुणालङ्कारसस्कृतयो शब्दार्थयोर्वर्तते" [१–१–१] इति वृत्तिवाक्येन सार्कं शीलितेषु ज्ञायते यद् दोषहानेन गुणालङ्कारोपादानेन च सुन्दरौ शब्दार्थौ काव्यम् इति काव्यलक्षण **वामना**भिमतमिति । किन्तु यदि सर्वैर्गुणैरु-पात्तै सौन्दर्यमिति स्वीक्रियते तदा कथमसमस्तगुणा गौडीया पाञ्चाली च रीति काव्यस्यात्मा, यदि च कतिपयगुणैरुपात्तैरपि सौन्दर्य तदा "अद्रावत्र प्रज्वलत्यग्निरुच्चै प्राज्य प्रोद्यन्नुल्लसत्येष धूम" इत्यादौ वामनोक्तेषु ओज प्रसादार्थव्यक्तिषु गुणेषु सत्सु तदुक्तेऽनुप्रासालङ्कारे च सति काव्यव्यवहार स्यात्, न चेष्टापत्ति, नीरसस्यास्य लोको-त्तरास्वादाजनकत्वेन काव्यत्वाभावात् । तस्मात् स्वोक्तिव्याघातातिव्याप्त्यन्यतरदोषग्रस्त वामनोक्त काव्यलक्षणम् । यदि तु गौडीया पाञ्चाली च रीति हेयत्वेनैव (१।२।१४–१५) प्रतिपादितेत्युच्यते तर्हि तु वैदर्भी रीतिरात्मा काव्यस्येति स्फुट भणनीय न तु

त्मा काव्यस्येति । न च आस्वादमूमित्वेनाऽभिमानिनाऽपि रीतिर्वस्तुत आस्वाद-
किन्तु रस एव वस्तुतस्तथेति च वामनोक्त काव्यलक्षणमलक्षणमेव । आलङ्कारि-
व्यवस्थापकत्वेन कैश्चित पूजितस्य **आनन्दवर्धनस्य** तु 'काव्यस्यात्मा ध्वनि"
] "शब्दार्थशरीर तावत् काव्यम्" [तत्रैव वृत्तौ], "सहृदयहृदयाह्लादिशब्दार्थ-
मेव काव्यलक्षणम्" [तत्रैव वृत्तौ], "योऽर्थ सहृदयश्लाघ्य काव्यात्मेति व्यवस्थित"
] इत्याद्युल्लिखितवत **सहृदयश्लाघ्यव्यङ्ग्यात्मकौ शब्दार्थौ काव्यम्** इति काव्य-
मभिप्रेतमिति विज्ञायते तत्र भवता सहृदयश्लाघ्यानामर्थाना सम्यग् विवृतत्वात्
ण स्फुट नातिनिन्दनीय च, तथापि 'काव्यस्यात्मा स एवार्थस्तथा चादिकवे
क्रौञ्चद्वन्द्ववियोगोत्थ शोक श्लोकत्वमागत" [१–५] इति, "प्रतीयमानस्य
विदर्शनेऽपि रसभावमुखेनैवोपलक्षण प्राधान्यात्' [१–५ वृत्तौ] इति, "नीरसस्तु
य सोऽपशब्दो महान् कवे । स तेनाकविरेव स्यादन्येनास्मृतलक्षण" [३–१९,
श्लोक] इति, "वाच्याना वाचकाना च यदौचित्येन योजनम् । रसादिविषयेणै-
र्म मुख्य महाकवे" [३–३२] इति, "व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भव-
। रसादिमय एकस्मिन् कवि स्यादवधानवान्" [४–५] इति च प्रतिपादयता
ऽपि काव्यस्यात्मा रसादिरूपमेव व्यङ्ग्य काव्यात्मत्वेन अनिर्धारयता काव्यस्यात्मा
रति वस्त्वलङ्काररसध्वन्यविवेकेन ध्वनिमात्र काव्यात्मान प्रतिजानानेन तेन न
न इति सावद्यमेव तदभिप्रेत काव्यलक्षण मन्तव्यम् । यदि तु लोचनानुसार
५] रसध्वनिरेव आनन्दवर्धनमतेऽपि काव्यस्यात्मा इति स्वीकर्तु शक्येत तदा तु
मेव तल्लक्षण स्यात् । **राजशेखरेण** तु "अहो श्लाघनीयोऽसि शब्दार्थौ ते शरी-
सम प्रसन्नो मधुर उदार ओजस्वी चासि ते रस आत्मा अनुप्रासोप-
च त्वामलङ्कुर्वन्ति" [काव्यमीमांसायास्तृतीयेऽध्याये] इति सरस्वत्या वर्णित
रूप प्रातिभेन ज्ञानेन दृष्ट्वाऽपि षष्ठेऽध्याये "गुणवदलङ्कृत च वाक्यमेव
]" इति वदता नून प्रतिभावतोऽपि स्वस्य विस्मरणशीलत्वमाविष्कृतम्, प्रमुष्ट-
स्मृत्याऽस्पष्टरूपेणोपनीत काव्यस्वरूप चास्माक पुरत स्थापितम् । **कुन्तकस्तु**
र्थौ सहितौ वक्रकविव्यापारशालिनि । बन्धे व्यवस्थितौ काव्य तद्विदाह्लाद-
ण" [काव्यालङ्कारे १–७] इति वदन् कवेर्वक्रो व्यापार एव काव्यस्यात्मा इति
। कविव्यापारवक्रताऽच तेन विस्तरेण निरूपिता । तथा च स्फुट तदीय काव्य-
म् । किन्तु वास्तविक काव्य मनुष्यमात्रमाह्लादयति न तु तद्विदमेवेति, व्यापार
व्यापारविषयशेषभूतो भवतीति च कुन्तकोक्तमपि लक्षण काव्यस्योपलक्षणमेव
वास्तविकलक्षणमिति ज्ञेयम् । सरस्वतीकण्ठाभरणे **भोजेनोक्तम्**—"निर्दोष गुणवत्
लङ्कारैरलङ्कृतम् । रसान्वित कवि कुर्वन् कीर्ति प्रीति च विन्दति ।" इति,
न्द्रेण काव्यानुशासने उक्तम्—"अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्"
प्रतापरुद्रीये **विद्यानाथेनोक्तम्**—"गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ । गद्यपद्यो-

भयमय काव्य काव्यविदो विदु" इति, साहित्यरत्नाकरे धर्मसूरिणोक्तम्—,'सगुणा-लङ्कृती काव्य पदार्थौ दोषवर्जितो" इति । तज्जातीयान्यानि च काव्यलक्षणानि मम्मटोक्त-काव्यलक्षणपरीक्षयैव परीक्षितानि भवन्तीति मम्मटोक्त काव्यलक्षणमधुना परीक्ष्यते । तदीय काव्यलक्षण च—"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन क्वापि" इति । तदर्थश्च—रसाद्युद्देश्यप्रतीतिप्रतिबन्धकदोषरहितौ प्रातिभासिकेन सत्येन वा गुणेन युक्तौ सर्वत्र सालङ्कारौ स्फुटरससहितस्थले तु अस्फुटालङ्कारौ अपि शब्दार्थौ काव्यमिति । एवञ्चास्य लक्षणस्य 'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापस' इत्यादौ अव्याप्ति वाक्यगतविधेयाविमर्शदोषस्यात्र जागरूकत्वात्, न चेष्टापत्ति सहृदयै-स्तस्योत्तमकाव्यत्वस्य स्वीकृतत्वात् । ननु अदुष्टांशमादाय काव्यत्वनिर्वाह इति चेत्, न तत्र दुष्टांशनिरपेक्षस्य अदुष्टांशस्य अर्थप्रतीतेरेवाभावात् पुनरपि काव्यत्वा-भावप्रसङ्ग , तत्र अदुष्टांशस्य दुष्टांशसापेक्षत्वेन वाच्यैकत्वाच्च तयोरेकीभावे जाते एव वाक्यार्थबोधोदय ततो व्यङ्ग्यार्थबोध इति तयोरंशयोर्वस्तुतोऽखण्डत्व स्वी-कर्तव्यमेवेति कथमखण्डस्यैकस्य समकाल काव्यत्वाकाव्यत्वे । ननु दोषशब्देन उद्देश्यप्रतीतिप्रतिबन्धको दोषो विवक्षित इति व्याख्यातत्वान्न्यक्कारो ह्ययमेवे-त्यादौ दोषे सत्यपि तादृशदोषस्याऽभावाद् नाकाव्यत्वापत्तिरिति कथमव्याप्तिस्तत्र लक्षणस्येति चेत्, तर्हि लक्षणे उद्देश्यस्यैव उल्लेख उचितो न तु तत्प्रतीतिप्रतिबन्धका-भावस्य, तादृशे दोषे सति च उद्देश्यप्रतीत्यभावेनैवाकाव्यत्व सुवचम्, न दोषस्य सत्त्वेन अकाव्यत्वस्योपपादनमावश्यकम् । तस्माद् अधिकमेव अदोषौ इति पदम् । सरसौ इत्य-नुक्त्वा सगुणौ इति वक्तुमप्यनुचितमेव । न च नीरसस्याऽपि प्रातिभासिकगुणयुक्तस्य सङ्ग्रहाय सरसौ इत्यनुक्त्वा सगुणौ इति वक्तु युक्तम्, नीरसस्य काव्यत्वाभावेन असङ्-ग्रहणीयत्वात् । यानि नीरसानि चित्राणि सप्रपञ्चमुदाहर्तुमपि नोत्सहते मम्मट [का० प्र० सू० १२७, वृत्तौ] तानि काव्यत्वेन स्वीकुरुते चेति चित्रमेवैतत् । अस्मिन् विषयेऽधिकम-ग्रेऽपि वक्ष्यते । सर्वत्र सालङ्कारौ इति सूचनमपि, अलङ्कारस्य काव्ये अनियतवृत्तित्वेन तद्रहितस्थले लक्षणस्याप्रवृत्ते प्रसङ्गात् । अलङ्कारस्य काव्येऽनियतवृत्तित्व चोक्तमेव ध्वनिकृता "तस्मान् स्थितमेतद्—अङ्गिभूतरसाद्याश्रयेण काव्ये क्रियमाणे नवार्थलाभो भवति बन्धच्छाया च महती सम्पद्यते इति । अत एव च रसानुगुणार्थविशेषोपनिबन्धनम् अलङ्कारान्तरविरहेऽपि छायातिशययोगि लक्ष्ये दृश्यते यथा—'मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भव । येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ" इत्यादौ [४-५] इति । "उपकुर्वन्ति त सन्त येऽङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्तेऽनुप्रासोपमादय " [का०प्र० सू० ८९] इति काव्येऽलङ्कारस्थितेरनित्यता प्रतिपादयता पूर्वापरसन्दर्भशुद्धि-चङ्गेनाऽपि मम्मटेन कथ च हन्त काव्यलक्षणे अलङ्कारस्य काव्ये नित्यत्व प्रतिपादितम् । ननु काव्यलक्षणप्रतिपादनावसरेऽपि अनलङ्कृती पुन क्वापि इति काव्येऽलङ्कारस्थितेर-नित्यत्व स्वीकृतमेवेति चेन् न, तस्य वाक्यांशस्य "सर्वत्र सालङ्कारौ क्वचित्तु स्फुटा-

लङ्कारविरहेऽपि न काव्यत्वहानि" ग्रन्थकृदुपज्ञव्याख्यानात्, अवश्यतास्फुटस्य अलङ्कारस्य काव्ये आवश्यकत्वस्य स्वीकृतत्वात्, अस्पष्ट प्रतीयमानोऽप्यलङ्कार काव्ये काञ्चनच्छाया पुष्णातीति तदभिप्रायस्य 'स्फुटालङ्कारविरहेऽपि' इति वाक्यांशेन आवेदितत्वात्, यदि तादृशोऽभिप्राय नाभविष्यत् तर्हि स्वाधीने सति शब्दप्रयोगे 'अलङ्कारविरहेऽपि' इत्येव प्रायोक्ष्यत न तु 'स्फुटालङ्कारविरहेऽपि' इति । तस्माद 'अनलङ्कृती पुन क्वापि' इत्यपि अधिकमेव । एव च "चमत्कारिबोधजनकज्ञानविषयतावच्छेदकधर्मवत्त्व प्रकाशोक्त काव्य-लक्षणम्" इति, 'सामान्यलक्षण तु अदोषादिपदाघटितमेव तेषा मतेऽपि" इति च स्वीकुर्वाणेन रसगङ्गाधरगुरुमर्मप्रकाशिन्या महताऽऽडम्बरेण प्रकाशोक्त समर्थयितु प्रवृत्तेन नागोजि-भट्टेनाऽपि प्रकाशोक्त समर्थित न वेति विद एव विदाङ्कुर्वन्तु । एतेन मम्मटोक्तकाव्यलक्षण-समर्थनाय महामहोपाध्यायगङ्गाधरशास्त्रिमहाशयेन "तददोषौ शब्दार्थौ इत्यादिषु प्रदर्शि-ताना दोषाभावगुणालङ्काराणा काव्यसामान्यलक्षणोद्देश्यतावच्छेदककोटिप्रवेशा नास्त्येव" इति स्वीकुर्वाणेनोक्तम्—"कविकर्तृकरसविषयौपयिकसामग्रीमद्घटनविषयकज्ञानवत्त्व शब्दार्थयोरनुगत काव्यत्वम" [चौखम्बाविद्याभवन (१९६४) प्रकाशिताया मैथिलश्रोत्रिय-पण्डितबदरीनाथशर्मनिर्मिताया रसगङ्गाधरचन्द्रिकायाम्, पृ० २०] इति, मम्मटोक्त-काव्यलक्षणदूषणान्येव परिहर्तुकामेन किन्तु मम्मटोक्त काव्यलक्षणमपि परिहरता 'चम-त्कारनिपुणकविकर्मत्वम्" इति मम्मटोक्त काव्यलक्षण मन्यमानेन गोकुलनाथेन उक्तम्—"चमत्कारो नाम आनन्दभोग, स च प्रथमो वाक्यश्रवणसमकालप्रतिसहितेन शब्दालङ्कारेण गुणाभिव्यञ्जकैश्च वर्णै शब्दार्थविगमानन्तरमुल्लास्यते यमाश्रित्य स्वच्छन्दोच्छलदित्यादौ काव्यत्वम्, द्वितीय शब्दार्थविगमकालप्रतिसहितेन अर्थालङ्कारेण वस्तुध्वनिमपेक्ष्य व्यभि-चारिभावोल्लाससमकालमुत्थाप्यते, न हि वस्तुध्वनिनिरपेक्षोऽप्युपमादिरानन्दभोजक गौरिव गवय इत्यादेरपि तथात्वप्रसङ्गात्, यमाश्रित्य विनिर्गत मानदमित्यादौ काव्यत्वम्, अपरस्तु व्यञ्जितव्यभिचारिभावोपरक्तशब्दार्थस्वरूपवाक्यार्थबोधेन साधारणीकृतविभावादिपदार्थो-पस्थितिकाल जन्यते, यमाश्रित्य भावध्वनिषु काव्यव्यवहार, अन्यस्तु साधारणीकृत-विभावानुभावव्यभिचारि-परिबृंहितस्थायिभावस्वरूपकाव्योल्लासेन यावत् स्वसत्त्वमुद्भा-व्यते (उपलभ्यते वा) यमाश्रित्य रसध्वनिषु काव्यव्यवहार, रसध्वनौ च स्थायिभावाभेद-नानन्दो भासते । एवमास्वाद्यमाने भावे तिस्रोऽवस्था, आह्लाद (क) त्व दीप्तिर्व्यापकता चेति त्रय द्रुतेन दीप्तेन व्याप्तेन च चेतसा रसास्वादे गृह्यते इति त एव माधुर्यौज प्रसा-दाख्या गुणा । तदभिव्यञ्जने च वर्णविशेषघटनादिरुपयुज्यते । एव चालङ्कारचमत्कार-भावचमत्कार-रसचमत्काराणामन्यतमोऽवश्य काव्येऽपेक्ष्यते । भावरसयोश्चमत्कारौ गुणम-विषयीकृत्य न सम्भवत इति गुणाभिव्यञ्जिका घटना तयोरपेक्ष्यत एव । विपरीतघटनायाम-लङ्कारोऽपि न स्वदत इति तत्रापि गुणाभिव्यञ्जकमपेक्ष्यत एव । अलङ्कारस्तु रसभावाद्य-न्यतम विनापि चर्वयितु शक्यत इति भावरसास्वादोऽप्यलङ्कार विनाऽनुभवितु शक्यत इत्यलङ्कारसत्ता न नियता । दोषाणामभावस्तदनुसन्धानाभावो वा चमत्कारप्रतिबन्धक ।

भावत्वेन सर्वत्रापेक्ष्यत इति चमत्कारासाधारणकारणान्येव [तददोषावित्यादिना] परिगणितानि, लक्षण तु तस्य [काव्यस्य] चमत्कारनिपुणकविकर्मत्वम्, तन्नैपुण्योपपादक चैतद्" इति, कैश्चित् प्राचीनै "रसवच्छब्दार्थयुगल काव्यम्" इति स्वीकुर्वाणैर्मम्मटोक्तकाव्यलक्षणदोषान् परिजिहीर्षुभिरुक्तम्—"वाच्यत्वामहो रसादिर्न स्वशब्देनोपस्थापयितु शक्यते किन्तु दोषाभावगुणालङ्कारैरुपलक्षितोऽत्र लक्षणे प्रविष्ट , उपलक्षणनानात्व च न दोषाय" इति च व्याख्यातम् । तददोषावित्यादेश्चमत्कारासाधारणकारणपरिगणनपरत्वेऽपि तत्राविष्कृता दोषाश्चमत्कारनिपुणकविकर्मत्वरूप पराभिमत काव्यलक्षणमपि ग्रसन्ति एवेति सर्वथा नास्ति निस्तारो दोषग्रासाद् मम्मटोक्तकाव्यलक्षणस्य । स्वशब्देनोपस्थापयितुमशक्य रसादिं मम्मटोक्त काव्यलक्षण मन्यमानैस्तु स्फुटोऽपि मम्मटाभिप्राय सम्यड् नाकलित इति किमधिक ब्रवाम पराभिप्रायसम्प्रधारणापटून् वटून् प्रति । नापि शब्दार्थौ काव्यम् इति वक्तु युक्तम्, "अपौरुषेय वाक्य वेद ", "शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्व वेदत्वम्" इत्यादिग्रन्थरूपवेदादिलक्षणस्येव ग्रन्थरूपकाव्यलक्षणस्यापि शब्दनिष्ठत्वस्यैवोचितत्वात् । न च "किमर्थमुभावप्यर्थौ निर्दिश्येते न योऽधीते वेत्त्यप्यसौ ? यस्तु वेत्ति अधीतेऽप्यसौ । नतयोरावश्यक समावेश । भवति हि कश्चित् सम्पाठ पठति न च वेत्ति, कश्चिच्च वेत्ति न च सम्पाठ पठति" इति "तदधीते तद् वेद" [अष्टा० ४।२।५९] इति सूत्रे वर्तमानेन वेदत्वादे शब्दार्थोभयवृत्तित्वस्य प्रतिपादकेन व्याकरणमहाभाष्येण विरोध इति वाच्यम्, महाभाष्येण वेदत्वादे शब्दार्थोभयवृत्तित्वस्य अप्रतिपादितत्वात् । पतञ्जलिमतेऽपि शब्दवृत्तित्वमेव वेदत्वादेः । ननु कथ तर्हि छन्दोऽर्थ वेत्ति इति छान्दस ? यत्नविशेषात्तु गौणशब्दस्यापि ग्रहणात् प्रत्यय । तथा हि—छन्दोग्रन्थसहचरितो ग्रन्थार्थस्तात्स्थ्यात् तत्साहचर्याद् वा गौण्या वृत्त्या छन्द , तस्मात् तद्वेदितरि प्रत्यय । क खलु यत्नविशेष ? अयम्, यथा 'तेन दीव्यति खनति जयति जितम्' [अष्टा० ४।४।२] इत्यत्र सकृत् समर्थविभक्तेरुपादानेऽपि अर्थसमुच्चयो न विज्ञायते, ततश्च प्रत्यर्थ प्रत्ययो भवति तथेहापि "तद् अधीते वेद" इत्येवोच्यमानेऽपि अर्थसमुच्चयो न विज्ञास्यते तथा च प्रत्येकमधीयाने विदुषि च प्रत्ययो भविष्यत्येवेति किमर्थ द्विर्द्वितीयासमर्थग्रहणम ? अयमेव यत्नविशेषो ज्ञापयति यद् गौणस्यापि ग्रहण भवतीति ततश्च गौणादपि छन्दोवसन्तादिशब्दाद् वेदितरि अध्येतरि वा प्रत्यय सुलभ । इममेव तु फलितार्थमभिसन्धाय भाष्ये तथा उक्त न तु वेदत्वादे शब्दार्थोभयवृत्तित्वमभिप्रेत्य । "तदधीते तद् वेद" इति योगस्य प्रामादिकत्वे स्वीकृतेऽपि भाष्यकारव्याख्यानबलादेव गौणाच् छन्दआदिशब्दाद् वेदितरि प्रत्यय । "ऋगित्युक्ते सम्पाठमात्र गम्यते नास्या अर्थो गम्यते" [१-१-६९] इति महाभाष्याद् ऋगादिवेदविशेषवाचकशब्दार्थोऽपि शब्द एवेति गम्यते । यद्यपि "ननु चोक्तम्—न हि च्छन्दासि क्रियन्ते नित्यानि च्छन्दासीति । यद्यप्यर्थो नित्यो या त्वसौ वर्णानुपूर्वी साऽनित्या तद्भेदाच्चैतद् भवति—काठकम्, कालापकम्, मौदकम्, पैप्पलादकमिति" इति "तेन प्रोक्तम्" [अष्टा० ४।३।१०१] इति

सूत्रस्य वार्त्तिकाना व्याख्याने भाष्यकारेणोक्तमिति तन्मते अर्थस्यैव छन्दसो नित्यत्वम्' इत्यपि गम्यते, तथापि "शब्दप्रमाणका वय यच्छब्द आह तदस्माकम प्रमाणम्" [पस्पशाह्निके] इति वदतो महाभाष्यकारस्य मते शब्दप्रमाणरूपस्य वेदस्य शब्दात्मकत्वमेव पर श्लिष्यते । अथवा 'नित्यानि छन्दासि' इति व्यवहारोऽपि लक्षणयैव । तथा वेदत्वाद शब्दवृत्तित्वमेव, तथा च काव्यत्वादेरपि समानन्यायेन शब्दवृत्तित्वमेवोचितम् । यच् च केनचिदुक्तम—"विनिगमनाविरहादर्थविशेषावच्छ शब्द इव शब्दविशेषावच्छो-ऽर्थोऽपि लोकोत्तरचमत्कारव्यञ्जकतया काव्यमित्युभयो प्राधान्येन (शब्दार्थौ इति) निर्देश काव्य शृणोति इति व्यवहारस्तु अर्थांशेऽपि शब्दबोधार्थकशृणोतिनोपपादयितु शक्यते आत्मा श्रोतव्य इतिवद्" इति, तदसत्, परेण काव्यत्वेन विवक्षितस्य अर्थस्यापि मूलत्वेन शब्दस्य प्रधानताया 'काव्यमुच्चै पठ्यते' 'काव्यादर्थोऽवगम्यते' "काव्य श्रुतम्, अर्थो न ज्ञात" इति सार्वलौकिकव्यवहारत शब्दविशेषस्यैव काव्यपदार्थत्वप्रतीते शिष्टसम्मत-वेदादिलक्षणानुसरणस्य च विनिगमनाहेतो सत्वात्, मुख्यार्थपरित्यागे निमित्तस्याभावात्, "काव्यम् बुद्धम्" इति क्वाचित्कव्यवहारस्य मुख्यार्थबाधाल्लक्षणया उपपादनीयत्वात् शब्दाप्रतिबद्धाया लोकोत्तरचमत्कारव्यञ्जकताया एव काव्यत्वप्रयोजकत्वे लास्याङ्गा-देरपि काव्यत्वापाताच्च । न च 'शब्दस्य काव्यत्वे तद्गतानामेव दोषगुणालङ्कार-ध्वनीना निरूपणस्यौचित्येन भूयसामर्थगताना तेषा निरूपणस्याप्रसक्त्या तन्निरूपणस्यो-न्मत्तप्रलापत्वापत्ति" इति गङ्गाधरशास्त्रिमहाशयोक्त साधु अर्थो रसादिव्यञ्जने शब्द-स्याङ्गमिति शब्दाङ्गभूतार्थगताना दोषगुणालङ्कारध्वनीनामपि निरूपणस्य सुसङ्गत-त्वात् । काव्याङ्गनिरूपण प्रतिज्ञायापि काव्याङ्गसम्बन्धिनामन्येषा विषयाणामपि यथौ-चित्य निरूपणमावश्यकमेव न तु असङ्गतम् । तस्माद् मम्मटोक्त काव्यलक्षणमपि दोष-ग्रहग्रस्तमेव । दोषभिया तददोषावित्यादि लक्षण परित्यज्य लोकोत्तरवर्णनानिपुणकविकर्म इति ग्रन्थकारानभिप्रेतमपि लक्षण यद्याश्रियेत तदापि जगन्नाथोक्तकाव्यलक्षणे वक्तव्या दोषास्तत्रापि सावकाशा एव । एव च भोजोक्तम्—"निर्दोष गुणवत् काव्यमलङ्कारैर-लङ्कृतम् । रसात्मक कवि कुर्वन् कीर्ति प्रीतिं च विन्दति" इत्यपि नेतरव्यावृत्तकाव्य-धर्मनिर्देशपरत्वेन ग्राह्यम्, किन्तु काव्यविशेषधर्माणा वर्णनत्वेनैव उपादेयम् । एतेन **वाग्भटोक्तम्**—"साधुशब्दार्थसन्दर्भ गुणालङ्कारभूषितम् । स्फुटरीतिरसोपेत काव्य कुर्वीत कीर्तये" इति, जयदेवेनोक्तम्—"निर्दोषा लक्षणवती सरीतिगुणभूषणा । सालङ्कार-रसाऽनेकवृत्तिर्वाक् काव्यनामभाक्" इति, अलङ्कारचन्द्रिकाया न्यायवागीशेनोक्तम्—'गुणालङ्कारसयुक्तौ शब्दार्थौ रसभावगौ । नित्यदोषविनिर्मुक्तौ काव्यमित्यभिधीयते" इति, एकावल्या **विद्याधरेणोक्तम्**—"शाणोत्कीर्णमिवोज्ज्वलद्युतिपद बन्धोऽर्धनारीश्वर-श्लाघालङ्घनजाङ्घिको दिवि लतोद्भिन्नेव चार्थोद्गति । किञ्चित्पीडितचन्द्रमण्डल-गलत्पीयूषहृद्यो रसस्तत् किञ्चित् कविकर्ममर्म न पुनर्वाग् डिण्डिमाडम्बर" इति च व्याख्यातम् । काव्यार्णवमन्दरमानिना पण्डितराज**जगन्नाथेन** च "रमणीयार्थप्रतिपादक

तद्भेदान् क्रमेणाह—

(सू० ४) **इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथित ॥ ३**

इदमिति काव्यम्, बुधैर्वैयाकरणै. प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जक शब्दस्य ध्वनिरिति व्यवहार कृत । ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावि वाच्यव्यङ्ग्यव्यञ्जनसमर्थस्य शब्दार्थयुगलस्य ।

शब्द काव्यम्" इति काव्यलक्षण कृत्वा रमणीयताया प्रयोजकाश्च प्रधानव्यङ्ग्यच त्कार, जागरूकगुणीभूतव्यङ्ग्यचमत्कार, अजागरूकगुणीभूतव्यङ्ग्ययुक्तवाच्यचमत्का अर्थचमत्कारोपस्कृतशब्दचमत्कारश्चेति चत्वार परिगणिता । तत्र रसादिरूपासलक्ष्यः व्यङ्ग्यानामेव लोकोत्तरचमत्कारकारित्वमिति तेषामेव रमणीयताप्रयोजकत्वमास्थे नान्येषाम् । तस्माल् लक्षणे रसादिपद 'रस्यते इति रस' इत्यभिप्रायेण रसपदेन भाव-तदाभास-भावोदय-भावसन्धि-भावशबलता सङ्गृह्य रसपदमेव वा निवेश्यम् । ए 'रसप्रतिपादक शब्द काव्यम्' इत्येव काव्यलक्षण कर्तव्य न तु रमणीयार्थप्रतिपा शब्द काव्यमिति । शब्दश्च प्रतीतपदार्थको ध्वनि । एव च रागे नातिव्याप्ति । लक्ष्यः व्यङ्ग्याना तु रसानिरपेक्षाणा किञ्चिच्चमत्कारकारित्वेऽपि नैव काव्यत्वप्रयोजकत्व यु मास्थातुम् । न चैव महाकविसम्प्रदायभङ्गप्रसङ्ग, महाकविभि सर्वस्यापि वाच्यव कजातस्य रसादिपरत्वेनैव योजितत्वात्, एतस्याश्च वस्तुस्थिते "वाच्याना वाचकान यदौचित्येन योजनम् । रसादिविषयेणैतत् कर्म मुख्य महाकवे" [३-३२] इति व महृदयशिरोमणिना आनन्दवर्धनेनापि दृष्टत्वात् । वस्त्वलङ्कारव्यङ्ग्यजलप्रवाह कपिबालादिचरितवर्णनमयाना च महाकविवाक्याना रसमयप्रबन्धमध्यपतितत्वेन रस कारकत्वाच्च रसवत्त्वलाभात् काव्यत्वाक्षते, तदितरेषा च नीरसाना मुक्तकाना पद्यब मात्ररूपाणा काव्यत्वाभावात् । विशृङ्खलगिरा कवीना मुक्तकरूपा प्राचीनान्धपरम्प मात्रमनुसरताम् अन्यैर्गुणै पूजा प्राप्तवता महाकवीना च प्रबन्धान्तर्गडुभूता रसादिता मनपेक्ष्यैवोपनिबद्धा वस्त्वलङ्कारमात्रव्यङ्ग्या चित्रार्था चित्रशब्दाश्च वाचो न का किन्तु काव्याभास एव । काव्याभासेऽपि काव्यत्वव्यवहार पामरसाधारणो न हि सहृ सत्तमस्य विवेचकविचक्षणस्य वा शोभते। विश्वनाथेन तु पूर्वापरसन्दर्भशुद्धिमन्देन निर्गूढ मपि काव्यलक्षण मलिनीकृत्योपस्थापितम्, तच्च प्रव्यक्तीकरिष्यामो यथावसरम् ॥ ३

काव्यसामान्यलक्षणमुक्त्वा तद्विशेपलक्षणानि क्रमेण वक्तुमारभते इत्याह **तद्भेदा**नित्यादिना । **तत्**पद काव्यपरामर्शकम् । **भेद**पद भेदन भेद इति व्युत्प विभागार्थकम्, भिद्यते अनेनेति व्युत्पत्त्या विशेपलक्षणार्थक वा । एव च काव्यविभा आह इति काव्यविशेपलक्षणानि आह इति वाऽर्थ फलित । काव्यविभागश्च उत्तमत दिना तत्समनियतध्वनित्वादिना च । **क्रमेणे**ति इदमुत्तममित्यादिना, अतादृशीत्यादि शब्दचित्र वाच्यचित्रमित्यादिना चेत्यर्थ ।

तत्र उत्तमकाव्यलक्षणमाह—**इदमुत्तम**मित्यादिना । **अतिशायिनि** इति गोकुलनाथा

यथा—

निश्शेषच्युतचन्दन स्तनतट निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेय तनु ।

मैथिलसम्मत पाठो हेय , आर्याजातिभङ्गदोपप्रसङ्गात् । **वाच्याद्** अभिधेयाद् अर्थाद्, वाच्यादित्यस्योपलक्षणत्वाल् लक्षणातात्पर्याभ्या बोध्याच्चार्थाद् **व्यङ्ग्ये** व्यञ्जनावृत्तिगम्येऽर्थे । व्यञ्जनावृत्तिश्च निरूपयिष्यते मूलग्रन्थकृता द्वितीये पञ्चमे चोल्लासे । **अतिशयिनि** अतिशयवति सति विशिष्टे सतीत्यर्थ । **इद** सामान्यलक्षणलक्षित काव्यम् उत्तम काव्य भवतीत्यर्थ । अतिशयश्च अधिकाह्लादजनकत्व-वाक्यार्थविश्रान्तिधामत्वद्विनयेनेति ज्ञेयम् । व्यङ्ग्यान्तरगुणीभावेऽपि वाच्यातिशयित्वमात्रमादायोत्तमत्वव्यवहार इति सूचनाय **वाच्याद्** इत्युक्तमिति नागोजिभट्टस्य मतम् । तन्न, तथा सति "अय स रसनोत्कर्षी०" इत्यादौ [उदा० १५५] शृङ्गारमादायापि उत्तमत्वव्यवहार स्यात् । स्फुटप्रतीयमानस्यैव ध्वनिव्यपदेशनियामकत्वमिति निश्शेषेत्यादौ वाक्यार्थ विश्रान्ते उपक्षीणप्रायानुरणनशब्दन्यायेन अस्फुटमुपलभ्यमान पार्यन्तिक विप्रलम्भशृङ्गारमादाय 'तदन्तिक रन्तु गताऽसि' इति व्यङ्ग्यस्य च न गुणीभूतत्वसम्भावनाऽपि । एतेन वाच्यार्थरसयोरान्तरालिकव्यङ्ग्योत्कर्षानुत्कर्षाभ्या ध्वनिगुणीभूतव्यङ्ग्यत्वव्यवस्थेति च नागोजिभट्टोक्तमपास्तम्, रसादिव्यङ्ग्यमादाय मूलग्रन्थकृता प्रदर्शितस्य ध्वनिकाव्यविभागस्य चान्यथयितुमनुचितत्वाच्च । इदमेव चोत्तम काव्य **बुधैर्ध्वनिः कथित** इत्यर्थ । ध्वनिशब्दस्तु काव्यविवेचनशास्त्रे '**ध्वनतीति ध्वनि**' इति कृत्वा वाचके शब्दे वाच्ये चार्थे, '**ध्वन्यते इति ध्वनि**' इति कृत्वा व्यङ्ग्येऽर्थे, "**ध्वनन ध्वनिः**" इति कृत्वा व्यञ्जनरूपशब्दव्यापारे उक्तप्रकारकध्वनिचतुष्टययोगात् काव्यविशेषे च प्रयुज्यते इति ध्वन्यालोकलोचनटीकायाम् [१।१३, व्यङ्ग्यव्यञ्जकसम्बन्धेत्यादिपरिकरश्लोकवृत्तिव्याख्याने] उक्तम् । 'इद **बुधैर्ध्वनि कथित**' इत्यत्र विधेयप्राधान्यस्य विवक्षितत्वात् 'कथित' इत्यस्य पुस्त्वम् । उद्देश्यप्राधान्यस्य औत्सर्गिकत्वेऽपि उद्देश्यविधेययो प्राधान्याप्राधान्ये विवक्षाधीने अपि भवत "पुनरावृत्त सुवर्णपिण्ड पुनरपरयाऽऽकृत्या युक्त खदिराङ्गारमवर्णे कुण्डले भवत" इति प्रथमाह्निके महाभाष्यकारप्रयोगस्य दर्शनात् ॥ ३ ॥

कारिका विवृणोति—**इदमिती**त्यादिना । बुधै प्रथमैर्विद्वद्भिर्वैयाकरणैर्व्याकरणविद्भि स्फोटादिवैयाकरणसिद्धान्तसन्देहास्पदसूत्रव्याख्या-सस्कृतसाधुपदसङ्ग्रहकारव्याडिप्रभृतिभि । प्रथमे हि विद्वासो वैयाकरणा , अन्वयव्यतिरेकादिन्यायप्रयोगमूलाया विवेचनात्मिकाया विद्वत्ताया वेदवाक्यव्याकरणपरवैयाकरणोपज्ञत्वात्, अन्यासा च लौकिकीना विद्यानाम् अन्वयव्यतिरेकादिन्यायमूलकत्वात् । **प्रधानभूतो**ऽर्थप्रतीतिरूपफलोत्पादकत्वाद् मुख्यो य **स्फोटो** ध्वन्युपहितप्रतिभारूप सूक्ष्मो बुद्धिनिर्ग्राह्य शब्दस्तद्रूप यद् **व्यङ्ग्य**

मिथ्यावादिनि दूति वान्धवजनस्याज्ञातपीडागमे
वापी स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥उदा० २॥
अत्राधमशब्देन तदन्तिकमेव रन्तु गतासीति प्राधान्येन व्यज्यते ।

तद्**व्यञ्जकस्य शब्दस्य** श्रोत्रग्राह्यस्य स्थूलशब्दस्य **ध्वनिरिति व्यवहार. कृतः** "अथवा प्रतीतपदार्थको ध्वनि शब्द इत्युच्यते। शब्द कुरु, मा शब्द कार्षी, शब्दकार्यय माणवक इति ध्वनिं कुर्वन्नेवमुच्यते, तस्माद् ध्वनि शब्द" इत्यादौ महाभाष्ये [प्रथमाह्निके] अन्यत्र चेति भाव । स्फाटाख्यसूक्ष्मशब्दव्यञ्जक स्थूल शब्दो वयाकरणैर्ध्वनिरित्युक्त इत्यर्थ । स्फोटस्वीकरणे च वैयाकरणाना युक्तिरिय सक्षिप्तरूपा—'पुस्तकमस्ति' इत्याद शब्दाज्जायमानोऽर्थबोध कथ भवति ? न तावत् पकारादित एकस्माद् वर्णात्, तथा सति द्वितीयादिवर्णोच्चारणवैयर्थ्यस्य प्रसङ्गात्, नापि पकारादिवर्णसमुदायाद्, वर्णाना-मुच्चरितप्रध्वसित्वेन यौगपद्यस्य असम्भवाद् वर्णसमुदायस्य ग्रहीतुमशक्यत्वात् । तस्मात् प्रथमेन वर्णन अस्फुट किन्तु समग्रमेव व्यञ्जितो द्वितीयेन तत स्फुटतर तृतीयेन ततोऽपि स्फुटतरमित्येव क्रमेण अन्त्येन वर्णन प्रव्यक्त व्यञ्जितः स्फोट' स्फोटविषयाया चरमबुद्धौ अध्यारोपितस्तद्बुद्धिविषयता नीतोऽर्थ बोधयतीति अखण्डचैतन्यरूपोऽपि वाक्यप्रभृति-व्यङ्ग्यत्वेन वाक्यप्रभृत्युपहित स्फोट (स्फुटत्यर्थोऽस्मादिति व्युत्पत्तिमाश्रित्य तथोक्त) सूक्ष्म शब्द स्वीकार्य, तद्व्यञ्जकश्च स्वरवर्णानुपूर्वी विशिष्ट स्थूलो ध्वनिरूप शब्द इति । **ततो** वैयाकरणकृतध्वनिव्यवहारानन्तर **तन्मतानुसारिभि** वैयाकरणमतानुगामिभि **अन्यैरपि** आनन्दवर्धनप्रभृतिभि काव्यविद्याचार्यैर्बुधैरपि **न्यग्भावितम्** अधरीकृतम् अप्रधा-नीकृत **वाच्यम्** अभिधेयोऽर्थो येन तत् तादृश यद् **व्यङ्ग्य** व्यञ्जनावृत्तिगम्योऽर्थ तस्य **व्यञ्जने समर्थं** क्षम तस्य **शब्दार्थयुगलस्य** शब्दार्थद्वितयस्य उपर्युक्तस्फोटव्यञ्जकध्वनिसादृ-श्यमादाय ध्वनिरिति व्यवहार कृत इत्यर्थ ।

यद्यपि उत्तममध्यमाधमकाव्यानि यथास्थान विस्तरेणोदाहरिष्यति तथापि 'सुखग्रह-णविज्ञेय समासव्यासभाषणम्' इति विचार्य सक्षेपेणात्रापि तानि उदाहरति, तत्र ध्वनि-काव्यलक्षणस्य निरूपितत्वात् तद् अत्रोदाहरति—**यथा-निश्शेषच्युते**त्यादि । नायकस्या-नयनाय प्रेषिता त सम्भुज्य आगता 'मया बहुधा प्रसादितोऽपि नागत स इति उक्तवती सखीदूती प्रति विदग्धोत्तमनायिकाया उक्तिरियम् । अमरुककृत पद्यमिदम् । तव **स्तनतट निश्शेष** यथा स्यात् तथा **च्युत** स्खलित **चन्दनं** श्रीखण्डादिवर्णक यस्मात् तत् तथाभूतम् अस्ति । एतच्च स्नानकाले वापीगतबहुलयुवजनत्रपापारवश्यात् स्तनोर्ध्वमूलमुपपीड्य असदेश प्राप्ताभ्या स्वस्तिकीकृतभुजलताभ्या मुहुर्मुहु परामर्शाज्जातमिति सम्भाव्यते । तव **अधरो निर्मृष्टो** निश्शेषेण प्रोञ्छितो **रागो**ऽधररञ्जन यस्य तथाभूतोऽस्ति । एतच्च अधरस्य उन्नतत्वेन सत्यामपि त्वराया बहुलतरजलसम्बन्धाद् दशनशोधनाङ्गुल्यादीना सम्मर्दाच्च जात भवेत । तव **नेत्रे दूर** प्रान्तभागे **अनञ्जने** प्रोञ्छिताञ्जने स्त । एतच्च स्नानकाले त्वरया नेत्रपुटयो सम्यगप्रक्षालनेन प्रान्तभागस्यैव मुखप्रक्षालने सजलहस्त-

सम्पर्केण जातमिति प्रतिभाति । **तव इय** दृश्यमाना **तनु** मूर्ति **तन्वी** क्षामा **पुलकिता** पुलका रोमाञ्चा सञ्जाता यस्या सा तथाभूताऽस्ति । स्नानश्रमात् शैत्यप्रयुक्तसङ्कोचाच्च क्षामता, शीतात् पुलकितत्वमिति सम्भाव्यते । तस्माद् अयि **मिथ्यावादिनि** मया बहुधा प्रमादितोऽपि नागत स इत्यादिनानाविधमिथ्यार्थकवचनप्रयोगशीले । **बान्धवजनस्य** बध्नाति स्नेहेनेति बन्धु , बन्धुरेव बान्धव "प्रज्ञादिभ्यश्च" [५-४-३८] इति पाणिनि-व्याकरणात् तस्य सखीजनस्येत्यर्थ । **अज्ञात पीडाया** विरहव्यथाया **आगमः** प्राप्तिर्यया तथाविधे स्वार्थैकपरायणे स्वस्नानकालातिक्रमासहे हे दूति सखीभाव परित्यज्य दूतीभाव-मात्र श्रितवति, त्वम् **इतो** मदन्तिकात् **स्नातु** स्नानार्थ **वापी** दीर्घिका **गताऽसि तस्य अधमस्य** विस्मृतप्रेमतया वियोगदु खस्य दातु **अन्तिक न पुनः** नैव गताऽसीति वाच्योऽर्थ ॥उदा० २॥

तत्राधमपदमुख्याना निश्शेषच्युतचन्दनमित्यादीना वक्तृबोद्धव्यादिवैशिष्ट्यबलादागत व्यङ्ग्यमाह—**अत्राधमे**त्यादिना । **प्राधान्येन** इत्यस्य **इति** पदेन अधमपदेन च सह काका-क्षिगोलकन्यायेन अन्वयस्य स्वीकारे तदन्तिक रन्तु गताऽसीति व्यङ्ग्यस्य वाच्याधिक-चमत्कारकारित्वयुक्तत्वेन वाक्यार्थविश्रान्तिधामत्वेन च प्रधानतया व्यक्तिरिति, व्यञ्जकेषु प्रधानतया अधमपदस्य व्यञ्जकत्वमिति चार्थ फलति । अधमपदप्राधान्यञ्च अधमपदस्य वाचकत्वे यत् तत्पदप्रवृत्तिनिमित्त दु खदातृत्वम् अपराधान्तरसाधारणदु खदातृत्वाकारेण स्थित तदेव तस्य व्यञ्जकत्वे विपक्षसम्भोगनिमित्तकदु खदातृत्वाकारेण पर्यवस्यति इति तस्य मुख्यव्यङ्ग्यव्यञ्जकत्वात्, तस्यातिपरुषत्वात् साभूयत्वाच्च वाच्यार्थ झटित्यति-क्रम्य व्यङ्ग्यार्थबोधस्य प्रवर्तकत्वात्, इतरपदानपेक्षयाऽपि व्यङ्ग्यबोधनक्षमत्वाच्च । निश्शेषच्युतचन्दनमित्यादीना पदानामर्थाना चन्दनच्यवनादीना तु स्नानकार्यतया निबद्धाना सम्भवेन तथात्वेन प्रतिसन्धाने सति तद्व्यञ्जनद्वारा तत्साहित्येनैव सम्भोगप्रत्यायकत्वमिति निश्शेषेत्यादिपदाना सम्भोग-व्यञ्जने अप्राधान्यम् । न चात्र विपरीतलक्षणयैव तदन्तिक रन्तु गतासीत्यर्थस्योपलब्धि , निश्शेषच्युतचन्दन स्तनतटम् इत्यादीना वाक्यार्थाना साधारण्याद् मुख्यार्थस्य बाधस्या-भावात् तात्पर्यार्थस्य झटिति अस्फुरणाच्च लक्षणावसराभावात् । न च नीचकर्मकारित्व-स्य अधमपदवाच्यस्य साधनायैवात्यावश्यक व्यङ्ग्यमिति तस्य गुणीभूतत्वमाशङ्क्यम्, दूतीप्रेषणसापेक्षत्वेन विस्मृतानुरागतया वियोगदु खदायित्वेनैव नायकस्याधमत्वस्य वाच्यार्थतया विवक्षितस्य सुसिद्धत्वात् ।

एवञ्च स्तनतटे एव मर्दनाधिक्यात् स्तनसन्ध्यादौ नायककरपरामर्शायोगाच्च ते स्तनतटमेव निश्शेषच्युतचन्दनम्, अधरस्यैव चुम्बनीयत्वेन बहुशश्चुम्बितत्वात् ते अधर एव प्रोञ्छितराग , नयनप्रान्तयोरेव चुम्बनीयत्वेन बहुधा चुम्बितत्वात् ते नयनप्रान्तभागौ एव लुलितभक्तिकाञ्जनयुक्तौ, शृङ्गारक्रीडाश्रमात् तन्वी तत्कृतात् प्रहर्षात् त्वयाऽधु-नाऽपि गूढमनुभूयमानात् पुलकिता च तव तनु , स च मत्प्रिय प्रमदालताभ्रमर , तस्मात्

(सू० ५) **अतादृशि गुणीभूतव्यङ्ग्य व्यङ्ग्ये तु मध्यमम् ।**

अतादृशि वाच्यादनतिशयिनि ।

यथा—

ग्रामतरुण तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरा मलिना मुखच्छाया ॥ उदा० ३ ॥

त्व तदन्तिकमेव रन्तु गतासीति व्यङ्ग्योऽर्थ । अयञ्चार्थो वाच्यार्थातिशयीति सहृदय-हृदयसाक्षिकम् ॥ ४ ॥

मध्यमकाव्यलक्षणमाह—**अतादृशीत्यादि** । **व्यङ्ग्ये** झटिति प्रतीतिपथमागत्य चमत्कारकारिणि (न तु विलम्बेन स्फुटतर-चमत्कारान्तरव्यवहितत्वेन च प्रतीतिविषयमवतीर्य यत्किञ्चिच्चमत्कारकारके) व्यङ्ग्यार्थे **अतादृशि** वाच्यानतिशयिनि सति तु इद काव्य-सामान्यलक्षणाक्रान्त शब्दार्थयुगल **मध्यम** काव्य भवतीत्यर्थ । इद च **गुणीभूतव्यङ्ग्यम्** इति **बुधैः कथितम्** इति लिङ्गविपरिणामेन पूर्वसूत्रोक्तम् अनुषज्यते । गुणीभूत पराङ्ग-तयाऽन्यथाऽपि वा वाच्यानतिशयिता गत व्यङ्ग्य यस्मिन् तद् गुणीभूतव्यङ्ग्य काव्य-मित्यर्थ । अतादृशि इति पद व्याकरोति—**अतादृशि वाच्यादनतिशयिनि** इति । वाच्याद् अनतिशयश्च व्यङ्ग्यस्य वाच्यचमत्कारापेक्षया अधिकस्य चमत्कारस्य अकरणाद् वाक्यार्थ-विश्रान्त्यधामत्वाद् वा । एव च वाच्यचमत्काराधिकचमत्कारानाधायकत्व-वाक्यार्थविश्रा-न्त्यधमत्वान्यतरवत्-प्रव्यक्ततरचमत्कारान्तराव्यवहितचमत्कारकव्यङ्ग्ययुक्तत्व गुणीभूत-व्यङ्ग्यत्वमिति मध्यमकाव्यलक्षण फलितम् । चित्रे व्यङ्ग्यस्य सत्त्वेऽपि तस्य तादृशचमत्का-रानाधायकत्वान् न तत्रातिव्याप्ति । एव च गुणीभूतव्यङ्ग्यस्य चित्रस्य च विविक्तो विषय । तथा च सति "यत् तु अतादृशि गुणीभूतव्यङ्ग्यम् इत्यादिकाव्यप्रकाशगतलक्षणे चित्रान्यत्व टीकाकारैर्दत्त तन्न पर्यायोक्तसमासोक्त्यादिप्रधानकाव्येषु अव्याप्त्यापत्ते । तेषा गुणीभूतव्यङ्ग्यतायाश्चित्रतायाश्च सर्वालङ्कारिकसम्मतत्वात्" इति रसगङ्गा-धरकारेण यद् उक्तम्, तदसत्, पर्यायोक्तसमासोक्त्यादेश्चित्रत्वमेव न गुणीभूतव्यङ्ग्य-त्वमिति । यत्र हि व्यङ्ग्य गुणीभूतमपि सत् साक्षादेव चमत्कारकारक स गुणीभूत-व्यङ्ग्यस्य विषय, यत्र तु व्यङ्ग्य वाच्यार्थोपस्कारद्वारा चमत्कारकरणे वाच्यस्य सहा-यकमेव न तु साक्षात् स्वयमेव चमत्कारकारक तत् पर्यायोक्तसमासोक्त्यादिस्थल चित्रस्यैव विषय, चमत्कारवैविध्यतारतम्यादिनिबन्धनो हि विषयविभाग, तस्माद् गुणीभूतव्यङ्ग्यस्य विषयश्चित्रविषयाद् विविक्त एवेति कुशाग्रधीभिर्विज्ञेयम् । एवञ्च गुणीभूतव्यङ्ग्यलक्षणे चित्रान्यत्व टीकाकारैर्दत्त तन्नासाधु । गुणीभूतव्यङ्ग्यनिरूपणा-वसरे अलङ्कारव्याख्यानावसरे च गुणीभूतव्यङ्ग्यकाव्य-चित्रकाव्यविषयविभाग प्रव्यक्त-तर प्रदर्शयिष्याम ।

सुखग्राह्यत्वाय गुणीभूतव्यङ्ग्य सक्षेपेणोदाहरति—**ग्रामतरुणम्** इत्यादि । स्वयमेव सङ्केत कृत्वा गृहकर्मपरायणतया कथञ्चित् त विस्मृत्य सङ्केतस्थानमगताया परकान्त-

अत्र वञ्जुललतागृहे दत्तासङ्केता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ॥

(सू० ६) **शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ॥ ४ ॥**

चित्रमिति गुणालङ्कारयुक्तम् । अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम् । अवरम् अधमम् ।

सङ्केतलुप्तया युवत्या स्वकीयसङ्केतस्थानगमनस्य ज्ञापनाय सङ्केतस्थानस्थाशोकमञ्जरीमादाय उपगतं युवकं दृष्ट्वा विषण्णायाः वर्णनमिदम् । रुद्रटालङ्कारे उदाहृता गाथेयम् । नूतनाशोकमञ्जरीयुक्तहस्तं ग्रामीणयुवकं चञ्चलनयनव्यापारेण वारं वारं विलोकयन्त्याः ग्रामीणायाः युवत्याः (वधूट्याः) मुखकान्तिः अत्यन्तं मलिना (दिवसधूसरचन्द्रकान्तिसदृशी) भवतीत्यर्थः ॥उदा० ३॥

गुणीभूतव्यङ्ग्यं प्रदर्शयति—**अत्र वञ्जुले**त्यादिना । गुणीभूतत्वमुपपादयति-**तदपेक्षये**-त्यादिना । वृत्त्युक्तव्यङ्ग्यापेक्षया **वाच्यस्य** मुखच्छायामालिन्यातिशयस्यैव **चमत्कारित्वाद्** अधिकाह्लादजनकत्वादित्यर्थः । मुखच्छायामालिन्यातिशयरूपवाच्येनैकान्ततः आकृष्टं सहृदयहृदयं विप्रलम्भाभासास्वादं नानुधावतीति ध्वनित्वमनितयाऽत्रापि विप्रलम्भाभासमादाय ध्वनित्वमास्थातुं न युक्तम्, प्रधानेन व्यपदेशा भवन्तीति न्यायाच्च । न चेदं वाच्यं विप्रलम्भाभासे एव विश्रान्तम्, केवलाया नायिकायाः सङ्केतभङ्गस्य अकर्तव्यतायाः बुद्धौ वाच्यस्य विश्रान्तेः सम्भवादिति बोध्यम् ॥ ५ ॥

अधमकाव्यलक्षणं विभागप्रतिपादनमुखेनाह—**शब्दचित्र**मित्यादिना । **अव्यङ्ग्यं** तु इदं काव्यसामान्यलक्षणयुक्तं शब्दार्थयुगलम् **अवरं** काव्यं **स्मृतम्** मतमित्यर्थः । अत्र स्मृतमिति प्रयोगो न मनोहरः, अस्य ग्रन्थस्य स्मृतित्वाभावात् । मतम् इति सुवचम् । तच्च **शब्दचित्रं वाच्यचित्रम् (अर्थचित्रम्)** इति द्विधा भवतीत्यर्थः । **चित्र**मित्यस्योभयत्रानुगतत्वाद् इदम् अधमं काव्यं बुधैश्चित्रं कथितमित्यर्थः प्रतीयते ॥४॥

अधमकाव्यलक्षणफलितार्थं भावमुखेन स्पष्टीकुर्वन् चित्रपदार्थमाह—**चित्रमिति गुणालङ्कारयुक्तम्** इति । अत्र गुणपदं प्रातिभासिकगुणपरम्, एवं च माधुर्याद्यन्यतमगुणव्यञ्जकवर्णसजातीयैर्वर्णैरलङ्कारैश्च युक्तमिति फलितोऽर्थः । अस्मदध्यापकश्रीयुतजयमन्तमिश्रमहाशयस्य तु "यथा विचित्रैरलङ्कारैरलङ्कृतायाः वलीपलितखालित्यपरीतायाः जरत्याश्चित्ताकर्षकत्वं यद्यप्यलङ्कारवैचित्र्यनिबन्धनं तथापि आत्मा तद्गुणाश्च तां न व्यभिचरन्ति तथैव अधमेऽपि काव्ये चमत्कारे अलङ्कारनिबन्धने सत्यपि रसाः तद्गुणाश्च तद् न व्यभिचरन्तीति गुणपदं मुख्यगुणपरत्वेनैव व्याख्यातुं युक्तम्, एवञ्च काव्यलक्षणेऽपि गुणपदं रसोपलक्षकत्वेनैव ग्राह्यम्" इति मतम् । अस्माकन्तु न तत्र मनो रमते । मम्मटस्य यदि तादृशोऽभिप्रायोऽभविष्यत् तर्हि रसपदमेव काव्यलक्षणेऽग्रहिष्यत् स इति । काव्ये रसादेः सत्त्वं हि रसादिप्रत्यायकत्वमेव, एवं च यत्काव्यकृतोद्रिक्ततमचमत्कारक्षणे रसादिप्रतीति-

यथा—

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाऽह्नाय वः ।
भिद्यादुद्यदुदारदर्दुरदरी दीर्घाऽदरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥उदा० ४॥

नास्ति तत्र रसादिरनभिनत्वमेव न्याय्यम् शब्दार्थयुगलस्य काव्यत्वे तादृशचमत्कारशालि-कत्वस्यैव बीजत्वात्, पार्यन्तिकी परिदुर्बला च रसादिप्रतीतिरगणेया एवेति च । काव्ये यथाकथञ्चित् सर्वत्र रसादिव्यङ्ग्यस्य सत्त्वेन, अवरत पार्यन्तिकस्य परिदुर्बलस्यापि रसा-दिव्यङ्ग्यस्य अभावे तु शब्दार्थयुगलस्य प्रहेलिकात्वापाताद् वार्तात्वापाताद् वा असम्भवि इदम् अवरकाव्यलक्षणमित्याशङ्का निराकर्तुमाह–**अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम्** इति । ननु इद पञ्चमोल्लासे प्रतिपाद्येन अस्फुटव्यङ्ग्यरूपेण गुणीभूतव्यङ्ग्येनैव गतार्थ-मिति चेन् न, तत्र अस्फुटव्यङ्ग्यरूपे गुणीभूतव्यङ्ग्ये व्यङ्ग्यस्य उद्रिक्ततरचमत्कारान्त-रेण अनाच्छादितत्वात् क्लिष्टस्यापि तस्य चमत्कारकारकत्वमेव, अत्र तु व्यङ्ग्यम् उद्रिक्ततरशब्दार्थचमत्कारान्यतरेणाभिभूतत्वाच्चमत्कारमपि न जनयतीति अत्र व्यङ्ग्यस्य अस्फुटतरत्व ज्ञेयम् । **अव्यङ्ग्य**मित्यस्य अस्फुटव्यङ्ग्यमिति अस्फुटतरव्यङ्ग्यमिति वाऽर्थमनुक्त्वा स्फुटप्रतीयमानार्थरहितमित्युक्ति सर्वथा व्यङ्ग्यप्रतीतिरहितस्य शब्दार्थ-चमत्कारमात्रसारस्य शब्दार्थयुगलस्यापि काव्यत्वेन सङ्ग्रहाय, तत्रापि स्फुटप्रतीयमानार्थ-राहित्यस्य सत्त्वात् । न चेद दुर्विज्ञानोत्तरप्रश्नवाक्यरूपप्रहेलिकात्मकमेव प्रहेलिकातिरिक्त-स्यापि 'मध्येव्योम स्फुरति' इत्यादेरनुपदमुल्लेखिष्यमाणस्य शब्दार्थचमत्कारमात्रसारस्य काव्यस्याऽपि सत्त्वात् ।

सुखग्राह्यत्वाय सक्षेपेणात्राऽपि चित्रकाव्यमुदाहरति । तत्र पूर्व शब्दचित्रमुदाहरति— **स्वच्छन्दोच्छल**दित्यादि । **स्वच्छन्द** स्ववश यथा स्यात् तथा **उच्छलद्** उद्गच्छत् **अच्छ** निर्मल **कच्छकुहरेषु** जलप्रायतटप्रदेशस्थतरङ्गकृतबिलेषु **छातेतरद्** दुर्बलेतरदर्थाद् वेगेन बलवद् यद् **अम्बु** जल तस्य **छटा** लहरी तया **मूर्छन्** विनश्यन् **मोहो**ऽज्ञान येषा ते **महर्षय-**स्तैर्**हर्षे**ण सहर्ष **विहिते** कृते **स्नानाह्निके** स्नान च आह्निक दैनिकमन्यत कर्म च यस्या सा, स्नानस्यापि आह्निकत्वेऽपि प्राधान्यात् पृथग् ग्रहणम् । एतावता मन्दाकिन्या महर्षिसे-व्यत्वेन तीर्थान्तराद् व्यतिरेका दर्शित । **उद्यन्त** उद्गच्छन्त **उदारा** महान्तो **दर्दुरा** भेका यासु ता तादृश्यो **दर्य** कन्दरा यस्या सा, **दीर्घा** लम्बा **अदरिद्रा** परिणाहवत्त्वेन शाखा-सम्पत्त्या च अकृशाश्च ते **द्रुमास्**तेषा **द्रोहो** मदन्योऽपि दीर्घ इति अमर्षेणेव पिपातयिषा तस्य **उद्रेको** वृद्धिस्तेन **महान्त** उन्नता **ऊर्मय**स्तरङ्गास्तैर्**मेदुरो** निबिडो **मदो** यस्या सा **मन्दाकिनी** गङ्गा वो युष्माक **मन्दता** दुर्भाग्यम् अह्नाय झटिति भिद्याद् उच्छिद्याद् विना-श्यादित्याशी ॥ उदा० ४ ॥

विनिर्गतं मानदमात्ममन्दिराद्
भवत्युपश्रुत्य यदृच्छयापि यम् ।

अत्र छकारस्य हकार-रेफ-पकाराणां हकारनकारयोः दकारस्य नकारदकारयोश्च अनुप्रासः शब्दालङ्कारः । शब्दाश्रयोऽलङ्कारः शब्दालङ्कारः । आश्रयाश्रयित्वनिरूपणं च अन्वयव्यतिरेकनियमाख्यया परीक्षणेन । एवञ्च शब्दान्वयव्यतिरेकानुविधायी अलङ्कारः इति निष्कर्षः । समीक्ष्य विनिवेशितो हि शब्दालङ्कारः सत्युपकार्ये रसादौ शब्दशोभाकरणेन परम्परया रसादिकमुपकरोति, असति तु तस्मिन् केवलं शब्दे एवातिशयमादधाति । असमीक्ष्य विनिवेशितस्तु सन्तमपि रसादिकमाच्छाद्य स्वप्रधानतया भासते यथात्रैवोदाहरणे । यद्यपि अत्र कवेर्मन्दाकिनीविषयका रत्याख्यो भावः कथञ्चित् प्रतीतिविषयमागच्छति तथापि कवेरनुप्रासमात्रे उद्यमस्य दर्शनात् कविहृदयगतस्यापि तस्योद्यमान्तराभिभूतत्वात्, उद्रिक्तालङ्कारचमत्कारेण सहृदयचित्तस्य च हठादाकृष्टत्वात् तच्चित्तेऽपि स भावः उद्रिक्ततरे अलङ्कारचमत्कारे विश्रान्तः एव परिदुर्बलतया प्रतीतिविषयमवतरतीति च एतत्काव्यकृतोद्रिक्तचमत्कारस्य भावात्मकत्वस्याभावात् भावस्यात्रागणेयत्वम् बोध्यम् ।

वाच्य (वाच्यार्थ) चित्रमुदाहरति—**विनिर्गत**मित्यादि । भर्तृमेण्ठविरचिते कल्हणकृतकश्मीरराजतरङ्गिण्याम् [२।२६०-६२] उल्लिखिते हयग्रीववधाख्ये महाकाव्ये हयग्रीववर्णनप्रस्तावे पद्यमिदमिति सम्भाव्यते । **मानदः** शत्रूणां मानं द्यति खण्डयतीति मित्रेभ्यो मानं ददातीति वा मानदस्तम् इमं हयग्रीवम्, **आत्मनो मन्दिरं** तस्मात् स्वगृहाद् न तु नगराद् दुर्गाद्वा **यदृच्छया** निमित्तशून्यया इच्छया **अपि**, यत्किञ्चिद्रूपा हेतुशून्या इच्छा इत्यर्थे यदृच्छा इति पदम् मयूरव्यंसकाद्याश्रयणेन पृषोदरादिगणाश्रयणेन च साधु, **विनिर्गतं** निस्सृतं न तु प्रस्थितम् **उपश्रुत्य** कथञ्चित् श्रुत्वा न तु प्रामाणिकाज्जनाद् दूताद् वा श्रुत्वा **ससम्भ्रमः** त्वरायुक्तः इन्द्रस्तेन दौवारिकाह्वानादिविलम्बासहत्वात् स्वयमेव **द्रुतम्** क्षिप्रम् **पातिता** यथाकथञ्चिद् शैघ्र्यान् निक्षिप्ता न तु सम्यङ् निवेशिता **अर्गला** कवाटविष्कम्भः काष्ठविशेषो यस्याः सा तथाविधा **अमरावती** इन्द्रपुरी **भिया** भीत्या **निमीलिताक्षी** सङ्कुचिताक्षी **इव** भवतीत्यर्थः । जगत्या छन्दसि वंशस्थं वृत्तमिदम्, न तु वंशस्थं छन्द इति वक्तव्यम् प्रथमोदाहरणव्याख्यानोक्तनयात् । वंशस्थलक्षणं च "जतौ तु वंशस्थमुदीरितं जरौ" इति ।। उदा० ५ ।।

अत्र निमीलिताक्षीव भवतीति उत्प्रेक्षा वाच्यार्थालङ्कारः । अर्थाश्रितश्चमत्कारविशिष्टः साधर्म्यादिरर्थालङ्कारः । एवञ्च वाक्यार्थोपस्कारको वाक्यान्तर्गतोऽर्थविशेष एव अर्थालङ्कारः । स्वरूपसम्बन्धेन सम्बन्धान्तरेण वाऽपि अर्थाश्रितोऽलङ्कारोऽर्थालङ्कारः इति बोध्यम् । अत्रापि आश्रयाश्रयित्वनिरूपणं तु अन्वयव्यतिरेकपरीक्षणेनैव । एवञ्च अर्थान्वयव्यतिरेकानुविधायी अलङ्कारोऽर्थालङ्कारः इति निष्कर्षः । अधिकं दशमे उल्लासे अर्थालङ्कारनिरूपणान्ते वृत्तिव्याख्याने वक्ष्यामः । तादृशस्यार्थस्या-

ससम्भ्रमेन्द्रद्रुतपातितार्गला
निर्मीलिताक्षीव भियाऽमरावती ।। उदा० ५ ।।

इति काव्यप्रकाशे काव्य-प्रयोजन-कारण-स्वरूप-तद्विशेषनिरूपणो नाम
प्रथम उल्लास ।।१।।

लङ्कारत्व च वाक्यार्थोपस्करणपूर्वकविभावशोभाकरणद्वारा रसस्योपकरणाद् विचित्रत्वादेव वा । अर्थालङ्कारो हि विभावादे रसाद्यङ्गस्योत्कर्षमादधान एव रसादीनुपकरोति । यत्र तु चमत्कारहेतु रसादिर्नास्ति तत्र उत्प्रेक्षाद्यात्मकवाक्याना स्वरूपमात्रेण अलङ्कारीभूतोत्प्रेक्षाद्यात्मकवाक्येन तुल्यत्वात् स्वरूपवैचित्र्यादेव वाऽर्थालङ्कारत्वव्यवहार । यत्रापि असमीक्ष्य निवेशितमुत्प्रेक्षाद्यात्मक वाक्य सन्तमपि रसादिकमभिभूय स्वप्रधानतया तिष्ठति तत्रापि तस्यार्थालङ्कारत्वेन व्यवहार स्वरूपवैचित्र्यादेव, यथात्रैवोदाहरणे । अत्र रसाद्यङ्गत्वमतिक्रम्य हठात् सहृदयहृदयाकर्षणेन स्वप्रधानत्व प्राप्ताया उत्प्रेक्षाया एव प्राधान्येनास्वाद्यत्वाद् अर्थचित्रमिद काव्यम् । हयग्रीवानुभावातिशय इन्द्रे भयानकाभासो वा उत्प्रेक्षाकृते चमत्कारे विश्रान्ते एव मन्द प्रतीतिविषयमवतरन् न रसनीयत्व प्राप्नोति इति न च काव्यव्यपदेशविशेषहेतुतामारोहतीति न ध्वनित्वमस्य काव्यस्य न वा गुणीभूतव्यङ्ग्यत्वम् । गोविन्दठक्कुरस्तु सरसत्वाश्रयणेनेदमुदाहरण प्रत्याख्याय "मध्येव्योम स्फुरति सुमनोधन्वन श्यानचक्र मन्दाकिन्या विपुलपुलिनाभ्यागतो राजहस । अह्नश्छेदे त्वरितचरणन्यासमाकाशलक्ष्म्या ससर्पन्त्या श्रवणपतित पुण्डरीक मृगाङ्क ।" इत्युदाहरणमुपन्यास्थत् । श्यानचक्र शाणचक्र शस्त्रतैक्ष्ण्यसम्पादक पाषाणयन्त्रम् । नरसिंहठक्कुरस्तु वध्यत्वेनोपनिबध्यमाने हयग्रीवे वीररसस्य भावस्य वा अनवभासाद् युक्तमेव वृत्तिकृतोक्तमुदाहरणमिति मन्यते । प्रबन्धमध्ये पाठे तु अस्य पद्यस्य रसमयता रसाभासमयता भावमयता वाऽपि भवेदेव एकक तु पठित वाच्यचमत्कारप्रधानमेवेद पद्यम्, अत्र वाक्यस्य उत्प्रेक्षापरत्वात्, उत्प्रेक्षायामेव वाक्यार्थस्य विश्रान्तत्वाच्च । यद्यपि रसमयप्रबन्धमध्यगतत्वेन सरस काव्यम् अवमत्वेन उदाहर्तुं न युक्त तथापि एककाभिप्रायेणैवेदमुदाहृतमत्रेति सम्भाव्यते ।। ६ ।।

इति श्रीहिमवत्खण्डस्थनेपालदेशमध्यवर्तित्रितुङ्गाचलाङ्कित-
जनपदान्तर्गत-ताम्रकूटग्रामाभिजन-नारनाथि-गाङ्गेय-
कौण्डिन्न्यायनाऽऽचार्यशिवराजकृतौ
हैमवत्या काव्यप्रकाशविवृतौ प्रथम उल्लास ।।१।।

अथ द्वितीय उल्लासः

क्रमेण शब्दार्थयोः स्वरूपमाह—

(सूत्र० ७) स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।

अत्रेति काव्ये । एषां स्वरूपं वक्ष्यते ।

प्रथमे उल्लासे तददोषावित्यादि काव्यलक्षणं निरूपितम्, काव्यलक्षणमेव चास्य ग्रन्थस्य प्रतिपाद्यम्, तच्च प्रतिपादितमेव, अतः परस्य ग्रन्थस्य किमुत्थानम् ? अत्रोच्यते— वाक्यार्थबुद्धेः पदार्थबुद्धयधीनत्वात् उक्तकाव्यलक्षणवाक्यघटकपदार्थव्युत्पादनायैव अतः परस्य ग्रन्थस्य प्रवृत्तिरिति । तत्र काव्यलक्षणवाक्ये शब्दपदं विशेष्यत्वेन प्रथममुपात्तत्वात् प्रधानम्, अतस्तदेव प्रथमं विवृणोति द्वितीये उल्लासे । शब्दस्य सामान्यलक्षणं च "**प्रतीतपदार्थको लोके ध्वनिः शब्दः**" इति महाभाष्ये प्रथमे आह्निके उक्तम् । तच्च ध्वनिस्फोटयोर्भेदं सामान्ये लौकिकानां व्यवहारेऽप्रसिद्धमवधार्य ध्वनिस्फोटयोरभेदमादाय प्रवृत्तम् । स्फोटरूपशब्दलक्षणन्तु "श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः" इति महाभाष्ये एव पस्पशाह्निके उक्तम् । श्रोत्रे उपलभ्य अन्तिमवर्णेन प्रव्यक्तमभिव्यज्य चरमबुद्धौ अध्यारोपितः चरमबुद्धिनिर्ग्राह्यः प्रयोगेण (कादिश्रुत्या) अभिज्वलितः (व्यञ्जयित्वा उपधाय स्वरूपमर्पितः कृतः) वस्तुतस्तु आकाश इव व्यापकश्चिद्रूपः एक एव सन्नपि उपाधिभेदेन नानारूपतां प्राप्तः (अर्थविबोधकः) स्फोटात्मकः शब्दः इति तदर्थः । अत्र च शास्त्रे ध्वनिस्फोटयोर्भेदमनादृत्य 'लोके प्रतीतपदार्थको ध्वनिः शब्दः' इत्येव व्यवह्रियते । तदिदं शब्दलक्षणं लौकिकानामपि प्रसिद्धमिति अनेन ग्रन्थकारेण उपेक्षितम् । शब्दपदानन्तरं च काव्यलक्षणवाक्ये अर्थपदं प्रधानम् । **अर्थश्चात्र शब्दप्रतिपाद्यः शब्दवृत्तिजन्यज्ञानविषयो वा** । तस्माद् द्वितीयोल्लासे शब्दार्थौ व्याचिकीर्षुः द्वितीयोल्लासप्रतिपाद्यमाह—**क्रमेणे**त्यादिना । **क्रमेण** काव्यलक्षणवाक्ये आश्रितं क्रममनुसृत्य पूर्वं शब्दस्य ततोऽर्थस्य **स्वरूपमाह** ग्रन्थकारः इत्यर्थः ।

शब्दसामान्यलक्षणं पूर्वोक्तहेतुनाऽवधीर्य शब्दप्रकारानाह—**स्याद् वाचक** इत्यादिना । विभागश्चायं शब्दस्योपाधिकृत एव एकस्यैव मैत्रस्य पिण्डाभेदेऽपि पाचनपाठनादिकृतः पाचकपाठकादिरूपो भेद इव । तथाहि गङ्गायां घोषः इत्यादौ गङ्गादिशब्दस्य श्रुतिविशेषानुपूर्वीरूपस्याभेदेऽपि वाचन-लक्षण-व्यञ्जनरूपोपाधिकृतो वाचक-लक्षक-व्यञ्जकरूपो भेदो दृश्यते तं तमर्थं प्रति । तत्र च लक्षकव्यञ्जकयोः वाचकः उपजीव्यः व्यञ्जकस्य लक्षकोऽपि उपजीव्यः क्वचिद् इति क्रमेण तेषां ग्रहणम् । विभागादेव त्रिविधत्वे सिद्धे न्यूनाधिकसङ्ख्याव्यवच्छेदाय **त्रिधेति** । एतेन गौण्या लक्षणायां करिष्यमाणोऽन्तर्भावो व्यञ्जनाया अनपलपनीयत्वं च सूचिते ।

अत्रेति पदस्य कृत्यं दर्शयति—**अत्रेति काव्ये** इति । व्यञ्जकशब्दो वैशेषिकमतादौ न स्वीक्रियते इति न तत्र शब्दस्य त्रैविध्यं किन्तु काव्ये तथेत्यर्थः । विभागज्ञानानन्तरं लक्षणस्य जिज्ञासा तीव्रा भवति अतस्तां कालसहां कर्तुमाह—**एषा**मित्यादि ॥ ७ ॥

(सू० ८) **वाच्यादयस्तदर्था स्युः**

वाच्य-लक्ष्य-व्यङ्ग्या ।

(सू० ९) **तात्पर्यार्थोऽपि केषुचित् ॥ ५ ॥**

आकाङ्क्षायोग्यतासन्निधिवशाद् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम् ।

तेषां शब्दानामर्थान् प्रदर्शयति—**वाच्यादय** इत्यादिना । आदिपदसङ्गृहीतान् प्रदर्शयितुमाह—**वाच्यलक्ष्यव्यङ्ग्या** इति ॥ ८ ॥

अत्र च शब्दः पदरूपो वाक्यरूपश्च अर्थोऽपि पदार्थरूपो वाक्यार्थरूपश्च, तत्र पदपदार्थयोस्त्रैविध्यमेव, वाक्यार्थस्य तु त्वदुक्तातिरिक्तोऽपि प्रकारो दृश्यते अतः कथं तस्य त्रैविध्यमिति शङ्कां परिहरन्नाह—**तात्पर्यार्थोऽपी**त्यादि । तात्पर्याख्यवृत्तिप्रतिपाद्योऽपि अर्थः केषुचित् तन्त्रेषु स्वीकृतोऽस्तीत्यर्थः । तात्पर्यार्थस्य प्रतितन्त्रसिद्धान्तत्वात् तमवधीर्य त्रिधेत्युक्तमिति भावः । सिद्धान्तश्च "सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः" (१।१।२८) "समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः" (१।१।२९), "यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः" (१।१।३०) "अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः" (१।१।३१) इति गोतमेन चतुर्धा न्यायसूत्रे विभक्तः ।

सूत्रोक्तं प्रतितन्त्रसिद्धान्तं विवृणोति—**आकाङ्क्षे**त्यादिना । वाक्यघटकपदार्थानां मध्ये एकस्य ज्ञाने जाते अन्यस्य प्रतिपत्तुरितरजिज्ञासायोग्यत्वम् **आकाङ्क्षा** । तात्पर्यविषयीभूते पदार्थानां परस्परसम्बन्धे बाधाभावो **योग्यता** । प्रतिपत्तृबुद्धौ परस्परान्वयविरोधिव्यवधानशून्यतया पदार्थानामुपस्थितिः **सन्निधिः** । आकाङ्क्षाभावे तात्पर्यार्थो न समुल्लसति, यथा—गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्यादौ । योग्यताभावे तात्पर्यार्थो न परिनिस्तिष्ठति यथा वह्निना सिञ्चतीत्यादौ । सन्निध्यभावेऽपि तात्पर्यार्थसमुल्लासो न भवति यथा प्रातर् गामित्युच्चार्य सायम् आनयेत्युच्चारणे । तस्मादुच्यते—**आकाङ्क्षायोग्यतासन्निधिवशाद्** इति । **वशाद्** आयत्तत्वात् कारणाद् वेत्यर्थः । **वक्ष्यमाणस्वरूपाणां** द्वादशे सूत्रे वक्ष्यमाणानां जात्यादिरूपाणां **पदार्थानां** पदवृत्तिविषयाणाम् अर्थानां **समन्वये** परस्परसम्बन्धयोग्यतया प्रतिपत्तृबुद्धौ साहचर्ये सति **तात्पर्यार्थः** तात्पर्याख्यवृत्तिबोध्योऽर्थः, **विशेषः** संसर्गः (पदार्थसम्बन्धरूपः) एव वपुः स्वरूपं यस्य सः **अपदार्थः** प्रत्येकपदशक्यार्थव्यतिरिक्तो **वाक्यार्थः** आकाङ्क्षादियुक्तपदसमूहार्थः **समुल्लसति** श्रोतृबुद्धिविषयो भवतीति **अभिहितान्वयवादिनाम्** अभिहितानां पदैर्वृत्त्या श्रोतृबुद्धौ उपस्थापितानामर्थानाम् आकाङ्क्षादिवशाद् अन्वयः संसर्गः कर्तृकर्मक्रियादिरूपेणान्वयस्य प्रतीतिः भवति इति वदतां कुमारिलभट्टतन्मतानुयायिनां मतमित्यर्थः । वृत्तिं विनाऽर्थबोधनेऽति-

वाच्य एव वाक्यार्थ इति अन्विताभिधानवादिनः ।

(सूत्र० १०) **सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ।**

तत्र वाच्यस्य यथा—

माए घरोवअरणं अज्ज हु णत्थि त्ति साहिअं तुमए।
ता भण किं करणिज्जं एमेअ ण वासरो ठाइ ॥उदा० ६॥

अत्र स्वैरविहारार्थिनीति व्यज्यते ।

प्रसङ्गात् संसर्गरूपे वाक्यार्थे प्रत्येकं पदानां शक्तेरभावात् पदार्थसंसर्गं वाक्यस्य तात्पर्याख्या वृत्तिः स्वीकर्तव्या तत्प्रतिपाद्योऽर्थस्तात्पर्यार्थ इति तेषां मतम् इति भावः ।

अन्विताभिधानवादिमतमाह—**वाच्य ए**वेत्यादिना । **वाक्यार्थः** समुदायपदार्थरूपः पद-समूहगम्योऽर्थो **वाच्य एव** अभिधेय एवेति **अन्विताभिधानवादिनः** अन्वितानां परस्परं कर्तृकर्मक्रियादिरूपेण सम्बद्धानां पदार्थानामभिधानं पदशक्त्यैवोपस्थापनं भवतीति वदतो गुरुरिति प्रसिद्धस्य प्रभाकरस्य मतमित्यर्थः । अधिकं पञ्चमोल्लासव्याख्याने वक्ष्यामः ॥९॥

व्यञ्जकत्वस्य काव्यजीवातुभूतत्वाद्, व्यञ्जकशब्दार्थसन्निवेशस्यैव परमार्थतः कवि-संरम्भविषयत्वयोग्यत्वाद, अस्य च ग्रन्थस्य काव्यज्ञशिक्षारूपत्वाद् व्यञ्जकत्वस्य प्रपञ्चं कर्तुम्, तार्किकैरसम्भावितस्य व्यञ्जकत्वस्य अभिधादिवैलक्षण्यप्रदर्शनेन सम्भावनां प्रदर्शयितुं चाऽऽह—**सर्वेषामि**त्यादि । न केवलं शब्दस्यैव व्यञ्जकत्वं किन्तु अर्थस्यापि, तत्रापि न केवलं वाच्यस्यैवार्थस्य किन्तु वाच्य-लक्ष्य-व्यङ्ग्यानां सर्वेषामप्यर्थानां व्यञ्ज-कत्वमिष्यते इत्यर्थः । वक्त्रादिवैशिष्ट्याभावे अर्थान्तरव्यञ्जनं न भवति, सत्यपि सामग्र्-यान्तरव्यञ्जकत्वं नास्तीति च प्रायश इत्युक्तम् ।

यद्यपि अर्थानां व्यञ्जकत्वम् अर्थव्यञ्जकत्वप्रतिपादनायारब्धे तृतीये उल्लासे उदाहरणीयम् उदाहरिष्यते च विस्तरेण तत्रैव ग्रन्थकृता वक्त्रादिवैशिष्ट्यकृतं तद् वाच्यस्यार्थस्य, तथापि शास्त्रान्तरे अश्रुतत्वात् तीव्रजिज्ञासाविषयत्वाद् वाच्य-लक्ष्य-व्यङ्ग्यार्थानां व्यञ्जकत्वं संक्षेपेणात्रैव उदाहरति-**तत्र वाच्यस्ये**त्यादिना ।

वाच्यस्य व्यञ्जकत्वम् उदाहरति **माए घरोवअरण**मित्यादिना । **'मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया । तद् भण किं करणीयमेवमेव न वासरः स्थायी'** इति संस्कृ-तच्छाया । हे मातर् गृहस्य अन्नेन्धनलवणतैलशाकादि उपकरणम् अद्य किञ्चिदपि नैवा-स्तीति त्वया निश्चित्य प्रतिपादितम्, तस्माद् गृहोपकरणानामानयनाय बहिर्गन्तव्यं न वा किङ्करणीयम्, इदानीमेव वद, यतो **दिवस एवमेव** वर्तमानावस्थ एव न तिष्ठति किन्तु गच्छत्येवेत्यर्थः । व्यतीते तु दिवसे त्वदाज्ञयाऽपि मया बहिर्गन्तुं न शक्यते इत्यभिप्रायः । वदेत्यस्य बहिर्गमनमाज्ञापयेत्यर्थस्तु न शोभनः, बहिर्गमनानुज्ञां प्रार्थयमाना तु शङ्क्येत गुरुजनेनेति, कारणगौरवाद् माम् अवश्यं बहिः प्रेषयिष्यतीति जानाना चतुरा

लक्ष्यस्य यथा—

साहेन्ती सहि सुहअ खणे खणे दूम्मिआसि मज्झकए ।
सब्भाव णेह-करणिज्ज-सरिसअ दाव विरइअ तुमए ॥उदा० ७॥

अत्र मत्प्रिय रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम्, तेन च कामुक-विषय सापराधत्वप्रकाशन व्यङ्ग्यम् ।

व्यङ्ग्यस्य यथा—

उअ णिच्चलणिप्फन्दा भिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मल-मरगअ भाअण-परिट्ठिआ सखसुत्ति व्व ॥उदा० ८॥

नायिका स्वाभिप्रायगोपनाय बहिर् गमने आगमने च गुरुजनेच्छामेव सर्वथा प्रमाणयन्तीव वदतीति तु श्लिष्टतरम् ।

तत्र व्यभिचारिण्या वक्त्र्या सम्बन्धात् प्रतीत व्यङ्ग्यार्थं प्रदर्शयति—**अत्र स्वैरे-**त्यादिना । उपपतिसमागमार्थिनी एषेति सहृदयैर् व्यञ्जनया गम्यते इत्यर्थ । वाक्यार्थ-बोधोत्तर प्रतीताया कामिनीनिष्ठाया स्वैरविहारेच्छाया शब्दस्य न मुख्यो व्यापारस्तस्य वाक्यार्थबोधमात्रेणैव विरतत्वात्, अर्थस्य चात्र बाधाद्यभावाद् न लक्षकत्वम्, अभिधाय-कत्वन्तु अर्थस्य नैव भवतीति तत्र व्यञ्जनैव व्यापार । अन्विताभिधानवादप वाक्यार्थ-स्यापि वाच्यत्वाद् अभिहितान्वयवादपक्षेऽपि पदार्थसम्बन्धस्य व्यञ्जकत्वे पदार्थस्यापि परम्परया व्यञ्जकत्वाद वाच्यार्थस्य व्यञ्जकताया उदाहरणमिदम् इति ज्ञेयम् ॥उदा० ६॥

बोद्धव्यवैशिष्ट्यमूलक लक्ष्यार्थस्य व्यञ्जकत्वमुदाहरति—**साहेन्ती सहीत्यादिना** । **साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते । सद्भावस्नेहकरणीयसदृशक तावद् विरचित त्वया**' इति संस्कृतच्छाया । प्रियानुनयार्थं प्रेषिता तमुपभुज्य आगता सखीदूती प्रति काचित् कामिनी वदति—हे सखि मदर्थं सुभग त नायकम् अनुनयमाना त्व प्रतिक्षण खिन्ना असि, सद्भावस्नेहाभ्या यत् करणीय लोके तदनुरूप त्वया कृतमित्यर्थ ॥उदा० ७॥

तत्र लक्ष्यमर्थं दर्शयित्वा तस्य व्यञ्जकत्व निर्दिशति—**अत्र मत्प्रियमित्यादिना** । क्षामताद्युपभोगचिह्नानुमितनायकसम्भोगाम् अपकारिणी प्रति प्रयुक्तस्य अस्य वाक्यस्य सद्भावस्नेहानुरूपाचरणरूपो मुख्योऽर्थो बाधित इति एतद् वाक्य वैपरीत्यसम्बन्धेन 'मत्प्रिय रमयन्त्या त्वया शत्रुत्वमाचरितम्' इति अर्थ लक्षयति स च लक्ष्योऽर्थ कामुकस्य कामुक्याश्च दूत्या सापराधत्वमेषा वाक्यप्रयोक्त्री प्रकाशयति इत्येतमर्थं सहृदयचित्ते व्यञ्जनया उपस्थापयतीत्यर्थ । **कामुकविषयम्**, कामुकी च कामुकश्च कामुकौ इत्यत्र एकशेष , तौ विषयो यस्य तत् कामुकविषयम् ।

व्यङ्ग्यस्यार्थस्य व्यञ्जकत्वमुदाहरति—**उअ णिच्चलेत्यादिना** । हालकविकृताया गाथासप्तशतीति प्रसिद्धाया शालिवाहनसप्तशत्या प्रथमे शतके चतुर्थं पद्यमिदम् । '**पश्य**

अत्र निष्पन्दत्वेन आश्वस्तत्वम्, तेन च जनरहितत्वम्, अत सङ्केतस्थानमेतत् इति कयाचित् कञ्चित् प्रति उच्यते। अथवा मिथ्या वदसि न त्वम् अत्रागतोऽभूरिति व्यज्यते।

वाचकादीना क्रमेण स्वरूपमाह—

(सूत्र ११) **साक्षात् सङ्केतित योऽर्थमभिधत्ते स वाचक ॥६॥**

इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थविशेष प्रतिपादयतीति यस्य यत्राऽव्यवधानेन सङ्केतो गृह्यते स तस्य वाचक।

निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका। निर्मल-मरकत-भाजन-परिस्थिता शङ्ख-शुक्तिरिव' इति संस्कृतच्छाया। काचन कामिनी सङ्केतस्थान सूचयन्ती उपनायक प्रति वदति—कमलिन्या पत्रे **निश्चला** स्थानात् स्थानान्तरे गमनेन रहिता **निष्पन्दा** कम्परहिता च **बलाका** बक पक्षिविशेष निर्मले **मरकतमणे** हरितवर्णमणिविशेषस्य भाजने विद्यमाना शङ्खमयी शुक्त्याकारा चन्दनपात्री इव शोभते, पश्य इति। अत्र शोभनक्रियाया अपि कर्तृत्वेन कर्मत्वेन च कारकत्व शाब्दिकसम्मतम् 'पचादयश्च क्रिया भवन्ति-क्रियाया कर्त्र्यो भवन्ति" इति (१।३।१) महाभाष्यकारवचनात्।

तत्र व्यङ्ग्यस्यार्थस्य अर्थान्तर प्रति व्यञ्जकत्व प्रदर्शयति—**अत्र निष्पन्दत्वेने**-त्यादिना। मूल स्फुटम्। **आश्वस्तत्व** विस्रब्धत्व बलाकाया व्यज्यते इत्यर्थ। **उच्यते** व्यञ्जनया प्रतिपाद्यत इत्यर्थ। दत्तसङ्केता त्व नागता अह त्वागतोऽत्र इति वदन्तम उपनायक प्रति नायिका इद पद्यवाक्य प्रयुङ्क्ते इति प्रस्तावस्य स्वरूपे सति तु व्यङ्ग्य-भेद प्रदर्शयति—**अथवा मिथ्ये**त्यादिना। एकस्यैव वाक्यस्यापि प्रस्तावादिविशेषाद् व्यङ्ग्य नानाविध भवति, वाच्य लक्ष्य वाऽपि तु एकमेव, तस्माद् व्यञ्जकत्व वाचकत्व-लक्षकत्वाभ्या पृथगेवेति सूचनाय अस्य पक्षस्य उपन्यास कृत ॥ १० ॥

एतावता ग्रन्थेन शब्दार्थयोर्भेदा उद्देशेन प्रदर्शिता। इदानी तेषा लक्षणत प्रतिपादन प्रतिजानीते—**वाचकादीना**मित्यादिना। वाचकादीना स्वरूप पृथक् पृथक् प्रतिपादयति ग्रन्थकार इत्यर्थ। **स्व** लक्ष्यपदार्थो **रूप्यते** इतरव्यावृत्त्या ज्ञाप्यते अनेनेति **स्वरूप** लक्षण-मित्यर्थो बोध्य।

वाचकस्वरूपमाह—**साक्षात् सङ्केतित**मित्यादिना। सप्तमसूत्राद् मण्डूकप्लुतिन्या-येनाऽनुवृत्त शब्द इति विशेष्य सम्बध्यते। य शब्द **साक्षाद्** अव्यवधानेन **सङ्केतित** सङ्केत सञ्जातोऽस्येति सङ्केतित, तारकादेराकृतिगणत्वाश्रयणात्, अथवा समुपसृष्टस्य चौरादिकस्य कतधातोर्निष्ठायामिद रूपम्, तम् अर्थ जात्यादिरूप **साक्षाद् अभिधत्ते** बोधयति **स वाचक** इत्युच्यते इत्यर्थ। साक्षाद् इति पदस्य तन्त्रेण अन्वय। **सङ्केतश्च शब्दार्थयोरितरेतराध्यास**, बौद्धे अर्थ बौद्धस्य शब्दस्य अभेदेन आरोप इति यावत्। तदुक्त पातञ्जलयोगसूत्रभाष्ये—'सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूप स्मृत्यात्मको

योऽयं शब्दः सोऽयमर्थो योऽयमर्थः सोऽयं शब्द इत्येवमितरेतराध्यासरूपः सङ्केतो भवतीति" इति (३।१७)। महाभाष्ये च पस्पशाह्निके "गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानम्" इति शब्दार्थज्ञानानां परस्पराध्यासात्मकानुभववर्णनमुपलभ्यते। एवञ्च यस्य शब्दस्य यत्रार्थे साक्षाद् अध्यारोपः तस्यार्थस्य साक्षाद् बोधकः स शब्दस्तस्य वाचक इत्युच्यते इति निर्गलितोऽर्थः।

सूत्रं व्याचष्टे **इहागृहीते**त्यादिना। इह लौकिके शब्दव्यवहारे अगृहीतोऽज्ञातोऽननुभूतो वा **सङ्केतः** अर्थे अध्यारोपो यस्य स तस्य **शब्दस्य अर्थप्रतीतेः** अर्थज्ञानस्य **अभावात्** अनुदयाद् **सङ्केतसहायः** सङ्केतज्ञानसहाय एव **शब्दो**ऽर्थविशेषं साक्षात् **प्रतिपादयतीति** हेतो**र्यस्य** शब्दस्य **यत्रार्थे अव्यवधानेन** साक्षात् **सङ्केतो**ऽध्यारोपविशेषो **गृह्यते** ज्ञायतेऽनुभूयते वा **स** शब्दस्तस्य अर्थस्य वाचक इत्युच्यते इत्यर्थः। अयञ्चाध्यारोपस्तन्मूलकं शब्दार्थ-तादात्म्यं वा तस्माच्छब्दाद् अर्थस्य ज्ञाने उपयुज्यते। एतावता शब्देन अर्थस्य ज्ञाने शब्दस्यार्थे वृत्तेर्ज्ञानमावश्यकं भवतीत्यप्युक्तं ज्ञेयम्। अचिरकालगृहीतसङ्केतेन शब्देन जनितारं शाब्दबोधं प्रति ज्ञायमानसङ्केतविशिष्टः शब्दः कारणम्, चिरकालगृहीतसङ्केतेन स्वरूपस्तेन शब्देन जनितारं शाब्दबोधं प्रति तु सङ्केतस्य ज्ञायमानता न आवश्यकी इति विवेक्तव्यम्।

एवं सूत्रवृत्त्योः सङ्क्षेपेण व्याख्यातयोः सतोः सूत्रे पदानां कृत्यान्यपि सङ्क्षेपेण प्रतिपाद्यन्ते। साक्षाद् अर्थस्य प्रतिपादिकासु चेष्टासु अतिव्याप्तिः स्यादिति **यः शब्द** इति। माधुर्यादिव्यञ्जकेषु वर्णेषु रागादिषु च अतिव्याप्तिः स्यादिति **सङ्केतितम्** इति। कर्तृकर्मादिकमर्थसामान्यं सङ्केतग्रहरहितोऽपि शब्दो बोधयतीति **अर्थविशेषमिति**। गोदौ ग्राम इत्यादौ सुचिरन्तनानां वैयाकरणानां मतेन योगमाश्रित्य लक्षणायाः स्वीकारे ग्रामाद्यर्थेषु अध्यारोपितेषु गोदौ इत्यादिकेषु लक्षकेषु पदेषु अतिव्याप्तिः स्यादिति **साक्षाद्** इति सङ्केतस्य विशेषणम्। गोदौ नाम ह्रदौ तयोरदूरेभवो ग्रामोऽपि गोदौ। तत्र गोदशब्दस्य ह्रदयोः साक्षात् सङ्केतः, ग्रामे तु परम्परया कथञ्चित् अभ्यस्तप्रयोगबलाद् तच्छब्दाध्यारोपः, अतस्तत्र नातिव्याप्तिः। पाणिनीये सञ्ज्ञाप्रामाण्यपक्षे (अष्टा० १।२।५३) तु साक्षादिति सङ्केतस्य विशेषणं नावश्यकम् गोदादिशब्दानां लाक्षणिकत्वस्य तत्राभावात्। वटो ग्राम इत्यादः किञ्चित् कालं प्रारम्भिकेषु प्रयोगेषु लाक्षणिकत्वेऽपि पश्चाद् वाचकत्वे प्राप्तिरिति तादृशशब्दस्वभावो ज्ञेयः। भद्रात्मनोर्दुरधिरोहतनोः (उदा० ४९) इत्यादेरभिधाया नियमिताया वाक्यार्थबोधानन्तरं प्रतीयमानं द्वितीयमर्थं प्रत्यपि वाचकत्वं स्यादिति **साक्षाद्** इत्यस्य अभिधानक्रियाविशेषणत्वमपि आश्रितम्। तथा च सति भद्रात्मनोरित्यादि वाक्यं वाक्यार्थबोधव्यवधानेन द्वितीयमर्थं बोधयतीति तं प्रति तस्य न वाचकत्वस्य प्रसङ्ग इत्यपि केचित्, अन्ये तु तत्र द्वितीयस्यार्थस्य वाच्यत्वव्यङ्ग्यत्वोभयव्यवहार इष्ट एवेति वदन्ति। जगन्नाथमते तु उक्तविधस्थलेषु द्वितीयस्यार्थस्य न व्यङ्ग्यत्वं किन्तु वाच्यत्वमेवेति बोध्यम्॥ ११॥

(सूत्र १२) **सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।**

यद्यपि अर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथापि आनन्त्याद् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यते इति, 'गौः शुक्लः चलो डित्थः' (उदा० ९) इत्यादीनां विषयविभागो न प्राप्नोति इति च तदुपाधौ एव सङ्केतः ।

शब्दः सङ्केतज्ञानतत्संस्कारान्यतरसहायोऽर्थं बोधयतीति उक्तम् । सङ्केतश्चास्माभिर्व्याख्याग्रन्थे प्रामाणिकोक्तिप्रदर्शनपूर्वकं स्वरूपतोऽपि स्फुटीकृतः । सङ्केतं स्फुटतरं चिकीर्षुर्मूलग्रन्थकारः सङ्केतस्य शब्दार्थसम्बन्धितया सङ्केतनीयस्यार्थस्यापि लक्षणतः साकल्येन प्रदर्शने कृते सङ्केतः स्फुटतरो भवतीति सङ्केतनीयं सङ्केतितं वाथं सविभागं प्रदर्शयति—सङ्**केतितश्चतुर्भेद** इत्यादिना । **सङ्केतितः** प्राप्तसङ्केतः सङ्केतक्रियाकर्मभूतः, सङ्केतविषय इति यावत्, **चतुर्भेदः** चतुष्प्रकारो भवतीत्यर्थः । स च **जात्यादिः** आदिपदेन गुण-क्रिया-वक्तृयदृच्छानिवेशितस्फोटरूपधर्माणां सङ्ग्रहः । इदं महाभाष्यकारमतानुसारमुक्तम् । मीमांसकमतमाह—**जातिरेव वेति** । अथवा सङ्केतितोऽर्थो जातिरेवेत्येकविध एव न तु पूर्वोक्तेन प्रकारेण चतुर्विध इत्यर्थः ।

सूत्रं व्याचष्टे—**यद्यपि अर्थे**त्यादिना । सङ्केतग्रहोपायेषु— 'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यव्यवहारतश्च । वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' इति परिगणितेषु व्यवहारः एव प्रथमो मुख्यश्च, स च प्रवृत्तिनिवृत्त्यात्मको व्यवहारो व्यक्तेरेव न तु जातेः, अतः कथं जातौ सङ्केतः ? व्यक्तौ एव स उचित इति शङ्काम् उत्थापयति **व्यक्तिरेवे**त्यन्तेन वाक्यांशेन । अर्थयुक्ता क्रिया अर्थक्रिया प्रयोजनवत् कर्म तां करोति तच्छीला **अर्थक्रियाकारिणी** तस्या भावस्तया । प्रवृत्तौ निवृत्तौ च योग्या **प्रवृत्तिनिवृत्तियोग्या**, यस्यां प्रवर्तितुं शक्यते यस्याश्च निवर्तितुं शक्यते तादृशीत्यर्थः । **व्यक्तिः** यत्र जात्यादयो धर्माः अभिव्यज्यन्ते तादृशः पदार्थपिण्डः । पूर्वोक्तामाशङ्कामपनुदति—**तथापि आनन्त्या**दित्यादिना । सर्वासु व्यक्तिषु शब्दविशेषस्य सङ्केतग्रहः शब्दविशेषव्यवहारस्याङ्गम् इति स्वीकृते व्यक्तीनाम् अनन्तसङ्ख्याकत्वात् सर्वासु व्यक्तिषु सङ्केतग्रहस्य असम्भवित्वात् शब्दव्यवहारो न सेत्स्यति, यस्यां कस्याचिद् व्यक्तौ सङ्केतग्रहस्य शब्दविशेषव्यवहाराङ्गत्वे स्वीकृते तु कपिलायां गवि गृहीतसङ्केतस्य गोपदस्य अगृहीतसङ्केतायां कृष्णायां गवि अपि प्रवृत्तिः स्यात् । ननु इयम् इष्टा आपत्तिरिति चेत् तथा सति यथा अगृहीतसङ्केतायां कृष्णायां गवि गोपदप्रवृत्तिस्तथैव घटादावपि गोपदप्रवृत्तिः स्यात्, उभयोरपि कृष्णगोव्यक्तिघटव्यक्त्योः अगृहीतगोपदसङ्केतत्वस्य तुल्यत्वाद् इति इयमनिष्टा आपत्तिस्ते बुद्धिमारोहतु । किञ्च कपिलायां गवि गृहीतो गोपदसङ्केतो येन तादृशो बालकः कृष्णायां गवि अपि गोपदं प्रयुङ्क्ते, लोहिनीमपि गां गोपदात् प्रत्येति च, तस्माद् व्यक्तौ सङ्केतग्रहस्य स्वीकारे शब्दार्थयोः स्फुटो व्यभिचारः । कपिलया गोव्यक्त्या सम्बद्धोऽपि गोशब्दः ततोऽन्या कृष्णा लोहिनी च गोव्यक्ति-

उपाधिश्च द्विविध —वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च। वस्तुधर्मोऽपि द्विविध —सिद्ध साध्यश्च। सिद्धोऽपि द्विविध —पदार्थस्य प्राणप्रदो विशेषाधान-

---

मपि गच्छतीति शब्दार्थसम्बन्धस्य अनियतत्व (व्यभिचारित्व) बोध्यम्। अथवा तद्व्यक्तिसङ्केतग्रहरूपशाब्दबोधकारणाभावेऽपि सङ्केतग्रहणकालादृष्टव्यक्तावपि शाब्दबोधस्य कार्यस्य दर्शनात् कार्यकारणभावस्य व्यभिचार इति बोध्यम्। ननु यस्य शब्दस्य यस्या व्यक्तौ शक्तेर्ग्रहणस्य काले व्यक्ते य प्रकारीभूतो धर्मस्तद्धर्माश्रयभूतस्यैव व्यक्त्यन्तरस्यापि तस्माद् शब्दाद् बोधो भवति, तथा चोक्तम्–'आनन्त्येऽपि हि भावानामेक कृत्वोपलक्षणम्। शब्द सुकरसम्बन्धो न च व्यभिचरिष्यति' इति (वैयाकरणभूषणसारे [श्लो० २५] उद्धृतम्), एव च प्रकारीभूतधर्मबोधद्वारा जायमानोऽपि बोध प्रकारीभूतगोत्वादिधर्मान् परिहाय व्यक्तेरेव भवतीति न गोत्वादिबोधार्थ तत्र वृत्तेरावश्यक स्याद् इति चेत् तत्राह–**गौ शुक्ल** इत्यादि। यदि प्रकारेण सहितायामेव व्यक्तौ सङ्केतग्रह स्वीक्रियते तदा गौरवम्, प्रकारीभूते धर्मे एव सङ्केतस्य ग्रहेऽपि आक्षेपादेव व्यक्तेर्बोधस्योपपत्ते, प्रकारांशे एव सङ्केतग्रहस्य स्वीकारे तु उपाधिसङ्केतवादिमतस्वीकारप्रसङ्ग, तस्माद् व्यक्तिसङ्केतवादिना निष्प्रकारायामेव व्यक्तौ सङ्केत स्वीकार्य, तथा च सति एकस्या व्यक्तौ **गौ शुक्लश्चलो डित्थ** इत्यादीना बहूना पदाना प्रकारकृतविषयविभागो वक्तु न शक्यते इति तेषा पर्यायत्व स्यात्, ततश्च तेषा सामानाधिकरण्येन प्रयोगोऽपि न स्यात्, भवति तु तादृशाना पदाना सामानाधिकरण्येन प्रयोग, अतो व्यक्तिसङ्केतवादो लोकप्रसिद्धशब्दव्यवहारप्रतिकूल इति शब्दार्थतत्त्वप्रतिपत्तिवन्ध्य एवेति भाव। निष्प्रकारकव्यक्तिसङ्केतस्वीकारे पूर्वोक्तो व्यभिचारश्च परिहर्तुमशक्य एव। **विषयविभाग**· शब्दप्रवृत्तिनिमित्तभेदो न प्राप्नोति सत्ता न लभते न भवति वेत्यर्थ। जात्यादिषु व्यक्त्युपाधिषु सङ्केतग्रहे स्वीकृते तु गवादिपदाना प्रवृत्तिनिमित्तभूताना जात्यादीना भेदात् तेषा पर्यायत्वाभावात् लोकप्रसिद्ध सामानाधिकरण्येन प्रयोगस्तेषाम् उपपन्नो भवति। 'तत्र सङ्केत कर्तु न युज्यते इति' इत्यन्तेन वाक्यांशेन एको हेतु 'न प्राप्नोति इति' इत्यन्तेन च वाक्यांशेन अन्यो हेतुर्निर्दिष्ट। इतिर्हेतौ। च समुच्चये। **तदुपाधौ** तस्या व्यक्ते उपाधौ प्रकारीभूते धर्मे जात्यादौ सङ्केतो भवतीत्यर्थ। उपदधाति स्वधर्ममभिधादिक व्यक्तौ सङ्क्रामयतीति जात्यादिर्व्यक्तिधर्म **उपाधि** इत्युच्यते।

उपाधि विभजते—**उपाधिश्चे**त्यादिना। **वस्तुधर्मो** वस्तुनि सहजत्वेन वर्तमानस्तथात्वेन प्रतीयमानो वा धर्म, वस्तुनि वर्तमानोऽनारोपितो धर्मो वा। वस्तुनि सहजत्वेन अवर्तमानो वक्त्रा हेतुशून्यया स्वेच्छया वस्तुनि आरोपितो **वक्तृयदृच्छासन्निवेशित**·। **सिद्धः** सत्त्वरूपा लिङ्गसङ्ख्यान्वययोग्य, द्रव्यरूप इति यावत्। द्रव्यशब्दार्थश्चात्र—"वस्तूपलक्षण यत्र सर्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षित" इति बोध्यो न तु गौतमादिपरिभाषित। सिद्धो नामार्थ इति भाव। तथा च बृहद्देवताया शौनक — "शब्देनोच्चरितेनेह येन द्रव्य प्रतीयते। तदक्षरविधौ युक्त नामेत्याहुर्मनीषिण। अष्टौ

हेतुश्च । तत्राद्यो जाति , उक्त हि वाक्यपदीये—'न हि गौ स्वरूपेण गौ नाऽपि अगौ गोत्वाभिसम्बन्धात् तु गौ' इति । द्वितीयो गुण , शुक्लादिना हि लब्ध-सत्ताक वस्तु विशिष्यते । साध्य पूर्वापरीभूतावयव क्रियारूप । डित्थादिशब्दा-नाम् अन्त्यबुद्धिनिर्ग्राह्य संहृतक्रम स्वरूप वक्त्रा यदृच्छया डित्थादिषु अर्थेषु उपाधित्वेन सन्निवेश्यते इति सोऽय सञ्ज्ञारूपो यदृच्छात्मक इति ।

यत्र प्रयुज्यन्ते नानार्थेषु विभक्तय । तन्नाम कवय प्राहुर्भेद वचनलिङ्गयो" इति (१।४२-४३)। नामशब्देन च आख्यातोपसर्गनिपातभिन्ना व्यक्तिनामजातिनामगुणनाम-द्रव्यनामादय. सर्वे शब्दा उच्यन्ते, तथा च यास्क —'चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च' इति निरुक्ते प्राह (१।१।१) । **साध्योऽ**नुपद व्याख्यास्यते । **पदार्थस्य प्राणप्रद** य धर्मं विना पदार्थस्य तेन रूपेण सत्त्वं न भवति, यथा—गोरूपस्य पदार्थस्य गोत्वरूपधर्मसम्बन्ध विना गोरूपेण सत्त्वं न भवति, तादृशो धर्म प्राणप्रद इत्युच्यते । पदार्थविशेषस्य तत्त्वेन व्यवहार प्राण इव प्राण , तत्प्रद तत्सम्पादक । **विशेषाधानहेतु** त धर्मविशेष विनाऽपि स्वसत्ता लब्धु क्षमे पदार्थे वैशिष्ट्यमात्रस्य सम्पादको धर्म कृष्णत्वादि । **तत्राद्य** पदार्थस्य प्राणप्रदो धर्मो **जाति**रित्युच्यते । जातिश्च भिन्नेषु अभिन्नाभिधान-प्रत्ययनिमित्तम् इति धर्मविशेषमात्रम् इति वा वैदिकाना सिद्धान्त न तु नित्यत्वे सति अनेकसमवेतत्वम् इति । तथा च महाभाष्यकार —"आकृतिग्रहणा जाति" इति (४।१।६३)। जाते पदार्थप्राणप्रदत्वे शिष्टसम्मति दर्शयति— **उक्त ही**त्यादिना । गौ गोपदाभिधेयो धर्मी गोपिण्ड इति यावत्, **स्वरूपेण** धर्मिस्वरूपमात्रेण **गौ** गौरितिव्यवहा-रस्य विषयो **न हि** भवति **नाप्यगौः** अगौरिति व्यवहारस्य विषयोऽपि न भवति, **गोत्वाभि-सम्बन्धात् तु** गोत्वरूपस्य भिन्नेषु पिण्डेषु अभिन्नाभिधानप्रत्यययो निमित्तभूतस्य धर्म-विशेषस्य सम्बन्धात् तु **गौः** इति व्यवहारस्य विषयो भवतीत्यर्थ । एवञ्च जातिरेव पदार्थविशेषे तद्व्यवहारस्य जनको भवतीति भाव । जननेन या प्राप्यते सा जाति (महा-भाष्ये ५।३।५५)। व्यक्तौ जाति स्वनिष्ठ धर्ममभिधेयत्वमादधातीति जाति प्रथमो व्यक्त्युपाधिरिति फलितोऽर्थ । अत्र जाते सिद्धपदार्थप्राणप्रदत्वे शिष्टसम्मतिर्मम्मटेन वाक्यपदीयादुद्धृता, किन्तु इद वाक्य इदानी वाक्यपदीये नोपलब्धाऽस्माभि । भर्तृहरिकृत व्याकरणप्रकरणग्रन्थरूप वाक्यपदीय गद्यपद्यमयमिति चारुदेवशास्त्रिप्रभृतिविदुषा निर्णय । तत्र ब्रह्मकाण्ड भर्तृहर्युपज्ञ पद्यगद्यमय कारिकावृत्तिरूपमविकलमुपलब्ध मुद्रितञ्चाऽनेक-वारम् । द्वितीय वाक्यकाण्डमपि भर्तृहर्युपज्ञवृत्तियुतमेवाऽभूत्, किन्तु सेय द्वितीयकाण्ड-वृत्तिर्न सम्पूर्णा उपलभ्यते यावल्लाभ च मुद्रिता वाराणसेय (सम्पूर्णानन्द) सस्कृतविश्व-विद्यालयेन । तृतीयकाण्डस्य च भर्तृहर्युपज्ञा वृत्तिर्नाऽभूद् इति वाक्यपदीयद्वितीयकाण्डो-पोद्घाते (छ) पृष्ठे पण्डितबलदेवोपाध्यायस्य विश्वास उल्लिखित , किन्तु मम्मटेनोद्धृत-मिद वाक्यपदीयगद्यवाक्य तृतीयकाण्डस्थजातिसमुद्देशगतभर्तृहर्युपज्ञवृत्त्यन्तर्गत भवे-दित्यस्माक प्रतिभाति । **द्वितीयो गुणः** इति लब्धास्तित्वस्य पदार्थस्य विशेषाधानमात्रहेतु-

'गौ शुक्लश्चलो डित्थ ' (उदा० १०) इत्यादौ चतुष्टयी शब्दाना प्रवृत्ति इति महाभाष्यकार ।

धर्मो गुण इत्युच्यते इत्यर्थ । **लब्धसत्ताक** जातियोगेन व्यवहार्यत्व प्राप्त **वस्तु शुक्लादिना** गुणेन **विशिष्यते** सजातीयेभ्यो व्यावर्त्यते। साध्यरूपस्य वस्तुधर्मस्य लक्षणमाह— **साध्यपूर्वापरीभूतावयव क्रियारूप** इति। अपूर्वा अनपरा पूर्वा अपरा यथा सम्पद्यन्ते तथाभूता अवयवा यस्य स तादृश क्रियारूपो वस्तुधर्म साध्य इत्यर्थ । क्रिया नामेय-मत्यन्तापरिदृष्टाऽशक्या पिण्डीभूता निदर्शयितु, किन्तु अनुमानगम्या एका वस्तुतो निर-वयवा अधिश्रयणाद्युद्वासनान्तादिकर्माभिव्यञ्जनीया पाकादिका एकत्वबुद्धिग्राह्या । तत्र च वस्तुतोऽवयवानामेवाभावाद् अवयवेषु पूर्वापरभावस्य च सुतरामभावेऽपि तथा प्रतीते **पूर्वापरीभूतावयव** इति प्रयोग । गोकुलनाथस्तु '**साध्यः पूर्वापरीभूतक्रियारूप**' इत्येव पठति। युक्तञ्च स पाठ । "**पूर्वापरीभूत भाव**माख्यातेनाचष्टे व्रजति पचतीत्युपक्रम-प्रभृत्यपवर्गपर्यन्तम्" इति हि क्रियालक्षण निरुक्ते प्राह यास्क (१।१।८), "क्रियासु बह्वीष्वभिसश्रितो य **पूर्वापरीभूत** इहैक एव । क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन तमर्थमाहु" इति च बृहद्देवताया शौनक (१।४४)। अथवा "गुणभूतैरवयवै समूह क्रमजन्मनाम् । बुद्ध्या प्रकल्पिताभेद क्रियेति व्यपदिश्यते ।" इति वाक्यपदीयकारवचन-मुपजीवन् '**पूर्वापरीभूतावयव क्रियारूप**' इति पाठोऽपि युक्त एव । वस्तुनि वक्तृयदृच्छाया निवेशित निवेशनीय वा धर्म प्रतिपादयति—**डित्थादिशब्दाना**मित्यादिना । **डित्थादिशब्दाना** डित्थडवित्थचैत्रमैत्रादिसज्ञाशब्दानाम् । **अन्त्यबुद्धि** पदस्फोटविषया अन्तिमा बुद्धि तया **निर्ग्राह्य** स्पष्टरूपेण निश्शेषेण ग्रहणीय **संहृतक्रम** विलीनवर्णस्फोटक्रम डित्थादिशब्दा डित्थादिशब्दाना **स्वरूप** स्फोटात्मक रूप **वक्त्रा यदृच्छया** निर्हेतुकया स्वेच्छया **डित्थादिषु अर्थेषु** बुद्ध्या गृहीतेषु तत्तदर्थस्वरूपेषु **उपाधित्वेन** प्रकारीभवद्धर्मत्वेन, वस्तुतस्तु तादात्म्येन, **सन्निवेश्यते** आरोप्यते, स्वरूपसम्बन्धसम्बन्धेन अध्यारोप्यते इति यावत् । यादृशमारोपित वस्तुधर्म निमित्त कृत्वा य शब्दोऽर्थेषु प्रवर्तते स यदृच्छात्मक शब्द इत्यर्थ । अत्र अन्तिमबुद्धिपदस्य पदान्तिम**वर्ण**बुद्धिरूपोऽर्थो महेश्वरभट्टाचार्य—वामनाचार्य झळकीकरादिभिर्गृहीत, स च वैयाकरणसम्मतस्फोटसिद्धान्तप्रतिकूल इति, मम्मटेन च आनन्दवर्धनमनुगच्छता आलङ्कारिकाणा वैयाकरणानुगामित्व कण्ठरवेणैवोक्तमिति चाऽस्मा-भि परित्यक्त । पदस्य प्रथमे वर्णे उच्चारिते एव अस्पष्टरूपेण किन्तु सम्पूर्णरूपेणैव पदस्फोटो व्यज्यते इति तदा पदस्फोटविषया प्रथमा बुद्धिर्जायते, द्वितीये वर्णे उच्चारिते किञ्चित्स्पष्टरूपेण पदस्फोटो व्यज्यते तदा पदस्फोटविषया द्वितीया बुद्धिर्जायते, एवङ्क्रमेण पदस्यान्तिमे वर्णे उच्चारिते पदस्फोटस्य स्फुटतमाऽभिव्यक्तिर्जायते, तदा पदस्फोटविषयया अन्तिमबुद्ध्या पदस्फोटस्वरूप गृह्यते तच्चार्थ बोधयति । अत एव अर्थे सन्निविष्ट सन्निवेश्य वा पदस्फोटस्वरूप अन्तिमबुद्धिनिर्ग्राह्यमुच्यते, पदवर्णाना प्रत्येक सकलस्फोट-व्यञ्जकत्व भर्तृहरिणाऽपि उक्तम्, तथाहि—"यथाऽनुवाक श्लोको वा सोढत्वमुप-

परमाण्वादीना तु गुणमध्यपाठात् पारिभाषिक गुणत्वम् ।

गुणक्रियायदृच्छाना वस्तुत एकरूपाणामपि आश्रयभेदाद् भेद इव लक्ष्यते यथा एकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात् ।

गच्छति । आवृत्या न नु स ग्रन्थ प्रत्यावृत्ति निरूप्यते ।'' इति (वाक्यपदीये ब्रह्मकाण्डे श्लो० ८०) । सङ्केतितोऽर्थो जात्यादिरूपञ्चतुर्विध इत्यर्थ वैयाकरणशिरोमणे आचार्य-पतञ्जले सम्मति दर्शयति—**गौः शुक्ल** इत्यादिना । ''चतुष्टयी शब्दाना प्रवृत्ति , जाति-शब्दा गुणशब्दा क्रियाशब्दा यदृच्छाशब्दाश्चतुर्था '' इति ऋलृक्सूत्रस्थवार्त्तिकव्याख्याने महाभाष्यकार । ननु महाभाष्यकारमते आकाशादिशब्दाना किं प्रवृत्ति-निमित्तम्, नहि जाति , नित्यत्वे सत्यनेकसमवेतत्वस्य तत्राभावादिति चेत्, अत्रोच्यते—जातिरेवेति, तन्मते ''आकृतिग्रहणा जाति '' इति जातेर्लक्षणात् (महाभाष्ये ४।१।६३) । वाक्यपदीयेऽपि—'सयोगिधर्मभेदेन देशे च परिकल्पिते । तेषु देशेषु सामान्यमाकाशस्याऽपि विद्यते ।। अदेशाना घटादीना देशा सम्बन्धिनो यथा । आकाशस्याप्यदेशस्य देशा सम्बन्धिन-स्तथा ।'' इति (प्रकीर्णकाण्डे जातिसमुद्देशे श्लो० १५-१६) । तद्व्याख्याने हेलाराजोऽपि—''अतश्च प्रतिदेशम् इदमाकाशम् इदमाकाशम् इत्यभिन्नाभिधानप्रत्ययानुवृत्तिलक्षणमा-काशसामान्यमाकाशशब्दगोचरोऽस्ति । एवमेव समानन्यायत्वात् कालादीनामपि प्रदेशपरि-कल्पनेन सामान्यमुपवर्णनीयम्'' इति ।

ननु परमाण्वादिशब्दा लौकिकपदार्थस्वभावविवेचनपटूना वैशेषिकाणा नये गुण-वाचका इति तेषा गुणशब्दत्वमुचितम्, भवत्कथनानुसार तु परमाणुत्वस्य पदार्थप्राण-प्रदत्वेन जातितया तेषा जातिशब्दत्वस्य प्रसङ्ग इति भवता विवेचनमसङ्गतम् इत्या-शङ्कायामाह—**परमाण्वादीना तु** इत्यादि । वैशेषिकसूत्रे **परमाण्वादीना गुणमध्यपाठात्** परिभाषाया आगत **पारिभाषिक** गुणत्व न तु वस्तुस्वभावमूलकम्, परिभाषाणा च कृत्रि-माणा वक्तृयदृच्छामूलकाना शास्त्रविशेषमात्रविषयाणा न सामान्यव्यवहारहेतुत्वमिति अकृत्रिमम्, वैशेषिकशास्त्रे एव परमाण्वादिशब्दाना गुणशब्दत्वम्, अन्यत्र तु तेषा जातिशब्दत्वमेव अतो नास्माक विवेचन परिभाषामात्रेण बाध्यते इति भाव ।

ननु हिम-पय -शङ्ख-पटादिनिष्ठाना शुक्लादिगुणाना गुडतण्डुलाम्रशाल्यादि-निष्ठाना पाकादिक्रियाणा कालभेदेन वक्तृभेदेन वा डित्थादीना च प्रत्याश्रय भिन्नत्वस्य दर्शनात् शुक्लादिगुणाना पाकादिक्रियाणा यदृच्छाना च नानात्वेन गुणेषु क्रियासु यदृच्छा-त्मकशब्दस्वरूपेषु च शक्तौ स्वीकृतायामपि व्यक्तिसङ्केतपक्षे इव आनन्त्यव्यभिचारौ भवत एवेति वृथाऽऽक्षेपेण व्यक्त्युपस्थितेः स्वीकारस्य प्रक्रियाया कल्पना इत्याशङ्कायाम् आह—**गुणक्रिये**त्यादि । गुणक्रियायदृच्छासु आश्रयभेदाद् भेद प्रतिभासते, यथा एकमेव मुख स्वच्छे खड्गफलके आदर्शे तैले पानीये प्रतिबिम्बित सद् भिन्नमिव प्रतिभासते तद्वत्, किन्तु खड्गफलकादौ प्रतिबिम्बित भिन्नमिव प्रतीयमानमपि मुख यथा वस्तुतो-ऽभिन्नमेव तथैव हिम-पय -शङ्खादिषु भिन्ना इव प्रतीयमाना अपि शुक्लादय वस्तुतो-

हिम-पय -शङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्ल शुक्ल इत्यभिन्नाभिधानप्रत्ययोत्पत्ति तत् शुक्लत्वादि सामान्यम्, गुडतण्डुलादिपाकादिषु एवमेव पाकत्वादि, बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षण भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वादि अस्ति इति सर्वेषा शब्दाना प्रवृत्तिनिमित्तम् इति अन्ये ।

ऽभिन्ना एव, अतस्तत्र नानात्वाभावात् तत्र सकेतस्य स्वीकारे न आनन्त्यव्यभिचारदोषयो प्रसङ्ग इत्यर्थ ।

जात्यादिसङ्केतपक्ष महाभाष्यकारसम्मत व्याख्याय जातिसङ्केतपक्ष वैयाकरणस्य वाजप्यायनस्य धर्ममीमासकाना च सम्मत व्याख्याति—**हिम-पय -शङ्खाद्याश्रयेषु** इत्यादिना । हिम-पय -शङ्खादय आश्रया येषा तेषु हिमस्य शुक्लोऽन्य पयस शुक्लोऽन्य इत्यादे प्रतीते **परमार्थतो** वस्तुत एव भिन्नेषु शुक्लादिषु गुणेषु **यद्वशेन** यद् एकम् अनुगत सामान्यमादाय हिमस्य शुक्ल , पयस शुक्ल , शङ्खस्य शुक्ल इत्यादौ शुक्ल शुक्ल **इत्याद्यो अभिन्नयो** समानयो **अभिधान-प्रत्यययो** शब्दप्रतीत्यो **उत्पत्ति**रात्मलाभ सत्ता इति यावत्, **तत् शुक्लत्वादि सामान्यम्** अस्ति 'जातिर्जाति च सामान्यम" इत्यमर । सर्वा एव प्रतीतय परमार्थतो विद्यमानस्यैव वस्तुत स्वरूपस्य अनुकारिण्यो भवन्तीति दर्शनमुपजीव्येयमुक्ति । गुडस्य पाकोऽन्य तण्डुलाना पाकोऽन्य , आम्रस्य पाकोऽन्य , शालीना पाकोऽन्य इत्यादे प्रतीतेर्वस्तुत एव भिन्नेषु पाकादिषु भावेषु यद् अनुगत सामान्यम् आदाय गुडस्य पाक , तण्डुलाना पाक , आम्रस्य पाक , शालीना पाक इत्यादौ पाक पाक इत्याद्यो समानयो शब्द-प्रतीत्योर्व्यवहारे उत्पत्ति तत् पाकत्वादि सामान्यम् अस्ति । बालोच्चारितडित्थादिध्वनिव्यङ्ग्यो डित्थादिस्फोटो व्यञ्जकोपाधिभेदाद् अन्य , वृद्धोच्चारितडित्थादिध्वनिव्यङ्ग्यो डित्थादिस्फोटो व्यञ्जकोपाधिभेदाद् अन्य , शुकाद्युच्चारितडित्थादिध्वनिव्यङ्ग्यो डित्थादिस्फोटो व्यञ्जकोपाधिभेदाद् अन्य एवेति प्रतीतेर्वस्तुत एव भिन्नेषु डित्थादिषु स्फोटशब्देषु यद् अनुगत सामान्यमादाय अय डित्थ अय डित्थ इत्यादौ डित्थ डित्थ इत्यादे एकस्य डित्थादे शब्दस्य व्यवहार डित्थ डित्थ इत्यादे एकस्या प्रतीतेश्च उत्पत्ति तद् डित्थत्वादि शब्दगत सामान्यम् अस्ति । इद यदृच्छाशब्दाना स्फोटरूप शब्द एव प्रवृत्तिनिमित्तभूत उपाधि इति वदता महाभाष्यकारादीना मत विचार्य उक्तम् । ये तु यदृच्छाशब्दाना प्रवृत्तौ निमित्तभूतो न स्फोट किन्तु निर्विकल्पकबोधगम्य धर्मिमात्रम् इति मन्यन्ते तेषा मतमनुसृत्य आह—**प्रतिक्षण भिद्यमानेषु डित्थाद्यर्थेषु चेति । प्रतिक्षण** तत्तत्क्षणविशिष्टत्वेन सूक्ष्मोपचयापचयादियोगेनापि वा परमार्थतो **भिद्यमानेषु** डित्थाद्यर्थेषु यद् अनुगत सामान्यमादाय डित्थो डित्थ इत्यादेरेकशब्दव्यवहारस्य अय डित्थोऽय डित्थ इत्यादेरेकस्या प्रतीतेश्च उत्पत्तिस्तद् डित्थत्वादि धर्मिगत सामान्यमस्ति इति सर्वत्रार्थेषु अखण्डोपाधिरूपाया जाते

(सू० १३) स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याऽभिधोच्यते ॥ ७ ॥

स इति साक्षात् सङ्केतित । अस्येति शब्दस्य ।

कारोक्ते उद्धरणात् "जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद् गुणस्त्रिभि । क्रिया द्वाभ्यामपि द्रव्य द्रव्येणैवेति ते दश" (सू० १६८) इति मूलग्रन्थकृता प्रतिपादितानां विरोधालङ्कार-भेदाना च पदार्थाना चतुर्विधत्वे स्वीकृते एव सुसङ्गतत्वस्य लाभात्, शब्दव्यापारविचा-राख्ये निर्णयसागरमुद्रणालये मुद्रिते मम्मटकृते अन्यस्मिन् ग्रन्थेऽपि जात्यादिसङ्केतपक्ष-स्यैव समर्थितत्वात् महाभाष्यकारोक्तो जात्यादिसङ्केतपक्ष एव मम्मटस्य सम्मत इति ज्ञायते ॥ १२ ॥

ननु पदार्थाना वाच्य-लक्ष्य-व्यङ्ग्यभेदेन त्रैविध्यमनुपपन्नम्, मुख्योऽर्थ इति प्रसिद्धस्य अन्यस्यापि पदार्थस्य सत्त्वाद् इति शङ्कामपि अपनुदन् मुख्यव्यापारनिरूपणाय वाच्यार्थ-परामर्श च कुर्वाण आह—**स मुख्योऽर्थ** इति । **स** साक्षात् सङ्केतितोऽर्थो मुखमिव (प्रथम ज्ञेयो) **मुख्य**, तथा च पाणिनि शाखादिभ्यो य" (५-३-१०३) इति इवार्थे शाखादि-शब्देभ्यो यप्रत्ययमाह । यथाऽन्येभ्यो हस्ताद्यवयवेभ्य पूर्व मनुष्यस्य मुखमवलोक्यते तथैव अन्येभ्यो लक्ष्यादिभ्योऽर्थेभ्य पूर्वमवगम्यते इति वाच्योऽर्थो मुख्य इत्युच्यते इति भाव ।

अथ शब्दार्थनिरूपणाङ्गत्वेन कृत वृत्तिनिरूपणम्

शाब्दबोधहेतुपदार्थोपस्थित्यनुकूल पदपदार्थयो सम्बन्धो वृत्तिरिति तत्त्वचिन्तामणौ शब्दखण्डे गङ्गेश । शाब्दबोधप्रयोजकस्तत्तदर्थनिरूपित शब्दधर्मो वृत्तिरिति लघुमञ्जू-षाया नागेश । एव च शब्दाद् अर्थस्य ज्ञाने यस्य ज्ञानमावश्यक तादृश शब्दार्थसम्बन्ध शब्दधर्मविशेष शब्दशक्तिविशेषो वा वृत्तिरिति प्रकारान्तरेण वक्तु शक्यते, किन्तु वेदान्त-परिभाषाकारस्य धर्मराजाध्वरीन्द्रस्य मते व्यक्तिविषया अभिधा, व्यक्तिवादिना मते व्यञ्जना च अज्ञाते स्वरूपसत्यौ एव अर्थबोधहेतू भवत इति सेय प्रकारान्तरोक्ति सर्वत्र न प्रवर्तते । तदिद वृत्ते सामान्यलक्षण व्यञ्जनानिरूपणाङ्गतया वाचक-लक्षक-व्यञ्जक-शब्दनिरूपणाङ्गतया वा अभिधा लक्षणा व्यञ्जना च निरूपयितु प्रवृत्तेन व्यञ्जनानिरूपण-व्यग्रचित्तेन आचार्यमम्मटेन सरम्भवशादुपेक्षितम् ।

वाच्यार्थस्य मुख्यार्थत्वेन व्यवहारे हेतुभूता मुख्या वृत्तिमभिधा वाच्यार्थस्य स्फुट-तरीकरणाय लक्षणानिरूपणसौकर्याय च निरूपयति—**तत्र मुख्य** इत्यादिना । **तत्र** वाच्येऽर्थे **अस्य** शब्दस्य **मुख्यो** वृत्त्यन्तरानपेक्षी प्राथमिक व्यापार शब्दजन्यत्वे सति शब्दजन्यार्थ-ज्ञानजनक शब्दार्थसम्बन्ध शब्दधर्मविशेषो वा, वृत्तिरिति यावत्, **अभिधा** उच्यते इत्यर्थ । लक्षणाव्यञ्जने तु अभिधामपेक्षेते प्रायेणेति न तयोर्मुख्यत्वम् । सूत्रस्थेन स-शब्देन ग्राह्यस्य सङ्केतितार्थस्य दीर्घेण वृत्तिग्रन्थेन व्यवहितत्वात् स्मारयति—**स इति साक्षात् सङ्केतित** इति । मुख्यार्थपरामर्शभ्रम निवारयितुमाह— **अस्येति शब्दस्येति** । सङ्केत-

(सू० १४) मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया ॥८॥

ग्राह्य शब्दवृत्तिशक्त्याख्य पदार्थान्तरम् अभिधा इति धर्ममीमासकमतम्, सङ्केतग्राह्य शब्दार्थयोस्तादात्म्यम् अभिधा इति पातञ्जल मत वाऽनेन सूत्रेणोपनिबद्ध ज्ञेयम् । सङ्केतश्च धर्ममीमासकमते कुत्रचित् व्युत्पित्सुभिर्वृद्धादिभि प्रयोज्यानि प्रत्यक्षानुमानार्थापत्तिप्रमाणानि कुत्रचित् तु शब्दशक्तिज्ञानामुपदेश , पातञ्जलमते तु शब्दार्थयो परस्पराध्यास । सङ्केतद्वारा शक्तेर्ग्राहकाणि च 'शक्तिग्रह व्याकरणोपमानकोशाप्तवाक्याद' इत्यादिना प्राचीनपद्येन परिगणितानि ॥ १३ ॥

'स्याद् वाचको लाक्षणिक शब्दोऽत्र व्यञ्जकस्त्रिधा' (सू० ७) इति उद्देशस्य क्रममनुसृत्य वाचके शब्दे निरूपिते लाक्षणिक शब्दो निरूपणीय , किन्तु लाक्षणिकशब्दनिरूपण लक्षणानिरूपणाधीनम् इति तावत् लक्षणा निरूपयति—**मुख्यार्थबाधे** इत्यादिना । **मुख्यार्थबाधे** मुख्यार्थस्य वाच्यार्थस्य प्रवाहादिरूपस्य **बाधे** घोषाद्यधिकरणत्वाद्यसम्भवरूपे बाधे सति, अथवा मुख्यार्थस्य तद्रूपेण वक्तृतात्पर्यविषयत्वस्य अभावे सति इत्यर्थ । **तद्योगे** मुख्यार्थसम्बन्धे च सति । **रूढित** प्रयोजनाभिप्रायरहितया प्रयोगपरम्परया । **अथ** अथवा । **प्रयोजनात्** प्रयोजनमभिप्रेत्य । ल्यबन्ताध्याहारे कर्मणि पञ्चमी ''ल्यब्लोपे कर्मण्यधिकरणे च' इति वार्त्तिकस्य प्रामाण्यात् । **अन्यो** मुख्यार्थभिन्न । **यत्** इति लक्ष्यते इति क्रियाया विशेषणम् । **लक्ष्यते** प्रतिपाद्यते अथवा स्मर्यते । **सा** प्रतिपत्ति स्मृतिर्वा । यद्यपि यद् इति क्लीबलिङ्गे प्रक्रान्ते तल्लिङ्गकस्तदिति प्रयोग' स्वाभाविकतया सुबाधस्तथापि ''निर्दिश्यमानप्रतिनिर्दिश्यमानयोरेकतामापादयन्ति सर्वनामानि कामचारेण तल्लिङ्गतामुपाददते'' इति प्रक्रस्यमानलिङ्गग्रहणेन सा इति प्रयोगो न असाधु । **लक्षणा** उच्यते इत्यर्थ । सा च लक्षणा शब्दे **आरोपिता** ननु स्वाभाविकी **क्रिया** व्यापारो वृत्तिरित्यर्थ । एव च मुख्यार्थबोधबाधकज्ञानेन प्रयोगपरम्परासंस्कार-प्रयोजनवत्त्वनानान्यतरेण च जनिता मुख्यार्थसम्बन्धज्ञानजन्या मुख्यार्थसम्बन्धार्थविषया स्मृतिर्लक्षणा इति निर्गलितोऽर्थ । इद च लक्षण शक्यसम्बन्धेन अशक्यस्मृतिर्लक्षणा तयोपस्थितस्य पदार्थस्य पदार्थान्तरेणान्वयाद वाक्यार्थबोध इति वदता प्राचा मतेन । तथा हि प्रकरणपञ्चिकाया शालिकनाथ आह—''वाच्यास्यार्थस्य वाच्यार्थे सम्बन्धानुपपत्ति । तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते'' इति । प्राप्तस्य स्मृतस्येत्यर्थ । आचार्यकुमारिलभट्टश्च—''अभिधेयाऽविनाभूते प्रवृत्तिर्लक्षणेष्यते'' [त० वा० १।८।२२] इति । अस्य च मम्मटसम्मत पाठ —''अभिधेयाविनाभूतप्रतीतिर्लक्षणेष्यते ' इति (सू० १८, वृत्तौ), प्रतीति = स्मृति । प्राचीनश्च आलङ्कारिक आचार्यमम्मट प्राचा मतमेवानुसरतीति युक्तमेव । न च शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थयो सम्बन्ध अर्थप्रतिपत्तिहेतुर्वा वृत्ति (न तु प्रतिपत्तिरेव वृत्ति) इति वृत्तिसामान्यलक्षणस्य मम्मटोक्तलक्षणालक्षणेऽननुगमात् तत्र दोष शङ्कनीय , लक्षणाया पूर्वोक्तपारिभाषिकवृत्तित्वम् अत्यावश्यकम् इति

ईश्वरेणा (राजा) अनाज्ञापितत्वात्, धर्मसूत्रकारैरपठितत्वात्, लक्षणाशरीरं स्मृतिविशेष एवेति स्वीकारे बाधकाभावाच्च । अन्ये तु लक्षणाया वृत्तिसामान्यलक्षणस्य पूर्वोक्तविधस्य शङ्गेशादिप्रतिपादितस्य अनुगतये शक्यसम्बन्धपरत्वेनैव मम्मटोक्तलक्षणालक्षणसूत्रव्याख्यानं रोचयन्ते । तेषां मते तु मुख्यार्थबाधे सति मुख्यार्थसम्बन्धे च सति रूढितः प्रयोजनवशाद् वा यत् यया वृत्त्या (शक्यसम्बन्धरूपया) मुख्यभिन्नोऽर्थो **लक्ष्यते** प्रतिपाद्यते **सा** वृत्तिर्लक्षणेत्युच्यते इत्यर्थः । **लक्ष्यते** इत्यस्य स्मर्यते प्रतिपाद्यते वेति अर्थस्य स्वीकारात् द्वयोरपि पक्षयोर्नान्योन्याश्रयदोषः । द्वितीयं पक्षमाश्रित्यैव विश्वनाथेन स्फुटमुक्तम्—"मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते । रूढेः प्रयोजनाद् वाऽसौ लक्षणा शक्तिरर्पिता" इति (साहित्यदर्पणे २।५) । ननु द्वितीयं पक्षमनुसृत्य शक्यसम्बन्धस्य लक्षणात्वे स्वीकृते मूलोक्तं मुख्यार्थयोगस्य (शक्यसम्बन्धस्य) लक्षणाहेतुत्वं कथं सङ्गच्छते ? नहि तदेव कारणं तदेव कार्यं च भवतीति । मुख्यार्थयोगे इति पदस्य अन्यार्थकत्वस्य कल्पनायां कृतायामपि "हेत्वभावान्न लक्षणा" इति सप्तविंशसूत्रस्य वृत्तौ "मुख्यार्थबाधादित्रयं हेतुः" इति मूलकाराभिन्नवृत्तिकारवचनस्यान्यथयितुमशक्यत्वात् सा कल्पना न स्थिरा भवतीति मम्मटकारिकाया मुख्यार्थसम्बन्धरूपलक्षणापरत्वेन व्याख्यानमसङ्गतमेवेति । अत्रोच्यते—शाब्दबोधजनकशक्यसम्बन्धो हि लक्षणा । मुख्यार्थबाधादित्रयं हेतुः इत्यत्र हेतुपदं च शक्यसम्बन्धरूपाया लक्षणाया विशेषणीभूता या शाब्दबोधजनकता तस्याः प्रयोजकस्य प्रतिपादकम् । एवञ्च मुख्यार्थबाध-तद्योग-रूढिप्रयोजनान्यतराणि लक्ष्यार्थशाब्दबोधसामग्रीरूपाणि इति बोध्यम् । तथा च सति "मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्" इति ग्रन्थो लक्ष्यार्थशाब्दबोधसामग्रीप्रदर्शनपरो मन्तव्यः । एवं च लक्ष्यार्थशाब्दबोधसामग्रीभूतस्य शक्यसम्बन्धस्य लक्षणात्वे न काप्यनुपपत्तिः, न हि अस्मिन् पक्षे शक्यसम्बन्धो लक्षणाहेतुः लक्षणारूपश्च इति कार्यकारणैक्यापत्तिर्नैव भवति, अस्मिन् पक्षे शक्यसम्बन्धस्य लक्षणां प्रत्यहेतुत्वात्, लक्ष्यार्थशाब्दबोधं प्रत्येव हेतुत्वात् । तस्मात् शक्यसम्बन्धरूपलक्षणापरत्वेनापि मम्मटकारिका नेतुं शक्यैवेति । एवञ्च उपपन्न एवायं द्वितीयोऽपि पक्षस्तथापि महाभाष्यकारमते (४।१।४८) गोतममते (न्या० सू० २।२।६१), उद्योतकरमते (२।२।६१) च तद्धर्मविशिष्टेऽन्यस्मिन्नर्थे शक्यतावच्छेदकधर्मारोपस्य लक्षणात्वं नागेशेन लघुमञ्जूषाया प्रदर्शितम्, न च शक्यतावच्छेदकरूपेण लक्ष्यार्थस्य प्रतीतौ "कचः तस्त्रस्यति वदनं वदनात् कुचमण्डलं बिभेति । मध्याद् बिभेति नयनं नयनादधरः समुद्विजति' इत्यत्र कच-वदन-कुच-मध्य-नयना-ऽधर-पदानां राहु-चन्द्र-कमल-सिंह-मृग-पल्लव-रूपेषु अर्थेषु लक्षणया कचत्वादिरूपशक्यतावच्छेदकरूपेण राहुप्रभृतिलक्ष्याणां भाने स्वीकृते त्रासादेरनुत्पत्तिरिति वाच्यम् सर्वत्र लक्ष्ये तत्तद्धर्मविशिष्टे श यतावच्छेदकधर्मस्यारोप इति कचत्वादिना राहुत्वादिविशिष्टस्य बोधे स्वीकृते त्रासाद्यनुपपत्तेरभावात्, सर्वत्र न लक्षकधर्मप्रतीत्यैव प्रयोजनप्रतीतिः "उपकृतं बहु तत्र" इत्यादौ लक्ष्यधर्मप्रतीत्यैव प्रयोजनस्य सम्प्रत्ययात् इति, न्यायकोशकारादिभिश्च "शक्यादशक्योपस्थितिर्लक्षणा" इति,

'कर्मणि कुशल' (उदा० ११) इत्यादौ दर्भग्रहणाद्ययोगाद् 'गङ्गाया घोष' (उदा० १२) इत्यादौ च गङ्गादीना घोषाद्याधारत्वाद्यसम्भवाद् मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्यादौ च सम्बन्धे, रूढित प्रसिद्धे, तथा 'गङ्गातटे घोष' (उदा० १३) इत्यादे प्रयोगाद् येषा न तथा प्रतिपत्ति तेषा पावनत्वादीना धर्माणा तथाप्रतिपादनात्मन प्रयोजनाच्च ।

"अशक्ये तात्पर्यविषयत्व लक्षणा" इति, "शक्यसम्बन्धेन अशक्यप्रतिपत्तिर्लक्षणा" इत्येव प्राचा लक्षणालक्षणानि उल्लिखितानि इति, आचार्यकुमारिलभट्ट-शालिकनाथादिभिश्च लक्षणाया शक्यसम्बन्धत्वस्य उल्लेखो न कृत इति, चित्सुखमुनिनाऽपि "मानान्तरविरुद्धे तु मुख्यार्थस्य परिग्रहे । अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते" इति प्रतीतेरेव लक्षणात्वमुल्लिखितमिति, मुकुलभट्टेनाभिधावृत्तिमातृकायाम् 'अर्थावमेयस्य पुनर्लक्ष्यमाणत्वमुच्यते' इति लक्षणालक्षण सूचितमिति च प्राचीनसमये लक्षणाया शक्यसम्बन्धरूपत्वस्य अप्रसिद्धत्वात् प्राचीनस्य आलङ्कारिकस्य मम्मटस्यापि मते अर्वाचीनाना शक्यसम्बन्धलक्षणावादिना मत नैवारोपणीयमिति अस्माक प्रतिभाति ॥ ८ ॥

कारिका व्याचष्टे—**कर्मणि कुशल** इत्यादिना । **कर्मणि** कार्ये **कुशलो** निपुण । अत्र कुशलपद कुशान् लाति (आदत्ते) इति व्युत्पत्त्या कुशग्राहिवाचकम्, निपुण तु लक्षणया बोधयति । न च कुशलशब्दाद् मुख्यार्थबाधप्रतिसन्धान विनैव निपुणरूपस्यार्थस्य बोधात् कुशलपद निपुणे शक्तमेवेति वाच्यम्, इदानीमस्माक तथा प्रतीतावपि प्राचा कुशलपदाद् योगार्थप्रतीतिपूर्विका लक्ष्यार्थप्रतीतिमादाय तत्र लाक्षणिकत्वस्य व्यवहारात् । क्लृप्तावयवशक्तिकस्य शक्यादन्यत्र प्रयोगस्य लक्षणयैवोपपत्तौ अवयवशक्त्यतिरिक्तशक्तिकल्पनाया अन्याय्यत्वात् कुशलादिपदाना निपुणाद्यर्थे लाक्षणिकत्वमित्यन्ये । मुख्यार्थबाध दर्शयति—**दर्भग्रहणाद्ययोगादिति** । यस्मिन् पुरुषादौ अय कर्मणि कुशल इत्यादे प्रयोगस्तत्र दर्भग्रहणादे सम्बन्धस्याभावादित्यर्थ । **गङ्गाया** जलप्रवाहविशेषे **घोष** आभीरपल्ली गोपालग्राम इत्यर्थ । विवेचकत्व दर्भग्राहिणि निपुणे च वर्तते इति मुख्यार्थदर्भग्राहि-लक्ष्यार्थनिपुणयो साधर्म्य सम्बन्ध । सामीप्य स्वसयुक्तसयोगपरम्पराऽऽत्मा, निकटतेत्यर्थ । तच्च गङ्गातटयो सम्बन्ध । कुशलादिपदलक्षणाया रूढिर्लक्ष्यार्थबोधसामग्रीभूतेति दर्शयन्नाह—**रूढितः प्रसिद्धेरिति** । **रूढित** इत्यस्यार्थ प्रसिद्धेरिति । लौकिकप्रयोगपरम्परयेत्यर्थ । गङ्गादिपदलक्षणाया प्रयोजन भवतीत्याह—**यथा गङ्गातटे** इत्यादिना । तथा समुच्चये । **येषा** पावनत्वादीना **तथा** सातिशयत्वेन **प्रतिपत्ति** प्रतीति **तथाप्रतिपादनात्मन** सातिशयत्वप्रत्यायनरूपात् **प्रयोजनात्** फलाच्च हेतुभूतात् । अन्यत्र अन्यशब्दप्रयोग तद्धर्मप्रापणायेति न्यायादित्यभिप्राय । **मुख्येन** साक्षात् सङ्केतितेन अर्थेन उपलक्षित, इत्थम्भूतलक्षणे तृतीयाया स्मरणात् । **अमुख्योऽर्थोऽ**सङ्केतितोऽर्थो **यत् लक्ष्यते** स्मर्यते प्रतीयते प्रत्याय्यते वा **स** स्मृतिरूप वस्तुत शब्देऽवर्तमानत्वेऽपि तत्र **आरोपित** कल्पित अत एव शब्दव्यापारत्वेन व्यवह्रियमाण **सान्तरार्थनिष्ठ** अन्तर व्यवधान तेन सह वर्तते इति

(सू० १५) **स्वसिद्धये पराक्षेप परार्थं स्वसमर्पणम् ।**
उपादानं लक्षण चेत्युक्ता शुद्धैव सा द्विधा ॥ ९ ॥

सान्तरो मुख्यार्थोपस्थित्यादिना व्यवहितो योऽर्थं निपुण-तटादिरूप तत्र **निष्ठा** अन्तो विश्रान्तिर्वा यस्य स तादृश निपुण-तटादिविषयक **शब्दव्यापार** कुशल-गङ्गादिशब्दवृत्ति-विशेष लक्षणा इत्युच्यते इत्यर्थ । यद्यपि गङ्गाया घोष इत्यादौ गङ्गादिपदेन बोधित प्रवाहादि तटादिक स्मारयति इति अर्थव्यापारो लक्षणा न तु शब्दव्यापार तथापि वाच्यव्यापार तात्स्थ्याद् वाचके आरोप्यते, अत लक्षणा शब्दव्यापार इति व्यवह्रियते, तादृशारोपितलक्षणाख्यव्यापारयोगात् शब्दोऽपि लाक्षणिक इत्युच्यते इति बोध्यम् ॥ १४ ॥

यद्यपि सामान्यतो लक्षणाया निरूपणेनैव पूर्वोद्दिष्टो लाक्षणिको लक्षको वा शब्दो निरूपयितु शक्यते इति तदर्थ नाधिक वक्तव्यम्, तथापि **स्मृताना** केषाञ्चन लक्षणाभेदानाम् अर्थान्तरसङ्क्रमितवाच्यध्वन्यत्यन्ततिरस्कृतवाच्यध्वन्योर्निरूपणे, रूपकस्यातिशयोक्तेश्च निरूपणे सामर्थ्यातिशयादिव्यङ्ग्यार्थनिरूपणे चाऽस्य ग्रन्थस्य मुख्ये प्रतिपाद्ये विषये उप-योगित्वेन **उपेक्षानर्हत्वात्** प्रसङ्गसङ्गत्या कांश्चिल्लक्षणाभेदान् प्रतिपादयति—**स्वसिद्धये पराक्षेप** इत्यादिना । **स्वस्य** कुन्तादेर्वाच्यस्यार्थस्य **सिद्धये** अन्वयबोधविषयत्वसिद्धये **परस्य** अवाच्यस्याऽर्थस्य कुन्तधारिपुरुषादे आक्षेपो ग्रहणम् **उपादानम्** उच्यते, अन्ये तु शक्य-स्याप्यर्थस्योपादानम् उपादानम् मन्यन्ते, **परार्थं परस्य** अवाच्यस्यार्थस्य तीरादे अन्वय-बोधविषयत्वसिद्धये **स्वस्य** वाच्यस्यार्थस्य प्रवाहादे **समर्पणम्** अवाच्यार्थतीराद्युपलक्षणत्वेन तीरादौ त्याग, तीराद्युपलक्षणीकरणम् इति यावत्, **लक्षणम्** इत्युच्यते, **इति** एताभ्या-मुपाधिभ्या **शुद्धा एव** शुद्धरूपा एव न तु गौणी अपि **सा** पूर्वोक्ता लक्षणा द्विधा द्विप्रकारा भवतीत्यर्थ । शुद्धा लक्षणा **उपादानलक्षणा लक्षणलक्षणा चेति** द्विविधा भवतीति फलि-तोऽर्थ । एते एव **अजहत्स्वार्था जहत्स्वार्था** चेति क्रमेणोच्येते अन्येषु शास्त्रेषु । सादृश्याल्-लक्षणा गौणी, सम्बन्धान्तरतो लक्षणा शुद्धेति वक्ष्यति (सू० १८) ।

ननु कथ शुद्धाया एव इमौ द्वौ भेदौ ? गौण्या अपि आभ्या भेदाभ्या भाव्यम्, तथा च विश्वनाथ साहित्यदर्पणे गौणी प्रयोजनवती सारोपाम् उपादानलक्षणामुदाहरति—"राजकुमारेषु तत्सदृशेषु च गच्छत्सु 'एते राजकुमारा गच्छन्ति' इति ।" तामेव साध्यव-सानामुदाहरति—"राजकुमारा गच्छन्ति" इति । गौणी प्रयोजनवती सारोपा लक्षण-लक्षणामुदाहरति—"गौर्वाहीक" इति, तामेव साध्यवसानामुदाहरति—"गौर्जल्पति" इति । अत्र गोविन्दठक्कुरादयो वदन्ति—तत्र लक्षणाबीजभूतस्य सम्बन्धस्य सादृश्यत्वे शक्यसादृश्यस्य शक्यावृत्तितया शक्याशस्य अलक्ष्यताया आपातात् शक्यार्थोपादानेन लक्षणा न भवतीति न सा उपादानलक्षणा, उक्तस्य सम्बन्धस्य सादृश्यान्यत्वे च सा लक्षणा न गौणी, सादृश्यसम्बन्धप्रयुक्तलक्षणाया एव गौणीत्वादिति । अन्ये तु 'कुन्ता प्रविशन्ति' इत्यादावपि पीडाकारित्वादिना लक्षणाया गौणत्व सम्भवत्येव, यदा यत्कि-

'कुन्ता प्रविशन्ति' (उदा० १४), 'यष्टय प्रविशन्ति' (उदा० १५) इत्यादौ कुन्तादिभिरात्मन प्रवेशसिद्ध्यर्थं स्वसयोगिन पुरुषा आक्षिप्यन्ते, तत उपादानेनेय लक्षणा ।

'गौरनुबन्ध्य' (उदा० १६) इत्यादौ श्रुतिचोदितमनुबन्धन कथ मे स्यादिति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते "विशेष्य नाभिधा गच्छेत् क्षीणश-

---

श्चिद् गोसदृशत्वेन गोवाहीकसमुदायप्रतिपिपादयिषया गाव एते यान्तीति प्रयुज्यते तत्र तत्रापि गौणी उपादानलक्षणा भवत्येव, रूपके भेदाघटितसादृश्यस्यैव सम्बन्धतया विवक्षणीयत्वेन भेदाघटितशक्यसादृश्यस्य शक्यवृत्तित्वमपि न राजदण्डवारितम् इति गौण्यपि उपादानलक्षणा भवत्येवेति वदन्ति । गौणी उपादानलक्षणा तु इष्टैव सर्वेषाम् ॥ ९ ॥

उपादानलक्षणामुदाहरति—'कुन्ता प्रविशन्ति' 'यष्टय प्रविशन्ति' इति । तत्र लक्षण सङ्गमयति—**कुन्तादिभिरि**त्यादिना । **स्वसयोगिन** कुन्तादिमन्त । एतेन मुख्यार्थयोगो दर्शित । **आक्षिप्यन्ते** लक्षणया बोध्यन्ते ग्राह्यन्ते वा । **तत** तस्मात् कारणात् । **उपादानेन** परार्थग्रहणेन स्वार्थापरित्यागसहितेन इत्यर्थ । स्वार्थस्यापि उपादानेनेति केचित् । तत्र कुन्तादीनामतिगहनत्वस्य प्रत्यायन फलम् । 'काकेभ्यो दधि रक्ष्यताम्' 'छत्रिणा यान्ति' इत्यादावपि इयमेवोपादानलक्षणा ।

ननु विशेषणे कुन्ते शक्तस्य कुन्तशब्दस्य यदि विशिष्टे कुन्तवति लक्षणा तदा गोत्वे जातिरूपविशेषणे शक्तस्य गोपदस्य गोत्वविशिष्टे धर्मिणि व्यक्तौ लक्षणा स्यादेव, तथा च मण्डनमिश्र आह—"जातेरस्तित्वनास्तित्वे न हि कश्चिद् विवक्षति । नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे" इति, तथैव अभिधावृत्तिमातृकाया मुकुलभट्टोऽप्याह—"यत्र स्वसिद्ध्यर्थतया वस्त्वन्तराक्षेपो भवति तत्रोपादान, यथा—गौरनुबन्ध्य इति । अत्र हि गोत्वस्य याग प्रति साधनत्व शाब्द व्यक्त्याक्षेपमन्तरेण नोपपद्यते इति तत्सिद्ध्यर्थतया व्यक्तेराक्षेप" इति, "सा हि (व्यक्ति) न शब्दव्यापारादवसीयते, 'विशेष्य नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायात्, शब्दस्य जातिमात्रपर्यवसितत्वात्, जातिस्तु व्यक्तिमन्तरेण यागसाधनभाव न प्रतिपद्यते इति शब्दप्रत्यायितजातिसामर्थ्यादत्र जातेराश्रयभूता व्यक्तिराक्षिप्यते, तेनासौ (व्यक्ति) लाक्षणिकी" इति च । अत प्रसिद्ध श्रौतम् उपादानलक्षणोदाहरण परित्यज्य किमर्थमुदाहरणान्तर दत्तमित्याक्षेप परिहरन् शिष्यबुद्धिवैशद्याय आह—**गौरनुबन्ध्य** इत्यादि । अनुबन्ध्य यूपे नियोजनीय, आलम्भनीय इत्यर्थ । **श्रुतिचोदित** वेदविहितम् **अनुबन्धनम्** आलम्भन **मे** मम जाते **कथ** केन प्रकारेण स्याज्जातेरमूर्तत्वाद्, अतो ममालम्भन न सम्भवतीति मुख्यार्थस्य बाधाज् **जात्या** गोपदार्थभूतया **व्यक्ति** गोत्वजातिव्यक्तिसाधनभूतो गोपिण्ड **आक्षिप्यते** लक्ष्यते । अत्र गोत्वजातौ व्यक्तवाक्प्राणित्वारोपेण एतद्ग्रन्थकृत्प्रौढिमात्रसिद्धेन इयमुक्तिविच्छित्ति । ननु गोव्यक्तेर्न लक्ष्यार्थत्वम् अभिधयैव तस्या प्रतिपादनादिति शङ्का परिहरति—**न तु शब्देने**त्यादिना । व्यक्ति **शब्देन** शब्दव्यापारेण अभिधया **न तु उच्यते** न हि

क्तिर्विशेषणे'' इति न्यायाद् इति उपादानलक्षणा तु नोदाहर्तव्या, न हि अत्र प्रयोजनमस्ति न वा रूढिरियम्, व्यक्त्यविनाभावित्वात् तु जात्या व्यक्तिराक्षिप्यते, यथा 'क्रियताम्' (उदा० १७) इत्यत्र कर्ता, 'कुरु' (उदा० १८) इत्यत्र कर्म, 'प्रविश' (उदा० १९) 'पिण्डीम्' (उदा० २०) इत्यादौ गृहम् भक्षय इत्यादि च ।

प्रत्याय्यते, **विशेषणे** गोत्वादौ **क्षीणशक्ति** विरतव्यापारा अभिधा शब्दबुद्धिकर्मणा विरम्य व्यापाराभावाद् **विशेष्य** व्यक्तिरूप धर्मिण **न गच्छेत्** न प्राप्नुयाद् न बोधयेद् **इति न्यायात्**, अतोऽर्थावसेया अर्थाद् अर्थव्यापारभूतलक्षणागम्या एव व्यक्ति , ''अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते'' इति सिद्धान्ताद् **इति** गौरनुबन्ध्य इत्यादि—न्यायादित्यन्तग्रन्थेन अनुदितेन मुकुलभट्टाद्यभिमतेन प्रकारेण **उपादानलक्षणा तु न उदाहर्तव्या**। अनुदाहर्तव्यत्वे हेतुमाह—**न हि अत्र** इत्यादिना । **अत्र** गौरनुबन्ध्य इत्यादौ **न हि** तादृग**प्रयोजनमस्ति** यत्प्रत्यायनाय स्वाभाविक तत्र तच्छब्दप्रयोग परित्यज्य अन्यत्र अन्यशब्दप्रयोग आश्रयणीयो भवेदित्यर्थ । ननु रूढ्यापि अन्यत्र अन्यशब्दप्रयोगो भवति इति चेत् तत्राह —**न वा रूढिरियम्** इति । ननु गवि अनादिपरम्परागतप्रयोगरूपा भूरिप्रयोगरूपा च रूढि गोशब्दस्य अस्त्येव तत् कथमिदमुक्तम् इति चेद् अत्रोच्यते—यथा केवलशक्यार्थे देशे प्रयुक्तस्य कलिङ्गशब्दस्य लक्ष्यार्थे पुरुषे भूरिप्रयोग तादृश **केवलशक्यार्थे प्रयुक्तस्य शब्दस्य लक्ष्यार्थे भूरिप्रयोग एव लक्षणाहेतुभूता रूढि** न तु भूरिप्रयोगमात्रम्, गोशब्दस्य तु व्यक्ति विना शक्यार्थमात्रे गोत्वे प्रयोगस्याऽभावात् तत्र लक्षणाहेतुभूतरूढ्यभाव एवेति साधूक्त न वा रूढिरियमिति । न वाऽत्र रूढिरस्तीत्यनुक्त्वा न वा रूढिरियम् इति वदतो ग्रन्थकारस्य अयमेव आशय —**इयम्** गोशब्दे वर्तमाना व्यक्तिविषया रूढि **न** रूढि लक्षणाहेतुभूता रूढिर्न इति । ननु यदि जातिशब्दाना व्यक्तौ न लक्षणा कथ तर्हि जातिशब्देभ्यो व्यक्तेर्बोध इति चेत् तत्राह—**व्यक्त्यविनाभावित्वात् तु** इत्यादि । व्यक्ति विना जाते प्रतीतेरभावाज् **जात्या व्यक्ति· आक्षिप्यते** अनुमीयते कल्प्यते वा । एवञ्च अनुमानेन अर्थापत्त्या वा सहकृतेन गवादिपदेन व्यक्तेर्भानम् । ननु अनुमानेन अर्थापत्त्या वा उपस्थितस्य पदार्थस्य कथ शाब्दबोधे भानम् ? तदर्थविषयकशाब्दबोध प्रति तदर्थविषयकवृत्तिज्ञानाधीनोपस्थितेर्हेतुत्वात् । अत्र वदन्ति—तत्पदार्थविषयकशाब्दबोध प्रति तत्पदजन्यपदार्थोपस्थितेरेव हेतुत्वस्य स्वीकाराद् अनुमानादिसहकृतगवादिपदजन्याया गोव्यक्तिरूपपदार्थोपस्थितेरेव सत्त्वेऽपि गोव्यक्ते शाब्दबोधे भान सुलभमेवेति । ननु विभक्ते प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरप्रकृत्यर्थे गोव्यक्त्यादौ द्वितीयादिविभक्त्यर्थकमत्वाद कथमन्वय ? अत्राहु—विभक्ते प्रकृतितात्पर्यविषयान्वितस्वार्थबोधकत्वव्युत्पत्ते स्वीकारान् न कोऽपि दोष इति । अविनाभावेन आक्षेपे दृष्टान्तमाह—**यथा क्रियता**मित्यादिना । यथा क्रियताम् इत्युक्ते कर्ता आक्षिप्यते, कुरु इत्युक्ते कर्म आक्षेपेणैव लभ्यते, कृते कर्त्रविनाभावित्वात् कर्माविनाभावित्वाच्च । इद प्रभाकरमतानुसारम अर्थस्याक्षेपो भवतीति

'पीनो देवदत्तो दिवा न भुङ्क्ते' (उदा० २१) इत्यत्र च रात्रिभोजनं न लक्ष्यते श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् ।

'गङ्गायां घोषः' (उदा० २२) इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गा-शब्दः स्वार्थमर्पयति इत्येवमादौ लक्षणेनैषा लक्षणा ।

स्वीकृतम् । भट्टमतानुसारं शब्दाक्षेपं दर्शयति—**प्रविश पिण्डीम्** इत्यादिना । प्रविश इत्युक्ते प्रवेशस्य प्रवेश्याविनाभावित्वाद् यथा गृहमिति प्रवेश्यबोधकपदमाक्षिप्यते, यथा च पिण्डीम् इत्युक्ते कर्मणः क्रियाविनाभावित्वात् समुचितं भक्षयेति क्रियापदमाक्षिप्यते तथैव जात्या व्यक्तिराक्षिप्यते इत्यर्थः । **पिण्डी** पिष्टकविशेषः, पिण्डिका वा 'पेडा' इति प्रसिद्धा शर्करासम्स्कृतकूर्चिकापिण्डिका तक्रपिण्डिका वा वैद्यके प्रसिद्धा, तथा हि भाव-मिश्रः— 'दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा । द्रवभावेन रहितं तक्रपिण्डः स उच्यते'' इति (भावप्रकाशे, दुग्धवर्ग, श्लो० ३१) ।

प्रसङ्गात् मुकुलभट्टोक्तमुदाहरणान्तरमपि निरस्यति—**'पीनो देवदत्तः'** इत्यादिना । मुकुलभट्टो हि अभिधावृत्तिमातृकायाम् उपादानलक्षणाया द्वितीयमुदाहरणमाह—''यथा च 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति । अत्र हि पीनत्वं दिनाधिकरणभोजनाभावविशिष्ट-तयाऽवगम्यमानमेव कार्यत्वात् स्वसिद्ध्यर्थत्वेन कारणभूतं रात्रिभोजनमाक्षेपादस्यन्तर्गी-करोति । अत्र च रात्रौ भुङ्क्ते इत्येतच्छब्दाक्षेपपूर्वकतया प्रमाणस्यापरिपूर्णस्य परिपूर-णाच्छ्रुतार्थापत्तित्वं भवतु, अथवा कारणस्यैव रात्रिभोजनस्य आक्षेप इति सर्वथा स्वसि-द्ध्यर्थत्वेन अर्थान्तरस्याक्षेपपूर्वकतयाऽन्तर्भावनादुपादानत्वमुपपद्यते'' इति । पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रापि मुकुलभट्टोक्ते उदाहरणे लक्षणैव नास्ति कुतो लक्षणाविशेष-रूपा उपादानलक्षणा इत्याह—**रात्रिभोजनं पीनत्वेन न लक्ष्यते** इति । तत्र हेतुमाह—**श्रुतार्थापत्ते**रित्यादिना । तस्य रात्रिभोजनस्य श्रुतार्थापत्तेरर्थापत्तेर्वा विषयत्वात् प्रमाणा-न्तरेण ज्ञातस्य अर्थस्य च ''अनन्यलभ्यो हि शब्दार्थः'' (भामत्याम् १।३।१७) इति न्यायेन अशाब्दत्वेन तत्र लक्षणाया अस्वीकार्यत्वात् । यत्र श्रुतवाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति तत्र श्रुतार्थापत्तिरिति व्यवहारः, यत्र ज्ञातोऽर्थोऽनुपपन्नो-ऽर्थान्तरं कल्पयति तत्र अर्थापत्तिरिति व्यवहारः । तत्र 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति वाक्यं श्रुत्वा रात्रिभोजने कल्पिते श्रुतार्थापत्तित्वम्, दिवा अभुञ्जानं पीनं देवदत्तं दृष्ट्वा तस्य रात्रिभोजने कल्पिते अर्थापत्तित्वं ज्ञेयम् । अथवा श्रुतः शब्दस्तत्कल्पिका अर्थापत्तिः श्रुतार्थापत्तिः, भट्टमते दिवाभोजनाभाववतः पीनत्वं रात्रिभोजनं विना अनुप-पन्नमिति अन्यथाऽनुपपत्त्या 'रात्रौ भुङ्क्ते' इति शब्दः कल्प्यते । अस्मिन् मते रात्रिभोज-नस्य श्रुतार्थापत्तिविषयत्वम् । प्रभाकरमते तु अर्थमात्रं कल्प्यते इति तन्मते रात्रिभोज-नस्य अर्थापत्तिविषयत्वम् । रात्रिभोजनादिकल्पनारूपाया प्रमितौ अर्थस्य आपत्तिः कल्पना इति व्युत्पत्त्या, तत्कल्पनाकरणभूते पीनत्वादिज्ञाने च अर्थस्य आपत्तिः कल्पना यस्मादिति व्युत्पत्त्या अर्थापत्तिपदप्रयोगः ।

उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात् । अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम्, तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः, गङ्गादिसम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ।

लक्षणलक्षणामुदाहरति—**'गङ्गायां घोषः'** इति । तत्र लक्षणलक्षणा[illegible]दयति—**अत्र तटस्येत्यादिना** । **तटस्य** घोषाधिकरणत्वेन अन्वयस्य सिद्धये गङ्गाशब्दः प्रवाहरूपं स्वार्थम् **अर्पयति** तटोपलक्षणीभूतधर्मत्वेन तटे सङ्क्रामयति **इति एवमादौ** एवम्प्रकारके स्थले **लक्षणेन** मुख्यस्यार्थस्य अन्यार्थोपलक्षणीकरणेन **एषा लक्षणा** लक्षणलक्षणा इत्यर्थः । उपादानलक्षणायां शक्यार्थस्यापि इतरपदार्थेनान्वयः, लक्षणलक्षणायां तु लक्ष्यस्यैव इतरपदार्थेनान्वय इति भेदोऽपि बोध्यः ।

शुद्धैव सा द्विधेति कारिकांशे प्रयुक्तं शुद्धेति पदम् उदाहरणनिर्देशपूर्वकं व्याचष्टे—**उभयरूपेत्यादिना** । **उभयरूपा** उपादानलक्षणारूपा लक्षणलक्षणारूपा चेयं लक्षणा शुद्धेति शुद्धाया उदाहरणनिर्देशः । शुद्धात्वे हेतुं निर्दिशन् शुद्धेति पदं व्याचष्टे—**उपचारेणामिश्रितत्वाद्** इति । सादृश्याद् एकस्य अन्यत्र अभेदेन आरोपः उपचारः, सादृश्यसम्बन्धेन प्रवृत्तिः उपचारः इत्यन्ये, अत्यन्तं पृथग्भूतयोः पदार्थयोः सादृश्यातिशयाद् भेदप्रतीतिस्थगनम् उपचारः इति प्रदीपकारादयः, शास्त्रान्तरे तु उपचारशब्दो लक्षणार्थे एव प्रयुज्यते । उपचारशब्दश्च नानार्थः, तथाहि—"उपचारो लक्षणायां चिकित्सायां च सत्कृतौ । व्यवहारे नमस्कारे व्रतेऽभ्यासे च वस्तुनि" इति कोषः । तेन **अमिश्रितत्वाद्** रहितत्वाद् इत्यर्थः । ननु लक्ष्यलक्षकभेदप्रतीतिरूपं ताटस्थ्यं लक्षणायाः शुद्धात्वे हेतुरिति मुकुलभट्टेनोक्तम्, तथाहि— 'यैषा लक्षणा शुद्धा उपादानलक्षणात्मकत्वेन द्विप्रभेदा प्रतिपादिता सा लक्षकार्थानुपरक्तत्वात् तटस्थतया प्रतीयमाने लक्ष्येऽर्थे द्रष्टव्या, न हि तत्र लक्षकार्थोपरक्ततया लक्ष्यस्यार्थस्यावगतिः, तथा हि गङ्गाया घोष इत्यत्र घोषाधिकरण-[illegible] गङ्गायां घोषो न वितस्तायामिति गङ्गाशब्दे प्रयुज्यमाने तटस्य स्रोतोविशेषेण [illegible] उपरागो न प्रतीयते, तटस्थत्वेनैव तस्य तटस्य प्रत्ययात्" इति, तत् कथमत्र उपचारामिश्रितत्वं [illegible] इति शङ्कां निरस्यन् शिष्यबुद्धिवैशद्याय आह—**अनयोर्लक्ष्यस्येत्यादि** । **अनयोः**, पूर्वमुक्तयोः उपादानलक्षणा-लक्षणलक्षणारूपयोः शुद्धाया भेदयोः, अर्थात् 'कुन्ताः प्रविशन्ति' 'गङ्गायां घोषः' इत्यादौ **लक्ष्यस्य** तटादेः **लक्षकस्य** गङ्गादेश्च **भेदरूपं** भेदप्रतीतिरूपं ताटस्थ्यं नास्ति । भेदप्रतीत्यभावस्य नियमेनैवाऽऽवश्यकत्वं दर्शयति —तटादीनां **गङ्गादिशब्दैरित्यादिना** । तटादीनां लक्ष्याणामर्थानां **गङ्गादिशब्दैः** गङ्गादिवाचकलक्षकशब्दैः **प्रतिपादने** बोधने कृते लक्षणामूलया व्यञ्जनया **तत्त्वप्रतिपत्तौ हि तत्त्वेन** [illegible] तटादेर्लक्ष्यस्य **प्रतिपत्तौ** अवगतौ सत्यां हि **प्रतिपिपादयिषितं** बोधयितुमिष्टं **प्रयोजनं** गङ्गादिल-[illegible] फलं तस्य तटादौ **सम्प्रत्ययः** सम्यक् प्रतीतिर्भवेत्. तटादीनां

(सू० १६) सारोपाऽन्या तु यत्रोक्तौ विषयी विषयस्तथा ।

आरोप्यमाण आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ।

गङ्गादिशब्दैः प्रतिपादने कृतेऽपि तटादौ **गङ्गादेः सम्बन्धमात्रस्य प्रतीतौ** सर्वैरङ्गीकृतायां तु मुख्यार्थवाचकेन 'गङ्गातटे घोष' इत्यादिना शब्देन अभिधानेऽपि तटादौ गङ्गादिसम्बन्धस्य प्रतीते सुलभत्वात् मुख्यशब्दाभिधानाल्लक्षणाया को भेद, मुख्यशब्देनार्थस्याभिधान विहाय लाक्षणिकशब्दप्रयोगस्य को विशेष ? किंशब्दोऽत्राक्षेपे, अर्थात् कोऽपि विशेषो न भवेत्; तथा च लक्षणोपासना निष्फला भवेत्, लक्षणोपासनायाः निष्फलत्वे तु 'गङ्गातटे घोष' इत्यादिवाचकं शब्द विहाय 'गङ्गायां घोष' इत्याद्यवाचकं शब्द कः प्रयुञ्जीत । तस्मात् फलविशेषस्य प्रतीतये हि लक्षणाश्रयणम्, फलविशेषस्य प्रतीतिश्च लक्ष्य-लक्षकयोः भेदस्य अप्रतीतावेव सम्यग् भवतीति "गङ्गायां घोषः" इत्यादौ लक्ष्य-लक्षकयोर्भेदस्य प्रतीतिर्न भवतीति स्वीकर्तव्यम्; "गङ्गाया घोष" इत्यत्र लक्षणायाः शुद्धात्व तु मुकुलभट्टस्याभीष्टम्, तत्र च लक्ष्यलक्षकयोः भेदस्य प्रतीतेरभावात् लक्ष्यलक्षकभेदप्रतीतिः लक्षणायाः शुद्धात्वे हेतुर्नैव भवितुमर्हति, किन्तु अस्मदुक्तम् उपचारामिश्रणमेव तत्र हेतुरिति भावः । प्रदीपकारस्य तु शब्देन लक्ष्येऽर्थे प्रतिपादिते तत्र मुख्याभेदो व्यञ्जनया प्रतिपाद्यते इति मतम् ॥ १५ ॥

ननु गौणी नाम अन्याऽपि वृत्तिरस्ति, तथा च कुमारिलभट्ट—"अथवा गौण्या वृत्तेरिह निमित्तमभिधीयते न लक्षणायाः । किञ्चानयोर्भेदोऽप्यस्ति ? बाढमस्ति । कुतः ? अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते । लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता । तत्र यथैवाकृतिवचन शब्दस्तत्सहचरितां व्यक्ति लक्षयति तथैव यष्टिमञ्चाश्वादयस्तत्तत्सम्बद्धपुरुषलक्षणार्था भवन्ति । अग्निर्माणवक इति तु नाग्नित्वाविनाभावेन माणवकः प्रतीयते । किं तर्हि ? वह्नित्वलक्षितादर्थाद् यत् पैङ्गल्यादि गम्यते । तेन माणवके बुद्धिः सादृश्यादुपजायते ।" इति (तन्त्रवार्तिके १।४।२२) । तथा च कथं शब्दार्थयोस्त्रैविध्यमित्याक्षेपं तूष्णीमेव परिहरन् गौणी लक्षणायामेवान्तर्भावयन् लक्षणाया भेदान्तरमाह—**सारोपाऽन्या तु** इत्यादिना । **अन्या** गौणी **तु** सारोपा साध्यवसाना चेति भेदद्वयमात्रयुक्तेत्यभिप्राय; **यत्र** विषयी आरोप्यमाणो गवादिः तथा **विषय** आरोपविषयः, यत्र गवादिरारोप्यते स वाहीकादिश्च **उक्तौ** भवतस्तत्र लक्षणा **सारोपा** भवति इत्यर्थः ।

सूत्रं विवृणोति—**आरोप्यमाण** इत्यादिना । विषयीत्यस्यार्थ आरोप्यमाण इति । **अनपह्नुत** अनाच्छादित प्रकाशितो वा **भेदो** वैधर्म्यं गोत्ववाहीकत्वादि ययोस्तौ । **सामानाधिकरण्येन** समानविभक्त्यन्ततया अभेदसम्बन्धकान्वययोग्यत्वेन । **निर्दिश्येते** उपस्थाप्येते । एवञ्च इदमारोप्यम् अयमारोपविषय इति भेदज्ञानेन सह वर्तमानया आरोपजन्यया आहार्यया विषयिविषयाभेदप्रतीत्या युक्तत्वं सारोपत्वं बोध्यम् ॥ १६ ॥

(सू० १७) **विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥ १० ॥**

विषयिणाऽऽरोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन् आरोपविषये सति साध्यवसाना स्यात् ।

(सू० १८) **भेदाविमौ च सादृश्यात्** सम्बन्धान्तरतस्तथा ।

गौणौ शुद्धौ च विज्ञेयौ

इमौ [illegible] सादृश्यहेतू भेदौ 'गौर्वाहीकः' (उदा० २३) इत्यत्र 'गौरयम्' (उदा० २४) इत्यत्र च। अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्या-

---

साध्यवसानिकां लक्षणामाह—विषय्यन्तःकृतेऽन्यस्मिन्निति । **अन्यस्मिन्** आरोपविषये **विषय्यन्तःकृते** आरोप्यमाणेन सह शब्दत एकीभूते सति **सा** लक्षणा **साध्यवसानिका** साध्यवसाना स्यादितिकारिकार्थः ॥ १० ॥

सूत्रं विवृणोति—विषयिणाऽऽरोप्यमाणेनेति । **आरोपविषये** वाहीकादौ **आरोप्यमाणेन** गवादिना **अन्तःकृते** निगीर्णे सति, अर्थात् आरोपविषयवाचकशब्दाप्रयोगाद् आरोप्यमाणवाचकशब्देनैव आरोपविषयस्यापि विषय्यभिन्नत्वेन प्रतीतौ कृतायां सा लक्षणा [illegible] इति भाव.। एवञ्च इदमारोप्यमयमारोपविषय इति भेदज्ञानेन असमानकालिकया आहार्यया विषयिविषयाभेदप्रतीत्या युक्तत्व साध्यवसानत्वं ज्ञेयम् ।

ननु गौणी लक्षणा सारोपा साध्यवसाना चेति द्वेधैवेति कस्मादभिप्रैति मम्मट.? गौण्या अपि उपादानलक्षणा लक्षणलक्षणा चेति द्वाभ्यामन्याभ्यामपि भेदाभ्या भाव्यम् । एतच्छङ्कासमाधान **शुद्धैव** सा द्विधेत्यस्य व्याख्याने कृत तत एवावगन्तव्यम् ॥ १७ ॥

शुद्धैव सा द्विधा इति उपादानलक्षणा लक्षणलक्षणा चेति द्वौ भेदौ शुद्धाया एव न गौण्या इत्युक्तम्, किन्तु शुद्धायाः तौ एव भेदौ इति तु नोक्तम्, **अन्या तु** इत्यनेन गौण्याः सारोपा साध्यवसाना चेति द्वौ एव भेदौ इति सूचितम्, किन्तु इमौ द्वौ भेदौ गौण्या एवेति तु नोक्तम्, अतः इमौ द्वौ भेदौ शुद्धाया गौण्याश्च भवत इति ज्ञायते, किन्तु कीदृशौ इमौ भेदौ शुद्धायाः, कीदृशौ च गौण्या [illegible] सत्या [illegible] [illegible] नाऽऽकाङ्क्षाशान्तिकर्तुं शक्यते एव तथापि शुद्धाया गौण्याश्च लक्षणे अपि सुखग्रहणाय [illegible] सूचयिष्यामीत्यभिसन्धाय आह—**भेदाविमौ चेत्यादि । इमौ भेदौ सादृश्यात्** सादृश्येन हेतुभूतेन सम्बन्धेन भवतः; **तथा सम्बन्धान्तरतः** सादृश्येतरेण हेतुभूतेन सम्बन्धेन च इमौ भेदौ भवतः । तौ च यथासङ्ख्यं **सादृश्यात् गौणौ** गौण्या इमौ गौणौ विज्ञेयौ; सम्बन्धान्तरतः **शुद्धौ** शुद्धरूपौ विज्ञेयौ; वस्तुतः शुद्धौ इत्यस्य स्थाने शुद्धाया इमौ इति [illegible] शौद्धौ इति पाठः करणीयः । एवञ्च **सादृश्यसम्बन्धात् प्रवृत्ता लक्षणा गौणी सादृश्येतरसम्बन्धात् प्रवृत्ता लक्षणा शुद्धेति** गौणीशुद्धयोर्लक्षणे कारिकयाऽपि सूचिते ज्ञेये । लक्षणाहेतुभूतः सम्बन्धश्च न संयोगसमवायरूप एव किन्तु नियामकोपाधिरूपोऽपि, तादर्थ्यादिभि. सम्बन्धै-

दयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्तीति केचित्, स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न तु परार्थोऽभि-

---

रपि लक्षणा भवतीति स्वीकारात्। तथा च सादृश्यमपि नियामकोपाधिरूपमेवेति गौणी अपि लक्षणाभेद एवेति सिद्धयति। तथा च प्राचीनो मीमांसको भर्तृमित्रोऽपि—"अभि-धेयेन सम्बन्धात् सारूप्यात् समवायतः। वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता ॥" इति वदन् सादृश्यसम्बन्धहेतुकां वृत्तिमपि लक्षणायामेवान्तर्भावयतीति बोध्यम्।

उदाहरणं प्रस्तौति—**इमौ आरोपाध्यवसानरूपौ** इत्यादिना। आरोपाध्यवसानाभ्या रूपं स्वरूपम् (आत्मलाभः) ययोस्तौ आरोपाध्यवसानरूपौ, सादृश्यं तद्रूपः सम्बन्धो हेतुर्ययोस्तौ **इमौ** भेदौ क्रमेण **गौर्वाहीक** इत्यत्र **गौरयम्** इत्यत्र च ज्ञेयौ। तत्र गौर्वाहीक इत्यत्र वाहीकशब्दो पञ्चनददेशवाचकः, तथा तत्रत्यः पुरुषोऽपि वाहीकः, तथा हि—"पञ्चानां सिन्धुषष्ठानामन्तरं ये समाश्रिताः। वाहीका नाम ते देशा न तत्र दिवसं वसेत्" इति कर्णपर्वणि व्यासवचनम् इति नागोजिभट्टादयः। पञ्चनददेशस्य "जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे, तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुः" [३।१।१] इति बृहदारण्यकवचनप्रमाणेन महतां विदुषां ब्राह्मणानामभिजनत्वस्य प्रतीतेर्न तद् युक्तमित्यन्ये। वस्तुतस्तु पञ्चनद-पाञ्चालदेशयोर्भेदान्न तद् युक्तम्, पञ्चनददेशो हि—शतद्रु-विपाशेरावती-वितस्ता-चन्द्रभागेति पञ्चानां नदीनां देशः, पाञ्चालदेशस्तु गङ्गायमुनामध्यगतो देश इति पञ्चनददेशस्य न विद्वद्ब्राह्मणाभिजनत्वं प्रतीयते उक्ताद् बृहदारण्यक-श्रुतिवाक्यात्। "दिव्यदित्यादित्यपत्युत्तरपदाण्ण्यः" (४।१।८५) इति सूत्रे स्थितस्य "बहिषष्टिलोपो यञ् च" इति वार्त्तिकपाठादुत्तरं पठितस्य "ईकक् च" इति वार्त्तिकस्य प्रामाण्याद् बहिर्भव इत्यर्थेऽपि वाहीकशब्दस्य प्रसिद्धेः, बवयोरभेदाद् वाही-कशब्दस्याऽपि स एवार्थ इति शास्त्रीयादाचाराद् बहिर्भूतः पुरुषो वाहीक इति केचित्। "जर्तिका नाम वाहीकास्तेषां वृत्तं सुनिन्दितम्" इति कर्णपर्वणि द्विशततमेऽध्याये पठितस्य वचनस्य प्रामाण्याज् जर्तोऽद्यत्वे 'जाट्' इति प्रसिद्धो भारतीयसेनायां बाहुल्येन प्रयुज्य-मानोऽतीव शूरः क्रोधनः कर्मपरायणश्च जातिविशेष एव वाहीक इत्यपरे। तत्र गवाभिन्नो वाहीक इति बोधः। **गौरयमित्यत्र** इदंशब्देन पुरोवर्तिरूपेणैव वाहीकस्योपस्थितिः, न तु वाहीकत्वादिना। तस्मात् नाऽत्र विषयवाचकपदसत्त्वं मत्वा कथमिदं साध्यवसानाया उदा-हरणम् इति शङ्क्यम्। तत्र गौण्या लक्षणाया किं लक्ष्यमिति विषये त्रैविध्यात् मतभेद-प्रदर्शनपूर्वकं निरूपयति—**अत्र हि स्वार्थे**त्यादिना। **अत्र गौर्वाहीक** इत्यत्र **स्वार्थो** लक्षकपदार्थो गोत्वम्, **तत्सहचारिणः** तत्समानाधिकरणाः गुणाः जडत्व-मन्दत्व-तिष्ठन्मूत्रकत्वादयस्ते **लक्ष्यमाणा अपि** लक्षणयोपस्थाप्यमाना अपि (यद्यप्यन्यत्र शब्दस्याभिधेयोऽर्थ एव प्रवृत्ति-निमित्तं भवति तथाप्यत्र लक्ष्योऽर्थोऽपि प्रवृत्तिनिमित्तमिति अपिपदार्थः) **गोशब्दस्य परार्था-भिधाने** वाहीकाद्यन्यपदार्थस्य अभिधया वृत्त्या प्रतिपादने **प्रवृत्तिनिमित्तत्वं** शक्यार्थावच्छेद-कत्वम् **उपयान्ति** प्राप्नुवन्तीति केचिद् वदन्तीत्यर्थः। गौर्वाहीक इत्यत्र पदयोः समानविभक्त्य-

भिधीयते इत्यन्ये; साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यते इत्यपरे। उक्तं चान्यत्र— "अभिधेयाविनाभूतप्रतीतिर्लक्षणेष्यते। [illegible] वृत्तेरिष्टा तु गौणता" इति।

न्तत्वेन तदर्थयोः सामानाधिकरण्ये आवश्यकेऽपि तयोर्द्वयोरपि मुख्यार्थयोरुपादाने तदनुपपत्तेः [illegible] गोशब्दो मुख्यार्थगोत्वसम्बन्धिनो गुणान् लक्षयित्वा तानेव प्रवृत्तिनिमित्तीकृत्य वाहीकमभिधया बोधयतीति तेषामभिप्रायः। धर्मे लक्षणाग्रहस्य धर्मिणि शक्तिग्राहकत्वमिति च तेषां सिद्धान्तः। गवि वर्तमानाना जाड्यमान्द्यादीनां वस्तुतो वाहीके अभावाद् वाहीकाभिधाने तेषां प्रवृत्तिनिमित्तत्वं न सम्भवतीति धर्मिण आक्षेपेणैव उपस्थितौ सम्भवन्त्या तत्र शक्तिकल्पनमन्याय्यम् इति च वदता [illegible]—स्वार्थसहचारिणेत्यादिना। **स्वार्थो** लक्षकगोपदार्थो गोत्वम् तत्सह**चारिणो गुणा**. जाड्यमान्द्यादयस्तद**भेदेन** तत्साजात्येन **परार्थगता** वाहीकगता **गुणा** जाड्यमान्द्यादय **एव लक्ष्यन्ते** लक्षणया उपस्थाप्यन्ते, **न तु परार्थोऽप्यभिधीयते** तस्य आक्षेपेणैव लभ्यत्वाद्, अनन्यलभ्यस्यैव शब्दार्थत्वस्य स्वीकार्यत्वात्। एवञ्च गोगतजाड्यमान्द्यादि सजातीयजाड्यमान्द्यादिमान् वाहीक इति बोधोऽस्मिन् मते ज्ञेय.। न चात्र गुणलक्षकस्य गोपदस्य व्यक्त्यभिधायकेन वाहीकपदेन सह कथं सामानाधिकरण्येन प्रयोगः, न हि जाड्यमान्द्यादिर्वाहीकः इति प्रयोग. सङ्गच्छते इति शङ्क्यम्, गौः शुक्ल इत्यादौ इवात्रापि आक्षिप्तव्यक्त्योरभेदान्वयस्योपपत्तेः न सामानाधिकरण्यानुपपत्तिः। किमर्थं तर्हि तृतीयमतानुधावनम्? अन्वयानुपपत्त्या प्रवृत्ताया अस्या लक्षणाया. साक्षादन्वययोग्यार्थबोधकत्वमेवाऽऽस्थातुमुचितमिति [illegible] गृहाण। तृतीयमतमाह—**साधारणगुणाश्रयत्वेने**त्यादिना। **साधारणाः** गवि वाहीके च वर्तमाना जाड्यमान्द्यादयो गुणाः **तदाश्रयत्वेन** तद्वत्त्वेन, [illegible] गुणाश्रयत्वरूपेण [illegible] सम्बन्धेनेत्यर्थः। **परार्थ एव** वाहीक एव गोशब्देन **लक्ष्यते** लक्षणया बोध्यते इत्यर्थः। एवकारो गुणाना लक्ष्यत्वं व्यवच्छिनत्ति। तथा चास्मिन् मते जाड्यादिविशिष्टे एव लक्षणा। एवं चास्मिन् पक्षे [illegible] साक्षादेवाभेदेनान्वय इति सामानाधिकरण्यं सूपपन्नम्। **अपरे** इति न परे अपरे, येषां [illegible] **ते** स्वकीया **इति** एवं वदन्तीत्यर्थ। सादृश्यभिन्नसम्बन्धमात्रेण प्रवृत्ता लक्षणा **लक्षणा** इत्येवोच्यते, सैव च शुद्धा लक्षणेति च व्यवह्रियते गौण्या लक्षणाया व्यवच्छेदाय, सादृश्यसम्बन्धेन प्रवृत्ता लक्षणा तु गौणी लक्षणा इत्युच्यते शुद्धाया व्यवच्छेदायेति मूलग्रन्थकृता **भेदाविमौ चे**त्यादिना सूचितम्, तत्र गौणी लक्षणात. पृथगेव वृत्तिरिति वदतो वैदिकधुरीणस्य कुमारिलभट्टस्यापि वचनमस्मदुक्तार्थाऽप्रतिकूलमेवेति, गौण्या वृत्तेर्गुणयोगी (गुणविशिष्ट) एव विषय इति भट्टस्याऽपि अभिमतमिति च [illegible]माह—**उक्तञ्चे**त्यादि। एतत्पद्यपूर्ववर्तितया प्रदीपकारादिभि' काव्यप्रकाशव्याख्यातृभिः चित्सुखमुनिना च धृतम् "मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे।" इति पद्यार्धम् मुद्रिते तन्त्रवार्तिके नोपलभ्यते। तत्र [illegible] पाठश्च "अभिधेया-

अविनाभावोऽत्र सम्बन्धमात्रम् न तु नान्तरीयकत्वम्, तत्त्वे हि "मञ्चाः क्रोशन्ति" (उदा० २५) इत्यादौ लक्षणा न स्याद्, अविनाभावे चाऽऽक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम् ।

विनाभूते प्रवृत्तिर्लक्षणेष्यते" इत्युपलभ्यते । तदर्थश्च (लक्षक) पदाभिधेयस्य **अविनाभूते** सम्बन्धिनि (लक्षक) पदस्य **प्रवृत्तिः** तात्पर्यवत्त्वं लक्षणा इति इष्यते स्वीक्रियते इत्यर्थः । [illegible] तु अभिधेयेन सम्बद्धस्य **प्रतीतिः** स्मृतिः लक्षणा इत्युच्यते इत्यर्थः । एतेन स्वोक्तं सादृश्यभिन्नशब्दयसम्बन्धमात्रेण शुद्धलक्षणात्वं [illegible] इति प्रदर्शितम् । **लक्ष्यमाणाः** लक्ष्यार्थविशेषणत्वेन गम्यमाना ये अग्निर्माणवक इत्यादौ पैङ्गल्यादयः गौर्वाहीक इत्यादौ च जाड्यमान्द्यादयः साधारणा **गुणाः** तैर्लक्ष्यार्थस्य माणवकवाहीकादेः योगाद् यद् अभिधेयार्थलक्ष्यार्थयोः सादृश्यं प्रतीयते तद्वशाद् या गुणविशिष्टे शब्दस्य वृत्तिः सा गुणमूलत्वाद् गौणी इत्युच्यते इत्यर्थः । 'लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता' इत्यस्य स्फुटीकरणं कुर्वता भट्टेनाऽपि उक्तं हि—"[illegible] यत् पैङ्गल्यादि गम्यते । तेन माणवके बुद्धिः सादृश्यादुपजायते ।" इति । गुणविशिष्टो माणवक एव गुणद्वारेण गौण्या विषय इति च तदर्थः । एतेन स्वप्रतिपादितं सादृश्यसम्बन्धेन गौणलक्षणात्वं गुणविशिष्टस्यैव गौणीविषयत्वम् इति द्वयमेव भट्टसम्मत्या समर्थितं बोध्यम् ।

तत्र अविनाभावपदं सम्बन्धमात्रपरमिति प्रतिपादयति—**अविनाभाव** इत्यादिना । **नान्तरीयकत्वमिति** । अन्तरे भवम् अन्तरीयम् गहादिप्रामाण्यात् (अष्टा० ४।२।१३८) अन्तरीयमेव अन्तरीयकम् यावादिषु (५।४।२९) पुरुषोत्तमदेवेन भाषावृत्तौ पठितत्वात् । न अन्तरीयकम् नान्तरीयकम् सह सुपेति (२।१।४) प्रामाण्यात्, तत्र च नैकधेत्यादाविव नकारस्याविकारः, नञो हि नकारस्य विकारः तत्त्वय नञ्, न शब्दोऽयम् । येन विना यन्न भवति तत् तस्य नान्तरीयकम्, तस्य भावो नान्तरीयकत्वम् । "[illegible] भवन्ति" इति अविनाभावस्य तत्रैव स्फुटीकरणं कुर्वता भट्टेनैव अविनाभावस्य सम्बन्धमात्रत्वं प्रतिपादितमेव तथाऽपि प्रकारान्तरेणाऽपि [illegible] सम्बन्धमात्रपरत्वे [illegible]—**तत्त्वे हीत्यादिना** । तन्त्रवार्तिके (१।४।२२) "लोके च दृश्यते यष्टीः प्रवेशय, मञ्चाः क्रोशन्ति, अश्वमहत्त्वेनामुको राजा जित इति" एवं वदतस्तत्र लक्षणा स्वीकुर्वतस्तस्य भट्टस्याऽपि अविनाभूतत्वं [illegible] गम्यते, अन्यथा यष्टीः प्रवेशय मञ्चाः क्रोशन्ति इत्यादौ तस्य लक्षणायाः स्वीकारोऽसङ्गतः स्यादित्यर्थः । भट्टस्य न केवलं स्ववचनव्याघातापत्तिरेव किन्तु न्यायविरोधापत्तिश्च अविनाभावस्य सम्बन्धमात्रपरतायाः स्वीकारे हेतुमप्याह—**अविनाभावे चेत्यादिना** । लक्षकत्वेन लक्ष्यत्वेन च अभिमतयोः अविनाभावरूपे सम्बन्धे सति तु तयोरेकतरस्य ज्ञाने अन्यतरस्यापि ज्ञानस्य **आक्षेपादेव** [illegible] स्वभावविशेषादेवं उदयस्य

"आयुर्घृतम्" (उदा० २६) "आयुरेवेदम्" (उदा० २७) इत्यादौ च सादृश्यादन्यत् कार्यकारणभावादि सम्बन्धान्तरम् । एवमादौ च कार्यकारणभावादि-लक्षणपूर्वे आरोपाध्यवसाने । क्वचित् तादर्थ्यादुपचार, यथा—इन्द्रार्था स्थूणा "इन्द्रः" (उदा० २८), क्वचित् स्वस्वामिभावाद्, यथा—राजकीय पुरुषः "राजा" (उदा० २९) क्वचिद् अवयवावयविभावाद् "अग्रहस्त." (उदा० ३०) इत्यग्रमात्रेऽवयवे हस्तः, क्वचित् तात्कर्म्याद्, यथा–अतक्षा 'तक्षा' (उदा० ३१)।

सिद्धे: तदुदयाय शब्दवृत्तिर्न कल्पनीया भवेदिति, तादृशस्यार्थस्य प्रतीतये शब्दवृत्ति कल्पयतः, तां प्रतीतिं शाब्दीं मन्वानस्य च भट्टस्य वचने "अनन्यलभ्यो हि शब्दार्थः" इति न्यायस्य विरुद्धता चागच्छेत् । न च शिष्टशिरोमणेः कुमारिलभट्टस्य वचने न्याया-पेतत्वेन अप्रामाण्यमानेतुं युक्तम्; तद् वरम् अन्यार्थकस्यापि शब्दस्य अन्यार्थपरत्वेन व्याख्यानेन भट्टवचनोपपादनमिति तत्र भट्टवचने [illegible] सम्बद्धमात्रपरमेव स्वी-कर्तव्यमिति भाव । किन्त्वत्रेद विचार्यम्—"तत्र यथैवाकृतिवचन शब्दस्तत्सहचरितां व्यक्तिं लक्षयति तथैव य[illegible]: भवन्ति" इति (तन्त्र-वार्त्तिके १।४।२२) वदतो जरन्मीमांसकस्य भट्टस्य वचनं "गौरनुबन्ध्य" (उदा० १६) इति मुकुलभट्टोक्तम् [illegible] खण्डितवता मम्मटेन समर्थयितुं नैव शक्य-मिति । एवं च 'गुणविशिष्टस्यैव गौणीविषयत्वम्' इत्यत्र भट्टसम्मतेः प्रदर्शने एव अभि-[illegible] बोध्यम् ।

शुद्धसारोपाया शुद्धसाध्यवसानायाश्च उदाहरणे निर्दिश्य ते एव व्याख्याति—**आयुर्घृतम्** इत्यादिना । तत्र कार्यकारणभावादि सम्बन्धान्तरं लक्षणाप्रयोजकमस्तीत्यर्थः । तत्र कार्यकारणभावादेर्लक्षणाप्रयोजकत्वं दर्शयति—**एवमादावित्यादिना** । **एवमादौ** आयुर्घृतम् इत्यादौ शुद्धसारोपादिस्थले **कार्यकारणभावादीनां** सम्बन्धाना **लक्षण** ज्ञानं **पूर्वं** नियतपूर्ववर्ति (कारणं) ययोस्ते तादृशे आरोपश्च अध्यवसानं च ते स्तः । अतोऽत्र शुद्धत्वं बोध्यमित्यर्थः । [illegible] प्रवृत्ता सारोपा साध्यवसाना च लक्षणा शुद्धा इति पूर्वं सूचितम्, अधुना आदिपदेन सङ्गृहीतान् सम्बन्धान् दिक्प्रदर्शनाय प्रपञ्चयन्नुदाहरति—**क्वचित् तादर्थ्या**दित्यादिना । **तादर्थ्यात्** तस्मै इदं तदर्थम्, तस्य भावः तादर्थ्यम् तस्माद् उपकार्योपकारकभावसम्बन्धाद् **उपचारः** अन्यत्र अन्यधर्मस्य इन्द्रत्वादेर्भेदस्य प्रतीत्या सहितो रहितो वा आरोपः, अन्यस्मिन् अन्यधर्मस्य चारणात् सञ्चारणाद् नयनाद् वा उक्तविध आरोप उपचार इत्युच्यते । सामान्येन लक्षणैव वा उपचारः अन्येषु शास्त्रेषु तथा प्रसिद्धेः । तत्र च तादर्थ्याद् उपचारो यथा—**इन्द्रार्थायां स्थूणायां** स्तम्भे इन्द्र इति प्रयोगे । तत्र इष्टप्रदत्वव्यञ्जनं प्रयोजनम् । क्वचित् स्वस्वा-मिभावात् सम्बन्धाद् उपचारो भवति, यथा—राजकीये पुरुषे अमात्यादौ **राजा** इति प्रयोगे । तत्र अलङ्घनीयाज्ञत्वव्यञ्जनं प्रयोजनम् । क्वचिद् अवयवावयविभावाद् उपचारो

अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम् । शुद्धभेदयोस्तु अन्यवैलक्षण्येन अव्यभिचारेण च कार्यकारित्वादि ।

(सू० १०)···· ··· ··· ···**लक्षणा तेन षड्विधा ॥ ११ ॥**

आद्यभेदाभ्यां सह ।

भवति, यथा—**अग्रहस्तः** (अग्रश्चासौ हस्तः) इत्यत्र अग्रभागमात्रे हस्तावयवे **हस्त** इति प्रयोगे । तत्र हस्तकार्यं हस्तावयवमात्रेण करोतीति बलवत्त्वातिशयव्यञ्जन प्रयोजनम् । क्वचित् तत्कर्मकारित्वात् सम्बन्धाद् उपचारो भवति, यथा—तक्षभिन्ने काष्ठकार्येण जीवनवृत्तिम् अनिर्वाहयति अपि तक्षकार्यकारिणि पुरुषे **तक्षा** इति प्रयोगे । **तक्षा** वर्धकिः, काष्ठतक्षणेन यो जीवनवृत्तिं निर्वाहयति तादृशः काष्ठतट् इति यावत् । अत्र तत्कर्मनिपुणताव्यञ्जनं प्रयोजनम् । क्वचित् तादर्थ्यादिर्ग्रन्थः पारिखदृष्टे पाठेऽत्र नास्ति ।

अत्र ग्रन्थे विस्तरेण उदाहरणप्रदर्शनव्याख्यानपूर्वकं निरूपितायाम् उपादानलक्षणायां लक्षणलक्षणायां च तत्र शुद्धत्वसाधनावसरे 'प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः" इति प्रयोजनवत्त्वं सूचितम्; उदाहृतासु गौणीषु शुद्धासु च सारोपासु साध्यवसानासु च लक्षणासु प्रयोजनवत्त्वमस्तीति च प्रदर्शितम्; इदानीम् प्रयोजनवतीना लक्षणानामेवात्र सविस्तरं निरूपणं करणीयमिति सूचनाय गौण्याः शुद्धायाश्च सारोपसाध्यवसानभेदयो प्रयोजनवत्त्वं प्रदर्श्य प्रयोजनप्रकाराणा दिक्प्रदर्शनं च करोति—**अत्र गौणभेदयो**रित्यादिना । **अत्र** सारोपाया साध्यवसानाया च लक्षणायाम् । **गौणभेदयोः** गौण्या सारोपाया गौण्या साध्यवसानायां च यथासङ्ख्यम् **भेदेऽपि** विषयविषयिणोर्वाचकाच् शब्दाद् भेदे प्रतीयमानेऽपि सादृश्यातिशयवशजाता आहार्या विषयविषयिणो**स्ताद्रूप्यस्य** तादात्म्यस्य **प्रतीतिः**; **सर्वथैव** विषयविषयिणोर्द्वयोः पृथक्-पृथग् वाचकयोः शब्दयोरभावाद् विषयविषयिणोर्भेदस्य प्रतीत्या अत्यन्तमेव रहितो**ऽभेदावगमः** अभेदप्रतीति प्रयोजनम् । एवं च गौण्या सारोपाया विषयविषयिणोस्ताद्रूप्यस्य प्रतीतिः फलम्, गौण्या साध्यवसानायां तु तयोरात्यन्तिकस्याभेदस्य प्रतीतिः फलमिति बोध्यम् । **शुद्धभेदयोस्तु** शुद्धाया सारोपायां शुद्धायां साध्यवसानाया च यथासङ्ख्यम् अन्यवैलक्षण्येन कार्यकारित्वादि, अव्यभिचारेण कार्यकारित्वादि च प्रयोजनम् । एवं च शुद्धाया सारोपायाम् आरोपविषयस्य अन्यवैलक्षण्येन कार्यकारित्वादेर्बोधः फलम्, शुद्धाया साध्यवसानायाम् आरोपविषयस्य अव्यभिचारेण कार्यकारित्वादेर्बोधः फलमिति बोध्यम् । प्रयोजनप्रतीतिस्तु सर्वत्र लक्षणामूलव्यञ्जनयैव भवतीति "यस्य प्रतीतिमाधातुम्" (सू० २५) इत्यादिना ग्रन्थेन प्रतिपादयिष्यति ॥ १८ ॥

प्रयोजनवतीनाम् अस्मिन् ग्रन्थे मुख्यतया प्रतिपादितानां लक्षणाविधानां सुखग्रहणाय निर्देशं करोति—**लक्षणा तेने**त्यादिना । **तेन** सारोपायाः साध्यवसानायाश्च प्रत्येकं शुद्धगौणभेदयोर्भिन्नत्वेन लक्षणा **षड्विधा** भवतीत्यर्थः । ननु सारोपाया साध्यवसानायाश्च प्रत्येक द्वाभ्यां भेदाभ्या भिन्नत्वेन तु चतुर्विधत्वमेव लक्षणायाः, कुतः षड्विधत्वम् अत आह—**आद्यभेदाभ्यां सह** इति । उक्तानां चतुर्णाम् भेदानाम् आद्याभ्याम् उपादानलक्षणा-

लक्षणलक्षणारूपाभ्यां भेदाभ्यां सह सङ्कलनेन लक्षणायाः षड्विधत्वं ज्ञेयमित्यर्थः ॥११॥

एवं च मम्मटमतानुसारं लक्षणा प्रथमं द्विविधा—शुद्धा गौणी च । तत्र शुद्धा [illegible] लक्षणलक्षणा, सारोपा, साध्यवसाना चेति । गौणी च द्विधा—सारोपा, साध्यवसाना चेति । मम्मटेन [illegible] सारोपासाध्यवसानयोर्भेदेन उदाहरणयोरप्रदर्शितत्वात्, शुद्धायाः सारोपासाध्यवसानयोर्भेदयोरुदाहरणेऽपि परै [illegible] स्वीकृतयो स्वेनाऽपि दुर्वनुदाहृतये. 'कुन्ताः प्रविशन्ति' 'गङ्गायां घोषः' इत्यनयोरुदाहरणयो परिहारेण 'आयुर्घृतम्', 'आयुरेवेदम्' इति उदाहरणयोः प्रदर्शितत्वाच् च सारोपासाध्यवसानयोः उपादान-लक्षणकृतो विभागो नास्तीति मम्मटस्य मतमवसीयते, गौणी तु क्वचित् सारोपा क्वचित् साध्यवसाना इति [illegible] यद्यपि तथापि परैः स्वतन्त्रवृत्तित्वेन स्वीकृतायां गौण्या काव्यदृष्ट्याऽप्यस्ति कश्चिद् विशेष इति तद्वैशिष्ट्यादरेण प्रयोजनलक्षणाया अनुपदमुक्तं षाड्विध्यं मम्मटेन स्वीकृतमिति ज्ञायते । एवञ्च मम्मटमतानुसारं लक्षणाभेदा अधोलिखितया सारण्या स्फुटं प्रतिपादयितुं शक्यन्ते—

किन्तु उपर्युक्तेन रूपेण लक्षणाया विभागे स्वीकृते [illegible] रूपयोर्भेदयोः सारोपात्वस्य साध्यवसानात्वस्य च सत्त्वेन सारोपा-साध्यवसानारूपयोः भेदयोश्च सोपादानात्वस्य सलक्षणात्वस्य च सत्त्वेन परस्पर साङ्कर्यस्यापत्तेः पूर्वोक्तो विभागो न सम्यक् । [illegible] गौण्याः सोपादानात्वस्य अस्वीकारे कृतेऽपि एतादृशेन तु लक्षणाविभागेन भाव्यम्—लक्षणा प्रथमं द्विविधा—शुद्धा गौणी च । तत्र शुद्धाऽपि [illegible] लक्षणलक्षणा चेति । तत्र उपादानलक्षणा पुनर्द्वेधा—सारोपा साध्यवसाना चेति । लक्षणलक्षणाऽपि द्विविधैव—सारोपा साध्यवसाना चेति । एवं च शुद्धाया भेदाश्चत्वारः । गौणी तु द्विविधैव—सारोपा साध्यवसाना चेति । तत्र शुद्धा उपादानलक्षणा सारोपा यथा—एते कुन्ताः प्रविशन्ति इत्यत्र; शुद्धा उपादानलक्षणा साध्यवसाना यथा—कुन्ताः प्रविशन्ति इत्यत्र । शुद्धा लक्षणलक्षणा सारोपा यथा—आयुर्घृतम् इत्यत्र, शुद्धा लक्षणलक्षणा साध्यवसाना यथा—आयुरेवेदम् इत्यत्र । गौणी सारोपा यथा—गौर्वाहीकः इत्यत्र; गौणी साध्यवसाना यथा—गौरयम् इत्यत्र । एवञ्च सुप्रतिपादितमम्मटमतानुसारं लक्षणाभेदाः तल्लिखितया सारण्या स्फुटं प्रतिपादयितु शक्यन्ते—

विश्वनाथादिमतानुसारं गौण्या अपि उपादानलक्षणाभ्यां कृताना भेदानां गणनायां कृतायान्तु गौण्या अपि शुद्धाया इव चत्वार एव भेदा भवन्ति। तत्र गौणी उपादान-लक्षणा सारोपा यथा—राजकुमारेषु तत्सदृशेषु च गच्छत्सु 'एते राजकुमारा गच्छन्ति' इत्यत्र; गौणी उपादानलक्षणा साध्यवसाना यथा—राजकुमारेषु तत्सदृशेषु च गच्छत्सु 'राजकुमारा गच्छन्ति' इत्यत्र। गौणी लक्षणलक्षणा सारोपा यथा—गौर्वाहीक इत्यत्र; गौणी लक्षणलक्षणा साध्यवसाना यथा—गौर्जल्पति इत्यत्र। एवञ्च मम्मटमतानुसारं प्रयो-जनलक्षणाभेदा अधोनिर्दिष्टया सरण्या स्पष्टं प्रतिपादयितुं वक्ष्यन्ते—

ननु सम्भविषु बहुषु लक्षणाभेदेषु किमर्थं मम्मटेन षडेव भेदाः निरूपिताः? अत्रोच्यते—न हि मम्मटः पदार्थसामान्यतत्त्वनिरूपणाय प्रवृत्तो यतः स लक्षणां निरूपयन् साकल्येन तां निरूपयेत्, स तु काव्यनिरूपणाय प्रवृत्तो मुख्यतया काव्योपयोगिन षडेव भेदान् निरूपयतीति युक्तमेव। तथाहि मम्मटोक्ता उपादानलक्षणा अर्थान्तरसङ्क्रमितवाच्यध्वनौ, लक्षणलक्षणा अत्यन्ततिरस्कृतवाच्यध्वनौ, गौणसारोपा रूपकालङ्कारे, गौणसाध्यवसाना अतिशयोक्तिविशेषे (मम्मटोक्तायां प्रथमायामतिशयोक्तौ), शुद्धसारोपाऽपि अतिशयोक्ति-विशेषे (मम्मटोक्तायां चतुर्थ्यामतिशयोक्तौ), शुद्धसाध्यवसाना अन्यवैलक्षण्येन कार्यकारि-

सा च—

(सू० २०) **व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने ।**

प्रयोजनं हि [illegible] ।

(सू० २१) **तच्च गूढमगूढं वा ।**

तच् चेति व्यङ्ग्यम् ।

गूढं यथा—

मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।

त्वादिव्यङ्ग्ये वस्तुध्वनौ उपयुज्यते । गौण्या अपि उपादान-लक्षणकृतभेदानां स्वीकारे तत्राऽपि पूर्ववद् रूपके अतिशयोक्तौ चोपयोगित्वं बोध्यम् ॥ १९ ॥

अन्योपाधिकृतान् प्रयोजनलक्षणाभेदान् प्रदर्श्य रूढिलक्षणायाः काव्यशास्त्रे विशेषतोऽनिरूपणीयत्वं प्रयोजनलक्षणाया एव तत्र विस्तरेण निरूपणीयत्वं च सूचयन् व्यङ्ग्यप्रयुक्तान् लक्षणाभेदान् आह—**सा च**त्यादिना । व्यङ्ग्यरहिताया अपि रूढिलक्षणायाः प्रतियोगिनिरूपणीयतया व्यङ्ग्यप्रयुक्तत्वं सम्भवति । **रूढौ** या **लक्षणा** सा **व्यङ्ग्येन रहिता** भवति, सा च न कविसंरम्भगोचरेत्यभिप्रायः; **प्रयोजने** या लक्षणा भवति सा तु व्यङ्ग्येन सहिता भवतीत्यर्थः । प्रयोजनवत्या व्यङ्ग्यसाहित्यं नियमत एव भवतीत्याह—प्रयोजनं हीत्यादिना । प्रयोजनस्य व्यङ्ग्यत्वं तु अनुपदमेव "तत्र व्यापारो व्यञ्जनात्मकः" (सू० २४) इत्यादिना "तच् च व्यञ्जन-ध्वनन-द्योतनादिशब्दवाच्यमवश्यमेषितव्यम्" इत्यन्तेन ग्रन्थेन साधयिष्यति ॥ २० ॥

व्यङ्ग्यसहिताया पुनर्व्यङ्ग्यविशेषप्रयुक्तौ भेदौ प्रतिपादयिष्यन् लक्षणामूलकव्यङ्ग्यभेदमाह—**तच् चे**त्यादिना । **तच् च** व्यङ्ग्यं **गूढं** सहृदयैरेव वेद्यम्, **अगुढम्** अतीव स्फुटतया वाच्यायमानम् अविदग्धैरपि सर्वैर्वेद्यं चेति द्विविधं भवतीत्यर्थः । व्यङ्ग्यस्य [illegible] काव्यभेदान् निरूपयिष्यामीति [illegible] विहितो बोध्यः ।

गूढं व्यङ्ग्यं लक्षणामूलमुदाहरति—**मुखं विकसितस्मित**मित्यादिना । कश्चिद् युवा काञ्चिन् नवयुवती दृष्ट्वा आह—अस्या इन्दुवदनाया **मुखं विकसितम्** (उत्फुल्लम् इत्यस्य पुष्पधर्मरूपस्य अर्थस्य स्मिते बाधितत्वाल् लक्षणया) प्रसृतं **स्मितम्** 'ईषद्विकासिनयनं स्मितं स्यात् स्पन्दिताधरम्' इत्युक्तं मन्दहास्यं यस्मिन् तथाभूतमस्ति, **प्रेक्षितम्** अवलोकनं **वशितः** (स्वाधीने कृत इत्यस्यार्थस्य अचेतने प्रेक्षिते बाधितत्वाल् लक्षणया) सहजो वक्रिमा (कुटिलत्वमित्यस्यार्थस्य अवलोकने [illegible] बाधितत्वाल् लक्षणया) तिर्यग्गामित्वं येन तथाभूतमस्ति; अस्याः **गति**र्गमनं **समुच्छलिताः** (सम्यगूर्ध्वं गता इत्यस्य द्रवधर्मरूपस्यार्थस्य विभ्रमेषु बाधितत्वाल् लक्षणया) प्रादुर्भूता **विभ्रमाः** मदरागहर्षरोषादिजनिताः स्वल्पेनैव निमित्तेन जाता गमनादिक्रियाविशेषा यस्यां सा तथाभूता अस्ति, **मतिः अपास्तसंस्था** (त्यक्तमर्यादा इत्यस्यार्थस्य अचेतनायां मतौ बाधितत्वाल् लक्षणया)

उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥उदा० ३२॥

अगूढं यथा—

श्रीपरिचयाज् जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥उदा० ३३॥

अत्र उपदिशतीति ।

(सू० २०) .... **तदेषा कथिता त्रिधा ॥ १२ ॥**

अव्यङ्ग्या, गूढव्यङ्ग्या, अगूढव्यङ्ग्या च ।

अस्यिगा अस्ति, अस्याः **उरः** वक्षःस्थलं **मुकुलितौ** (कुड्मलीभूतौ इत्यस्यार्थस्य पुष्पधर्मरूपस्य स्तनयोर्बाधितत्वाल् लक्षणया) मुकुलाकारौ कठिनौ उन्नतौ च **स्तनौ** यस्य तादृशं विद्यते, अस्याः **जघनं** कटिपुरोभागः **अंसबन्धेन** अंशुकबन्धविशेषेण **अंसबन्धे** दृढालिङ्गनवति रतिबन्धविशेषे विषये वा उद्धुरम् (उद्गतधुरावद् इत्यस्यार्थस्य जघने असम्भवाल् लक्षणया) पीनत्वादुन्नतं योग्यतरं वा अस्ति, **बत** अहो अस्या इन्दुवदनायास्तनौ **तरुणिम्नः** तारुण्यस्य **उद्गम** आविर्भावो **मोदते** (हर्षस्य चेतनधर्मस्य जडे तरुणिमोद्गमे बाधितत्वाल् लक्षणया) स्फायते शोभते वा इत्यर्थः । अत्यष्टिच्छन्दसि पृथ्वीवृतम् । अत्र विकासेन हृद्यत्वम्, वशीकरणवक्रिमभ्यां लज्जादयतिशयौ, मनुच्छलनेन हठात् चित्तस्याकर्षकत्वम्, अपास्तसंस्थात्वेन कामुकीत्वम्, मुकुलितत्वेन परिरिम्भजनकत्वम् उद्धुरत्वेन रिरंसाजनकत्वम्, मोदेन शोभातिशयश्च लक्षणाश्रयणपूर्वकं व्यज्यन्ते । अत्रैतानि व्यङ्ग्यानि सहृदयस्यैव प्रतिभान्ति इति गूढानि ज्ञेयानि । एतेन लक्षणाया ध्वनिकाव्यप्रयोजकत्वमपि प्रदर्शितं भवति ॥ उदा० ३२ ॥

अगूढव्यङ्ग्यमुदाहरति—**श्रीपरिचयादि**त्यादिना । **श्रियः** प्रभूतसम्पत्तेः **परिचयात्** स्वाधीनत्वेन ज्ञानाल् लाभादित्यर्थः । **जडा मूर्खा अपि** जना **विदग्धस्य** "लौकिके वैदिके चाऽर्थे तथा सामयिकेऽपि च । सम्यक्परिचयप्रौढिर्वैदग्ध्यमिति प्रोच्यते" इति परिभाषितेन वैदग्ध्येन युक्तस्य जनस्य **चरितानां** व्यवहाराणाम् **अभिज्ञा** विज्ञातारो भवन्ति इत्यर्थः । तत्र अर्थान्तरं न्यस्यति—उपदिशतीत्यादि । **यौवनस्य मदश्चित्तोद्रेक एव कामिनीनां** युवतीनां **ललितानि** स्वाभाविकानि ललितचेष्टितानि **उपदिशति** (शिष्यज्ञानानुकूलस्य शब्दस्य शिष्यं प्रति उच्चारणस्य उपदेशस्य मदेऽचेतने वागिन्द्रियरहिते बाधितत्वाल् लक्षणया) आविष्करोतीत्यर्थः ॥ उदा० ३३ ॥

तत्र लक्षणामूलकमगूढं व्यङ्ग्यं निर्दिशति—**अत्र उपदिशतीति** । उपदिशतीति पदेन लक्षणाश्रयणपूर्वकं व्यञ्जनीयं कामिन्यो यौवने स्वभावेनैव ललितचेष्टितानि जानन्तीति व्यङ्ग्यमगूढमिति भावः ॥ २१ ॥

व्यङ्ग्यमिरूपणीयान् लक्षणाभेदान् **गणयति—तदेषेत्यादिना** । **तत्** तेन व्यङ्ग्यरूपेण

(सू० २३) **तद्भूर् लाक्षणिकः ।**

शब्द इति सम्बद्ध्यते । तद्भूस्तदाश्रय ।

(सू० २४)········ ···· ··· ···· ··**तत्र व्यापारो व्यञ्जनात्मकः ।**

कुत इत्याह—

(सू० २५) **यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ॥ १३ ॥**

फले शब्दैकगम्येऽत्र व्यञ्जनान् नाऽपरा क्रिया ।

उपाधिना **एषा** लक्षणा **त्रिधा** कथितेत्यर्थः ॥१२॥ त्रिधात्वमेव स्फुटीकरोति—**अव्यङ्ग्या** इत्यादिना ॥ १२ ॥

लक्षणा निरूप्य तन्निरूपणीयं लाक्षणिक लक्षकं वा शब्दं निरूपयति—**तद्भूरि**त्यादिना । **तद्भूर्**लक्षणाश्रय शब्दो लाक्षणिक उच्यते इत्यर्थ । काव्यलक्षणात्तद्वदर्थनिरूपणप्रस्तावोऽयमिति स्मारयन् वक्ति—**शब्द इति सम्बद्ध्यते** इति । **तद्भूस्तदाश्रयः** लक्षणाश्रय इत्यर्थः ।

ननु "स मुख्योऽर्थ" इत्यादिना यथा वाच्योऽर्थो निरूपितस्तथैव लक्ष्योऽर्थः किमिति न निरूप्यते ? अत्रोच्यते—'स मुख्योऽर्थ.' इत्यादिना दिक्प्रदर्शनेनैव यथा अभिधायाः सङ्केतस्य वा विषयो वाच्यस्तथैव लक्षणाया विषयो लाक्षणिक इति सुखेनैव बोद्धु शक्यते इति लाघवप्रियेण व्यञ्जनानिरूपणसंरम्भवता च आचार्येण लक्ष्योऽर्थः शब्दतो न निरूप्यते इति । अर्थतस्तु लक्ष्यार्था यथास्थानं निरूपिता एव ॥ २३ ॥

वाचक-लाक्षणिकौ शब्दौ निरूपितौ तदर्थौ च । अथ व्यञ्जकः शब्दो व्यङ्ग्यश्चार्थौ विशेषतो निरूपणीयौ । तन्निरूपणस्य व्यञ्जनानिरूपणाधीनत्वाद्, व्यञ्जनायाः स्वरूपे वादिना विप्रतिपत्तीनां च दर्शनाद्, "प्रयोजनं हि व्यञ्जनव्यापारगम्यम्—" इति स्वोक्तेर्युक्त्या उपपादनीयत्वाच्च व्यञ्जनां साधयितुमाह—**तत्र व्यापारो व्यञ्जनात्मकः** इत्यादिना । यद्यपि अभिधायाः प्राथम्यात् काव्यव्यङ्ग्यार्थस्य उपजीव्यत्वाच् च शब्दयोर्व्यञ्जनयोर्मध्ये अभिधामूलैव व्यञ्जना प्रथमं निरूपणीया तथापि "आधुनिकी लक्षणा हि प्रयोजनीभूतव्यङ्ग्यार्थबोधनफला" इति प्रसिद्धेः लक्षणामूलव्यञ्जनायाः प्रसिद्धतरत्वाल् लक्षणाया. प्रकृतत्वात् [illegible] च लक्षणामूलामेव व्यञ्जना प्रथमं साधयत्याचार्यः । **तत्र** लाक्षणिके, वस्तुतस्तु प्रयोजनलक्षणावतिशब्दे **व्यञ्जनात्मको** व्यञ्जनारूपो **व्यापारो** वृत्तिरपि भवतीत्यर्थः ॥ २४ ॥

प्रयोजनलक्षणावति शब्दे व्यञ्जनाव्यापारोऽपि भवतीत्यत्र हेतुं प्रतिपादयिष्यन्नाह—**कुत इत्याहे**त्यादि । उक्तं हेतुमेवाह—**यस्य प्रतीति**मित्यादिना । **यस्य** अर्थस्य **प्रतीतिमाधातु** ज्ञानं जनयितुं **लक्षणा समुपास्यते** स्वायत्तेऽपि वाचकशब्दप्रयोगे वाचकशब्दस्याऽभिधां वृत्तिं परित्यज्य [illegible] शब्दस्य लक्षणां वृत्तिमनुधाव्य तया अर्थः प्रतिपिपादयिष्यते अस्मिन् **शब्दैकगम्ये** प्रयुक्ताच् शब्दादेव ज्ञेये प्रमाणान्तरतोऽज्ञेये **फले** लक्षणा-

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतः तत्प्रतिपत्तिः, अपि तु तस्मादेव शब्दात्। न चात्र व्यञ्जनादृतेऽन्यो व्यापारः।

तथाहि—

(सू० २६) **नाऽभिधा समयाभावात्।**

'गङ्गायां घोषः' (उदा० ३४) इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः सङ्केतिताः।

(सू० २७) **हेत्वभावान् न लक्षणा।**

मुख्यार्थबाधादित्रयं हेतुः।

तथा च—

लक्ष्यं न मुख्यं नाऽप्यत्र बाधो योगः फलेन नो।

(सू० २८) **न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ॥ १५ ॥**

प्रयोजनीभूतेऽर्थे तस्य लाक्षणिकस्य शब्दस्य **व्यञ्जनाद्** व्यञ्जनाया **अपरा** अन्या **क्रिया** वृत्तिर्न भवितुं शक्नोतीत्यर्थः। लाक्षणिकशब्दमूलस्य लक्षणाप्रयोजनभूतस्य ज्ञानस्य व्यञ्जनां वृत्तिं विना अनुपपन्नत्वाद् अर्थापत्तिप्रमाणात् प्रयोजनलक्षणावति शब्दे व्यञ्जनव्यापारस्य सिद्धिरिति भावः। 'अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका। पिनष्टि दृष्टवैमत्यं सैव सर्वबलाधिका' इति [illegible]।

कारिकां व्याचष्टे—**प्रयोजनप्रतिपिपादयिषयेत्यादिना**। प्रयोजनप्रतिपादनस्य इच्छया **यत्र** यस्मिन् 'गङ्गायां घोषः' इत्यादौ वाक्ये लक्षणामाश्रित्य विवक्षितार्थावाचकशब्दस्य प्रयोगः क्रियते **तत्र** वाक्ये **अन्यतः** प्रमाणान्तरेण **तत्प्रतिपत्तिः** प्रयोजनज्ञानं न भवति, किन्तु **तस्मादेव** लाक्षणिकादेव शब्दात् प्रयोजनीभूतज्ञानं भवतीत्यर्थः। उक्ते प्रयोजने च लाक्षणिकस्य शब्दस्य व्यञ्जनाद्भिन्नोऽन्यो व्यापारो न सम्भवतीति भावः। २५।

उपर्युक्तायामर्थापत्तौ अन्यथाप्युपपत्तिरूपं दोषमाशङ्क्य तं निराकरोति—**नाभिधेत्या**दिना। ननु अभिधयैव प्रयोजनप्रतीतिर्भवेत् 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' इति सिद्धान्तात् ततश्च प्रयोजनप्रतीतये व्यञ्जनायाः कल्पना न युज्यते इत्यत आह—**नाभिधे**त्यादि। प्रयोजनरूपेषु पावनत्वादिषु धर्मेषु गङ्गादिशब्दानां सङ्केतो गृहीतो नास्तीति अभिधया प्रयोजनप्रतीतिर्न भवतीत्यर्थः। अधिकं पञ्चमे उल्लासे वक्ष्यते ॥ २६ ॥

ननु यदि अभिधया प्रयोजनप्रतीतिर्न सम्भवति तर्हि लक्षणया भविष्यति सा कुतस्तृतीयव्यापारकल्पनावसर इत्यत आह—**हेत्वभावा**दित्यादि। मुख्यार्थबाध-मुख्यार्थसम्बन्ध-रूढिप्रयोजनान्यतरसमुदायस्य लक्षणाहेतोस्तत्र अभावात् तत्र लक्षणाऽपि नैव सम्भवतीत्यर्थः। ततश्च प्रयोजनप्रतीतये व्यञ्जना कल्पनीयैवेति भावः ॥ २७ ॥

लक्षणाहेत्वभावमेव स्फुटीकरोति—**लक्ष्यं न मुख्य**मित्यादिना। कारिकार्थो वृत्तिव्याख्ययैव स्फुटीभविष्यति। शब्दस्य स्खलद्गतित्वं तु अभिधारूपायां गतौ (शक्तौ) बाधेन

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति यदि तद्वत् तटेऽपि सबाधः स्यात् तत् प्रयोजनं लक्षयेत्, न च तटं मुख्योऽर्थः, नाप्यत्र बाधः, न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः, नाऽपि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम्, नाऽपि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुं समर्थः ।

स्खलन्त्यां मत्या लक्षणया विवक्षितार्थबोधकत्वम् । **एतस्मिन्** फले **शब्दो** गङ्गादिशब्दः **स्खलद्गतिः** स्खलन्ती मुख्यार्थं बोधयितुं प्रवृत्ता तत्र बाधात् मोघप्रयत्ना पुनः प्रयत्नान्तरमादाय विवक्षितार्थं बोधयितुं लग्ना गतिः यस्य तादृशो **न च** नास्त्येवेति कारिकान्तिमभागार्थः ॥१५॥

कारिकां व्याचष्टे—**यथा गङ्गाशब्द** इत्यादिना । 'गङ्गाया घोषः' इत्यत्र गङ्गाशब्दः स्रोतोरूपेऽर्थे स्वीकृते सति तस्य घोषाधिकरणत्वेन अन्वयो न सम्भवतीति मुख्यार्थबाधस्य सत्त्वाद् गङ्गाशब्दो यथा लक्षणया तटं बोधयति, यदि तटरूपेऽर्थे स्वीकृतेऽपि गङ्गाशब्दस्य घोषशब्देन सह अन्वयोऽनुपपन्नो भवेत् तर्हि (प्रयोजनं) शीतत्वपावनत्वादिधर्मं लक्षणया बोधयेत्; तथा च शीतत्वपावनत्वादिप्रयोजनस्य लक्ष्यत्वं सम्पादयितुं तटे गङ्गाशब्दमुख्यार्थता घोषाधिकरणत्वेन अन्वयाय अयोग्यता च आवश्यिके भवतः, न च ते स्तः, तटं गङ्गाशब्दस्य मुख्योऽर्थोऽपि न, गङ्गाशब्दस्य तटरूपेऽर्थे स्वीकृते तस्य घोषाधिकरणत्वेन अन्वयस्य असम्भवित्वमपि नास्ति । तटस्य गङ्गाशब्दमुख्यार्थत्वे कथञ्चित् स्वीकृतेऽपि पावनत्वादेः गङ्गाशब्दलक्ष्यार्थत्वस्योपपादनाय तटस्य पूर्वलक्षणभिन्नगङ्गाशब्दलक्ष्यार्थभूतैः पावनत्वाद्यैः साक्षात् सम्बन्धः आवश्यको भवति, स च नास्त्येव । प्रयोजनभूतस्य पावनत्वादेः वाचकशब्देन प्रतिपादनमकृत्वा लक्षकशब्देन प्रतिपादनस्य केनचित् प्रयोजनेनाऽपि भाव्यम्, अतः प्रयोजनान्तरे प्रतिपादनीये सत्येव पावनत्वादेर्लक्ष्यत्वं स्वीकर्तुं शक्यते, तच् च प्रयोजनान्तरं नास्तीति पावनत्वादेः लक्ष्यत्वं स्वीकर्तुं नैव शक्यते इत्यर्थः । गङ्गाशब्दस्य शीतत्वपावनत्वादिरूपेऽर्थे लक्ष्यार्थत्वेन स्वीकृतेऽपि तस्य घोषाधिकरणत्वेन अन्वयोऽपि अनुपपन्न एव । एवं च 'गङ्गाया घोषः' इत्यादौ पावनत्वादेः शाब्दी प्रतीतिः अभिधया लक्षणया च अनुपपद्यमाना गङ्गादिशब्दस्य पावनत्वादौ व्यञ्जनां वृत्तिं कल्पयत्येवेतिभावः । ननु प्रवाहरूपमुख्यार्थघटितौ एव [illegible] पूर्वैव च प्रयोजनवत्ताबुद्धिरिति लक्षणामार्गे तटं लक्षयित्वा पावनत्वादि अपि लक्षयेद् इत्यत्राऽऽह वृत्तौ 'एतस्मिन् न च शब्दः स्खलद्गतिः' इति [illegible]—नापि **गङ्गाशब्दः** इत्यादि । यैर्मुख्यार्थबाधादिभिः सहितो गङ्गाशब्दस्तटं बोधयितुं समर्थस्तैर्मुख्यार्थबाधादिभिः सहितो गङ्गाशब्दः शीतत्वपावनत्वादि प्रयोजनं लक्ष्यार्थत्वेन प्रतिपादयितुं **समर्थो** न भवतीत्यर्थः । मुख्यार्थबाधो हि शब्दस्य [illegible] आकाङ्क्षा जनयित्वैव लक्ष्यार्थस्य बोधे सहायको भवति, प्रवाहरूपमुख्यार्थबाधेन तटरूपलक्ष्यार्थबोधने कृते तु अन्वयबुद्धेरपि जायमानत्वेन पूर्वोक्तप्रकारा आकाङ्क्षैव नोदेतीति कुतः प्रवाहरूपमुख्यार्थबाधेन पावनत्वादिरूपस्यार्थस्य लक्ष्यार्थत्वेन बोधस्य सम्भव इति भावः । **प्रतिपादयितु-**

(सू० २९) एवमप्यनवस्था स्याद् या मूलक्षयकारिणी ।

एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेणेति तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृत् अनवस्था भवेत् ।

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते, "गङ्गायास्तटे घोषः" (उदा० ३५)

समसमर्थः इति पाठे तु, 'तटे घोषः' इति प्रयोगे सति यथा तटशब्दः शैत्यपावनत्वादि प्रयोजनं प्रतिपादयितुमसमर्थः न तथा 'गङ्गायां घोषः' इति प्रयोगे गङ्गाशब्दः शैत्य-पावनत्वादि प्रयोजनं प्रतिपादयितुम् असमर्थ इत्यर्थः । (सू० २८) ।

ननु 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ अन्वयानुपपत्तेरभावात् तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वाद् 'गङ्गायां घोषः' इति प्रयोगस्य 'गङ्गातटे घोषः' इत्यत्रैव तात्पर्ये स्वीकृते तु लक्षणाश्रयणस्य निष्फलत्वात्ते शैत्यपावनत्वादेरपि लक्षणाविषयत्वं स्वीकर्तव्यमेवेति कुतः शीतत्वपावनत्वादेः लक्ष्यार्थत्वासम्भव इत्यत आह—एवमप्यनवस्थे-त्यादि । **एवमपि** पूर्वपक्ष्युक्तप्रकारेण शीतत्वपावनत्वादौ लक्षणायाः स्वीकृतायामपि 'शीते-पावने गङ्गातटे घोषः' इति वाचकशब्दप्रयोगमुपेक्ष्य तदर्थबोधाय 'गङ्गायां घोषः' इत्यस्य विवक्षितार्थावाचकस्य शब्दस्य प्रयोगे प्रयोजनं प्रदर्शनीयं भवति इति तत्प्रयोजन-प्रतीतये व्यञ्जना कल्पनीयैव, तस्याऽपि लक्ष्यार्थतायाः स्वीकारे तत्राऽपि प्रयोजनान्तरं प्रदर्शनीयमेव, एवं च तत्रैव व्यञ्जना कल्पनीया भवेत्; तस्यापि प्रयोजनस्य लक्ष्यतायाः स्वीकारे तत्र पुनः प्रयोजनान्तरं वक्तव्यम् तस्यापि लक्ष्यत्वस्य सम्पादनाय पुनः प्रयोज-नान्तरं वक्तव्यमित्येवम् अप्रामाणिकानन्तप्रयोजनपरम्परारूपा अनवस्था भवेत् । ननु यथा बीजं प्रति अङ्कुरस्य तमङ्कुरं प्रति अन्यस्य बीजस्य तद्बीजं प्रति पुनरन्यस्य अङ्कुरस्य इत्येवं रीत्या उत्तरोत्तरं कारणभावस्वीकारे अनवस्था न दोषाय तथैव प्रयोजनस्य लक्ष्यत्वे प्रयोजनान्तरस्य, तस्यापि लक्ष्यत्वे पुनः प्रयोजनान्तरस्य हेतुत्वस्य स्वीकारेऽपि अनव-स्थितिर्न दोषाय इति चेत् तत्राऽऽह—**या मूलक्षयकारिणीति ।** येयमनवस्था सा मूलस्य प्रकृतस्य पावनत्वादेः यस्य प्रतीतये इयं प्रयोजनपरम्परा आश्रीयते तस्य एव **क्षयकरी** क्षयहेतुभूता प्रतीतिविघातकभूता अस्ति, अतो दोषरूपैवेत्यर्थः । तथा चाऽऽहु—'मूलक्षय-करीमाहुरनवस्था तु दूषणम्' इति । प्रकृताप्रतीतिकृदित्यस्य—पूर्वपक्षिमतानुसारं 'गङ्गायां घोषः' इत्यादौ लक्षणाबुद्धेः प्रयोजनात् प्रयोजनान्तरम् अनन्तम् अनुधावन्त्या बुद्धेर्विषया-न्तरसञ्चारो न भवेत्, स च न न भवति; एवं च यत्र गत्वा बुद्धेर्विषयान्तरे सञ्चारस्तस्य प्रयोजनस्य लक्ष्यता न भवेत् तदुत्तरस्य प्रयोजनस्य अप्रतीतेः, व्यञ्जनाया अस्वीकारे लक्ष्यतायाश्च असम्भवे तत्प्रतीतिरपि नैव भवेदिति तत्पूर्वस्य प्रयोजनस्याऽपि लक्ष्यत्वं नोपपद्येत, अनया रीत्या अन्ततः पावनत्वादेरपि लक्ष्यत्वस्यासम्भवेन अप्रतीतिरेव स्या-दिति । एतेन कारिकया सहैव वृत्तिग्रन्थोऽपि व्याख्यात एव ॥ २९ ॥

ननु प्रयोजनस्य पावनत्वादेः तटादिविशेषणत्वेन अर्थविशेषभूतत्वात् प्रयोजनसहित-स्तटादिर्लक्ष्यते इत्यस्माकं मतम्, न तु तटादेः पृथग्भूतं केवलं प्रयोजनं लक्ष्यते इति,

इत्यतोऽधिकस्याऽर्थस्य प्रतीतिरत्र प्रयोजनमिति विशिष्टे लक्षणा, तत् किं व्यञ्जनयेत्याह—

(सू० ३०) **प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥ १६ ॥**

कुत इत्याह—

(सू० ३१) **ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।**

प्रत्यक्षादेर्नीलादिर्विषयः, फलं तु प्रकटता संवित्तिर्वा ।

अतस्त्वदुक्तमकाण्डताण्डवायितमिति पूर्वपक्षं खण्डनायावतारयति—**ननु पावनत्वादिधर्मयुक्त**मित्यादिना । ननु पावनत्वादिविशिष्टस्य तटस्य लक्ष्यत्वे प्रयोजनाभावो दूषणमित्यत्राह पूर्वपक्षी—'गङ्गायास्तटे घोष.' इत्यस्य प्रयोगस्याऽपेक्षया पावनत्वादिवैशिष्ट्यरूपस्य अधिकस्यार्थस्य प्रतीतिरेव लक्षणाप्रयोजनस्य फलम्, अतो विशिष्टे लक्षणा स्वीकर्तव्या, व्यञ्जनाया आवश्यकता नास्तीत्यर्थ. । लक्षिते विशेषाः प्रतीयन्ते इति स्वीकृते तु तटादेः पावनत्वादीना च धर्मधर्मिभावबोधाय चतुर्थोऽपि व्यापार. स्वीकर्तव्यो भवेदिति च पूर्वपक्षिणामाकूतम् ।

उक्तपूर्वपक्षखण्डन प्रतिजानीते—**प्रयोजनेन सहित**मित्यादिना । त्वदुक्ता प्रयोजनवत्ता लक्ष्यार्थज्ञाने ज्ञाता नोपयुज्यते इत्याह—**प्रयोजनेन** [illegible] विपयेण पावनत्वादिना **सहितमेव** वस्तु **लक्षणीयं** लक्षणाजन्यज्ञानविषयो भवतीति वक्तुं **न युज्यते** इत्यर्थ. ॥ ३० ॥

पूर्वोक्तां प्रतिज्ञामनुपपादयितुं हेतुमाह—**ज्ञानस्य विषय** इत्यादिना । **ज्ञानस्य विषयो** यथा ज्ञानाद् **अन्यः** तथा ज्ञानस्य **फल**मपि ज्ञानाद् **अन्यद्** पृथगेव **उदाहृतम्** उक्तं भवति लोके इत्यर्थः । युक्तियुक्तं च तत्, कारणकार्ययोः फलिफलयोर्वा [illegible]वादित्यभिप्रायः । **ज्ञानाद्** ज्ञानविपयफलयोर्भेदे उदाहरणमाह—प्रत्यक्षादेरित्यादिना । प्रत्यक्षादेर्ज्ञानात् **तद्विषयो नीला**दिर्भिन्न एव भवतीत्यर्थः । ज्ञानज्ञेयभावनियामको ज्ञेयगतो ज्ञाततारूपो धर्मः **प्रकटता**, सा हि ज्ञानस्य फलमिति ज्ञानस्याज्ञेयता मन्वानो भट्टः प्राह; **संवित्तिः** अनुव्यवसायाख्यं ज्ञानम्, तद् यथा—पुस्तकमिदमिति व्यवसायरूपं ज्ञानं विषयीकुर्वत् पुस्तकज्ञानवानहम् इति (अनुव्यवसायरूपं) ज्ञानम्, सैव संवित्तिर्ज्ञानफलमिति वैशेषिकादयः, उभयनयेऽपि ज्ञानस्य **फलं** च ज्ञानाद् भिन्नमेव भवति, स्वीक्रियते च तथैव सर्वैरित्यभिप्रायः । **फलं तु** इत्यत्र तुश्चार्थे, ज्ञानफल**मपी**ति तदर्थ, । केषुचिद् हस्तलिखितपुस्तकेषु तु फलं च इत्येव लिखितं दृश्यते; तथाहि कलिकाता-संस्कृत-ग्रन्थमालायां गुम्फिते महेश्वरकृतटीका[illegible] एकसप्ततितमे पृष्ठे 'फलं च इति क्वचित् पाठः' इति टिप्पणी दृश्यते । एवं च सति "ननु विषय-फलयोर्भेद इति सूत्रार्थः स चाऽयुक्तः" इत्यादिका **गोविन्दठक्कुरा**द्युत्थापिता शङ्का अस्थाने एव । एवञ्च त्वदुक्तरीत्या पावनत्वविशिष्टतीरज्ञानस्य लक्षणाज्ञानत्वे स्वीकृते पावनत्वज्ञानस्य तदभिन्नत्वाद्, अभिन्ने च फलि-फलभावसम्बन्धस्यासम्भवाल् लक्षणात्मकज्ञानस्य फलवत्त्वं न भवेदिति

(सू० ३०) **विशिष्टे लक्षणा नैवम्** ।

व्याख्यातम् ।

(सू० ३१) ... विशेषाः **स्युस्तु लक्षिते** ।

लक्षिते तटादौ ये विशेषाः पावनत्वादयस्ते चाऽभिधा-तात्पर्य-लक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जन-ध्वनन-द्योतनादि शब्दवाच्यमवश्य-मेषितव्यम् ।

प्रयोजनेन सहितमेव लक्षणाज्ञानविषय इति वक्तुं न युज्यते इत्यर्थः ॥ ३१ ॥

उक्तमर्थं निगमयति—**विशिष्टे लक्षणा नैवम्** इति । एवमित्यस्य उक्तार्थपरामर्शकत्वं सूचयति—**व्याख्यातम्** इति ॥ ३० ॥

ननु पावनत्वादयो लक्ष्यास्तर्हि कथं तेषां प्रतीतिरित्यत आह—**विशेषाः स्युस्तु लक्षिते** इति । सूत्रार्थो वृत्तौ स्फुटः । यच्चोक्तं 'लक्षिते विशेषा व्यापारान्तरेण प्रतीयन्ते इति स्वीकारे तु तटादेः पावनत्वादीना धर्मधर्मिभावस्य बोधनाय चतुर्थोऽपि व्यापारः स्वीकर्तव्यो भवेत्' इति, तद् यथा नीलविषयस्य प्रमाणस्य नीलनिष्ठैव प्रकटता संवित्तिर्वा फलं तथैव लक्षणाया अपि तद्विषयनिष्ठमेव प्रयोजनमिति तत्र धर्मिधर्मभावकल्पकं व्यापारान्तरमनावश्यकमित्युत्तरं मनसि निधाय आह—**तच्चे**त्यादि । **तच्च** व्यापारान्तरं व्यञ्जनादिशब्दवाच्यं न तु धर्मिधर्मभावबोधनादिनामकं चतुर्थम्, तच्चावश्यं स्वीकर्तव्यमिति भावः ।

ननु एवमपि कथं तस्य व्यापारस्य 'गङ्गायां घोषः' इत्यादौ अवश्यमेषणीयत्वम् ? मा भूल्लक्षणाज्ञाने (लक्ष्यार्थज्ञानरूपे) जातायाः प्रयोजनवत्तायाः पावनत्वादिविशिष्टतटादिलक्षणाप्रयोजकत्वम् लक्षकशब्दप्रयोगे जातायाः प्रयोजनवत्तायाः पावनत्वादि विशिष्टतटादिलक्षणाप्रयोजकत्वं तु न राजदण्डवारितम् इत्याक्षेपस्य निराकरणायैव **अवश्यम्** इति पदम् । तेन च 'भवतु तथा, पावनत्वाद्युपस्थापिका शब्दवृत्तिस्तु स्वीकर्तव्यैव, सैव चास्माकं व्यञ्जना; आर्थ्यां व्यञ्जनायां वाच्यार्थबुद्धि-वैयञ्जनिकबुद्ध्योः पूर्वापरभावस्य दर्शनात् लक्षणामूलायां व्यञ्जनायामपि लक्ष्यार्थबुद्धिप्रयोजनीभूतार्थबुद्ध्योः पूर्वापरभावस्य स्वीकरणीयत्वात् लक्षणातः पृथग्भूता व्यञ्जना स्वीकर्तव्यैव' इत्यर्थः सङ्गृहीत इति केचित्; प्रत्येयनिष्ठशब्दव्यापाररूपा हि लक्षणा, प्रयोजनस्य लक्षणाविषयान्तर्गतत्वेऽपि न लक्षणाप्रत्येयता तत्र, प्रत्येयतया विषयत्वेन विचार्यमाणं पावनत्वादि प्रयोजनं तु लक्षणातिरिक्तव्यापारविषय एव उत्तरकालिकत्वात् तस्येति व्यञ्जना स्वीकर्तव्यैव' इत्यर्थः सङ्गृहीत इत्यन्ये; 'अन्वयानुपपत्त्या हि प्रसरन्ती लक्षणा यावदन्वयोपपादकं तावदेव विषयीकरोति, न त्वनुपपादकमपीति कथं तटे पावनत्वमपि विषयीकुर्यात्; ननु अन्वयानुपपत्त्या कल्प्यमानाऽपि लक्षणा अनुद्देश्यमपि शैत्यपावनत्वादि विषयीकरोति यथा तापोपशमायोपादीयमानं चन्दनं शैत्यमपि जनयतीतिचेत्, न, चन्दनस्य सन्निधिमात्रेण शैत्यजन-

एवं लक्षणामूलं व्यञ्जकत्वमुक्तम् अभिधामूलं त्वाह—

(सू० ३४) अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥ १८ ॥

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यान-

---

कत्व लक्षणायास्तु अनुपपत्तिप्रसारित्वे नैवशैत्यपावनत्वादिबोधजनकत्वमिति वैषम्याद्. इति विशिष्टे लक्षणा नैव स्वीकर्तुं शक्यते, ततश्च विशेषप्रतीतये व्यञ्जना गणनीयैव, इत्यर्थः सङ्गृहीत इत्यपरे ॥ ३३ ॥

व्यञ्जकशब्दा एव मुख्यत्वेन कवेः प्रत्यभिज्ञेया इति, इदञ्च शास्त्रं काव्यशिक्षारूपमिति च व्यञ्जकशब्दानां साकल्येन निरूपणीयत्वात्; तन्निरूपणस्य च सर्वविधव्यञ्जनानिरूपणाधीनत्वाच् शाब्दयाम् आर्थ्यां च व्यञ्जनाया निरूपणीयायां शाब्दलक्षणामूलव्यञ्जनानिरूपणानन्तरं [illegible] निरूप्यते इत्याह—एवं लक्षणामूलमित्यादि । लक्षणामूलं लक्षणोपजीवि । अभिधामूलम् अभिधाविशेषमात्रोपजीवि ।

अभिधामूला व्यञ्जनां कार्यमुखेन लक्षयति—अनेकार्थस्य शब्दस्येत्यादिना । **अनेकार्थस्य** नानार्थस्य **शब्दस्य वाचकत्वे** अभिधाया वृत्तौ वक्ष्यमाणैः संयोगादिभिर्नियन्त्रिते एकत्र अवरुद्धे सति **अवाच्यार्थस्य** तया अभिधाया अविषयस्य अर्थस्य **धीकृत्** प्रतीतिकारणभूता **व्यापृतिर्वृत्तिः** अञ्जनं व्यञ्जनं व्यञ्जनावृत्तिरिति यावत् । एकस्य पदस्य अनेकत्र अनेकैव शक्तिः शक्यतावच्छेदकभेदेन विषयनिरूपणीयतया च शक्तेः; ततश्च यस्मिन्नर्थे विशेषस्मृतिहेतुरस्ति तद्विषयायाः शक्तेरुद्बोधात् तया तदर्थोपस्थापनम्, अन्यविषयायाश्च शक्तेरितरं धानम् भवति, एवं च अभिधया [illegible] नानार्थशब्दद्वितीयार्थस्य बोधिका वृत्तिर्व्यञ्जना नामेति भावः । **जगन्नाथस्तु** द्वितीयमप्यर्थमभिधेयमेव मन्यते, प्रथमद्वितीयार्थयोरौपम्यादिकमेव व्यञ्जनाविषय इति तन्मतम् ।

संयोगादीनां वाचकत्वनियामकत्वे [illegible] सम्मतिमाह—**संयोगो विप्रयोगश्चेत्यादिना** । इमौ श्लोकौ वाक्यपदीयकारस्य भर्तृहरेरिति नागोजिभट्टप्रभृतयः । किन्तु वाक्यपदीये—"वाक्यात् [illegible] देशकालतः । शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात्" इति शब्दार्थव्यवच्छेदहेतून् स्वकीयश्लोकेनोक्त्वा तत्र शिष्टसम्मतिं प्रदर्शयता भर्तृहरिणा धृतौ इमौ श्लोकौ न भर्तृहरेः; किन्तु व्याडेरित्यस्माकं सम्भावना । **संयोगः** संसर्गो वा उच्यमानः प्रसिद्धः सम्बन्धः, **विप्रयोगः** शब्देनोपात्तो वियोगः, **साहचर्यम्** प्रसिद्धसहचरवाचकशब्देन सह प्रयुक्तत्वम् **विरोधिता** [illegible] सह सवार्थस्य प्रसिद्धं विरोधित्वम्, **अर्थः** शब्दान्तरोपात्तं प्रयोजनम्, **प्रकरणम्** प्रयुक्तशब्दप्रतिपाद्यस्यार्थस्य वक्तृश्रोतृबुद्धिस्थत्वम्, **लिङ्गम्** वाक्यान्तरे पदान्तरे वा दृष्टः संयोगाद्यतिरिक्तः [illegible] **अन्यस्य** प्रसिद्धार्थस्य इतरस्य शब्दस्य **सन्निधिः** सहोच्चारणं समभिव्याहार इति प्रसिद्धम्, अथवा नानार्थपदस्य एकार्थमात्रेण

वच्छेदे विशेषस्मृतिहेतवः ॥" इत्युक्तदिशा 'सशङ्खचक्रो हरिः' (उदा० ३६) 'अशङ्खचक्रो हरिः' (उदा० ३७) इति अच्युते, 'रामलक्ष्मणौ' (उदा० ३८) इति दाशरथौ, 'रामार्जुनगतिस्तयोः' (उदा० ३९) इति भार्गवकार्तवीर्ययोः, 'स्थाणु भज भवच्छिदे' (उदा० ४०) इति हरे, 'सर्वं जानाति देवः' (उदा० ४१) इति युष्मदर्थे, 'कुपितो मकरध्वजः' (उदा० ४२) इति कामे, 'देवस्य पुरारातेः' (उदा० ४३) इति शम्भौ, 'मधुना मत्तः कोकिलः' (उदा० ४४) इति वसन्ते

शब्दस्य अर्थस्य प्रतिपादकेन पदान्तरेण सह उच्चारणम्, **सामर्थ्यम्** [illegible] अर्थापत्तिः, **औचिती** औचित्यम् योग्यता इति यावत्, **देशो** राजधानीनगरादिः, **कालो** वसन्तादिः दिवसादिश्च, **व्यक्तिः** व्यञ्जनं लिङ्गम् इति यावत्, **स्वरः** उदात्तादिः. **इत्यादयः** एवम्प्रकारकाः पदार्थाः शब्दार्थस्य अनवच्छेदे नानार्थस्मरणेन सन्देहे सति **विशेषस्मृतेः** अस्य शब्दस्य अत्र अयमर्थ इति निर्णयस्य हेतवो भवन्तीति शाब्दिकधुरन्धरेण **उक्तया** दिशा दिक्प्रदर्शनात्मिकया पद्धत्या **'सशङ्खचक्रो हरिः' 'अशङ्खचक्रो हरिः'** इत्यादौ प्रयुक्तस्य हरिप्रभृतेः शब्दस्य "हरिर्यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहि-कपिभेकेषु हरिर्ना कपिले त्रिषु" इत्यादेः कोषाद् अनेकार्थस्यापि क्रमेण शङ्खचक्रादि-**संयोग** शङ्खचक्रादिवियोगश्च **अच्युते** विष्णौ विषये विशेषप्रतीतिकृत् निर्णायको भवतीत्यर्थः। **'रामलक्ष्मणौ'** इत्यादौ प्रयुक्तस्य रामादेः शब्दस्य "रामः पशुविशेषे स्याज् जामदग्न्ये हलायुधे। राघवे चासिते श्वेते मनोज्ञेऽपि च वाच्यवत्" इत्यादेः कोषाद् अनेकार्थस्यापि [illegible] लक्ष्मणादेः शब्दस्य **साहचर्यम् दाशरथौ** दशरथा-पत्यरामादौ विषये **विशेषप्रतीतिकृद्** निर्णायकं भवतीत्यर्थः। 'रामार्जुनगतिस्तयोः' इत्यादौ प्रयुक्तस्य अर्जुनादेः शब्दस्य "अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः। मातुरेकसुतेऽपि स्यात् पुंल्लिङ्गो धवलेऽन्यवत्" इत्यादेः कोषाद् अनेकार्थस्यापि कार्तवीर्यजामदग्न्यरा-मयोर्**विरोधिता** कार्तवीर्ये, अनेकार्थस्य रामादिशब्दस्यापि सैव विरोधिता जामदग्न्ये विषये **विशेषप्रतीतिकृद्** निर्णायिका भवतीत्यर्थः। **रामार्जुनगतिस्तयोः** इत्यस्य **तयोः** प्रकृतयोः प्रतिद्वन्द्विनोः जामदग्न्य-कार्तवीर्ययोरिव घातकवध्यभावोऽस्तीत्यर्थः। **'स्थाणु भज भवच्छिदे'** इत्यादौ स्थाणुप्रभृतेः शब्दस्य 'स्थाणुः कीले शिवे पुमान्' इत्यादेः कोशाद् [illegible]नानार्थस्यापि तत्र वाक्ये शब्दान्तरोपात्तं भवच्छेदरूपं प्रयोजनं **हरे** शम्भौ विशेषप्रतीतिकृद् भवतीत्यर्थः। **'सर्वं जानाति देवः'** इत्यादौ देवादेः शब्दस्य "देवो मेघे सुरे राज्ञि मान्ये स्यात् क्लीबमिन्द्रिये, इत्यादेः कोशाद् नानार्थस्याऽपि वक्तृ-श्रोतृबुद्धिस्थत्वरूपं नाटचीय **प्रकरणं युष्मदर्थे** राजनि विषये विशेषप्रतीतिकृद् भवतीत्यर्थः। **'कुपितो मकरध्वजः'** इत्यादौ मकरध्वजादिशब्दस्य समुद्र-कामदेवादिवाचकस्यापि शब्दान्तरोपात्तं विरहिणीविषयककोपरूपं लिङ्गं समुद्रादिभ्यः सामान्यतया व्यावृत्तं सत् **कामे मदने विषये** विशेषप्रतीतिकृद् भवतीत्यर्थः। **ननु सप्तमे उल्लासे** '[illegible]' इत्यादौ उदाहरणे (उदा० २३७) समुद्रार्थे मकरध्वजशब्दस्य प्रयोगे तस्य निहतार्थत्वं

'पातु वो दयितामुखम्' (उदा० ४५) इति साम्मुख्ये, 'भात्यत्र परमेश्वर.' (उदा० ४६) इति राजधानीरूपाद् देशाद् राजनि, 'विभावसुर्विभाति' (उदा० ४७) इति दिने रवौ रात्रौ वह्नौ, 'मित्रं भाति' (उदा० ४८) इति सुहृदि, 'मित्रो भाति'

प्रतिपादयिष्यतीति काम एव तस्य प्रसिद्धोऽर्थ , ततश्च प्रसिद्धेरेव तस्य कामे विशेषप्रतीति- कृत्त्वम् इति कथमिद [illegible] ? [illegible] काव्यपाठकाना कृते मकरध्वजशब्दस्य समुद्ररूपेऽर्थे अप्रसिद्धेऽपि, तादृशीमप्रसिद्धिमादाय निहतार्थत्वे उदाहरिष्यमाणेऽपि वैयाकरणादीना प्रतिभावता [illegible] तु मकरध्वजशब्दस्य योगाश्रयणेन समुद्ररूपोऽपि अर्थो न न प्रतिभाति, अतो व्युत्पन्नतराणां मकरध्वजशब्दात् [illegible] योऽर्था. सहसैव प्रतिभान्ति, ततश्च लिङ्गादिरेव तस्य शब्दस्य कामाद्यर्थे [illegible] भवति, इमे च व्याडिप्रभृतिभि. शाब्दिकैरुक्ता विशेषस्मृतिहेतवो न हि काव्यमात्रविषया इति [illegible] सर्वशास्त्रसामान्येनैव ग्रन्थकृता उपन्यस्तानि, स्वरोदाहरणे एव 'वेदे एव, न काव्ये' इतिविशेषणादिति विचारणीय सुधीभिः। एवञ्चात्र [illegible] [illegible]। '**देवस्य पुरारातेः**' इत्यादौ देवादे. शब्दस्य नानार्थकस्य [illegible] प्रसिद्धार्थकेन **सन्निधिः शम्भौ** हरादौ विषये विशेषप्रतीतिकृद् भवतीत्यर्थः। '**मधुना मत्तः कोकिलः**' इत्यादौ 'मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च जीवाशोके मधुद्रुमे' इत्यादेः कोषाद् नानार्थकस्य मध्वादे शब्दस्य [illegible] **सामर्थ्यं वसन्ते** वसन्तप्रभृतिकेऽर्थे विशेषप्रतीतिकृद् [illegible]। '**पातु वो दयितामुखम्**' इत्यादौ आननाद्यर्थकस्य मुखादेः शब्दस्य वाक्यार्थविशेषस्य **औचित्यम् साम्मुख्ये** समागमादौ विशेषप्रतीतिकृद् भवतीत्यर्थ.। '**भात्यत्र परमेश्वर**' इत्यादौ शिव-विष्णु-राजादिनानार्थकस्य परमेश्वरादे शब्दस्य **अत्र** इत्यादिपदबोधितराजधान्यादि**देशविशेष राजनि** नृपादौ विशेषप्रतीतिकृद्भवतीत्यर्थः। '**विभावसुर्विभाति**' इत्यादौ सूर्यवह्निप्रभृतिनानार्थस्य विभावसुप्रभृते शब्दस्य दिने दिवसादौ प्रयुक्तत्वे सति दिनादिरूपः **कालः रवौ** सूर्यादौ विषये विशेषप्रतीतिकृद् भवति, **रात्रौ** निशादौ प्रयुक्तत्वे सति रात्र्यादिरूप. काल **वह्नौ** अग्न्यादौ [illegible] भवतीत्यर्थः। '**मित्रं भाति**' इत्यादौ सुहृत्सूर्यादिनानार्थस्य मित्रप्रभृते. शब्दस्य नपुंसकादिलिङ्गं **सुहृदि** सख्यादौ विषये विशेषप्रतीतिकृद् भवति इत्यर्थः। '**मित्रो भाति**' इत्यादौ सुहृत्सूर्यादिनानार्थस्य मित्रादेः शब्दस्य पुंल्लिङ्गादिक **रवौ** सूर्यादौ विषये विशेषप्रतीतिकृद् भवतीत्यर्थः। "**इन्द्रशत्रुः**" इत्यादौ **वेदे** मन्त्रब्राह्मणयो ऊहादौ **चैव स्वर**. पदान्तादौ वर्तमान उदात्तादिः इन्द्रस्य शातयितेत्यादौ अर्थे पदादौ वर्तमानस्तु उदात्तादिः इन्द्रः शातयिता यस्य स इत्यादौ अर्थे विषये विशेषप्रतीतिकृद् निर्णायको भवति, **काव्ये** तु [illegible] काव्ये तु स्वरो विशेषप्रतीतिकृद् न भवतीत्यर्थः; तथा च पाणिनिनाऽपि भाषायामपि विभाषया एकश्रुत्यपरपर्याया एकस्वरता (त्रैस्वर्याभाव) "विभाषाच्छन्दसि" (१।२।३६) इति सूत्रेण सूचिता इति भट्ट[illegible]-

(उदा० ४९) इति रवौ, 'इन्द्रशत्रु' (उदा० ५०) इत्यादौ वेदे एव, न काव्ये, स्वरो विशेषप्रतीतिकृत्। [illegible] **"एद्दहमेत्तत्थणिआ** [illegible] अच्छिवत्तेहिँ। एद्दहमेत्तावत्था **एद्दहमेत्तेहिँ दिअएहिँ"** (उदा० ५१) इत्यादौ अभिनयादय:। इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽपि अनेकार्थस्य शब्दस्य यत् क्वचिद् अर्थान्तरप्रतिपादनं तत्र नाऽभिधा, नियमनात् तस्या: न

जयादित्य-नागोजिभट्ट-रामचन्द्रशेषादय:, इदानीं भाषाया सामान्यत: प्रचलितम् ऐकश्रुत्यं मम्मटकालेऽपि एतादृशमेव आसीदिति तु [illegible]। महाभाष्ये [illegible]न्ते 'श्वेतो धावति, अलम्बुसानां याता' इति [illegible] उपोद्बलकम् बोध्यम्। "इन्द्रशत्रुर्वर्धस्व" इति त्वष्ट्रा प्रयुक्तो मन्त्र: [illegible] प्रथमे काण्डे षष्ठेऽध्याये तृतीये ब्राह्मणे अष्टम्यां कण्डिकायां श्रूयते। तत्र इन्द्रस्य शत्रु: = शातयिता इत्यर्थस्त्वष्टुरभिप्रेत:, किन्तु तमर्थं बोधयितुम् [illegible] अन्तोदात्तत्वे कर्तव्येऽपि त्वष्टा [illegible] कृतवान् ततश्च तस्य पदस्य इन्द्र: शत्रु: शातयिता यस्य स इत्यर्थो भूत:. तथा च पाणिनि: स्मरति—(अन्त उदात्त इति वर्तमाने) "समासस्य" (६।१।२२३) इति, "बहुव्रीहौ प्रकृत्या पूर्वपदम्" (६।२।१) इति चेति अन्यत्राऽपि (तै० सं० २।५।२) शास्त्रेषु चर्चा श्रूयते। ननु यज्ञकर्मणि प्रयुज्यमाने मन्त्रे त्रैस्वर्यस्याभावात् तत्र-तत्र स्वरस्यार्थविशेषप्रतीतिकृत्त्वं कथमुदाह्रियते? अत्र 'इन्द्रशत्रुर्वर्धस्व' [illegible] मन्त्रत्वस्याऽभावाद् मन्त्राणामेव पाणिनिना—"[illegible]" (१।२।३४) इति एकश्रुतेर्विधानाद् इदमुदाहरणं सङ्गच्छते इति नागोजिभट्टप्रभृतीनां समाधानं [illegible] **मम तु**—यज्ञकर्मणि यजुर्मन्त्रेषु "प्रावचनो वा यजुषि" (१।१३२) इति शुक्लयजुर्वेदपार्षदवचनाद्, "मन्त्रे स्वरक्रिया यथाम्नातमविशेषात्" (१।८।१६) "तानो वा नित्यत्वात्" (अथवा मन्त्रे ऐकश्रुत्यं भवति, तस्य स्वाभाविकवर्णस्वरूपनिर्वाहकत्वेन सर्वत्र प्राप्ते: सत्त्वाद्) (१।८।१८) इति [illegible] यज्ञकर्मण्यपि यजुर्मन्त्रेषु त्रैस्वर्यस्य सम्भवात् याजमानेषु त्वष्टृप्रयुक्तविधेषु मन्त्रेषु तु सर्वथा त्रैस्वर्यस्य प्राप्ते: (का० श्रौ० सू० १।८।१९), यजुर्मन्त्राणां प्रवचनकाले तु स्वरस्य शब्दार्थविशेषप्रतीतिकृत्त्वस्य सर्वथा सम्भवाद् "इन्द्रशत्रुर्वर्धस्व" इत्यादेर्मन्त्रत्वेऽपि इदमत्रोदाहरणं सङ्गच्छत एवेति समाधानम्। 'अवश्यं खल्वस्माभिरिदं वक्तव्यम्—बहुलम्, अन्यतरस्याम्, उभयथा, वा, एकेषाम् इति, सर्ववेदपारिषदं हीदं शास्त्रं तत्र नैक: पन्था: शक्य आस्थातुम्' इति स्वीकृत्य प्रवृत्तेन (महाभाष्ये २।१।५७) बहुलम् अन्यतरस्याम् इत्यादि पाठकेन [illegible] यज्ञकर्मण्यपि यजुर्मन्त्रेषु पाक्षिकं त्रैस्वर्यमनुमन्तव्यमेवेति च [illegible]। कालो व्यक्ति: स्वरादय: इत्यत्र आदिपदं प्रकारार्थकमिति सूचयन् अभिनयस्यापि शब्दार्थनिर्णयसहकारित्वं दर्शयति—**आदिग्रहणाद्** इत्यादिना। **एद्दहमेत्तेत्यादि**। '**एतावन्मात्रस्तनिका** **एतावन्मात्राभ्यामक्षिपत्राभ्याम्।** **एतावन्मात्रावस्था एतावन्मात्रैर्दिवसै:**' इति संस्कृतच्छाया। नायिकागुणश्रवणेनानुरक्तं

च लक्षणा मुख्यार्थबाधाद्यभावाद् अपि तु अञ्जनं व्यञ्जनमेव व्यापारः, यथा—
भद्रात्मनो दुरधिरोहतनोर्विशाल-वंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥उदा० ५२॥

नायक नायिकावस्था बोधयन्त्या दूत्या उक्तिरियम् । हस्तयोः हस्ताङ्गुलीना वा आकु-[illegible] अभिनयै नायिकाङ्गादेः परिमाणं निर्दिशन्ती दूती आह—एतावन्मात्रौ स्तनौ यस्याः, एतावन्त्याभ्यां कर्णजाहं प्राप्ताभ्यां पक्ष्मभ्याम् उपलक्षिता सा तव प्रिया एतावन्मात्रैर्दिवसैः [illegible] अस्तीत्यर्थः । तत्र वक्तृबुद्धिस्थतत्तदाद्यर्थवाचकस्य नानार्थस्य एतदादिशब्दस्य [illegible]-यादिप्रकटितेऽर्थविशेषे विषये विशेषप्रतीतिकृतो भवन्तीत्यर्थः । नानार्थाना शब्दानां [illegible] निरूपणस्य काव्ये स्थलविशेषे फल प्रदर्श्य अभिधामूलां व्यञ्जना [illegible]—**इत्थं संयोगादिभिरित्यादि** । **इत्थं** पूर्वोक्तप्रकारेण नानार्थस्य शब्दस्य अर्थान्तरवाचकत्वे संयोगादिभिर्निवारितेऽपि तस्माद् नानार्थाद् शब्दाद् यत् **कुत्रचिद्** [illegible] प्रतिपत्तिः तत्र द्वितीयेऽर्थे तस्य शब्दस्य अभिधा वृत्तिर्न भवितु-मर्हति, तस्या अभिधायाः संयोगादिभिः प्रथमेऽर्थे **नियमनाद्** व्यवस्थापनाद्, शब्दबुद्धि-कर्मणा विरम्यव्यापाराभावाच्च; तत्र द्वितीयेऽर्थे तस्य नानार्थस्य शब्दस्य **लक्षणा**रूपो व्यापारोऽपि न भवितुमर्हति [illegible] **अभावाद्**; एवं च तत्र शाब्दया द्वितीयार्थप्रतीतौ अभिधया लक्षणया च अनुपपन्नायां सत्यां [illegible] तत्र द्वितीयेऽर्थे **व्यञ्जनानाम व्यापार** कल्पनीय एवेति तत्र द्वितीयेऽर्थे तस्य नानार्थस्य शब्दस्य अञ्जनम्-व्यञ्जनं नाम व्यापारः स्वीकर्तव्य एवेत्यर्थः ।

[illegible] व्यञ्जनामुदाहरति—**भद्रात्मनो दुरधिरोहतनोरित्यादिना** । कप्फिणा-भ्युदये (१।३८) राज्ञः स्तुतिरियम् । अतः प्रकरणम् अस्य पद्यस्य प्रथमं राजविषयकेऽर्थे विशेषप्रतीतिं जनयति । स चाऽर्थोऽयम्—अयं राजा एतादृश उदारोऽस्ति यस्याऽस्य **भद्रात्मनः** शोभनदेहस्य **दुरधिरोहतनोः** [illegible] **विशालवंशोन्नतेः** महत्कुलप्रवर्तकस्य **कृतशिलीमुखसङ्ग्रहस्य** [illegible] **अनुपप्लुतगते** अबाधित-प्रसरस्य **परवारणस्य** शत्रुनिवारकस्य **कर** हस्त सततमेव **दानाम्बुसेकसुभग** ब्राह्मणेभ्यो दानाय पातितं यद् अम्बु तस्य सेकेन शोभनः अभूदिति । एवं प्राकरणिकेऽर्थे प्रतीते नानार्थकशब्दबलात् सहृदयानां द्वितीयोऽर्थोऽपि प्रतिभाति । स चायम्—अयं हस्ती एता-दृश उत्तमोऽस्ति यस्य अस्य **भद्रात्मन** अष्टसु हस्तिजातिषु भद्राख्यजातिं प्राप्तवतः **दुरधि-रोहतनोः** अत्युच्चतया [illegible] आरोहणीया तनुर्यस्य तस्य **विशाल-वंशोन्नतेः** [illegible] **कृतशिलीमुखसङ्ग्रहस्य** [illegible]-ग्रहस्य **अनुपप्लुतगतेः** अनुद्धतगमनस्य **परवारणस्य** श्रेष्ठहस्तिनः **कर** शुण्डादण्डः **सततं** सदैव **दानाम्बुसेकसुभगो** मदजलधाराभिः [illegible] । ततश्चात्र [illegible]-योश्च उपमाऽपि प्रतीयते । शक्वर्यां छन्दसि वसन्ततिलका वृत्तम्, 'उक्ता वसन्ततिलका

(सू० ३५) तद्युक्तो व्यञ्जकः शब्दः ।

तद्युक्तो व्यञ्जनयुक्तः ।

(सू० ३६) ... ...यत् सोऽर्थान्तरयुक् तथा ।

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥ १८ ॥

तथेति व्यञ्जकः ।

इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम द्वितीय उल्लासः ॥ २ ॥

तभजा जगौ गः' इति लक्षणात् । तत्रास्मिन् द्वितीयेऽर्थे **भद्रात्मन** इत्यादेर्वाक्यशब्दस्य अभिधा-व्यापारो नास्ति तस्य प्रथमार्थोपस्थापनेनैव [illegible] शब्दबुद्धिकर्मणां विरम्य-व्यापाराभावस्य स्वीकारात्; लक्षणाऽपि तत्र नास्त्येव [illegible], अतस्तत्र द्वितीयेऽर्थे भद्रात्मन इत्यादेः शब्दस्य [illegible] कल्पनीय एवेति मम्मट-स्याभिप्रायः । [illegible] 'नानार्थस्य शब्दस्य अप्राकरणिकेऽर्थे व्यञ्जनेति प्राचां सिद्धान्तः शिथिल एव; प्राकरणिकाप्राकरणिकयोरुपमाया तु सा कदाचित् स्यादपीत्यत्रा-स्माकं प्रतिभाति' इति सयुक्ति वक्ति । नानार्थस्य शब्दस्य प्रकरणादिभिरभिधायामेकत्रैवा-नियन्त्रितायां तु श्लेष एव न व्यक्तिरिति स्मर्तव्यम् ॥ उदा० ५२ ॥

वस्तुतः शाब्दर्जिव [illegible] आर्थ्या व्यञ्जनाया रसभावादिविषयाया वस्तुविषया-याश्च इदानीम् अपि अनिरूपितत्वेन अत्र द्वितीयोल्लासे व्यञ्जनायाः साकल्येन निरूपणं नैव भूनम्, [illegible] व्यञ्जना सामान्यतः प्रतिपादितैवेति व्यञ्जना-निरूपणीयं व्यञ्जकशब्दं निरूपयति—**तद्युक्तो व्यञ्जकः शब्द** इति । व्यञ्जनायुक्तः शब्दो व्यञ्जक इत्युच्यते इत्यर्थः । तदेव [illegible]—**तद्युक्तो व्यञ्जनयुक्त** इति । (३५) ।

[illegible]विवक्षितवाच्यस्य व्यङ्ग्यस्यार्थस्य व्यञ्जने क्षमस्य शब्दार्थ**युगलस्य** [illegible]-नुयायिभिरालङ्कारिकैर्ध्वनिरिति व्यवहारः कृत इत्युक्तम्, चतुर्थे उल्लासे शाब्दव्यञ्जन-मूलानि उल्लास्यकालकरवालेत्यादीनि ध्वनिकाव्यानि उदाहरिष्यन्ते, तत्र शाब्दव्यञ्जन-मूलेष्वपि ध्वनिकाव्येषु अर्थस्यापि व्यञ्जकत्वं यदि नोपपाद्यते तदा [illegible]-स्यादिति शाब्दयामपि व्यञ्जनायामर्थस्यापि सहकारित्वमुपपादयति—[illegible]-दिना । स नानार्थकः एकत्र नियन्त्रिताभिधः शब्दः अर्थान्तरेण व्यङ्ग्यार्थादन्येन प्रथमेन अर्थेन **युक्** युक्तः सन् एव **तथा** व्यञ्जको भवति प्रथमार्थाभावे तच्छब्दप्रयोगस्यैव अलाभात्; तस्मात् **तत्र** शब्दमूलव्यञ्जनास्थले **अर्थोऽपि** शब्दसह**कारितया** [illegible] **व्यञ्जको** मतः सम्मत एवास्माकमित्यर्थः । अतः शब्दमूलव्यञ्जनानुप्राणीव्यपि शब्दार्थ-युगलरूपस्य काव्यस्य ध्वनित्वं सम्भवत्येवेति न पूर्वापरग्रन्थासङ्गतिराशङ्कनीयेत्यभिप्रायः । सूत्रस्थं तथेतिपदं दुरूहार्थमिति कृत्वा व्याचष्टे—**तथेति व्यञ्जकः** इति । (सू० ३६) ।

इति श्रीहिमवत्खण्डस्थनेपालदेशमध्यवर्तित्रितुङ्गाचलाङ्कितजनपदान्तर्गत-
ताम्रकूटग्रामाभिजन-[illegible]-गाङ्गेय-कौण्डिन्न्यायना-आचार्यशिवराजकृतौ
हैमवत्यां काव्यप्रकाशविवृतौ द्वितीय उल्लासः
समाप्तः ॥२॥

अथ तृतीय उल्लासः

(सू० ३७) **अर्था प्रोक्ताः पुरा तेषाम् ।**

अर्था वाच्य-लक्ष्य-व्यङ्ग्याः । तेषां वाचक-लाक्षणिक-व्यञ्जकानाम् ।

(सू० ३८) ...... **अर्थव्यञ्जकतोच्यते ।**

कीदृशीत्याह—

(सू० ३९) **वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥२०॥**

प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।

योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥२१॥

बोद्धव्यः प्रतिपाद्यः । काकुर्ध्वनेर्विकारः । प्रस्तावः प्रकरणम् । अर्थस्य वाच्य-लक्ष्य-व्यङ्ग्यात्मनः ।

द्वितीयेनोल्लासेन काव्यलक्षणघटकौ शब्दार्थौ सामान्येन निरूपितौ, द्वितीये उल्लासे शाब्दी लक्षणामूला अभिधामूला च व्यञ्जना [illegible] निरूपिता; शाब्द्या व्यञ्जनाया निरूपणे सजातीयत्वेन स्मृता आर्थी व्यञ्जनापि काव्यभेदप्रतिपादनायोपयोगिनीति, [illegible] प्रवृत्ते काव्ये तस्या विशिष्टं स्थानमिति च तस्या उपेक्षानर्हत्वात् तृतीयेनोल्लासेन ता निरूपयति । द्वितीये उल्लासे शब्दप्रकारविशेषनिरूपणे उपयोगिनीना वृत्तीनामेव प्राधान्येन निरूपणं कृतमिति तत्र साक्षात् प्राधान्येन च अनुपयोगिन्या आर्थ्या व्यञ्जनाया विशेषतो निरूपणाय **पृथगेव** तृतीय उल्लास आरब्ध इति ज्ञेयम् । यद्यपि आर्थ्यां व्यञ्जनायां रसादिविषया व्यञ्जना एव मुख्या, वस्तुतः काव्यजीवातुभूता च, तथापि तस्या महाविषयत्वात् काव्यभेदनिरूपणेन सहैव तन्त्रेण तस्या निरूपणं करिष्यते इति अत्र सा उपेक्षिता ग्रन्थकारेण ।

तासां तासां वृत्तीनां तेषां तेषां शब्दानाञ्च निरूपणेन ते ते अर्था अपि निरूपिता भवन्ति इति स्मारयति—**अर्थाः प्रोक्ता** इत्यादिना । के ते अर्था इत्याह—वाच्यलक्ष्य-व्यङ्ग्या इति । सर्वनाम्नः समीपस्थनामपरामर्शकत्वेन कारिकास्थस्य **तेषामि**ति पदस्य अर्थानाम् इत्यर्थो मा विज्ञायि इति व्याचष्टे—**वाचक-लाक्षणिक-व्यञ्जकानाम्** इति ॥३७॥

प्रसङ्गसङ्गत्या आर्थी व्यञ्जना निरूप्यते इत्याह—**अर्थव्यञ्जकतोच्यते** इति । **अर्थानां व्यञ्जकता** आर्थी व्यञ्जना **उच्यते** 'सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते' इति (सू० १०) पूर्वमेवोद्दिष्टाऽपि इदानीं सम्यक् प्रतिपाद्यते इत्यर्थः ॥ ३८ ॥

आर्थीं व्यञ्जनामाह—**वक्तृबोद्धव्ये**त्यादिना । **वक्ता** प्रतिपादकः । **बोद्धव्यः** बोधनीयः प्रतिपाद्यः श्रोता इति यावत् । **काकुः** [illegible] कृतो ध्वनेर्विकारः । **वाक्यं** वाक्यघटकानेकपदप्रयोग इत्यर्थः । वाच्योऽभिधेयोऽर्थः । **वाक्यवाच्य**-सहितोऽन्यसन्निधिः इति मध्यमपदलोपी समासः । **प्रस्तावः** प्रकरणम्, वक्तृश्रोतृवृद्धयो-

क्रमेण उदाहरणम्—

[तत्र वक्तृवैशिष्ट्यमूला आर्थी व्यञ्जना यथा—]

अइपिहुलं जलकुम्भ घेत्तूण समागदम्हि सहि तुरिअम् ।
समसेअसलिलणीसासणीसहा वीसमामि खणम् ॥उदा० ५३॥

अत्र चौर्यरतगोपनं गम्यते ।

रुपस्थितोऽर्थः इति यावत् । देशः विविक्तभूभागादिः । कालः वसन्तादिः । आदिपदात् चेष्टाप्रभृतयः । एतेषां वक्तृबोद्धव्यादीनां **वैशिष्ट्यात्** प्रतिभावतां सहृदयानाम् **अन्यार्थ-**विषयाया वाच्यातिरिक्तार्थविषयाया **धियो** बोधस्य **हेतुर्**भूतोऽर्थस्य यो व्यापारः **सा व्यक्तिरेव** व्यञ्जनैवेत्यर्थः । प्राथमिकार्थप्रतिपादनेनैव अभिधाया विरामात्, लक्षणाहेतो-रभावाच्च वक्त्रादिवैशिष्ट्यसहितेन प्राथमिकेन अर्थेनैव जनिता द्वितीयार्थप्रतीतिः व्यञ्ज-नव्यापारं विनाऽनुपपन्ना इति, तत्र शब्दे द्व्यर्थकत्वादिवैशिष्ट्यस्याभावात् परिवृत्तिसह-त्वस्य सत्त्वाच्च प्राथमिकस्यार्थस्य द्वितीयकक्षायां प्रतीयमानेऽर्थे व्यञ्जनाव्यापारः स्वीकर्तव्य एवेत्यर्थः ।

यद्यपि कत्यकर्त्रीकावृत्तिना रसादिव्यञ्जना नाद्याऽपि प्रतिपादिता, अतोऽत्रैव 'व्यक्तिरेव सा' इत्यनन्तरं ' त्रिस्तवृत्तिविशेषस्य **रसादेः** प्रतिपित्सया । विभावादिभ्य एवाऽभिव्यक्ति-**रर्थसमाश्रया**'' इति कारिका पठनीया इति केचित्, तथापि सा सामान्यतोऽर्थव्यञ्जना एवेति एतावता ग्रन्थेन व्यञ्जना प्रायः साकल्येन निरूपिता इति वक्तुं शक्यते । एवञ्च निरूपितासु सर्वासु व्यञ्जनासु अनुगतं व्यञ्जनासामान्यलक्षणं ग्रन्थकारेण सूचितमिदम-[illegible]—लक्षणाभिधामूलकशब्दार्थसम्बन्धाद्व्यतिरिक्तो मुख्यार्थसम्बद्धासम्बद्धप्रसिद्धाप्रसिद्धार्थानु-**भवजनको** नानार्थकशब्दसाहाय्यसहकृतेन वक्त्रादिवैशिष्ट्यज्ञानप्रतिभादिभिरुद्बुद्ध **उद्बोधकारणेषु शब्दार्थादिषु व्यापारत्वेनोपचरितः सहृदयनिष्ठः संस्कारविशेषो रत्यादि-वासनादिको व्यञ्जना** इति । सा च व्यञ्जना मुख्यरूपेण द्वेधा—शब्दनिष्ठा अर्थनिष्ठा चेति । शब्दनिष्ठाऽपि द्वेधा—लक्षणामूला अभिधामूला चेति । लक्षणामूलाया अपि-व्यञ्जनाया लाक्षणिकशब्दनिष्ठत्वेनैव व्यञ्जकत्वात् शाब्दत्वं बोध्यम् । आर्थी तु व्यञ्जना असंलक्ष्यक्रमव्यङ्ग्यसंलक्ष्यक्रमव्यङ्ग्यविषयत्वादिना भिद्यते । एवं च मुख्यरूपेण साऽपि वक्तृबोद्धव्यादिवैशिष्ट्यमूला विभावादिमूला चेति द्वेधा । तत्र असंलक्ष्यक्रमव्यङ्-ग्यविषया रसादिव्यञ्जना विभावादिमूला रसादिनिरूपणेनैव सम्यङ् निरूपयितुं शक्यते इति तत्रैव तन्त्रेण (रसादिनिरूपणत्वेन रसादिविषयकव्यञ्जनानिरूपणत्वेन च युगपदेव) निरूपयिष्यते । अत्र तु संलक्ष्यक्रमव्यङ्ग्यविषया वक्तृबोद्धव्यादिवैशिष्ट्यमूला आर्थी व्यञ्जनैव मुख्यरूपेण निरूपिता इति ज्ञेयम् ।

उक्तानां वैशिष्ट्यानां व्यञ्जकत्वस्योदाहरणानि क्रमेण प्रदर्शयन् वक्तृवैशिष्ट्योपल-क्षितस्य वाच्यस्यार्थस्य व्यञ्जकत्वमुदाहरति—अइपिहुलमित्यादिना । **'अतिपृथुलं जल-कुम्भं गृहीत्वा समागताऽस्मि सखि त्वरितम् ।** श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि

[बोद्धव्यवैशिष्ट्यमूला आर्थी व्यञ्जना यथा—]

ओण्णिद्दं दोब्बल्लं चिन्ता अलसत्तणं सणीससिअम् ।
मह मन्दभाइणीए केरं सहि तुह वि अहह परिहवइ ॥उदा० ५४॥

अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ।

[काकुवैशिष्ट्यमूला आर्थी व्यञ्जना यथा—]

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्याऽपि कुरुषु ? ॥उदा० ५५॥

क्षणम्' इति संस्कृतच्छाया । पानीयघट्टगमनच्छलेन सङ्केतस्थानं गत्वा रमित्वा आगता काचित् पुश्चली [illegible] मनसैव सम्भावयन्ती सखी प्रति आह—ए सखि, अतिशयेन पृथुलं जलपूर्णं घटं गृहीत्वा त्वरितत्वरितं समागताऽस्मि, अतः परिश्रमात् जाताभ्या स्वेदजलनिश्श्वासाभ्या **निस्सहा** चलितुमशक्ता अस्मि, अतः क्षणं विश्रमं करोमीति । [illegible] परिश्रमो नान्यहेतुजन्य इति नाऽन्यथा शङ्कनीयमिति पुश्चल्या अभिप्रायः । वक्त्र्याः पुंश्चलीत्वस्य अवगमे प्रमाणान्तरेण जाते सति उक्ताद् वाक्यार्थाद् इयं चौर्येण कृतं रतं गोपायतीति सहृदयैः श्रोतृभिः सामाजिकैर्वा प्रतीयते इति आह—**अत्र चौर्ये**त्यादिना ॥उदा० ५३॥

बोद्धव्यवैशिष्ट्ययोगात् वाक्यार्थस्य व्यञ्जकत्वमुदाहरति—**ओण्णिद्द**मित्यादिना । "**औन्निद्रचं दौर्बल्यं चिन्ता अलसत्वं सनिश्श्वसितम् । मम मन्दभागिन्याः कृते सखि त्वामपि अहह परिभवति ।**" इति संस्कृतच्छाया । [illegible] दूतीं प्रति काचन नायिका आह—अयि सखि, मम मन्दभाग्यायाः कृते त्वामपि उन्निद्रत्वं दुर्बलत्वं चिन्ता निश्श्वसितसहितम् अलसत्वं च प्रत्यहम् अहह भृशं क्लेशयतीति । अत्र बोद्धव्याया दूत्याः अन्यदाऽपि चापल्य प्रदर्शयन्त्याः वैशिष्ट्याद्वाच्यार्थेन 'तवाऽपि मत्प्रियोपभोग इष्टः, अर्थात् सखीत्वं परिहाय त्वं मम सपत्नीत्वं करोषि' इति नायिकाभिप्रायः सामाजिकान् प्रति व्यज्यते इत्याह—**अत्र दूत्या** इत्यादिना । यद्यप्यत्र मम्मटेन उपभोगव्यक्तिरुक्ता तथापि औन्निद्र्यादि नोपभोगचिह्नं किन्त्वभिलाषचिह्नमिति तत्परत्वेनैव व्याख्यातुं युक्तमिति मम प्रतिभाति ॥उदा० ५४॥

काकुवैशिष्ट्य योगाद् वाच्यार्थस्य व्यञ्जकत्वमुदाहरति—**तथाभूता**मित्यादिना । वेणीसंहारे भीमस्य सहदेवं प्रति उक्तिरियम् । राजसभायां द्रौपदी **तथाभूतां** रजोवतीं [illegible] दृष्ट्वा [illegible] व्याधैः सह सुचिरम् उषितं च दृष्ट्वा अस्माभिर्विराटस्य गृहे [illegible] गुप्तं स्थितं च दृष्ट्वा अनेन प्रकारेण **खिन्ने** कोपपीडिते मयि अस्माकं **गुरुर्ज्येष्ठोऽग्रजः** पितृतुल्यः **खेदं भजति** क्रुध्यति, किन्तु अद्याऽपि **कुरुषु** दुर्योधनादिषु खेदं न भजति ? इत्यर्थः । अत्यष्ट्यां छन्दसि

[वाक्यवैशिष्ट्यमूला आर्थी व्यञ्जना यथा—]

तइआ मह गण्डत्थलणिमिअं दिट्ठिं ण णेसि अण्णत्तो ।
एण्हिं सच्चेअ अहं ते अ कवोला ण सा दिट्ठी ॥उदा० ५६॥

अत्र मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत्, चलितायां तु तस्यामन्यैव जातेत्यहो प्रच्छन्नकामुकत्वं ते इति व्यज्यते ।

अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते । न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यम्, प्रश्नमात्रेणापि काकोर्विश्रान्तेः ।

शिखरिणी वृत्तम्, 'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी' इति लक्षणात् । तत्र व्यङ्ग्यमाह—**अत्र मयि** इत्यादिना । **काक्वा** प्रश्नरूपेण वाच्यार्थेन इत्यर्थः । ननु पात्रापात्रविपर्यासेन खेदकरणाऽकरणरूपस्य वाक्यार्थस्य अयुक्ततया अविश्रान्तस्य विश्रान्त्यै काकुव्यङ्ग्यं वाच्यार्थसिद्ध्यङ्गत्वेनावश्यं स्वीकर्तव्यमिति अनुपपत्तिप्रमाणबलादागतस्य **गुणीभूतव्यङ्ग्यत्वम्** औपचारिकव्यङ्ग्यत्वम्, न तु वस्तुतो व्यङ्ग्यत्वं भवति, प्रमाणान्तरात् प्रतीतस्यार्थस्य व्यञ्जनाविषयताया [illegible] कथमिदम् आर्थ्या व्यञ्जनाया उदाहरणमिति न शङ्कनीयम्, काकुव्यङ्ग्येन प्रश्नेनैवाऽपि वाक्यार्थविश्रान्तेर्लाभाद् वाक्यार्थविश्रान्तये 'मयि न योग्यः खेदः कुरुषु तु योग्यः' इत्यस्यार्थस्यानपेक्षितत्वादस्य व्यङ्ग्यार्थस्य न प्रमाणान्तरविषयता किन्तु व्यञ्जनाविषयतैवेत्याह—**न चे**त्यादिना । [illegible] ध्वनित्वाभाव आशङ्क्य परिहृत इति मन्दाना व्याख्यानं तु असत्, अत्र आर्थ्या व्यञ्जनाया एव [illegible] आर्थे व्यङ्ग्ये ध्वनित्वाभावेऽपि क्षतेरभावात् । वृत्तौ गुणीभूतव्यङ्ग्यत्वमिति पदप्रयोगस्तु [illegible] एव ॥उदा० ५५॥

वाक्यवैशिष्ट्यमूलकस्य वाच्यस्य व्यञ्जकत्वमुदाहरति—**तइ आ मअ** इत्यादिना । "**तदा मम गण्डस्थलनिमग्नां दृष्टिं न नयसि अन्यत्र । इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः ।**" इति संस्कृतच्छाया । वक्त्र्या नायिकायाः मृजया स्थासकेन च आदर्शायमाने कपोले तत्सख्याः स्वप्रच्छन्नप्रियतमायाः प्रतिबिम्ब [illegible]च्छलेन सादरं पुनः पुनर्विलोकितवन्तं तदनन्तरं तदपगमे तथा अपश्यन्तं नायकं प्रति नायिकाया उक्तिरियम् । यदा सा त्वत्प्रच्छन्नप्रियतमा मत्कपोले प्रतिबिम्बिता आसीत् **तदा** त्वं मम गण्डस्थले निमग्ना दृष्टिमन्यत्र न नीतवान् अभूः इदानी तस्याम् अपगतायाम् अपि अहं तु पूर्वं त्वया या तथा विलोकिता सैव, कपोलौ च मे पूर्वं त्वया यौ तथा विलोकितौ तौ एव, किन्तु तव दृष्टिस्तु पूर्वं यादृशी अभूत् तादृशी इदानी नास्तीत्यर्थः । प्राचीनाना भारतवर्षीयाणां विलासिनां प्रसाधनप्रियताया साक्षिभूतमिदं पद्यम् । तत्र व्यङ्ग्यं प्रदर्शयति—**अत्र मत्सखीमित्यादिना । तदा, निमग्नाम्, न नयसि, इदानीम्, सा, तौ** इत्यादिभिः साकूतैः पदैर्घटितस्य वाक्यस्य वैशिष्ट्याद् [illegible] प्रदर्शितेन वाच्यार्थेन 'अहो प्रच्छन्नकामुकत्वं ते' इति नायिकाभिप्रायः सामाजिकबोद्धव्य-

[वाच्यवैशिष्ट्यमूला आर्थी व्यञ्जना यथा—]
उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः।
किञ्चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥उदा० ५७॥
अत्र रतार्थं प्रविशेति व्यङ्ग्यम्।
[बोद्धव्यान्यसन्निधिवैशिष्ट्यमूला आर्थी व्यञ्जना यथा—]
णोल्लेइ अणुल्लमणा अत्ता म घरभरम्मि सअलम्मि।
खणमेत्त जइ सञ्झाइ णवर होइ णव होइ वीसामो ॥उदा० ५८॥

साधारण्येन व्यज्यते इत्यभिप्रायः। यद्यपि वाक्यवैशिष्ट्यं वाच्यवैशिष्ट्यात् [illegible] पृथग्भूतं वाक्यवैशिष्ट्यस्यापि वाच्यवैशिष्ट्यद्वारैव व्यञ्जने उपयोगित्वात्, तथापि वाक्य-वैशिष्ट्ये वाक्यघटकानां बहूना पदानां परिवृत्त्यसहत्वस्यापि सहकारो विशेष इति वाक्यवैशिष्ट्यस्य पृथग् गणना ॥उदा० ५६॥

वाच्यवैशिष्ट्यबलाद् वाच्यस्य [illegible] —उद्देशो [illegible]। [illegible] नायिका प्रति उक्तिरियम्। अयि तन्वि, **सरसानां** हरिताना कदलीनां श्रेण्याः पङ्क्तेः शोभया **अतिशायी** अन्येभ्यो विशिष्टः **कुञ्जानामुत्कर्षेण** रत्युद्दीपनगुणो-च्चयेन अङ्कुरित उत्पादितो रमणीना **विभ्रमः** [illegible] चित्तवृत्तेरनवस्थानं येन तादृशो नर्मदाया नद्या **उद्देशः** उद्गतो देशोऽयमस्ति। अपि च अस्मिन् उद्देशे ते सुरत-सुहृदो वाता वान्ति, येषामग्रे **मनोभूः** कामः **कलिताकाण्डकोपः** उद्दीपननिमित्तं विनाऽप्यु-द्दीपितो यौवनयुजा पीडयिता मन् **सरति** चलतीत्यर्थः। अत्र उद्देशपदवाच्यार्थः तत्रोद्देशे स्थिताभ्या रममाणाभ्या दूरादेव आगच्छतां परेषा कदलीवृत्यन्तरेण दर्शनीयत्वं परैश्च तयोरदर्शनीयत्वम् इति व्यङ्ग्यार्थेन, सरसपदवाच्यार्थः मञ्चरणेऽपि मर्मरध्वनेरभाव इति व्यङ्ग्यार्थेन, [illegible] छायावत्त्व[illegible] रतियोग्य स्थानमिति व्यङ्ग्यार्थेन, कुञ्जोत्कर्षादिपदवाच्यार्थो मदनोद्दीपनं स्थानमिति व्यङ्ग्या-र्थेन, कलिताकाण्डकोपपदार्थो मनोभूः तदाज्ञोल्लङ्घने [illegible] व्यङ्ग्यार्थेन विशिष्ट, एवमन्येऽपि पदार्था व्यङ्ग्यार्थयोगेन विशिष्टाः सन्तीति तादृशपदार्थजन्यवा-क्यार्थः [illegible] **अत्र रतार्थं प्रविश** इति व्यङ्ग्यं बोद्धव्य-सामाजिकसाधारण्येन व्यनक्तीतिज्ञेयम् ॥उदा० ५७॥

सम्बोद्ध्यादन्यस्य वस्तुतो बोद्धव्यत्वेन वक्तुरभिमतस्य सन्निधेः वैशिष्ट्याद् वाच्य-स्यार्थस्य [illegible]मुदाहरति **णोल्लेइ अणुल्लमणे**त्यादिना। '**नुदति अनार्द्रमना श्वश्रूर्मां गृहभरे सकले। क्षणमात्रं यदि सन्ध्यायां केवलं भवति न वा भवति विश्रमः।**' इति संस्कृतच्छाया। प्रतिवेशिनीसमक्षं उपपतिं तद्दूतीं वा स्फुटं सङ्केतं वेदयितुमसमर्था काचित् प्रच्छन्नाऽभिसारिका सङ्केत[illegible] प्रतिवेशिनीमुद्दिश्य [illegible]—

[कालवैशिष्ट्ये आर्थी व्यञ्जना यथा—]

गुरुअण-परवस पिअ कि भणामि तुह मन्दभाइणी अहकम् ।

अज्ज पवासं वच्चसि वच्च सअं चेय सुणसि करणिज्जम् ॥उदा० ६१ ॥

अत्र अद्य मधुसमये यदि व्रजसि तदा तावत् न भवामि, तव तु न जानामि गतिमिति व्यज्यते ।

आदिग्रहणाच्चेष्टादेः, तत्र चेष्टाया यथा—

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया

प्रोल्लास्योरुयुगं परस्परसमासक्तं समापादितम् ।

कुरुध्वम्, अस्मि = अहम् अत्रैव कुसुमावचायं करोमि, हि यस्माद् अहं दूरं भ्रमितुं समर्था नास्मि, वो यूष्मान् प्रति एष अञ्जलिः . . . रचितो मया, यूयं प्रसीदत प्रसन्ना भूत्वा मत्प्रार्थना स्वीकुरुत इत्यभिप्रायः । त्रिष्टुभिच्छन्दसि इन्द्रवज्रोपेन्द्रवज्रयो-रुपजातिर्वृत्तम् । सामान्यसखीविषयक उपर्युक्तो वाच्योऽर्थः अर्थादागतेन देशस्य विविक्तत्व-रूपेण वैशिष्ट्येन सहकृत सन् आश्वस्तां विश्रब्धां सखी प्रति प्रच्छन्नप्रियो मे त्वयाऽत्रैव विसृज्यतामिति व्यङ्ग्यं व्यनक्ति, सामाजिकाश्च अनया इयं 'त्वया प्रच्छन्नप्रियो मेऽत्रैव विसृज्यताम्' इति निवेद्यते इति [illegible] अत्र विविक्त इत्यादिना । यद्यपि देशवैशिष्ट्यमपि श्रव्यकाव्ये तु वस्तुतो वाच्यवैशिष्ट्य-मेव तथाऽपि तत्रापि वाच्यवैशिष्ट्यविशेषोऽयमितिकृत्वा पृथग् गणनोदाहरणे बोध्ये । रूपकादौ तु देशवैशिष्ट्यं वाच्यवैशिष्ट्यात् पृथगपि प्रतीयते एव ॥ उदा० ६० ॥

कालवैशिष्ट्याद् वाच्यस्य व्यञ्जकत्वमुदाहरति—गुरुअणेत्यादि ना । 'गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिनी अहकम् । अद्यप्रवासं व्रजसि व्रज स्वयमेव श्रृणोषि करणीयम् ।' इति संस्कृतच्छाया । हे मान्यजनवशगत प्रिय, तव त्वां किं भणामि, परा-धीने वचनस्य व्यर्थत्वात्, तव दोषः कोऽपि नास्ति, अहकम् अहमेव मन्दभाग्या अस्मि, अद्य यस्मिन् काले प्रवासिनोऽपि गृहमायान्ति तस्मिन् वसन्तसमये प्रवासं व्रजसि, व्रज, अहं किङ्करोमि, त्वं स्वयमेव करणीयम् उत्तरकालकर्तव्य शृणोषि अचिरादेव श्रोष्यसी-त्यर्थः । तत्र व्यङ्ग्यमाह अत्र अद्येत्यादिना । न भवामि वर्तमानसमीपे एव मरिष्यामी-त्यर्थः । गतिम् मानसिकीं गतिम् अभिप्रायम् । अद्यपदवाच्यस्य कालस्य व्यज्यमानेन विरहिणी [illegible] वैशिष्ट्येन सहकृताद् वाक्यवाच्यार्थाद् 'मधु-समये यदि व्रजसि तदाऽहं मरिष्याम्येव, एवं ज्ञात्वाऽपि त्वं व्रजसीति तव मयि अनुरा-गोऽपि वास्तविको न वेनि न जानामि' इति नायिकाभिप्रायः सामाजिकेषु व्यज्यते इति-ज्ञेयम् ॥ उदा० ६१ ॥

'प्रस्तावदेशकालादेः' (सूत्र० ३९) इत्यत्र आदिपदं प्रकारार्थकमतो वक्त्रादिसदृशानां [illegible] वैशिष्ट्यानां सर्वेषा सङ्ग्रहः कर्तव्यो वेदितव्य इत्याह—आदिग्रहणाच्चेष्टादेरिति । तत्र दिक्प्रदर्शनाय चेष्टाया वैशिष्ट्येन सहकृतस्य वाच्यार्थस्य

आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने ।
वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते ॥ उदा० ६२ ॥
अत्र चेष्टया प्रच्छन्नकामुकविषय आकूतविशेषो ध्वन्यते ।

निराकाङ्क्षप्रतिपत्तये प्राप्तावसरतया पुनरुदाह्रियते । वक्त्रादीनां मिथः संयोगे द्विकादिभेदेन अनेन क्रमेण लक्ष्य-व्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम् । द्विकभेदे वक्तृबोद्धव्ययोगे यथा—

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअहए पलोएहि ।
मा पहिअ रत्तिअन्धिअ सेज्जाए अह्म णिमज्जहिसि ॥ उदा० ६३ ॥

व्यङ्ग्यमुदाहरति—**द्वारोपान्ते**त्यादिना । कश्चिद् युवकः [illegible] परस्त्रियाः गाढानुरागायाः स्वविषयकं भावाविष्करणं विश्वस्ततमं स्वमित्रं प्रति वर्णयति—मयि **द्वारोपान्ते** द्वारसमीपे **निरन्तरे** समीपस्थे सति सौन्दर्यसारभूता श्रीर्यस्याः तया **ऊरुयुगं** सक्थिद्वयं **प्रोल्लास्य** प्रसार्य **परस्परसमासक्तम्** अन्योऽन्यसंलग्नं **समासादितं** कृतम्, **शिरोंऽशुकम**वगुण्ठनं पुरतः आनीतम्, चञ्चले लोचने अधः **क्षिप्ते** सञ्चारिते **तत्र** काले **वाचः प्रसरणं निवारितम्** मौनमवलम्बितम् **दोर्लते** बाहू **सङ्कोचिते** आलिङ्गनप्रवृत्ते इव कृते इति । अतिधृतौ छन्दसि शार्दूलविक्रीडितं वृत्तम्, 'सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्' इति लक्षणात् । तत्र व्यङ्ग्यमाह—**अत्र चेष्टये**त्यादिना । वर्णिताभिर्नायिकाचेष्टाभिः क्रमेण विपरीतसुरतप्रदान-[illegible]-[illegible] प्रच्छन्नकान्तविषयो नायिकायाः 'सूर्यास्तमनसमये गूढं निःशब्दं च त्वया आगन्तव्यम्, तदाऽहं त्वाम् [illegible] पूजयिष्यामि' इति अभिप्रायविशेषो ध्वन्यते इति ज्ञेयम् । अत्र शब्दारूढानामेव चेष्टानां वाक्यार्थसहकारित्वेनैव व्यञ्जकत्वमिति नैव उदाहरणासङ्गतिरित्याशयेनाऽपि ॥उदा० ६२॥

ननु **अइपिहुलम्** इत्यादौ पृथुलत्वप्रवाच्य-वक्तृ-बोद्धव्यादिषु **गुरुअणपरवस** इत्यादौ [illegible] वक्तृ-बोद्धव्य [illegible] वाच्येषु वैशिष्ट्यानां सत्त्वाद् द्वित्रैरेवोदाहरणपद्यैः वक्तृबोद्धव्यादिवैशिष्ट्यसहकृतस्यार्थस्य व्यञ्जकत्वमुदाहर्तुं शक्यते इति किमर्थं ग्रन्थगौरवं कृतं प्रत्येकमुदाहरणेनेति आक्षेपं परिहरति—निराकाङ्क्षप्रतिपत्तये इत्यादिना । अथवा द्वितीये उल्लासे एव '**सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते**' (सूत्र० १०) इति सूत्रस्योदाहरणेषु एव अर्थव्यञ्जकत्वस्योदाहरणानि दत्तानि किमित्यत्र पुनरन्यानि उदाहरणानि उपन्यस्तानि इत्यत्राह–निराकाङ्क्षेत्यादि । मिलितेषु बहुषु वैशिष्ट्येषु कुत्र कस्य व्यञ्जकत्वं स्वीकर्तव्यमित्याकाङ्क्षा भवति, सत्स्वपि अन्यवैशिष्ट्येषु प्रधानस्य वैशिष्ट्यस्यावलम्ब्य वक्त्रादिवैशिष्ट्यानां पृथक्-पृथक् उदाहरणेषु प्रदर्शितेषु तु यत्र यद्वैशिष्ट्यस्य प्राधान्यं तत्र तद्वैशिष्ट्यस्य व्यञ्जनसहकारित्वम् अन्यवैशि-

(सू० ४०) **शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।**
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥ २२ ॥
शब्देति, न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ।
इति काव्यप्रकाशेऽर्थव्यञ्जकतानिर्णयो नाम तृतीय उल्लासः ॥ ३ ॥

ष्ट्यस्य चा[illegible] निराकाङ्क्षाप्रतीतिर्भवति इति तादृश्यै निराकाङ्क्षप्रतीतये द्वितीये उल्लासे एव 'सर्वेषा [illegible]' (सू० १०) इत्यादिना सामान्यतोऽर्थव्यञ्जनां प्रदर्श्य [illegible] अर्थव्यञ्जनाया विस्तरेण निरूपणस्यैव क्रियमाणत्वाच्च अप्राधान्येन यद् यद् वैशिष्ट्यं [illegible] आगत तत्तद् वैशिष्ट्यमपि प्राधान्यप्रदर्शनाय उत्तरोत्तरस्मिन् उदाहरणे पुनरुदाहृतमिति भाव. । [illegible] रतचोरवृत्तभरितानि विटप्रियाणि व्यङ्[illegible] स्वग्रन्थे उपस्थापयन् नागरकविटगोष्ठीषु च यशोलिप्सुः मम्मट. "नात्यन्तं संस्कृतेनैव नात्यन्तं देशभाषया । कथा गोष्ठीषु कथयल्ँ लोके बहुमतो भवेत् । [illegible] क्रीडामात्रैककार्यया । गोष्ठ्या सह चरन् विद्वाल्ँ लोके सिद्धि नियच्छति ।" इति (कामसूत्रे १।४।३७, ३९) मल्लनागवात्स्यायनोपदेशं च हृदि निधाय ग्रन्थरचने प्रवर्तते इति च **प्राप्तावसरतया** चेति वाक्यांशेन सूच्यते इति बोध्यम् । वक्तृबोद्धव्ययो, वक्तृकाक्वो, वक्तृवाच्ययो, बोद्धव्यकाक्वो, बोद्धव्यवाक्ययो, बोद्धव्य-वाच्ययोः इत्येवमादिप्रकारेण वैशिष्ट्ययोर्द्वयो., [illegible], वक्तृबोद्धव्य-वाक्यानाम्, बोद्धव्य-काकु-वाक्यानाम्, [illegible] इत्येवमादिप्रकारेण वैशिष्ट्यानां त्रयाणामेवमेव [illegible] वैशिष्ट्याना च समानप्राधान्येन सहकाराद् वाच्यार्थस्य व्यञ्जकत्वमुदाहार्यम्, एवमेव एकैकस्य वैशिष्ट्यस्य द्वयोर्द्वयोर्वैशिष्ट्ययोश्चेत्येवप्रकारेण बहूना वैशिष्ट्याना च सहकाराल्लक्ष्यार्थस्य व्यङ्ग्यार्थस्य च अ[illegible] भवति, तत् तु ग्रन्थस्यातिविस्तरान् [illegible] न शक्यतेऽत्र, तादृशानि उदाहरणानि स्वयमेव लक्षणतः [illegible]मित्यादि । दिक्प्रदर्शनाय द्विकयोगे [illegible] वाच्यस्यार्थस्य व्यञ्जकत्वम् [illegible] **एत्थ** इत्यादिना । यद्यप्ययं ग्रन्थोऽन्येषु मुद्रितेषु पाठेषु नास्ति तथापि पारिखसम्पादिते पाठेऽस्तीति अविरुद्धत्वात् सङ्गृह्य व्याख्यायते । '**अत्ता अत्र निमज्जति अत्राऽहं दिवसके प्रलोकय । मा पथिक राज्यन्धक** शय्यायामस्माकं **न्यमाक्षीः**' इति संस्कृतच्छाया । अभिरूपं युवकं पथिकं प्रार्थ्य पिण्डिकायां स्थितं प्रति गाढयौवनायाः परकान्तसङ्गलुब्धायाः प्रोषितभर्तृकायाः स्वयन्दूत्या उक्तिरियम्, [illegible] ७।६७ **अत्ता** = श्वश्रूः अत्र शय्याया **निमज्जति** गृहकर्म[illegible]तिशयपरिश्रान्ता बधिरा च गाढं निद्राय शेते, अत्र ततो भिन्नाया शय्यायाम् **अहम्** अहमेवैकाकिनी शये, इदं स्थानद्वयं **दिवसके** सायाह्ने एव विलोकय, हे पथिक, त्वं रात्रौ अन्ध इव जातः सन् मूत्रणादिकर्मणे प्रचलितः अस्माकं शय्यायां न निमज्जेः इत्यर्थः । 'अत्र गृहे श्वश्रूश्च अहं च द्वे एव स्थिते स्वः, श्वश्रू बधिरा श्रान्ता च गाढं निद्रिता किमपि न वेत्ति, अतस्त्वं निश्शङ्क

मात्रौ मम व्याख्यानं गच्छेः' इति व्यङ्ग्यम् वक्तृबोद्धव्यादिवैशिष्ट्यात् प्रतीयते । उदा० ६३ ॥ ३९ ।

व्यञ्जनस्य प्राधान्ये ध्वनिरिति व्यवहारः कृत इति प्रथमे उल्लासे उक्तम् चतुर्थे उल्लासे च आर्थव्यञ्जनमूलानि **अलमभिरमणी वृत्ताणम्** इत्यादीनि ध्वनिकाव्यानि उदाहरिष्यन्ते तत्र अर्थव्यञ्जनमूलकेष्वपि ध्वनिकाव्येषु शब्दस्यापि व्यञ्जकत्वं यदि नोपपाद्येत तदा **अर्थस्यैव व्यञ्जकत्व** न शब्दस्येति व्यञ्जकार्थमूलकस्य ध्वनिकाव्यत्व पूर्व-मुक्तं पश्चादुदाहरिष्यमाणं च असङ्गतं स्यादिति आर्थ्यां व्यञ्जनायामपि शब्दस्यापि व्यञ्जकत्वमस्तीति प्रदर्शयति—**शब्दप्रमाणवेद्य** इत्यादिना । आर्थ्यां व्यञ्जनायां काव्य-लक्षणप्रसङ्गे निरूपितायां **यत** प्रमाणान्तरवेद्योऽर्थो व्यञ्जको न भवति, **शब्दप्रमाणवेद्य एव अर्थ** अर्थान्तरस्य व्यञ्जको भवति तस्माद् हेतोः अर्थस्य अर्थान्तरव्यञ्जकतायां व्यञ्जकार्थप्रतिपादकशब्दस्य सहकारिता भवतीति आर्थ्यां व्यञ्जनायां शब्दस्यापि अप्राधान्येन व्यञ्जकत्व तु अक्षतमेव । एवञ्च अर्थव्यञ्जनमूलकेष्वपि शब्दार्थयुगल-रूपस्य काव्यस्य ध्वनित्वं सम्भवत्येवेति न पूर्वापरग्रन्थासङ्गतिरुद्भावनीया इतिभाव । (सू० ४०) ॥२२॥

इति श्रीहिमवत्प्रदेशस्थ [illegible] हिमतुङ्गाचलाङ्कितजनपदा-
न्तर्गतिनारुकूटग्रामाभिजन [illegible] कौण्डिन्य [illegible]
[illegible] चार्य [illegible] कृतौ हैमवत्यां काव्यप्रकाशविवृतौ
तृतीय उल्लास. समाप्तः ॥ ३ ॥

■

अथ चतुर्थ उल्लासः

यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीय तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायते इति प्रथम काव्यभेदानाह—

(सू० ४१) अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ ।
अर्थान्तरे सङ्क्रमितम् अत्यन्तं वा तिरस्कृतम् ॥२३॥

लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सति अविवक्षितं वाच्यं यत्र स, ध्वनौ इति अनुवादाद् ध्वनिरिति ज्ञेयः, तत्र वाच्य क्वचिदनुपयुज्यमानत्वाद् अर्थान्तरे

"तददोषौ शब्दार्थौ [illegible]कृती पुनः क्वापि" इति काव्यलक्षण[illegible] तद्घटकपदार्थबुद्धेः[illegible] कृत्वा तद्घटक[illegible]प्राधान्यानुसार शब्दार्थपदार्थयो-निरूपणे कृते अन्येपामपि तल्लक्षणघटकानां पदार्थानां निरूपणं कार्यम्, तद् अकृत्वा कुत [illegible] इति आक्षेपं परिहरन्नाह—**यद्यपी**त्यादि । धर्मिणि गुण-दोषादिधर्माणामाश्रयभूते काव्ये । केषाञ्चिच् [illegible] गुणानाम् अलङ्का-राणा च दोषत्व गुणत्वम् अलङ्कारत्व च शृङ्गारादिरसध्वन्यादिकाव्यभेदविशेषसंयोगा-धीनम् इति काव्यभेदज्ञानस्याभावे [illegible] सतत्त्वं ज्ञातुं न शक्यमिति दोषादिनिरूपणात् पूर्व काव्यभेदा एव निरूपणीया इति बाह्योऽर्थः । वस्तुतस्तु रसादिरूपा व्यङ्ग्या अर्थाः, रसादिव्यङ्ग्यव्यञ्जका विभावादय अर्थाः, रसादिव्यङ्ग्यविषया व्यञ्जना च नाद्याऽपि निरूपिता इति शब्दार्थौ एव पूर्णतया न निरूपितौ इति, तेषा निरूपणे च क्रियमाणे तन्त्रेणैव रसध्वन्यादिकाव्यविशेषादिभेदनिरूपणमपि कर्तुं शक्यते इति [illegible]प्रसङ्गेनैव ध्वनिकाव्यादिभेदा अत्र निरूप्यन्ते इत्यर्थ आन्तरः परिकल्पनीयः । अन्यथा अलङ्कारेष्वज्ञातेषु ध्वनिरपि न साकल्येन ज्ञातुं शक्य इति अलङ्कारा एव प्रथमं निरूपणीयाः स्युः चित्रकाव्यरूपाणा तेषां ध्वन्यनपेक्षत्वाच्च ।

काव्यभेदेषु ध्वनेः प्राधान्याद् ध्वनिकाव्यभेदान् चतुर्थेन उल्लासेन निरूपयति । ध्वनेः सामान्यं लक्षणं तु "[illegible] व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः" (सू० ४) इति पूर्वमेवोक्तम् । ध्वनिभेदेषु च यद्यपि अभिधामूलस्य विवक्षितान्यपरवाच्यान्तर्गतस्य आर्थव्यञ्जनविषय य रसादिध्वनेः प्राधान्यमिति, अवशिष्टरसादिव्यञ्जकव्यङ्ग्यशब्दार्थ-निरूपणमेव प्रथमं करणीयमिति च स एव प्रथमं निरूपणीयः, तथापि निरूपितचर-शब्दार्थविषय अल्पविषयश्चेति कृत्वा सूचीकटाहन्यायेन पूर्वं लक्षणामूलध्वनि तद्विभा-जकोपाधिदर्शनमुखेन विभजते—अविवक्षितवाच्य इत्यादिना । य अविवक्षितवाच्यः ध्वनिः तत्र ध्वनौ वाच्यम् अर्थान्तरे सङ्क्रमितम् अथवा अत्यन्तमेव तिरस्कृतं भवतीति कारिकार्थः । एतेन अविवक्षितवाच्यो ध्वनिः अर्थान्तरसङ्क्रमितवाच्यः अत्यन्ततिरस्कृत-वाच्यश्चेति द्विधा भवतीति अर्थाद् उक्तं ज्ञेयम् । [illegible] स्फुटं भविष्यति ॥२३॥

परिणतम्, यथा—

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥उदा० ६४॥

अत्र वचनादि उपदेशरूपतया परिणमति ।

क्वचिद् अनुपपद्यमानतया अत्यन्तं तिरस्कृतम्, यथा—

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥उदा० ६५॥

कारिका व्याख्याति—**लक्षणामूलेत्यादिना** । अविवक्षितवाच्यत्वन्तु निरूढलक्षणा-स्थलेऽपि भवतीति तद्व्युदासाय आह—**लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सति** इति । अविव-क्षितवाच्यत्व-ध्वनित्वयोः सामानाधिकरण्येनोपादानादत्रेदम् अवक्तुं शक्यते एव, तथापि [illegible] ग्रन्थकृता । यत्पदेन ध्वनेः परामर्शः, इत्यत्र युक्तिः [illegible]—ध्वनौ इत्यनुवादादित्यादिना । **तत्र** अविवक्षितवाच्यध्वनिरूपे काव्यभेदे, **क्वचित्** केषुचिद् अविवक्षितवाच्यध्वन्युदाहरणेषु वाच्यम् अनुपयुज्यमानत्वादर्थान्तरे परिणतम् भवति, अन्येषु तथा न भवति, यत्र वाच्यम् अर्थान्तरे **परिणमितं** सङ्क्रमितं भवति स **उपादान-लक्षणा**मूलः अविवक्षितवाच्यध्वनिभेदः **अर्थान्तरसङ्क्रमितवाच्यध्वनिरि**ति व्यवह्रियते इति भावः ।

अर्थान्तरसङ्क्रमितवाच्यध्वनिकाव्यम् उदाहरति—**त्वामस्मी**त्यादि । विद्वत्सभां गच्छन्तं प्रति कस्यचिदुक्तिरियम् । **अस्मि** अहम् आप्तः **त्वां** मम विनेयं **वच्मि** उपादि-शामि यद् अत्र विदुषां समवायस्तिष्ठति **तत्** तस्माद् हेतोः **आत्मीयां** स्वकीयां **मतिं** विवेकबुद्धिमास्थाय **स्थितिं** [illegible] **विधेहि** कुरुष्वेत्यर्थः । अस्मद्युत्तमः (१।४।१०७) इत्यत्र अस्मदर्थग्रहणाद् अस्मदर्थकास्मीत्यव्यययोगेऽपि वच्मीत्युत्तमः पुरुषः साधुः । ॥उदा० ६४॥

तत्र अर्थान्तरसङ्क्रमितवाच्यध्वनित्वमुपपादयति—**अत्रे**त्यादिना । अभिधाजन्य-वाक्यार्थबुद्ध्यभावो लक्षणाप्रयोजक इति, वाक्यार्थस्य मानान्तरात् सिद्धावपि अभिधाजन्य-वाक्यार्थस्यानुपयुज्यमानतया अभिधाजन्यवाक्यार्थबुद्धयभाव स्वीकर्तुं शक्यत इति च 'अहं त्वां वच्मि' इत्यस्यार्थस्य बोद्धव्यमुद्दिश्य वक्तव्यस्य कथनेनैव सिद्धत्वाद् 'अहं त्वां वच्मि' इति वाक्यम् अनुपयुज्यमानत्वादभिधा[illegible] लक्षणाया आक्षेपकम् । लक्षणया च अस्म्यर्थः आप्तरूपेण, त्वदर्थो विनेयरूपेण वचनार्थं उपदेशरूपेण च परिण-मति । ततश्च 'अन्यथाऽऽचरणे उपहसनीयत्वं स्याद्' इति व्यज्यते । एवं चेदम् अर्थान्तर-सङ्क्रमितवाच्यध्वनेरुदाहरणम् बोध्यम् ।

अविवक्षितवाच्यध्वनिविभाजकमुपाध्यन्तरं स्फुटीकरोति—**क्वचिद् अनुपपद्यमानतये**-त्यादिना । अविवक्षितवाच्यध्वनिरूपे काव्यभेदे **क्वचित्** तु वाच्यम् अनुपपद्यमानतया **अत्यन्तं तिरस्कृतं** शाब्दबुद्ध्यविषयीभूतं भवति, यत्र ध्वनौ वाच्यमत्यन्ततिरस्कृतं भवति

एतद् अपकारिणं प्रति [illegible] कश्चिद् वक्ति।

सू० ४२ **विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः।**

अन्यपरं व्यङ्ग्यनिष्ठम्।

एष च—

सू० ४३ **कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ॥२४॥**

अलक्ष्येति। न खलु विभावानुभावव्यभिचारिण एव रसः, अपि तु रसस्तैरित्यस्ति क्रमः, स तु लाघवान्न लक्ष्यते।

[illegible] अविवक्षितवाच्यध्वनिभेदः अत्यन्ततिरस्कृतवाच्य-ध्वनि इति व्यवह्रियते इति भावः।

[illegible]—**उपकृतं बहु** इत्यादि। बहुभिरपकारै-[illegible] तमपकारिणं प्रति उक्तिरियम्। भवता बहु उपकृतम्, तत्र किम् उच्यते, भवत उपकारातिशयो वक्तुमपि न शक्यते इत्यर्थः, एवञ्च भवता भवतः सुजनता **परम्** अत्यन्तं **प्रथिता** विस्तारिता, **ततः** तस्माद् हेतोः हे सखे ईदृशमेव सदा **विदधत्** कुर्वन् त्वं शरदां शतं वर्षाणां शतं (कालाध्वनोरत्यन्तसंयोगे द्वितीयायाः स्मरणात्) **सुखितः** सुखयुक्तं यथा स्यात् तथा **आस्स्व** वर्तस्वेति मुख्योऽर्थः। स चार्थः प्रकरणादिना बुद्ध अपकारिभावो यस्य तं प्रति बाधितः सन् वाक्यार्थबोधपरिपाकं न लभते इति अत्यन्तं तिरस्क्रियते त्यज्यते इति यावत्। वाच्यार्थे बाधिते वाक्यं वैपरीत्यसम्बन्ध-सूत्रजात्य लक्षणया अर्थान्तरं बोधयति। एवं च 'त्वया बहु अपकृतम्, तत्र किमुच्यते, तत् सर्वं वक्तुमपि न शक्यते, त्वया दुर्जनता परं विस्तारिता, तस्माद् हे शत्रो अतः परम् ईदृशं कर्म कुर्वन् त्वं वर्षशतं नानाविधकष्टभोगपूर्वकम् आस्स्व' इत्यर्थो लक्ष्यते। ततश्च अपकारातिशयो व्यज्यते। जगत्यां छन्दसि द्रुतविलम्बित वृत्तम्, 'द्रुतविलम्बित-माह नभौ भरौ' इति लक्षणात् ॥ उदा० ६५ ॥ एवञ्चेदम् अत्यन्ततिरस्कृतवाच्यध्वनि-काव्यस्य उदाहरणम् इत्याह—**एतद् अपकारिणं प्रती**त्यादिना ॥ ४१ ॥

[illegible] तत्स्वभावकथनेन लक्षयति—**विवक्षितं चान्यपर**मित्या-दिना। **यत्र** ध्वनिकाव्ये **वाच्यम्** अभिधेयं **विवक्षितं** प्रतिपिपादयिषितम् एव सत् **अन्यपरं** व्यङ्ग्यार्थबोधनोपायमात्रभूतं च अस्ति स तु ध्वनिकाव्यभेदः **अपरः विवक्षितान्यपरवाच्य-ध्वनि** काव्यविशेषो ज्ञेयः। अयं च [illegible] सति भवति। वृत्तौ व्यङ्ग्यनिष्ठम् इत्यस्य व्यङ्ग्येऽर्थे निष्ठा विश्रान्तिर्यस्य तद् इत्यर्थः ॥ ४२ ॥

[illegible] विवक्षितान्यपरवाच्यध्वनिकाव्यमिति प्रसिद्धं विभजते—**एष च**त्यादिना। **एष च** [illegible] **कोऽपि** कश्चन ध्वनिकाव्यभेदः [illegible] (अलक्ष्यक्रमव्यङ्ग्यः) भवति, **परोऽन्यो**ध्वनिभेदः **लक्ष्यव्यङ्ग्यक्रमः** (लक्ष्यक्रमव्यङ्ग्यः) भवतीति कारिकार्थः। अलक्ष्योऽज्ञेयः क्रमः व्यञ्जकार्थ-व्यङ्ग्यार्थयोः पौर्वापर्यं यस्य तद् अलक्ष्यक्रमम् तादृशं व्यङ्ग्यं यस्मिन् स ध्वनिकाव्यभेदः अलक्ष्यक्रम-

तत्र—

(सू० ४४) **रसभावतदाभासभावशान्त्यादिरक्रमः ।**

भिन्नो रसाद्यलङ्कारादलङ्कार्यतयास्थितः ॥ २५ ॥

आदिग्रहणाद् भावोदय भावसन्धि-भावशबलत्वानि । प्रधानतया यत्र स्थितो रसादिस्तत्रालङ्कार्यः यथोदाहरिष्यते अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्-प्रेय-ऊर्जस्वि-समाहितादयोऽलङ्काराः । ते च गुणीभूतव्यङ्ग्याभिधाने उदाहरिष्यन्ते ।

व्यङ्ग्यः । लक्ष्यो ज्ञेयः व्यङ्ग्यस्य व्यञ्जकार्थेन सह क्रमः पौर्वापर्यं यस्मिन् स ध्वनिकाव्यभेदो लक्ष्यक्रमव्यङ्ग्यः । लक्ष्यः व्यङ्ग्यक्रमो यस्मिन् स इति विवक्षया लक्ष्यव्यङ्ग्यक्रमोऽपि सः ।

अक्रमव्यङ्ग्य इत्यनुक्त्वा अलक्ष्यक्रमव्यङ्ग्य इति कथने अभिप्रायविशेषम् आविष्करोति—**अलक्ष्येति** इत्यादिना । विभावानुभावव्यभिचारिण एव रसो न, किन्तु पूर्वं विभावानुभावव्यभिचारिणः प्रतीयन्ते ततस्तै रसो व्यज्यते इति रसादिरूपे ध्वनावपि व्यञ्जकार्थ-व्यङ्ग्यार्थयोः पौर्वापर्यं भवत्येव तथापि तत् पौर्वापर्यं व्यञ्जकेन झटित्येव व्यङ्ग्यप्रतीतेर्जननाद् न प्रतीतिविषयमवतरति केवलम्, अतो रसादिरूपो ध्वनिरप्यक्रमव्यङ्ग्य इति वक्तुं न युज्यते, अलक्ष्यक्रमव्यङ्ग्य इत्येव स वक्तव्य इत्यर्थः ॥ ४३ ॥

[illegible] परिचाययति—**तत्र रसभावे**त्यादिना । तत्र असंलक्ष्यक्रमव्यङ्ग्यध्वनि-लक्ष्यक्रमव्यङ्ग्यध्वन्योर्मध्ये । रसः, भावः, रसाभासः, भावाभासः, भावशान्तिः; भावोदयः, भावसन्धिः, भावशबलता चेत्येतेषामन्यतमो यत्र काव्ये भवति सोऽसंलक्ष्यक्रमव्यङ्ग्यध्वनिर्ज्ञेय इति कारिकापूर्वार्धार्थः. रसस्य संलक्ष्यक्रमव्यङ्ग्यताया असम्भवेऽपि भावादीना तथात्वासम्भवे उपपत्तिश्चिन्त्या । तत्र **अक्रम** इत्यत्र मध्यमपदलोपी समासः । असंलक्ष्यक्रम इत्येव तदर्थः । रसस्य शान्तेश्चमत्कारस्याभावाद् रसोदयस्य चमत्कारे रसचमत्काराद् भेदस्याभावाद् [illegible] ते न स्वीक्रियन्ते इति ज्ञेयम् । ननु काव्यधर्मिनिरूपणप्रस्तावोऽयम्, रसादयश्च "रसवद् दर्शितस्पष्ट शृङ्गारादिरसम्" [काव्यालङ्कारे ३-६] "रसादिप्राधान्ये रसवदादयोऽलङ्कारा" [काव्यालङ्कारसारसङ्ग्रहे ४।४५] इति पूर्वाचार्याणां मतेन काव्यस्य अलङ्काररूपाः धर्मविशेषाः तत्कथ धर्मिनिरूपणप्रस्तावे अकाण्डे धर्मनिरूपणाङ्ग रसवदाद्यलङ्कारनिरूपणम् इत्याक्षेपम्, अपराङ्गानां रसादीनामपि असंलक्ष्यक्रमव्यङ्ग्यध्वनौ समावेश. कृत इति भ्रमञ्च परिहर्तुं रसादिं विशिनष्टि—**भिन्नो रसाद्यलङ्कारा**दित्यादिना । अस्मदुक्तोऽलङ्कार्यतया धर्मितया स्थितो रसभाव-[illegible] व्यङ्ग्यार्थः काव्यधर्मी भामहोद्भटाद्यभिमताद् रसाद्यलङ्काराद् आचार्यानन्दवर्धनाभिमताद् [illegible] च धर्मरूपाद् अलङ्काराद् भिन्न एवेति कारिका-

दिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादौ

इदानीं विभावादिरूपं रसादिव्यञ्जकमर्थं विभावादिशब्दवाच्यमर्थं व्यञ्जनां तद्विषयं रसादिरूपं व्यङ्ग्यमर्थं च निरूपयितुं तथैव रसवस्तुमूलकध्वनिकाव्यं च तन्त्रेणैव निरूपयितुं रसं निरूपयति—**तत्र रसस्वरूपमाहे**त्यादिना। कारणान्यथेत्यादि प्राग्विदृष्टः पाठोऽर्थेन अविशिष्टः। लौकिकस्य रत्यादेर्लोके यानि जनकानि नायिकाचन्द्रोदयादीनि प्रसिद्धानि कारणानि तानि काव्यनाट्ययोरारूढानि चेद् अलौकिकस्य रत्यादेः स्थायिभावस्य **विभावाः** वासनारूपतया अतिसूक्ष्मरूपेण स्थितान् रत्यादीन् स्थायिनो **विशेषेण** आस्वादनीयतया **भावयन्ति** सत्तां प्रापयन्तीति विभावा इति कथ्यन्ते; लौकिकस्य रत्यादेर्लोके यानि कार्याणि कटाक्षभुजाक्षेपप्रभृतीनि प्रसिद्धानि तानि काव्यनाट्ययोरारूढानि चेद् अलौकिकस्य रत्यादेः स्थायिभावस्य **अनुभावाः** उद्बुद्धान् रत्यादीन् अनुभावयन्तीति अनुभावा इति कथ्यन्ते; लौकिकस्य रत्यादेर्लोके यानि सहकारीणि रत्यादेर्जनने तस्य झटिति प्रतीतौ वा सहायभूतानि हास-चिन्तादीनि **अथवा सहकारीणि** सहचारीणि तान्येव. तानि काव्यनाट्ययोरारूढानि चेद् रत्यादेः स्थायिनो **व्यभिचारिणः** स्थायिभावरूपकार्यजननाय **विशेषेण अभितश्चरन्ति** इति स्थायिनं व्यभिचरन्तोऽपि स्थाय्यास्वादने हेतुतां गच्छन्तीति वा व्यभिचारिणः कथ्यन्ते। **तैर्विभावादिभिर्व्यक्तः** सहृदयहृदये अभिव्यञ्जितो **विभावाद्यैः** विभावानुभावसञ्चारिभिः सहितः **स्थायी** चित्तवृत्तिविशेषरूपत्वेन आशुविनाशित्वेऽपि वासनारूपेण सहृदयहृदये चिरं स्थातुं शक्तो **भावः** चित्तवृत्तिविशेषो रत्यादी रसः स्मृतो भरतादिभिरिति कारिकायुगलार्थः ॥ २६-२७ ॥

स्वोक्तेऽर्थे अभियुक्तस्य (तद्विषयानुशीलिनो विशेषज्ञस्य) सम्मतिं दर्शयति—**उक्तं ही**त्यादिना। भरतो नाट्यशास्त्रस्याचार्यः साम्प्रतमपि यद्रचितं नाट्यशास्त्रं प्रसिद्धम्। आचार्यमम्मटकृतो निरुपपदो **भरतेन** इति प्रयोगः किमभिप्रायक इति न ज्ञायते स्याद् नटाग्रणीरपि भरतो नट एवेत्यभिप्रायेण। रससूत्रस्य भट्टलोल्लटप्रभृतिभिः कृतं व्याख्यानं शिष्यधीवृद्धये अनुवदति—**विभावैरि**त्यादिना। ललनादिभिरालम्बनविभावैः उद्यानादिभिरुद्दीपनविभावैश्च रत्यादिको भावो **जनितः** सामाजिकस्य सहृदयस्य वा चित्ते स्मृतिविषयत्वेन उत्पादितः उपस्थापितो वा अनुभावैः कटाक्षभुजाक्षेपादिभिः रत्यादिहेतुकत्वेन तत्कार्यैः **प्रतीतियोग्यः कृतः** अनुभवायितस्मृतिविषयः कृतो व्यभिचारिभिर्निर्वेदादिभिः सहचारिभिः **उपचितः** अत्यन्तोपचितत्वेनानुभवायितस्मृतिविषयीकृतो रत्यादिः स्मृतिसाधनानां नायिकादीनां काव्यनाट्यान्यतरारूढत्वरूपाद् दोषाद् रत्यादिस्मृतेः स्मृत्यंशप्रमोषेण **मुख्यया वृत्त्या** अभिधया सहृदयबुद्धौ उपस्थिते रामादौ अनुकार्ये, काव्यनाट्याद्यन्यतरारूढत्वरूपाद् दोषाद् रामाद्यन्यत्वाग्रहेण रामादितादात्म्यानुकूलतया रामादित्वेन गृहीते नर्तके धर्मिणि वा **प्रतीयमानः** आरोप्यमाणोऽथ च असम्बन्धाग्रहदशा

अनुकार्ये तद्रूपतानुसन्धानात् नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लट-प्रभृतयः ।

ज्ञानेन जायमानो (लौकिक एव रत्यादिको भावो) रस इति भट्टलोल्लटादीनामाशयः । इत्थं भट्टलोल्लटस्य [illegible] व्याख्यानम् ।

तदयं निष्कृष्टोऽर्थः—नायिकादिविभावैर्दृष्टैः प्रतिभातैर्वा सामाजिकस्य सहृदयस्य वा चित्ते स्मृतिविषयरूपेण रत्यादिको भावो जायते अर्थात् स्वकीयस्य उदात्तनायकस्य वा [illegible] स्वकीयत्वांशस्य उदात्तनायकगतत्वांशस्य वा प्रमोषेण स्मृतिर्भवति, [illegible] प्रतिभातैर्वा सा स्मृतिरनुभाविता भवति, व्यभिचारिभिस्त-[illegible] प्रतिभातैर्वा सा स्मृतिरत्यन्तमुपचिता उपचितानु[illegible] भवति, ततश्च विभावादेः काव्याद्भुतत्वरूपेण नाट्याद्भुतत्वरूपेण वा दोषेण रत्यादिस्मृतेः स्मृत्यंशस्य प्रमोषो भवति, ततश्च अभिनय[illegible] रामादिवृत्तितया रत्यादेः कल्पनात्मकम् [illegible] वा परोक्षं ज्ञानं सामाजिकस्य सहृदयस्य वा भवति, अलौकिकोपायोपनी-तत्वेन च तत् कल्पनात्मकमपि ज्ञानं सुखमयं भवति, एवञ्चालौकिक एव **केवलो** रत्यादिः [illegible] स्मृतिविषयतां नीता [illegible]-वृत्तित्वेन विलक्षणत्वेन प्रत्याय्यते, स एव रस इति ।

अस्मिन् मते स्थायिना विभावैः संयोगात् उत्पाद्योत्पादकभावसम्बन्धात् रसस्य **निष्पत्तिः** उत्पत्तिः, अनुभावैः गम्यगमकभावरूपात् सम्बन्धात् रसस्याभिव्यक्तिः, सहका-रिभिः पोष्यपोषकभावरूपात् सम्बन्धात् रसस्य पुष्टिर्भवतीति [illegible] गोविन्दठक्कुरादिभिर्वर्णितम् । अस्माकं मते तु पूर्वोक्त एव सूत्रार्थो भट्टलोल्लटसम्मतत्वेन इष्टः ।

अस्मिंश्च मते श्रीशङ्कुकेन बहवो दोषा दृष्टाः, तथा हि—केवलस्य लौकिकस्योप-चितस्य स्थायिनो रसत्वं नोपपद्यते विभावाद्यशबलितत्वे लिङ्गाभावेन तदनुमानानुदयस्य प्रसङ्गात्; स्थायिनः शब्दत्वे स्वीक्रियमाणे तस्य रत्यादिशब्दैरभिधेयत्वं स्यात्, केवलस्य रत्यादिनो विभावादियोगं विनाऽपि लोके विद्यमानत्वेन विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिरिति [illegible] वैयर्थ्यस्यापातात; अनुपचितावस्थः स्थायी भावः, उप-चितावस्थस्तु रस इत्युच्यमानेऽपि केवलस्य लौकिकस्य रत्यादेर्मन्दमन्दतरमन्दतमोत्कटो-[illegible] दृष्टत्वाद् रसस्याऽपि अनन्तानामवस्थानां स्वी-कारस्यापत्तेः, रसीभूतस्य तु स्थायिन एकरूपताया दर्शनात्; स्थायिभावस्य केवलस्य रसत्वे स्वीकृते रसीभूते तस्मिन्निव केवलेऽपि उपचयकाष्ठां प्राप्ते तस्मिन् मात्राकृततार-तम्यस्याभावस्य प्रसङ्गाद् भरतमुनिना स्थायिभावमात्राभेदेन कृतो हास्यरसे षोढा [illegible] स्याद्; [illegible] तारतम्येन रसस्यैव भेदे स्वीकृते तु कामावस्थासु दशसु असङ्ख्यरसभावादिस्वीकारस्य प्रसङ्गात्; न च लौकिकस्य स्थायिनः सदा उपचयस्य सम्भवः, लौकिकस्य शोकस्य प्रथमं तीव्रत्वं कालक्रमेण तानवम् मान्द्यञ्चानुभूयते इति

राम एवायम् अयमेव राम इति औत्तरकालिके बाधे रामोऽयमिति रामः स्याद् वा न वायमिति रामसदृशोऽयमिति च सम्यङ्मिथ्या संशय-सादृश्यप्रतीति-भ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे

शोकस्य कालान्तरे उपचयस्य असम्भवात् करुणरसो लौकिकशोकानुभवकाल इव कालान्तरे अनुभवनीयोऽनुवर्तिष्यते न स्यात्; क्रोधे तु वर्तमाने अमर्ष-स्थैर्य-शैथिल्ये क्रोधस्य दर्शनात् कदाचित् तच्छैथिल्ये जाते क्रोधादेरुपचयस्यासम्भवाद् रौद्रवीरशृङ्गारा-णामपि कालान्तरे अनुभवनीयता न स्यादिति **केवलो लौकिकः स्थायी** रत्यादिर्न रसो भवितुमर्हतीति ।

रत्यादेः कारणकार्यसहकारिभिः काव्यनाट्यान्यतरगतान्तरैरपि रत्यादेः स्मरणस्य आलम्बने तदारोपस्य च सम्भवाद् कारणादेः काव्यनाट्यान्यतरगतत्वस्य तदुपयोगस्य प्रसङ्गेन काव्यनाट्ययोरलौकिकत्वक्षतिप्रसङ्ग, विभावादीनामेकतमेनापि तत्सम्बन्धिर-त्यादेः स्मरणस्य सम्भवित्वाद् नियमेन विभावादित्रितयानपेक्षणप्रसङ्गः, रत्यादिस्मारकता विभावादीनां च तुल्ये सति रत्यादिस्मारकत्वे व्यभिचारिस्थायिभावादीना स्वशब्देनो-पादानस्य अदोषतायाः प्रसङ्गश्चेत्यादयोऽन्येऽपि दोषा भट्टलोल्लटादिमते अन्यैर्व्याख्या-तृभिर्वर्णिता । नटगतत्वेन रत्यादेर्ज्ञानात् सामाजिकानां सहृदयानां च आह्लादोदयस्या-नुपपत्तिस्तु वक्ष्यमाणश्रीशङ्कुकमतसाधारणोऽस्मिन् मते दोषो ज्ञेयः ।

शिष्यविवेकशक्तिवृद्धये श्रीशङ्कुकमतमनुवदति—**राम एवाऽयमित्यादिना** । **सम्यक् प्रतीति**रवधारणात्मिका प्रतीतिः । सा च द्विविधा विशेष्ये विशेषणायोगस्य विशेषणे विशेष्यान्तरसम्बन्धस्य वा यो व्यवच्छेदस्तदवगाहनात् (तद्विषयीकरणात्) । तत्र इदमर्थे विशेष्ये विशेषणायोगस्य अर्थाद् रामत्वायोगस्य यो व्यवच्छेदस्तं विषयीकुर्वतीं प्रतीति-मुदाहरति—राम एवाऽयम् इति । विशेषणे रामत्वे **विशेष्येतरयोगस्य** इदमर्थान्यस्य विशेष्यस्य योगस्य यो व्यवच्छेदस्तदवगाहनात्मिका प्रतीतिमुदाहरति—**अयमेव राम** इति । एतादृशमवधारणं च एवकारार्थ, तदाहुः—"अयोगमन्ययोगं च अत्यन्तायोगमेव च । व्यवच्छिनत्ति धर्मस्य एवकारस्त्रिधा मतः" इति । अस्यार्थः—यत्र एवकारो विशेषणेन अन्वितस्तत्र स विशेष्ये तद्विशेषणासम्बन्धं निवारयति, यथा—व्याघ्रः क्रूर एव भवति इति; यत्र एवकारो विशेष्येण अन्वितस्तत्र स विशेष्यादन्यत्र विशेषणस्य सम्बन्धं वारयति, यथा—भुवि मनुष्य एव धर्माधर्मज्ञानवान् भवति इति; यत्र तु एवकारः क्रिययाऽन्वितस्तत्र स विशेषणस्य विशेष्येण सह आत्यन्तिकम् असम्बन्धं वारयति, यथा शुक्लः पटो भवत्येव इति, अत्र एवकारः शुक्लस्य पटेन सह आत्यन्तिकम् असम्बन्धं वारयति । तादृशसम्यक्-प्रतीती नटे न स्तः, अतः पश्चाद् रामत्वाद्ययोगज्ञानादिना नाऽस्या नटे जायमानायाः रामोऽयम् इति प्रतीत्याः बाधः । तादृशसम्यक्प्रतीतितो विलक्षणया प्रतिपत्त्या इत्यन्वयः । **औत्तरकालिके** उत्तरकाले नायं राम इति ज्ञानेन जननीये बाधे जनिष्यमाणे सति या बाधात् पूर्वं **रामोऽयमिति मिथ्याप्रतीतिः**, तादृशबाधाविष्कृतमिथ्यात्वभावा प्रतीतिर्यथा—

विभावादिशब्दव्यपदेश्यैः संयोगाद् गम्यगमकभावरूपाद् अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद् रसनीयत्वेन अन्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः ।

'विभावादिसत्त्वे स्थायिनोऽवश्य सत्ता' इति रूपाद् व्याप्यव्यापकभावसम्बन्धाद् नटे वर्तमानत्वेन अनुमीयमानः । विभावो वाचिकाभिनयात् कृत्रिमोऽपि ज्ञातुं शक्यः, अनुभावव्यभिचारिणौ नटस्य निजानुभावदर्शनस्य बलाद् अनुसन्धातुं शक्यौ, स्थायी तु न कुतोऽपीति तस्यानुमेयत्वमावश्यकमिति भावः । अनुमीयमानोऽपि वस्तुसौन्दर्यबलात् स्थायिनो नाट्यारूढत्वेनाऽधिगमेन आगताल्लोकोत्तरत्वाद् रसनीयः अतएव अन्यानुमीयमानविलक्षणः **स्थायित्वेन** रामादिगतस्थाय्यनुकरणरूपेण स्थितत्वेन **सम्भाव्यमानो** हेत्वादिदर्शने हेतुमदादिभिरपि भाव्यमिति सम्भावनाया विषयो रत्यादिर्भावः **तत्र** नटे वस्तुतोऽसन्नपि सामाजिकानां **वासनया** रत्यादिवासनासहकारेण चर्व्यमाणः आनन्दजनकानुमितिनिरन्तर-धारावाहिकज्ञानविषयः (स्थायी) **रसः** [illegible] व्यपदिष्टो रस्यमानत्वाद् रस इति श्रीशङ्कुकस्याभिप्रायः ।

अस्य मतस्यायं सारः—रामादिनटस्य नाट्यारूढत्वेन सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणत्वेन चित्रार्पिततुरगाकृतौ तुरगोऽयमिति ज्ञानेन तुल्येन रामोऽयम् इत्यादिना ज्ञानेन ग्राह्ये नटे नटवाचिकाभिनयरूपाणां काव्यानां विचारेण सामाजिकैर्ज्ञातेन आलम्बनोद्दीपनविभावेन, स्थायिभावनिरपेक्षेण नटेन शिक्षाभ्यासबलात् प्रदर्शितात् कटाक्षभुज-क्षेपाद्यभिनयाद् निर्वेदादिकार्याभिनयाच्च सामाजिकैर्ज्ञातेन अनुभावेन व्यभिचारिणा चेष्टितैः [illegible] नटे वर्तमानत्वेन अनुमीयमानो नाट्यारूढहेतुभिरनुमीयमानत्वाद् रसनीयत्वेन [illegible] सामाजिकैः स्वकीयरत्यादिवासनासहकारेण आनन्दजनकानुमानरूपधारावाहिकज्ञानविषयीकृतो नटकृतरामादिस्थाय्यनुकरणात्मको रस इति ।

अस्मिंश्च मते स्थायिभावस्य विभावादिभिः **संयोगाद्** अनुमाप्यानुमापकभावात् सम्बन्धाद् रसस्य **निष्पत्तिः** अनुमितिरिति सूत्रार्थो भवति सहृदयदृष्ट्या ।

अस्मिंश्च श्रीशङ्कुकमते आचार्याभिनवगुप्तोपाध्यायेन भट्टतोतेन च बहवो दोषा दृष्टाः । तेषु केचन अत्रोच्यन्ते—यदुक्तं नटकृतरामादिगतस्थाय्यनुकरणं सामाजिकैरनुमीयमानं रस इति तन्नोपपद्यते, प्रमाणोपलब्धस्यैव अनुकरणमिति वक्तुं शक्यत्वात्, यथा एवमसौ सुरां पिबतीति सुरापानानुकरणं पयःपानं प्रत्यक्षावगतं सुरापानानुकरणत्वेन वक्तुं शक्यते, नटगतरत्यादेस्तु चित्तवृत्तिरूपतया द्रष्टुमशक्यत्वात् नानुकरणात्मकत्वं तथा तस्य वक्तुं युज्यते; प्रत्यक्षेणावगन्तुं शक्यं रोमाञ्च-गद्गदक-भुजाक्षेपवलनप्रभृति तु रत्यादेरनुकृतित्वेन न कस्यापि प्रतिभाति रोमाञ्चादेश्च [illegible] भिन्नेन्द्रियग्राह्यत्वात्, भिन्नाधिकरणत्वेन च रत्यादितोऽत्यन्तं विलक्षणत्वात्. रोमाञ्चादि हि जडं बहिरिन्द्रियग्राह्यं शरीराधिकरणं च,

[illegible] गम्भीरतरं कतिपयैस्तत्त्वैः सिद्धान्तमतेन [illegible] भट्टनायक-मतमनूद्यते—**न ताटस्थ्येने**त्यादिना । **ताटस्थ्येन** तटस्थं पुरस्कृत्य, अर्थात् तटस्थगतत्वेन, [illegible] यावत् **रसो न प्रतीयते** नाऽनुभूयते रामादे-[illegible], नापि स्मर्यते रत्यादिमतो रामादेः अननुभूतत्वेन तत्स्मृतेरसम्भवात्, [illegible] सामाजिकस्य सहृदयस्य वा ततः रसभोक्तृत्वस्यासम्भवात् [illegible] परगतरत्यादिना सामाजिकस्यानन्दस्या-सम्भवात्; [illegible] रसस्य **प्रतीति** प्रत्यक्षेणाऽनुभवः, स्मृतिः शब्दबोधोऽनु-मितिर्वा । नटानां चाऽनुकर्तॄणां रसभोक्तृसामाजिकभिन्नत्वेन ताटस्थ्यम् तस्मात् ताटस्थ्ये-नेत्यस्य अनुकर्तृगतत्वेनेत्यपि अर्थः । अनुकर्तृगतत्वेनापि रसो न प्रतीयते; अनुकर्त्रोरध्य-वसितस्य नायकमिथुनस्य प्रत्यक्षेण प्रतीतौ सामाजिके लज्जाजुगुप्सास्पृहादिस्वोचितचित्त-वृत्त्यन्तरोदयः स्यात् ततश्च न सामाजिके रत्यादिविच्छेदः स्यादिति नानुकर्तृगतरत्यादि-प्रतीतिः स्वीकार्या । **नात्मगतत्वेन रस प्रतीयते** । सामाजिकगतत्वेन रसस्य प्रतीतौ तस्य सामाजिकस्य करुणे दुःखित्वं स्याद् भयानके भीतत्वञ्च । न च तदुपपन्नं करुणभयानक-प्रेक्षासु सामाजिकस्य प्रवृत्तेरभावस्य प्रसङ्गात्; शृङ्गारादौ च सभ्येसभं कान्तया सह-वासादौ व्रीडातङ्काद्यनुभवस्य प्रसङ्गात्, सीतादेः सामाजिकं प्रति विभावत्वस्य अभावात्, सामाजिकानां प्रेक्षा-रसभोगयोर्मध्ये [illegible], देवतादौ साधा-रणीकरणस्यायोगात् साधारणीकृतकान्तादिप्रतीत्यसम्भवात्; वीरादौ च अलोकसामान्यानां रामादीनां ये सेतुबन्धनसमुद्रलङ्घनादयो विभावाः तेषां साधारण्यस्य असम्भवात् । तस्मान्नात्मगतत्वेन सामाजिकानां रसस्य प्रतीतिः । **न ताटस्थ्येन नात्मगतत्वेन रस उत्पद्यते** । नानुकार्यगतत्वेन रस उत्पद्यते, अनुकार्याणां तदाऽभावात्, अनुकार्ये उत्पन्नेन रसेन सामाजिकस्य आनन्दानुभवस्यानुपपत्तेश्च; अनुकर्तृगतत्वेन च रसो नोत्पद्यते त प्रति विभावादेरसत्यत्वात्; अनुकर्त्रोरध्यवसिते प्रत्यक्षोपलब्धे नायकमिथुने उत्पन्नेन रत्यादिना सामाजिके लज्जाजुगुप्सास्पृहादिस्वोचितचित्तवृत्त्यन्तरोदयप्रसङ्गेन तेषां रत्याद्यास्वा-दस्याभावस्य प्रसङ्गात् । नात्मगतत्वेनापि रस उत्पद्यते, स्वगतत्वेनापि रसस्योत्पत्तौ स्वी-कृतायामपि स्वगतत्वेन रसस्य प्रतीतौ ये दोषा उक्तास्ते सर्वे प्रसज्यन्ते । उत्पत्तिपक्षे विभावादिकारणानां निवृत्तावपि कार्यरूपस्य रसस्य दण्डादिनिवृत्तौ घटस्येव स्थितिः प्राप्नोति, न चैवमनुभूयते विभावादिनिवृत्तौ रसस्यापि निवृत्तेरित्यधिको दोषः । तस्मा-न्नात्मगतत्वेन रस उत्पद्यते । **न ताटस्थ्येन नात्मगतत्वेन रसोऽभिव्यज्यते,** अनुकार्य-गतत्वेन, अनुकर्तृगतत्वेन, आत्मगतत्वेन वाऽभिव्यक्तौ अपि पूर्ववद् [illegible]; अभिव्यक्तिपक्षे च शक्तिरूपेण (वासनारूपेण) स्थितस्य रत्यादेः पश्चाद् विभावादिभि-रभिव्यक्तौ विभावादितारतम्यानुसारं रत्याद्यनुभवेऽपि तारतम्यस्यापत्तिः, यथा मन्देन प्रकाशेनाभिव्यक्तौ घटस्याऽस्पष्टा अभिव्यक्तिः, तीव्रेण प्रकाशेनाऽभिव्यक्तौ स्पष्टाऽभि-व्यक्तिः; न च रसे तारतम्यं स्वीक्रियते इति; सिद्धस्यैवाऽभिव्यञ्जनं रसश्च न सिद्धस्तस्य

य आसीन्नो[illegible] सततमविदितमतत्त्व ।", "पिबत्यपि खलवचनं बहुतिनरा मानसं [illegible]", "किम्पुनरत्रार्थमतत्त्वम् ? देवा [illegible]" [महाभाष्ये ८-३-३?] इत्यादिप्रयोगोपलब्धे । भोगेन चित्तद्रुतिविस्तारविकासलक्षणेन परब्रह्मास्वादसविधेन चित्तवृत्तिविशेषरूपेण भुज्यते आस्वाद्यते इति । भुज्यते इति प्रयुक्तवतो भट्टनायकस्य [illegible]राभिन्नो रस इत्यभिप्राय. । एतेन च भट्टनायकस्य मते काव्ये व्यापारस्य [illegible] स्फुटम् ।

अस्मिन्नपि मते बहवो दोषा [illegible] प्रदर्शिता । तत्र [illegible]कमिका भुक्तिर्हि रस इति भट्टनायकस्य मतम् । तथा च केवलस्य स्थायिनो रसत्वेन स्वीकाराद् भट्टलोल्लटमते प्रसक्ता', तथाऽन्ये च बहवो दोषा अस्मिन्नपि मते प्रसज्यन्ते । [illegible] रसभुक्तो विभावादीनां प्रतीयमानत्वस्य अनभ्युपगमाद् विभावाद्युत्कर्षो रसोत्कर्षकरो न स्यात्, रस-तदाभासविवेकस्य भावतदाभासविवेकस्य क्वचिद् रसभावविवेकस्य च रत्याद्यास्वादावस्थाप्रतीयमानविभावहेतुकत्वात् तेऽपि न सिद्ध्येयु । भावकत्वनोनाञ्च भावनावृत्तिविषयाणा भोगीकृतिनिरपेक्षाणाम् आनन्दाभिव्यञ्जकत्व न स्यादिति च । [illegible], एकत्राभिधाया [illegible] तेन सह प्रथमार्थस्य औपम्यादेर्वा प्रकाशकतया, [illegible] तत्तदर्थविबोधकतया च अवश्यम् एषितव्येन व्यञ्जकव्यापारेणैव रसाभिव्यक्तेरपि सम्भवाद् भावकत्वभोजकत्वयोर्गतार्थतया तयो कल्पने मानाभावाद् अप्रामाणिकं भावकत्व-भोजकत्वरूपातिरिक्तव्यापारद्वयकल्पनञ्च भट्टनायकमते दोष, 'वालाग्रशतभागोऽपि न कल्प्यो निष्प्रमाणकः' इति हि प्रामाणिका' । न च आचार्याभिनवगुप्तमतेऽपि [illegible] भावकत्वस्य स्वीकर्तव्यत्वात् न तत्कल्पन दोष' भोजकत्वं च व्यञ्जकत्वेन तुल्यमिति तत्कल्पनमपि अदोष एव इति वाच्यम्, तन्मते विभावादीनां साधारण्यस्य हृदयसंवादात्मकसहृदयभावबलादेव आगतत्वेन स्वीकाराच् शब्दवृत्तिफलत्वेन अभिनयव्यापारफलत्वेन वा तस्य अकल्पनात्, भट्टनायकाभिप्रेतभोजकत्वेन व्यञ्जनस्य लक्षणाफलप्रत्यायकत्वादेर्गतार्थत्वाच्च । रसभुक्तिश्च भट्टनायकस्य मते प्रतीतिव्यतिरिक्तत्वेनाभिप्रेता । भट्टनायकेन हि रसभुक्तेः प्रतीतिव्यतिरिक्तत्वं महताऽऽदरेण प्रतिपादितम् । तच्च अनुपपन्नमेव, प्रतीतिव्यतिरिक्ताया भुक्ते. [illegible] अप्रतीतायाश्च भुक्तेरव्यवहार्यत्वस्यापातात्, रसनाऽपि प्रतीतिविशेष एव उपायवैलक्षण्यमात्रेण विलक्षणीभूत , यथा उपायवैलक्षण्यमात्रकृताः [illegible] इति । भट्टनायकेन रसस्य उत्पत्तेरभिव्यक्तेश्च अनभ्युपगतत्वात् तन्मते रसस्य नित्यत्वापत्तिस्तुच्छत्वापत्तिर्वा स्यात् । [illegible]रिक्ताया भुक्तेः प्रतीत्यभिन्नाया रत्यादिरूपाया' स्वीकारेऽपि यावन्तो हि रसास्तावन्त्य एव रसनात्मानः प्रतीतयो [illegible] इति तासां कृते पृथक् पृथग् व्यापाराणा कल्पनमावश्यकमिति [illegible] भट्टनायकमते दोषः । सामाजिक-

सम्बन्धाविशेषस्वीकारपरिहारनियमानवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवि-

---

जीवित्वमपि सूचितम् । काव्यनाट्योपस्थापिता विभावादीना हृदयसंवादात्मकसहृदय-त्वबलसम्पाद्यं साधारण्यमाह—**ममैवेत्यादिना** । **ममैवैते शत्रोरेवैते** तटस्थस्यैवैते इति मन्मात्रादिसम्बन्धित्वेन सम्बन्धविशेषस्वीकारेण **नियमो** विभावादेः परिमितिः, तस्य **अनवसायाद्** अनिश्चयात्, **न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते** इति [illegible]-त्वेन **रूपेण** सम्बन्धविशेषपरिहारेण यो नियमो विभावादेः परिमितिस्तस्याऽपि अनवसा-यात् । यदि लौकिकपरिच्छिन्नमद्गतत्वेन विभावादयः प्रतीयेरन् [illegible] स्वरत्यादेः प्रकाशोऽनुचित इति व्रीडावैवश्यापत्तिः, ततश्च कुतो रसास्वादः; निजसुख-दुःखादिविवशीभावस्य, सम्भावना-विरह-देशकालविशेषावेश-प्रतीत्युपायवैकल्य-स्फुटत्व-[illegible] च रसास्वादे विघ्नरूपत्वात् । विगलितपरिमितप्रमातृ-भावत्वेन विस्मृतरसास्वादविघ्नरूपेण [illegible] अलौकिकस्य प्रमातुस्तु विभावादौ सामान्येन स्वकीयत्वोल्लेख इष्यते एव । विभावादेः शत्रुसम्बन्धित्वेन प्रतीतौ विद्वेषस्याविर्भावात्, तटस्थगतत्वेन प्रतीतावपि स्वस्मिन् तदभावस्य ज्ञानस्य प्रसङ्गात्, इत्थं सम्बन्धविशेषपरिहारनियमाऽवसायेऽपि असम्बन्धिनो गगनारविन्दस्येवाऽलीकत्वेन ज्ञानात् ततो रसास्वादस्यानुपपत्तेः । **साधारण्येन** अपरिमितत्वेन **प्रतीतैर्**ज्ञायमानैः **अभिव्यक्तः** आविर्भूतः, **वासनात्मतया** संस्काररूपेण सूक्ष्मबीजावस्थरूपेण इति यावत्, **स्थितः** अनादिकालात् सामाजिकानां सहृदयानां चित्ते वर्तमान इत्यर्थः । **स्थायी** 'अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः । आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः' (साहि-त्यदर्पणे ३।१७४) इत्युक्तो रत्यादिकः । **नियतो** लौकिकदृष्ट्या परिच्छिन्नः **प्रमाता** रसास्वादयिता सामाजिकः, सहृदयस्तद्गतत्वेन स्थितोऽपि **साधारणः** परिच्छिन्नलौकिक-पुरुषविशेषसम्बन्धित्वेन अप्रतीयमानः **उपायो** विभावादिस्तद्बलात् तत्प्रभावात् **तत्काले** रसास्वादकाले **विगलितो** विस्मृतो यः **परिमितप्रमातृभावो** लौकिकदेशकालादिसम्बन्धपरि-च्छिन्नप्रमातृत्वं चैत्रमैत्रत्वादि **तद्वशात् उन्मिषित** आविर्भूतो **वेद्यान्तरसम्पर्कशून्यो** लौकिकसामाजिकसान्निध्यादिविषयस्य **ज्ञानेन** मध्ये-मध्ये उत्पद्य चित्तवृत्त्यन्तरविच्छेदकेन रहितो**ऽपरिमितः** प्रमातृविशेषानिष्ठत्वेनागृह्यमाणत्वे सति प्रमातृसामान्येनाऽनुभूयमानो **भाव**श्चित्तवृत्तिर्यस्य स तेन **प्रमात्रा** रसास्वादकेन **सकलसहृदयानाम्** अनादिवासनाचित्री-कृतचेतसा वासनासंवादाद् यः **संवादः** एकेन एकत्र वा यद् यथा यथा दृष्टं तस्य अन्येन अन्यत्र वा तथा तथा दर्शनम् समानोऽनुभवो वा **तद्भाजा** तद्युक्तेन **साधारण्येन** अपरिमितत्वेन **गोचरीकृत** इत्यग्रिमेणान्वयः । ननु सिद्धान्ते रसस्य रसनैकायत्तजीवित-

स च न कार्यः विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात्; नापि ज्ञाप्यः, सिद्धस्य तस्यासम्भवात्, अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः । कारकज्ञाप-

---

सुखस्यापि लौकिकसन्निकर्षान्न भोगः, लौकिकरत्यादिसुखभोगेऽपि भोगक्षणे आत्मसुख-योर्भेदेन अग्रहणाद्, आत्मनि रत्यादिसुखतादात्म्याध्यासस्यैव रत्यादिसुखभोगरूपत्वात्. तथा च श्रुतिरपि—"तद् यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्.' इति बृहदारण्यकोपनिषदि (४।३।२१); उपायपरिणामादिभेदकृतं हि रसा-नन्दवैलक्षण्यमिति एव तत्त्वम् । **स्थायी** उपर्युक्तविशेषणविशिष्टः सन् शृङ्गारादिको रस इत्युच्यते इत्यर्थः ।

'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इति रससूत्रे पञ्चमी श्रूयते, वैया-करणाश्च 'विभाषा गुणेऽस्त्रियाम्'' (२।३।२५) इति पाणिनेर्योगं 'विभाषा' इति. 'गुणेऽस्त्रियाम्' इति च द्वेधा विभज्य पञ्चम्या हेत्वर्थकतामपि दर्शयन्ति, भवता च **विभावादिभिः साधारण्येन प्रतीतेः अभिव्यक्त** इति हेत्वर्थकतृतीयया पञ्चमीं व्याख्या-तवता तस्याः पञ्चम्या. हेत्वर्थकता स्वीकृता, भवदुक्तरसं प्रति विभावादीनां कीदृशी हेतुता रसस्य च कीदृशी हेतुमत्ता इति तु न ज्ञायते; हेतुर्हि द्विविधः कारको ज्ञापकश्च, कारकहेतुनिर्वर्त्यो हि कार्य इत्युच्यते यथा कुलालस्य कार्यो घटः, भवदुक्तो रसस्तु **विभावादिकार्यो** भवितुं नार्हति, तथा सति यथा कुलाले मृतेऽपि तन्निर्मितो घटस्तिष्ठति तथैव विभावादिविनाशेऽपि रसस्तिष्ठेद्, तथा च विभावादिजीवितावधिरिति भवद्-वचनस्य व्याघातः स्यात्; ननु यथा कपालविनाशे घटो विनश्यति तथा विभावादिविनाशे रसोऽपि विनङ्क्ष्यत्येवेति चेद् मैवम्, समवायिकारकहेतुतत्कार्ययोः सा वार्ता, विभा-वादिज्ञानाना रसकारणाना तु क्षणिकत्वेन समवायिकारणत्वायोगात् असमवायिकारक-हेतुविनाशे च तत्कार्यस्याऽपि विनाश एवेति नियमस्याभावात्; विभावादीना कारकहेतुत्वं रसस्य तत्कार्यत्वं च नैवोपपद्यते इति; ननु विभावादिज्ञानानां ज्ञापकहेतुत्वं सूत्रे पञ्चमी च ज्ञापकहेतौ एव स्वीकर्तव्येति चेद् न. ज्ञापकहेतुर्हि न किमपि नवीनं वस्तु उत्पादयति, केवलं पूर्वसिद्धं वस्तु प्रकाशयति, यथा अन्धकाराच्छन्ने प्रकोष्ठके वर्तमानं पुस्तकं ज्ञापकहेतुभूतः प्रदीपः प्रकाशयति केवलम्, न तूत्पादयति; यदि विभावादिर्ज्ञापकहेतुर्भवेद् रसस्य च ज्ञाप्यतारूपा हेतुमत्ता भवेत् तर्हि यथा प्रदीपप्रकाशसंयोगात् पूर्वमेवान्धकारा-च्छन्नप्रकोष्ठकस्थं पुस्तकं सिद्धं तथैव रसोऽपि विभावादिसंयोगात् पूर्वमपि सिद्धः स्वी-कर्तव्यः स्यादिति भवदुक्ते 'चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः' इति रसविशेषणे व्याहन्येयाताम् इत्यत्र आह—**स च न कार्य** इत्यादि । विभावादीना व्यञ्जकहेतुत्व-माह—**अपितु** इत्यादिना । ननु व्यञ्जकहेतुत्वं लोके अप्रसिद्धम् इत्यत आह—**कारकज्ञापका-भ्यामित्यादि** । रसः उत्पन्न इति व्यवहारं समर्थयति—**चर्वणेन** इति । रत्यादिभोगा-नन्दस्य रसत्वाद् आनन्दांशस्य अजन्यत्वेऽपि चर्वणाख्यभोगांशस्य विभावादिभ्य उत्पत्तेः रस उत्पन्नः रसः कार्य इत्यादिर्गौणो व्यवहार उपपद्यते इत्यर्थः । एवञ्च गौणकारकहेत्व-

एवंविधमन्यत् क्व दृष्टमिति चेत्, न क्वचिद् दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतद् न दूषणम्। चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम्, लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञान-वेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम्। तद्ग्राहकञ्च न निर्विकल्पकं विभावादिपरामर्श-

---

र्थकतया अपि रससूत्रपञ्चमी नेतुं शक्यते इति भावः। ज्ञापकहेत्वर्थकतयाऽपि रससूत्रपञ्चमीं नेतुं शक्यते इत्याह—लौकिकप्रत्यक्षादिप्रमाणेत्यादिना। **लौकिकं** यत् **प्रत्यक्षादि प्रमाणं** प्रमितिः, **ताटस्थ्यस्य** प्रधानादेर्जडाच् चिदात्मनस्तटस्थतायाः यो**ऽवबोधो** ज्ञानं **तच्छालिनां** तद्वतां **मितयोगिनाम्** अपरिपक्वयोगिनां साधकयोगिनां वा यज् ज्ञानं विवेकख्यातिजनकं सम्प्रज्ञातसमाधिजन्यं ज्ञानम्, **वेद्येन** लौकिकविषयजातेन प्रधानेन च संस्पर्शः सम्बन्धस्तेन रहितं **स्वात्ममात्रपर्यवसितं** स्वस्वरूपानन्दरूपं **परिमितेतरस्य** सिद्धस्य **योगिनो** यत् **संवेदनम्** असम्प्रज्ञातसमाधिजन्यं ज्ञानं तेभ्यो लौकिकादिसंवेदनेभ्यो **विलक्षणं** यत् **लोकोत्तरं संवेदनं** ज्ञानं **तद्गोचरः** तद्विषयो रस इति रसः **प्रत्येयो** ज्ञेयोऽपि अभिधीयतां यथारुचिः एवं च रससूत्रपञ्चमी ज्ञापकहेतुनिष्पादिकाऽपि भवितुं शक्नोतीति भावः। लौकिकज्ञानं ज्ञानान्तरौन्मुख्यादविश्रान्तं रससंवेदनं तु संवेदनान्तराऽनौन्मुख्याद् विश्रान्तमिति तयोर्भेदः, सम्प्रज्ञातसमाधिमतो योगिनः ज्ञाने प्रधानादेर्जडाच् चैतन्यस्य भेदोऽवभासते रससंवेदने तु रसानन्दभोगक्षणे कोऽपि भेदो न भासते इति तयोर्वैलक्षण्यम्, असम्प्रज्ञातसमाधौ चिदानन्दमात्रमनुभूयते रसानन्दभोगे तु रत्याद्यनुविद्धं चैतन्यमिति तयोरपि वैलक्षण्यमिति रससंवेदनस्य लोकोत्तरसंवेदनत्वं बोध्यम्। तथा च रत्यादिभोगानन्दरूपे रसे विभावादिभिः [illegible] ज्ञाप्यत्वाऽनन्यरूपेण व्यङ्ग्यत्वेन व्यवहारः प्रवर्तते। एवञ्च रससूत्रपञ्चमी ज्ञापकहेतौ अपि सूपपन्ना एव ज्ञेया। रसः संवेदनविषय इति उक्तम्, किन्तु तन्नोपपद्यते, यतो हि **निर्विकल्पेन** धर्मधर्म्यादिसम्बन्धमप्रकाशयता ज्ञानेन रसस्य विषयीकरणं न सम्भवति रसस्य विभावादिपरामर्शप्रधानत्वाद्, विभावादिसम्बन्धप्रकाशकस्य च सविकल्पकज्ञानत्वात्; नाऽपि **सविकल्पेन** धर्मधर्म्यादिसम्बन्धं विषयीकुर्वता ज्ञानेन रसस्य ग्रहणं भवति, चर्व्यमाणालौकिकानन्दरूपस्य रसस्य [illegible] आनन्दानुभवक्षणे ज्ञानान्तरस्याऽभावाद् रसमात्रविषयिकायां चर्वणायां धर्मधर्मिभावादिसम्बन्धप्रतीतेरभावात्; एवं च न रसस्य ज्ञाप्यत्वस्य सम्भवस्तस्य सविकल्पकनिर्विकल्पकभिन्नविलक्षणज्ञानग्राह्यत्वात् [illegible] ज्ञानस्य च लोकेऽभावात्, अतो रससूत्रपञ्चमी उपचारमाश्रित्य ज्ञापकहेत्वर्थकतया नेतुं शक्यते इत्यसद् इत्याक्षेपे आह—**उभयाभावस्वरूपस्ये**-त्यादि। वस्तुतः सविकल्पकाद् निर्विकल्पकाच् च ज्ञानाद् खिन्नस्य रससंवेदनस्य [illegible] रत्यादिस्वसंवेदनागमादाय निर्विकल्पकात्मकत्वं विभावादि[illegible] सविकल्पकात्मकत्वमिति उभयात्मकत्वं **पूर्ववद्** कारक-

प्रधानत्वात्, नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्ध-त्वात् । उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः ।

व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम् अश्रुपातादयोऽनु-भावा. शृङ्गारस्येव करुणभयानकयो:, चिन्तादयो व्यभिचारिण. शृङ्गारस्येव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिता निर्दिष्टाः ।

वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः ।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे ॥ उदा० ६८ ॥
इत्यादौ,

ज्ञापकहेतुजन्यत्वाभावकृतवैलक्षण्यवद् रससंवेदनस्य **लोकोत्तरतामेव** प्रदर्शयति, **न तु** सविकल्पकनिर्विकल्पकोभयज्ञानाप्रकाश्यत्वेन रसस्य अप्रतीतिं साधयितुं शक्नोति, रसस्य सहृदयानुभवसाक्षिकत्वाद्. अतो वस्तुत उभयाभावस्वरूपं उपचारेण च उभयात्मकं रससंवेदनमिति **तद्** रसस्य ज्ञाप्यत्वानन्यत्वरूपेण कृतस्य (पूर्वोक्तस्य आचार्याभिनवगुप्त-मतानुसारिणो) रसतत्त्वज्ञानस्य **विरोधं नैव गमयति** बोधयतीति **श्रीमदाचार्याभिनव-गुप्तपादाः** । **श्री**. काव्यार्थतत्त्वज्ञानसम्पत् तद्वान्, **आचार्यः** आचार्य इव आचार्य. साङ्गसरहस्यवेदाध्यापक इव सरहस्यकाव्यनाट्यशास्त्राध्यापको ध्वन्यालोकनाट्यशास्त्र-व्याख्यानेन, **अभिनवं गुप्तं** गूढं काव्यार्थं **पाद**यति बोधयति गत्यर्थकाना ज्ञानार्थकत्वस्यापि स्वीकाराद् इति, 'आनन्दो मनसि लभतां प्रतिष्ठाम्' इति वदन् आचार्यानन्दवर्धन इव अन्वर्थनामा गुरुरित्यर्थः । बहुवचनप्रयोगाद् गौरवं द्योतितं बोध्यम् । यद्यपि गौरवस्य द्योतनाय बहुवचनस्य प्रयोगः पाणिनीयव्याकरणान्न ज्ञायते, तथापि "एकस्या एव पूजनार्थे बहुवचनं स्याद्" इति निरुक्तकारस्य (१२।१।७) वचनाद् सोऽस्ति संस्कृते इति विज्ञायते ।

रससूत्राभिप्रायविशेषं दर्शयति—व्याघ्रादय इत्यादिना । व्याघ्रादयो विभावा भीरूणां भयम्, वीराणां तत्प्रतिकारोत्साहम्, सद्य ऐदम्प्राथम्येन दृष्टवतां विस्मयम्, व्यापा-दितबन्धूनां मारितपशूनां वा क्रोधञ्चेत्यादि अनियतं जनयन्तीति व्यभिचारित्वात् केवला विभावा ऐकान्त्याद् भयानकादिकमेकैकं रसं व्यञ्जयितुमसमर्था भवन्ति । एवमेव अश्रुपाता-दयोऽनुभावा अपि केवला व्यभिचारित्वाच् शृङ्गारादिकमेकैकं रसं व्यञ्जयितुमसमर्था एव । एवमेव चिन्तादयो व्यभिचारिणश्च शृङ्गारादिषु अनेकेषु तेषां दर्शनाच् शृङ्गारा-दिकमेकैकं रसमैकान्त्येन व्यञ्जयितुमसमर्था एवेति विभावानुभावव्यभिचारिणस्तृणारणि-मणिन्यायेन एकैकं रसं व्यञ्जयितुमसमर्थाः । अतो विभावादयो दण्डचक्रचीवरन्यायेनैव एकैकरसव्यञ्जका इति प्रतिपादयितुमेव रससूत्रे विभावादीनां द्वन्द्वेन निर्देशः कृत इति भावः ।

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवकरिदन्तच्छेदपाण्डुः कपोलः
॥ उदा० ६९ ॥

इत्यादौ.

केवलस्यापि विभावादेः असाधारण्ये सति तु अनुभावादिकस्याऽऽक्षेपं कारयित्वाऽपि तस्य रसविशेषव्यञ्जकत्वं भवतीति प्रतिपादयन् तत्र प्रथमं केवलस्याऽपि विभावस्य असाधारण्ये सति [illegible] कारयित्वाऽपि तस्य रसविशेषव्यञ्जकत्वं [illegible] । मुग्धां मानिनीं प्रति सखी ब्रूते—हे **मुग्धे** [illegible] मानधारणेन अविवेकिनि मूढे, त्वं **प्रणतिपरे** मुहुर्मुहुः [illegible] सततं कुर्वाणे **दयिते** त्वत्प्रेमपात्रे नायके प्रसीद, यतो हि नायं मानरक्षानुकूलः [illegible] वसन्तारम्भसमये **वियद्** आकाशम् अलिमलिनो भ्रमर इव कृष्णः [illegible] **मेघो** यस्मिन् तत् तादृशमस्ति, **मधुकराश्च** भ्रमराश्च **कोकिलाश्च** तेषां कूजितं [illegible] श्रीःशोभा अस्ति **धरणिश्च अभिनवा** प्रत्यग्रा **अङ्कुरा** एव **अङ्कटङ्का** [illegible] यस्या सा तादृशी विद्यते । नवाङ्कुराणामपि कामोद्दीपकत्वेन [illegible] तेषां रूपकम् । मानेन ऊर्ध्वमुखी भूत्वा अवस्थानेऽपि अलिमलिनाम्बुगर्भमेघेण आकाशेन, तिर्यङ्मुखी भूत्वा उपवेशनेऽपि [illegible] मनोहारिणीभिर्दिग्भिः, अधोमुखी भूत्वा आसनेऽपि अभिनवमरकत[illegible] धरण्या कामोद्दीपनेन मानभङ्गाय प्रेरणा क्रियते इति कुतो मानरक्षावसर इति भावः । अन्यैष्टीकाकारैः प्रावृड्विषयत्वेन व्याख्यानमपीदं पद्यं मया वसन्तविषयत्वेनैव नीतम्, अभिनवाङ्कुराणां [illegible] च तत्रैव सुसङ्गतत्वात्, [illegible] पूर्वोक्तभावाभिव्यक्तिपरेण कविना निबद्धत्वाद् वसन्तेऽपि कदाचित् तस्य सत्त्वात् । [illegible] अर्धसमे छन्दसि पुष्पिताग्रा वृत्तम्, "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् । अत्र च मुग्धारूपस्य आलम्बनविभावस्य [illegible] उद्दीपनविभावानामिति केवलस्य विभावस्य उल्लेखेऽपि तस्य असाधारणत्वेन अनुभावस्य [illegible] कारयित्वा स विप्रलम्भशृङ्गारं व्यनक्ति इति भावः पश्चात् स्फुटो भविष्यति ॥ उदा० ६८ ॥

केवलस्यापि अनुभावस्य असाधारण्ये सति तु विभाव-व्यभिचारिभावाक्षेपं कारयित्वाऽपि तस्य रसविशेषव्यञ्जकत्वं भवतीति तदुदाहरति—परिमृदितेत्यादिना । मालतीमाधवे प्रकरणरूपे रूपके माधवेन मकरन्दमुद्दिश्य कृतं मालतीविप्रलम्भवर्णनमिदम् । अस्या मालत्या **अङ्गं** शरीरं **परिमृदिता** मर्दनेन म्लानेत्यर्थः, **मृणाली** बालमृणालम् इव **म्लानम्** अस्ति, **क्रियासु** स्नानभोजनादिषु **प्रवृत्तिरपि परिवारस्य** परिचरजनस्य **प्रार्थनाभिः** 'इदानीं स्नानं तु क्रियताम्, एतावत् तु भुज्यताम्, एतावत् तु पीयताम्' इत्यादिभिः प्रार्थनावचनैः **कथमपि** यथाकथञ्चिदनिच्छया भवति, अस्या **अभिनवः** करिदन्तस्य **च्छेदः**

दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ।। उदा० ७० ।।

इत्यादौ च, यद्यपि विभावानाम् अनुभावानाम् औत्सुक्यव्रीडाहर्षकोपा-सूयाप्रसादानाञ्च व्यभिचारिणां केवलानां स्थितिः तथाप्येतेषामसाधारणत्वादिति अव्यक्तसद्व्याक्षेपकत्वे सति नानैकान्तिकत्वमिति ।

इव सद्यश्छिन्नो भाग इव **पाण्डुः** गौरः **कपोलो** गण्डो निष्कलङ्कस्य **हिमांशोश्चन्द्रस्य** **लक्ष्मीं** शोभां **कलयति च** धत्ते चेत्यर्थः । अतिशक्वर्यां छन्दसि मालिनी वृत्तम्, 'ननमयय-युतेयं मालिनी भोगिलोकैः' इति लक्षणात् । अत्र च अङ्गग्लानि-विषयविरागपाण्डुता-दीनां केवलानामपि असाधारणत्वाद् विभावसञ्चारिभावयोराक्षेपकारित्वादपि तेषां विप्रलम्भशृङ्गारव्यञ्जकत्वं भवतीति वेदितव्यम् इति भावोऽनुपदं स्फुटो भविष्यति ।। उदा० ६९ ।।

केवलानामपि सञ्चारिभावानाम् असाधारण्ये तु रसविशेषव्यञ्जकत्वं पूर्ववद् भवतीति तदुदाहरति—**दूरादुत्सुकमित्यादिना** । अमरुकशतके पद्यमिदम् । नायिकाकृतनिजकोप-प्रसादनप्रयासं त्यक्त्वा गतस्य नायकस्य पुनरागमने मानिन्या विलोकनभङ्गीनां वर्णनं करोति कविः—**प्रेयसि** प्रियतमे **जातम् आगः** प्रणयापराधो यस्मात् तस्मिन् तादृशे सति मानिन्याश्चक्षुर् दूराद् नायकम् प्रत्यायान्तं दृष्ट्वा उत्सुकं समुत्कण्ठासूचकचेष्टायुक्तम्, **आगते** प्रियतमे समीपं प्राप्ते सति **विवलितं** लज्जया तिर्यक् सञ्चलितम् **सम्भाषिणि** प्रियतमे मधुरं वचनं प्रयुञ्जाने सति **स्फारितं** हर्षेण प्रसृतनेत्रपुटम्, **संश्लिष्यति** आश्लि-ष्यति सति **अरुणम्** अकस्मादालिङ्गनं करोतीति प्रणयकोपेन आरक्तम्, **गृहीतवसने** आत्तचेलाञ्चले सति **किञ्च** किञ्चिद् अञ्चिता अनुपदोक्तवैशिष्ट्येन कुटिलीकृता भ्रूलता यस्य तादृशम्, प्रियतमे **चरणयोः** पादयोः **आनतिः** पतनं **व्यतिकरो** व्यापारो व्यवहारः सम्बन्धो वा यस्य तथाविधे सति **बाष्पाम्बुपूर्णं** अश्रुपूर्णं यथा स्यात् तथा **ईक्षणं** विलोकनं यस्य तादृशम् **अभूद्** इति **अहो** मानिन्याश्चक्षुः **प्रपञ्चे** विचित्रनानाव्यापारेषु **चतुरं** कुशलं जातमित्यर्थः । अतिधृत्या छन्दसि शार्दूलविक्रीडितं वृत्तम् । अत्र केवलानामपि औत्सुक्य-व्रीडाहर्षकोपासूयाप्रसादानां मुख्यत्वेनोल्लिखितानां व्यभिचारिणाम् असाधारणत्वाद् विभावानुभावाक्षेपपुरस्सरं शृङ्गारव्यञ्जकत्वं बोध्यम् ।। उदा० ७० ।।

एवञ्च पूर्वोदाहृतविभावानुभावव्यभिचारिणाम् विभावादीनां तु केवलानामपि आक्षिप्तान्यत-मद्वयसाहाय्येन रसविशेषव्यञ्जनहेतुत्वमेव न तु **अनैकान्तिकत्वम्** अनियतत्वाद् रसविशेषा-व्यञ्जकत्वमिति बोध्यम् इत्याह-**यद्यपि विभावानाम्** इत्यादिना । तत्र प्रथमे **वियदलि-मलिनाम्बुगर्भमेघे**त्यादौ उदाहरणे प्रणतिः अनुभावः मानत्यागप्रार्थनाप्रत्यायिता असूया सञ्चारिभावः झटित्याक्षिप्येते, द्वितीये **परिमृदिते**त्यादौ उदाहरणे मालती माधवश्च विभावः

कामस्य सकलजातिसुलभतया अत्यन्तपरिचितत्वेन सर्वान् प्रति हृद्यतेति पूर्वं शृङ्गारः, तदनन्तरं तदनुगामी हास्यः, ततो हास्यस्यात्यन्तं विपरीतः करुणः, ततः करुणनिमित्तं रौद्रोऽर्थप्रधानः, एवमर्थकाममूलानां रसानामुल्लेखं कृत्वा अर्थकाममूलभूतधर्मप्रधानो वीररस उपात्तः, वीरस्य च भीताभयप्रदानसारत्वात् तदनन्तरं भयानकः प्रसक्तः, भयानकबीभत्सयोः विभावसाधारण्यस्य सम्भवाद् बीभत्सोऽनुप्रसक्तः, वीरस्याफलत्वसम्भवादद्भुतस्य वीरान्तरं तस्योल्लेखः । अभिनवगुप्तपादसम्मते पाठे तु उक्तकारिकाशेषभागस्य "बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः" इत्यानुपूर्वी एवञ्च अर्थ-काम-धर्ममूलकरसोल्लेखानन्तरं त्रिवर्गात्मकप्रवृत्तिधर्मविपरीतनिवृत्तिधर्मात्मको मोक्षफलः शान्त उपात्त इति ।

अष्टौ नाट्ये रसाः स्मृताः इत्यस्य 'सर्वं वाक्यं सावधारणम्' इति-न्यायमाश्रित्य नाट्ये अष्टौ एव रसाः (काव्ये तु शान्तोऽपि नवमो रसः) इत्यर्थः इति केचित् मन्यन्ते । ते हि अवस्थानुकृतिरूपे नाट्ये सर्वविषयोपरमरूपस्य शान्तस्य न सम्भवः, रोमाञ्चितत्वादिविरहेण अनभिनेयत्वाद् गीतवाद्यादेस्तद्विरोधित्वाच्चेति वदन्ति । तथा च स्थायिभावगणनाप्रसङ्गे धनञ्जयः—"रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः । शममपि केचित् प्राहुः पुष्टिर्नाट्येषु नैतस्य" (दशरूपके ४।३५) इत्याह । विक्रमोर्वशीये कालिदासोऽपि—"मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयः प्रयुक्तः । ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टुमनाः स लोकपालः" इत्याह स्म । अन्ये तु नाट्येऽपि शान्तमपि स्वीकुर्वते । ते च [illegible] अभिनवगुप्तसम्मतं पाठं समाश्रयणीयम् **अष्टौ** इति **नाट्ये** इति चोपलक्षणं वा मन्यन्ते । नाट्यशास्त्रस्य षष्ठाध्याये केषुचित् पुस्तकेषु शान्तरसप्रकरणं नास्त्यपि केषुचित्तु लभ्यत एव । तद्व्याख्याने च शान्तस्याप्यभिनेयत्वं सम्यक् प्रदर्शितम् आचार्याभिनवगुप्तपादेन । तथा च सङ्गीतरत्नाकरकारोऽपि "अष्टावेव रसा नाट्ये इति केचिदचूचुदन् । तदचारु यतः कंचिन्न रसं स्वदते नटः" इति ।

ननु रसः सुखभोगरूप इत्युक्तम्, तत् कथं दुःखात्मकशोकस्थायिभावस्य करुणस्य रसता ? कथं वा तदभिनयप्रेक्षायां तद्व्यञ्जककाव्यश्रवणे वा सहृदयस्य प्रवृत्तिः ? करुणस्यापि सुखात्मकत्वे कथं तदभिनयप्रेक्षणे तद्व्यञ्जककाव्यश्रवणे वा अश्रुपातादयः ? अत्र केचित् सुखदुःखात्मकत्ववादिनो वदन्ति—यद्यपि करुणो रसः सुखदुःखात्मकस्तथापि शोकावच्छिन्नस्य चैतन्यस्य आनन्दांशे भग्नावरणस्य करुणरसत्वेन आनन्दस्य उत्कटत्वात् तस्य उत्कटेच्छाविषयत्वाच् शोकांशे च बलवद्द्वेषाभावात् तत्र रसत्वसम्भवः, सहृदयप्रवृत्तिसम्भवश्च भावनया वर्णनीयमयीभावेन शोकाभिव्यक्तेस्तत्कार्याश्रुपातादयो भवन्तीति न किञ्चिदनुपपन्नम् । अथवा अश्रुपातादयस्तु तत्तदानन्दानुभवस्वाभाव्याद् भवन्ति, न तु दुःखात्, न हि दुःखमूला एवाश्रुपातादयः, भगवद्वर्णनाकर्णनाद् भक्तानामश्रुपातादेर्दर्शनाद् इति । अन्ये पुनर्वदन्ति—शोको द्विविधः, प्रतियोगिनि **प्रीत्या** तन्नशो

तथा—

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥ उदा० ७२ ॥

अपरस्तु अभिलाप-विरहेर्ष्या-प्रवासशापहेतुक इति पञ्चविधः क्रमेणोदाहरणम्—

अमरुशतके पद्यमिदम् । शयनागारं शून्यं विलोक्य शयनात् पूर्वकायेन शनैरुत्थाय निद्राच्छलं कुर्वतः पत्युर्मुखं सुचिरं विलोक्य निद्रितोऽयमिति विश्वासं कृत्वा पतिमुखं परितः कपोलयोर्नेत्रप्रान्तयोरधरे च चुम्बित्वा, पतिकपोलस्थलीं चुम्बनजातपुलकामालोक्य न हि निद्रितोऽयमिति ज्ञात्वा लज्जया नम्रमुखी जाता बाला सस्मेरमुखेन प्रियेण लज्जापगमं यावत् चिरं चुम्बिता इत्यर्थः । अतिधृत्यां छन्दसि शार्दूलविक्रीडितं वृत्तम् ।

अत्र नायक आलम्बनविभावः, शून्यशयनागारादिरुद्दीपनविभावः, मुखविलोकनचुम्बनादिरनुभावः, लज्जाहासादयो व्यभिचारिभावाः, रतिः स्थायिभावः । तेभ्यश्च एतत् काव्यपाठकस्य एतत्काव्यश्रोतुर्वा सहृदयस्य शृङ्गाररसभोगः ॥ उदा० ७१ ॥

सम्भोगशृङ्गारस्योदाहरणान्तरमुदाहरति—त्वं मुग्धाक्षीत्यादिना । अमरुकशतके पद्यमिदम् । **मुग्धाक्षि** हे सुन्दरनयने । मोहयति अतिसुन्दरत्वादिति मुग्धम्, कर्तरि क्तः । **कञ्चुलिका** चोली । **लक्ष्मीः** शोभा । **वीटिका** चोलीबन्धनतन्तवः । हे सुन्दरनयने, त्वं चोलीं विनैव मनोहारिणीं शोभां धत्से इति अभिधायके प्रियतमे चोलीग्रन्थिमोचनाय चोलीग्रन्थिषु हस्तं नयति सति शय्याप्रान्ते निविडं संलग्नायाः 'सखीषु सत्स्वपि निर्लज्जः अयमेवं चेष्टते' इति सखीजनमुखं विलोक्य सस्मितायाः सख्याः नायिकाया उत्फुल्लनयनतारूपेण नेत्रोत्सवेन आनन्दितः सर्वोऽपि सखीसमुदायो यथायथं 'मया सारिका भोजनीयेदानीम्' 'मया चकोरी मोचनीयेदानीम्' इत्यादिकं मिथ्यावचनं प्रयुज्य एकैकं वासभवनान्निर्याति इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

अत्र मुग्धाक्षी आलम्बनविभावः, शयनकोष्ठ शून्यत्वादिरुद्दीपनविभावः, आभाषणवीटिकास्पर्शौ अनुभावः, स्मितादिर्व्यभिचारिभावः, रतिः स्थायिभावः । सहृदयस्य एतत् काव्यपाठकस्य एतत्-काव्यश्रोतुर्वा शृङ्गाररसभोगः । पूर्वस्मिन् उदाहरणे मुख्यतया नायिकायाश्चिरन्तनो रसास्वादः, अस्मिन्नुदाहरणे तु [illegible]मवगन्तव्यम् ॥ उदा० ७२ ॥

विप्रलम्भशृङ्गारं निरूपयति—**अपरस्तु** इत्यादिना । **विप्रलम्भो** विसंवादः, मनसि उपस्थितस्यापि नायकस्य तथाविधाया वा नायिकायाः बहिरनुपस्थितिमादाय तथा उक्तः शृङ्गारभेदः । तल्लक्षणं तु विश्वनाथेन—"यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ" (३।१८७) इत्युक्तम्, जगन्नाथेन च—"नायिकया (नायकेन) वियुक्तः (वियुक्ता)

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृद्
यो मां नेच्छति नागतश्च हहहा कोऽयं विधेः प्रक्रमः ।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि ॥उदा० ७४॥

एषा विरहोत्कण्ठिता ।

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥उदा० ७५॥
प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।

विरहविप्रलम्भमुदाहरति—**अन्यत्र व्रजतीत्यादिना** । स्ववासभवने रात्रौ नायकस्य अनागमने वितर्कयन्त्या विरहोत्कण्ठितया स्वकीयाया नायिकाया वर्णनमिदम् । निशान्तं भवनम् । मत्प्रियोऽन्यत्र नायिकान्तरगृहे गच्छतीति कथाऽपि न सम्भवति; मत्प्रियस्य सुहृदपि तादृशो नास्ति यो मां द्वेष्टि, ततश्च यो मत्प्रियं परस्त्रीषु प्रवर्तयति अथवा मयासह मत्प्रियस्य समागमं परिजिहीर्षति; एवं च, मद्वासभवने वेलायां जातायां नायकस्य अनागमने कारणस्याऽभावेऽपि मत्प्रियो नागतः, अहो विधेः कीदृशोऽयं प्रारम्भः, विधिः किं कर्तुं वाञ्छति इत्येवंप्रकारेण वहुभिर्वितर्कैः व्याप्तेन अन्तःकरणेन युक्ता बाला नायिका गर्भागारे मुहुर्मुहुः कृतेन पार्श्वपरिवर्तनेन सहिता सती निशि निद्रां न प्राप्नोतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् । अत्र अनागतो नायकः आलम्बनविभावः, शून्यं वासभवनम् उद्दीपनविभावः, विवर्तनादिराङ्गिकोऽनुभावः, चिन्तादैन्यादयो व्यभिचारिभावाः । एतैरत्र विरहविप्रलम्भशृङ्गारो व्यज्यते ॥उदा० ७४॥

व्याख्यातस्य पद्यस्य विरहविप्रलम्भस्वरूपोदाहरणत्वं सूचयति—**एषा विरहोत्कण्ठितेति** ।

ईर्ष्याविप्रलम्भस्वरूपमुदाहरति—**सा पत्युरित्यादिना** । अमरुकशतके पद्यमिदम् । नवोढायाः स्वसख्या दुःखमसहमाना काचित् तस्याः मानप्रकारं वर्णयति । सा बाला पत्युः प्रथमस्य नायिकान्तरासङ्गरूपस्यापराधस्य सखीभिः सख्येन कृतमुपदेशं विना सविभ्रमाभिर्भ्रुकुट्याद्यङ्गचालनाभिर्वक्रोक्तिभिश्च स्वेर्ष्यायाः संसूचनं कर्तुं न जानाति, किन्तु परितो नेत्रोत्पले क्षिपन्ती [illegible] सती सा बाला स्वच्छैःनिर्मलकपोलयोर्मूलाभ्यां गलितैरश्रुभिः केवलं रोदित्येवेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् । अत्र पतिरालम्बनविभावः, तदपराध उद्दीपनविभावः, रोदनादिरनुभावः, असूया व्यभिचारिभावः । एतैश्च ईर्ष्याविप्रलम्भशृङ्गारो व्यज्यते ॥उदा० ७५॥

यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते ॥उदा० ७६॥
त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥उदा० ७०॥

प्रवासविप्रलम्भमुदाहरति—प्रस्थानमित्यादिना । अमरुशतके प्रवत्स्यत्पतिकाया नायिकायाः स्वजीवितसम्बोधनपूर्विका सोपालम्भा उक्तिरियम् । मम प्रियतमे प्रवासं गन्तु निश्चयं कृतवति सति मम वलयैः प्रस्थानं तद्गमनात्पूर्वं विस्रंसनं कृतम्, मम दुःखे सहचारिभिः प्रियैः सखिभिरश्रुभिरपि निरन्तरं गतम्, धैर्येणापि क्षणमपि न स्थितम्, चित्तेनापि पूर्वमेव गन्तुं निश्चितम् एवं च सर्वे तव सुहृदः सहैव प्रस्थिता इति हे जीवित त्वयापि अवश्यं गन्तव्ये सति प्रियसुहृत्सार्थः किमिति त्यज्यते, त्वयापि तैः सहैव गन्तव्यमित्यर्थः । शार्दूलविक्रीडितं वृत्तम् । अत्र प्रियतम इति निर्दिष्टः प्रवासं गमिष्यन् पतिरालम्बनविभावः, प्रियस्य गमने उन्मुखता उद्दीपनविभावः, कार्श्यमश्रु चानुभावौ, चित्तस्य प्रियतमात् पुरोगमनाद् आवेगो मरणं च सूच्यमानं व्यभिचारिभावाः, एतैश्च प्रवासविप्रलम्भशृङ्गारो व्यज्यते ॥उदा० ७६॥

शापविप्रलम्भमुदाहरति—त्वामालिख्येत्यादिना । मेघदूते उत्तरमेघे यक्षस्योक्तिरियम् । शिलाफलके गैरिकादिभिर्यथोचितैरङ्गैः प्रणयकुपितां त्वाम् आलिख्य चित्रार्पितायास्ते चरणयोः पतितम् आत्मानं चित्रार्पितं कर्तुं यदा इच्छामि तस्मिन्नेव क्षणे मुहुः अस्रैः पुनः पुनः उद्गतैः दृष्टिरालुप्यते, ततश्च चित्रार्पितायास्तव चरणयोः पतितं चित्रार्पितमात्मानं कर्तुं न पारयामि, हन्त क्रूरं दैवं चित्रेऽप्यावयोः सङ्गमं न सहते इत्यर्थः । अत्यष्ट्यां छन्दसि मन्दाक्रान्ता वृत्तम् ।

केचन काश्मीरका इदं पद्यमीर्ष्याविप्रलम्भस्य मानविप्रलम्भापरपर्यायस्योदाहरणं मन्यन्ते, अभिनववाचस्पतिमिश्रस्तु अत्र पद्ये प्रवासविप्रलम्भ इति मन्यते. रुचक-श्रीधर-प्रभृतयस्तु अत्र शापविप्रलम्भत्वमेव समर्थयन्ते, अस्माकमपि प्रकरणपर्यालोचनगम्यशापविप्रलम्भत्वमेवेष्टम् । अत्र चोपपत्तिः प्रवासविप्रलम्भाच्च शापविप्रलम्भस्य विशिष्टतायाः प्रदर्शनेन पूर्वमेव सूचिता ।

अत्र यक्षप्रिया आलम्बनविभावः, मेघोदयादिरुद्दीपनविभावः, चित्रलेखनबाष्पमोक्षश्चानुभावः, दैवविषया असूया व्यभिचारिभावः; एतैश्च प्रकरणपर्यालोचनसहायैः शापविप्रलम्भशृङ्गारो व्यज्यते ॥उदा० ७७॥

तदेवं संभोगविप्रलम्भभेदेन द्विविधोऽपि शृङ्गाररसः प्रकाशितो विवृत्या । शृङ्गारं [illegible] तस्य तत्प्रसङ्गादन्यदपि प्रदर्शितं ग्रन्थकारेण ।

हास्यादीनां क्रमेणोदाहरणम्—

आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे ।
तारस्वरं प्रथितथूत्कमदात् प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्मा ॥ उदा० ७८ ॥

हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषो
धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ ।
इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिर-
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥ उदा० ७९ ॥

अथ हास्यरसध्वनिमुदाहरति—आकुञ्च्येत्यादिना । [illegible] उक्तिरियम् । [illegible] पूतानां जलानां कणैः प्रतिमन्त्रपदं सदैव वा पवित्रे मम शिरसि काचन वेश्या [illegible] अशुचि हस्तमाकुञ्च्य मुष्टीकृत्य तारस्वरयुक्तं प्रथितेन थूत् थू इतिशब्देन च युक्तं प्रहारमदात् हा हा हतोऽस्मि अहम् इति वदन् विष्णुशर्मा रोदितीत्यर्थः । शक्वर्यां छन्दसि वसन्ततिलका वृत्तम्, 'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् । अत्र विष्णुशर्मा आलम्बनविभावः, प्रहारदानदर्शनादिरुद्दीपन-विभावः, हासके प्रतीयमानाः कपोलस्पर्शनदृष्टिसङ्कोचादयोऽनुभावाः, अवहित्थादयो व्यभिचारिभावाः, एतैर्हास्यरसः सहृदये व्यज्यते ।

तत्र "आत्मस्थः परसंस्थश्चेत्यस्य भेदद्वयं मतम् । आत्मस्थो द्रष्टुरुत्पन्नो विभावेक्षणमात्रतः । हसन्तमपरं दृष्ट्वा विभावश्चोपजायते । योऽसौ हास्यरसस्तज्ज्ञैः परस्थः परिकीर्तितः ।" इत्युक्ते द्विविधे हास्यरसे हासकस्य तद्धासस्य च अनिबद्धत्वेऽपि "यस्य हासः स चेत् क्वापि साक्षान्नैव निबध्यते । तथाप्येष विभावादिसामर्थ्यादवगम्यते ।" इति वस्तुस्थितिरिति तथावदन्तं विष्णुशर्माणं विभावं द्रष्टुर्हासः प्रतीयते इति आत्मस्थ-हास्यरसोदाहरणमिदम् ॥ उदा० ७८ ॥

करुणरसध्वनिमुदाहरति—**हा मात**रित्यादिना । कस्यां चिदुत्तमायां [illegible] मृतायां दह्यमानायां पौराङ्गनानां विलपितस्य वर्णनमिदम् । भोः मातः कुत्र गन्तव्ये त्वरिताऽसि, किमिदं जातम्, [illegible] रक्षकाः भोः दैवताः दानतुष्टानां ब्राह्मणानां सुचिरजीवनाद्याशिषः क्व गताः, त्वयि गतायामपि अगतान् अस्माकं प्राणान् धिक्, अस्मासु अशनिः पतितः, तव अङ्गेषु हुतवहो लग्नोऽस्माकं दृशौ तद्दृश्यदर्शनपरितापाधिक्याद् दग्धौ जातौ' इत्येवं प्रकारेण प्रवर्तमानाः पौराङ्गनानां घर्घराश्च मध्ये मध्ये रुद्धाश्च सस्नेहाश्च विलापगिरः चित्रार्पितानपि जनान् रोदयन्तीव भित्तीरपि शतधा कुर्वन्तीवेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् । अत्र लोकान्तरगता नगर-माता आलम्बनविभावः, [illegible], रोदनमनुभावः, दैन्यग्लान्यादयो व्यभिचारिभावाः, एतैः शोकस्थायिभावकः करुणरसो व्यज्यते ॥ उदा० ७९ ॥

कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥ उदा० ८० ॥

क्षुद्राः सन्त्रासमेते विजहित हरयः क्षुण्णशक्रेभकुम्भाः
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥ उदा० ८१ ॥

रौद्ररसस्योदाहरणमाह—कृतमनुमतमित्यादिना । वेणीसंहारनाटके द्रोणवधेन क्रुद्ध-स्याश्वत्थाम्न उक्तिरियम् । कृतमनुमतं दृष्टं वा यैरिदं गुरु महापातकं यैर्निर्मर्यादैर्मनुजप-शुभिरुदायुधैर्भवद्भिः कृतम्, अथवा अन्येन कृतम् अनुमतम् अथवा अन्याय्यमपि तद् औदासीन्येन दृष्टं न तु तत्परिहाराय प्रयतितम्, नरकासुरशत्रुणा कृष्णेन सह भीमेन अर्जुनेन च सह तेषां कर्तुर्धृष्टद्युम्नस्य, अनुमन्तॄणां सात्यक्यादीनाम्, औदासीन्येन द्रष्टॄणामन्येषां च तत्रोपस्थितानां च रुधिरेण मेदसा मांसेन च अहमश्वत्थामा दिशां बलिं करोमीत्यर्थः । अत्र अपकारकारिणो भीमार्जुनादय आलम्बनविभावाः, अन्यायेन कृतं पितृवधादिकमुद्दीपनविभावः, प्रतिज्ञा अनुभावः, गर्वो व्यभिचारिभावः, एतैः क्रोधस्थायि-भावको रौद्ररसो व्यज्यते ॥ उदा० ८० ॥

वीररसस्योदाहरणमाह—क्षुद्राः सन्त्रासमित्यादिना । हनुमन्नाटके एकादशेऽङ्के इन्द्रजित उक्तिरियम् । हे क्षुद्राः वानराः, एते दृष्टदुरवस्था यूयं सन्त्रासं त्यजत, यतः इन्द्रहस्तिनो गण्डस्थलविदारणकारिणो मम सायकाः युष्माकं देहेषु पतन्तः सन्तो 'विद्धैरावतैरस्माभिर्वानरा अपि हन्त कथं वेद्धव्याः' इति लज्जन्ते, हे लक्ष्मण, त्वमपि निर्भयः सन् तिष्ठ यतो हि त्वमपि मम क्रोधस्य पात्रं नासि; अहं मेघनादः खलु मेघनादः; अहन्तु मत्पराक्रमानुरूपं शत्रुम् ईषद्भ्रूभङ्गलीलयैव जलनिधिमपि नियमितवन्तं रामं प्रहाराय अन्विच्छामि इत्यर्थः । **विजहत इति पारिखोपात्तः पाठः**, तथैवान्यैरपि बहुभिः सम्पादकैः स एव पाठ उपात्तः । **विजहित इति पारिखेण पाठान्तरटिप्पण्यां निक्षिप्तः पाठ**, किन्तु विजहत इति पाठोऽशुद्धः विजहित इत्येव शुद्धः पाठः इति स [illegible] । [illegible] (सूत्रवृत्ति) कामधेनौ तु विजहतु इति पाठः (३।२।१५) उपलभ्यते, सोऽपि शुद्ध एव, तथापि 'सौमित्रे तिष्ठ' इत्यत्र मध्यमपुरुषस्य प्रयुक्तत्वाद् अत्रापि मध्यमपुरुष-प्रयोग एव युक्त इति अस्माभिः 'विजहित' इत्येव पाठः स्वीकृतः । प्रकृत्यां छन्दसि स्रग्धरा वृत्तम् 'म्रभ्नैर्यानां त्रयेण त्रिमुनि यतियुता स्रग्धरा कीर्तितेयम्' इति लक्षणात् । अत्र राम आलम्बनविभावः, तत्कृतसमुद्रबन्धनादिरुद्दीपनविभावः, क्षुद्रेषूपेक्षा पराक्रम-शालिनि प्रतिस्पर्धा च अनुभावौ, गर्वो व्यभिचारिभावः, [illegible] वीर-रसोऽभिव्यज्यते ॥ उदा० ८१ ॥

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ उदा० ८९ ॥

तत्र उत्साहविषयाणां दया-रण-दानानां भेदात् त्रिधा वीररस इति धनञ्जयः, दान-धर्म-युद्ध-दयानां भेदाच्च चतुर्धा स इति विश्वनाथः, उत्साहविषयवैशिष्ट्यात् पाण्डित्य-क्षमा-बलवीरादयोऽन्येऽपि वीररसस्य शृङ्गारस्येव प्रकारा निरूपयितुं शक्यन्ते इति जगन्नाथः । उदाहरणानि तु तेषामेव ग्रन्थेभ्यो वेदितव्यानि ।

भयानकरसध्वनिमुदाहरति—ग्रीवाभङ्गेत्यादिना । अभिज्ञानशाकुन्तले प्रथमेऽङ्के दुष्यन्तेन कृतं भीतमृगवर्णनमिदम् । अनुधावति रथे ग्रीवाया वक्रीभावेन रमणीयं यथा स्यात् तथा मुहुर्दत्तदृष्टिः बाणपातभीत्या स्थूलेन शरीरपश्चाद्भागेन पूर्वकायं प्रविष्टः कुञ्चिताङ्गः श्रमेण विवृताद् मुखाद् भ्रष्टैः अर्धचर्वितैर्दर्भैः वर्त्म व्याकीर्णं कुर्वन् अयं मृगः उदग्रोत्प्लुतत्वाद् बहुतरम् आकाशे भूमौ स्तोकमेव याति, एतत् पश्येत्यर्थः । प्रकृत्या छन्दसि स्रग्धरा वृत्तम् । अत्र पश्चाद् आगच्छन् राजस्यन्दन आलम्बनविभावः, स्यन्दनस्य अनुसरणम् उद्यतो बाणश्चोद्दीपनविभावौ, ग्रीवाभङ्गपूर्वकं कृतं भयहेतौ मुहुर्मुहुर्दृष्टिदानम्, पलायनम्, कुञ्चिताङ्गत्वं च अनुभावाः, शङ्कात्रासश्रमादयो व्यभिचारिभावाः, एतैर्भय-स्थायिभावको भयानकरसो व्यज्यते इति ग्रन्थकृतोऽस्याभिप्रायः सम्भाव्यते ।

अत्र शिङ्गभूपालादयः केचन तिर्यग्विषयत्वाद् भयस्य भयानकस्य न रसता किन्तु रसाभासतैवेति मन्यन्ते, गोकुलनाथस्तु इदं वास्तवभयप्रकृतिकस्य भावस्यैवोदाहरणं दिक्प्रदर्शनायेति मन्यते, राजचूडामणि–विद्यानाथादयस्तु तिर्यग्विषयत्वेऽपि भयानकस्य रसत्वमेव मन्यन्ते । लावकसम्बन्धिभयप्रकृतिकं भयानकं रसमुदाहरता जगन्नाथेनापि इत्थ-मेव स्वीकृतम् ।

अत्रेदं सम्प्रधारणीयम्—वास्तविकभयप्रकृतिको भयानकरसो भवति न वा, तिर्यक्सम्ब-न्धिभयप्रकृतिको भयानकरसो भवति न वेति च । तत्र "विकृतरवसत्त्वदर्शनसङ्ग्रामारण्य-शून्यगृहगमनात् । गुरुनृपयोरपराधात् कृतकश्च भयानको ज्ञेयः ॥ गात्र-मुख-दृष्टिभेदैरू-रुस्तम्भाभिवीक्षणोद्वेगैः । सन्नमुखशोषहृदयस्पन्दनरोमोद्गमैश्च भयम् ॥ एतत् स्वभावजं स्यात्, सत्त्वसमुत्थं तथैव कर्तव्यम् । पुनरेभिरेव भावैः कृतकं मृदुचेष्टितं कार्यम्" इत्यानुवं-श्यार्योल्लेखपूर्वकं मुनिना भरतेन वास्तव-कृतकोभयविधभयप्रकृतिकस्य भयानकस्याभिनेय-त्वस्य षष्ठेऽध्याये वर्णितत्वाद् भावाध्यायेऽपि स्थायिभावगणनाप्रसङ्गे वास्तविक-भयस्याप्युपादानाद् वास्तविकभयप्रकृतिकस्यापि भयानकरसस्य साम्प्रदायिकत्वं दुरपह्नव-मेवेति वास्तविकभयप्रकृतिको भयानको नास्तीति वदता गोकुलनाथेन साहसिकत्वमेव केवलं प्रदर्शितम् । [illegible] भयानको भवत्येव । कृतकभयप्रकृतिक-

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा—
न्यंसस्फिक्पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्काद्
अङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥ उदा० ८३॥
चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः।
लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः॥ उदा० ८४॥

भयानकोदाहरणं तु गोकुलनाथोक्तं साधु एव, तद् यथा—"[illegible]हितपक्ष्म प्रेक्षणं [illegible]विन्दम्। जनकनतिपुरस्नाद् आस्त हस्तावसक्त-[illegible] रामभद्रः" इति। तिर्यक्सम्बन्धिभयप्रकृतिकस्य भयानकस्य रसत्वन्तु [illegible] रसभोगस्य स्वीकारे नैव स्वीकर्तव्यम्, तिर्यक्षु सहृदयस्य स्वात्मप्रवेशने काठिन्यात्, तत्र भयस्य रसीभावाभावेऽपि भयं [illegible] चर्वणीयतां प्राप्नोति इति भयानकाभासतैव तत्र युज्यते। ये तु रसस्य विभावादि-[illegible]त्वं न स्वीकुर्वते केवलस्य स्थायिनो भुक्तिमेव रसं मन्यन्ते तेषां मते तु [illegible] विभावादिप्रतीतेरभावात् [illegible] भयानकादे रसता स्यात्। मम्मटेन तु विभावादिजीवितावधिकं रसं सिद्धान्तयता केनाऽभिप्रायेण **ग्रीवाभङ्गे**त्यादिपद्यं [illegible] देवा एव ज्ञातुमर्हन्ति। रसभोगाद् भावस्य रसाभावस्य च भोगे वैशिष्ट्यं भावनिरूपणे रसाभासनिरूपणे च वक्ष्यामः॥ उदा० ८२॥

[illegible]—**उत्कृत्योत्कृत्ये**त्यादिना। मालतीमाधवप्रकरणे पञ्चमेऽङ्के श्मशाने प्रेतरङ्कं दृष्टवतो [illegible]। दरिद्रः प्रेतः आदौ चर्म (छालम्) उत्पाट्य उत्पाट्य ततश्च पृथुना उच्चयेन बहुलानि अंसयोः, स्फिचोः, पृष्ठे, पिण्डिकयोस्तदन्येष्वपि अवयवेषु सुलभानि [illegible] मांसानि भुक्त्वा, **आत्तानि** गृहीतानि [illegible] नयनगोलकानि येन तादृशः सन् [illegible] दैन्याद् दंष्ट्राश्च प्रकटयन् सन् अङ्के स्थापिताद् नरास्थिपञ्जराद् अस्थिन दृढं संलग्नं निम्नोन्नते अस्थिपुटे स्थितमपि शवमांसं निष्कृष्य क्रमेण अत्तीत्यर्थः। प्रकृत्यां छन्दसि स्रग्धरा वृत्तम्। अत्र कुथितः पूतिगन्धिः शव आलम्बनविभावः, तच्चर्मोत्पाटनादय उद्दीपनविभावाः, आक्षिप्ते तद्द्रष्टरि प्रतीयमाना [illegible]नेत्रनिमीलन-[illegible], उद्वेगादयो व्यभिचारिभावाः, एतैरत्र जुगुप्सास्थायिभावको बीभत्सरसो व्यज्यते। जुगुप्सा चाऽत्र [illegible] आक्षिप्ते जुगुप्समाने प्रतीतैव साधारण्येन चर्व्यमाणा भवति। "उत्कृत्योत्कृत्य कृत्तिमित्यादौ पुनरुद्वेगी बीभत्सः प्रकृते भाव एव दिक्प्रदर्शनाय निदर्शित इति स्मर्तव्यम्" इति गोकुलनाथः। धनिकोक्तं शुद्धबीभत्सोदाहरणं—"लालां वक्त्रासवं वेत्ति मांसपिण्डौ पयोधरौ। मांसास्थिकूटं जघनं जनःकामग्रहातुरः" इति पूर्वमुक्तमप्यत्रानुसन्धेयम्॥ उदा० ८३॥

[illegible]—**चित्रं महा**नित्यादिना। लोकोत्तरपुरुषदर्शने कस्य चिदु-

व्यभिचारिणो ब्रूते—

मू० ४८ निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ ३० ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ॥ ३१ ॥

अनादर्तव्या इति बुद्धिः परिपाकं गता वासनारूपेण स्थिता विषयेभ्यो निर्वृत्तिं जनयन्ती **निर्वेदः** स च शान्तरसस्थायिभाव इति वक्ष्यति । विश्वनाथेन तु रत्यादिलक्षणानि इत्थमुक्तानि— 'रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितम्, वागादिवैकृताच्चेतोविकासो **हास** इष्यते, इष्टनाशादिभिश्चेतो वैक्लव्यं **शोक**शब्दभाक्, प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः **क्रोध** इष्यते, कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते, रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं **भयम्** दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा, विविधेषु पदार्थेषु लोकसीमातिवर्तिषु, विस्फारश्चेतसो यस्तु स **विस्मय** उदाहृतः, **शमो** निरीहावस्थायां स्वात्मविश्रामजं सुखम्" इति (३।१७६-१८०)।

ननु कथमेते एव स्थायिभावाः? अत्राह आचार्योऽभिनवगुप्तः —"स्थायित्वञ्चैतावतामेव, जात एव हि जन्तुरियतीभिः संविद्भिः परीतो भवति, तथा हि—'दुःखसंश्लेषविद्वेषी सुखास्वादनसादरः' इति न्यायेन सर्वो रिरंसया व्याप्तः, स्वात्मनि उत्कर्ष (उत्कृष्ट) मानितया परमुपहसन्, अभीष्टवियोगसन्तप्तः, तद्धेतुषु कोपपरवशः, अशक्तौ च ततो भीरुः, किञ्चिदर्जयितुमिच्छुरपि अनुचितवस्तुविषयवैमुख्यात्मकतयाऽऽक्रान्तः, किञ्चिदनभीष्टतयाऽभिमन्यमानः, तत्तत्स्वपरकर्तव्यदर्शनसमुदितविस्मयः, किञ्चिच्च जिहासुरेव जायते । नह्येतच्चित्तवृत्तिशून्यः प्राणी भवति, कस्यचित् काचिदधिका चित्तवृत्तिः काचिदूना" इति ।

स्थायिभावलक्षणन्तु—"अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः । आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः" इति विश्वनाथेनोक्तम् (३।१७४); "विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः । आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः" इति धनञ्जयेनोक्तम् (४।३४)। आचार्याभिनवगुप्तमतानुसारं तु मनुष्याणां साधारण्यप्रकर्षानुगमनात् चित्तवृत्तय एव वासनात्मतयाऽनेकजन्मस्थायित्वात् सहजत्वाद् वा स्थायिभावा उच्यन्ते । ॥ ४७ ॥

व्यभिचारिभावानाह—**निर्वेदग्लानीत्यादिना** । इमा अपि कारिकाः भरतीया एव । **व्यभिचारिभावसामान्यलक्षणन्तु**—विविधमाभिमुख्येन रसेषु चरन्ति इति व्यभिचारिणः, वागङ्गसत्त्वोपेताः प्रयोगे रसान्नयन्तीति व्यभिचारिण इति मुनिना भरतेन उक्तम्; "विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः । स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ" इति धनञ्जयेन उक्तम् (४।७)। निर्वेदादिलक्षणानि तु—तत्त्वज्ञानजन्या विषया अनादर्तव्या इतिबुद्धिः परिपाकं गता, वासनात्मतया स्थिता विषयेभ्यो निर्वृत्तिं जनयन्ती

[illegible] स्वात्मत्राणेच्छा स्वान्तत्राणनं रम्भजनिका त्रासः। सन्देह-[illegible] वितर्कः। इत्येते व्यभिचारिणो ज्ञेयाः। अमी त्रयस्त्रिंशत्सङ्ख्याका व्यभिचारिभावाः नामनिर्देशमात्रेणोक्ता इति कारिकार्थः। अस्मा-भिस्तु [illegible] नेषां स्वरूपाण्यपि गद्यवाक्यैर्निर्दिष्टानि। एतेषां लक्षणानि सङ्क्षेपेण पद्यवाक्यैरुक्तानि यथा—"तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम्। तत्र चिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वासदीनता ॥ ४।९ ॥ रत्याद्यायासतृट्क्षुद्भिर् ग्लानिर् निष्प्राणतेह च [illegible] ॥ ४।१० ॥ अनर्थप्रतिभा शङ्का परक्रौर्यात् स्वदुर्नयात्। कम्पशोषाभिवीक्षादिरत्र वर्णस्वरान्यता ॥ ४।११ ॥ [illegible]। दोषोक्त्यवज्ञे भ्रुकुटिमन्युक्रोधेङ्गितानि च । ४।१३। हर्षोत्कर्षो मदः पानात् स्खलदङ्गवचोगतिः। निद्रा हासोऽत्र रुदितं ज्येष्ठ-मध्याधमादिषु ॥ (४।२१-२२) श्रम खेदोऽध्वरत्यादेः स्वेदोऽस्मिन् मर्दनादयः। (४।१२) आलस्यं श्रमगर्भादिर्जाड्यं जृम्भासितादिमत्। (४।२७)। दौर्मत्याद्यैरनौजस्यं दैन्यं कार्ष्ण्यमृजादिमत्। ४।१४। । ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत् ॥ (४।१६)। मोहो विचित्तता भीतिदुःखावेशानुचिन्तनैः। तत्राज्ञानभ्रमाघातघूर्णनादर्शनादयः ॥ (४।२६)। सदृशज्ञानचिन्ताद्यैः संस्कारात् स्मृतिरत्र च। ज्ञातत्वेनार्थभासिन्या भ्रूसमुन्नम-नादयः ॥ (४।२०)। सन्तोषो ज्ञानशक्त्यादेर्धृतिरव्यग्रभोगकृत् (४।१९) ॥ दुराचारा-दिभिर्व्रीडा [illegible]। साचीकृताङ्गावरणवैवर्ण्याधोमुखादिभिः (४।२४) ॥ मात्सर्यद्वेषरागादेश्चापलं त्वनवस्थितिः। तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः। (४।-३३)। प्रसत्तिरुत्सवादिभ्यो हर्षोऽश्रुस्वेदगद्गदाः (४।१४) ॥ आवेगः संभ्रमस्तत्र हर्षजे पिण्डिताङ्गता। उत्पातजे स्रस्तताऽङ्गे धूमाद्याकुलिताग्निजे राजविद्रवजादेस्तु शास्त्रना-गादियोजनम्। [illegible] पांस्वाद्याकुलितानिलात्। इष्टाद् हर्षाः शुचोऽनिष्टाज् ज्ञेयाश्चान्ये यथायथम् (इदं विश्वनाथस्य ३।१४३-४५)। अप्रतिपत्तिर्जडता स्यादिष्टा-निष्टदर्शनश्रुतिभिः। अनिमिषनयननिरीक्षण तूष्णींभावादयस्तत्र (४।१३) ॥ गर्वोऽभि-[illegible] । कर्माण्याधर्षणावज्ञा सविलासाङ्गवीक्षणम् (४।१९) प्रारब्ध-[illegible] विषादः सत्त्वसंक्षयः। निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् (४।३१)। कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसंभ्रमैः तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः। (४।३०)। मनःसम्मीलनं निद्रा चिन्तालस्यक्लमादिभिः। तत्र [illegible]-स्वप्नतादयः। (४।२३)। आवेशो ग्रहदुःखाद्यैरपस्मारो यथाविधि। भूपातकम्पप्रस्वेदला-लाफेनोद्गमादयः (४।२५)। सुप्तं निद्रोद्भवं तत्र श्वासोच्छ्वासक्रिया परम् (४।२२)। विबोधः परिणामादेस्तत्र जृम्भाक्षिमर्दने (४।२४)। [illegible] रमर्षोऽभिनिविष्टता। [illegible] (४।१८)। लज्जाद्यैर्विक्रिया गुप्तौ अवहित्थाऽङ्गवि-क्रिया (४।२९)। [illegible] चण्डत्वमुग्रता। तत्र स्वेदशिरःकम्पतर्जनाताड-नादयः (४।१५)। भ्रान्तिच्छेदोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः (४।२७)। व्याधयः

निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽपि उपादानं व्यभिचारित्वेऽपि स्थायिताभिधानार्थम् । तेन—

(सू० ४९) **निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।**

सन्निपाताद्यास्तेषामन्यत्र विस्तरः (४।२९) । [illegible] सन्निपातग्रहादिभिः । अस्मिन्नवस्था [illegible]दयः (४।३०) । शराद्यैर्**मरणं** जीवत्यागोऽङ्गपतनादिकृत् (इदं विश्वनाथस्य ३।१५५) । गर्जितादेर्मनःक्षोभस्त्रासोऽत्रोत्कम्पनादयः (४।१६) । (वि)**तर्को** विचारः सन्देहाद् [illegible] (४।२९) इति । तत्र त्रयस्त्रिंशदिति गणना प्रायिकी दयाकैतवादीनामन्येषामपि भावानां काव्ये रसाभिव्यञ्जकतया निबन्धुं शक्यत्वाद् रत्यादीनामपि रसान्तरे व्यभिचारिताया दर्शनाद्, मुनिना च प्रधानतोऽभिनेयानाम् अभिनयदिशः प्रदर्शनायैव तावतां गणितत्वात् । धनिकस्तु—"अन्ये च चित्तवृत्तिविशेषा एतेषामेव विभावानुभावस्वरूपानुप्रवेशान्न पृथग्वाच्याः ।" इति मन्यते ।

अत्रेदमप्याकलनीयम्—"सम्भोगशृङ्गारे आलस्यौग्र्यजुगुप्सावर्जं सर्वे व्यभिचारिणो बोध्याः, विप्रलम्भे तु आलस्यग्लानिनिर्वेदश्रमशङ्कानिद्रौत्सुक्यापस्मारसुप्तविबोधोन्मादजाड्यासूयाः । [illegible] । करुणे [illegible] । रौद्रे स्मृति स्वेदावेगा[illegible] । वीरे धृतिमतिगर्वावेगामर्षहर्षोग्रतारोमाञ्चाः । भयानके [illegible]मूर्छाः । बीभत्सेऽपस्मारमतिव्याधिमोहावेगगर्ववैवर्ण्यानि । अद्भुते स्तम्भरोमाञ्चस्वेदगद्गदाश्रुविभ्रमाः । एवं स्थायिनोऽपि व्यभिचरन्ति, हास्यः शृङ्गारे वीरे च, रतिहासकरुणशान्तेषु, क्रोधो वीरे, भयं शोकशृङ्गारयोः, जुगुप्सा भयानके शान्ते च, विस्मयः सर्वेषु रसेषु, उत्साहो रौद्रहास्ययोरिति" नागेशेन उक्तम्. [illegible]ग्रन्थानुसारि चेदम् ॥ ४८ ॥

अमङ्गलप्रायत्वेन प्रथमनुपादेयस्यापि निर्वेदस्य भरतीयासु [illegible] प्रथममुपादानं काकाक्षिगोलकन्यायेन [illegible] स्थायिभावेषु अनन्तरोक्तेषु व्यभिचारिभावेषु चोभयत्र निर्वेदस्य समावेशाय । तस्माद् निर्वेदस्थायिभावकः शान्तनामको नवमोऽपि रस [illegible]—**निर्वेदस्यामङ्गलप्रायस्ये**त्यादिना । स्थायिभावरूपनिर्वेदस्वरूपं [illegible] प्रतिपादितम् । तच्च शममूलं शमरूपमेव वा । एवं च पूर्वोक्ता अष्टौ अयं नवमश्चेति आहत्य नव रसा भरताभिनवगुप्तादिसम्मता सन्तीति भावः ॥

अत्रेदं सम्प्रधारणीयम्—नवैव काव्यनाट्यरसा उत अधिका अपीति । अत्र **द्रुहिणभरतप्रभृतय** आहुः—यद्यपि सुखात्मा रस एक एव तथापि रत्याद्युपाधिभेदाद् भिन्नत्वेन व्यवह्रियमाणाः शृङ्गारादयोऽष्टौ नाट्ये रसा इति; **दण्डी तु**—"इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम्" (काव्यादर्शे १।२९२) इति वदन् काव्येऽपि अष्टा-

वेव रसान् मेने उद्भटस्तु— "शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः" (काव्यालङ्कारसारसङ्ग्रहे ४।४) इति वदन् नाट्ये नवरसान् उवाच, रुद्रटस्तु— "शृङ्गारवीरकरुणा बीभत्सभयानकाद्भुता हास्यः । रौद्रः शान्तः प्रेयानिति मन्तव्या रसाः सर्वे । रसनाद् रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः । निर्वेदादिष्वपि तन्निकाममस्तीति तेऽपि रसाः" (१२।३-४) इति वदन् दश रसान् स्फुटं प्रतिपादयाञ्चकार अन्यानपि रसान् सूचयामास; **धनञ्जयस्तु** नाट्ये अष्टावेव काव्ये नवैव रसान् अनुमेने (४।३५-३६), "प्रीतिभक्त्यादयो भावा मृगयाक्षादयो रसाः । हर्षोत्साहादिषु स्पष्टमन्तर्भावान्न कीर्तिताः" (४।८३) इति वदन् प्रीतिभक्त्यादिरसांश्च निरास; **अभिनवगुप्तस्तु**—अभिनवभारत्यां षष्ठाध्यायान्ते काव्ये नाट्ये च नवैव रसान् मन्यमानोऽपि नाट्येऽपि शान्तस्यापि रसत्वं च व्यवातिष्ठिपत्, आर्द्रतास्थायिकस्नेहरसो गर्धस्थायिकलौल्यरसो भक्तिरसश्च [illegible] खण्डितास्तेन; **भोजस्तु**—अष्टौ स्थायिभावान् (सरस्वतीकण्ठाभरणे ५-१४) द्वादश रसान् (५।१६४) उल्लिखन्नपि "रसोऽभिमानोऽहङ्कारः शृङ्गार इति गीयते । योऽर्थस्तस्यान्वयात् काव्यं कमनीयत्वमश्नुते" (५।१) इति वदन् स्वात्मानन्दभोगरूपमेकमेव रसं मेने. 'रसस्य तिस्रः कोटयः; तत्रावरायां कोटौ रत्यादयो भावाः विभावानुभावादिभिः रत्यादेः रसीभावो मध्यमा कोटिः, तत्र एकोनपञ्चाशता भावैरेकोनपञ्चाशद् रसाः, सर्वेषां भावानां परिणामेन जायमानो य आनन्दः स एव रस इति परस्यां कोटौ एक एव रसः' इत्यपि तस्याभिप्रायो विज्ञायते (सरस्वतीकण्ठाभरणे जीवानन्दसंस्करणे, पृ० ७५९), **रामचन्द्रगुणचन्द्रौ तु** आसक्तिस्थायिकं व्यसनम् अरतिस्थायिकं दुःखं सन्तोषस्थायिकं सुखं च रसत्वेन समर्थयाञ्चक्रतुः, **विश्वनाथस्तु**—वत्सलमेव दशममतिरिक्तं रसं सञ्जग्राह, रसतरङ्गिणी-रसमञ्जरीनाम्नो रसग्रन्थयोः कर्ता **भानुदत्तस्तु** मिथ्याज्ञानस्थायिभावकं सांसारिकभोगार्जकधर्माधर्मविभावकं [illegible] प्रवृद्धां मिथ्याज्ञानवासनामुपजीवितारं मायारसम् आविश्चकार, स्पृहास्थायिभावकं कार्पण्यरसञ्चोल्लिलेख, **रूपगोस्वामी तु** शान्ति-प्रीति-प्रेय-वात्सल्य-मधुररतिस्थायिभावकान् शान्त-प्रीत-प्रेयो-वत्सल-मधुराख्यान् भक्तिरसानेव मुख्यान् हास्यादींस्तु गौणान् रसान् मेने, केचनाधुनिकास्तु—प्रकृतिसौन्दर्यालम्बनं प्रकृतिरतिस्थायिभावकं प्रकृतिरसं, स्वदेशालम्बनं देशप्रेमस्थायिभावकं स्वदेशाभिमानस्थायिभावकं वा देशभक्तिरसम् क्रान्तिरसम् अन्यायानाचारद्वेषरसम् उद्वेगरसं वा, सहानुभूतिस्थायिभावकं पीडितवर्गालम्बनकं पीडितवर्गविपत्त्युद्दीपनकम् आवेगामर्षकारुण्यादिव्यभिचारिभावकं [illegible], तथा अन्यानपि नैराश्य-जीवनयात्रिकञ्चिद्भावादीन् रसान् स्वीकुर्वते । **वयन्तु** रुद्रटोक्तं 'शृंगारवीरकरुणा बीभत्सभयानकाद्भुता हास्यः । रौद्रःशान्तः प्रेयानिति मन्तव्या रसाः सर्वे । रसनाद् रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः । निर्वेदादिष्वपि तन्निकाममस्तीति तेऽपि रसाः ॥" (१२।३-४) इति, रुद्रटानुयायिभिः साधूक्तम्— "निर्वेदादिष्वपि (निर्वेदादिषु व्यभिचारित्वेन गणितेषु अपि) तद् रसनं निकाममस्तीति

यथा—

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ उदा० ८५ ॥

(सू० ५०) **रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः ॥ ३४ ॥**

भावः प्रोक्तः—

हेतोस्तेऽपि रसा ज्ञेयाः, यस्य तु परिपोषं न गतास्तस्य भावा एव ते । अयमाशयो ग्रन्थकारस्य यद्-उत नास्ति सा कापि चित्तवृत्तिर्या परिपोषं गता न रसीभवति, भरतेन सहृदयावर्जकत्वप्राचुर्यात् सञ्ज्ञा (लोकप्रसिद्धिं ?) चाश्रित्य अष्टौ नव वा रसा उक्ता इति" इति च अनुमन्यमाना **भणामः**—शुद्धा मिश्रा वा सर्वाऽपि चित्तवृत्तिः परिपोषं गता रसीभवितुं शक्नोतीति नास्तीयत्ता रसानाम्; पुरुषार्थोपयोगित्वेन, रञ्जनाधिक्येन, मनुष्यमात्रास्वाद्यत्वेन, अभिनेयत्वेन च मुनिना भरतेन तु अष्टौ नव एव वा रसास्तत्तदभिनयशिक्षासहिता नाट्ये निबन्धनीयत्वेनोपदिष्टाः । [illegible]-जयदेवविश्वनाथजगन्नाथादिभिस्तु स्वाभिप्रायविशेषप्रकाशनमन्दादरैः काव्येऽपि शृङ्गारादयोऽष्टौ नव दश एव वा रसा इत्युक्तम् । तत्र यदि तेषां यथायथं रति-हास-शोक-क्रोधोत्साह-भय-जुगुप्सा-विस्मय-निर्वेदानामेव चित्तवृत्तीनां रसीभावः सम्भवति, अन्यासां तु कदाऽपि कथमपि कस्यापि कृते रसीभावो नैव [illegible] परम्परानुधावनमात्रतत्परास्ते अनादर्तव्या एव; भगवद्भक्तेषु भगवद्विषयाया रतेः, अपत्यवताम् अपत्यविषयाया रतेः, देशभक्तेषु स्वदेशविषयाया ओजस्विन्या रतेः, सैनिकेषु स्वामिविषयाया रतेः, समुचिते देशे काले परिस्थितौ च आश्रयविशेषेषु उक्तलक्षणयोरुद्वेगप्रक्षोभयोः नैराश्यस्य, ग्लानि-शङ्का-असूया-दैन्य-धृति-गर्व-अमर्ष-वितर्कादीनां च चित्तवृत्तीनां रसीभावस्य मुनिवचनगतेनापि [illegible]; यदि तु अन्यासामपि चित्तवृत्तीनां सम्भवत्यपि रसीभावे रति-हास-क्रोधोत्साह-भय-जुगुप्सा-विस्मय-निर्वेदानां रसत्वमुपनीय यथौचिति निबन्धने काव्यं सदा सर्वेभ्यश्च सहृदयेभ्यो रोचते, सर्वस्य लोकस्याऽनुरञ्जकं भवति, पुरुषार्थोपदेशोपयोगि च भवति, कवेश्च शाश्वतं यशस्तनोति, अतः पुरुषार्थोपदेशपरैः लोकानुरञ्जनतत्परैः शाश्वतं यशो लिप्सुभिः शृङ्गारादयो नव रसा यथौचिति यथास्थानं काव्येषु निबन्धनीया इत्येतावानेव [illegible] तेऽपि [illegible] । तेषामेतादृशमभिप्रायं कल्पयितुमसमर्थाः केचनाऽर्वाचीनास्तु स्वाशङ्कितं तेष्वारोप्य वृथैव तानतीवोपालभन्ते । वयन्तु शृङ्गार-वीर-शान्तानेव उक्तविधैः कविभिः काव्येषु यथौचिति यथास्थानं परिपोष्य निबन्धनीयान्, हास्य-रौद्र-करुणादींश्च उक्तानां त्रयाणां रसानामङ्गत्वेन निबन्धनीयान् रसान् मन्यामहे । तात्कालिकं यशो लिप्सुभिः कविभिस्तु मुक्तकादौ तु तत्तत्समये परिस्थितिविशेषे च रसनीयाः सर्वा अपि चित्तवृत्तयो रसत्वमुपनीय यथौचिति निबन्धनीया एवेति च ।

एवमन्यदप्युदाहार्यम् ।
[अङ्गिनो] व्यभिचारी यथा—
जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः ।
नो यावत् परिरभ्य चाटुकशतैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रः कृतः ॥ उदा० ८८ ॥
अत्र विधिं प्रति असूया ।

पुषा एकीभूतमिति महामृतम् इवातिप्रियम्, भवता मूर्ध्ना उपात्तं चन्द्रकलामृतम् अमृतमपि यदि भवद्वपुषो भेदेन वृत्तिः (स्थितिः) यस्य तथाभूतं सद् भवद्वपुषो भेदेन अवभासते तदा तद् मह्यं न रोचते इत्यर्थः । त्रिष्टुभिच्छन्दसि रथोद्धता वृत्तम् "रात्परैर्नरलगै रथोद्धता" इतिलक्षणात् । अत्र महेश्वरः आलम्बनम् प्रतीयमानम् अव्याहतमैश्वर्यमुद्दीपनम्, स्तुतिरनुभावः, धृतिहर्षादयो व्यभिचारिणः, एतैः पूर्वोक्तलक्षण-भावरूपा भक्त्यपरपर्याया देवविषया रतिर्व्यज्यते इति मम्मटस्याशयः एवं च भावध्वनि-काव्यमिदम् ॥ उदा० ८६ ॥

मुनिविषयां रतिमुदाहरन्ति—हरत्यघमित्यादिना । शिशुपालवधे (माघकाव्ये) प्रथमे सर्गे नारदं प्रति श्रीकृष्णस्येयमुक्तिः । हे मुने, भवदीयं दर्शनं जातं सत् वर्त-मानकाले पापं हरति, भविष्यति काले आगामिनः कल्याणस्य हेतुर्भवति, तद् दर्शनं भूतकाले कृतैः पुण्यैर्जनितं भवतीति च तद्दर्शनं देहिनां कालत्रितयेऽपि अभीष्टार्थभोग-योग्यतां प्रकाशयतीत्यर्थः । जगत्यां छन्दसि वंशस्थं (वंशस्थविलं) वृत्तम् । अत्र मुनिरा-लम्बनम्, तत्प्रभाव उद्दीपनम्, गुणानुवादोऽनुभावः, हर्षो व्यभिचारी, एतै रसीभावा-भावेऽपि स्वदमानत्वेन (आस्वाद्यत्वेन) रतिर्व्यज्यते इति भावः ॥ उदा० ८४ ॥

एवमेव गुरु-नृप-पुत्रादिविषया रतिरप्युदाहर्तव्येत्याह—एवमन्यदित्यादिना ।

प्राधान्येन व्यञ्जितं व्यभिचारिणमुदाहरन्ति—**जाने कोपपराङ्मुखीत्यादिना** । वियु-क्तस्य कस्यचिदुक्तिरियम् । हे भ्रातः, अद्य स्वप्ने मया प्रणयकोपेन पराङ्मुखी सती 'मा मां संस्पृश' इति पाणिना सूचयन्ती, रुदती, मयि अनुगच्छति सति अग्रे-अग्रे गन्तुं प्रवृत्ता प्रियतमा दृष्टा; तादृशी प्रियतमां परिरभ्य चाटुकोक्तिभिः आश्वासयितुं समुत्सुके किन्तु ममाश्वासयितुमप्राप्तवत्येव मयि चिरवियोगं कारयता स्वप्नेऽपि मम प्रियासङ्गमम् असहमानेन अकारणमेव प्रच्छन्नतया पराहितकारिणा शठेन विधिना अहं निद्रादरिद्रः (भग्ननिद्रः) कृत इति निश्चिनोमीत्यर्थः । अतिधृत्यां छन्दसि शार्दूलविक्रीडितं वृत्तम् । अत्र विधिरालम्बनम्, तत्कार्यमुद्दीपनम्, शठत्वोक्तिरनुभावः, एतैश्च रसीभावाभावेऽपि प्राधान्येन स्वदमानत्वेन असूया व्यज्यते इत्यभिप्रायेणाह—**अत्र विधिं प्रत्यसूयेति** । अत्र यद्यपि विप्रलम्भशृङ्गारोऽपि व्यज्यत एव तथापि प्राधान्येन व्यञ्जिता असूया एव अधिक-तरचमत्कारकारित्वेन काव्यविशेषव्यपदेशहेतुर्भवतीति वृत्तिकारस्य आकूतविशेषो बोध्यः (उदा० ८५) ॥ ५० ॥

सू० ५१ तदाभासा अनौचित्यप्रवर्तिताः ।

तदाभासा रसाभासा भावाभासाश्च ।

तत्र रसाभासो यथा—

स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे ।
सुलग्ने को जातः शशिमुखि यमालिङ्गसि बलात्
तपःश्रीः कस्यैषा मदननगरि ध्यायसि तु यम् ॥ उदा० ८९ ॥

अथ रसाभास-भावाभासौ निरूपयितुम् । असंलक्ष्यक्रमव्यङ्ग्येषु रसाभास-भावाभासावपि गणितावित्ति क्रमप्राप्तौ तावत्र निरूपयति—तदाभासा इत्यादिना । अनौचित्येन प्रवर्तिता रत्यादयः शृङ्गारादिस्थायिभावाः ग्लान्यादयश्च भावा यथाक्रमं रसाभासा भावाभासाश्चेत्यर्थः ॥

रसाभासस्वरूपं भावाभासस्वरूपं च मूलग्रन्थकृता स्फुटतया अप्रतिपादितमपि बहुभिरन्यैर्व्याख्याकारैरनाविष्कृतरहस्यं यस्य तादृशमपि अभिनवभारत्यादिग्रन्थपर्यालोचनसहकृतया स्वमनीषया निरूप्यते । **आश्रयालम्बनादीनामनुचितत्वेऽपि काव्यनाट्यप्रभावेण साधारणीभावात्** सहृदयहृदयसंवादेन **सहृदयेन आस्वाद्यमाना** सहृदयवासनामूल**वाद्र्याद् भावास्वादनकक्षामतिशयानाऽपि** सहृदयनिष्ठालम्बनानौचित्यबुद्धिवासनाविघ्नात् [illegible] **तत्तदालम्बनादौ रत्याद्यसम्भावनासंस्कारविघ्नाद् वा** तत्तद्वासनानुदयेन अस्वसंवेद्यविरोधानपूर्वकस्वादनिर्भरीभावाविर्भावनसामर्थ्यम**प्राप्ता अत एव रसीभावमगता तत्तदाश्रयत्वेन तत्तदालम्बनत्वेन च काव्यनाट्ययोरुपनिबद्धा** रत्यादिचित्तवृत्तिः **रसाभासः** । अनौचित्यञ्च [illegible] प्रकृतिव्यवहारादेः प्रपञ्चजातस्य तस्य तस्य लोकसिद्धं क्वचिच्छास्त्रसिद्धमपि यद् उचितद्रव्यगुणक्रियादि तद्भिन्नत्वम् । इदञ्च अनौचित्यं देशकालपरिस्थितिसहृदयविशेषसापेक्षमेव । रसाभासस्यापि रससमकक्षकास्वादजनकत्वं प्रतिपादयन् "न ह्यनुचितत्वेन आत्महानिः, अपि तु [illegible] पङ्क्तौ अश्वादौ [illegible]" इति जगन्नाथोपस्थापितं मतं तु हेयमेव, रसाभासास्वाद-रसास्वादकक्षयोर्वैषम्यस्य सहृदयहृदयसंवेद्यत्वात् [illegible] तु रसत्वेनैव व्यवहारस्यौचित्यात् । एतेन रस-तदाभासयोरास्वादांशेऽभेदं मन्यमानानां सत्यव्रतसिंहादीनां मतमपि परास्तम् । एवमेव आश्रयालम्बनादीनामनौचित्येऽपि **काव्यनाट्यप्रभावात् साधारणीभावात् सहृदयहृदयसंवादेन** सहृदयेनास्वाद्यमानोऽपि **आश्रयप्रतीत्या वासनादार्ढ्याभावेन सहृदयनिष्ठालम्बनाद्यनौचि**त्यबुद्धिरूपविघ्नाच्च अस्वसंवेद्यविरोधानपूर्वकास्वादनिर्भरीभावाविर्भावनसामर्थ्यम**प्राप्ता** भावास्वादकक्षातोऽपि **विच्युता तत्तदाश्रयत्वेन तत्तदालम्बनत्वेन च काव्यनाट्ययोरुपनिबद्धा अपरिपुष्टा रत्यादिचित्तवृत्तिः भावाभासः ।**

अत्रानेककामुकविषयमभिलाषं तस्याः स्तुम इत्याद्युक्तं बहुव्यापारोपादानं व्यनक्ति ।

भावाभासो यथा—

राकासुधाकरमुखी तरलायताक्षी सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी ।
तत् किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः

॥ उदा० ९० ॥

अत्र चिन्ता [illegible] । [illegible] ।

शृङ्गाररसाभासमुदाहरति—स्तुमः कमित्यादिना । परकीयां नायिकां प्रति कस्यचित् कामुकस्योक्तिरियम् । हे सुन्दरनयने, यं विना [illegible] न हरसि तं कं स्तुमः, कोऽसौ एतादृशो भाग्यशाली इत्यर्थः यं त्वमभिवाञ्छसि स पूर्वस्मिन् जन्मनि युद्धयज्ञे प्राणान् त्यक्तवान् सन् तत्पुण्येन [illegible] पुरुष. क. ? हे शशिमुखि, यं त्वं [illegible] स सुकृते जातो भाग्यवान् पुरुषः क. ?, हे मदनराजधानि यं नु त्वं ध्यायसि एषा त्वत्कर्तृक ध्यानम्, [illegible] स्वर्गादिकं त्यक्त्वा, त्वत्प्राप्त्यै सुचिरं तपस्तपस्यतः कस्य पुरुषस्य तपश्री. तपसः परिपाक फलम् इति यावत्. अस्तीत्यर्थः । अत्यष्ट्या छन्दसि शिखरिणी वृत्तम् । [illegible] रतेः सहृदयनिष्ठानौचित्य[illegible] रसीभावाप्राप्ते शृङ्गाररसाभासो ज्ञेयः । एवञ्च रसाभासध्वनिकाव्यमिदं बोध्यम् ।

तत्र रते रसाभासतायाः प्रयोजकं [illegible]—अत्रानेकेत्यादिना । स्तुम इत्यादिषु वाक्येषु पृथक् पृथग्रूपेण निबद्धं वर्ण्यमानाया साधारण्या नायिकाया [illegible] रमण-[illegible]-ऽऽलिङ्गन-ध्यान[illegible]म् उपादानं तस्या नायिकाया अनेककामुकविषयमभिलाषं व्यनक्ति, एवञ्चात्र रसाभासता बोध्येत्यर्थः । अत्र नगरीवत् [illegible] ध्वननाय मदननगरीति पर्यन्ते सम्बोधनात्, 'ध्यायसि तु यम्' इत्यत्र तुपदेन ध्यानकर्मणि पुरुषे [illegible] व्यवच्छेदस्य ध्यानक्रियायां पूर्वोपात्तरमणादिक्रिया-कर्मणां व्यवच्छेदस्य वा लाभात्, [illegible] सम्भवत्यपि अनेकत्वप्रतीतेः राजदण्डावारितत्वाच्च नायकभेदसिद्धेः [illegible] रतिरभिव्यज्यते इत भावः ॥ उदा० ८९ ॥

भावाभासमुदाहरति—**राकासुधाकरे**त्यादिना । सीतामुद्दिश्य प्रयुक्ता रावणस्य उक्तिरियमिति बालबोधिनीकारः । पूर्णचन्द्रमुखी चञ्चलदीर्घलोचना ईषदुद्भिन्नेन यौवनेन तरङ्गितैर्विभ्रमैः [illegible] शोभमाना सा (सीता) अस्ति, अतः सा मम मनो बलाद् हरति; तस्मात् तल्लाभाय किं करवै अत्र (सीतायाम्) **मैत्रीम्** मद्विषयां प्रीति-मित्यर्थः, कथमुत्पादयै तत्कर्तृकमत्प्रणयस्वीकारस्य विषये कः खलु उपायो भवेदित्यर्थः । शक्वर्यां छन्दसि वसन्ततिलकं वृत्तम् 'ज्ञेयं वसन्ततिलकं तभजा जगौ गः' इति लक्षणात् ।

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यो मानपराङ्मुखं शयितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं
मा भूत् सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥ उदा० ९.२ ॥

अत्रौत्सुक्यस्य ।

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः ।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-
न्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥ उदा० ९.३ ॥

अत्रावेगहर्षयोः ।

प्रतीयते, न तु प्रमादोदयः प्रतीयमानोऽपि तथा चमत्कारकारी, [illegible] तस्य परिदुर्बलत्वादित्यभिप्रायेणाह—**अत्र कोपस्येति** कारिकोद्देशानुसारं [illegible] । तथाचेदं कोपशान्तिध्वनिकाव्यं बोध्यम् ॥ उदा० ९.१ ॥

भावोदयमुदाहरति—**एकस्मिन् शयने** इत्यादिना । अमरुशतके पद्यमिदम् । नायकेन प्रणयकथासु प्रसङ्गात् सपत्न्या नाम्नो ग्रहणे कृते सति एकस्मिन्नेव शयनेऽपि सद्य एव मानेन पराङ्मुखं यथा स्यात् तथा शयितया अधीरया मुग्धया नायिकया बहूनि चाटुवचनानि प्रयुञ्जानोऽपि प्रियतमः कोपवशाद् अवज्ञातः, सोऽपि तथाकृतः सन् [illegible] नतिप्रतिनिधौ चाटुवचने परिक्षीणे उपेक्षां [illegible] स्थितः, तस्मिन्नेव क्षणे 'मत्प्रसादविषये नैराश्येन प्रसादनविमुखोऽयं च रतिलीलारहितः सन् सुप्त एवायं मत्प्रियो न भवतु' इति औत्सुक्येन अधीरया नायिकया नायकावस्था [illegible] शिर उन्नमय्य ग्रीवाम् अतिशयेन **वलिताम्** आवर्जिता कृत्वा स नायकः पुनर्विलोकित इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् । अत्र प्रतीयमानाया अपि [illegible] अपुष्टाया न चमत्कारकारणत्वम्, किन्तु रतिलीलाविषयाया [illegible] उदयस्य एव प्रतीतिविश्रान्तिधामत्वेन चमत्कारकारितेत्याशयेन आह—**अत्रौत्सुक्यस्येति** । [illegible] क्रमप्राप्तम् उदयः इति अनुपज्यते । एवञ्चेदम् औत्सुक्योदयध्वनिकाव्यं बोध्यम् ॥ उदा० ९.२ ॥

भावसन्धिमुदाहरति—**उत्सिक्तस्येत्यादिना** । महावीरचरिते द्वितीयेऽङ्के रामस्योक्तिरियम् । उद्रिक्तगर्वस्य तपसः पराक्रमस्य च विषये खनिसदृशस्य तत्रभवतः परशुरामस्य अभ्यागमाद् मयि वर्तमाना सत्सङ्गप्रियता वीरोचितस्य उत्साहस्य उद्रेकश्चेति एतौ द्वावपि हठाद् माम् एकस्या दिशि आकर्षतः, [illegible] पुनः पुनश्चेतनां विषयान्तरानुधावनाद् व्यावर्तयन् [illegible] इव चन्द्र इव च शीतलः प्रणयसंवलितश्च अतएव अतीव आनन्दजनकः सीतया कृतः परिरम्भश्च माम् अन्यस्या दिशि आकर्षति, अहो कुत्र प्रवर्तितव्यं मयेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् । अत्र

(सू० ५३) **मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ।**

ते भावप्रशान्त्यादयः । अङ्गित्वं राजानुगतविवाहप्रवृत्तभृत्यवत् ।

(सू० ५४) **अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥ ३६ ॥**

शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ।

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यः, अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यः, उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः । तत्र—

(सू० ५५) **अलङ्कारोऽथ वस्त्वेव शब्दात् यत्रावभासते ॥ ३७ ॥**

प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा

वस्त्वेवेति अनलङ्कारं वस्तुमात्रम् । आद्यो यथा—

उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन ।

ननु भावशान्त्यादिस्थले नियमेन रसस्यापि कस्यचित् प्रतीतिर्भवतीति भावशान्त्यादयश्च अनुभाव-व्यभिचारिभावान्यतररूपा इति च तेषां रसाङ्गत्वाद् अप्रधानताया आपत्तेर्भावशान्त्यादिव्यङ्ग्यस्य ध्वनिकाव्यत्वप्रयोजकताया असम्भवाद् ध्वनिकाव्यताप्रयोजकत्वेन भावशान्त्यादेर्निरूपणं भावशान्त्यादिकमिति कार्यादर्शनं च असङ्गतमित्याशङ्कायामाह—**मुख्ये रसेऽपी**त्यादि । वाक्यार्थविश्रान्तिधामभूते मुख्ये रसे पार्यन्तिके सत्यपि भावशान्त्यादयः कदाचिद्विच्छित्तिविशेषवशाद् यथा राजानुगतविवाहप्रवृत्तभृत्यः सहसा चित्तमाकर्षति तथा सहसा चित्ताकर्षणात् प्राधान्यं प्राप्नुवन्तीति भावशान्त्यादीनां ध्वनिकाव्यताप्रयोजकत्वं भवतीति नास्ति पूर्वोक्तशङ्कावसर इति कारिकावृत्त्योः सङ्कलितार्थः । अङ्गित्वाप्राप्तौ तु गुणीभूतव्यङ्ग्यत्वमेव तेषामिति बोध्यम् । वस्तुतस्तु एतेषामपराङ्गगुणीभूतव्यङ्ग्यविशेषता एव समुचिता ॥ ५३ ॥

एवं विवक्षितान्यपरवाच्यध्वन्यपरनामके अभिधामूलध्वनौ असंलक्ष्यक्रमव्यङ्ग्यध्वनिं समासेन निरूप्येदानीं संलक्ष्यक्रमव्यङ्ग्यध्वनिं प्रपञ्चयति—**अनुस्वानाभे**त्यादिना । घण्टाया वादितायामनन्तरक्षणे प्रधानशब्दप्रतीत्यनन्तरं योऽनुरणनरूपः शब्दः श्रूयते तत्सदृशस्य संलक्ष्यक्रमव्यङ्ग्यस्य स्थितिर्यस्मिन् तादृशो यो ध्वनिः स तु शब्दशक्तिमूलानुरणनरूपव्यङ्ग्ययुक्तः, अर्थशक्तिमूलानुरणनरूपव्यङ्ग्ययुक्तः शब्दार्थोभयशक्तिमूलानुरणनरूपव्यङ्ग्ययुक्तश्चेति प्रथमं त्रिविधो भवतीति कारिकावृत्त्योः सङ्कलितोऽर्थः । शब्दश्च अर्थश्च उभयञ्च, तेषां शक्तयः, ताभ्य उत्तिष्ठतीति शब्दार्थोभयशक्त्युत्थः ॥ ५४ ॥

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्ययुक्तस्य द्वैविध्यमाह—**तत्र-अलङ्कारोऽथे**त्यादिना । **तत्र** अभिधामूलकसंलक्ष्यक्रमव्यङ्ग्यध्वनेस्त्रिषु प्रकारेषु मध्ये । **यत्र** ध्वनिकाव्ये **शब्दात्** परिवृत्त्यसहात् **प्रधानत्वेन अलङ्कारोऽवभासते** व्यज्यते **अथ** अथवा **वस्त्वेव** वस्तुमात्रं व्यज्यते **स** शब्दशक्त्युद्भवो **ध्वनिः** काव्यम् अलङ्कारध्वनिर्वस्तुध्वनिश्चेति **द्विधा** भवतीत्यर्थः । यद्यपि अलङ्कारोऽपि वस्तु एव वस्तुत्वस्य सर्वानुगतत्वात् तथापि गोबलीवर्दन्यायेन वस्त्वलङ्कारयोर्भेदो विवक्षितः ।

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।
अहितः सहितः साधुयशोभिरसतामसि ॥ उदा० ९७ ॥

अत्रापि विरोधाभासः ।

निरुपादानसंभारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥ उदा० ९८ ॥

अत्र व्यतिरेकः ।

एवञ्चात्र विरोधस्याऽऽभासः (प्रतीतिः) भवतीत्याह—अत्रैकैकस्येत्यादिना । यत्र अभिधया बोधितयोः प्राथमिकयोरेवार्थयोर्विरोधस्य आभासस्तत्र विरोधालङ्कारस्य वाच्यता, यत्र तु प्रकरणवशात् प्राथमिकेऽर्थे विश्रान्ते शब्दस्वरूपविशेषमाहात्म्यात् प्रतीतयोर्द्वितीयकयोरर्थयोर्विरोधस्य प्रतीतिस्तत्र विरोधालङ्कारस्य व्यङ्ग्यता बोध्या ॥ उदा० ९६ ॥

तिग्मरुचिरित्यादिना सभङ्गे पदे विरोधालङ्कारध्वनिमुदाहृत्य अमितः समित इत्यादिना अभङ्गेऽपि पदे विरोधालङ्कारध्वनिमुदाहरतीति ध्येयम् । ... समासावयवानामपि श्रोत्रोपलभ्यत्वात् तदर्थोऽपि अभिधयैव गम्यते, ततश्च अर्थे ... व्यञ्जनव्यापारेणैव अवयवार्थविरोधप्रतीतिरिति तिग्मेत्यादिकाव्यं न शब्दशक्तिमूला-नुरणनरूपव्यङ्ग्यस्योदाहरणम् इति, समासावयवानाम् अभिधया अबोधकत्वेन समासावयवार्थानां व्यङ्ग्यत्वे स्वीकृतेऽपि समासावयवार्थविरोधप्रतीतेर्व्यञ्जनामूलत्वा-पातात् तिग्मेत्यादिकाव्यं शब्दशक्तिमूलध्वन्युदाहरणं भवितुमर्हतीति ... -स्य विरोधालङ्कारध्वनेरुदाहरणान्तरम् अमितः समित इत्याद्याह — कश्चित् । शत्रूणां कृते हर्षं द्यतीति हर्षदो हर्षखण्डक, मित्राणां कृते हर्षदायक हे प्रभो, त्वं समितः सङ्ग्रामात् प्राप्तैरुत्कर्षैः अपरिमितः, असतां कृते अहितकरः साधुभिर्यशोभिः सहितोऽसीति प्राकर-णिकश्चाटुकार्थः । एवं प्राकरणिकेऽर्थे विश्रान्ते शब्दस्वरूपविशेषमाहिम्ना अमितः परिमाण-शून्यः समितः परिमाणसहितश्च, अहितो हितरहितः सहितो हितसहितश्च त्वमसीत्येता-दृशोऽर्थः सहृदयप्रतीतिविषयतामवतरति । अनुष्टुभिच्छन्दसि पथ्यावक्त्रं (श्लोको वा) वृत्तम् ।

उपर्युक्तप्रकारेण अत्र विरोधस्य आभासः प्रतीतिर्भवतीत्याह—अत्रापीत्यादिना । अत्रापि यदि सङ्ग्रामस्य समितिशब्दवाच्यत्वेन श्रोत्रोपलभ्येन वा समितशब्देन अभिधयैव परिमाणसहितस्यैव बोधनम्, तदाऽपि अहितः सहित इत्यत्र विरोधस्य निस्संशयमभिधा-मूलव्यञ्जनाव्यापारविषयत्वमिति ग्रन्थकारस्याभिप्राय इत्यन्ये वर्णयन्ति ॥ उदा० ९७ ॥

व्यतिरेकध्वनिमुदाहरति—निरुपादानेत्यादिना । उत्पलस्तोत्रावलौ पद्यमिदं पठ्यते । उपादानादिसामग्रीं विनैव भित्तिरहिते शून्ये एव नानाकारं विचित्रं जगद् विस्तारयते चन्द्रकलया सहितत्वेन श्लाघनीयाय महादेवाय नम इति प्रकृतोऽर्थः । चित्रशब्दमाहात्म्याद् व्यञ्जनया आलेख्यस्य, कलाशब्दमहिम्ना व्यञ्जनया आलेख्यक्रियाकौशलस्य च प्रतीति-

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् ।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥ उदा० १०० ।

अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति । व्यत्ययेन । ध्वन्यते ।

(सू० ५६) अर्थशक्त्युद्भवोऽप्यर्थो **व्यञ्जकः सम्भवी स्वतः ॥ ३८ ॥**
प्रौढोक्तिमात्रात् सिद्धो वा कवेस्तेनोम्भितस्य वा ।
वस्तु वाऽलङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ॥ ३९ ॥
वस्त्वलङ्कारमथवा तेनाऽयं द्वादशात्मकः ।

इदम्प्रथमकल्पितः स्वतस्सम्भवी चेति द्विविधोऽर्थः । तत्र स्वतःसम्भवी न केवलं भणितिमात्रनिष्पन्नो यावद् बहिरप्यौचित्येन सम्भाव्यमानः । कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वक्त्रेति वा द्विविधोऽपर इति त्रिविधः । वस्तु वाऽलङ्कारो वाऽसाविति षोढा व्यञ्जकः । तस्य वस्तु वाऽलङ्कारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः ।

अलङ्कारेण वस्तुध्वनिमुदाहरति—शनिरशनिश्चेत्यादि हे नरेन्द्र त्वं यस्मै कुप्यसि तं शनिग्रहो वज्रं च अतिशयेन निहन्ति, यस्मिंस्तु त्वं प्रसीदसि स तु पुरुषो महान् तथा न विद्यते अधिको दाता यस्मात् तादृशश्च सन् शोभते इत्यर्थः । आर्या जातिः ।

अत्र पूर्वार्धे अशनिपदात् "तत्सादृश्य तदन्यत्वं तदल्पत्वं विरोधिता । अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः" इत्यनुसारं शनिविरोधिरूपस्यार्थस्यावगतौ विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुतः इति वस्तु अशनिशब्दस्य शक्तेः (शनिरशनिरित्यादिरूपेण व्यत्ययेन) ध्वन्यते इति बोध्यम् इत्यभिप्रायेणाह—**अत्र विरुद्धावित्यादि** । तत्र शनित्वाशनित्वयोरेकधर्मिगतत्वेन अप्रतिपादनाद् वस्तुतो विरोधस्याभावेऽपि विरुद्धत्वेन प्रतीयमानयोस्तयोरेककार्यकारित्वेन प्रतिपादनाद् विरोधस्य प्रतीतिस्तत्समाधानाय त्वदनुवर्तनार्थमिवेति फलोत्प्रेक्षा ततश्चैककार्यकारित्वस्य वस्तुनो व्यक्तिरिति बोध्यम् । [illegible] न वस्तुध्वन्युदाहरणम्, तत्र च शब्दस्याऽप्यर्थकत्वे विरोधालङ्कारस्य वाच्यत्वम्, समुच्चयार्थकत्वे तु विरोधालङ्कारस्यैव व्यङ्ग्यत्वमिति बोध्यम् ॥ उदा० १०० ॥

अभिधामूलकध्वनिषु अलङ्कारध्वनि-वस्तुध्वनिभेदेन द्विविधं शब्दशक्तिमूलकं ध्वनिं निरूप्य अभिधामूलकध्वनिष्वेव अर्थशक्तिमूलकम् अनुरणनसदृशसंलक्ष्यक्रमव्यङ्ग्ययुक्तं ध्वनिं व्यङ्ग्यभेदेन विभक्तुम् आर्थान् व्यङ्ग्यान् विभज्य अर्थशक्त्युद्भवध्वनिं विभजते—**अर्थशक्त्युद्भव** इत्यादिना । तत्र लोकेऽपि औचित्येन सम्भाव्यमानत्वात् स्वतस्सम्भवी वस्तुरूपोऽर्थः, तादृश एव अलङ्काररूपोऽर्थः; लोकेऽसम्भाव्यमानोऽपि कविना प्रतिभया निर्मितः (कविप्रौढोक्तिमात्रसिद्धः) वस्तुरूपोऽर्थः, तादृश एव अलङ्काररूपः अर्थः कविनिबद्धेन नायकादिना वक्त्रा प्रतिभामात्रेण निर्मितो लोकेऽसम्भाव्यमानः (कविनिबद्धवक्तृ-

दर्पान्धगन्धगजकुम्भकपाटकूटसंक्रान्तिनिघ्नघनशोणितशोणशोचिः ।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः कालीकटाक्ष इव यस्य करे
कृपाणः ॥उदा० १०३ ॥ [३]

अत्रोपमालङ्कारेण सकलरिपुबलक्षयः क्षणात् करिष्यते इति वस्तु ।

गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन् निर्दशन् युधि रुषा निजाधरम् ॥उदा० १०४॥ [४]

इदानीमपि स्मृत्वा कथयसि मा त्वं भाग्यशालिनी असि. हे सख्यः, अहं तु प्रियेण हस्ते नीवीं प्रति नेतुं सङ्कल्पिते एव रतिरसमूढा भवामि, तदनन्तरं किमप्यन्यद् न चेतये, यदि इयं मदुक्तिर्मिथ्या भवेत् तदाहं म्रियेय इति शपथेन चेद ब्रवीमीत्यर्थः । त्वत्पादौ स्पृष्ट्वा ब्रवीमि मया यदुक्तं तत् सत्यम्, गुरुपादौ, ब्राह्मणं गां वा स्पृष्ट्वा ब्रवीमि मया यदुक्तं तत् सत्यम्, त्वत्पादौ स्पृष्ट्वा ब्रवीमि मया यदि असत्यमुक्तं स्यात् तदाऽहं विनश्येयमित्यादिरूपया वाचा शरीरविशेषस्य स्पर्शनं कृत्वा कृतेन शपथविशेषेण प्रत्यायनस्य अनभिप्रेतत्वाच् शपतेरात्मनेपदस्याभावः । तादृशशपथविशेषेण प्रत्यायनाभिप्राये प्रकाशिते हि "शप उपालम्भने" इति वार्तिकेन (१।३।२१) आत्मनेपदं स्मर्यते नान्यादृशेन शपथेन इति हि वृत्तिकारजयादित्यस्य जिनेन्द्रबुद्धिहरदत्तादीनां चाऽभिप्रायः । कैय्यटादिमते तु प्रकाशनार्थे उक्तवार्त्तिकेन आत्मनेपदं स्मर्यते न तु शपथे इति. अत्र च शपथे शपिरिति नात्मनेपदप्रसङ्गः । अत्र पूर्ववाक्ये सौभाग्यगर्विताया एकस्याः सम्बोध्यत्वाद् उत्तरवाक्येतु सर्वासां सम्बोध्यत्वाद् धन्यासीति सख्य इति च प्रयोगो नाऽसङ्गतः । विवक्षितार्थसत्यत्वप्रत्यायनोपयोगितया सख्यः शपामीति गर्भितमपि गुणः ।

अत्र सखी प्रति प्रयुक्तेन धन्यत्वोक्तिरूपेण वाच्येन वस्तुना स्वस्य महानन्दप्राप्तेः सूचनेन 'त्वं न सौभाग्यशालिनी अहन्तु सौभाग्यशालिनी' इति व्यतिरेकालङ्कारो व्यङ्ग्य इत्याह—**अत्र त्वमित्यादिना** । वयं [illegible] व्यतिरेकस्य ध्वन्यमानत्वेऽपि तन्निरपेक्षतयैव वाच्येन वस्तुना [illegible] व्यञ्जनाद् वस्तुव्यञ्जकतोदाहरणताऽस्य ॥ उदा० १०२ ॥ [२]

स्वतःसम्भव्यलङ्कारव्यक्तेन वस्तुना युक्तं ध्वनिं [illegible] **दर्पान्धेत्यादि**ना । कप्फिणाभ्युदये (१।३७) पद्यमिदम् । यस्य करे स्थितः, दर्पेण उद्रिक्तस्य गन्धप्रधानस्य (वैरिसम्बन्धिनः) गजस्य गण्डयोः [illegible] (कृपाणस्य) सम्यक् क्रमणेन (प्रवेशेन) कृपाणनिघ्नतया संलग्नेन निबिडेन रक्तेन [illegible] कृपाणो वैरिवीरैः क्रोधेन रक्तः (जगत् कलयन्त्याः) काल्या कटाक्ष इव व्यलोकि इत्यर्थः ।

तत्र व्यञ्जकव्यङ्ग्यनिर्देशं करोति—**अत्रोपमालङ्कारेणे**त्यादिना । कृपाणस्य कविना कविनिबद्धैर्वीरैर्वा कालीकटाक्षत्वेन असम्भावितत्वान्नात्रोत्प्रेक्षा, किन्तु कृपाणः कालीकटाक्षसदृश इति बोधादुपमैव । उपमायामपि [illegible] व्यञ्जनया उपमेये प्रतीतौ बाधकाभावात् ॥ उदा० १०३ ॥ [३]

अत्र वस्तुना येषामप्यर्थाधिगमो नास्ति तेषामप्येवमादिवर्णनेन चमत्कारं करोति त्वत्कीर्तिरिति वस्तु ध्वन्यते ।

केसेसु वलामोडिअ तेण अ समरम्मि जअसिरी गहिआ ।
जह कन्दराहिँ विहुरा तस्स दढ कठअम्मि सठविआ ॥ उदा० १०६ ॥ [६]

अत्र केशग्रहणावलोकनोद्दीपितमदना इव कन्दरास्तद्विधुरान् कण्ठे गृह्णन्ति इत्युत्प्रेक्षा; एकत्र सङ्ग्रामे विजयदर्शनात् तस्यारयः प्रपलाय्य गुहासु तिष्ठन्तीति काव्यहेतुः न प्रपलाय्य गतास्तद्वैरिणोऽपि तु ततः पराभवं सम्भाव्य तान् कन्दरा न त्यजन्तीत्यप ह्नुतिश्च ।

गाढालिङ्गणरहसुज्जुअम्मि दइए लहुं समोसरइ ।
माणसिणीअ माणो पीलणभीअ व्व हिअआहिं ॥ उदा० १०७ ॥ [७]

कविप्रौढोक्तिमात्रसिद्धवस्तुव्यङ्ग्यालङ्कारमुक्तं ध्वनिकाव्यमुदाहरति—**केसेसु बले**-त्यादि । '**केशेषु बलात्कारेण तेन च समरे जयश्रीर्गृहीता । यथा कन्दराभिर्विधुरास्तस्य दृढं कण्ठे संस्थापिताः**' इति संस्कृतच्छाया । गाथासप्तशत्यां पद्यमिदम् । तेन राज्ञा युद्धे विजयलक्ष्मी बलात्कारेण केशेषु तथा गृहीता यथा कन्दराभिः तस्य राज्ञः शत्रवः गुहा-कण्ठप्रदेशे दृढं यथा स्यात्तथा संस्थापिता इत्यर्थः तेन विजिता शत्रवः पलाय्य गुहामेवा-श्रयन्ते इति भावः ।

कन्दराभिः कण्ठे संस्थापितास्तच्छत्रव इत्येवंरूपेण कविप्रौढोक्तिमात्रसिद्धवस्तुना व्यङ्ग्यानलङ्कारानाह—**अत्रकेशग्रहणे**त्यादिना । **काव्यहेतुरि**ति एकत्र विजयदर्शनस्य पलायनहेतुत्वात् काव्यलिङ्गमलङ्कार इतिभावः । उत्प्रेक्षादीनामेतेषामलङ्काराणां सन्देह-सङ्करः एकव्यञ्जकानुप्रवेशसङ्करो वा चकारेण सूचित इति टीकाकाराः । कन्दरादौ नायिकात्वाद्यारोपे एव वृत्त्युक्तोत्प्रेक्षा व्यज्यते, तथारोपस्वीकारे च तस्योक्तेऽनुक्तेन सम-रोपस्य समासोक्तिरूपत्वात् समासोक्तेरेवोत्प्रेक्षाव्यञ्जकता स्यान्न वस्तुन इत्यतो नात्रो-त्प्रेक्षा व्यङ्ग्येति गोविन्दठक्कुरः । तेनेति कन्दराभिरिति च पदद्वयं विशेष्यवाचि श्लिष्ट-ञ्चेति नात्र समासोक्तिः, विशेष्यस्याश्लिष्टत्वे एव समासोक्तेः स्वीकाराद् न च विशे-ष्यवाचकपदयोः श्लिष्टत्वे श्लेषप्रसङ्गो जयश्रीपदस्याश्लिष्टत्वादिति वस्तुन उत्प्रेक्षा-व्यञ्जकत्वमक्षतमिति भीमसेनदीक्षितादयः । समासोक्तेः श्लेषस्य वा प्रसङ्गेन अत्र उत्प्रेक्षाया वस्तुव्यङ्ग्यत्वे विप्रतिपत्तिः स्यादित्येव मम्मटेन एकत्रेत्याद्युक्तं भवेदिति त्वस्माकं प्रतिभाति ॥ उदा० १०६ ॥ [६]

कविप्रौढोक्तिमात्रसिद्धालङ्कारव्यङ्ग्यवस्तुरुक्तं ध्वनिमुदाहरति—'**गाढालिङ्गणे**-त्यादि । '**गाढालिङ्गनरभसोद्यते दयिते लघु समपसरति । मनस्विन्या मानः पीडनभयादिव हृदयात्**' इति संस्कृतच्छाया । गाथासप्तशत्या पद्यमिदम् । मानवती प्रति मानभङ्गाय अपरमानवतीमानभङ्गवृत्तान्तं वर्णयन्त्याः सख्या उक्तिरियम् । गाढालिङ्गनस्य रभसेन

सहि विरइऊण माणस्स मज्झ धीरत्तणेण आसासम् ।
पिअदंसण-विहुलङ्खल-खणम्मि सहसत्ति तेण ओसरिअम् ॥उदा० ११०[१०]

अत्र वस्तुनाऽक्रान्तेऽपि प्रार्थने प्रसन्नेति विभावना. प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढुं न शक्यते इत्युत्प्रेक्षा च ।

उल्लोल्ल-करअ-रअण-क्खएहिँ तुह लोअणेसु मह दिण्णं ।
रत्तंसुअं पसाओ कोवेण पुणो इमे ण अक्कमिआ ॥ उदा० १११ ॥ [११]

नितम्बेषु (नितम्बेषु) पतिताः सन्तः सम्भोगश्रान्तसर्पिणीनां विस्तृतानाम् उद्गतानां च फणानामावल्या पाने कृते सति क्षीणतां प्राप्ताः आसन् ते मलयानिला इदानीं प्रवृद्धैः विरहिणीनिःश्वासैः सम्पर्किणः सन्तः शिशुत्वे सत्यपि झटित्येव तारुण्ये इव परिपुष्टा जाता इत्यर्थः ।

अत्र कविनिबद्धायाः सहृदयस्य दक्षिणायाः प्रौढोक्त्या सिद्धेन वाच्यार्थरूपेण वस्तुना विरहिणीनिश्श्वासप्राप्तैश्वर्या दक्षिणानिलाः किं किं न कुर्वन्ति ? (सर्वं कुर्वन्ति) इति वस्तु व्यज्यते इत्याशयेनाह——अत्र निश्श्वासैरित्यादि ॥ उदा० १०९ ॥ [९]

कविनिबद्धवक्तृप्रौढोक्तिमात्रसिद्धवस्तुना व्यङ्ग्यालङ्कारयुक्तं ध्वनिकाव्यमुदाहरन्ति–**सहि विरइऊणेत्यादि** । '**सखि विरचय्य मानस्य मम धीरत्वेन आश्वासम् प्रियदर्शन-विशृङ्खल-क्षणे सहसेति तेनापसृतम्**' इति संस्कृतच्छाया । गाथासप्तशत्यां किमिति मानम् अत्यजः इति पृच्छन्तीं सखीं प्रति कस्याश्चिन्नायिकाया उक्तिरियम् । हे सखि, त्वद्दत्तेन धैर्येण कर्त्रा मम मानस्य 'तव दौर्बल्ये सहायो भविष्यामि, त्वं दृढो भवेति समाश्वासनं विरचय्यापि प्रियदर्शनेन कौतुकोत्तरलत्वरूपे उत्सवे जाते सति तु तेन सहसा (मया पूर्वं सहसा यत् प्रतिज्ञातं तन्नेदानीं निर्वोढुं शक्यते) इत्युक्त्वा पलायितमित्यर्थः । तत्र कविनिबद्धाया वक्त्र्याः प्रौढोक्त्यैव सिद्धेन वाच्यार्थरूपेण वस्तुना व्यङ्ग्यौ अलङ्कारौ आह—**अत्र वस्तुने**त्यादिना । कारणाभावेऽपि कार्योत्पत्तेः प्रतीतेर्विभावनाऽलङ्कारः, प्रियदर्शनसौभाग्यबलं सोढुमशक्त्वेव धैर्यं पलायितमिति हेतूत्प्रेक्षा च गम्यमानौ ज्ञेयौ । प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढुं न शक्यते इत्यस्य पलायने हेतुताया उत्प्रेक्षेति वृत्त्यर्थः । वृत्तौ चकारेण विभावनोत्प्रेक्षयोः संसृष्टिः सूचितेति भीमसेनः, सङ्करः सूचित इति नागोजिभट्ट ॥ उदा० ११० ॥ [१०]

कविनिबद्धवक्तृप्रौढोक्तिमात्रसिद्धालङ्काररूपेण वस्तुना युक्तं ध्वनिमुदाहरति—**उल्लोल्ल-करअ-रअणेत्यादि** । '**आर्द्रार्द्र-करज-दशनक्षतैस्तव लोचनयोर्मम दत्तम् । रक्तांशुकं प्रसादः कोपेन पुनरिमे न आक्रान्ते**' इति संस्कृतच्छाया । गाथासप्तशत्यां पद्यमिदम् । पतिगात्रे सपत्नीकृतनखक्षतादि दृष्ट्वा कोपेन रक्तनयना जाता पत्नी पत्या किमिति कोपरक्तरक्ते नयने वहसीति पृष्टा पतिं प्रत्याह—हे प्रिय, इमे मम लोचने कोपेन न आक्रान्ते, किन्तु तव गात्रे वर्तमानैर्मत्सपत्न्या दत्तैरार्द्रैर्नखानां दशनानाञ्च

अत्र किमिति लोचने कुपिते वहसि इत्युत्तरालङ्कारेण न केवलम् आर्द्रनखक्षतानि गोपायसि यावत् तेषामहं प्रमादपात्रं जातेति वस्तु ।

महिला-सहस्स-भरिए तुह हिअए सुहअ सा अमाअन्ती ।
अणुदिणमणण्णकम्मा अङ्गं तणुअं वि तणुएइ ॥ उदा० ११२॥ [१२]

अत्र हेत्वलङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तते इति विशेषोक्तिः। एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यञ्जकः ।

एवं द्वादश भेदाः ।

(सू० ५७) शब्दार्थोभयभूरेकः

यथा—

रक्तवर्णं क्षतैः मम लोचनयो रक्तप्रभारूपं रक्तांशुकं प्रमादरूपं दत्तमस्ति इति । अत्र किन्तु लोचने कुपिते वहसि इति प्रश्नस्य उन्नीतस्योत्तररूपेण उत्तरालङ्कारभूतेन वाच्यार्थेन कविनिबद्धाया वक्त्र्याः प्रौढोक्त्यैव सिद्धेन कोपेन पुनरिमे न आक्रान्ते' इत्यपह्नुत्या अनुगतेन 'न केवलं मत्सपत्नीदत्तार्द्रनखक्षतगोपनव्याजं करोषि, किन्तु गोपनसंरम्भव्याजेन गुप्तानामपि प्रदर्शनं करोषि' इति वस्तु व्यज्यते इत्याह—**अत्र किमि-त्यादिना** ॥ उदा० १११ ॥ [११]

कविनिबद्धवक्तृप्रौढोक्तिमात्रसिद्धेन अलङ्कारेण युक्तं ध्वनिकाव्यमुदाहरति—**महिला सहस्सेत्यादि** । **'महिलासहस्रभरिते तव हृदये सुभग सा अमान्ती । अनुदिनमनन्यकर्मा अङ्गं तन्वपि तनयति'** इति संस्कृतच्छाया । गाथासप्तशत्यां पद्यमिदम् । हे सुभग, अनुदिनमनन्यकर्मा सा नायिका स्त्रीसहस्रभरिते तव हृदये अवकाशमलभमाना सती त्यक्तान्यकार्या प्रतिदिनं कृशमपि अङ्गं (यदि ममाङ्गं कृशतरं भवेत्तर्हि स्वल्पेऽपि तद्धृदयावकाशे प्रवेशं स्थानं वा लभेयेति) पुनः पुनः कृशतरं करोतीत्यर्थः । अत्र अमान्तीत्वे महिलासहस्रभरितत्वं हेतुः, तनूकरणे अमान्तीत्वं हेतुरिति द्वाभ्यां हेत्वलङ्कारत्वेन प्राचीनाभिमताभ्यां काव्यलिङ्गाभ्यां विशेषोक्तिर्वस्तुरूपा व्यज्यते इति बोध्यम् । वृत्तौ हेत्वलङ्कारेणेत्यत्र जातौ एकवचनम् ।। उदा० ११२ ॥ [१२]

जेलत्केत्यादिषु चतुर्षु उदाहरणेषु व्यञ्जकस्वरूपं दर्शयति—**एषु कविनिबद्धेत्यादिना** ।

अर्थशक्त्युद्भवध्वनेर्भेदानुपसंहरति स्मारयति—एवं द्वादश भेदा इति ।

[illegible] शब्दशक्त्युद्भवव्यङ्ग्यप्रयुक्तध्वनिकाव्येषु शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यस्य प्रयुक्तौ भेदौ अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यप्रयुक्तांश्च द्वादश भेदान् निरूप्य अभिधामूलशब्दार्थोभयशक्तिमूलानुरणनरूपव्यङ्ग्यप्रयुक्तं ध्वनिकाव्यभेदं निरूपयति—**शब्दार्थोभय-भूरेक** इति । शब्दश्चार्थश्च शब्दार्थौ तद्रूपमुभयं **शब्दार्थोभयं तद्भूः** तच्छक्त्युत्थो [illegible]कारकः एकप्रकारक एव भवतीत्यर्थः । एवं च तादृशध्वनिरुक्तः

अनन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ॥ उदा० ११३ ॥ [१३]

अत्रोपमा व्यङ्ग्या ।

(सू० ५८)····**भेदा अष्टादशाऽस्य तत्** ॥ ४० ॥

अस्येति ध्वनेः ।

इति ध्वनेरेकविधत्वमेव भवतीति अर्थाल्लभ्यते। शब्दशक्तिमूले अर्थशक्तिमूले च शब्दस्यापि व्यञ्जकत्वं भवतीति यद्यपि सर्वत्र शब्दार्थोभयशक्तिमूलकत्वं भवति तथाप्यन्यत्र गुणप्रधानभावेन शब्दार्थयोर्व्यञ्जकत्वाच्छब्दस्य प्राधान्ये शब्दशक्तिमूलकत्वम् अर्थस्य प्राधान्ये अर्थशक्तिमूलकत्वं च व्यवह्रियते, अत्र तु शब्दार्थयोर्द्वयोरेव तुल्यतया प्राधान्यमित्यस्यैव शब्दार्थोभयशक्तिमूलकत्वेन व्यवहार इति विवेकः। तथा च व्यञ्जकानां पदानां पदांशानां वा मध्ये केषां चित् परिवृत्तिसहत्वे केषां चिच्चापरिवृत्तिसहत्वे व्यङ्ग्यस्य शब्दार्थोभयशक्तिमूलकत्वं भवतीति ज्ञेयम्।

अभिधामूलकशब्दार्थोभयशक्तिमूलसंलक्ष्यक्रमव्यङ्ग्ययुक्तं ध्वनिमुदाहरति— **अतन्द्रचन्द्रेत्यादि**। स्फुरच्चन्द्राभरणयुक्ता समुद्दीपितमदना तारासङ्कुला श्यामा (रात्रिः) कं सानन्दं न करोति? (सर्वमेव सानन्दं करोति) इति रात्रिपक्षेऽर्थः। सुरतालस्यरहिता कर्पूरभूषणा (चन्द्रकभूषणा वा) मुदा सहिता दीपितकामा चञ्चलकनीनिका (चञ्चलाक्षी) 'शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला। सर्वावयवशोभाढ्या सा श्यामा परिकीर्तिता' इति लक्षणेन लक्षिता सुन्दरी कं सानन्दं न करोति? इति सुन्दरीपक्षेऽर्थः। अत्रोक्तार्थद्वयज्ञाने श्यामा स्त्रीव रात्रिरिति, ज्यौत्स्नीव नायिकेति वा उपमालङ्कारो व्यज्यते इत्याह-**अत्रोपमा व्यङ्ग्येति**। तत्र चन्द्र-तारका-तरल-श्यामाशब्दाः परिवृत्त्यसहिष्णवः शब्दान्तरैरुक्तोभयपक्षान्वयिनोरर्थयोर्बोधनस्याऽसम्भवात्, अतन्द्रा-आभरण-समुद्दीपित-मन्मथशब्दाश्च परिवृत्तिसहिष्णवः अनिद्र-आभूषण-समुत्तेजित-कामादिशब्दान्तरैरपि शब्दार्थोभयशक्तिमूलत्वं व्यङ्ग्यस्य बोध्यम् ॥ उदा० ११३ ॥

सुखेन बोधाय उक्तध्वनिकाव्यभेदान् सङ्कलय्य निर्दिशति—**भेदा अष्टादशास्य तद् इति**। **तत्** तस्माद् **अस्य** ध्वनिकाव्यस्य अष्टादशभेदा एतावता ग्रन्थेन प्रतिपादिता इत्यर्थः। तत्र अविवक्षितवाच्यस्य (लक्षणामूलध्वनेः) अर्थान्तरसङ्क्रमितवाच्यः अत्यन्ततिरस्कृतवाच्यश्चेति द्वौ भेदौ; विवक्षितान्यपरवाच्यस्य (अभिधामूलध्वनेः) तु असंलक्ष्यक्रमव्यङ्ग्यरसादिध्वनिरेकः, संलक्ष्यक्रमव्यङ्ग्यध्वनयः शब्दशक्तिमूलौ द्वौ, अर्थशक्तिमूला द्वादश, शब्दार्थोभयशक्तिमूल एक इति उक्तसर्वसङ्कलने ध्वनेः अष्टादश भेदा एतावता ग्रन्थेन प्रतिपादिताः बोध्याः ॥सू० ५८॥

रसभावादीनां बहुविधत्वात् कथमष्टादश एव भेदा उक्ता इत्युच्यते इत्याशङ्क्य रसादीनामनन्तत्वाद् रसादिध्वनीनां साकल्येन गणयितुमशक्यत्वाद् अनन्तेऽपि असंलक्ष्य-

ननु रसादीनां बहुभेदत्वेन कथमष्टादश इति, अत आह—

(सू० ५९) **रसादीनामनन्तत्वाद् भेद एको हि गण्यते ।**

अनन्तत्वादिति । तथा हि नव रसाः, तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च सम्भोगस्यापि परस्परविलोकना-आलिङ्गन-चुम्बनादि-कुसुमोच्चय-जलकेलि-सूर्यास्तमय-चन्द्रोदय-षडृतुवर्णनादयो बहवो भेदाः, विप्रलम्भस्याभिलाषादय उक्ताः तयोरपि विभावानुभावव्यभिचारिवैचित्र्यम्, तत्रापि नायकयोरुत्तम-मध्यम-अधमप्रकृतित्वम् तत्रापि देश-काल-अवस्थादिभेद इत्येकस्यैव रसस्यानन्त्यम्, का गणना त्वन्येषाम्- का गणना त्वन्येषाम् । असंलक्ष्यक्रमत्वन्तु सामान्यमाश्रित्य रसादिध्वनिरेकभेद एव गण्यते ।

(सू० ६०) **वाक्ये द्व्युत्थः** .... ।

द्व्युत्थ इति शब्दार्थोभयशक्तिमूलः ।

(सू० ६१) .... **पदेऽप्यन्ये ।**

अपिशब्दाद् **वाक्येऽपि** । एकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यङ्ग्येन वाक्यव्यङ्ग्याऽपि भारती भासते ।

क्रमव्यङ्ग्य[illegible] तदाश्रित्य रसादिध्वनिभेदः असंलक्ष्यक्रमव्यङ्ग्यध्वनिरिति एकविध एव गण्यते [illegible]—ननु **रसादीना**मित्यादिना । तत्र रसादिध्वनीनामानन्त्यं [illegible]—तथा हीत्यादिना । **नायकयोः** नायकश्च नायिका च तयोः, 'पुमान् स्त्रिया' (अष्टा० १।२।६७) इत्येकशेषव्युत्पादनात् ॥ सू० ५९ ॥

अथ [illegible]मादाय ध्वनिकाव्यभेदान् प्रतिपाद्य [illegible] ध्वनिकाव्यभेदान् निरूपयति—**वाक्ये द्व्युत्थ** इत्यादिना । उक्तेषु ध्वनिभेदेषु मध्ये शब्दार्थोभयशक्त्युत्थो ध्वनिर्वाक्य एव भवतीत्याह—**वाक्ये द्व्युत्थ** इति । वाक्यपदमत्र [illegible] न तु शास्त्रीयवाक्यपरं लौकिकवाक्यपरं वा । एवञ्च एकार्थानेकार्थपद-[illegible] शब्दार्थोभयशक्त्युत्थध्वनेः सम्भवः । [illegible] कस्यचिदंशस्य परिवृत्तिसहत्वस्य कस्यचिदंशस्य [illegible] सम्भवात् । अखण्डे एकस्मिन् पदे तु अंशेनापि [illegible] समावेशस्याऽसम्भवात् नैव पदगतत्वेन [illegible] इति केचित्; अन्ये तु वाक्यपदमत्र [illegible]क्रियाबोधकशब्दपरमेव अत एव यस्य मित्राणीत्यादौ उदाह्रियमाणे पद्ये त्रयाणां पदानां व्यञ्जकत्वेऽपि खलव्यवहारेत्यादौ पदद्वयस्य व्यञ्जकत्वेऽपि न [illegible]रित्याहुः । एवं च [illegible] ध्वनिकाव्यमपि एकविधमेवेति [illegible] गच्छति । [illegible] तु पूर्वोक्तमेव **अतन्द्रचन्द्राभरणे**त्यादि ॥ ६० ॥

तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणम्—

यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा ।

अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति ॥ उदा० ११८ ॥ [१]

अत्र द्वितीयमित्रादिशब्दा आश्वस्तत्व-नियन्त्रणीयत्व-स्नेहपात्रत्वादिसङ्क्र-मितवाच्याः ।

पूर्वोक्तेषु अष्टादशसु ध्वनिभेदेषु उभयशक्त्युद्भवमेकं परित्यज्य अन्ये सप्तदश भेदाः पदे वाक्ये च भवन्तीत्याह—**पदेऽप्यन्ये** इति । ननु भवतु नाम व्यङ्ग्यं पदमात्रनिष्ठम्, काव्यत्वन्तु नैव पदमात्रवृत्ति सम्भवति, काव्यस्यात्मलाभायाऽन्ततो निराकाङ्क्षार्थप्रति-पादकवाक्यस्याऽवश्यकत्वात्, रसादेरेकपदव्यङ्ग्यत्वमप्यनुपपन्नं तस्य विभावानुभाव-व्यभिचारिसमूहालम्बनात्मकत्वात् एकेन पदेन च तेषां सम्भावनानुपपत्तेरित्यत आह—**एकावयवे**त्यादि । यद्यपि काव्यं वाक्यरूपमेव तथापि क्वचिद् एकपदनिष्ठव्यङ्ग्यविशेषो-पस्कारेणैव प्राधान्येन वाक्ये काव्यत्वप्रयोजकचमत्काराधानाद् ध्वनिकाव्यस्य पदनिष्ठत्व-व्यवहारः, एकेनैव पदेनापि प्राधान्येन रसव्यञ्जकव्यभिचार्यादेर्व्यञ्जनाद् रसादिव्यङ्ग्य-प्रयुक्तध्वनिकाव्यस्यापि पदनिष्ठताव्यवहारः सुलभः इत्यभिप्रेत्य एकपदव्यङ्ग्यस्यापि काव्यजीवातुभूतचमत्कारजनकता दृष्टान्तावष्टम्भेन समर्थयते—**एकावयवस्थितेने**त्यादिना । इयं फक्किका "विच्छित्तिशोभिनैकेन भूषणेनेव कामिनी । पदद्योत्येन सुकवेर्ध्वनिना भाति भारती" इति ध्वन्यालोकपरिकरश्लोका (३।१) नुवादरूपा । **वाक्यव्यङ्ग्या** वाक्यार्थ-प्रतिभारूपा **भारती** वाण्यात्मा **भासते** चमत्कारजनकत्वेन शोभते इत्यर्थः ।

येषां वाक्यान्येव व्यञ्जकानि तान् व्यङ्ग्यार्थान् उपादाय व्यवस्थितानि ध्वनि-काव्यानि **त्वामस्मि वच्मी**त्यादीनि (उदा० ६४) उदाहृतान्येव, पदव्यञ्जकव्यङ्ग्यप्रधानानि ध्वनिकाव्यानि इदानीं पूर्वोक्त-**लक्षणामूला-ऽभिधामूलादिक्रमेण** उदाह्रियन्ते इत्याह—**तत्र पदप्रकाश्यत्व** इत्यादिना ।

अर्थान्तरसङ्क्रमितवाच्यव्यङ्ग्यप्रयुक्तं पदव्यङ्ग्यप्रधानं ध्वनिकाव्यमुदाहरति—**यस्य मित्राणी**त्यादि । यस्य मित्राणि तदाश्रयेण आश्वस्तान्येव, यस्य शत्रवो नियन्त्रणीया एव, यस्य अनुकम्प्यः स्नेहपात्रमेव स एव पुरुषो जात इति जीवतीति च श्लाघापूर्वकं व्यवह्रियते इत्यर्थः । अत्र द्वितीयमित्रादिशब्दानामुक्तार्थान्वये पौनरुक्त्येनान्वयायोगात् ते शाब्दबोधाय आश्वस्तत्वादीन् अर्थान् लक्षयन्ति, तत्र सामान्यविशेषभावसम्बन्धो लक्षणाया निमित्तं शरीरमेव वा । ततश्च आश्वस्तत्वादेर्यावज्जीवस्थायित्वरूपातिशय-व्यक्तिद्वारा वर्ण्यस्योचितव्यवहारित्वादिकं व्यज्यते । अत्र यस्य मित्राणि मित्राणि स जातः स च जीवति, यस्य शत्रवः शत्रवः स जातः स च जीवति, यस्य अनुकम्प्योऽनुकम्प्य-श्च स जातः स च जीवति इति त्रिषु वाक्येषु एकैकपदानां व्यञ्जकत्वात् पदविषयता ध्वनेः, न तत्समूहरूपवाक्यविषयतेति नागोजिभट्टः । **त्वामस्मि वच्मी**त्यादौ कारकान्वि-तक्रियारूपवाक्यस्यैव लक्षकत्वेन व्यञ्जकत्वमत्र तु जीवतिक्रियाया लक्षकत्वेऽपि तत्कार-

खलववहारा दीसन्ति दारुणा जइ वि तह वि धीराणम् ।
हिअअ-वअस्स-बहुमआ ण हु ववसाआ विमुज्झन्ति ॥ उदा० ११५ ॥ [२]

अत्र विमुह्यन्तीति ।

लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः ।
तदा सुधास्पदमभूदधुना तु ज्वरो महान् ॥ उदा० ११६ ॥ [३]

कपदस्य [illegible] पदवृत्त्यैव [illegible] इतिध्वनेः पदविषयता न कारकान्वितक्रियान्वयवाक्यविषयतेति गोकुलनाथः ॥ उदा० ११४ ॥ [१]

[illegible] व्यप्रयुक्त पदव्यङ्ग्यप्रधान [illegible] ध्वनिमुदाहरति—**खलववहारा** इत्यादि । [illegible] पद्यमिदम् । खलव्यवहारा **दृश्यन्ते दारुणा यद्यपि तथापि धीराणाम्** । हृदयवयस्यबहुमता **न खलु व्यवसाया विमुह्यन्ति**' इति संस्कृतच्छाया । यद्यपि दुर्जनानां व्यवहारा हृदयदारणा घोरा दृश्यन्ते तथापि स्वहृदयरूपेण मित्रेण अनुमोदिता धीराणां निश्चया न खलु [illegible] भवन्तीत्यर्थः । धीराः खलानां विषमान् व्यवहारान् जानाना अपि [illegible] किन्तु स्वान्तः मर्मविनान् सिद्धान्तान् न [illegible] । अत्र **विमुह्यन्तीति** पदम् अत्यन्ततिरस्कृतवाच्यकं सत् प्राधान्येन व्यञ्जकमिति पदविषयता ध्वनेरित्यभिप्रायः । विमोहस्य चेतनधर्मस्य व्यवसायेषु असम्भवाद् [illegible] पदं 'प्रतिवध्यन्ते' इत्यर्थं लक्षयति । एवं च धीराणां [illegible] अनन्यसामान्यम् उत्साहदार्ढ्यं व्यज्यते । विमुह्यन्तीत्यत्रोपसर्गस्य पृथक्पदत्वात् नैकं पद तथापि नेयं लक्षणा [illegible] वाक्यवृत्तिरिति पदविषयता ध्वनेरिति ज्ञेयम् ॥ उदा० ११५ ॥ [२]

[illegible] व्यङ्ग्ययुक्तं [illegible]—लावण्यं **तदित्यादि** । वियोगिन उक्तिरियम् । तस्याः **तद्** मदनुभवैकगोचरम् इदानी मया दुर्लभं **लावण्यम्** अवयवसंस्थानाभिव्यङ्ग्यम् [illegible] सौन्दर्यम्, असौ मदनुभवैकगोचरः इदानीमपि पुरः स्फुरन्तीव **कान्तिः** उज्ज्वलता, तद् मदनुभवैकगोचरं **रूपं** पृथक्पृथगवयवाश्रितं [illegible] **स** मदनुभवैकगोचरो **वचःक्रमः** वचनविन्यासविच्छित्तिः इतीदं सकलमेव तस्याः सान्निध्ये सति सुधास्पदमभूत्, इदानीं तया वियोगे जाते तु महान् ज्वर इव **ज्वरः** [illegible] अस्तीत्यर्थः । अत्र तदादिपदैरनुभवैकगोचरा अर्था बोध्यन्ते, ततो [illegible] सवेद्याः पदेऽयलोकोत्तरतास्मृतिर्व्यज्यते, सा च व्यज्यमाना स्मृतिर्विप्रलम्भं परां काष्ठां नयतीति विप्रलम्भव्यञ्जकवि[illegible] व्यङ्ग्यत्वेऽपि तदादिसर्वनाम्नां प्राधान्येन व्यञ्जकत्वात् पदविषयता[illegible]—अत्र **तदादिपदै**रित्यादि । तदादिशब्दानामनेकेषां व्यञ्जकत्वेऽपि अत्र कारकान्वितक्रियाया न व्यञ्जकतेति पदविषयत्वं ध्वनेर्बोध्यम् ॥ ११६ ॥ [३]

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यन्ते ।

यथा वा—

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥ उदा० ११७ ॥ [३]

अत्र भीताननेति । एतेन हि नीचैः शंसनविधानस्य युक्तता गम्यते ।
भावादीनां पदप्रकाश्यत्वेऽधिकं न वैचित्र्यमिति न तदुदाह्रियते ।

रुधिर-विसर-प्रसाधित-करवाल-कराल-रुचिर-भुज-परिघः ।
झटिति भ्रुकुटि-विटङ्कित-ललाट-पट्टो विभासि नृप भीम ॥ उ० ११८ ॥ [४]

अत्र भीषणीयस्य भीमसेन उपमानम् ।

न केवलं तदादिसर्वनाम्नामेव स्मृत्यादिव्यञ्जकता किन्त्वन्येषामपि पदानामित्याह-**मुग्धे मुग्धतयैवे**त्यादि । विप्रलम्भोदाहरणं प्रदर्श्य सम्भोगोदाहरणमाह **मुग्धे मुग्धतयैवे**-त्यादीति केचित् । स्मर्यमाणा एव पूर्वानुभूताः पदार्था व्यङ्ग्यध्वनिविषया इति न तत्र स्मृतेर्व्यङ्ग्यता, अतो न तत्र पदविषयता ध्वनेरित्युदाहरणान्तरानुधावनमित्यन्ये । मानोपदेशं कुर्वतीं सखीं प्रति नायिकाया भङ्ग्यन्तरेण प्रत्युक्तिरियम् । अमरुशतके पद्यमिदम् । हे **मुग्धे**, त्वया वर्तमानो भविष्यंश्च सर्वोऽपि कालो मुग्धाया धैर्यमानग्रहणा-नभिज्ञत्वादिभिः सहैव यापयितुं किमित्यारभ्यते ? मानं धारय, धैर्यं दृढं बद्ध्वा हृदये स्थापय; **प्रेयसि**, प्रियतमविषये सरलतां दूरे कुरु इत्येवं प्रकारेण सखीस्मारितस्वकर्तव्या नायिका **भीतानना** भयजनितविच्छायताकम्पादियुक्तमुखी सती सखीं प्रत्युत्तरमाह—ननु हे सखि, त्वं मन्दस्वरेण भाषस्व यतो हि उच्चैर्भाषणे मम हृदये वर्तमानो मत्प्रा-णेश्वर आकर्णयिष्यति इति । अत्र **भीताननेत्यस्य पदस्य** ध्वनिमूलकत्वविचारे, इतेर्लुप्त-षष्ठ्यन्तकत्वकल्पनात् भीताननेत्यस्य ध्वनिमूलकत्वमुपपादयति—**एतेन हीत्यादिना** । **एतेन** भीताननेतिपदेन भयस्याकृत्रिमत्वप्रकाशनेन 'नीचैः शंस' इति नायिकया यद् विधानं कृतं तस्य **युक्तता** स्वविप्रियं प्रियः कथञ्चिच्छृणुयादिति भयमिश्रितशङ्काजन्यत्वेन उचितता गम्यते । एवं च भीताननेतिपदव्यङ्ग्यभयशङ्काभ्याम् अकृत्रिमानुरागयुक् सम्भोगो भृशं प्रकृष्यते इति पदविषयता ध्वनेः ॥ उदा० ११७ ॥ [३]

भावादीनामित्यादिः फक्किका स्फुटार्था ।

शब्दशक्तिमूलव्यञ्जनायुक्तपदप्राधान्यम् अनुरणनरूपव्यङ्ग्योपमालङ्कारयुक्तं ध्वनि-काव्यमुदाहरति **रुधिरविसरे**त्यादि । हे **भीम** भयङ्कर नृप, रुधिरप्रवाहालङ्कृतेन खड्गेन शत्रूणां भयजनकेन मित्राणां रुचिरेण च भुज**परिघेण** युक्तः, झटिति भ्रुकुट्या उद्गमाद् विटङ्कायितेन (कपोतपालिकायितेन) पट्टिकाकारविशालललाटेन च युक्तस्त्वं शोभसे

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥ उ० ११९ ॥ [५]
काचित् सङ्केतदायिनमेवं मुख्यया वृत्त्या शंसति ।
सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः ।
आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाऽधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नाऽऽसितुम् ॥ उ० १२० ॥ [६]
अत्र वस्तुना कृतपरपुरुषपरिचया क्लान्ताऽसीति वस्तु अधुनापदद्योत्यं व्यज्यते ।

इत्यर्थः । अत्र **भीषणीयस्य** भयङ्करस्य प्रकृतस्य राज्ञो भीमसेन उपमानं प्रतीयते इत्याह—**अत्र भीषणीयस्येत्यादिना** । भीषणीय इत्यत्र 'कृत्यल्युटो बहुलम्' (अष्टा० ३।३।११३) इति प्रामाण्यादनीयरः कर्त्रर्थकता । भीमशब्दस्य भयङ्कर इत्यर्थो वाच्यः, मध्यमपाण्डवो भीमसेन [illegible] व्यङ्ग्या । सा च भीमपदेनैव प्राधान्येन व्यज्यते इति पदविषयता ध्वनेः । भीमपदस्य परिवृत्त्यसहत्वाच्च शब्दशक्तिमूलकत्वं व्यङ्ग्यस्य ॥ उदा० ११८ ॥ [४]

[illegible] ध्वनिकाव्यमुदाहरति—भुक्तिमुक्तिकृदित्यादि । अन्येषु जनेषु समीपे सत्सु उपपतौ आगते अप्रस्तुतागमन[illegible]व्याजेन तदागमनजमानन्दं प्रकाशयन्त्या उक्तिरियम् । स्वर्गादिभोगस्य मुक्तेश्च हेतुभूतः एकान्ततो हितोपदेशनतत्परः **सन् आगमो** वेदाविरुद्धः आगमः कस्य आनन्दप्रवाहं न करोति, सर्वस्यापि करोत्येवेति [illegible]र्थः । सुन्दरादि[illegible]स्य विरहदुःखमुक्तेश्च हेतुभूतः [illegible]: **सतः** प्रियस्य सुन्दरस्य आगमः कस्य अभिसारिकाजनस्य आनन्दप्रवाहं न करोति, सर्वस्यापि करोत्येवेति पारोक्ष्येण प्रकाशितोऽर्थः । काचिद् अभिसारिका साहित्यशास्त्रे मुख्यभूतया व्यञ्जनया वृत्त्या प्रकाशितेन अप्राकरणिकीकरणेन गुप्तेन पूर्वोक्तेन द्वितीयेनार्थेन उपपतिं प्रशंसन्तीदमाह—**काचित्संकेतदायिनमित्यादि** । अत्र सदागमशब्दस्य प्राधान्यात् पदविषयता ध्वनेः । सदागमपदस्य परिवृत्त्यसहत्वाच्च व्यङ्ग्यस्य शब्दशक्तिमूलकता ॥ उदा० ११९ ॥ [५]

[illegible] स्वतःसम्भविवस्तुव्यङ्ग्यवस्तुयुक्तं ध्वनिकाव्यमुदाहरति—सायं स्नानमित्यादि । उपपतिं संभुज्यागतां प्रति ज्ञातरहस्याया उक्तिरियम् । हे सखि, तव सौकुमार्यम् आश्चर्यकारि विद्यते येन सौकुमार्येण, त्वया सायं स्नानं कृतम्, तव अङ्गं चन्दनेन समालेपितमस्ति, इदानीं सूर्योऽस्ताचलं प्राप्तोऽस्ति, तवात्रागमनं च न रभसा किन्तु विलम्बपूर्वकं मन्दमन्दमेवागमम् इत्येवं क्लमकारणाभावेऽपि [illegible] मनसा शरीरेण च क्लान्ता असि, यतो हि तव नेत्रयुगलम् मीलनप्रवृत्तिरहितं सत् क्षणमपि स्थातुं न शक्नोतीत्यर्थः ।

तदप्राप्ति महादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥ उ० १२१ ॥ [७]

अत्र जन्मसहस्रैरुपभोक्तव्यानि कुकृत-सुकृत-फलानि वियोगदुःखचिन्ताह्लादाभ्यामनुभूतानीत्युक्तम्, एवं चाऽशेप-चय-पदद्योत्ये अतिशयोक्ती ।

क्षणदासावक्षणदा वनमवनं व्यसनमव्यसनम्
बत वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वम् ॥ उदा० १२२। ८

तत्र व्यञ्जकव्यङ्ग्यावर्थौ व्यञ्जने अधुनापदस्य प्राधान्यं यथा—अत्र वस्तुनैव ध्वनितम् । तव सौकुमार्यमाश्चर्यजनकं येनाऽधुना क्लान्तासीति वाक्यस्यैव व्यञ्जकत्वेऽपि अधुनैवाऽयं क्लमो नाऽन्यदा कदापि दृष्ट इति अयं परपुरुषोपभोगजन्य इति प्राधान्येन अधुनापदेन व्यज्यते इति पदविषयता ध्वनेरिति भावः ॥ उदा० १२० ॥ [६]

अर्थशक्तिमूलव्यञ्जनायुक्तपदप्रधानं स्वतःसम्भविअतिशयोक्त्यलङ्कारव्यङ्ग्ययुक्तं ध्वनिकाव्यमुदाहरति—**तदप्राप्ती**त्यादि । विष्णुपुराणे (५।१३।२१-२२) पद्ये इमे । इतः पूर्वमुक्ताभ्योऽन्या काचिद् गोपकन्यका तस्य श्रीकृष्णस्याप्राप्त्या यद् दुःखं तेन विलीनसकलपातका तस्य श्रीकृष्णस्य चिन्तनेन यो विपुल आह्लादस्तेन क्षीणानेकजन्मार्जितपुण्यसमूहा च सती परमात्मरूपं जगत्कारणं श्रीकृष्ण ध्यायन्ती सती प्राणसम्बन्धविच्छेदपूर्वकं मोक्षं गतेत्यर्थः । अत्र परमेश्वरवियोगजं दुःख तदनुध्यानजं सुखं च कुकृत-सुकृतफलराशितादात्म्येन अध्यवसिते इति निगीर्याध्यवसानरूपातिशयोक्तिद्वयम् अशेप-चयपदाभ्यां प्राधान्येन द्योत्यते इति पदविषयत्व ध्वनेर्बोध्यम् । ननु वियोगदुःख-चिन्तनसुखाभ्यां कथमशेषपापपुण्यक्षयः स्वफलभोगेनैव तत्क्षयनियमादिति वाच्यार्थसिद्धिविरोधिन्याः शङ्कायाः उक्तसुखदुःखयोरशेषकुकृतसुकृतफलराशिताादात्म्याध्यवसानेन समाधाने कृते एव वाच्यार्थसिद्धिरिति अतिशयोक्तिरूपव्यङ्ग्यस्य वाच्यसिद्ध्यङ्गत्वेन गुणीभावो न तु ध्वनित्वमिति चेद् न, उक्ताध्यवसायं विनाऽपि ज्ञानमाहात्म्याद् भगवद्ध्यानमाहात्म्याद् वा अशेषदुष्कृतसुकृतफलक्षयोपपत्तेरध्यवसायस्य वाच्यसिद्ध्यङ्गत्वात् ॥ उदा० १२१ ॥ [७]

अर्थशक्तिमूलव्यञ्जनायुक्तपदप्रधानं स्वतःसम्भव्यलङ्कारव्यङ्ग्यवस्तुयुक्तं ध्वनिकाव्यमुदाहरति—**क्षणदासा**वित्यादि । हे वीर, विस्मयास्पदमेतद् यत् त्वयि पराङ्मुखे (विपरीते) सति तव शत्रूणां कृते असौ सर्वेषां कृते विश्रान्तिक्षणदात्वेन प्रसिद्धा **क्षणदा** रात्रिरपि **अक्षणदा** क्षणदाभिन्ना (क्षणमुत्सवं विश्रान्तिक्षणं वा न ददातीत्यक्षणदा अनुत्सवदा), **वनं** काननम् **अवनं** वनभिन्नम् (अवतीत्यवनं रक्षकम्), **व्यसनं** विपत्तिः **अव्यसनं** व्यसनभिन्नम् (अभ्युदय [अविकालन] रूपम्) इति तव द्विषतां सर्वमेव विपरीतं जात-

अत्र शब्दशक्तिमूलविरोधाङ्गेनार्थान्तरन्यासेन 'विधिरपि त्वामनुवर्तते' इति सर्वपदद्योत्यं वस्तु ।

तुह वल्लहस्स गोसम्मि आसि अहरो मिलाणकमलदलो ।
इअ णववहुआ सोऊण कुणइ वअणं महीसंमुहम् ॥ उदा० १२३ ॥ [८]

अत्र रूपकेण त्वयास्य मुहुर्मुहुश्चुम्बनं तथा कृतं येन म्लानत्वमिति मिला-णादिपदद्योत्यं काव्यलिङ्गम् ।

एषु स्वतःसम्भवी व्यञ्जकः ।

राईसु चन्दधवलासु ललिअमप्फालिऊण जो चावम् ।
एकच्छत्तं विअ कुणइ भुअणरज्ज विजम्भन्तो ॥ उदा० १२४ ॥ [९]

मित्यर्थः । तत्र [illegible] आह—**अत्र शब्दशक्तीत्यादिना** । सर्वपदस्य प्रकृत-सर्वार्थकत्वेऽपि व्यञ्जनया विधेरपि प्रत्यायकत्वं बोध्यम् । अत्र सर्वपदस्य प्राधान्यात् पदविषयता ध्वनेः । शब्दशक्त्या व्यङ्ग्यस्य क्षणदा क्षणदाभिन्नेत्यादेर्विरोधस्य उपपाद-कत्वेन [illegible] उपपन्नो ज्ञेयः ॥ उदा० १२२ ॥ [८]

[illegible] स्वतःसम्भव्यलङ्कारव्यङ्ग्यालङ्कारयुक्तं ध्वनि-[illegible]—तुह वल्लहस्सेत्यादि । **'तव वल्लभस्य गोसर्गे आसीदधरो म्लानकमल-दलम् । इति नववधूः श्रुत्वा कृणोति वदनं महीसम्मुखम्'** इति संस्कृतच्छाया । गाथा-सप्तशत्या पद्यमिदम् । अद्य प्रभातकाले तव प्रियस्य अधरो म्लानकमलदलरूप आसीदिति सख्या उक्तं श्रुत्वा नववधूः (लज्जया) मुखं भूम्यभिमुखं कुरुते इत्यर्थः । अत्र अधरो म्लानकमलदलमिति रूपकेण म्लानताहेतुत्वेन परिचुम्बनस्य व्यञ्जनात् काव्यलिङ्गाल-ङ्कारो व्यङ्ग्य इत्याह—**अत्र रूपकेणेत्यादिना** ॥ उदा० १२३ ॥ [९]

सायं [illegible] चतुर्ष्वप्युदाहरणेषु व्यञ्जकवैशिष्ट्यमाह—**एषु स्वत** इत्यादिना । किन्त्वेषु व्यञ्जकार्थानां वस्तुतः स्वतस्सम्भवित्वं न वेति सुधीभिः परीक्ष-णीयम् ।

[illegible] कविप्रौढोक्तिमात्रसिद्धवस्तुव्यङ्ग्यवस्तुयुक्तं ध्वनि-[illegible]—**राईसु चन्देत्यादि** । **'रात्रीषु चन्द्रधवलासु ललितमास्फाल्य यश्चा-पम् । एकच्छत्रमिव कृणुते भुवनराज्य विजृम्भमाणः'** इति संस्कृतच्छाया । गाथासप्तशत्या पद्यमिदम् । मानिनीं प्रति इदानीं मानं निर्वोढुं दुष्कर इति वदन्त्याः सख्या उक्तिरियम् । चन्द्रेणोज्ज्वलासु रात्रिषु ललितं पौष्पं धनुः परामृश्यैव यो भुवनराज्यं वशवर्तित्वेन एकच्छ-त्रमिव करोति स कामः इदानीं **विजृम्भमाणः** अत्यन्तं [illegible] विस्फुरन्नस्ती-त्यर्थः । अत एव मानो दुर्धर इति भावः । अत्र उक्तेन वस्तुना 'ये कामिजनाः कामिनी-जनाश्च स्मरराजाज्ञापालकत्वेन कामयमानाः स्वं स्वं प्रार्थयन्ते तत्परितोषार्थं न कश्चि-दपि [illegible] मन् इदानीम् उपभोगप्रार्थनां प्रत्याचष्टे, अतो

अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कश्चिदपि तदादेश-पराङ्मुख इति जाग्रद्भिरुपभोगपरैरेव तैर्निशाऽतिवाह्यते इति 'भुवनराज्य'-पदद्योत्यं वस्तु प्रकाश्यते।

निशितशरधियाऽर्पयत्यनङ्गो दृशि सुदृशः स्वबलं वयस्यराले।
दिशि निपतति यत्र सा च तत्र व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः॥ उदा० १२५[११]

अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि प्रभवन्तीति व्यतिकरपद-द्योत्यो विरोधः।

वारिज्जन्ती वि पुणो सन्दावकदत्थिएण हिअएण।
थण-हर-वअस्सएण विसुद्धजाई ण चलइ से हारो॥ उदा० १२६ ॥ [१२]

अत्र विशुद्धजातित्वलक्षणहेत्वलङ्कारेण हारोऽनवरतं कम्पमान एवास्ते इति 'ण चलइ'-पदद्योत्यं वस्तु।

जाग्रद्भिरुपभोगपरैरेव कामिजनैरिदानीं निशा याप्यते इति प्राधान्येन भुवनराज्यपदेन व्यज्यते इति पदविषयता ध्वनेरित्यभिप्रेत्याह—**अत्र वस्तुनेत्यादि** ॥ उदा० १२४ ॥ [१०]

अर्थशक्तिमूलव्यञ्जनायुक्तपदप्रधानं कविप्रौढोक्तिमात्रसिद्धवस्तुव्यङ्ग्यालङ्कारयुक्तं ध्वनिकाव्यमुदाहरति—**निशितशरेत्यादि**। कामदेवः सकलकामिजनहन्तृत्वात् कुटिले यौवने जाते सति सुलोचनाया नयने अयं मम तीक्ष्णः शर इति बुद्ध्या स्वस्य सम्पूर्णं बलं निधत्ते, अत एव कामार्पितबला सा वामलोचना दृष्टिर्यस्यां दिशि निपतति तत्र वर्तमाने युवजने हसितरुदितजल्पितादयोऽवस्थाः परस्परमिश्रीभावं प्राप्य उत्कटतया उत्पद्यन्ते इत्यर्थः। पुष्पिताग्रा वृत्तम्। अत्र व्यञ्जकव्यङ्ग्यावर्थौ ध्वनेः पदविषयतां चाह—**अत्र वस्तुनेत्यादिना**। तत्रेत्युपात्ते एकस्मिन्नेव धर्मिणि हसितरुदितादयः परस्पर-विरुद्धावस्थाः प्रतीयन्ते इति विरोधस्य व्यङ्ग्यता व्यतिकरनिहिता बोध्या॥ उदा० १२५ ॥ [११]

अर्थशक्तिमूलव्यञ्जनायुक्तपदप्रधानं कविप्रौढोक्तिमात्रसिद्धालङ्कारव्यङ्ग्यवस्तु-युक्तं ध्वनिकाव्यमुदाहरति—**वारिज्जन्तो वीत्यादि**। '**वार्यमाणोऽपि पुनः सन्तापकदर्थितेन हृदयेन। स्तनभरवयस्यकेन विशुद्धजातिर्न चलत्यस्या हारः**।' इति संस्कृतच्छाया। गाथा-सप्तशत्यां पद्यमिदम्। कस्याश्चिन्नायिकायाः स्थितिर्वर्ण्यते। आलिङ्गने मम सुहृद् हारोऽपि वृथैव पीडित इति यः सन्तापस्तेन कदर्थितेन हृदयेन स्तनभरवयस्यकेन च पुनः पुनर्वार्ययाणोऽपि अस्या नायिकाया शुद्धमुक्ताफलघटितो हारः (स्तनभरवयस्यस्य निरन्तरा पीडा मा भूदिति) नात्यन्तं दूरमपसरतीत्यर्थः। अपसरणाय मित्रप्रार्थनायां सत्यामपि मित्रपीडावसरे मित्रापरित्यागे हेतुभूतस्य विशुद्धाभिजनत्वस्य वाक्यपदार्थ-त्वाद् निष्पन्नेन हेत्वलङ्कारतया प्राचीनानामभिमतेन काव्यलिङ्गेन अस्या रतिविच्छि-त्तिरेतादृशी अस्ति यदस्या हारोऽनवरतं कम्पमान एवास्ते इति वस्तुप्राधान्येन 'ण चलइ'-

सो मुद्धसामलङ्गो धम्मिल्लो कलिअ-ललिअ-णिअ-देहो ।
तीए खन्धाहि बलं गहिअ सरो सुरअ-सङ्गरे जअइ ॥ उदा० १२७ ॥ [१३]

अत्र रूपकेण मुहुर्मुहुराकर्षणेन तथा केशपाशः स्कन्धयोः प्राप्तो यथा रति-विनिवृत्तावपि अनिवृत्ताभिलाषः कामुकोऽभूदिति [illegible] विभावना ।

एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरः (व्यञ्जक) ।

णवपुण्णिमामिअङ्कस्स सुहअ को त्तं सि भणसु मह सच्च ।
का सोहग्ग-समग्गा पओसरअणिव्व तुह अज्ज ॥ उदा० १२८ ॥ [१४]

अत्र वस्तुना मयीवान्यस्यामपि प्रथममनुरक्तस्त्वं न तत इति णवेत्यादि-[illegible] वस्तु व्यज्यते ।

पदेन द्योत्यते इत्याह—अत्र विशुद्धेत्यादिना । 'ण चलइ' इत्यस्य वाक्यभिन्नत्वात् पदत्वेन व्यवहारो न वस्तुत एकपदत्वात् ॥ उदा० १२६ ॥ [१२]

[illegible] कविप्रौढोक्तिमात्रनिष्पन्नशरीरालङ्कारेण व्यङ्ग्यालङ्कार-युक्तं [illegible]—सो मुद्धेत्यादि । 'स मुग्धश्यामलाङ्गो धम्मिल्लो कलित-ललितनिजदेहः । तस्याः स्कन्धाद् बलं गृहीत्वा स्मरः सुरतसङ्गरे जयति' इति संस्कृत-च्छाया । [illegible] विषमबाणलीलायां गाथासप्तशत्यां च पद्यमिदम् । स सुन्दरश्यामलाङ्गः प्राप्तमनोहरधम्मिल्लरूपनिजदेहः संयतकेशरूपः स्मरः तस्या नायि-कायाः स्कन्धात् स्कन्धाख्यसेनानिवेशविशेषरूपाद् बलं (सामर्थ्यरूपां सेनाम्) गृहीत्वा सुरतरूपे युद्धे जयतीत्यर्थः । यथा युद्धे बलक्षयेण शिथिलीभूतोऽपि कश्चित् स्कन्धावारात् साहाय्यार्थमागता सेना प्राप्य दृढो भवति तथैव पूर्वं [illegible] कर्षणेन स्कन्धे पतितो केशपाशः स्मररूपः सुरतेन शिथिलीभूतोऽपि [illegible] प्राप्य [illegible]-रूपं बलमुपलभ्य विजयी भवति; अर्थात् पुनः सुरतेहां जनयितुं समर्थो भवतीति भावः । अत्र धम्मिल्लः स्मर इति सुरतसङ्गरे इति च रूपकालङ्काराभ्यां कविप्रौढोक्तिमात्र-सिद्धाभ्याम् अभिलाषहेत्वभावेऽपि अभिलाषोदयाद् निष्पन्ना विभावना व्यज्यते इत्याह—**अत्र रूपकेणे**त्यादिना । रूपकेणेत्यत्र जातावेकवचनम् ॥ उदा० १२७ ॥ [१३]

शाईसु चन्देत्यादिषु अनुपदं गतेषु चतुर्षूदाहरणेषु व्यञ्जकवैशिष्टयमाह —**एषु कवे**[illegible] ।

[illegible] कविनिबद्धवक्तृप्रौढोक्तिमात्रसिद्धवस्तुना व्यङ्ग्य-वस्तुयुक्तं ध्वनिकाव्यमुदाहरति—**णवपुण्णिमे**त्यादि । '**नवपूर्णिमामृगाङ्कस्य सुभग कस्त्व-मसि भण मम सत्यम् । का सौभाग्यसमग्रा प्रदोषरजनीव तवाद्य**' इति संस्कृतच्छाया । हे सुभग, त्वं नवपूर्णिमाचन्द्रस्य भ्राता वा सुहृद् वा कोऽसि ? तद् मां सत्यं भण, चन्द्रस्य प्रदोषरजनीव नव का नायिका अद्य [illegible] जाता ? इत्यर्थः । अत्र [illegible] यथा पूर्णिमाचन्द्रः प्रदोषे एव रक्ताभो भवति पश्चाद् गौरस्तथैव

सहि, णवणिहुवणसमरम्मि अङ्कवाली सहीए णिविडाए।
हारो णिवारिओ च्चिअ उच्छेन्तो तदो कह रमिअम् ॥ उदा० १२९ ॥१५

अत्र वस्तुना हारच्छेदानन्तरमन्यदेव रतमनुभूतम्, ननु कथय कीदृग् इति व्यतिरेकः 'कह' पदगम्यः।

पविसन्ती घरवारं विवलिअ-वअणा विलोइऊण पहम्।
खन्धा घेत्तूण घडं हा हा णट्ठो त्ति रुअसि सहि किति ॥उदा० १३०॥ [१६]

त्वमपि प्रथमं किञ्चित्कालमेव अनुरक्तो भवसि, ततः पश्चात् विरक्तो भवसि, यथा प्रदोषे किञ्चित्कालमेव रजनी चन्द्ररागरक्ता भवति न पश्चात् तथैव नव या कापि नायिका प्रथमं किञ्चित्कालमेव लब्धानुरागा भवति न पश्चादिति व्यतिरेकालङ्कारोऽपि व्यज्यते इत्याह—**अत्र वस्तुने**त्यादिना। प्रदोषरजनीवेत्यस्य स्थाने प्रदोषरजनी नव इति प्रयोगेऽपि पूर्वोक्तव्यङ्ग्यप्रतीतिर्भवतीति उपमानैरपेक्ष्येण वस्तुनो व्यञ्जकत्वं बोध्यम् इति केचित्। अन्ये तु पूर्वार्धमेवोदाहरणम् उत्तरार्धन्तु नैव; तथापि वृत्तिकृता प्रसङ्गादुत्तरार्धव्यङ्ग्यमपि विवृतमित्याहुः ॥ उदा० १२८ ॥ [१४]

अर्थशक्तिमूलव्यञ्जनायुक्तपदप्रधानं कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यालङ्कारव्यङ्ग्ययुक्तं ध्वनिकाव्यमुदाहरति—**सहि, णवे**त्यादि। '**सखि, नवनिधुवनसमरे अङ्कपालीसख्या निबिडया। हारो निवारित एवोच्छिद्यमाणस्ततः कथं रतम्**' इति संस्कृतच्छाया। गाथा-सप्तशत्यां पद्यमिदम्। नवोढां प्रति विश्रब्धायाः सख्या उक्तिरियम्। हे सखि, सुरतयुद्धे दृढया आलिङ्गनरूपया (इष्टविधायिन्या) सख्या निरन्तरालिङ्गनविधानेनोच्छिद्य-माणो मुक्ताहारस्त्रोटयित्वा निवारित एव, ततस्त्वया नवोढयाऽपि कथं प्रौढाङ्गनातोऽपि विलक्षणत्वेन रतमित्यर्थः। अत्र वस्तुना हारच्छेदानन्तरं रतमन्यदेवानुभूतमिति वस्तु व्यज्यते, तच्च रत 'कहं'-पदप्रतिपाद्यजिज्ञासाविषयत्वाद्, विलक्षणस्यैव च जिज्ञास्यत्वाद् अन्यरत-विलक्षणमिति प्रतीयते इति व्यतिरेकालङ्कारो व्यङ्ग्य इत्याह—**अत्र वस्तुने**त्यादिना। निधुवनसमरे इत्यत्र अङ्कपालीसख्या इत्यत्र च वर्तमानस्यापि रूपकस्य व्यञ्जनायामनु-पयोगाद् वस्तुव्यङ्ग्यत्वेन व्यतिरेकोऽयमुदाहृतो बोध्यः ॥ उदा० १२९ ॥ [१५]

अर्थशक्तिमूलव्यञ्जनायुक्तपदप्रधानं कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्य-वस्तुयुक्तं ध्वनिकाव्यमुदाहरति—**पविसन्ती घरवार**मित्यादि। '**प्रविशन्ती गृहद्वार विव-लितवदना विलोक्य पन्थानम्। स्कन्धे गृहीत्वा घटं हा हा नष्ट इति रोदिषि सखि किमिति।**' इति संस्कृतच्छाया। बेबरसम्पादितायां गाथासप्तशत्यां (९६८) पद्यमिदम्। जलानयनव्याजेन सङ्केतस्थानं गत्वा तत्र प्रियं प्रतीक्ष्य चिरादपि तस्मिन्ननागते जलघटं स्कन्धे निधाय प्रत्यागतां मार्गे संकेतस्थानं गच्छन्तं स्वप्रियकामुकं दृष्ट्वा पुनर्जलानयन-व्याजेन सङ्केतस्थानं गन्तुं गृहद्वारे स्खलनव्याजेन घटं पातयित्वा लोकवञ्चनार्थं रुदतीं सखीं प्रति तदभिप्रायज्ञायाः सख्या उक्तिरियम्। हे सखि, गृहद्वारं प्रविशन्ती त्वं स्कन्धे

अत्र हेत्वलङ्कारेण तत्रोत्कण्ठितमनं गच्छन्तं दृष्ट्वा यदि तत्र गन्तुमिच्छसि तदाऽपरं घटं गृहीत्वा गच्छेति वस्तु 'क्ति'—पदव्यङ्ग्यम् ।

यथा वा—

विहलङ्खलं तुमं सहि दट्ठूण कुडेण तरलतरदिट्ठिम् ।
वारप्फंस-मिसेण अ अप्पा गुरुओ त्ति पाडिअ विहिणो ॥
उदा० १३१ ॥ [१६]

अत्र नदीकूले लतागहने कृतसङ्केतमप्राप्तं गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीगमनाय द्वारोपघातव्याजेन बुद्धिपूर्वकमनाकुलया त्वया घटः स्फोटित इति मया चेतितम्, तत् किमिति नाश्वसिषि, तत् समीहितसिद्धये व्रज, अहं ते श्वश्रूनिकटे सर्वं समर्थयिष्ये इति द्वारस्पर्शव्याजेनाभिव्यक्तं वस्तु ।

जोह्लाए महुरसेण अ विइण्णतारुण्ण-उस्सुअ-मणा सा ।
वुड्ढा वि णवोढ व्विअ पर-वहुआ अहह हरइ तुह हिअअम् ॥
उदा० १३२ ॥ [१७]

घटं गृहीत्वा निर्गच्छन्तं भर्ता पन्थानं विलोक्य हा हा घटो नष्ट इति किमिति शोचिषि ? इत्यर्थः । समीहितसिद्धयेऽपरं घटं गृहीत्वा गच्छ, अहं ते श्वश्रूनिकटे सर्वं समर्थयिष्ये इति भावः । नाशस्य शोकहेतुत्व लाभाज्जातेन हेत्वपरनामधेयेन काव्यलिङ्गेन अलङ्कारेण वस्तुनोऽभिव्यक्तिः—अत्र हेत्वलङ्कारेणोक्तदिशा । श्रीधरेण त्विदमुदाहरणं ... ॥ उदा० १३० ॥ [१६]

यद्यप्यत्रोदाहरणे वस्तुन उपनायकाभिसरणाभिलाषो घटनाशहेतुत्वेनाभिहित इति काव्यलिङ्गस्य ... सम्भवति तथापि घटनाशस्याऽपि श्वश्रूभर्त्सनादिभयजनकत्वेन शोकहेतुतायाः सम्भवात् काव्यलिङ्गगम्य स्वतःसम्भवित्व- ... यथा वा—विहलङ्खलं तुममित्यादि । **विशृङ्खलां त्वां सखि दृष्ट्वा कुटेन तरलतरदृष्टिम् । द्वारस्पर्शमिषेण चात्मा गुरुक इति पातयित्वा विभिन्नः ।'** इति संस्कृतच्छाया । वेबरसम्पादितायां गाथासप्तशत्यां (८८०) पद्यमिदम् । पुनः सङ्केतस्थानगमनाय निमित्तमुद्भावयन्तीं नायिकां प्रति विदग्धायाः प्रतिवेशिन्या उक्तिरियम् । हे सखि भारात् विकला चञ्चलदृष्टिं त्वां दृष्ट्वा घटेन अति गुरुकोऽयं मम देहः एतादृश्याः कमनीयाङ्ग्या नायिकाया अपि दुःखदायक इति बुद्ध्या स्वदेहो (घटः) द्वारस्पर्शव्याजेन पातयित्वा चूर्णीकृत इत्यर्थः । नायं घटनाशस्तया कृतः किन्तु अतिगुरुतया तवाङ्गस्पर्शात् घटेनैव स्वात्मा स्फोटित इत्यपह्नुत्यलङ्कारेण विदग्धप्रतिवेशिन्या प्रौढोक्तिमात्रसिद्धेन व्यञ्जितं वस्तु प्रकारान्तरनिर्देशपूर्वकमाह—**अत्र नदीकूल**इत्यादिना । ... पदस्य प्राधान्यात् पदविषयता ध्वनेः ॥ उदा० १३१ ॥ [१६]

यथा गृध्रगोमायुसंवादादौ—

अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले ।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे ।
न चेह जीवितः कश्चित् कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥ उदा० १३३ ॥

इति दिवा प्रभवतो गृध्रस्य पुरुषविसर्जनपरमिदं वाक्यम् ।

आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत साम्प्रतम् ।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात् कथं मूढास्त्यजध्वमविशङ्किताः ॥ उदा० १३४ ॥

इति निशि विजृम्भमाणस्य गोमायोर्जनव्यावर्तननिष्ठं च वचनमिति प्रबन्ध एव प्रथते ।

[illegible] ध्वनिकाव्यमुदाहरति—**अलं स्थित्वेत्यादि** । महाभारते शान्तिपर्वणि [illegible] त्रिपञ्चाशदधिकशततमेऽध्याये रात्रावान्ध्येनासमर्थस्य दिवैव मृतकमांसं भोक्तुं समर्थस्य गृध्रस्य मृतं बालमादाय श्मशाने आगतान् तद्बन्धून् स्नेहमोहेन बालं सद्योऽत्यजतः प्रत्युक्तिरियं न तु गृध्रस्य गोमायुं प्रतीति गृध्रगोमायुसंवादपदं तदुक्तिमात्रपरम्, न तु परस्परोद्दिष्टवाक्यपरम् । यद्यपि पारिखपाठे अस्योदाहरणस्य द्वितीयचतुर्थौ अर्धकौ न स्तः तथापि महाभारते चित्रशालासंस्करणे तु तौ पठ्येते (अ० १५३, श्लो० ११-१२) । हे जनाः, गृध्रगोमायुपूर्णे इतोऽमुतश्च वर्तमानैः बहुभिः साङ्गैः शरीरास्थिभिः युक्ते दारुणे सर्वप्राणिभयजनकेऽस्मिन् श्मशाने न तिष्ठत, **कालधर्मं** मृत्युं प्राप्तः प्रियो वा द्वेष्यो वाऽपि कश्चिदपीह पुनर्जीवितो न दृष्टः, प्राणिनां गतिरीदृशी एवास्तीत्यर्थः । शव किन्तु आलिङ्गथ, त्यजत शीघ्रमेवेति भावः । अत्र गृध्रवचनरूपप्रबन्धस्य वस्तुरूपेण वाच्यार्थेन शवविसर्जनं कुरुतेति वस्तु व्यज्यते इत्याह—इति **दिवेत्यादिना** । गृध्रवचनरूपस्य महाभारतस्योक्तस्थले वर्तमानस्य प्रकरणरूपस्य प्रबन्धस्य प्रतिनिधिरूपेणेमे पद्ये अत्रोद्धृते; अतो वस्तुतः [illegible] तु तत्रस्थं सर्वमेव प्रकरणमिति मम प्रतिभाति ॥ उदा० १३३ ॥

[illegible]—**आदित्योऽयमित्यादि** । महाभारते चित्रशालासंस्करणे तु [illegible] श्लोकः शान्तिपर्वणः त्रिपञ्चाशदधिकशततमस्याध्यायस्य [illegible] इम कनकवर्णाभमित्यादिः श्लोकस्तु रूपान्तरेण पञ्चषष्टितमश्लोकरूपेण प्राप्यते । इदमप्युदाहरणं पूर्वमिव मूलप्रकरणप्रतिनिधिरूपमेव । [illegible] गृध्रवचनानन्तरं शवं [illegible] मृतबालबन्धून् प्रति गोमायोरुक्तिरियम् । हे मूर्खाः, अयमादित्यः अनस्तंगत एवास्ति, अतः साम्प्रतं स्नेहानुरूपम् अपरित्यागरूपं कार्यं

प्रेयान् सोऽयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद् यावन्न यात्युन्मनाः ।
तावत् प्रत्युत पाणिसम्पुटलसन्नीवीनिबन्धं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥ उदा० १३६ ॥

अत्र पदानीति न तु द्वाराणि ।

तिङ्सुपोः—

पथि पथि शुकचञ्चूचारुरागाङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्च ।
नरि नरि किरति द्राक् सायकं पुष्पधन्वा
पुरि पुरि च निवृत्ता मानिनीमानचर्चा ॥ उदा० १३७ ॥

[illegible] शृङ्गार [illegible]—अत्र जयतीत्यादिना । स्थगनव्यापार. पिधानव्यापारः ढक्कनव्यापार इति यावत् । 'रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया तद्वर्णनं हि पित्रोः सम्भोगवर्णनमिव अत्यन्तमनुचितम्' इति सप्तमे [illegible] इति अवधेयमत्र विवेचकैः ॥ उदा० १३५ ॥

[illegible] व्यङ्ग्यरसयुक्तं ध्वनिकाव्यमुदाहरति—प्रेयान् सोऽयमित्यादि । [illegible] (३।२।१५) उदाहृतं पद्यमेतत् । मम प्रणयापराधं क्षमस्व नाहं पुनरित्थं [illegible] शपथपूर्वकं कान्तायाः पादयोरानतः यः प्रियः कान्तया यदि नवेममपराधं सहेय तदाहं जारजा स्याम् इत्यादि[illegible]पाकृतो विमनाः सन् वासभवनाद् द्वित्राण्येव पदानि यावन्न याति तावदेव, उपेक्षायाः का कथा, पाणिसम्पुटे लसन् नीवीनिबन्धो यस्मिन् कर्मणि यथा स्यात् तथा धावित्वैव प्रियसमीपं गत्वा प्रणाम[illegible] सोऽयं प्रियस्तया कान्तया धृतः, अहो, प्रेम्णो गतिरतिकुटिलाऽस्तीत्यर्थः । अत्र [illegible] उत्कण्ठातिशयव्यक्तिद्वारा [illegible] निमित्तं भवती[illegible]—अत्र पदानीत्यादिना । प्राचीनेषु हर्म्यादिषु वास्तुनिवेशविशेषाद् बहूनि द्वाराण्यतीत्य गर्भगृहं प्राप्यते [illegible] द्वित्राण्येव द्वाराणि यावन्न याति इत्येतादृशोऽपि प्रयोगः कथञ्चित्सम्भवी ज्ञेयः ॥ उदा० १३६ ॥

तिङ्सुब्भ्यां [illegible] पदैकदेशाभ्यां निमित्तभूताभ्यां व्यङ्ग्येन रसेन युक्तं ध्वनि[illegible]—पथि पथीत्यादि । [illegible] । वाटे वाटे शुक-तुण्डचार्वी अङ्कुराणाम् आभा अस्ति, दिशि दिशि लताना नर्तकः पवनश्चास्ति, कामदेवश्च, मनुष्ये मनुष्ये क्षिप्रं क्षिप्रं बाणान् क्षिपति, प्रतिपुरं मानिनीनां मानस्य वार्ताऽपि निवृत्तेत्यर्थः । [illegible] छन्दसि मालिनी वृत्तम् । अत्र माननिवृत्तिहेतुभूतायाः बाणविकिरणक्रियायाः साध्यमानत्वं तिङा द्योत्यते, माननिवृत्तेः सिद्धत्वं च सुपा द्योत्यते, ततश्च सायकविकिरणात् प्रागेव मानो निवृत्त इति प्रतीयते, ततो वसन्तस्योद्दीपकत्वातिशयो व्यज्यते,

अत्र किरतीति किरणस्य साध्यमानत्वं निवृत्तेति निवर्त्तनस्य सिद्धत्वं तिङा सुपा च, तत्रापि क्तप्रत्ययेनातीतत्वं द्योत्यते ।

यथा वा—

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने मानमधुना ॥ उदा० १३८ ॥

अत्र लिखन्निति, न तु लिखतीति, तथा आस्ते इति, न तु आसित इति, अपितु प्रसादपर्यन्तमास्ते इति; भूमिमिति, न तु भूमाविति, न हि बुद्धिपूर्वकं परं किंचिद् लिखतीति तिङ्-सुब्-विभक्तीनां व्यङ्ग्यम् ।

सम्बन्धस्य यथा—

स च शृङ्गाररसोत्कर्षे पर्यवस्यतीति तिङ्सुपोः रसव्यञ्जननिमित्तत्वं बोध्यमित्यभिप्राये-णाऽऽह—**अत्र किरतीत्यादि** । किरतीत्यत्र कर्तरि प्रत्यय इति साध्यमानत्वं न वाच्यं किन्तु व्यङ्ग्यम्, एवं प्रातिपदिकार्थमात्रविहितया प्रथमया तद्गतं सिद्धत्वं द्योत्यते, कर्मणि विहितेन क्तप्रत्ययेन निवर्तनस्यातीतत्वं द्योत्यते इति बोध्यम् ॥ उदा० १३७ ॥

तिङ्-सुब्-विभक्तिनिमित्तध्वनिभिर्व्यक्तेन विप्रलम्भशृङ्गारेण युक्तं ध्वनिकाव्यमुदा-हरति—**यथा वा-लिखन्नास्ते भूमिमित्यादि** । अमरुकशतके मानवतीं प्रति सख्या उक्ति-रियम् । हे निर्दये सखि, तव प्राणतुल्यो दयितोऽधोमुखो भूमिं लिखन् बहिरास्ते, तव कारणादेव त्वत्सख्यो निराहाराः सततरोदनोच्छूननयनाश्च सन्ति, पञ्जरस्थैः शुकैरपि हसनं पठनं चेत्यादि सर्वं त्वद्विषमावस्थाकारणादेव परित्यक्तम्, तव च अवस्था इयम् (मानदुःखात्मवदनाद्युपलक्षिता) अस्ति, अतोऽधुना मानपरिपन्थिनि वसन्तसमये मानं त्यजेत्यर्थः । अत्र तिङ्-सुब्-विभक्तीनाम् उक्तरूपव्यङ्ग्यार्थव्यञ्जनद्वारा विप्रलम्भ-शृङ्गारव्यञ्जकतां ध्वनयन्नाह—**अत्र लिखन्नित्यादिना** । लिखन्निति शत्रन्तेनोक्ता लेखन-क्रिया आसनक्रियायां कर्तरि च गुणीभूता लेखने बुद्धिपूर्वकत्वाभावमवगमयन्ती लेखक-स्यान्यमनस्कतां द्योतयति, लिखतीति प्रयोगस्तु लेखने मुख्यतां बुद्धिपूर्वकत्वं चावगमये-दिति भावः । भूमौ लिखन्नास्ते इति प्रयोगे भूमौ बुद्धिपूर्वं किञ्चिल्लिखतीति गम्येत, भूमिं लिखन्निति प्रयोगे तु नान्यत् किञ्चिल्लिखति रेखाचित्रादिकम् किन्तु भूमिमेव लिखतीत्यन्यमनस्कता गम्यते इति भावः । अवशिष्टवृत्त्यर्थः स्फुटः । तिङ्सुपोः शतृप्रत्य-यस्यापि व्यञ्जकत्ववैशिष्ट्यप्रदर्शनम् प्रसङ्गागतं तिङादेशलट्स्थानीयत्वेन तिङ्त्वाभिमाना-दागतं वेति बोध्यम् । तिङ्सुब्-विभक्तीनामिति बहुवचनं शतुस्तिङ्त्वाभिमाने उपपन्नतरं भवति ॥ उदा० १३८ ॥

अत्र गुणग्रहणादीनां बहुत्वम् प्रेम्णश्चैकत्व द्योत्यते ।

पुरुषव्यत्ययस्य यथा—

रे रे चञ्चललोचनाञ्चितरुचे चेतः प्रमुच्य स्थिर—
प्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि ।
किं मन्ये विहरिष्यसे बत हतां मुञ्चान्तराशामिमा-
मेषा कण्ठतटे कृता खलु शिला संसारवारांनिधौ ॥ उदा० १४२ ॥

अत्र प्रहासः

पूर्वनिपातस्य यथा—

येषां दोर्बलमेव दुर्बलतया ते संमतास्तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः ।
ये क्ष्माशक्र पुनः पराक्रमनयस्वीकारकान्तक्रमा-
स्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम् ॥ उदा० १४३॥

[illegible] प्रेम्णश्च एतादृशमवसानं जातमित्यर्थः । तत्र गुणग्रहणा-दिशब्देषु बहुवचनैः [illegible] प्रतीते प्रेमशब्दे एकवचनेन उभयचित्तवृत्त्येकीभावस्य लाभाच्च पूर्वमुत्कर्षस्य परां कोटिं प्राप्तत्वेन प्रतीतः प्रेमा इदानीं विप्रलम्भमुत्कृष्टं व्यञ्जयतीति बहुवचनैकवचन[illegible] [illegible]— **अत्र गुणे**त्यादि॥ उदा० १४१ ॥

[illegible] व्यक्तेन शान्तरसेन युक्तं [illegible]-रति—**रे रे चञ्चले**त्यादि । चञ्चललोचनाया गमितोऽभिलाषो येन तादृशं रे रे मनः त्वं स्थिरप्रेमयुक्तं निरतिशयमहत्त्वयुक्तं ब्रह्मभावं परित्यज्य हरिणाक्षीमालोक्य किमिति नृत्यसि ? किं तया हरिणाक्ष्या सह विहरिष्ये इति मन्यसे ? दयनीयां दशां प्राप्तोऽसि, क्षिप्त्वा इमां कुत्सिताम् अन्तराशाम्, यतो हि एषा हरिणाक्षी संसारसमुद्रे तरणाय कण्ठे बद्धा महती शिला खलु इत्यर्थः । 'विहरिष्ये इति मन्यसे' इत्यर्थे 'मन्ये विहरिष्यसे' इति पुरुषव्यत्ययेन प्रयोगः उपहासद्योतनाय तथा च पाणिनिः—'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च' इति (१।४।१०६) । अत्रोक्तः पुरुषव्यत्यय उपहासं व्यनक्ति, तेन च शान्तो रसो व्यज्यते इत्याशयेनाह—**अत्र प्रहास** इति ॥ उदा० १४२ ॥

पूर्वनि[illegible]पदैकदेशरूपाद् निमित्ताद् व्यक्तेन भावेन युक्त [illegible]-रति—**येषां दोर्बलमेवे**त्यादि । कश्चित् राजानं स्तौति । येषां राज्ञां [illegible] न नीति-बलं ते दुर्बलतयैव सम्मता नीतिज्ञानाम्, प्रायः केवलनीतिस्तत्प्रतिपादिता व्यवहाररीतिश्च शरणं येषां तैरपि पार्थिवैः किं कार्यं स्यात्; हे पृथ्वीन्द्र पराक्रमनययोः स्वीकारेण कमनीयः **क्रमो**ऽभिषेणनं येषां ते नृपास्तु नैव स्युर्जगति, **परम्** यदि कुत्रचित् स्युरपि तथापि त्रिषु लोकेषु भवादृशाः प्रशस्ता द्वित्रा एव स्युरित्यर्थः । भूलोके तु त्वमेक एव

अत्र पराक्रमस्य प्राधान्यमवगम्यते ।

विभक्तिविशेषस्य यथा—

प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम् ।
दिवसेन तु नरप भवानयुद्ध विधिसिद्धसाधुवादपदम् ॥ उदा० १४४ ॥

अत्र दिवसेनेत्यपवर्गतृतीया फलप्राप्तिं द्योतयति ।

भूयोभूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था ।
साक्षात् कामं नवमिव रतिर्मालती माधव यद्
गाढोत्कण्ठा लुलितलुलितैरङ्गकैस्ताम्यतीति ॥ उदा० १४५ ॥

तादृशः प्रशस्तोऽस्तीति भावः । अतिधृतौ छन्दसि शार्दूलविक्रीडितं वृत्तम् । अत्र अल्पाच्तरं नरपशब्दं विहाय पराक्रमशब्दस्य पूर्वं प्रयोगात् पराक्रमस्याभ्यर्हितत्वं ज्ञायते, अभ्यर्हितपराक्रमवत्त्वेन राज्ञोऽप्यभ्यर्हितत्वं प्रतीयते, ततश्च चाटुकारस्य राजविषयकरतिभावो व्यज्यते इत्याशयेनाह—**अत्र पराक्रमस्येत्यादि** । इदमुदाहरणं प्रकृतेर्व्यञ्जननिमित्ततायाः प्रदर्शनस्य प्रकरणे उपन्यसनीयं न तु प्रत्ययस्य प्रकरणे, अनेन तु ग्रन्थकारेण भूम्नाऽऽनन्दवर्धनानुसारेण उदाहरणक्रमे सम्यगवधानं न कृतमित्यत एवेदमुपन्यस्तम् ॥उदा०१४३॥

विभक्तिविशेषात्मकप्रत्ययैकदेशरूपाद् निमित्ताद् व्यक्तेन भावेन युक्तं ध्वनिकाव्यमुदाहरति—प्रधनाध्वनीत्यादि । हे नृप, धीर-वीर-धनुषां ध्वनिभिर्युक्ते संग्रामपथे तव शत्रुभिर्दिवसमभिव्याप्य युद्धमकारि, भवाँस्तु दिवसेन युद्धविधौ सिद्धानां साधुवादस्थानं यथा स्यात् तथा (अथवा विधेः सिद्धानां च साधुवादपदं यथा स्यात् तथा) युद्धमकार्षीदित्यर्थः । अत्र दिवसेनेत्यपवर्गतृतीयया फलप्राप्तिर्द्योत्यते, ततो राज्ञो विनयित्वेनोत्कृष्टत्वं गम्यमानं स्तोतृ राजविषयकं रतिभावं द्योतयतीत्यभिप्रायेणाह—**अत्राऽपवर्गतृतीययेत्यादि** ॥ उदा० १४४ ॥

कृत्तद्धितप्रत्ययात्मकप्रत्ययैकदेशनिमित्ताद् व्यक्तेन विप्रलम्भशृङ्गारेण युक्तं ध्वनिकाव्यमुदाहरति—**भूयो भूय** इत्यादि । मालतीमाधवे प्रथमेऽङ्के मालतीधात्रेय्या लवङ्गिकाया [illegible] कामन्दक्या वचनमिदम् । भवनस्य वलभीप्रदेशे शुद्धान्ते वा यत् तुङ्गं वातायनं तत्र स्थिता मालती सन्निहितेन नगरीरथ्यामार्गेण वारं वारं पर्यटन्तं माधवं कामपत्नी हरकोपानलकृतशरीरदाहानन्तरमुत्पन्नं नवं काममिव साक्षात् पुनः पुनर्दृष्ट्वा गाढया माधवप्राप्तिविलम्बजन्यया उत्कण्ठया म्लानैः रमणीयैश्च दयनीयैरङ्गैरुपलक्षिता **ताम्यति** माधवसमागमं काङ्क्षति इति यत् तत् कथितमेव नो लवङ्गिकयेति पूर्ववाक्यान्वितोऽर्थः । अत्र अङ्गकैरित्यत्र कप्रत्ययेन अभिलाषविप्रलम्भप्रभवमङ्गानां रमणीयकानुकम्प्य किमपि शोच्यत्वं द्योत्यते, ततश्च विप्रलम्भशृङ्गार उत्कृष्टतया प्रतीयते इत्यभिप्रेत्याह—**अत्रानुकम्पेत्यादि** । **अनुकम्पावृत्तेः** अनुकम्पारूपपरशब्दार्थाभिधायकस्य ॥ उदा० १४५ ॥

अत्र अनुकम्पावृत्तेः [illegible] ।

> परिच्छेदातीतः सकलवचनानामविषयः
> पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
> विवेकप्रध्वंसादुपचितमहामोहगहनो
> विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥ उदा० १४६ ॥

अत्र प्रशब्दस्योपसर्गस्य ।

> कृतञ्च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः ।
> तमांसि तिष्ठन्ति हि तावदंशुमान् न यावदायात्युदयाद्रिमौलिताम् ॥उदा० १४७॥

अत्र तुल्ययोगिताद्योतकस्य च इति निपातस्य ।

> रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
> मस्मद्भाग्यविपर्ययाद् यदि परं देवो न जानाति तम् ।

उपसर्गरूप-समस्तपदैकदेशाद् **निमित्ताद्** व्यक्तेन विप्रलम्भशृङ्गारेण युक्तं ध्वनिकाव्यमुदाहरति—**परिच्छेदातीत** इत्यादि । मालतीमाधवप्रकरणे प्रथमेऽङ्के मकरन्दं प्रति माधवस्य स्वावस्थाकथनमिदम् । इयत्तामतिक्रान्तो वाचक-लाक्षणिक-व्यञ्जकादिवचनैः प्रतिपादयितुमशक्यः इतः पूर्वं कदापि अस्मिन् जन्मनि अननुभूतो [illegible]-न्तिकान्नाशाद् उपचितेन महामोहेनातिगभीरः (अत एव दुर्लङ्घ्यः) कोऽपि (चेतो-) विकारो मम अन्तःकरणं मोहयति मम सन्तापञ्च करोतीत्यर्थः । अत्र प्रशब्देन विवेकस्य समूलनाशो द्योत्यते, ततश्च महामोहान्धस्य माधवस्य मालतीविषयकोऽभिलाषातिशयो व्यज्यते इति **प्रशब्दस्योपसर्गस्य** प्राधान्येन विप्रलम्भशृङ्गारव्यञ्जनं निमित्तत्वं बोध्यम् । इदमपि उदाहरणं **येषां दोर्बलमेवे**त्यादीव प्रकृतिप्रकरणे एव निवेशनीयम् ॥ उदा० १४६ ॥

केवलस्य निपातस्य न प्रयोगः, किन्तु पदान्तरैः सहैव प्रयोगः, अर्थोऽपि निपातस्य न स्वतन्त्र इति पदान्तरैकदेशत्वेनोपचरिताद् निपाताद् निमित्तात् प्राधान्येन व्यक्तेन भावेन युक्तं ध्वनिकाव्यमुदाहरति—**कृतञ्च गर्वाभिमुख**मित्यादि । कञ्चन राजानं प्रति कस्यचित् चाटूक्तिरियम् । त्वया मनोऽहङ्कारोन्मुखं कृतञ्च अस्माकं शत्रवो निहताश्च, एवं सति [illegible] किमावश्यकम्, नैवावश्यकम्; तथा हि यावत्कालपर्यन्तं सूर्य उदयाद्रिचूडामणित्वं न आयाति तावत्कालपर्यन्तमेव तमांसि तिष्ठन्तीत्यर्थः । त्वं यावत् पराक्रमाभिमुखो न भवसि तावदेव तव शत्रवस्तिष्ठन्ति, त्वयि पराक्रमाभिमुखे तु ते सर्वे नश्यन्त्येवेति भावः । अत्र **कृतञ्च निहताश्च** इति द्वाभ्यां चाभ्यां तुल्यकालक्रियायोग-लक्षण-प्राचीनाभिमततुल्ययोगितालङ्कारव्यञ्जनद्वारा राजपराक्रमातिशयः प्रत्याय्यते, ततश्च चाटुकारस्य राजविषयकरतिभावो व्यज्यते इत्यभिप्रायेणाह—**अत्र तुल्येत्यादि** । इदमप्युदाहरणं प्रकृतिप्रकरणे एवोपन्यसनीयम् ॥उदा० १४७॥

एवमन्येषामपि बोद्धव्यम् ।

वर्णरचनानां व्यञ्जकत्वं गुणस्वरूपनिरूपणे उदाहरिष्यते ।

अपिशब्दात् प्रबन्धेषु नाटकादिषु ।

एवं रसादीनां पूर्वगणितभेदाभ्यां सह षड् भेदाः ।

(सू० ६४) भेदास्तदेकपञ्चाशत् .... ।

इमनिचा कोमलवर्णेन [illegible] नवं वयो व्यज्यते ततश्च नायिका-यौवनस्य लोभनीयता प्रतीयते, त्वेन तु अकोमलेन न कोमलं नव वयो व्यज्येत; अव्य-यार्थस्य विशेषणत्वेऽव्ययीभावः, तेन अव्ययीभावसमासेऽस्मिन् मदनधनुषो न्यग्भावः प्रतीयते ततश्च मदनधनुषोऽप्यधिक नायिकाभ्रूलतायाः जगद्वशीकारकारित्वं व्यज्यते, विग्रहवाक्ये तु न मदनधनुषो न्यग्भाव इति [illegible] स्यात्; कर्मभूताधारेण सकलललना-मौलीना न्यग्भावोऽभिव्याप्त्यन्वङ्ग द्योत्यते, ततश्च नायिकाया रूपगुणस्योत्कर्षातिशयः प्रतीयते, सप्तमी तु आधेयस्य आधारैकदेशवृत्तितया बोधनं वाऽपि चरितार्था स्यादिति सा तत्र [illegible] तत्तद्व्यङ्ग्यव्यञ्जनद्वारा इमनिजादीनां वक्तृनिष्ठललना-विषयकरतिव्यञ्जने निमित्तत्वमिति उदाहरणम् प्रकृतिप्रकरण-प्रत्ययप्रकरणयोर्मध्ये निवेशनीयम् ।।उदा० १४९।।

एवमेव कुन्तकोक्तानि 'रूढिपर्याययोः सोपचारयोर्भेदकस्य च संवृतेश्च कृदादेश्च-वक्रताऽऽगमजा तथा । वृत्तिवैचित्र्यजा भावजाता लिङ्गगता पुनः । क्रियावैचित्र्यजा चेति पदपूर्वार्धवक्रताः । काल-कारक-सङ्ख्यानां वक्रताः पुरुषस्य च । उपग्रह-प्रत्यययोः पद-पश्चार्धवक्रताः ।' इत्येवंरूपाणि वक्रताप्रकाराणि [illegible] च यथायथं पदैकदेशरूप-व्यञ्जकविशेषत्वेन [illegible]त्वेनैव गतार्थानि, तत्र **तटी तारं ताम्यतीत्यादौ** [illegible] रसव्यञ्जननिमित्तत्वमिति विशेषः, **एवमेवान्येषामपि** पदैकदेशानां [illegible] बोध्यम् ।

वर्णानां रचनानां च [illegible] निरूपयिष्यते इत्याह—**वर्णरच-नानामित्यादिना** ।

'पदैकदेशरचनावर्णेष्वपि रसादयः' (सू० ६३) इत्यत्र अपिना सङ्गृहीतमाह—**अपि-शब्दादित्यादिना** । नाटकादौ रसाभिव्यञ्जनाय कविभिः कर्तव्याः कथापरीक्षा-कथाऽऽब-[illegible]
ध्वन्यालोके, वक्रोक्तिजीवितमिति प्रसिद्धे कुन्तककृते काव्यालङ्कारे च प्रतिपादिताः । अनेन ग्रन्थकारेण तु अनुपेक्षणीया अपि ते विषया अपेक्षिता इति ते उक्तग्रन्थत एव ज्ञेयाः ।

रसाद्यसंलक्ष्यक्रमव्यङ्ग्यस्य पदगतत्वेन, वाक्यगतत्वेन, पदैकदेशगतत्वेन, रचनागतत्वेन, वर्णगतत्वेन, प्रबन्धगतत्वेन चेति षड् भेदा भवन्तीत्याह—**एवं रसादीनामित्यादिना** ।।६३।।

व्याख्याताः ।

(सू० ६५) ....**तेषां चान्योन्ययोजने** ॥ ४२ ॥

सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया ।

न केवलं शुद्धा एवैकपञ्चाशद् भेदा भवन्ति यावत् तेषां स्वप्रभेदैरेकपञ्चाशता संशयास्पदत्वेन अनुग्राह्यानुग्राहकभावेन एकव्यञ्जकानुप्रवेशेन चेति त्रिविधेन सङ्करेण परस्परनिरपेक्षैकरूपया संसृष्ट्या चेति चतुर्भिर्गुणने—

एतावता ग्रन्थेन निरूपितान् ध्वनिभेदान् सङ्ख्यया निर्दिशति—**भेदास्तदेकपञ्चा-शदिति** । **व्याख्याताः** एतावता ग्रन्थेन [illegible] निरूपिताः । **ते च**—अविवक्षितवाच्यस्य अर्थान्तरसङ्क्रमितवाच्यात्यन्ततिरस्कृतवाच्यौ द्वौ भेदौ, तौ च प्रत्येकं पदगतत्वेन वाक्यगतत्वेन च भिन्नाविति **चत्वारो भेदाः**, विवक्षितान्यपरवाच्येषु असंलक्ष्यक्रमव्यङ्ग्यस्य पद-वाक्यपदैकदेश-रचना-वर्ण-प्रबन्ध-गतत्वेन **षड् भेदाः** संलक्ष्यक्रमव्यङ्ग्यस्य शब्दशक्तिमूलव्यङ्ग्यस्य वस्त्वलङ्कारव्यङ्ग्यभेदेन द्वौ भेदौ तयोश्च प्रत्येकं पदगतत्वेन वाक्यगतत्वेन चेति द्वौ भेदाविति **चत्वारो भेदाः** अर्थशक्त्युद्-भवव्यङ्ग्यस्य स्वतःसम्भवीत्यादिना द्वादश भेदाः, ते च प्रत्येकं पदगतत्वेन, वाक्यगतत्वेन प्रबन्धगतत्वेन च त्रिधा भिन्ना इति **षट्त्रिंशद्भेदाः**, शब्दार्थोभयशक्त्युत्थो वाक्यगत **एक** इति सङ्कलने शुद्धस्य ध्वनिकाव्यस्य एकपञ्चाशद् भेदाः ॥ ६४ ॥

ध्वनिकाव्यस्य शुद्धान् भेदानुक्त्वा मिश्रान् भेदानाह—**तेषां चान्योन्ययोजने** इत्या-दिना । एतेषाम् एकपञ्चाशतो ध्वनिभेदानां त्रिविधेन साङ्कर्येण एकविधया संसृष्ट्या च मिश्रीभावे वेदखव्योमविधयः (१०४०४) ध्वनिकाव्यभेदाः भवन्तीत्यर्थः । ननु अनुग्राह्यानुग्राहकभावेन साङ्कर्ये अनुग्राहकस्याङ्गतया गुणीभूतव्यङ्ग्यतापत्त्या कथं ध्वन्योः सङ्करता स्यात् ? अनुग्राहकस्यापि स्वचमत्कारे ह्रासाभावाद् ध्वनित्वं किञ्चि-[illegible] सम्भवतीति तत्रापि ध्वन्योः सङ्करता सुलभेति मम्मटस्या-शयो बोध्यः । एकस्मिन्नपि पद्ये वाक्ये वा एकविधध्वनिद्वयसत्तासम्भवात् स्वस्य स्वेनैव साङ्कर्यं [illegible] बोध्यम् । ननु अर्थान्तरसङ्क्रमितवाच्यस्य अत्य-न्ततिरस्कृतवाच्येन योजने यो भेदः स एव अत्यन्ततिरस्कृतवाच्यस्य अर्थान्तरसङ्क्रमित-वाच्येन योजने इति, एवमेवान्यत्रापीति कथमेकपञ्चाशत एकपञ्चाशता एव गुणनम् ? प्रथमस्य सजातीयेनैकेन विजातीयैः पञ्चाशता योगः, द्वितीयस्य सजातीयेनैकेन विजातीयै-रेकोनपञ्चाशता योग इत्येवं प्रकारस्यैव न्याय्यत्वादिति चेत् ? अत्राहुः—अर्थान्तरसङ्क्र-मितवाच्यस्य यत्र प्रकर्षीभावस्तत्र अत्यन्ततिरस्कृतवाच्येन तस्य साहित्यमिति अर्थान्तर-सङ्क्रमितवाच्यप्राधान्येन गणना, यत्र तु अत्यन्ततिरस्कृतवाच्यस्य प्रकर्षीभावस्तत्र अर्थान्तरसङ्क्रमितवाच्येन तस्य साहित्यमिति अत्यन्ततिरस्कृतवाच्यप्राधान्येन गणना इत्येवं प्रकारेणेति सम्भवत्येव एकपञ्चाशत एव एकपञ्चाशता एव योजनमिति । न च

(सू० ६६) **वेदखाब्धिवियच्चन्द्राः**···· ···· ···· ···।

शुद्धभेदैः सह—

(सू० ६७) ···· ···· ···· ····शरेषुयुगखेन्दवः ॥४३॥

तत्र दिङ्मात्रमुदाह्रियते—

छण-पाहुणिआ देअर एसा जाआए सुहअ किम्पि दे भणिआ ।
रुअइ पडोहर-वलही-घरम्मि अणुणिज्जउ वराई ॥ उदा० १५० ॥

यत्रोभयोस्तुल्यमेव चारुत्वं तत्र भेदान्तरता स्यादिति वाच्यम्, तत्रोभयोरेव सङ्करयोः स्वीकृतत्वादिति चाहुः । ननु पदैकदेशपद-वाक्य-महावाक्यानाम् एकेन व्यङ्ग्यस्य अन्येन अव्यञ्जनात् कथं तेषामेकव्यञ्जकानुप्रवेशसङ्करतासम्भव इति चेत् पदैकदेशादीनामेकेन व्यङ्ग्ये अन्यस्य आनुगुण्यात् सहकारितया वा तत्र व्यङ्ग्यव्यञ्जकताव्यवहारः सुलभ इति गोकुलनाथादयः । वस्तुतस्तु मिश्रध्वनिकाव्यस्य भेदा वेदखाग्निशराः (५३०४) एवेति श्रीधर-चण्डीदास-विश्वनाथादयो मेनिरे । वयन्तु व्यङ्ग्य-तद्व्यञ्जकोपाधिप्रदर्शनस्यैव कविशिक्षाया भावकविवेकपरिष्कृतौ चोपयोगात् ध्वनिकाव्यभेदसङ्ख्याविशेषे निर्बन्धस्य तत्रोपयोगाभावाद् आचार्यानन्दवर्धनेन 'एवं ध्वनेः प्रभेदाः प्रभेदभेदाश्च केन शक्यन्ते । सङ्ख्यातुं दिङ्मात्रं तेषामिदमुक्तमस्माभिः' (३।४४) इति, 'ध्वनेर्यः सगुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः । अनेनानन्त्यमायाति कवीनां प्रतिभागुणः' (४।१) इति, 'व्यङ्ग्य-व्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि । रसादिमय एकस्मिन् कविः स्यादवधानवान्' (४।५) इति च वदता अनुसृतां सरणिमेव कविशिक्षायै भावकोपकाराय च साधीयसीं मन्यामहे ॥ ६५, ६६ ॥

शुद्धभेदानपि सङ्कलय्य ध्वनिकाव्यभेदसङ्ख्यामाह—शरेषुयुगखेन्दवः (१०४५५) इति ॥ ६७ ॥

दिक्प्रदर्शनाय ध्वनिकाव्यद्वयसन्देहसङ्करमुदाहरति—**छण पाहुणिआ** इत्यादि । **'क्षण-प्राघुणिका देवर एषा जायया सुभग किमपि ते भणिता । रोदिति पडोहर-वलभीगृहे अनुनीयतां वराकी'** इति संस्कृतच्छाया । वेवरसम्पादितायां गाथासप्तशत्याम् (१।६३) पद्यमिदम् । उत्सवे आगतायाः [illegible] अनुनयाय देवरं प्रति भ्रातृजायाया उक्तिरियम् । हे सुभग देवर, उत्सवे निमन्त्रितत्वाद् आगता काचन प्राघुणिका एषा तव जायया किमप्यवाच्य भणिता सती गृहपश्चाद्भागस्थे शून्ये वलभीसमीपवर्तिनि कोष्ठिकाविशेषे रोदिति इदानीम्, सा वराकी अनुनीयता भवतेत्यर्थः । पडोहरम् = शून्यम् । अत्र अनुनीयताम् इति पदं [illegible] स्वार्थमत्यजत् किं सम्भोगेनैकान्तोचितेन तोष्यतामित्यर्थे सङ्क्रमितमिति पदगतोऽर्थान्तर-सङ्क्रमितवाच्यो ध्वनिरयम् उत अनुनीयतामिति पदं [illegible] सद् वाच्यार्थेन अनुनयव्यापारेण वस्तुना उपभुज्यता सेति वस्तुनोऽनुरणनन्यायेन व्यञ्जकमिति पदगतो-

अथ पञ्चम उल्लासः

एवं ध्वनौ निर्णीते गुणीभूतव्यङ्ग्यस्य प्रभेदानाह—

(सू० ६८) अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥ ४४ ॥
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदा स्मृताः ।

कामिनीकुचकलशवत् गूढं चमत्करोति अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव ।

अगूढं यथा—

अवसरसङ्गतिं प्रदर्श्य गुणीभूतव्यङ्ग्यप्रभेदान् गणयति—**अगूढ**मित्यादिना । गुणीभूतव्यङ्ग्यत्वं [illegible] च—वाच्यचमत्कारापेक्षया अधिकस्य चमत्कारस्याकरणाद् [illegible] वा वाच्यमनतिशयानेन व्यङ्ग्येन युक्तत्वमेव । गुणीभूतत्वं तु अत्र पारिभाषिकं पराङ्गतयाऽन्यथा वाऽऽगतं वाच्यानतिशयित्वम्, न तु पराङ्गताप्राप्तिरेव । तत्र अगूढम्, अपरस्याङ्गम् (अपराङ्गम्), वाच्यसिद्ध्यङ्गम्, अस्फुटम्, सन्दिग्धप्राधान्यम्, तुल्यप्राधान्यम्, काक्वाक्षिप्तम् असुन्दरम् चेति अष्टविधं ध्वनिव्यव[illegible] गुणीभूतव्यङ्ग्यं [illegible] अगूढव्यङ्ग्यम्, अपराङ्गव्यङ्ग्यम्, वाच्यसिद्ध्यङ्गव्यङ्ग्यम्, अस्फुटव्यङ्ग्यम्, सन्दिग्धप्राधान्यव्यङ्ग्यम्, तुल्यप्राधान्यव्यङ्ग्यम्, काक्वाक्षिप्तव्यङ्ग्यम्, असुन्दरव्यङ्ग्यमिति अष्टौः भिदाः (भिदादित्वादङ्, अष्टा० ३।३।१०४) विवेचकानामभिमताः सन्तीति कारिकार्थः । स्मृता इत्यस्य स्थाने मता इति पाठः समुचितः सुकरश्च । **अगूढम्** असहृदयैरपि झटिति वाच्यमिव बोध्यम् । **अपराङ्गम्** अपरस्य वाक्यार्थविश्रान्तिधामतया प्रधानस्यान्यस्य **अङ्गम्** उपकारकम् उत्कर्षाधायकत्वेन प्रकाशकमिति यावत् । **वाच्यसिद्ध्यङ्गम्** वाच्यस्य वाच्यार्थस्य (व्यङ्ग्यं विना अविश्रान्तस्य) सिद्धेर्विश्रान्तेरङ्गम् उपकारकम् । **अस्फुटम्** अत्यन्तमेव गूढं सहृदयानां हृदयेऽपि सुखेन अप्रकाशनशीलम् । **सन्दिग्धप्राधान्यम्** सन्दिग्धं प्राधान्यं चमत्कारित्वं यस्य तत् । **तुल्यप्राधान्यम्** तुल्यं वाच्येन समं प्रधान्यं यस्य तत् । **काक्वाक्षिप्तम्** काक्वा व्यङ्ग्यं विना अविश्रान्तेन ध्वनिविकारेण आक्षिप्तं हठादुपस्थापितम् । असुन्दरं वाच्यापेक्षया अमनोहरं ।

गुणीभूतव्यङ्ग्यस्य भेदविषये—अस्फुट-सन्दिग्ध-तुल्य-प्राधान्ये मध्यमं त्रेधेति हेमचन्द्रः । [illegible]—"कस्यापि गूढप्रतिपत्तिरस्ति यत्रैव तत्रैव परस्य न स्यात् । धीभेदतस्तेन निगूढतायां ध्वनिः स्फुटत्वे तु न नेति वाच्यम् । ऋते प्रधानं न

यस्याऽसुहृत्कृततिरस्कृतिरेत्य तप्तसूचीव्यधव्यतिकरेण युनक्ति कर्णौ ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि जीवन्न सम्प्रति भवामि किमावहामि ॥
उदा० १५२ ॥

अत्र जीवन्निति अर्थान्तरसङ्क्रमितवाच्यस्य ।

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा गायन्ति मञ्जु मधुपा गृहदीर्घिकासु ।
एतच्चकास्ति च रवेर्नवबन्धुजीवपुष्पच्छदाभमुदयाचलचुम्बि बिम्बम् ॥
उदा० १५३ ॥

भवेद् गुणत्वं वाच्यं प्रधानं यदि तत् कुतः स्यात् । सौन्दर्यगौरवविशेषेण किं वा व्यङ्ग्येन साम्यमुपबृंहणाद् वा । व्यङ्ग्यस्य सौन्दर्यविशेषहानेस्तुल्यत्वं यदि वा गुणत्वम् । तदेव वाच्यं न पुनः स्फुटत्वं तथान्तरादौ तदनिश्चयेन" इति । अस्फुटव्यङ्ग्यस्य वाक्यार्थदृष्ट्या चमत्कारकत्वदृष्ट्या च अप्रधानस्य कथं मध्यमकाव्यभेदप्रयोजकत्वमिति च विचार्यम् ।

अगूढस्य पारिभाषिकं [illegible]—कामिनीकुचेत्यादिना । अत्रेमे पद्ये अप्यनुसन्धेये—'नान्ध्रीपयोधर इवातितरां प्रकाशो नो गुर्जरीस्तन इवातितरां निगूढः । अर्थो गिरामपिहितः पिहितश्च सर्वैः सौभाग्यमेति मरहट्टवधूकुचाभः" इति; 'अनुद्घुष्टः शब्दैरथ च रचनातः स्फुटरसः पदार्थानामात्मा जनयति कवीनां बहु मुदम् । यथा किञ्चित् किञ्चित् स्तनचलचेलाञ्चलस्य कुचद्वन्द्वं कान्तिं किरति न तथोद्घाटितमुरः ॥' इति च ।

अगूढव्यङ्ग्यं गुणीभूतव्यङ्ग्यमुदाहरति—यस्याऽसुहृदित्यादि । बृहन्नलारूपस्य अर्जुनस्योक्तिरियम् । यस्य मम दुर्योधनादिशत्रुभिः कृता 'षण्ढाः पाण्डवाः' इत्यादिवचनरूपा तिरस्कृतिः आगत्य कर्णौ तप्तलोहशलाकायाः व्यधस्य (वेधस्य) घटनया युनक्ति इव, स एषोऽहम् काञ्चीगुणग्रथनस्य भाजनं (कर्ता) सन् सम्प्रति जीवन् न भवामि किं करोमीत्यर्थः । अत्र जीवतो जीवनाभावबोधने बाधात् [illegible] अर्थान्तरे सङ्क्रमितं वाच्यं यस्य तस्य जीवन्निति पदस्य अभिमतकार्यशक्तिमत्त्वाद्यभावरूपम् अनुतापातिशयरूपं वा व्यङ्ग्यं स्वोक्त्या स्पष्टीकृतत्वात् वाच्यवत् स्फुटं प्रतीयते इत्यगूढम् । तद्योगात् काव्यमिदं गुणीभूतव्यङ्ग्यमिति बोध्यम् इत्याह—अत्र जीवन्निती-त्यादिना ॥ उदा० १५२ ॥

प्राप्तावसरतया अगूढव्यङ्ग्यस्य काव्यस्योदाहरणान्तरमाह—उन्निद्रेत्यादि । सूर्योदय-कालवर्णनमिदम् । विकसितानां रक्तोत्पलानां परागेण पिशङ्गितैरङ्गैर्युक्ता भ्रमरा गृह-दीर्घिकासु मञ्जु गायन्ति, सूर्यस्य नवबन्धुजीवपुष्पदलतुल्यलोहितवर्णम् उदयाचलसंश्लि-ष्टम् एतद् मण्डलं च प्रकाशते इत्यर्थः । शक्वर्यां छन्दसि वसन्ततिलका वृत्तम् । अत्र चुम्बतेः प्रेममूलकवक्त्रव्यापारविशेषरूपो वाच्योऽर्थोऽचेतने रविबिम्बे बाधित इति स

अत्र चुम्बनस्यात्यन्ततिरस्कृतवाच्यस्य ।

अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः
केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी ॥ उदा० १५४ ॥

अत्र केनाप्यत्रेति अर्थशक्तिमूलानुरणनरूपस्य ।
मयात्रेति युक्तः पाठः । [१]

अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्य अङ्गं रसादि अनुरणनरूपं वा ।

यथा—

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ उदा० १५५ ॥

[illegible] संश्लेषणं करोतीति अत्यन्ततिरस्कृतः सन् प्रातःकाला-रम्भं [illegible] अत्यन्ततिरस्कृतवाच्यस्य चुम्बनस्य प्रातःकालारम्भरूपं व्यङ्-ग्यमगूढम् [illegible] काव्यमिदं गुणीभूतव्यङ्ग्यमित्याशयेनाह—अत्र चुम्बनस्येति ॥ उदा० १५३ ॥

[illegible] अगूढत्वेन काव्यस्य गुणीभूतव्यङ्ग्यता सम्भ-वति इति [illegible] उदाहरणान्तरमाह—अत्रासीदित्यादि । राजशेखरकृते बालरा-मायणनाटके (१०,७०) रावणं हत्वा सीतया सह विमानेनायोध्यामागच्छतो रामस्य तां प्रति उक्तिरियम् । हे मृगाक्षि, अस्मिन् स्थले आवयोः (राम-लक्ष्मणयोः) इन्द्रजितो नागपाशेन बन्धनस्य विधिरासीत्; अर्थात्, विधेरलङ्घ्यत्वाद् आवामपि अत्र क्षणं नाग-पाशेन बद्धौ। अस्मिन्नेव स्थले भवद्देवरे लक्ष्मणे इन्द्रजित्प्रयुक्तया शक्त्या वक्षसि गाढं ताडिते सति हनुमता द्रोणाचलः आनीतः, अत्र च दिव्यैर्लक्ष्मणशरैरिन्द्रजिल्लोकान्तरं प्रापितः, अत्र च राक्षसपतेः रावणस्य कण्ठपङ्क्तिः केनापि कृत्तेत्यर्थः । अत्र केनापीत्यस्य [illegible] व्यङ्ग्यं 'मया' इति अगूढम्, तद्योगादिदं काव्यमगूढ-व्यङ्ग्यम् [illegible]—अत्र केनापीत्यादि ।

केनाप्यत्रेत्यस्य स्थाने तस्याप्यत्र इति पाठः [illegible] नायकस्य धीरोदात्त-त्वस्याक्षतये च समुचित [illegible] ॥ उदा० १५४ ॥ [१]

अपराङ्गत्व [illegible]—अपरस्येत्यादिना । प्रधानस्य रस-भाव-रसाभास-भावाभास-[illegible] असंलक्ष्यक्रमव्यङ्ग्यस्य, तथाभूतस्य [illegible] वाच्यस्य वा वाक्यार्थीभूतस्य उपकारकं रसादिरूपं स्थायिभावा-त्मकम् असंलक्ष्यक्रमम् अनुरणनरूपं संलक्ष्यक्रमं वा व्यङ्ग्यम् अपराङ्गव्यङ्ग्यमुच्यते । तादृशं व्यङ्ग्यं यत्र झटिति चमत्कारं जनयत् सत् प्राधान्यं प्राप्नोति तत् काव्यम्

अत्र शृङ्गारः करुणस्य ।

कैलासालयभाललोचनरुचा निर्वर्तितालक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम् ।
स्पर्धाबन्धसमृद्धयेव सुदृढं रूढा यया नेत्रयोः
कान्तिः कोकनदानुकारिसरसा सद्यः समुत्सार्यते ॥ उदा० १५६ ॥

अत्र भावस्य रसः ।

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधयस्-
तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः ।
आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद् भुवस्-
तावद् बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिता ॥ उदा० १५७ ॥

अपराङ्गव्यङ्ग्यं गुणीभूतव्यङ्ग्यकाव्यमिति भाव । चमत्कारकेण रसाङ्गभूतेन रसेन (स्थायिभावात्मकेन) युक्तमपराङ्गगुणीभूतव्यङ्ग्यमुदाहरति—**अयं स** इत्यादि । महाभारते स्त्रीपर्वणि (२४।१९) रणभूमिपतितं भूरिश्रवसश्छिन्नं हस्तमादाय तद्वधूकृतः प्रलापोऽयम् । काञ्च्या आकर्षकः पीनस्तनयोर्विमर्दनः नाभ्यूरुजघनस्पर्शी अन्तरीयग्रन्थिमोचकः स करः अयमेतादृशावस्थोऽस्ति हन्त इत्यर्थः । अत्र नायकाश्रयो नायिकाविषयः स्थायिभावात्मकः स्मर्यमाणः शृङ्गारो नायिकाशोकप्रकर्षकत्वान्नायिकाश्रयस्य करुणस्याङ्गम्, तद्योगात् काव्यमिदं गुणीभूतव्यङ्ग्यमिति निर्दिशति—अत्र **शृङ्गारः करुणस्येति** ॥ उदा० १५५ ॥

भावाङ्गभूतेन रसेन युक्तमपराङ्गगुणीभूतव्यङ्ग्यकाव्यमुदाहरति—**कैलासालयेत्यादि** । **यस्या** गौरीपादनखद्युतेः अलक्तकव्यक्तिः कैलासालयस्य महादेवस्य भाले स्थितस्य लोचनस्य रुचा निर्वर्तिता भवति, गौर्याः प्रणयकोपजातया नयनयो रक्तया कान्त्या सह स्पर्धाबन्धनेनेव भृशं समृद्धया यया गौरीपादनखद्युत्या गौर्या नयनयोः सुदृढं रूढा रक्तोत्पलानुकारिणी लोहिता सरसा च कान्तिः सद्य एव परिभूय समुत्सार्यते सा गिरिसुतायाः गौर्याः पादनखानां द्युतिः युष्मान् सदा रक्षतु इत्यर्थः । अत्र कविनिष्ठस्य गिरिसुताविषयकभक्तिस्वरूपस्य भावस्य महादेवनिष्ठः पार्वतीविषयकः सम्भोगशृङ्गाररूपो रसोऽङ्गमित्याशयेनाह—**अत्र भावस्य रस** इति । 'रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया, तद्वर्णनं हि पित्रोः सम्भोगवर्णनमिव अत्यन्तमनुचितम्' इति सप्तमे रसदोषप्रकरणे वक्ष्यन्नपि अत्रेदमुदाहरणमुपादत्ते इत्यत्रावधेयं सुधीभिः ॥ उदा० १५६ ॥

भावस्य भावाङ्गत्वेन युक्तम् अपराङ्गगुणीभूतव्यङ्ग्यकाव्यमुदाहरति—**अत्युच्चा** इत्यादि । पञ्चाक्षरी कविः अनेन पद्येन भोजराजं स्तुतवानिति जयन्तभट्टः । अत्युच्चा गिरयः परितः तिष्ठन्ति, अतिविस्तृताः समुद्राश्च परितः स्थिताः सन्ति, तानेतान् सर्वान् बिभ्रती अपि हे भूः त्वं किञ्चिदपि क्लान्ता नासि इति भुवः स्तुतिमाश्चर्यपूर्वकं

अत्र भूविषयो रत्याख्यो भावो राजविषयस्य रतिभावस्य ।

बन्दीकृत्य नृप द्विषां मृगदृशस्ताः पश्यतां प्रेयसां
श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः ।
अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारांनिधे
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे ॥ उदा० १५८ ॥

अत्र भावस्य रसाभासभावाभासौ प्रथमार्धद्वितीयार्धद्योत्यौ ।

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥ उदा० १५९ ॥

अत्र भावस्य भावशान्तिः ।

मुहुर्मुहुः यावत् प्रस्तवीमि तावद् हे राजन् भोज एतादृशीं भुवमपि बिभ्रत् । तव भुजः स्मृतः, ततो भुवः स्मृता, ततस्तु वाचः सङ्कुचिताः विरताश्चेत्यर्थः । अत्र किं कस्याङ्गमित्याह—**अत्र भूविषय** इत्यादिना ॥ उदा० १५७ ॥

भावाङ्गभूतरसाभास-भावाभासाभ्यां युक्तम् अपराङ्गगुणीभूतव्यङ्ग्यमुदाहरन्ति—**बन्दीकृत्ये**त्यादि । हे नृप, तव सैनिकाः तव शत्रूणां रमणीः बन्दीकृत्य (हठादाहृताः कृत्वा) तासां पश्यतः पतीन् अनादृत्य ताः बलाद् आलिङ्गन्ति, हठालिङ्गनकुपितासु तासु कोपशान्तये ताः प्रणमन्ति, प्रणामेनाप्यप्रसन्नासु तासु ताः बलादेव गृह्णन्ति (आददते), परितश्चुम्बन्ति च; तथापि 'हे औचित्यवारिधे, त्वमस्माकं सुकृतैरस्माकं दृष्टिविषये आगतोऽसि, तस्मादस्माकं सर्वा विपत्तयो नष्टाः' इति तैरपि तव शत्रुभिः त्वं स्तूयसे इत्यर्थः. अत्र कवेः राजकविषयकस्य भावस्य सैनिकनिष्ठः शृङ्गाररसाभासः शत्रुनिष्ठः स्तूयमानराजविषयको रत्याख्यभावाभासश्च अङ्गम्, तदेव च काव्यस्यास्य चमत्कारकारकं तत्त्वम्, तद्योगात् काव्यमिदं गुणीभूतव्यङ्ग्यमित्याशयेनाह-**अत्र भावस्ये**त्यादि ॥ उदा० १५८ ॥

भावाङ्गभूतया चमत्कारकारिण्या भावशान्त्या युक्तमपराङ्गव्यङ्ग्यरूपगुणीभूतव्यङ्ग्य-काव्यमुदाहरन्ति—**अविरले**त्यादि । हे राजन्, तव वैरिणाम् अविरलैः खड्गकम्पनैः छिन्धि भिन्धीत्यादेः [illegible] भ्रुकुटीविभ्रमरूपैस्तर्जनैर्हुङ्कारसिंहनादरूपैर्गर्जनैश्च उपलक्षितो यो **मदः** (गर्वचेष्टितम्) त्वद्दर्शनात् पूर्वम् अस्माभिर्मुहुर्मुहुर्ददृशे (दृष्टः) स मदः तव दर्शने जाते क्षणात् क्वाऽपि गतः (पलाय्य क्व गतः क्व) इत्य**र्थः**। अत्र वैतालीयं नाम मात्राछन्दो विद्यते । तल्लक्षणं यथा "षड्विषमेऽष्टौ समे कलाः ताश्च समे स्युर्नो निरन्तराः । न समाऽत्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः" इति वृत्तरत्नाकरे । अत्र कविनिष्ठस्य राजविषयकरतिभावस्य गर्वचेष्टितप्रशमव्यङ्ग्यो भावशान्तिरूपो गर्वप्रशमोऽङ्गमित्याशयेनाह—**अत्र भावस्ये**त्यादि ॥ उदा० १५९ ॥

साकं कुरङ्गकदृशा मधुपानलीलां कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते ।
अन्याभिधायि तव नाम विभो गृहीतं केनापि तत्र विषमामकरोदवस्थाम् ॥
॥ उदा० १६० ॥

अत्र त्रासोदयः ।

असोढा तत्कालोल्लसदसहभावस्य तपसः
कथानां विश्रम्भेष्वथ च रसिकः शैलदुहितुः ।
प्रमोदं वो दिश्यात् कपटबटुवेषापनयने
त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥ उदा० १६१ ॥

अत्रावेगधैर्ययोः सन्धिः ।

पश्येत् कश्चिच्चल चपल रे का त्वराऽहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वाऽसि यासि ।
इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः
कन्या कञ्चित् फलकिसलयान्याददानाऽभिधत्ते ॥ उदा० १६२ ॥

अत्र शङ्काऽसूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शबलता ।

भावाङ्गभूतेन चमत्कारकारकेण भावोदयेन युक्तम् अपराङ्गव्यङ्ग्यगुणीभूतव्यङ्ग्य-काव्यमुदाहरति—साकं कुरङ्गकेत्यादि । हे प्रभो, तव शत्रौ मृगनयनया कान्तया सुहृद्-भिश्च सह मधुपानक्रीडां कर्तुं प्रवृत्ते सति केनापि पुरुषेण अन्यस्यैवार्थस्य वाचकत्वेन उच्चारितमपि तव नाम तत्र अतीव विषमा वाच्यानिर्वाच्य—विद्रवणादिरूपाम् अवस्थाम-करोदित्यर्थः । अत्र कविनिष्ठनृपविषयकरतिभावस्य शत्रुनिष्ठत्रासाख्यव्य-भिचारिभावोदयः अङ्गमित्याशयेनाह—अत्र त्रासोदय इति ॥ उदा० १६० ॥

भावाङ्गभूतेन भावसन्धिना चमत्कारकारकेण युक्तम् अपराङ्गव्यङ्ग्यगुणीभूतव्यङ्ग्य-काव्यमुदाहरति—असोढा तत्कालेत्यादि । तत्काले स्फुटं दृश्यमानं पार्वत्याः कृते असह्य-भावो यस्य तस्य पार्वत्याः तपसोऽसोढा, पुनश्च पार्वत्या उक्तिभिः प्रकाशितेषु तस्याः स्वविषयकेषु प्रणयेषु रसिकश्च सन् स्वेन छद्मना गृहीतस्य बटुवेषस्य अपनयने त्वरया शैथिल्येन च युगपदेव आक्रान्तः (आक्षिप्तः) महादेवो युष्मभ्यम् आनन्दं दद्याद् इत्यर्थः । अत्र कविनिष्ठस्य महादेवविषयकरतिभावस्य महादेवनिष्ठयोः त्वरा-शैथिल्य-गम्ययोः आवेग-धैर्ययोर्भावयोः सन्धिः अङ्गमित्याशयेनाह—अत्रावेगधैर्ययोः सन्धि-रिति ॥ उदा० १६१ ॥

[illegible] हेतुतां प्राप्तया भावशबलतया युक्तम् अपराङ्ग-व्यङ्ग्यकाव्यमुदाहरति—पश्येत् कश्चिदित्यादि । [illegible] उद्भिद्यमानयौवनभरा फलाद्याहरणावसरे वनान्ते रहसि कंचिद्युवकं दृष्ट्वा तं प्रति आवर्जिताया उक्तेर्वर्णनेन स्तूयमानं राजानं प्रति कृता चाटूक्तिरियम् । हे पार्थिव, त्वद्भयादरण्ये निवसतः त्वच्छत्रोरनूढा नवयौवना पुत्री फलानि किसलयानि च आददाना

एते च रसवदाद्यलङ्काराः ।

कंचित् युवकं दृष्ट्वा तं प्रत्यावर्जिता तेन च हसिता सती यथावसरम् 'कश्चित् पश्येत्' 'रे चपल अपसर' 'का त्वम्' 'अहम् अनूढा अस्मि' अरे कथं दूरं गतोऽसि हस्तालम्बं देहि' 'अहह किं जातम्' 'अनूढाऽहं यदि त्वमनुगच्छसि तर्हि व्युत्क्रमो भवति' '(कथमप-क्रान्तोऽसि) त्वं कुत्र यासि' इत्यनेन प्रकारेण यथायथं तं युवकं प्रति आत्मगतं च अभि-धत्ते इत्यर्थः । अस्मि इति [illegible] अव्ययम् त्वमित्यर्थकम् । अत्र 'पश्येत् कश्चित्' इति शङ्का, 'चल चपल रे' इत्यसूया, 'का त्वम्' इति धृतिः, 'अहं कुमारी' इति स्मृतिः, 'हस्तालम्बं वितर' इति श्रमः, 'हहहा' इति दैन्यम्, 'व्युत्क्रमः' इति विबोधः 'क्व अस्मि (= त्वम्) यासि' इति औत्सुक्यं व्यज्यते इत्येषामियं शबलता कवि-[illegible] इत्याशयेनाऽऽह—**अत्र शङ्केत्यादि** । **शबलता** च पूर्वपूर्वभावोपमर्देन उत्तरोत्तरभावोदयः, भावानां समप्राधान्येन आस्वाद्यमानता वा ॥ उदा० १३८ ॥

अत्र [illegible]—**एते चेत्यादिना** । एताः पराङ्गभूता रसा-भाव-रसाभासभावा-भास-भावशान्ति-भावोदय-भावशबलता एव भामहाद्यभिमता रसवत्-प्रेयस्वद्-ऊर्जस्वि-समाहित-भावशान्ति-भावोदय-भावशबलतानामानोऽलङ्काराः इत्यर्थः । अत्र 'पराङ्ग-भूतानां रसादीनां गुणानामिव साक्षादेव वाक्यार्थीभूत-रसाद्युपकारकत्वेन अनुप्रासोपमा-दीनामिव अङ्गोपकारद्वारकाङ्ग्युपकारकत्वाभावान्नालङ्कारता मम्मटस्याऽभिमता' इति [illegible] । 'अत्र कालदेशपरिच्छिन्नो रसादिः आलम्बनरूपवाच्य-प्रकर्षाभिव्यञ्जनद्वारा वाक्यार्थीभूतरसादेः उद्दीपनतया उपकरोतीति पराङ्गभूतरसादेः [illegible] रसोपकारकत्वात् तत्र 'उपकुर्वन्ति तं सन्तमङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्ते' इति वक्ष्यमाणम् अलङ्कारलक्षणं गच्छत्येवेति पराङ्गभूतरसा-दयोऽलङ्कारा एव' इति [illegible] । वयन्तु ब्रूमः—आस्वादनीयत्वाति-शयेन प्रधानीभूतानाम् अतएव काव्यविशेषव्यपदेशनिमित्तभूतानां वाक्याभिधेयद्वारा [illegible] रसादीनामास्वादनार्थे काव्ये परोपकारकत्वस्यैव तिरोहितत्वात् नास्त्येव [illegible] कथं ते मम्मटमतेऽलङ्काराः स्युः ? एतेषां [illegible] कथमेतेषां काव्यधर्मित्वं स्यात् ? कथञ्चैतेषां काव्यधर्मिप्रदर्शनप्रस्तावे निरूपणं क्रियेत ग्रन्थकृता ? कथञ्चैतेषामलङ्कारत्वेऽभिमते अलङ्कारनिरूपणप्रस्तावे [illegible] संसूचनमपि न क्रियेत ? यद्येतेषां पराङ्गरसादीनामलङ्कारत्वं स्यात् तर्हि एतेऽपि चित्रकोटावपि प्रविशेयुरिति तदेव काव्यं मध्यमम् अवरं चापद्येतेति कथं मम्मटो व्यवस्थां कुर्यात् ? चित्रलक्षणेऽनुक्तेन एतेषां व्यवच्छेदात्, तथा व्यवच्छिन्नत्वादेव च चित्रकाव्यरूपाणामलङ्काराणां [illegible]-राणां च तन्त्रेणैव निरूपणस्य प्रस्तावे एतेषामनुल्लेखो युक्त एवेतिचेत् तथापि धर्म-

यद्यपि भावोदय-भावसन्धि-भावशबलत्वानि नालङ्कारतया उक्तानि तथापि कश्चिद्ब्रूयादित्येवमुक्तम् ।

धर्मिभावविशेषेऽस्मत्कृते एव स्यात् । विश्वनाथादिभिस्तु पूर्वापरसन्दर्भशुद्धिमन्दैः तस्यै-वालङ्कार्यत्वम् अलङ्कारत्वं चेत्यव्यवस्थितं जल्प्यते इति यत्किञ्चिदेव तत् । एवमेव—"यत् तु 'अतादृशि गुणीभूतव्यङ्ग्यम्' इत्यादिकाव्यप्रकाशगतलक्षणे चित्रान्यत्वं टीकाका-रैर्दत्तं तद् न पर्यायोक्तसमासोक्त्यादिप्रधानकाव्येष्वव्याप्त्यापत्तेः तेषां गुणीभूतव्यङ्ग्यता-याश्चित्रतायाश्च सर्वालङ्कारिकसम्मतत्वात्" इति जगन्नाथोक्तमपि अयुक्तमेव, पर्यायोक्त-समासोक्त्यादिप्रधानकाव्यानां गुणीभूतव्यङ्ग्यताया अलङ्कारिकचित्रतायाश्च मम्मटस्य असम्मतत्वात् । जयदेवोऽपि "अलङ्कारानिमान् सप्त केचिदाहुर्मनीषिणः" इतिवदन् मम्मटमते रसवदादीनामलङ्कारत्वस्याभावं सूचयतीति मम प्रतिभाति । एवञ्च पूर्वोक्त-युक्त्या एतेषामलङ्कारत्वं मम्मटमते नैव युक्तम्, न चैतेषामलङ्कारत्वं मम्मटस्याभिमत-मित्येव निर्णयः । यदपि लोचनकृता उक्तम्—'स एवालङ्कारोऽलङ्कार्ये योऽङ्गभूतो न त्वन्य' इति तत्रापि आस्वादनीयत्वातिशयेन प्रधानस्य अन्यस्य अङ्गत्वे एव अलङ्कारत्व-वाच्यतोचिता काव्यशास्त्रे, न तु वाक्यार्थीभावमात्रेण प्रधानीभूतस्य अन्यस्याऽङ्गत्वेऽपीति सुधीभिर्विवेक्तव्यमिति । वाक्यार्थीभावेन आस्वादनीयत्वातिशये च प्राधान्ये रसादीनामा-स्वादः स्थिरः परिपुष्टश्च भवतीति तादृशास्ते काव्यस्योत्तमत्वस्य प्रयोजका भवन्ति, आस्वादनीयत्वातिशयेन सत्यपि प्राधान्ये वाक्यार्थीभावाभावेन यदा रसादीनामास्वादोऽ-स्थास्नुः कियतांशेन दुर्बलश्च भवति तदा ते काव्यस्य मध्यमत्वस्य प्रयोजका भवन्तीत्येव विभागो युक्तो न तु रसादीनामलङ्कारत्वं काव्ये अलङ्कारिकनयानुसारिभिरिति अ-स्माकं पक्षः ।

ननु भावोदयादीनां त्रयाणामलङ्कारत्वं न मम्मटभट्टेन उद्भटादिभिः प्रतिपादितं त्वन्मते तु रसवदादीनां प्राचीनैरुक्तानां चतुर्णामपि नालङ्कारतेति दूरे भावो-दयादीनामलङ्कारता इति कथं भावोदयादीनामलङ्कारत्वेन निर्देश इत्याक्षेपं सम्भाव्याह—**यद्यपि भावोदयेत्यादि** । रसवदादीनामलङ्कारत्वं स्वीकुर्वद्भिरुद्भटादिभिः वाक्यार्थी-भूतस्य परस्य अङ्गानां रसादीनामलङ्कारत्वं स्वीकुर्वता आनन्दवर्धनेन अभिनवगुप्तेन च यद्यपि भावोदयादीनामलङ्कारत्वं नोक्तम्, तथापि तेषामनुक्तिः तन्मते तेषामलङ्कारत्वे प्रमादिकी एव, भावोदयादीनामपि रसवदादेः रसाङ्गरसादेरिव वा तुल्यन्यायेन अलङ्कार-तायास्तैः स्वीकार्यत्वात्, एतेषामपि अलङ्कारत्वं ब्रूयादपि कश्चिद् गतानुगतिकः, अस्माकं मते तु रसवदादेः रसाङ्गरसादेरपि नैवालङ्कारत्वमिति भावोदयादीनामपि नैवा-लङ्कारत्वमिति भावः । मम्मटस्य 'कश्चिद् ब्रूयादित्येवमुक्तम्' इति वाक्यागप्रयोगो भावोदयादेरलङ्कारताया मम्मटानभिमतत्वं स्फुटं प्रत्याययति, तथापि अहो पण्डितम्म-न्यानामपि रुय्यक-विश्वनाथ-जगन्नाथ-नागोजिभट्ट-गोकुलनाथादीनामप्यत्र ग्रन्थाभिप्रायप्रति-पत्तिवन्ध्यतेति कियदधिकं वक्तव्यम् । रुय्यकग्रन्थे भावोदयादीनां पृथगलङ्कारत्व प्रति-

यद्यपि स नास्ति कश्चिद् विषयो यत्र ध्वनिगुणीभूतव्यङ्ग्ययोः स्वप्रभेदादिभिः सह सङ्करः संसृष्टिर्वा नास्ति तथापि 'प्रधानेन व्यपदेशा भवन्ति' इति क्वचित् केनचिद् व्यवहारः।

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वै देहीति प्रतिपदमुदश्रु प्रलपितम्।
कृतालङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाऽऽप्तं रामत्वं कुशलवसुता न त्वधिगता ॥ उदा० १६२ ॥

पादिनं दृष्ट्वा मम्मटस्येदं वाक्यं व्याख्याय चापि राजानकरुय्यकं मम्मटात् प्राचीनं मन्वानो झळकीकरोऽपि विवेकविकल एव ॥

ननु अयं स रसनोत्कर्षीत्यादौ प्रकरणादिगम्यस्य करुणादेः प्राधान्येन काव्यस्य ध्वनित्वमेवेति कथं गुणीभूतव्यङ्ग्यकाव्यत्वेन तानि उदाहृतानि इत्याशङ्कायाम्, रसध्वनौ [illegible] तस्यैव काव्यस्य ध्वनित्वमङ्गमादाय तु गुणीभूतव्यङ्ग्यत्वं च प्राप्नोतीति कथं ध्वनिगुणीभूतव्यङ्ग्ययोर्विभागः कथं वा व्यपदेशनियम इति च आशङ्का परिहर्तुमाह—**यद्यपि स नास्तीत्यादि**। आस्वादनीयत्वातिशयमूलकं प्राधान्यमनुरुध्य ध्वनिगुणीभूतव्यङ्ग्यविषयविभागो व्यपदेशनियमश्च भवति, अतश्च अयं स रसनोत्कर्षीत्यादौ वाक्यार्थीभूतस्य अन्यस्य अङ्गभूतानि अपि आस्वादनीयत्वातिशयेन प्रधानानि [illegible] गुणीभूतव्यङ्ग्यत्वव्यवहार इति भावः ॥

[illegible]—**जनस्थाने भ्रान्तमित्यादि**। वाचस्पतेः पद्यमिदमिति कविकण्ठाभरणे क्षेमेन्द्रः। राजसेवानिर्विण्णस्योक्तिरियम्। कनके (=धने) या मृगतृष्णा (=निष्फलाशा) सैव या कनकमृगतृष्णा (कनकमृगरूपे मारीचे तृष्णा) तया अन्धिता धीर्यस्य तेन मया जनस्थाने (=[illegible] जनपदे) तस्मिन्नेव जनस्थाने (=दण्डकारण्ये) भ्रमणं कृतम्, वै (=भोः) देहि इति वचः तदेव हे वैदेहि इति वचः तद् उद्गतम् अश्रु यस्मिन् कर्मणि यथा स्यात् तथा प्रलपितम्, अलम् (=अत्यर्थमेव) कार्भतुः (=कुत्सितस्वामिनः) वदनपरिपाटीषु (=मुखविवलनादिषु) [तदाशयाधिगमाय] घटना [=निरन्तरा चेष्टा] सैव लङ्काभर्तुः रावणस्य वदनपङ्क्तौ इषुघटना च कृता, एवं च मया रामत्वं (=रामभावः) प्राप्तम्, [कुशलं (=[illegible]) वसु (=धनम्) यस्य तस्य भावः] कुशलवसुता एव [कुशलवौ सुतौ यस्याः सा] कुशलवसुता तु न अधिगता (=प्राप्ता) इत्यर्थः। अत्र शब्दशक्तिमहिम्ना उपस्थितस्य दण्डकारण्यादिरूपस्य द्वितीयार्थस्य बलात् प्रतीतौ [illegible]गादिरूपसाधारणधर्मका रामेण सह किराजसेवकस्य कवेः उपमानोपमेयभावः कुशलवसुता न त्वधिगता इति प्रतिपाद्येन [illegible]वाक्येन प्रतिपाद्यमानस्य वाच्यप्रायस्य व्यतिरेकस्य अङ्गतां नीत इति रमणीयोऽपि स उपमानोपमेयभावः कविगतदैन्यभावस्य उपकारकत्वेनैव कवेर-

अत्र शब्दशक्तिमूलानुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्याङ्गतां नीतः ।

आगत्य सम्प्रति वियोगविसंष्ठुलाङ्गीमम्भोरुहिणीं क्वचिदपि क्षपितक्षपाकः ।
एतां प्रसादयति पश्य शनैः प्रभाते तन्वङ्गि पादपतनेन सहस्ररश्मिः ।उदा० १६४॥

अत्र नायकवृत्तान्तोऽर्थशक्तिमूलो वस्तुरूपो निरपेक्षरविकमलिनीवृत्तान्ता-
ध्यारोपेणैव स्थित [ः]

भिप्रेत इति अपराङ्गव्यङ्ग्यगुणीभूतव्यङ्ग्यत्वमस्य उदाहरणान्तरेण दर्शयति—अत्र शब्द-
शक्तीत्यादि । सरस्वत्यङ्गमिति प्रतिपत्तव्यमित्यर्थः—(उदा० १५८। परिचयवाक्याद-
त्रानुवर्तते । नात्र वाच्यं प्रति व्यङ्ग्यमात्रस्य अङ्गता विदर्शयिषिता किन्तु वाक्यार्थीभूत-
रसादिकं प्रति शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यस्यैवाङ्गता विदर्शयिषिता । जनस्थान-
भ्रमणादिना वाच्यार्थेनापि शब्दशक्तिमूलानुरणनरूपव्यङ्ग्याद् औपम्यात् प्रागेव अवगतेन
रामत्वारोपस्य सिद्धिरिति नौपम्यस्य वाच्यसिद्ध्यङ्गत्वम्, सम्मुखरूपेण प्रतीतस्य वाच्या-
र्थस्य अनुपपत्तेर्वारकस्यैव वाच्यसिद्ध्यङ्गत्वात् ॥ उदा० १६३ ॥

वाच्याङ्गभूतेन अर्थशक्तिमूलानुरणनरूपेण वस्तुना युक्तम् अपराङ्गव्यङ्ग्यगुणीभूत-
व्यङ्ग्यकाव्यमुदाहरति—**आगत्य सम्प्रतीत्यादि** । अनुनयं विनैव मानं त्यजन्ती मुग्धां
नायिकां प्रति सख्या उपालम्भोक्तिरियम् । हे तन्वङ्गि. क्वचिद् अन्यत्रैव (द्वीपान्तरे)
रात्रिं क्षपितवान् सहस्ररश्मिः सम्प्रति प्रभातकाले शनैरागत्य एतां वियोगविसंष्ठुलाङ्गीं
विलुलितविपर्यस्ताङ्गीं पद्मिनीं पादयोः पतनेन प्रसादयति. एतत् पश्येत्यर्थः । अत्र निर-
पेक्षोऽपि रविकमलिनीवृत्तान्तो वक्तृबोद्धव्यवैशिष्ट्याद् वाच्यार्थविश्रान्तिधाम न सुखेन
लभते इति समासोक्त्यादाविव न वाच्यार्थस्यैव तस्यात्र चमत्कारजनने प्राधान्यमिति
अर्थशक्तिमूलो वस्तुरूपो व्यङ्ग्यो नायकयोः 'क्वचिदपि नायिकान्तरे रात्रिं क्षपयित्वा
प्रातः शनैरागतो नायको वियोगविलुलिताङ्गीं नायिकां पादपतनेन प्रसादयति' इति
वृत्तान्तश्च आस्वादनीयोऽपि विशेष्यानिधायिनो. उभयार्थप्रतिपादकत्वाभावाद् रविकम-
लिनीवृत्तान्ते वाच्यभूते अध्यारोपितत्वेनैव स्थितो न स्वप्राधान्येन वाक्यार्थतां प्राप्नो-
तीति अयं प्रतीयमानो नायकवृत्तान्तो वाच्यार्थस्याङ्गम् इति अपराङ्गव्यङ्ग्यं गुणीभूत-
व्यङ्ग्यकाव्यमित्याशयेनाह—अत्र **नायके**त्यादि । अयमेव समासोक्त्यलङ्कार इति उद्द्यो-
तकारादय अलङ्कारस्याव्यङ्ग्यत्वमिति वदन्तः समस्त्यो ग्रन्थकारोऽपि समासोक्त्यादिप्रधानानां
काव्यानां गुणीभूतव्यङ्ग्यत्वं चित्रत्वं चेति मन्यते । वस्तुतस्तु मम्मटमते नायं समासो-
क्त्यलङ्कारस्य विषय., अत्र चमत्कारे जननीये अवाक्यार्थीभूतस्यापि व्यङ्ग्यस्यैव प्राधा-
न्याद् वाच्यस्य अप्राधान्यात् । यत्र तु वाच्यार्थस्य मुखेन विश्रान्तत्वम् चमत्कारे जननीये
प्राधान्यं च, व्यङ्ग्यस्य तु वाच्यार्थोपस्कारकत्वमात्रम् न स्वप्राधान्येन चमत्कारकत्व स
समासोक्त्यादेरलङ्कारस्य विषयो मम्मटमते, यथा—''उपोढरागेण विलोलतारक तथा

वाच्यसिद्ध्यङ्गं यथा—

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्छां तमः शरीरसादम् ।
मरणञ्च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥ उदा० १६५ ॥

अत्र हालाहलं व्यङ्ग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृत् ।

यथा वा—

गृहीतं नलिनीविशालमुखम् । यदा मदनः निर्मिमायक तदा पुरोऽपि रागाद् गलितं न लक्षितम्" इति, यथा वा—'लङ्घिऊण सुरुज्झ वाहुप्फसं जीए स को वि उल्लासो । ज अलच्छी तुह विरहे ण हुज्जला दुब्बला ण सा'' इति । यदि अपराङ्गरूपगुणीभूतव्यङ्ग्यविशेषस्यैव समासोक्तित्वं मम्मटस्याभिमतं स्यात् तर्हि किमिति स समासोक्तिं चित्रकाव्यनिरूपणावसरे पुनः प्रतिपादयेत् कथं च नोल्लिखेत् तत्र अपराङ्गरूपगुणीभूतव्यङ्ग्यविशेषत्वम् ? 'काव्यविशेषोऽङ्गी ध्वनिरिति, कथितः तस्य पुनरङ्गानि अलङ्कारा गुणाः वृत्तयश्चेति प्रतिपादयिष्यन्ते' (२।१३ वृत्तौ) इति वदता 'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते । काव्ये उभे ततोऽन्यद् यत् तच्चित्रमभिधीयते' (३।४१) इति च गुणीभूतव्यङ्ग्यमपि काव्यधर्मिणं स्वीकुर्वता आनन्दवर्धनेनाऽपि वदतोव्याघातं परिजिहीर्षता समासोक्त्यादौ गुणीभूतव्यङ्ग्यत्वम् अलङ्कारत्वं चेत्युभयं नैव स्वीकर्तव्यम्, नैव च स्वीकृतम्, तदभिमतसमासोक्त्यलङ्कारस्य [illegible] कथञ्चित् स्वीकृतत्वेऽपि तन्मतेन तत्र गुणीभूतव्यङ्ग्यत्वमेव न त्वलङ्कारत्वमिति स्वीकरणमत्यावश्यकम् ॥ उदा० १३४ ॥ [२]

वाच्यसिद्ध्यङ्गरूपं तृतीयं गुणीभूतव्यङ्ग्यमुदाहरति—भ्रमिमरतिमित्यादि । नायिकावस्थां नायकं प्रति बोधयन्त्या वियोगिनीषु वर्षप्रभावं वर्णयन्त्याः सखीदूत्या उक्तिरियम् । मेघसर्पजं गरलरूपं जलं प्रसह्य वियोगिनीनां भ्रमम्, विषयेष्वरुचिम्, [illegible] नष्टचेष्टताम्, क्षणे क्षणे तमःप्रवेशम् (तमोदर्शनम्), देहकार्श्यम्, जीवस्योत्क्रमणात्मकम् च कुरुते इत्यर्थः । गाथा छन्दः । प्रतिपादम् एकैकमात्राधिका गीतिरियमिति केचित् । अत्र वाच्यो जलद एव भुजग इत्यभेदारोपस्तावद् न सिद्ध्यति यावद् विषमित्यनेन जलवाचकेन पदेन हालाहलं न व्यज्यते इति हालाहलरूपं व्यङ्ग्यं वाच्यसिद्ध्यङ्गमिति आह—अत्र हालाहलमित्यादिना । विषशब्दस्याऽभिधायाः प्रकरणाद् जले नियन्त्रितत्वाद् हालाहलं व्यङ्ग्यमिति भावः । भ्रम्याद्यष्टविधं कार्यं विषे (जले) हालाहलरूपस्य साधकमिति उक्ताष्टविधकार्यकारितया श्रुतेन विषपदेन व्यञ्जनया हालाहलस्योपस्थितौ कृतायां तदभेदेन जले गृहीते विषाभिन्नहालाहलजनकत्वेन जलदे भुजगाभेदस्य सिद्धिरिति व्यङ्ग्यस्य हलाहलस्य वाच्यजलदभुजगरूपकसिद्ध्यङ्गतेति भावः ॥ उदा० १६५ ॥

गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किं त्वेवं विजनस्थयोर्हतजनः सम्भावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन् पुलकोत्कराञ्चिततनुर् गोपीं हरिः पातु वः ॥ उदा० १६६ ॥

अत्राच्युतादिपदव्यङ्ग्यम् आमन्त्रणेत्यादिवाच्याङ्गम् ।

एतच् चैकत्र एकवक्तृगतत्वेन अपरत्र भिन्नवक्तृगतत्वेनेति अनयो-रभेदः । [३]

अस्फुटं यथा—

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ॥ उदा० १६७ ॥

अत्र अदृष्टो यथा न भवसि वियोगभयं च यथा नोत्पद्यते तथा कुर्या इति क्लिष्टम् । [४]

विशेषं वक्तुमुदाहरणान्तरमाह—**गच्छाम्यच्युतेत्यादि** । हे अच्युत, भवतो दर्शनेनैव तृप्तिरुत्पद्यते किम्? न हि; किन्तु रहसि स्थितयोः आवयोः विषये दुर्जनोऽन्यथा (रतार्थं सङ्गतौ इति) सम्भावयति केवलम्, अतो गच्छामि इति वदन्तीम् अच्युत इति सम्बोधनस्य (ज्योक्करणस्य) स्वरविशेषकृतया उक्त्या (हरेः अस्खलितधैर्यत्वस्य व्यञ्जनेन) स्वकीयां निरर्थकावस्थितिं खेदं च सूचितवतीम् अत एव अलसां गोपीम् आलिङ्गन् रोमाञ्चनिकर-व्याप्तशरीरो हरिर् युष्मान् पातु इत्यर्थः । अत्र 'इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदा-लसाम्' इति वाच्यं तावद् न सिद्ध्यति यावद् गच्छाम्यच्युतेत्यादिना पूर्वार्धेन 'रहसि अस्मद्विश्रम्भकर्मभ्रमितनायिकाजनमनागमेऽपि धीर हे अच्युत, तव दर्शनेन किं भवति, केवलं लोकापवाद एव भवति, यदि तु आवयोः रहसि सङ्गतं सफलं भवेत् तदा तु लोकापवादद्युत्तमपि सम्प्रयोगसुखेनाभिभूत सत् सुखेनैव सहनीयं स्याद्' इति व्यङ्ग्यं प्रत्याय्यते इति एतद् व्यङ्ग्यं पूर्वोक्तस्य वाच्यस्य सिद्धेरङ्गमित्याशयेनाह—**अत्राच्युते-त्यादि** । व्यङ्ग्यस्य वाच्यसिद्ध्यङ्गत्वे च तस्य हृदयाकृष्टतया रामणीयकमपकृष्टं भवतीति न विस्मर्तव्यम् । 'रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया' इति सप्तमोल्लासे वक्ष्यमाणत्वेऽस्योदाहरणस्यानौचित्यमस्य ग्रन्थकारस्याप्रकृतिरिति ध्यानं देयं सुधीभिः ॥ उदा० १६६ ॥

उक्तयोरुदाहरणयोर् वैशिष्ट्यमाह—**एतच्चेत्यादिना** । पूर्वस्मिन्नुदाहरणे वाच्यं सिद्धेरङ्गं व्यङ्ग्यञ्च एकस्यैव कवेरुक्तौ एकस्या एव कविनिबद्धाया वक्त्र्या उक्तौ वा स्तः, द्वितीये उदाहरणे च इत्यामन्त्रणेत्यादिवाच्यं कवेरुक्तौ गच्छाम्यच्युतेत्यादिगम्यं व्यङ्ग्यं कविनिबद्धाया वक्त्र्या गोप्या उक्ताविति वाच्यव्यङ्ग्ये भिन्नवक्तृवाक्यनिष्ठे स्त इत्यर्थः । [३]

सन्दिग्धप्राधान्यं यथा—

हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ उदा० १६८ ॥

अत्र परिचुम्बितुमैच्छदिति किं प्रतीयमानं किं वा विलोचनव्यापारणं वाच्यं प्रधानमिति सन्देहः । [५]

तुल्यप्राधान्यं यथा—

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते ॥ उदा० १६९ ॥

अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्षणात् क्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् । [६]

अस्फुटव्यङ्ग्यस्य चतुर्थं गुणीभूतव्यङ्ग्यस्योदाहरणमुदाहरति—**अदृष्टे दर्शनोत्कण्ठेत्यादि** । काचित् प्रियं भणति—त्वयि अदृष्टे त्वद्दर्शनोत्कण्ठा भवति, दृष्टे **च** त्वयि वियोगो भविष्यतीति भयम् भवति, अतो भवता अदृष्टेनाऽपि सता मया सुखं न प्राप्यते, भवता दृष्टेनाऽपि सता मया सुखं न लभ्यते इति । अत्र अस्फुटव्यङ्ग्यतां दर्शयति—**अत्र दृष्ट** इत्यादिना । **क्लिष्टम्** अस्फुटम्, हृदयालुनाऽपि झटित्यनास्वाद्यमित्यर्थः ॥ उदा० १६७ ॥ [४]

सन्दिग्धप्राधान्यव्यङ्ग्यं पञ्चमं गुणीभूतव्यङ्ग्यकाव्यमुदाहरति—**हरस्तु किञ्चिदित्यादि** कुमारसम्भवे [३।६७] वसन्तस्य महादेवे प्रभावं वर्णयति कविः—चन्द्रोदयारम्भे समुद्र इव किञ्चिच्चलितधैर्यो हरस्तु बिम्बफलसदृशाधरवति उमामुखे त्रीण्येव लोचनानि विवर्तयामासेति । अत्र परिचुम्बितुमैच्छदिति व्यङ्ग्यस्य विलोचनाना व्यापारणस्य वाच्यस्य च चमत्कारजनकत्वरूपे प्राधान्ये विषये एकतरस्य प्राधान्यस्याऽप्राधान्यस्य वा साधकं बाधकं वाऽपि न किमपि मानमस्तीति वाच्य-व्यङ्ग्ययोः सन्दिग्धं प्राधान्यम्, तद्योगात् सन्दिग्धप्राधान्यव्यङ्ग्यम् मध्यमकाव्यमिदमित्यभिप्रायेणाह—**अत्र परिचुम्बितुमित्यादि** ॥ उदा० १६८ ॥ [५]

तुल्यप्राधान्यव्यङ्ग्यं षष्ठं गुणीभूतव्यङ्ग्यकाव्यमुदाहरति—**ब्राह्मणातिक्रमेत्यादि** । महावीरचरिते [२।८] रावणामात्यं माल्यवन्तं प्रति परशुरामेण प्रहिते पद्यमिदम् । ब्राह्मणातिक्रमस्य परिहारो भवतामेव कल्याणाय भवति (ब्राह्मणानान्तु जामदग्न्ये जीवति सति युष्माभिरवमाने कृतेऽकृतेऽपि कल्याणं भवत्येव), ब्राह्मणातिक्रमणे कृते तु युष्माकं तथा (तादृशं सकलरहस्यज्ञम्) मित्रं परशुरामो दुर्मना भवतीत्यर्थः । व्यङ्ग्यस्य दण्डस्येव वाच्यस्य सामोपायस्यापि समानेन प्राधान्येन प्रतिपिपादयिषितत्वाद् द्वयोरपि परस्परनैरपेक्ष्येण चमत्कारास्पदत्वाद् व्यङ्ग्यस्याऽत्र वाच्येन समं प्राधान्यम्, तद्योगाद् इदं तुल्यप्राधान्यव्यङ्ग्यं गुणीभूतव्यङ्ग्यकाव्यमित्यभिप्रायेणाह—**अत्र जामदग्न्य** इत्यादि ॥ उदा० १६९ ॥ [६]

काक्वाक्षिप्तं यथा—

मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन ॥
उदा० १७० ॥

अत्र मथ्नाम्येवेति व्यङ्ग्यं वाच्यनिषेधसहभावेन स्थितम् । [७]

असुन्दरं यथा—

वाणीर-कुडंगुड्डीण-सउनि-कोलाहलं सुणन्तीए ।
घर-कम्म-वावडाए वहुइए सीअन्ति अङ्गाइं ॥ उदा० १७१ ॥

अत्र 'दत्तसङ्केतः कश्चिल् लतागहनं प्रविष्टः' इति व्यङ्ग्यात् 'सीदन्ति अङ्गानि' इति वाच्यं सचमत्कारम् । [८]

(सू० ६१) **एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत् ॥ ४५ ॥**

काक्वाक्षिप्तव्यङ्ग्ययुक्तं सप्तमं गुणीभूतव्यङ्ग्यकाव्यभेदमुदाहरति—**मथ्नामि कौरवे**-त्यादि । वेणीसंहारे (१।१५) सन्धिवार्तां श्रुत्वा कुपितस्य भीमसेनस्य सहदेवं प्रति उक्तिरियम् । अहं कोपाद् युद्धे कौरवाणां शतं न मथ्नामि, दुःशासनस्य वक्षःस्थलाद् रुधिरं च न पिबामि, सुयोधनोरू अपि गदया न सञ्चूर्णयामि, स्वयन्त्यक्तराज्योऽत एव न प्रजानां किन्तु भवता राजा युधिष्ठिरः इन्द्रप्रस्थ-वृकप्रस्थ-जयन्त-वारणावतैः पञ्चमेन केनचिद् ग्रामेण च पणं (देयभागकम्) कृत्वा सन्धिं करोतु इत्यर्थः । प्रतिज्ञात-धार्तराष्ट्रकुलक्षयस्य भीमसेनस्य न मथ्नामीत्यादिनिषेधाः काक्वा मथ्नाम्येवेत्यादिव्यङ्ग्यं वाच्यार्थप्रतीति-समकालमेव हठादेवोपस्थापयन्ति तद् व्यङ्ग्यं विना विश्राम्यन्त्येव नहीतीदं काव्यं काक्वाक्षिप्तव्यङ्ग्ययुक्तं गुणीभूतव्यङ्ग्यकाव्यमित्याशयेनाह—**अत्र मथ्नाम्येवेत्यादि** ॥ उदा० १७० ॥ [७]

वाच्यापेक्षया अमनोहरेण व्यङ्ग्येन युक्तम् अष्टमं गुणीभूतव्यङ्ग्यकाव्यभेदमुदाहरति—**वाणीर-कुडंगुड्डीणे**त्यादि । **'वानीर-कुडङ्गोड्डीन-शकुनि-कोलाहलं शृण्वन्त्याः । गृहकर्म-व्यापृताया वध्वाः सीदन्ति अङ्गानि'** इति संस्कृतच्छाया । कुडङ्गम् लतागृहम् । स्वगृहनिकटवर्तिवेतसकुञ्जं सङ्केतस्थानं कृतवत्या निकुञ्जे उड्डीयमानपक्षिकोलाहलं श्रुत्वा उपनायकस्य कुञ्जप्रवेशं तर्कयन्त्या गुरुजनभयाद् गृहकर्मबन्धाच्च तत्र गन्तुमशक्नुवत्या नायिकाया अवस्थाया वर्णनमिदम् । अत्र 'दत्तसङ्केतः कश्चिद् वेतसकुञ्जं प्रविष्टः' इति व्यङ्ग्यात् 'सीदन्ति अङ्गानि' इति वाच्यं सर्वाङ्गावसादस्य सन्तापवर्णनस्य रमणीयकातिशयेन औत्सुक्यातिशयरूपे परिणतत्वाद् अधिकं चमत्कारं जनयति इति उक्तं व्यङ्ग्यम् उक्तस्य वाच्यस्यापेक्षया अमनोहरम्, तद्योगात् काव्यमिदम् असुन्दरव्यङ्ग्यं गुणीभूतव्यङ्ग्यम् इत्याशयेनाह—**अत्र दत्तेत्यादि** ॥ उ० १७१ ॥ [८] ॥ ६८ ॥

न अष्टौ एव शुद्धगुणीभूतव्यङ्ग्यकाव्यभेदाः किन्त्वन्येऽपि बहवः सन्तीत्याह—**एषां भेदा** इत्यादिना । पूर्वं निरूपितस्य ध्वनेरिव एषामपि गुणीभूतव्यङ्ग्यानाम् अर्थान्त-

तदुक्तमिति 'व्यज्यन्ते वस्तुमात्रेण यदाऽलङ्कृतयस्तदा। ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयाद्' (२।३०) इति ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्राऽलङ्कारो व्यज्यते न तत्र गुणीभूतव्यङ्ग्यत्वम्।

(सू० ७०) सालङ्कारैर् ध्वनेस् तैश् च योगः संसृष्टिसङ्करैः।

सालङ्कारैरिति तैरिवाऽलङ्कारैरलङ्कारयुक्तैश्च तैः। तदुक्तं ध्वनिकृता— सगुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः। सङ्करसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा' इति (३।४३)

[illegible] भेदाश्च वेदितव्या इत्यर्थः। इत्थं सम्भावितानां भेदानां मध्ये केचन भेदा गुणीभूतव्यङ्ग्यस्य न भवन्ति युक्तिविरोधा- [illegible]। यथायोगम् यथायुक्ति। कारिकास्थं यथायोगमिति पदमुपादाय तदभिप्रायं प्रकाशयति—व्यज्यन्ते वस्तुमात्रेणेत्यादिना। यदा वस्तुमात्रेण [illegible] अलङ्कारा व्यज्यन्ते तदा यदि तेऽलङ्कारा अपि चारुत्वोत्कर्षेण कविसंरम्भगोचरत्वेन च प्रधानानि न स्युस्तर्हि तत्र काव्यत्वमेव न भवेद् वाक्यत्वमात्रं स्यादिति न तत्र [illegible] अपि प्राप्तिः स्यात्, यदि तु तेऽलङ्कारा चारुत्वोत्कर्षेण कविसंरम्भगोचरत्वेन च प्रधानानि स्युस्तदा तत्र ध्वनिकाव्यत्वमेव स्यादिति [illegible] गुणीभूतव्यङ्ग्यकाव्यभेदा न सम्भवन्ति; एवञ्च [illegible] (५१–९=४२) द्विचत्वारिंशत्प्रकाराः शुद्धा गुणीभूतव्यङ्ग्यभेदा सम्भवन्तीत्यर्थः॥ ६९॥

एवं गुणीभूतव्यङ्ग्यभेदनिरूपणदिक्प्रदर्शनं कृत्वा ध्वनेरपि गुणीभूतव्यङ्ग्ययोगात् प्रकारबाहुल्यं दर्शयति—सालङ्कारैरित्यादिना। यद्यपि नायं ध्वनिनिरूपणप्रस्तावः तथापि [illegible] गुणीभूतव्यङ्ग्यनिरूपणात् पूर्वं न निरूपयितुं शक्यन्ते इति पूर्वमनिरूपितास्ते इदानीं निरूप्यन्ते। अलङ्कारेषु अनिरूपितेष्वपि अलङ्कारप्रयुक्तध्वनिकाव्यभेदा यथा पूर्वं निरूपितास्तथैव एतेऽपि ध्वनिकाव्यनिरूपणप्रस्तावे एव निरूपणीया इति चेद् [illegible] निरूपणं कृत्वैव तत्प्रयुक्तध्वनिभेदनिरूपणे कृते एकप्रकरणगततया ध्वनेर्निरूपणे या सुग्रहता सा न स्यादिति अलङ्कारप्रयुक्तध्वनिकाव्यभेदाः अपि पूर्वमेव निरूपिताः। [illegible] गुणीभूतव्यङ्ग्यानां तु निरूपणं कृत्वैव तत्प्रयुक्तध्वनिकाव्यभेदानां निरूपणे कृतेऽपि न दुर्ज्ञेया ध्वनिभेदानाम् इति एवं क्रियते। **ध्वनेः तैः** गुणीभूतव्यङ्ग्यैः, तथैव **अलङ्कारैः, अलङ्कारयुक्तैः तैः** गुणीभूतव्यङ्ग्यैश्च संसृष्टित्वेन सङ्कररूपैश्च योगो भवति. एवं च ध्वनिकाव्यस्य बहवः प्रभेदा भवन्तीति भावः। वृत्तौ **तैरेवालङ्कारै**रिति [illegible] परिगृहीतः पाठो भ्रष्टः, मम्मटमते पूर्वं निरूपितानां [illegible] पारिखेण **तैरिवे**त्यस्यैव पाठस्य धृतत्वात्, उदाहृतशिष्टसम्मतौ च गुणीभूतव्यङ्ग्यस्याऽलंकार-

(सू० ७१) अन्योन्ययोगादेवं स्याद् भेदसङ्ख्याऽतिभूयसी ॥ ४६ ॥

एवम् अनेन प्रकारेण, भेदप्रभेदगणने अतिप्रभूततरा गणना. तथाहि शृङ्गारस्यैव भेदप्रभेदगणनायामानन्त्यम्, का गणना तु सर्वेषाम् ।

ताया अनुक्तत्वात् । यद्यपि पारिखपाठे 'तैरिवालङ्कारयुक्तैश्च तैः' इत्येव ग्रन्थस्तथापि कारिकाया 'सालङ्कारैः' इति पदस्य तन्त्रेण पठितस्य द्वेधाऽर्थमादाय अलङ्कारानां पृथगुल्लेखं कर्तुं 'तैरिवाऽलङ्कारैरलङ्कारयुक्तैश्च तैः' इति वृत्तिग्रन्थपाठो युक्ततरस्तस्यैवोपक्रियमाणवृत्तिग्रन्थस्यानुकूलतरत्वाच्च । सोमेश्वरोऽपि—'शुद्धस्य ध्वनेर्गुणीभूतव्यङ्ग्यैः केवलैर्योगोऽलङ्कारैश्च केवलैः अलङ्कारयुक्तैश्च गुणीभूतव्यङ्ग्यैरिति त्रयः पक्षाः' इत्येवाह । ध्वन्यालोकेऽपि—'तस्य च ध्वनेः स्वप्रभेदैः, गुणीभूतव्यङ्ग्येन, वाच्यालङ्कारैश्च सङ्करसंसृष्टिव्यवस्थायां क्रियमाणायां बहुप्रभेदता लक्ष्ये दृश्यते' इत्येव (३।४३ वृत्तौ) उक्तम्; लोचनेऽपि—"स्वभेदैः, गुणीभूतव्यङ्ग्येन, अलङ्कारैः प्रकाश्यते इति त्रयो भेदाः" (३।४३) इत्युक्तम् । अत्र तु ध्वनेः स्वभेदैर्योगः पूर्वमेव (४।४२, ४३) प्रतिपादित इति नेह तैर्योग उल्लिख्यते । ध्वनेः अलङ्कारयुक्तगुणीभूतव्यङ्ग्येन योगो यद्यपि नानन्दवर्धनादिभिः वृत्त्यादौ प्रतिपादितस्तथापि अत्र प्रतिपाद्यते । अथवा वृत्तिनिरपेक्षाया उदाहृताया ध्वनिकारिकायाः 'सः ध्वनिः अलङ्कारसहितैः गुणीभूतव्यङ्ग्यैः, स्वैः प्रभेदैश्च सह संकरेण संसृष्ट्या च पुनर्बहुतरभेदं प्राप्तः प्रकाशते' इत्यर्थः प्रतिभातीति मम्मटस्योक्तेरियं ध्वनिकारोक्तिरेव मूलम् । लोचने तु इयं ध्वनिकारिका "सह गुणीभूतव्यङ्ग्येन सहालङ्कारैर्ये वर्तन्ते स्वे ध्वनेः प्रभेदास्तैः सङ्कीर्णतया संसृष्ट्या वाऽनन्तप्रकारो ध्वनिरिति तात्पर्यम्" इति व्याख्याता । ध्वन्यालोकवृत्त्यनुकूला चेयं व्याख्या । एवञ्च सर्वथा नास्त्येव गुणीभूतव्यङ्ग्यमात्रस्याऽलङ्कारत्वे आग्रहो मम्मटस्य, अतएव केचिदिमम्नु आग्रहमभ्यूहैर्वृथैव तथोच्यते । मम्मटेन अत्र प्रतिपादितानां ध्वनिकाव्यप्रभेदानाम् उदाहरणं दिक्प्रदर्शनरूपेणापि नोपन्यस्तमिति जिज्ञासुभिः ध्वन्यालोक-लोचन-श्रीधरकृतकाव्यप्रकाशविवेकादौ तद् द्रष्टव्यम् ॥ ७० ॥

ध्वनेः गुणीभूतव्यङ्ग्यस्य अलङ्कारस्य च परस्परं संसृष्ट्या साङ्कर्येश्च योगाद् अनन्ता हि काव्यप्रकाराः सम्भवन्ति, एवञ्चेयं वाच्यवस्तुविशेषवर्णनैः सहस्रैरपि यत्नतो निबद्धाऽपि जगतां प्रकृतिरिव क्षयं नैतीति कविभिर्नवा नवाः काव्यप्रकाराः स्रष्टव्या इत्यभिप्रायेणाह—**अन्योन्ययोगा**दित्यादि । आनन्दवर्धनस्तु स्फुटमेवाह—"ध्वनेर्यः सगुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः । अनेनानन्त्यमायाति कवीनां प्रतिभागुणः । अतो ह्यन्यतमेनापि प्रकारेण विभूषिता । वाणी नवत्वमायाति पूर्वार्थान्वयवत्यपि । युक्त्याऽनयाऽनुसर्तव्यो रसादिर्बहुविस्तरः । मितोऽप्यनन्ततां प्राप्तः काव्यमार्गो यदाश्रयात्" इति (४।१-३) ।

सङ्कलनेन पुनरस्य ध्वनेस्त्रयो भेदाः, व्यङ्ग्यस्य त्रिरूपत्वात्। तथाहि— किञ्चिद् वाच्यतां सहते किञ्चित्त्वन्यथा। तत्र वाच्यतासहम् अविचित्रं विचित्रं चेति। अविचित्रं वस्तुमात्रम् विचित्रं तु अलङ्काररूपम्। यद्यपि प्राधान्येन तद् अलङ्कार्यम् तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते। रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः, स हि रसादिशब्देन शृङ्गारादिशब्देन वाऽभिधीयेत, न चाऽभिधीयते; तत्प्रयोगेऽपि विभावाद्यप्रयोगे तस्याऽप्रतिपत्तेः, तदप्रयोगेऽपि विभावादिप्रयोगे तस्य प्रतिपत्तेश्च इति अन्वय-व्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रतीयते इति निश्चीयते तेन असौ व्यङ्ग्य एव; मुख्यार्थबाधाद्यभावाद् न पुनर् लक्षणीयः।

निरूपितस्य ध्वनिकाव्यस्य व्यञ्जनामूलकत्वे व्यञ्जनास्वीकारविषये च ये विवदन्ते तान् प्रति सर्वस्यापि ध्वनिकाव्यस्य गुणीभूतव्यङ्ग्यकाव्यस्य च व्यञ्जनामूलकत्वं प्रदर्शयितुं तत्प्रसङ्गेन व्यञ्जनां सम्यक् निरूपयितुं च ध्वनिभेदोदाहरणेषु गुणीभूतव्यङ्ग्योदाहरणेषु च प्रदर्शितेषु व्यञ्जनास्थापनं सुकरं भवतीति ध्वनि-गुणीभूतव्यङ्ग्यनिरूपणानन्तरं निरूपितानि सर्वाण्यपि ध्वनिकाव्यानि उपाधिविशेषविवक्षया त्रिविधानीत्याह— **सङ्कलनेन पुन**रित्यादिना। **सङ्कलनेन** अनुगतेन केनाप्युपाधिना भेदानां वर्गेषु सङ्ग्रहणेन। **ध्वनेः** व्यङ्ग्ययुक्तकाव्यस्य। ध्वन्यते इति ध्वनिर्व्यङ्ग्यम्, तद्युक्तं काव्यमपि ध्वनिरिति ध्वनिपदमत्र न पारिभाषिकं किन्तु लाक्षणिकम्, तेनाऽत्र ध्वनिशब्देन प्रधानेन गुणीभूतेन वा व्यङ्ग्येन युक्तं काव्यं बोध्यते। त्रैविध्यमेवाह—**व्यङ्ग्यस्ये**त्यादिना। तत्र रसादिविषयकस्य ध्वनिकाव्यस्य व्यञ्जनामूलकत्वं प्रतिवादिनः निर्विवादं सुप्रतिपद्यन्ते इति सूचयितुं प्राधान्येन तदेव प्रदर्शयति—**रसादिलक्षणस्त्वर्थ** इत्यादिना। पूर्व प्रतिपादित आस्वादनीयो रसादिलक्षणोऽर्थो यदि वाच्यो भवेत् तर्हि स रसादिशब्देन शृङ्गारादिशब्देन वाऽभिधातुं शक्येतेत्यर्थः **सही**त्यादेः। अथवा रसादिरूप आस्वाद्योऽर्थो रसादिशब्देन शृङ्गारादिशब्देन वा अभिधीयेत ? इति प्रश्नः लिङः प्रश्नोऽर्थ इति। रसादिलक्षणस्यार्थस्य अवाच्यत्वम् अन्वयव्यतिरेकाभ्यां दर्शयति—**तत्प्रयोगेऽपी**त्यादिना। रसादिरूपस्यार्थस्य लक्ष्यत्वमपि नेत्याह—**मुख्यार्थबाधे**त्यादिना। एवञ्च रसादिमतः काव्यस्य व्यञ्जनामूलकत्वं तर्ककर्कशैरपि निर्विवादं स्वीकर्तव्यमेवेति भावः॥

'ध्वनिर्नामाऽपरो योऽपि व्यापारो व्यञ्जनात्मकः। तस्य सिद्धेऽपि भेदे स्यात् काव्येंऽशत्वं न रूपता' इति भवतु नाम रसादिविषयकस्य ध्वनिकाव्यस्य व्यञ्जनामूलकता आस्वाद्यवस्त्वलङ्कारविषयकस्य काव्यस्य तु न व्यञ्जनापेक्षा इत्याक्षेपे आह—**अर्थान्तरसङ्क्रमिते**त्यादि। तत्र अर्थान्तरसङ्क्रमितवाच्यके अत्यन्ततिरस्कृतवाच्यके च अविवक्षितवाच्ये **आस्वाद्यवस्तुविषयके** लक्षणामूलेऽपि ध्वनिकाव्ये व्यञ्जना एव आस्वाद्यवस्तूपस्थितिहेतुरिति द्वितीये उल्लासे 'तत्र व्यापारो व्यञ्जनात्मकः' (सू० २४) इत्यादिना

अर्थान्तरसङ्क्रमितात्यन्ततिरस्कृतवाच्ययोर्वस्तुनोरलङ्कारयोर्वा व्यङ्ग्यं विना लक्षणैव न भवतीति प्राक् प्रतिपादितम् ।

शब्दशक्तिमूले तु अभिधाया नियन्त्रणेन अनभिधेयस्य अर्थान्तरस्य तेन सह उपमादेरलङ्कारस्य च निर्विवादं व्यङ्ग्यत्वम् ।

अर्थशक्तिमूलेऽपि— विशेषे सङ्केतः कर्तुं न युज्यते इति सामान्यरूपाणां पदार्थानाम् आकाङ्क्षा-सन्निधि-योग्यता-वशात् परस्परसंसर्गो यत्राऽपदार्थोऽपि विशेषरूपो वाक्यार्थः तत्र अभिहितान्वयवादे का वार्ता व्यङ्ग्यस्याभिधेयत्वस्य ।

सम्यक् प्रतिपादितमित्याह—अर्थान्तरेत्यादिना । एवञ्च एतादृशास्वाद्यवस्तुविषयकस्यापि काव्यस्य व्यञ्जनोपजीवित्वमेवेति भावः ।

विवक्षितान्यपरवाच्यके अनेकार्थकशब्दशक्तिमूलके आस्वाद्यवस्तुविषयके आस्वाद्यतरालङ्कारविषयके च ध्वनिकाव्येऽपि व्यञ्जनास्वीकारो निर्विवाद इति तादृशस्य काव्यस्यापि व्यञ्जनोपजीवित्वमेवेत्याह—शब्दशक्तिमूले त्वित्यादिना । अभिधायाः प्राकरणिकेऽर्थे नियन्त्रणात्, शब्द-बुद्धि-कर्मणां विरम्य सजातीयव्यापाराभावस्य स्वीकार्यत्वाच्च द्वितीयेऽर्थे औपम्यादौ च नाऽभिधा, हेत्वभावाद् न च लक्षणा, किन्तु व्यञ्जनैवेति तयोर्व्यङ्ग्यत्वं निर्विवादमेव भवितुमर्हतीत्यर्थः । ध्वनिकारेण तु—"आक्षिप्त एवाऽलङ्कारः शब्दशक्त्या प्रकाशते" (२।२१) इत्यादिना अलङ्कारस्यैव व्यङ्ग्यत्वं स्वीकृतं न वस्तुनस्तथा, जगन्नाथेनाऽपि—'नानार्थस्य शब्दस्य अप्राकरणिकेऽर्थे व्यञ्जनेति प्राचां सिद्धान्तः शिथिल एव, प्राकरणिकाप्राकरणिकयोरुपमायां तु सा कदाचित् स्यादपीत्यस्माकं प्रतिभाति' इति सयुक्ति उक्तमिति अर्थान्तरस्य व्यङ्ग्यतायां विवादेऽपि अलङ्कारस्य व्यङ्ग्यता तु निर्विवादैव ।

विवक्षितान्यपरवाच्यके अर्थशक्तिमूलके अभग्नानियन्त्रिताभिधाके आस्वाद्यवस्तुविषयके आस्वाद्यतरालङ्कारविषयके च ध्वनिकाव्येऽपि वाच्यार्थस्य अनुपपत्तिसम्भावनाभावेऽपि तादृशस्यार्थस्य प्रतीतये व्यञ्जना मीमांसकैरपि स्वीकर्तव्यैवेति तादृशस्यापि काव्यस्य व्यञ्जनोपजीवित्वमेवेत्यभिप्रायेणाह—अर्थशक्तिमूलेऽपीत्यादि । तत्र पूर्वम् अभिहितान्वयवादिनः आचार्यकुमारिलभट्टस्य मते वाक्यार्थबोधोत्तरप्रतीतिकस्य अर्थस्य नाऽभिधाविषयत्वं किन्तु व्यञ्जनाविषयत्वमेवेति तन्मते पदार्थान्वयरूपस्य वाक्यार्थस्यैव अभिधाया अविषयत्वमनूद्य स्वाभिप्रायं प्रकाशयति—**विशेषे सङ्केत** इत्यादिना । विशेषरूपं वाक्यं वाक्यं प्रति सङ्केतग्रहस्य वाक्यानन्त्येनाऽसम्भवात् पदार्थे सङ्केतस्यग्रहेऽपि द्वितीयोल्लासे प्रदर्शितस्योक्तरूपाद् आनन्त्याद् व्यभिचाराच्च सन्निहितगवादिरूपे व्यक्तिविशेषे सङ्केतः कर्तुं न युज्यते इति जातावेव शक्तेर्ग्रहाद् वाक्यान्तर्गतैः पदैः अभिधया पूर्व जातिरूपाः पदार्थाः स्मार्यंते ततश्च तेषां स्मृताना पदार्थानां परस्पराकाङ्क्षासन्निध्यन्वययोग्यतावशात् परस्परान्वयसम्पादनतात्पर्येणैव तेषां समभिव्याहृतत्वाच्च लक्ष्यमाणः पदैरनभिधेयोऽपि सामान्याऽन्यथाऽसिद्धिबलाघातव्यशक्तिविशेषरूपपदार्थानाम् परस्परम् अन्वयो विशेषारूपो

येऽप्याहुः "शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति। श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया। अन्यथानुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम्। अर्थापत्त्यावबोधेत सम्बन्धं त्रिप्रमाणकम्" इति प्रतिपादितदिशा 'देवदत्त, गामानय' (उदा० १७२) इत्याद्युत्तमवृद्धवाक्यप्रयोगाद् देशाद् देशान्तरं सास्नादिमन्तमर्थं मध्यमवृद्धे नयति सति 'अनेनास्माद् वाक्यादेवंविधोऽर्थः प्रतिपन्नः' इति तच्चेष्टयाऽनुमाय तयोरखण्डवाक्यवाक्यार्थयोरर्थापत्त्या वाच्यवाचकभावलक्षणं सम्बन्धमवधार्य बालस्तत्र व्युत्पद्यते; परतः 'चैत्र, गामानय' (उदा० १७३) 'देवदत्त, अश्वमानय' (उदा० १७४) 'देवदत्त, गां नय' (उदा० १७५) इत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवधारयति इति अन्वयव्यतिरेकाभ्यां प्रवृत्ति-

---

वाक्यार्थो भवतीति स्वीकाराद् तत्र वादे वाक्यार्थोऽपि अभिधाविषयो न भवति, किन्तु तात्पर्यपरपर्यायलक्षणाविशेषविषय एव, तदाऽभिहितान्वयवादे का का प्रत्याशा वाक्यार्थ-प्रतीत्युत्तरकालप्रतीयमानव्यङ्ग्यार्थस्य अभिधाविषयत्वे इत्यर्थः। एवञ्च अभिहितान्वयवादि-मतानुसारेणापि पूर्वोक्तस्य काव्यविशेषस्य व्यञ्जनैकगम्यत्वमक्षतमेवेत्यभिप्रायः। न च भट्टमते वाक्यार्थस्य अवाच्यतया आपत्तिः, पदैरभिहितैः पदार्थैरन्वितप्रतिपत्तौ निमित्तमिति भवत्येवाऽन्वयेऽपि पारम्पर्येण पदानां हेतुत्वमिति। तदाह—'न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि' (श्लो० वा० ७।२२९) इति। पदार्थप्रतिपादनन्तु वाक्यार्थप्रतिपत्तये प्रयुक्तानां पदानाम् अवान्तरव्यापारः, अवान्तरव्यापारत्वाच्च कारकान्तरेष्विव तस्य न व्यवधायकत्वम्, तदुक्तम्—"वाक्यार्थमतये तेषां प्रयुक्तं नान्तरीयकम्। पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्" इति (श्लो० वा० ७।३४३)।

अन्विताभिधानवादिनः प्रभाकरानुयायिनोऽपि वाक्यार्थबोधोत्तरप्रतीतिकस्य अर्थस्य नाऽभिधाविषयत्वं किन्तु व्यञ्जनाविषयत्वमेवेति वक्तुं तन्मते गवादिविशेषान्वितऽऽनयनादिविशेषरूपस्य वाक्यार्थस्यैव अभिधाया अविषयतेति प्रदर्श्य स्वाभिप्रायं प्रकाशयति—येऽप्याहुरित्यादिना। शब्दवृद्धेत्यादिके कारिके श्लोकवार्त्तिके सम्बन्धाक्षेपपरिहारप्रकरणे (१४०-४१) आगते। अनयोरर्थश्च वृत्त्या तदर्थेनैव स्फुट इति न तत्पृथग्व्याख्यानमावश्यकम्। येऽपि अन्विताभिधानवादिन इत्येवमाहुस्तेषामपि मते यत्र सामान्यावच्छादित-विशेषरूपवाक्यार्थविश्याऽपेक्ष्यतया व्यवहारे वाक्यार्थान्तर्गततया प्रतीयमानोऽपि गवादि-विशेषान्वितानयनादिविशेषरूपत्वाद् अतिविशेषरूप पदार्थोऽवाच्य एव सन् प्रतिपद्यते (ज्ञायते) इति स्वीक्रियते तत्र विध्यादिरूपतया निषेधादिरूपाद् वाक्यार्थाद् विप्रकृष्टस्य अर्थान्तरभूतस्य 'निःशेषच्युतेत्यादौ' विध्यादेः अभिधाविषयतायाश्चर्चा दूरे इत्यन्वयः। तत्र पूर्वम् अन्विताभिधानवादिमतमनुवदति—शब्दवृद्धेत्यादिना। वृद्धानां भाषाव्यवहारमुप-लभ्य तत्र स्वीयेच्छुकः स्वं व्यवहारं बुभुत्सुश्चिकीर्षुश्च बालोऽत्र शब्दार्थव्यवहारे वृद्धेनो-च्चारितं 'गामानयेत्यादिवाक्यरूपं' शब्दं शृणोति शब्दप्रयोगं कुर्वन्तमुत्तमवृद्धं शृण्वन्तं चेष्टावन्तं च मध्यमवृद्धमपि पश्यति, शब्दोच्चारणसमनन्तरं क्रियमाणं व्यवहारं च

निवृत्तिकारि वाक्यमेव प्रयोगयोग्यमिति वाक्यस्थितानामेव पदानाम् अन्वितैः पदार्थैः अन्वितानामेव सङ्केतो गृह्यते इति विशिष्ट एव पदार्थो वाक्यार्थो न तु

उपलभते इति त्रयम् अपरोक्षेण उपलभते: उपलब्धया श्रोतृचेष्टया हेतुभूतया 'अयं मध्यमवृद्धः एतच्छब्दजन्यैतदर्थविषयकज्ञानवान् एतच्छब्दोत्पत्तिसमनन्तरजातया एतदर्थविषयकचेष्टया युक्तत्वाद्' इत्यनुमाय श्रोतृगतशब्दार्थबोधं जानाति, एतच्छब्दश्रवणसमनन्तरं हेत्वन्तरं विना जातोऽस्य यमेतदर्थबोधः एतच्छब्दैतदर्थयोः सम्बन्धस्य अभावे कथं सम्भवेद् इत्यन्यथानुपपत्त्या करणभूतया [illegible]-कल्पनाहेतुभूता शब्दस्य वाक्यरूपस्य शक्तिं बोधेत् (बुध्येत); ततश्च वाक्यान्तरेषु अश्वमानयेत्यादिषु अश्वमित्यादेः शब्दस्यार्थस्य च आपत्तिम् (= आवापम् = प्रक्षेपम्) गामित्यादेः उद्वापम् (= उद्धृत्य अपनयनम्) च उपलभ्य [illegible]-सहकृतया पूर्वोक्तयैव रीत्या पदपदार्थयोरपि **त्रिप्रमाणकम्** [illegible]-प्रमाणज्ञाप्यं सम्बन्धमवधारयेद् इति **अभियुक्तान्विताभिधानवादिकारिकार्थस्तद्वृत्त्य-**र्थश्च । कारिकार्थमेव गद्येनानुवदति—**इति प्रतिपादितदृशेत्यादिना** । **तत्र** तस्मिन् वाक्ये पुनः पुनः श्रुते । **व्युत्पद्यते** वाक्यतदर्थसम्बन्धप्रतिपत्तिमान् भवति । आवापोद्वापाभ्यां पदतदर्थप्रतिपत्तिः पश्चात् केवलम् आनुषङ्गिकत्वेनैव भवति, सा चैव वाक्यरूपे व्यवहारे न तस्या वस्तुतः किञ्चित् प्रयोजनमित्याह—**स्वतः चैवेत्यादिना** । **अवधारयतीत्यन्तेन** ग्रन्थांशेन अन्विताभिधानवादिसम्मतो मुख्यो वाक्यशक्तिग्रहप्रकार आनुषङ्गिकः पदशक्ति-ग्रहणप्रकारश्च वर्णितः । एतं शक्तिग्रहप्रकारं हेतुं कृत्वा आह—**इति अन्वयव्यतिरे-काभ्यामित्यादि** । यस्माद् व्यवहारे शक्तिग्रहप्रकार एतादृशो भवति तस्माद् इति **इति-**पदार्थः । व्यवहारस्य प्रवृत्तिनिवृत्तिरूपत्वाद् वाक्यप्रयोगे प्रवृत्तिनिवृत्त्योर्दर्शनाद् वाक्य-प्रयोगाभावे पदमात्रस्य प्रयोगे प्रवृत्तिनिवृत्त्योरदर्शनाच्च अन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृ-त्तिकारित्वेन निश्चितं वाक्यमेव पदार्थशब्दव्यवहारे प्रयोगाय योग्यम् इति निश्चीयते । अत्र सोमेश्वरगोविन्दठक्कुरादिभिः कृतोऽन्वयव्यतिरेकाभ्यामित्यस्य अवधारयतीत्यनेना-न्वयोऽरमणीय एव **इतिपदेन** व्यवधानात् । [illegible] पदं प्रवृत्तिनिवृत्त्यर्थं प्रयुञ्जते तदप्याक्षेप्यपदान्वितं वाक्यमेवेत्यभिमतम् । यद्यपि सिद्धे पदार्थेऽपि प्राथमिकं शक्तिग्रहमुपपादयन्ति परे तथापि क्रियान्विते एव प्राथमिकः शक्तिग्रह इत्यन्विताभिधानवादिनामभिमतम् । अन्विताभिधानवादिसिद्धान्तं सहेतुं निर्दिशन्नाह—**इतिवाक्यस्थितानामेवेत्यादिना** । वाक्यस्यैव प्रवृत्तिनिवृत्तिफलकशब्दव्यवहारप्रयोज्यत्वाद् व्यवहारस्यैव च उक्तप्रकारेण शक्तिग्रहोपयोगित्वाच्चेति **इति-**पदार्थः । पदान्त-रान्वययोग्यानां वाक्ये स्थितानामेव **पदानां** योग्येतरार्थरूपेण स्वकीयेनार्थेन सह अन्वितैः अन्यैः पदार्थैः **सह अन्वितानामेव स्वार्थानां** च परस्परं वाचकवाच्यभावसम्बन्धः (सङ्केतः) गृह्यते इत्यर्थः । **एवञ्च** योग्येतरपदार्थसामान्येन विशिष्टः (अन्वितः) **आख्यातार्थरूपः**

अनन्वितोऽर्थोऽभिहितान्वये पदार्थान्तरमात्रे पर्यवसितस्तु अन्विताभिधाने अन्वितविशेषस्तु अवाच्य एवेति उभयनयेऽपि अपदार्थ एव वाक्यार्थः।

यदप्युच्यते नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते इति, तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा ? शब्दस्य प्रकाशकत्वाद् न कारकत्वम् ज्ञापकत्वं तु

निषेधादिरूपाद् वाच्यार्थाद् विप्रकृष्टस्यार्थस्य निःशेषच्युतेत्यादौ विध्यादेरर्थस्य वाच्यतायाः कथा दूरे इत्यर्थः। एवञ्च अन्वितविशेषस्यापि वाच्यत्वासम्भवात् पूर्वोक्तस्य काव्यविशेषस्य व्यञ्जनैकगम्यत्वं सिद्धम्।

उक्तयोर्द्वयोरपि मतयोः अन्वितविशेषस्य सङ्केतविषयत्वाभावाद् अभिधाया अविषय एवेति निष्कर्षं सुखग्रहणाय तस्य निष्कर्षस्य आक्षेपान्तरनिराकरणेन समर्थनाय च आह—अनन्वितोऽर्थ इत्यादिना। **अपदार्थः** अशक्यः, अनभिधेयः इति यावत्।

ननु नैमित्तिकानि (कार्याणि) दृष्ट्वा तदनुसारं हि निमित्तानि (कारणानि) कल्प्यन्ते इति न्यायात् लोकव्यवहारे वाक्याद् अन्वितविशेषस्यैव प्रतीतेर्दर्शनाद् वाक्यं विहायान्यस्य निमित्तस्य अनुपस्थितेश्च अन्वितविशेषाभिधानशक्तिमद् वाक्यमेव अन्वितविशेषप्रतीतेर्निमित्तं कल्प्यते इति अन्वितविशेषोऽभिधेय एव, अतः कुतो वाक्यार्थस्य अपदार्थत्वम् (अवाच्यत्वम्) ? एवमेव निःशेषच्युतेत्यादिवाक्यात् तदन्तिकमेव रन्तुं गतासीति विधेः प्रतीतेः निःशेषच्युतेत्यादिवाक्यम् उक्तविध्यभिधानशक्तिमदेव तत्प्रतीतेर्निमित्तं कल्प्यते इति उक्तो विधिरूपोऽर्थोऽप्यभिधेय एव, अतस्तत्प्रतीत्यर्थेऽपि व्यञ्जना नैव कल्पनीयेति नास्य ध्वनिकाव्यस्य व्यञ्जनामूलकत्वमित्याक्षेपं निराकरोति—**यदप्युच्यते** इत्यादिना। **निमित्तत्वम्** कारणत्वम्। **कारकत्वम्** उत्पादकत्वम्, विकारकत्वम्, संस्कारकत्वम् वा। **ज्ञापकत्वम्** सिद्धस्यैव प्रकाशकत्वम्। शब्दस्तु नार्थमुत्पादयति विकरोति वा, न वाऽर्थमतिशयं संस्कुरुते, केवलमर्थं प्रकाशयति शब्द इति शब्दो निमित्तत्वेन कल्प्यश्चेद् ज्ञापकनिमित्तत्वेनैव कल्प्यः; शब्दस्य ज्ञापकत्वं तु, अज्ञातस्य शब्दस्य ज्ञापकत्वे सर्वदा सर्वेभ्यः शब्देभ्यः सर्वस्यार्थप्रतीतिः स्यादित्यपत्तेः, प्रत्यक्षान्यप्रमाणस्य ज्ञातस्यैव करणत्वं भवतीति च ज्ञातस्यैव भवितुमर्हति; शब्दस्य ज्ञातत्वं च शक्तिविशिष्टत्वेन ज्ञातस्यैव न तु स्वरूपमात्रेण ज्ञातस्य अर्थप्रकाशने उपयुज्यते, स्वरूपमात्रेण ज्ञातस्यापि अर्थप्रकाशकत्वे तु ऐदम्प्राथम्येन संस्कृतवाक्यं शृण्वतोऽपि तस्माद् झटित्येवार्थबोधः स्यादिति; शब्दस्य तत्तदर्थाभिधानशक्तिविशिष्टत्वेन ज्ञातता च तत्र तत्रार्थे व्यवहारादिना गृहीतेन सङ्केतेनैव भवति, स च सङ्केतो पदैः पदार्थसामान्ये स्वार्थे एव, न तु अन्वितविशेषे न वा विध्यादौ विप्रकृष्टेऽर्थे इति, एवं च अभिधायकनिमित्तत्वेनाभिमतस्य वाक्यस्य अन्वितविशेषं प्रति विध्यादिकं विप्रकृष्टमर्थं प्रति वा सङ्केतेन तदभिधानशक्तिमत्त्वेन निमित्तत्वं यावद् न ज्ञायते तावद् नैमित्तिकत्वेनाभिमतस्य अन्वितविशेषस्य विध्यादिकस्य वा शब्दशक्त्युपस्थाप्यतायाः अनिश्चयाद् नैमित्तिकत्वेन प्रतीतिरेव न सम्भवति इति ज्ञापक-

अज्ञातस्य कथम्? ज्ञातत्वं च सङ्केतेनैव, स चान्वितमात्रे. एवं च निमित्तस्य नियतनिमित्तत्वं यावद् न निश्चितं तावद् नैमित्तिकस्य प्रतीतिरेव कथमिति नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यन्ते इत्यविचारिताभिधानम्।

ये तु अभिदधति सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार इति; यत्परः शब्दः स शब्दार्थ इति च विधिरेवात्र वाच्य इति तेऽपि अतात्पर्यज्ञास्तात्पर्यवाचो-

---

निमित्तत्वस्य ज्ञाने एव तज्ज्ञापकतया नैमित्तिकस्य ज्ञानम् तज्ज्ञाप्यतया नैमित्तिकस्य ज्ञाने एव तदनुसारेण तज्ज्ञापकतया निमित्तस्य कल्पनेति अन्योन्याश्रयदोषप्रसङ्गाद् "नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यन्ते" इति न्यायस्याऽस्मिन् प्रसङ्गे यद् धर्ममीमांसकानुयायिनाम् अन्विताभिधानवादिनां व्यञ्जनानिराकरणाय अभिधानं तद् अविचारितलक्ष्यसङ्गति-काभिधानमेवेत्यर्थः। सङ्केतसव्यपेक्ष एव शब्दः स्वव्यापारमारभते न तु स्वभावत एवेति व्यवस्थितौ सत्यां वाच्ये सङ्केतस्तावन्मात्रस्य प्रतिपत्तिर्व्याप्या न पुनश्चतुर्थकक्षा-निविष्टस्य व्यङ्ग्यस्येति इमा खण्डिका श्रीधरो व्याचष्टे। न चैवं सति वाक्यार्थं प्रति शब्दस्याऽनिमित्तत्वाद् वाक्यार्थस्य अशाब्दत्वं स्यादिति वाच्यम्, एतस्याऽऽक्षेपस्य अन्विताभिधानवादिनैव समाधेयत्वात्। ननु तवाभिमतस्य व्यङ्ग्यस्यापि तेनैव न्यायेन अशाब्दत्वा-पातात् [illegible] त्वयाऽप्यत्र समाधानं वक्तव्यमेवेति चेद् अत्र वदन्ति—[illegible] व्यञ्जनायास्तु अज्ञाताया एव प्रत्यायकत्वाद् वक्त्रादिवैशिष्ट्यजन्यव्यवस्थासम्भवाच्च [illegible], शब्दस्य व्यङ्ग्यं प्रति निमित्तत्वस्य कल्पनायां बाधकस्याभावादिति। [illegible] भवत्येव; अतएव च व्यङ्ग्यव्यञ्जक-भावं प्रति उपायतया शब्दार्थयोः [illegible]. उक्तं हि ध्वनिकृता—"आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः। तदुपायतया तद्वदर्थे वाच्ये तदादृतः। यथा शब्दार्थद्वारेण वाक्यार्थः सम्प्रतीयते। वाच्यार्थपूर्विका तद्वत् प्रतिपत् तस्य वस्तुनः" इति (१।९-१०)।

ननु यथा धनुष्मता मुक्तः शरः एकेनैव वेगरूपेण व्यापारेण रिपोर्वर्मणश्छेदनम् उरसो भेदनं प्राणानां हरणं च करोति तथैव अर्थप्रत्यायनाय वक्त्रा प्रयुक्तः शब्दोऽपि एकेनैव दीर्घदीर्घतरेणाऽभिधाव्यापारेण पदार्थस्मृतिं वाक्यार्थबोधं व्यङ्ग्यप्रतीतिं च [illegible] युक्त्या [illegible] शब्दो [illegible] प्रयुज्यते स एव तस्य शब्द-स्यार्थ इति वाक्यविदां न्यायाच्च तदन्तिकमेव गन्तुं गताऽसीत्यर्थस्य प्रतीतये प्रयुक्तस्य [illegible] उक्तो विधिरूपोऽर्थोऽपि अभिधाव्यापारविषय एव भवितुं शक्नोतीति तत्प्रतीतये व्यञ्जनाकल्पना अप्रामाणिक्येवेति धर्ममीमांसकानुयायिभट्टलोल्लट[illegible] निरस्यति—ये तु अभिदधतीत्यादिना। पूर्वोक्तमाक्षे-पङ्कुर्वन्ति तेऽपि तात्पर्यवाचोयुक्ते 'यत्परः शब्दः स शब्दार्थः' इत्यस्याः तात्पर्यविष-

इत्यादौ दध्यादेः करणत्वमात्रं विधेयम्; क्वचिद् उभयविधिः, क्वचित् त्रिविधि-रपि यथा—'रक्तं पटं वय' (उदा० १७९) इत्यादौ एकविधिः द्विविधिः त्रिविधिर् वा; ततश्च यदेव विधेयं तत्रैव तात्पर्यम् इति उपात्तस्यैव शब्दस्यार्थे तात्पर्यम्, न तु प्रतीतमात्रे; एवं हि 'पूर्वो धावति' (उदा० १८०) इत्यादौ अपराद्यर्थेऽपि क्वचित् तात्पर्यं स्यात्। यत् तु 'विषं भक्षय मा चाऽस्य गृहे भुङ्क्थाः' (उदा० १८१) इत्यत्र 'एतद्गृहे न भोक्तव्यम्' इत्यत्र तात्पर्यमिति स एव वाक्यार्थं इत्युच्यते, तद् न, तत्र चकार एकवाक्यतासूचनार्थः, न चाख्यातवाक्ययो अङ्गाङ्गिभाव इति विषभक्षणवाक्यस्य गृहभोजनवाक्येन अङ्गता कल्पनीयेति विषभक्षणाद् अपि दुष्टम् एतद्गृहे भोजनमिति 'सर्वथा माऽस्य गृहे भुङ्क्थाः' इत्यु-

---

स एव च वाक्यार्थ इति भावः। क्वचित् 'सोमेन यजेत' इत्यादौ कारकस्य क्रियायाश्चै-[illegible]विधिः क्वचिद् ''आग्नेयोऽष्टाकपालः'' इत्यादौ द्रव्य-देवता-दानानां त्रयाणामप्य-न्यतोऽप्राप्तत्वात् त्रयाणामेव विधिः; लोकेऽपि—'रक्तं पटं वय' इत्यादौ गुणस्य कारकस्य क्रियायाश्च प्रकरणादिनोऽन्यतोऽप्राप्तौ त्रयाणामेव विधिः, एकस्यान्यत: प्राप्तौ द्वयोर्विधिः द्वयोरन्यतः प्राप्तौ एकस्यैव विधिर्वा भवति, ततश्च येन येन वाक्येन यद् यदेव विधेयं तस्य तस्य वाक्यस्य तत्रैव तात्पर्यं स एव च तस्य तस्य वाक्यस्यार्थ इति' **वाक्ये प्रयुक्तस्यैव कस्यचिच् शब्दस्य वृत्त्युपस्थितेऽर्थे एव वाक्यस्य अनवगतार्थबोधकत्वरूपप्रामाण्य-नियामकं तात्पर्यं भवति स एव च तस्य वाक्यस्यार्थो भवति**' इत्येव 'यत्परः शब्दः स शब्दार्थः' इति न्यायस्य तात्पर्यम्, न तु वाक्ये प्रयुक्तेषु मध्ये केनापि अवाच्ये प्रतीतमात्रेऽपि वाक्यस्य तात्पर्यं भवति, तादृशोऽर्थ एव वाक्यार्थो भवति इति उक्तन्यायस्य तात्पर्यमित्यर्थः। यदि वाक्ये प्रयुक्तेषु पदेषु मध्ये केनाऽप्यवाच्ये प्रतीतमात्रेऽपि तात्पर्यं स्यात् तस्य च वाक्यार्थता स्वीक्रियेत तदा तु पूर्वो धावतीत्यादौ अपरस्य देशपूर्वत्वादिना ज्ञायमाने अपराद्यर्थेऽपि पूर्वो धावतीत्यादेर्वाक्यस्य तात्पर्यं स्वीकर्तव्यं स्यादित्याह—**एव हीत्यादिना**। ननु वाक्ये प्रयुक्तस्य कस्य चित् पदस्यैवार्थे वाक्यस्य तात्पर्यं भवति इति नास्ति नियमः, 'विषं भक्षय' इति वाक्यस्य वाक्ये प्रयुक्तयोः पदयोर्मध्ये केनाऽप्य-वाच्ये 'एतद्गृहे न भोक्तव्यम्' इत्यर्थे तात्पर्यस्य दर्शनाद् इत्याशङ्काम् उत्थाप्य निरस्यति—**यत् तु** इत्यादिना। 'विषं भक्षय मा चाऽस्य गृहे भुङ्क्थाः' इत्यत्र 'विषं भक्षय' इति वाक्यस्यार्थ इति यद् उच्यते तद् न, 'विषं भक्षय मा च अस्य गृहे भुङ्क्था;' इत्यत्र चकार एकवाक्यतार्थकः, एकवाक्यतार्थं च द्वयोर्वाक्ययोरङ्गाङ्गिभाव आवश्यकः प्रधानयोः आख्यातयोरन्योन्यं सम्बन्धो न भवति मिथोऽनपेक्षत्वादिति, कृदभिहितो भावो द्रव्यवत् प्रकाशमानः क्रियया समवायं गच्छति, तिङभिहितस्तु न गच्छति इति च (म० भा० ३।१ ६७) 'विषं भक्षय' इति 'मा अस्य गृहे भुङ्क्थाः' इत्यनयोः आख्यातवाच्यस्य क्रियाप्राधान्याद्वाक्ययोरङ्गाङ्गिभावो न सम्भवति, ततश्च श्रुतः

[illegible]र्थे एव तात्पर्यम् । यदि च शब्दश्रुतेरनन्तरं यावानर्थो लभ्यते तावति [illegible]भिधैव व्यापारः ततः कथं 'ब्राह्मण, पुत्रस्ते जातः' (उदा० १८२, 'ब्राह्मण कन्या ते गर्भिणी' (उदा० १८३) इत्यादौ [illegible] न

एकवाक्यत्वेनाऽन्वयो बाधित इति 'विषं भक्षय' इत्यस्य [illegible] विषभक्षणे तात्पर्यं [illegible] च 'विषं भक्षय' इति वाक्यस्य माऽस्य गृहे भुङ्क्थाः' इति वाक्यस्य उपोद्बलके 'विषभक्षणादपि [illegible] भोजनम्' इत्यस्मिन्नर्थे लक्षणा क्रियते ततश्च 'विषभक्षणादपि दुष्टतरम् एतद्गृहे भोजनम्' इति 'सर्वथा माऽस्य गृहे भुङ्क्थाः' इति वाक्यार्थः सम्पद्यते; एवं च 'विषभक्षणादपि [illegible] भोजनम्' इति हेतुरूप-स्यार्थस्य निषेधे तात्पर्यमिति उक्तहेतुरस्थापकस्य 'विषं भक्षय' इति वाक्यस्याऽपि निषेधे एव तात्पर्यम्, अतश्च 'विषं भक्षय मा चाऽस्य गृहे भुङ्क्थाः' इति [illegible]-तस्य 'विषं भक्षय' इति वाक्यस्य उक्तसंश्लिष्टवाक्ये उपात्तस्य माऽस्य गृहे भुङ्क्थाः' इत्यस्य वाक्यरूपशब्दस्यैवाऽर्थे तात्पर्यमित्यर्थः । एवञ्च 'वाक्ये प्रयुक्तस्य कस्यचित् शब्दस्य वृत्त्या उपस्थितेऽर्थे एव वाक्यस्य अनवगतार्थबोधकत्वरूपप्रामाण्यनियामकं तात्पर्यं भवति, स एव च तस्य वाक्यस्यार्थो भवति' इति एव 'यत्परः शब्दः स शब्दार्थः' इति न्यायस्य तात्पर्यम् इति [illegible] भावः । यत्परः शब्दः स शब्दार्थः, इत्यस्य स्वकल्पितं 'शब्दो [illegible] प्रयुज्यते स एव तस्य शब्दस्यार्थः' इत्यर्थं दृष्टान्तरूपया युक्त्या उपपादयितुं यत् च उक्तं ''सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधा-व्यापारः'' इति तदपि दृष्टान्तमात्रेणार्थस्याऽसिद्धेः [illegible]-रुद्धत्वाच्च अयुक्तमेवेत्याह—**यदि च शब्दश्रुतेरित्यादिना** । [illegible], सन्देश-हराद् 'ब्राह्मण, पुत्रस्ते जातः' इति श्रुतवतो ब्राह्मणस्य गम्यमानो यो हर्षातिरेकः सोऽपि उक्तशब्दश्रवणानन्तरं लभ्यमान इति उक्तशब्दस्य वाच्य एव स्यात्, जनापवादात् वदितुः कस्माच्चिद् 'ब्राह्मण, कन्या ते गर्भिणी' इति श्रुतवतो [illegible] गम्यमानो यः शोकातिरेकः सोऽपि उक्तशब्द[illegible] उपलभ्यमान इति उक्तशब्दस्य वाच्य एव स्यात्, एवमन्यत्राऽपि अनिष्टप्रसङ्गः स्यादिति भावः । ननु "अनन्यलभ्यः शब्दार्थः" इति न्यायात् [illegible] कल्प्यते, [illegible] हर्षशोक-[illegible] न तयोर् वाच्यत्वेनेति चेद् न, काव्या-रूढेभ्य [illegible] वाक्येभ्यो लिङ्गादिकं विनाऽपि [illegible] सम्भ-वात् तत्र का गतिः स्यादिति । काव्यारूढेभ्यो [illegible] इति तु पश्चाद् वक्ष्यते । यदि शब्दश्रवणानन्तरं यावानर्थो लभ्यते तावति [illegible]भिधैव व्यापारः स्वीक्रियते तर्हि [illegible] धर्ममीमांसकैः कस्माद् [illegible] स्वीकृता ? उक्तमतानुसरैः लक्षणीयत्वेन स्वीकृतस्याऽपि शब्दार्थस्य दीर्घदीर्घतरेणाभिधाव्यापारेणैव प्रत्याययितुं शक्यत्वादिति प्रश्नेन '[illegible] यावानर्थो लभ्यते तावति शब्दस्या-ऽभिधैव व्यापारः' इति मतं [illegible] न तत्र तव गुरूणामपि सम्मतिर-

वाच्यत्वम्। कस्माच्च लक्षणा, लक्षणीयेऽपि दीर्घदीर्घतराभिधाव्यापारेणैव प्रतीतिसिद्धेः किमिति च श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां पूर्वपूर्वबलीयस्त्वमिति अन्विताभिधानवादेऽपि विधेरपि सिद्धं व्यङ्ग्यत्वम्।

अन्विताभिधानवादिनामाह—कस्माच्च लक्षणेत्यादिना। ननु तत्र मुख्यार्थबाधेनाऽभिधाया विच्छिन्नत्वाद् न दीर्घदीर्घतराभिधाव्यापारः सम्भवतीति लक्षणा स्वीकर्तव्या, निःशेषच्युतेत्यादौ तु मुख्यार्थबाधाभावाद् अभिधाया अविच्छिन्नत्वेन दीर्घदीर्घतराभिधाव्यापारः सम्भवत्येवेति चेद् न, दृष्टान्तोपन्यासे त्वत्तोऽपि कुशलतरः कश्चिद् यदि 'यथा नदप्रवाहो येन वेगेन परं कूलं पातयितुं प्रवृत्तः परे कूले दृढतरपाषाणमयभित्त्याऽऽबाधितः सन् परावृत्य तेनैव वेगेनाऽवरं कूलं पातयति तथैवाऽभिधाव्यापारोऽपि कस्मिंश्चिदर्थे कुण्ठितोऽपि तत्सम्बद्धमर्थान्तरं प्रत्याययति' इति वदेत् तदा त्वया लक्षणोच्छेदः स्वीकार्य एव स्यादिति। न च लक्षणोच्छेदस्वीकारस्तावता निस्सारः, 'शब्दश्रवणानन्तरं यावानर्थो लभ्यते तावति शब्दस्य अभिधैव व्यापारः' स्वीकृतं चेत् श्रुति-लिङ्ग-वाक्य-स्थान-समाख्याना समवाये पूर्वपूर्वबलीयस्त्वस्य स्वीकारे काऽपि युक्तिर्न स्यादिति जैमिनिसूत्रप्रामाण्यभङ्गोऽपि स्वीकार्यः स्यात्; न च दुर्बलतर्कजन्यबुद्ध्यादिना स्वकल्पनामात्रमवलम्ब्य जैमिनिसूत्रप्रामाण्यभङ्गः स्वीकर्तुं शक्यः, अतः शाब्देऽप्यर्थे शब्दस्य निमित्तवैचित्र्ययोगवशाद् अभिधा-लक्षणा-व्यञ्जनादि-प्रत्यायन-व्यापारविभेदः स्वीकार्य एवेति निमित्तवैचित्र्यवशाद् अन्विताभिधानवादिनामनुसारेणापि निःशेषच्युतेत्यादौ तदन्तिकमेव रन्तुं गताऽसि इत्यादेर्विधिरूपादेरर्थस्य व्यञ्जनाव्यापारविषयत्वं सिद्धमेवेत्याह—**किमिति च श्रुति-लिङ्गे**त्यादिना। जैमिनिना "श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्याना समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (३।३।१४) इति सूत्रेण श्रुत्यादीनां परस्परविरोधित्वेन एकत्रोपस्थिताते उत्तरोत्तरस्य परपरस्य विलम्बेन अर्थस्योपस्थापकत्वात् परपरस्य दुर्बलत्वं प्रतिपादयता पूर्वपूर्वस्य बलीयस्त्वं निर्णीतम्, तत्र यदि शब्दश्रवणानन्तरमुपस्थितान सर्वान् एवाऽर्थान् प्रति शब्दस्याऽभिधैव व्यापारः स्यात् तर्हि श्रुत्युपस्थापितस्यार्थस्येव श्रुतिभिन्नलिङ्गाद्युपस्थापितानामर्थानामपि अभिधेयतया श्रुत्यादीनां सर्वेषामपि समेनैव कालेन अर्थोपस्थापकता स्वीकार्या स्यादिति मुनिना पारदौर्बल्येऽभिहितमर्थविप्रकर्षरूपं निमित्तमसङ्गतं स्यादिति **किमितीति** प्रश्नेन प्रतिपिपादयिषितोऽर्थः। पारदौर्बल्येऽभिहितस्य अर्थविप्रकर्षरूपनिमित्तस्य स्फुटतरबोधाय जैमिनिसूत्रं सोपक्रमं संक्षेपेण व्याख्यायते। तत्र **अपौरुषेयं शास्त्रत्वेन शिष्टैः परिगृहीतं वाक्यं वेद** इति धर्ममीमांसायां स्थितम्। पौरुषेयत्वञ्च पुरुषेण प्रमाणान्तरेणाऽर्थमुपलभ्य विरचितत्वम्, तद्भिन्नत्वमपौरुषेयत्वम्। वेदश्च विधि-मन्त्र-नामधेय-निषेधा-र्थवादभेदात् पञ्चविधः। तत्र अज्ञातविधेयार्थज्ञापको वेदभागो **विधिः**, प्रयोगसमवेतार्थस्मारको वेदभागो **मन्त्रः**, विधेयार्थपरिच्छेदकतासम्बन्धरूपो वेदभागो **नामधेयम्**, पुरुषनिवर्तकवाक्यरूपो वेदभागो **निषेधः**, विधेयप्राशस्त्य-निषेध्यनिन्दान्यतरपरो वेदभागोऽर्थ**वादः**। तत्र विधि-

रपि चतुर्विधः उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति । तत्र कर्मस्वरूपमात्रबोधको विधिः **उत्पत्तिविधिः**, द्रव्यदेवतादिरूपाणाम् अङ्गानां प्रधानैर्होमादिभिः सह सम्बन्धस्य बोधको विधि**र्विनियोगविधिः** कर्मजन्यफल-स्वाम्यबोधको विधि**रधिकारविधिः** साङ्गप्रधानकर्मणोऽविलम्बेन कार्यत्वस्य अङ्गानां क्रमस्य च बोधको विधिः **प्रयोगविधिः** । तत्र विनियोगविधौ तत्र तत्र प्रति-

---

पादितानां द्रव्यदेवतामन्त्रादिरूपाणामङ्गानां केन प्रधानेन सह सम्बन्ध इत्याकाङ्क्षायां यदा श्रुत्यादिभिः प्रमाणैः परस्परं विरुद्धैः तस्यैवैकस्य अङ्गस्य एकेन एकस्मिन् प्रधाने अन्येन अन्यस्मिन् प्रधाने सम्बन्धो बोध्यते तदा समुच्चयो न सम्भवतीति एकेन अन्यस्य बाधः क्रियते इति स्वीकर्तव्यम् । बाधश्च बलवता दुर्बलस्य क्रियते इति लौकिको न्यायः इति लिङ्गादीनां दौर्बल्यस्य प्रतिपादकमिदं सूत्रं भगवता जैमिनिना कृतम्—"श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (३।३।१४) इति । अस्यार्थः— विनियोजिकानां श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां परस्परविरुद्धत्वेनैकत्रोपनिपाते सूत्रोक्तक्रमानुसारं परपरेण स्वार्थोपस्थापने स्वपूर्वपूर्वापेक्षया विलम्बेनैव प्रवर्तितव्यत्वात् परपरस्य श्रुत्युपस्थाप्यार्थतो विप्रकृष्ट-विप्रकृष्टतरत्वात् परपरस्य दुर्बलता भवतीति । पर एव पारः प्रज्ञादित्वकल्पनात् । तत्र अङ्गाङ्गिसम्बन्धबोधने प्रमाणान्तरनिरपेक्षः शब्दः **श्रुतिः** । शब्दस्यार्थस्य वा अर्थविशेषप्रकाशनसामर्थ्यं **लिङ्गम्** । परस्पराकाङ्क्षावशात् कस्मिंश्चिद् एकस्मिन् विशिष्टेऽर्थे पर्यवसितानि पदानि **वाक्यम्** । अङ्गाङ्गिनोः परस्परमाकाङ्क्षा **प्रकरणम्** । यथासङ्ख्यपाठेन सन्निधिपाठेन अनुष्ठानेन वा कृतः सन्निधिविशेषः क्रमापरपर्यायः **स्थानम्** । वैदिको लौकिको वा यौगिको नामशब्दः **समाख्या** । नामशब्दस्य च यौगिको रूढो योगरूढो यौगिकरूढश्चेति चतस्रो भिदाः । तत्र यत्र प्रकृतिप्रत्ययशक्त्यैव अर्थ एव ज्ञायते स **यौगिकः** यथा पाचक इति; यत्र प्रकृतिप्रत्ययशक्तिं विनिवेश्य समुदायशक्त्याऽर्थो ज्ञायते स **रूढो** यथा गौः इति; यत्र प्रकृतिप्रत्ययशक्त्युपस्थाप्यैकदेशस्य समुदायशक्त्या सिद्धिर्भवति स योगेन च कियताप्यंशेन युक्तो रूढ इति **योगरूढ** इत्युच्यते, यथा पङ्कजम् इति; यत्र तु कुत्र चिद् अवयवशक्त्या कुत्र चित् समुदायशक्त्या अर्थो ज्ञायते स यौगिकोऽपि रूढोऽपीति **यौगिकरूढ** इत्युच्यते, यथा उद्भिद् इति स च योगशक्त्या खनित्रादिकं रूढ्या च यागविशेषं बोधयति । तत्र परपरस्य दुर्बलत्वे उदाहरणानि यथा—१. **प्रथमं लिङ्गस्य श्रुतितो दुर्बलत्वे उदाहरणम्**—अग्निहोत्रप्रकरणे पठितायाः "कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे" (हे इन्द्र, त्वं कदापि घातुको न भवसि, किन्तु हविर् दत्तवते यजमानाय प्रीयसे) इति ऋचः "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" (इन्द्रप्रकाशिकया ऋचा गार्हपत्यमग्निम् आराधयति) इति श्रुत्या इन्द्रोपस्थाने विनियोगप्रापकं लिङ्गं प्रबाध्य गार्हपत्योपस्थाने विनियुज्यते । तत्र "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इति श्रुतिः कदाचनेत्यादिमन्त्रस्य गार्हपत्योपस्थानाङ्गत्वं साक्षादेव (निरपेक्षैव) बोधयति, उक्तं लिङ्गं तु अशब्दत्वाद् 'ऐन्द्र्या इन्द्रमुपतिष्ठते' इति श्रुतिं कल्पयित्वैव

क्रिया अनुष्ठेयेति विनियोगिका श्रुति कल्पयतीति प्रकरणविनियोगयोर्मध्ये त्रिभिर्व्यवधानं भवति; इन्द्राग्निपदान्वयरूपं वाक्यं तु श्रुतसमानत्वाद् लिङ्गश्रुतिभ्यामेव विनियोगाद् व्यवधीयते इति प्रकरणं प्रबाध्य वाक्येन "इन्द्राग्नी इदं हविरजुषेतामवीवृधेताम् महो ज्यायोऽक्राताम्" इति मन्त्रः सौक्तवाके एव विनियुज्यते । एवं चोक्तरीत्या विनियोगरूपार्थतो वाक्यात् प्रकरणस्य विप्रकृष्टतरत्वाद् वाक्यात् प्रकरणस्य दुर्बलत्वम् ।

४. प्रकरणात् स्थानस्य (क्रमस्य) दुर्बलत्वे उदाहरणम्—राजसूयप्रकरणे इष्टिपशुसोमयागा बहवः प्रधानभूताः श्रूयन्ते । तत्राभिषेचनीयाख्यः कश्चित् सोमयागः । तस्य सन्निधौ देवनादयः श्रूयन्ते—"अक्षैर्दीव्यति राजन्यं जिनाति (जयति) शौनःशेपम् (शुनःशेपो-पाख्यानम्) आख्यापयति" इति । तत्र देवनादीनां पाठसान्निध्यरूपात् स्थानात् (क्रमात्) अभिषेचनीयाङ्गत्वमिति प्राप्ते उच्यते—राजसूयप्रकरणे अविशेषेणाम्नाताः अनुवृत्ताया श्रुताः देवनादयः प्रकरणबलाद् राजसूयाङ्गान्येव भवन्ति । राजसूयश्च बहुयागात्मको भवतीति तत्रत्यसर्वयागाङ्गत्वं देवनादीनां सिद्धयति । तत्र अभिषेचनीयस्य अग्निष्टोम-विकृतित्वादतिदिष्टैः प्राकृतैरेवाङ्गैस्तदाकाङ्क्षानिवृत्तिरिति अभिषेचनीयस्य देवनादिषु आकाङ्क्षा नास्ति । यदि सन्निधिनिमित्तकल्पनीया कथंचन देवनादिषु आकाङ्क्षा उत्थाप्यते तर्हि पाठसान्निध्यरूपं स्थानं प्रथमम् आकाङ्क्षारूपं प्रकरणं कल्पयति, ततश्चाकाङ्क्षा वाक्यं कल्पयति, वाक्यं लिङ्गं कल्पयति, लिङ्गं विनियोजकश्रुतिं कल्पयति इति स्थानविनियोगयोर्मध्ये चतुर्भिर्व्यवधानं भवति, राजसूयाकाङ्क्षारूपं महाप्रकरणं तु क्लृप्तत्वात् प्रथमं वाक्यं कल्पयति, ततश्च वाक्यं लिङ्गं कल्पयति, लिङ्गं विनियोगश्रुतिं कल्पयतीति प्रकरणविनियोगयोर्मध्ये तु त्रिभिरेव व्यवधानं भवतीति विनियोगरूपार्थतः प्रकरणात् स्थानस्य विप्रकृष्टतरत्वात् प्रकरणात् स्थानस्य दुर्बलत्वम् ।

५. स्थानात् (क्रमात्) समाख्याया दुर्बलत्वे उदाहरणम्—"शुन्धध्वं दैव्याय कर्मणे" इति मन्त्रो याज्ञिकैः पौरोडाशिकम् इत्युक्ते काण्डे पठितः । तत्राप्ययं मन्त्रः दर्शपूर्णमासाङ्ग-विषययोर्मन्त्रानुवाकयोर्मध्ये पठितेऽनुवाके पठ्यते; इत्थं सान्नाय्यपात्राणां शुद्धिनिर्व-पस्य च अन्तरालं सान्नाय्यपात्राणां देश उक्तः । एवं च सति समाख्याबलेन पौरोडाशिक-काण्डोक्तानाम् उलूखलादीनां पुरोडाशपात्राणां शोधने "शुन्धध्वं दैव्याय कर्मणे" इत्ययं मन्त्रो विनियोक्तव्य इति प्राप्ते उच्यते—'पौरोडाशिकम्' इतिसमाख्यायां प्रकृतिभागः पुरोडाश-मात्रमभिधत्ते, तद्धितप्रत्ययश्च **पुरोडाशस्येदम्** इति वृत्त्या काण्डम्, न चैतावता कृत्स्न-पुरोडाशपात्राणामुक्तमन्त्रसन्निधिः प्रत्यक्षो भवति, किन्तु 'यदि कृत्स्नपुरोडाशपात्राणा-मुक्तमन्त्रसन्निधिर्न स्यात् तदा उक्तः शुन्धनप्रतिपादकमन्त्रः पौरोडाशिककाण्डे न पठ्येत' इत्यर्थापत्त्या स सन्निधिः कल्प्यते । ततश्च काण्डसमाख्याबलेन सन्निधिं परि-कल्प्य सन्निहितकाण्डस्थितमन्त्रानुरोधात् पुरोडाशाकाङ्क्षारूपं कृत्स्नं पात्रप्रकरणं कल्पयित्वा तद्द्वारा वाक्यं वाक्यद्वारा लिङ्गं च प्रकल्प्य ततश्च विनियोजिका श्रुतिः कल्पनीयेति समाख्याविनियोगयोर्मध्ये पञ्चभिर्व्यवधानं भवति, सान्नाय्यपात्राणां कुम्भी-

यदि च वाच्यवाचकत्वव्यतिरेकेण व्यङ्ग्यव्यञ्जकभावो नाभ्युपेयते तदासाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नं स्यात्; न चानुपपन्नम्, सर्वस्यैव विभक्ततया प्रतिभासनात्। वाच्यवाचकताव्यतिरेकेण व्यङ्ग्यव्यञ्जकताश्रयणे तु व्यङ्ग्यस्य बहुविधत्वात् क्वचिदेव कस्यचिदेवौचित्येनोपपद्यत एव व्यवस्था। 'द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः' (कु० स० ५।७१) (उदा० १८५) इत्यादौ पिनाक्यादिपद-वैलक्षण्येन किमिति च कपाल्यादि पदानां काव्यानुगुणत्वम् ?

काश्मीरिका विद्वांसः। न हि तत्र कथञ्चित् [illegible]. अतः अन्विताभिधानवादिमते तत्र सोऽर्थः कथञ्चिदपि अभिधेयो न भवति, तथापि प्रतीयते एव स इति एतादृशान् प्रयोगान् काव्ये परिहरन्त्येव कवयः. यदि शब्दस्य व्यञ्जनाऽपि व्यापारो न स्यात् तर्हि अभिधाया (लक्षणायाश्च) अविषयः सोऽर्थो नैव प्रतीयेत, न चैतादृशान् प्रयोगान् परिहरेयुः कवय इति काव्य-शब्देषु तु व्यञ्जनाव्यापारोऽभ्यवसीयते इतिभावः।

ननु चिकुशब्दस्य काश्मीरादिभाषायाम् असभ्यार्थवाचकस्य [illegible] श्रुतस्यापि असभ्यार्थस्मारकत्वाद् [illegible] पदार्थान्तरान्वितताया नियमस्याभावाद् वा दुष्टत्वं न तु [illegible] चेद् अस्तु तत्र तथा, किन्तु व्यञ्जनाया अस्वीकारे काव्यमार्गे अन्या अपि अनुपपत्तयः स्युरित्याह—**यदि च वाच्ये**त्यादिना। व्यङ्ग्यानभ्युपगमे वाचकस्यार्थस्य ऐक्यात् [illegible] असाधुत्वादीनामिव वाक्यार्थविघटकत्वे नित्यदोषत्वमेव स्याद् वाक्यार्थविघटकत्वाभावेऽदोषत्वमेव वा स्यादिति भावः। व्यङ्ग्याभ्युपगमे तु व्यङ्ग्यस्य बहुविधत्वात् [illegible] रौद्रादौ तद्गतौद्धत्य[illegible]त्वाद् अदोषत्वम् (गुणत्वम्) शृङ्गारादौ तु माधुर्यविघातकत्वेनापकर्षकत्वाद् दोषत्वमिति श्रुतिकटुत्वादीनामनित्यदोषत्वम् अस्फुटस्फुटितं काव्यतत्त्वं सम्यग् [illegible] वृत्तिविरोधादिदोषं स्वीकुर्वद्भिरपि व्यङ्ग्यव्यञ्जकभावोऽवश्यमेषणीय इति भावः। अपि च शब्दविशेषाः क्वचिद् विषये मनोहराः क्वचिच्चामनोहरा भवन्तीति [illegible] शृङ्गारे मनोहरा इत्यादि [illegible] स्वीकृतमेव अपि च "**द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः। कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी**" इत्यादौ कपाल्यादिपदानि पिनाक्यादिपदवैलक्षण्येन [illegible]त्वादिव्यञ्जनेन 'यस्य दर्शनस्पर्शनसम्भाषणादिकमपि गर्हितं तस्य समागमस्य प्रार्थनया शोचनीयताप्रकर्षमागता त्वमपि' इत्यादेर्विवक्षितार्थस्य पुष्ट्या काव्यस्य कामपि कमनीयतामुन्मीलयन्तीति सर्वसहृदयहृदयसाक्षिकम्, तत्र यदि शब्दानां वाचकत्वव्यतिरेकेण व्यञ्जकत्वभावो नाभ्युपेयते तर्हि कपाल्यादेः पिनाक्यादेश्च महादेवादिरूपस्य वाच्यार्थस्यैकत्वात्

अपि च वाच्योऽर्थः सर्वान् प्रतिपत्तॄन् प्रति एकरूप एवेति नियतोऽसौ, न हि 'गतोऽस्तमर्कः' (उदा० १८६) इत्यादौ वाच्योऽर्थः क्वचिदन्यथा भवति । प्रतीयमानस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते, तथा च 'गतोऽस्तमर्कः' (उदा० १८७) इत्यतः सपत्नं प्रति अवस्कन्दनावसर इति, अभिसारिकां प्रति प्रारब्धमभिसरणमिति प्राप्तप्रायस्ते प्रेयानिति, कर्मकरान् प्रति कर्मकरणान्निवर्तामहे इति, धार्मिकं प्रति सान्ध्यो विधिरुपक्रम्यताम् इति, दूरं मा गा इति, सुरभयो गृहं प्रवेश्यन्ताम् इति, सन्तापोऽधुना न भवति इति, विक्रेयवस्तूनि संह्रियन्ताम् इति, नागतोऽद्यापि प्रेयान् इत्यादि अनवधिर् व्यङ्ग्योऽर्थः तत्र तत्र प्रतिभाति ।

वाच्य-व्यङ्ग्ययोः 'निःशेष' इत्यादौ (उदा० १८८) निषेध-विध्यात्मना, '**मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु । सेव्या नितम्बाः किमु भूधराणामुत** स्मरस्मेरविलासिनीनाम्' (उदा० १९९) इत्यादौ संशय-शान्तशृङ्गार्यन्यतम-

---

[illegible] अप्रतीतेः । अतः काव्ये व्यञ्जना अभिधातिरिक्ता स्वीकार्यैव इति भावः । एतेन च रसभावादिध्वनीनामेव [illegible] साध्यते न तु वस्त्वलङ्कारध्वनीनामितिविवेक्तव्यम् ।

ननु [illegible] दीर्घदीर्घतरव्यापारवत्त्वैव सकलामङ्गलनिधानत्वनिन्दिताचार-[illegible] अभिधया [illegible] सम्भवतीति चेद् न अभिधायाः [illegible] विषययोः [illegible] अन्यस्य चाऽसाङ्केतिकत्वेन च वैजात्याद् वृत्त्योरपि [illegible], विषययोर्भेदे स्वीकृते तु अभिधाऽतिरिक्ता काचित् [illegible] दीर्घतरीभूताऽभिधा उच्यते, मया तु विषयवैजात्येन नामवैजात्यं युक्ततरं पश्यता व्यञ्जना उच्यते इति नाममात्रे विवादः [illegible] वाच्यप्रतीयमानयोर्भेदमाह—**अपि च वाच्योऽर्थ** इत्यादिना । **अवस्कन्दनावसरः** हठाद् आक्रमणस्य कालः, सूर्यास्तमयसमये विजिते तस्य दिनस्य विजितनाया स्थैर्यात् । अस्या खण्डिकाया एकस्य शब्दस्य वाच्ये एकरूपता व्यङ्ग्ये तु अनेकरूपतेति सङ्ख्याभेदात् तयोर्भेदः प्रतिपादितः ।

विषयभेदसाहाय्येन वृत्तिभेदं सम्यक् साधयितुम् अन्यैश्च हेतुभिर् वाच्यव्यङ्ग्ययोर् भेदमेव प्रतिपादयति—वाच्यव्यङ्ग्ययोरित्यादिना । कुत्रचित् शब्दस्य वाच्येऽर्थे निषेधरूपे (नकारात्मके) सति व्यङ्ग्योऽर्थो विधिरूपः (सकारात्मकः) भवति; कुत्रचित् शब्दस्य वाच्येऽर्थे संशयरूपे इति व्यङ्ग्योऽर्थो निश्चयरूपो भवति; कुत्रचित् शब्दस्य वाच्येऽर्थे निन्दारूपे सति व्यङ्ग्योऽर्थो स्तुतिरूपो भवति इति एकस्यैव शब्दस्य व्यङ्ग्यार्थस्य च स्वरूपे भेदोऽस्ति; एकस्यैव शब्दस्यापि वाच्योऽर्थः पूर्वं प्रतीयते व्यङ्ग्योऽर्थस्तु तत्पश्चादिति वाच्यव्यङ्ग्ययोः कालकृतोऽपि भेदोऽस्ति; वाच्योऽर्थः केवलं शब्दमाश्रयते व्यङ्ग्योऽर्थस्तु शब्दं शब्दार्थं शब्दैकदेशं शब्दैकदेशार्थं वर्णं घटनाञ्चाश्रयते इति आश्रयकृतोऽपि

[illegible], **'कथमवनिप दर्पो यत्** निशातासिधारादलनगलितमूर्ध्नां **विद्विषां स्वीकृताः श्रीः। ननु तव** निहतारेरप्यसौ **किं न नीता** त्रिदिवमपगताङ्गैर्व**ल्लभा कीर्तिरेभिः'** (उदा० १९)। इत्यादौ निन्दास्तुतिरूपेण स्वरूपस्य पूर्व-

---

तयोरैकस्य [illegible] कथं स्यात्? उक्तकाव्ये [illegible] इति प्रयोगे तु [illegible] प्रतिनिपादयिषिता निन्दा न पुष्येत। न च [illegible]बोधस्यैव वैशिष्ट्येन कथञ्चिदस्य [illegible] व्यञ्जनाया अस्वीकारे वाच्यव्यङ्ग्ययोर्भेदोऽस्ति, वाच्यस्य भाषामात्रज्ञानेन अवगमो भवति व्यङ्ग्यस्य तु प्रकरणादि[illegible] भाषाज्ञानेन अवगमो भवति इति वाच्यव्यङ्ग्य-[illegible] भेदोऽस्ति; वाच्योऽर्थः स्वस्याऽवगन्तरि बोद्धा इति व्यपदेशं सम्पादयति, बोद्धुः अर्थमात्रप्रतीतिं च करोति, व्यङ्ग्योऽर्थस्तु स्वस्याऽव-गन्तरि विदग्ध इति व्यपदेशं सम्पादयति, विदग्धस्य आह्लादं च करोति इति वाच्यव्यङ्ग्ययोः कार्यविशेषकृतोऽपि भेदोऽस्ति; एकस्य शब्दस्य वाच्योऽर्थ एक एव भवति व्यङ्ग्योऽर्थस्तु अनेको भवति इति वाच्यव्यङ्ग्ययोः सङ्ख्याकृतोऽपि भेदोऽस्ति; एकस्यैव वाक्यस्य वाच्योऽर्थो यदा [illegible] भवति तदैव व्यङ्ग्योऽर्थस्तु तत्कान्तादिबोद्धव्यको भवतीति [illegible] वाच्यव्यङ्ग्ययोर्भेदो भवति इति वाच्य-व्यङ्ग्ययोर्वैजात्यं सुप्रतिपदमस्ति; यदि एतावद्भिः कारणैर्भिन्नयोरपि वाच्य-व्यङ्ग्ययोर्भेदो न स्यात् तर्हि नील-पीतयोः, [illegible], काष्ठलोष्ठयोः, नारीपुरुषयोः एवमेवान्येषामपि परस्परं भेदो न स्यादित्यर्थः। [illegible] भेदः स च वाच्य-व्यङ्ग्ययोरस्त्येव, उक्तप्रकारेण एकस्यैव वाक्यस्य वाच्यव्यङ्ग्ययोः [illegible]-द्विनयानां प्रतीतेः [illegible] ज्ञायते इति मतेऽपि वाच्यव्यङ्ग्ययोः विरुद्ध-धर्माध्यासस्य सत्त्वात् तयोर्भेदः सुग्रहः; पदार्थयोः कारणयोर्भेदश्च तयोः परस्परं भेदे हेतुर्भवति, वाच्यव्यङ्ग्ययोश्च [illegible], एवं च [illegible] वाच्यव्यङ्ग्ययोर्भेदोऽनपलपनीय एवेतिभावः। एवञ्च विषयवैजात्यात् [illegible]-भेदश्च अनपलपनीय एवेति हृदयम्। तत्र वाच्यस्य निषेध (नकारात्मक) रूपत्वे सति व्यङ्ग्यस्य विधिरूपत्वे (सकारात्मकत्वे) उदाहरणं पूर्वोक्तम् [illegible]—निःशेषच्युतचन्दनमिति। वाच्यस्य संशयात्मकत्वे सति व्यङ्ग्यस्य निश्चयात्मकत्वे उदा-हरणम्—मात्सर्यमुत्सार्य [illegible]। भर्तृहरेः शृङ्गारशतके पद्यमिदम्। हे कार्याकार्य-विचारचतुरा आर्याः, भवन्तः कस्मिन्नपि विषये अकारणकं द्वेषं परित्यज्य [illegible] पालयित्वा विधेयं सम्यग् विचार्य 'पर्वतानां मेखलाभागाः सेव्याः किमु उत मन्मथावेग-[illegible] रूपलावण्ययौवनालङ्कारवैदग्ध्य-सम्पन्नानां विलासिनीनां कट्याः पश्चाद्भागाः सेव्याः' इतीदमुदाहरन्तु इत्यर्थः। अत्र वाच्योऽर्थः संशयरूपः। व्यङ्ग्यस्तु यदि वक्ता शृङ्गारी तर्हि विलासिनीनां नितम्बाः

पश्चाद्भावेन प्रतीतेः कालस्य, शब्दाश्रयत्वेन तदेकदेशतदर्थवर्णसङ्घटना-श्रयत्वेन चाश्रयस्य, शब्दानुशासनज्ञानेन प्रकरणादिसहायप्रतिभानैर्मल्यसहितेन तेन चावगम इति निमित्तस्य, बोद्धृमात्रविदग्धव्यपदेशयोः प्रतीतिमात्रचमत्कृ-त्योश्च करणात् कार्यस्य, 'गतोऽस्तमर्क' (उदा० १९१) इत्यादौ प्रदर्शितनयेन सङ्ख्यायाः **'कस्स व ण होइ रोसो दट्ठूणपिआए सव्वणं अहरं। सभमर-पउम-ग्घाइणि वारिअ-वामे सहसु एण्हिं'** (उदा० १९२) इत्यादौ सखीतत्कान्ता-दिगतत्वेन विषयस्य च भेदेऽपि यद्येकत्वं तत् क्वचिदपि नीलपीतादौ भेदो न स्यात्। उक्तं हि 'अयमेव हि भेदो भेदहेतुर्वा यद् विरुद्धधर्माध्यासः कारणभे-दश्च' इति।

एव सेव्या न भूवराणामिति; यदि तु वक्ता शान्तस्तर्हि भूवराणां कटका एव सेव्या न विलासिनीनां नितम्बा इति निश्चयात्मकः। वाच्ये निन्दारूपे सति व्यङ्ग्यस्य स्तुति-रूपत्वे उदाहरणमाह—**प्रथममित्यादि**। हे राजन्, तीक्ष्णासि(धारा)निकृत्तेन(?) पातिता मूर्धानो येषां तेषां शत्रूणां राज्यलक्ष्मीर् यत् त्वया आत्मसात् कृता तत्र तव कथं गर्वो भवति? यतो हि त्रिदिवमारोहन्ति तव असौ कीर्तिरूपा प्रिया अस्माकं अङ्गैः एभिः त्वच्छत्रुभिः अपहृत्य किं न स्वर्गं प्रापिता? प्रापितैवेत्यर्थः। अत्र त्वयि जीवत्येव त्वत्प्रियायाः कीर्तेः शत्रुभिरपहरणात् मृतानां श्रियो हरणे तव गर्वो-ऽनुचित इति निन्दा वाच्या, तत्रापि त्वत्कृतशत्रुहननात् तव कीर्तिः त्रिदिवेऽपि व्याप्ता-ऽस्तीति स्तुतिर् व्यङ्ग्या। एकस्यैव वाक्यस्य वाच्यव्यङ्ग्ययोर्बोद्धव्ये भेदमुदाहरति—**कस्स वेत्यादि**। **'कस्य न वा भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्। सभ्रमर-पद्माघ्रायिणि वारितवामे सहस्वेदानीम्'** इति संस्कृतच्छाया। गाथासप्तशत्यां पद्यमिदम् (८८६)। प्रोष्यागते पत्यौ स्वकान्ताया दष्टव्रणितमधरं दृष्ट्वा रुष्टे सति सख्याः प्रत्युत्पन्नमतित्वकथनम्। प्रियायाः स्वेनादष्टमपि सव्रणमधरं दृष्ट्वा अतीर्ष्यालोरपि कस्य रोषो न भवति? भवत्येव, अतः सभ्रमरपद्माघ्राणम् (पिङ्गनिधुवनम्) मा कृथा इति वारितेऽपि हे वामे सभ्रमरं पद्मं पुनः पुनराघ्रायिणि सखि, इदानीं पत्युरुपालम्भ-परम्परां सहस्वेत्यर्थः। अत्र तद्भर्तृसन्निधाने परपुरुषदष्टाधरगोपनाभिप्रायकं वाच्यं सखीविषयकम्, भ्रमरेण दष्टोऽस्या अधरो न पिङ्गेनेति व्यङ्ग्यं पतिविषयकम्, अद्य मया गोपायितम् पुनः प्रकटेऽङ्गे त्वया खण्डनादि न कार्यमिति व्यङ्ग्यं सन्निहितोपपति-विषयकम्, प्रियायाः सव्रणमधरं दृष्ट्वा रोषो भवति अप्रियायास्तु दृष्ट्वा परिहासहेतु-रानन्दो भवति तस्माद् मा युष्माकं हर्षो भूद् इति व्यङ्ग्यं सन्निहितसपत्नीविषयकमिति-श्रीधरः। भेदं भेदहेतुं च अभियुक्तवचनेन निरूपयति—**अयमेव हीत्यादिना**। यद् विरुद्धधर्माध्यासः अयमेव भेदः (शातवैधर्म्यम् अन्योन्याभाव इति मते); यद् अन्योन्या-ध्यासः अयमेव भेदस्य हेतुर्वा; यत् कारणभेदः अयमेव च भेदहेतुरिति अभियुक्त-वचनार्थः।

वाचकानामर्थापेक्षा व्यञ्जकानां तु न तदपेक्षत्वमिति न वाचकत्वमेव व्यञ्जकत्वम् ।

किञ्च वाणीरकुडङ्गेत्यादौ (उदा० १९३) प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूपे एव यत्र विश्राम्यति तत्र गुणीभूतव्यङ्ग्येऽतात्पर्यभूतोऽप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयतामवलम्बतामिति ।

ननु 'रामोऽस्मि सर्वं सहे' (उदा० १९४) इति 'रामेण प्रियजीवितेन तु कृतम् प्रेम्णः प्रिये नोचितम्' (उदा० १९५) इति 'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्' (उदा० १९६) इत्यादौ लक्षणीयोऽप्यर्थो नानात्वं भजते, विशेष-व्यपदेशहेतुश्च भवति, तदवगमश्च शब्दार्थायत्तः प्रकरणादिसव्यपेक्षश्चेति कोऽय-मभिनवः प्रतीयमानो नाम ?

वक्तुः तात्पर्यविशेषाद् बहुविधत्वेऽपि तेषामर्थानां [illegible] अभिधया एव प्रत्याय्यत्वम् न तु व्यङ्ग्यत्वम्; अतः अभिधाया त्वया व्यञ्जने-त्युच्यमानाया [illegible] नैव भेद इत्याशङ्कायां वाचक-व्यञ्जकयोरपि वैधर्म्यं प्रदर्श्य [illegible] दर्शयति—**वाचकानामित्यादिना**। प्रमाणान्तर-ग्राह्येऽर्थे सङ्केते गृहीते एव वाचकाः शब्दाः तान् सङ्केतितान् अर्थान् बोधयन्तीति [illegible] वाचकानां शब्दानां वाचकत्वम् अर्थमुखापेक्षि, व्यञ्जकास्तु शब्दाः [illegible] व्यञ्जकत्वं नार्थमुखापेक्षि व्यङ्ग्य-स्यार्थस्य [illegible] ।

व्यङ्ग्ये सर्वत्र वक्तुस्तात्पर्यं न भवतीति वक्तुस्तात्पर्यविशेषाद् बहुविधत्वमपि पूर्वोक्ता-नामर्थानां [illegible] अपि नैव [illegible]—**किञ्च वाणीरेत्यादिना**। वाणीरकुडङ्गेत्यादौ पूर्वोदाहृते (उदा० १७१) यत्र [illegible] वाक्यं वाच्येऽर्थे एव वाक्यार्थतया चारुत्वातिशयेन च प्रधाने विश्राम्यति तत्र प्रतीयमानार्थस्य [illegible] नाऽभिधा तादृशस्थले [illegible] इति तादृशार्थप्रत्यायने अभिधा-विलक्षणा काचिद् वृत्तिरास्थेया एव, एवञ्च [illegible] अर्थं बोधयित्री क्वचिद् [illegible] सा न [illegible] भावः ।

व्यञ्जनाया अभिधातो वैलक्षण्ये प्रतिपादिते 'भवतु त्वदभिमताया वृत्तेरभिधातो वैलक्षण्यम्, तथापि सा लक्षणारूपैव त्वदुक्तवृत्तिधर्माणां नानात्वादीनां लक्षणायामपि सत्त्वाद्' इति शङ्कामुत्थापयति निराकरणार्थम्—**ननु रामोऽस्मीत्यादिना**। 'रामोऽस्मि सर्वं सहे' इति [illegible] व्याख्याते पद्ये (उदा० १५१) रामशब्दस्य लक्ष्योऽर्थः

उच्यते—लक्ष्यार्थस्य नानात्वेऽपि अनेकार्थशब्दाभिधेयवद् नियतत्वम् एव न खलु मुख्येनार्थेनानियतसम्बन्धो लक्षयितुं शक्यते। प्रतीयमानस्तु प्रकरणादिविशेषवशेन नियतसम्बन्धोऽनियतसम्बन्धः सम्बद्धसम्बन्धश्च द्योत्यते। तत्र[1] 'अत्ता एत्थ णिमज्जइ एत्थ अहं दिअहए पलोएहि। मा पहिअ रत्ति-अन्धअ सेज्जाए अह्मणिमज्जहिसि' (उदा० १९७) इत्यादौ नियतसम्बन्धः,

---

[illegible] [illegible]. 'प्रत्याख्यानरुषः कृतं समुचितं क्रूरेण ते रक्षसा; सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः। व्यर्थं सम्प्रति बिभ्रता धनुरिदं [illegible] साक्षिणा रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्' इत्यत्र रामशब्दस्य लक्ष्योऽर्थः [illegible], 'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्' इत्यादौ चतुर्थोल्लासे उदाहृते पद्ये (उदा० १४८) रामशब्दस्य लक्ष्योऽर्थः [illegible]-[illegible]त्वम् इति लक्ष्योऽर्थोऽपि नाना भवति, लक्ष्यार्थस्य बोद्धारः अपि विविधा इति व्यवहारो भवति इति लक्ष्योऽर्थोऽपि विशेषव्यपदेशहेतुश्च भवति. लक्ष्यार्थावगमोऽपि न केवलं भाषाज्ञानेन किन्तु [illegible] तात्पर्यपर्यालोचनयुक्तेन [illegible] च भाषाज्ञानेनेति त्वया ये धर्मा नानात्वादयोऽभि-धातो विलक्षणया वृत्त्या उपस्थाप्येऽर्थे प्रदर्शितास्ते लक्ष्येऽर्थे दृश्यन्ते इति लक्ष्य एव त्वया व्यङ्ग्यत्वेनोच्यमानोऽर्थो न लक्ष्यार्थातिरिक्तः. वाक्यतदर्थविचारविचक्षणैश्च विप-श्चिद्भिः विनिश्चित्योच्यते—वाचको लाक्षणिकश्चेति द्विधा शब्दः, अभिधा लक्षणा चेति द्वेधैव च शब्दव्यापारः, वाच्यो लक्ष्यश्चेति द्वैधमेव च शब्दार्थ इति; अतो रसनचपलै-[illegible] स्वकल्पनामात्रेण प्रसूतः कोऽयमभिनवजोऽर्थो व्यङ्ग्यो व्यञ्जय इति वृथा गरत्यमानः ? न कोऽपीति भाव.। नाम इत्यव्ययं कुत्सने।

कुत्सनेऽपि धैर्यमास्थाय सिद्धान्तरक्षायै लक्ष्य-व्यङ्ग्ययोर्लक्षणा-व्यञ्जनयोश्च वैजात्यं [illegible]—उच्यते-लक्ष्यार्थस्येत्यादिना। यद्यपि एकस्यैव शब्दस्य लक्ष्योऽर्थोऽपि नाना भवति तथापि स यथा अनेकार्थकानां गवादिशब्दानामर्था नाना सन्तोऽपि नियतं गृहीतं सम्बन्ध-मुपजीव्यैव प्रकाशन्ते तथैव तात्स्थ्य-तात्धर्म्य-तात्कर्म्य-तत्सामीप्य-तत्साहचर्य-तद्वैपरीत्य-[illegible] नियतसम्बन्धमुपजीव्यैव प्रकाशते. प्रतीयमानस्तु न नियत-मेव सम्बन्धमुपजीव्य प्रतीयते; किन्तु नियतसम्बन्धम् अनियतसम्बन्धम्, सम्बद्धसम्बन्ध-ञ्चाश्रित्य द्योत्यते इति न नानात्वादिमात्रेण लक्ष्यस्य व्यङ्ग्येनैकता इत्यर्थ.। व्यङ्ग्यस्य [illegible] स्फुटीकर्तुमाह—तत्रेत्यादि। तत्र अत्तेत्यादिर् विलसितमितीत्यन्तो ग्रन्थः सर्वैः 'ध्वननादिपर्यायो व्यापारोऽनपलपनीय एव' इत्यतः पश्चाद् अस्थाने पठितोऽपि प्रकरणवशादत्रैव पठनीयः। वस्तुतस्तु लिपिकर-प्रतिलिपि-

---

१. [illegible] ग्रन्थः सर्वे. पश्चादस्थाने पठितोऽपि प्रकरणवशादत्रैव पठनीयः।

'कस्स व ण होइ रोसो' (उदा० १९८) इत्यादौ अनियतसम्बन्धः, ''विपरीअरए लच्छी बम्हं दट्ठूण णाहि-कमलट्ठं । हरिणो दाहिण-णअणं रसाउला झत्ति-ढक्केइ' (उदा० १९९) इत्यादौ सम्बद्धसम्बन्धः । अत्र हि हरिपदेन दक्षिण-नयनस्य सूर्यात्मकत्वं व्यज्यते, तन्निमीलनेन सूर्यास्तमयः, तेन पद्मस्य सङ्कोचः, ततो ब्रह्मणः स्थगनम्, तत्र सति गोप्याङ्गस्यादर्शनेन अनियन्त्रणं निधुवनविलसितमिति ।

कदाचित्प्रमादादेव तत्र लिखित इति सम्भाव्यते । यथा तथा वा भवतु अस्यांशस्य अत्रैव पाठो युक्ततरो न चाऽयं वेद इति अस्माभिरत्रैव पठ्यते व्याख्यायते च । तत्र नियत-सम्बन्धं व्यङ्ग्यमर्थमुदाहरति—**अत्ता एत्थेत्यादिना** । '**अत्ता अत्र निमज्जति अत्राहं दिवसके प्रलोकय । मा पथिक राज्यन्धक शय्यायामस्माकं न्यमाङ्क्षीः**' इति संस्कृतच्छाया । इदं पद्यं [illegible] (उदा० ६३) व्याख्यातम् । अत्र [illegible] निमज्जनविधिः वाच्येन सह वैपरीत्यं प्रसिद्ध निश्चितत्वेन ज्ञात सम्बन्धमुपजीव्य प्रतीति-पथमायाति इति व्यङ्ग्योऽयं नियतसम्बन्धः । नियतः निश्चितः सम्बन्धो यस्य उपजीव्यः स नियतसम्बन्धः वाच्यबोद्धव्यबोद्धव्यस्यो व्यङ्ग्यः नियतसम्बन्ध इत्यन्ये । अनियत-सम्बन्धं व्यङ्ग्यमर्थमुदाहरति—**कस्स व णेत्यादिना** । इदमुदाहरणं पूर्वमेव (उदा० १९२) व्याख्यातम् । अत्र प्रियायाः [illegible] सव्रणम् अधरं दृष्ट्वा अनीर्ष्यालोरपि कस्य रोषो न भवति ? भवत्येव, अतो हे वामे, वारितेऽपि सभ्रमरं पद्मं पुनः पुनराघ्रायिणि सखि इदानीं [illegible] सहस्व' इति वाच्येन सह निश्चितत्वेन ज्ञातङ्कमपि प्रसिद्धमेकमेव सम्बन्धमनुपजीव्यैव वक्त्र्याः सखीविषयकः परपुरुषदंशगोप-नाभिप्रायः, सखीपतिविषयकः भ्रमरेण दष्टोऽस्या अधरो न परपुरुषेणेति, [illegible]-पतिविषयकः 'अद्य मया गोपायितं किन्तु पुनस्त्वया प्रकटेऽङ्गे खण्डनादि न कार्यम्' इति, [illegible] प्रियायाः सव्रणमधरं दृष्ट्वा रोषो भवति अप्रियायास्तु आत्मनाऽदष्टमपि सव्रणमधरं दृष्ट्वा [illegible] भवति, तस्माद् मा युष्माकं हर्षो भूद् इति च व्यङ्ग्या अर्थाः प्रतीयन्ते इति अत्र व्यङ्ग्योऽर्थो वाच्याऽनियतसम्बन्धः । [illegible]प्रायेणैतद्वचनम् । अन्ये तु [illegible] इति मन्यन्ते । सम्बद्धसम्बन्धं व्यङ्ग्यमर्थमुदाहरति—**विपरीअ-रए लच्छीत्यादिना** । 'विपरीत-रते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् । हरेर्दक्षिणनयनं रसाकुला झटिति ढक्कयति' इति संस्कृतच्छाया । विपरीतरतौ प्रसक्ता लक्ष्मीर्विष्णोर्नाभिकमले स्थितं ब्रह्माणं दृष्ट्वा लज्जमाना रतिरसावेगेनाऽऽकुला [illegible] विष्णोर्दक्षिणं नयनं हस्तेन [illegible] । 'रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया, तद्वर्णनं हि पित्रोः [illegible]' इति सप्तमे वक्ष्यन्नपि पुनः पुनरे-तादृशानि उदाहरणानि उपन्यस्यतीति अत्रावधानं देयं सुधीभिः । अत्र उक्तेन वाच्येन

न च 'अत्ता एत्थ' (उदा० २००) इत्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थबाधः, तत् कथमत्र लक्षणा ?

लक्षणायामपि व्यञ्जनमवश्यमाश्रयितव्यमिति प्रतिपादितम्। यथा च समयसापेक्षाऽभिधा तथा मुख्यार्थबाधादित्रयसमयविशेषसापेक्षा लक्षणा, अत एवाभिधापुच्छभूता सा इति आहुः।

सह सम्बद्धः परम्परया संयुतः सम्बन्धो यस्य तादृशः 'वस्त्राणि आवृते अनिरुद्धस्य हृन्द-दर्शनेन अप्रतिबन्धो लक्ष्म्याः सुरतविलासो जातः' इति व्यङ्ग्योऽर्थः प्रतीयते। **सम्बद्ध-सम्बन्धः** सम्बद्धः परम्परया वाच्येन सह सयुतः सम्बन्धो यस्य सः, न तु स्वयं 'येन नाव्यवधानम्' इति न्यायात् साक्षाद् वाच्येन सम्बद्ध इत्यर्थः। अथवा व्यधिकरणबहु-व्रीहिः, वाच्येन सम्बद्धेन सह सम्बन्धो यस्येति। अथवा सप्तमीपदलोपी बहुव्रीहिः, सम्बद्धस्थः (वाच्येन सह सम्बद्धे आश्रितः) सम्बन्धो यस्येति, कण्ठेस्थः कालो यस्येति यथा। व्यङ्ग्यस्य सम्बद्धसम्बन्धकत्वमेव स्फुटीकरोति—अत्र हीत्यादिना। हरेर्दक्षिणवामनयनयोः सूर्यचन्द्ररूपत्वस्य प्रसिद्धत्वाद् हरिपदेन दक्षिणनयनस्य सूर्यरूपता व्यज्यते, तस्य दक्षिण-नयनस्य आवरणेन सूर्यास्तमयो व्यज्यते, सूर्यास्तमयेन हरिनाभिकमलस्य सङ्कोचो व्यज्यते, हरिनाभिकमलसङ्कोचेन ब्रह्मण आवृतत्वं व्यज्यते, एवञ्च ब्रह्मण आवृतत्वे सति अनिरुद्धा-ङ्गस्य अदर्शनेन अप्रतिबन्धो लक्ष्म्याः सुरतविलासः प्रतीयते इति व्यङ्ग्योऽत्र वाच्येन सह परम्परासम्बन्धेन सम्बद्धो बोध्य इत्यर्थः।

व्यङ्ग्यार्थस्य वाच्यार्थवैजात्यं प्रदर्श्य व्यञ्जनाया अपि लक्षणावैजात्यं प्रदर्शयति—**न चे**त्यादिना। अत्र मुख्यार्थबाधाभावाद् लक्षणा नास्ति तथापि 'पथिक, त्वं निश्शङ्कः रात्रौ मम शय्यायामागच्छ' इति विधिरूपोऽर्थः अशक्योऽपि शाब्दः प्रतीयते इत्ययम् अभिधालक्षणातिरिक्तां व्यञ्जनामवलम्बते; अतो विलक्षणनिमित्तेयं व्यञ्जना मुख्यार्थबाध-निमित्ताया लक्षणायाः अन्या एवेति भावः। एवं लक्षणाभावस्थलेऽपि व्यञ्जनाया दर्शनात् तयोरैक्यमिति भ्रमो न कार्य इति हृदयम्।

निरुक्तरीत्या अविवक्षितवाच्य-ध्वनिस्थले व्यञ्जनाया लक्षणातो व्यतिरिक्तत्वं प्रदर्श्य अवि-वक्षितवाच्यध्वनिस्थलेऽपि व्यञ्जनाया लक्षणातः पार्थक्यं साधितमेव स्मारयति—**लक्षणायामपी**त्यादिना। 'ननु लक्षणाया न मुख्यार्थबाधो बीजं किन्तु तात्पर्यानुपपत्तिरेव, सा च प्रकृते अस्त्येवेति न तेन मुख्यार्थबाधस्य लक्षणाबीजत्वमिति' इति झळकीवास्त-व्यस्य व्याख्यानम् असङ्गतम्, मूले अतः परमपि अनुपदमेव मुख्यार्थबाधस्य लक्षणा-बीजताया उल्लेखात्। द्वितीये उल्लासे यस्य प्रतीतिमाधातुमित्यादिना (सू० २५) ग्रन्थेन लक्षणास्थलेऽपि प्रयोजनं प्रतीतये लक्षणातः पृथग्भूता व्यञ्जना आवश्यकेति सा सुसा-धिता। एवञ्च कुत्रचिद् लक्षणाव्यञ्जनयोरनुद्भूतरूपयोः सहकारित्वे दृष्टे अविवेकिन-स्तयोरैक्यस्य भ्रमो भवति, तथापि विवेकिना तयोः पार्थक्यं सुप्रतिपदमेवेति भावः। ननु

न च लक्षणात्मकमेव ध्वननम्, तदनुगमेन तस्य दर्शनात्; न च तदनुगतमेव अभिधावलम्बनेनापि तस्य भावात्; न चोभयानुसार्येव अवाचकवर्णानुसारेणापि तस्य दृष्टेः, न च शब्दानुसार्येव अशब्दात्मकनेत्रत्रिभागावलोकनादि-गतत्वेनापि तस्य प्रसिद्धेः इति अभिधा-तात्पर्य-लक्षणा-त्मक-व्यापारत्रया-ति-वर्ती ध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव ।

प्रयोजनप्रतीतये व्यञ्जना नैव स्वीकार्या, प्रयोजनविषयोऽपि द्वितीयो लक्षणाव्यापार एवाऽस्तु इति चेत् तत्राह—यथेत्यादि । यथा अभिधा अर्थबोधनाय स्वरूपलाभाय च सङ्केतमपेक्षते तथैव लक्षणापि अर्थबोधनाय स्वरूपलाभाय च मुख्यार्थबाध-तद्योग-रूढि-प्रयोजनान्यतरेण च विशिष्टं सङ्केतमपेक्षते सङ्केतग्रहणाभावे मुख्यार्थस्यैवाभावात् तद्बाध-तद्योगयोः मुख्यार्थविशेषणत्वेन प्रयोजनस्य च कथमप्यभावात्, यत इयं लक्षणा एवम् अभिधां पुच्छीभूता तस्मादिमां विवेचकविचक्षणा अभिधापुच्छभूतां वदन्ति ।
एवं च प्रयोजने प्रतिपादनीये मुख्यार्थ-तद्बाधादिसामग्र्यभावात् प्रयोजनविषयको व्यापारो न लक्षणा किन्तु व्यञ्जनैवेति पूर्वमेव प्रतिपादितं सम्यगाकलनीयमिति भावः । लक्षणा मुख्यार्थबाधादित्रयसहितैव सङ्केतमपेक्षते, व्यञ्जना तु नैवमिति अविवक्षित-वाच्यध्वनिस्थले लक्षणाव्यञ्जनयोः सत्त्वेऽपि तयोर्विवेकः कुशाग्रबुद्धिभिः सुकर इति तु हृदयम् ।

ननु मुख्यार्थबाधादिकं निमित्तं कृत्वोत्थितया लक्ष्यार्थं प्रत्याय्यापि तात्पर्यवशाद् दीर्घतरीभूतया लक्षणयैव प्रयोजनस्योपस्थितिः सम्भवति, लक्षणोत्थाने मुख्यार्थबाधाद्य-पेक्षायां सत्यामपि तद्दीर्घतरीभावे पुनरस्याः मुख्यार्थबाधाद्यनपेक्षणात्, दीर्घतरीभूता लक्षणैव त्वया व्यञ्जनेति उक्ता स्याद् न लक्षणातो विविक्ता व्यञ्जना नाम काचिदित्या-शङ्कायामाह—**न च लक्षणात्मकमेवेत्यादि** । गङ्गायां घोष इत्यादौ अन्वयानुपपत्त्या उत्थिता लक्षणा यावताऽर्थेन अन्वय उपपद्यते तावन्तमर्थं प्रत्याय्य विरमति; एवं विरतायां लक्षणायां लक्षणानुगामिनी व्यञ्जना उत्थाय प्रयोजनं प्रतिपादयति अतो विच्छेदाद् विषयवैजात्याच्च उक्तविषयस्थलेऽपि लक्षणाव्यञ्जनयोरैक्यं नैव सम्भवतीति भावः । यदि व्यञ्जना सर्वदैव लक्षणानुगामिनी भवेत् तदा व्यञ्जना लक्षणाविशेषरूपैवेति कथञ्चित् कल्प्येतापि, किन्तु व्यञ्जना सदा सा लक्षणानुगामिनी अपि न भवतीत्याह—**न च तदनुग-तमेवेत्यादिना** । अभिधामवलम्बमाना व्यञ्जना च विवक्षितान्यपरवाच्यध्वनौ अस्तीति भावः । या त्वदभिमता व्यञ्जनां मन्यसे साऽभिधैव दीर्घतरीभूता, यां तु त्वं लक्ष-णामनुगतां व्यञ्जनां मन्यसे सा लक्षणैव दीर्घतरीभूतेति अभिधालक्षणयोरेवान्तर्भावो यथायथं त्वदुक्ताया व्यञ्जनाया इत्याशङ्कायामाह—**न चोभयानुसार्येवेत्यादि** । अभिधया लक्षणया वाऽपि रहितेभ्यो वर्णेभ्योऽपि व्यञ्जना रसादिकं प्रतिपादयिष्यति । ननु वर्णघटि-तपदाभिधा तत्राप्यस्ति 'वर्णा एव तु शब्दः' इति भगवत उपवर्षस्य वचनादित्यत आह—

अखण्डबुद्धिग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव च वाचकम् इति येऽप्याहुः, तैरपि अविद्यापदपतितैः पदपदार्थकल्पना कर्तव्यैवेति तत्पक्षेऽपि अवश्यमुक्तोदाहरणादौ विध्यादिर्व्यङ्ग्य एव ।

न च शब्दात्मकैवेत्यादि । नाट्ये लोके च [illegible] प्रसिद्धा । वाद्ययन्त्रध्वनितश्च रसाभिव्यक्तिं स्फुटमनुभवन्ति तद्विदः, तथा च [illegible] कौशलं चोपदिष्टं मुनिना भरतेन (२९ अ०). [illegible] सङ्गीतशास्त्रेषु एतेषां विषयाणां सङ्कलनं कृतं दृश्यते । ध्वनौ च वर्णत्वाभावेन [illegible] नास्त्येवाऽभिधा । धर्ममीमांसकमतानुयायिकाव्यमीमांसकमतखण्डनया कृतं [illegible]—इति **अभिधेत्यादिना । अभिधाव्यापारः** शब्दस्य सङ्केतितार्थविषयको व्यापारः, **तात्पर्यव्यापारो** वाक्यरूपस्य शब्दस्य पदार्थसंसर्ग[illegible] **कुमारिलभट्टस्य** लक्षणाविशेषत्वेनाऽभिमतो व्यापारः, लक्षणाव्यापारः शब्दस्य अभिधेयार्थसम्बद्धार्थविषयको व्यापारः, [illegible] व्यापाराणां यत् **तदतिवर्ती** [illegible]. शब्दस्य [illegible] द्योतनादिपर्यायो व्यापारो धर्ममीमांसकानुयायिभिः [illegible] एवेत्यर्थः ।

ननु शब्दार्थतत्त्वविदां वैयाकरणानां गुरूणां सिद्धान्तेन विरुद्धोऽयं व्यञ्जनाख्यो व्यापारः, ते हि [illegible] वाक्यम् इति (वा० प० २।१) अखण्डवाक्यलक्षणं प्रतिपादयन्ति, स्फुटं च वदन्ति—'पदे न वर्णा विद्यन्ते वर्णेष्ववयवा नहि । वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन' इति (वा० प० १।७३), वाक्यार्थञ्च 'विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते । वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्' इति (वा० प० २।१४३), '[illegible] यथा नास्ति कश्चिद् ब्राह्मणकम्बले । देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः' (वा० प० २।१४) इति [illegible] सिद्धान्तयन्ति, एवञ्च यदि [illegible] 'नदन्ति[illegible] रन्तुं गताऽसि' इत्यादिका प्रतिभा जायते तर्हि [illegible] सैव प्रतिभा वाच्योऽर्थ इति [illegible] व्यञ्जनाकल्पनाप्रयास [illegible]—अखण्डबुद्धीत्यादि । कषया ताडितस्याऽश्वस्य 'अयं मां गमने प्रेरयति' इति यादृशी बुद्धिस्तादृशी एव चिद्रूपा प्रतिभा वाक्यश्रवणजन्या, तत्राध्यारोपितत्वात् ततोऽभिन्नोऽपि तया ग्राह्य इव प्रकाश्य इव च योऽर्थो वाक्यार्थरूपः स एव वाक्यस्य वाच्यः, अखण्डं [illegible] 'अन्तरेवानवयवं बोधस्वभावं शब्दार्थमयं निर्विभागं शब्दतत्त्वमिति यद् गीतं तदेव नादैर्बहिः प्रकाशितम्' इति व्याख्यातं वाक्यमेव च वाचकम्; "शब्दस्य न विभागोऽस्ति कुतोऽर्थस्य भविष्यति । विभागैः प्रक्रियाभेदमविद्वान् प्रतिपद्यते" (तस्य पदानुरोधेन पदार्थस्याऽपि प्रकृतिप्रत्ययानुरोधेन भागकल्पना । मूढस्तु विभागेन प्रक्रियाभेदं प्रक्रियाभेदे चार्थभेदमस्त्यसम्यक् प्रतिपद्यते इति किं कुर्मः ?) इति (वा० प० २।१३) ये वैयाकरणा गुरव आहुः तेषां सिद्धान्तो युक्त एव; न चास्माकं तावता

ननु वाच्यादसम्बद्धं तावद् न प्रतीयते, यतः कुतश्चिद् यस्य कस्यचिदर्थस्य प्रतीतेः प्रसङ्गात्; एवञ्च सम्बन्धाद् व्यङ्ग्यव्यञ्जकभावोऽप्रतिबन्धेऽवश्यं न भवतीति नियतधर्मिनिष्ठत्वेन च त्रिरूपाल् लिङ्गाल् लिङ्गिनि ज्ञानम् अनुमानं

परतामवलम्ब्य अन्येनापि [illegible] काव्यमीमांसकेन [illegible] खण्डयितुं शक्या । अतो [illegible] असङ्गतैव । ये तु वैयाकरणा व्यवहारस्य [illegible] स्वीकुर्वते, [illegible] वाक्येनैवेति वाक्यमेव (न पदम्) वस्तुतो वाचकमिति वदन्ति, सिद्धान्ते सर्वं वाक्यं वाक्यार्थञ्च अखण्डमभिन्नञ्च प्रतिपादयन्ति तेषां मतं तु व्यञ्जनां निरवकाशामेव करोतीति [illegible] तस्यैव विचारोऽत्र युक्तः कृतश्च ग्रन्थकृतेति [illegible] । [illegible]माह—"[illegible] स्फोटं वाक्यं तदर्थं चाऽऽहुः [illegible] प्रक्रिया" इति (ध्व० लो० १।४); [illegible] मम्मटस्यापि स एवाऽभिप्रायः ।

यद्यपि भट्टनायकेनाऽपि '**भम धम्मिअ**' इत्यादौ भयानकरसावेशवशादेव निषेधप्रतीतिः, अतो नाऽस्ति [illegible] वदता व्यञ्जना [illegible], तथापि तन्मतं न तथा व्यञ्जनव्यापारपरिपन्थिवस्तुध्वन्यनुग्राहकरसध्वनेस्तेन उपरिनिर्दिष्टया उक्त्या समर्थितत्वात्, यथा तु "**अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् । व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्**" इति प्रतिजानानस्य महिमभट्टस्य, तद्गुरूणामन्येषामपि प्रामाणिकम्मन्यानां तार्किकाणां मतमिति भट्टनायकोक्तिमवधीर्य महिमभट्टस्य तद्गुरूणां च मतं निराकर्तुं[illegible]—**ननु वाच्यादसम्बद्धमित्यादिना** । यदि वाच्याद् वाच्येन सहाऽसम्बद्धमपि व्यङ्ग्यं प्रतीयेत तदा यतः कुतश्चिदपि वाच्यादर्थाद् यस्य कस्यापि व्यङ्ग्यस्यार्थस्य प्रतीतिर्भवेदिति तु [illegible] व्यञ्जनायाम् त्वया कविकुलशिक्षकम्मन्यमानेन क्रियमाणं प्रतिपादनं निष्प्रयोजनं स्यात् त्वदुपदेशादपि कविभिर्व्यञ्जनासामर्थ्या [illegible] अतो वाच्यसम्बन्धरूपा व्यञ्जनासामग्री त्वया प्रतिपादनीया एतादृशी सामग्री [illegible] एतादृशस्य रमणीयार्थस्य व्यञ्जिका भवतीति दिक्प्रदर्शनेन [illegible] स च वाच्यसम्बन्धो नियत एव कल्पनीयः, सम्बन्धे अनियते तु सहृदयानां व्यङ्ग्यवद्वाच्योपलम्भे नियमेन दृश्यमाना व्यङ्ग्यप्रतीतिरनुपपन्ना स्यात्; तस्मिन् सम्बन्धे नियते सत्येव च सोऽर्थः (व्यङ्ग्यः) [illegible] शब्दश्च कश्चन । यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः' (ध्व० ०।८) इति तवापि गुरोरुपदेशः मुखेन ग्रहीतुं शक्यते इति च । स च नियतः सम्बन्धो व्याप्तिरूप एव स्वीकार्यः **अप्रतिबन्धे** व्याप्तौ असत्यां **सम्बन्धात्** सम्बन्धमुपादाय प्रवर्तमानो व्यङ्ग्यव्यञ्जकभावोऽवश्यं नियतरूपेण न भवतीति । एवञ्च १ **व्याप्तत्वेन** साध्याभाववदवृत्तित्वेन (विपक्षासत्त्वेन) २ साध्यसामानाधिकरण्यवत्त्वेन (सपक्षसत्त्वेन) च ३ **नियतधर्मिनिष्ठत्वेन** अत्र साध्यं [illegible]मिति **नियतो धर्मी** पक्षः, तत्र **निष्ठा** स्थितिर्यस्य सः, तस्य

सन् तद्रूपः पर्यवस्यति, तथाहि—"**भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण** । गोला-णई-कच्छ-कुडङ्ग-वासिणा दरिअ-सीहेण" (उदा० २०१)
इत्यत्र गृहे श्वनिवृत्त्या भ्रमणं विहितं गोदावरीतीरे **सिंहोपलब्धेरप्रमाणमनु-मापयति । यत् यद् भीरुभ्रमणं तद् तद्** भयकारणनिवृत्त्युपलब्धिपूर्वकम् **गोदा-वरीतीरे च सिंहोपलब्धिरिति** व्यापकविरुद्धोपलब्धिः ।

भावस्तेन पक्षसत्त्वेन चेति यत् त्रिरूपं लिङ्गं तस्माद् यत् लिङ्गिज्ञानम् अनुमानम् इति प्रसिद्धं तद्रूप एव सोऽपि व्यङ्ग्यव्यञ्जकभावः पर्यवसितः (निश्चितः) भवति । तथा च आनन्दवर्धनो यमर्थं व्यञ्जनागम्यं मन्यते सोऽर्थोऽनुमितिद्वारैव ज्ञायते इत्याह—**तथा हि**-भमेत्यादिना । '**भ्रम धार्मिक विश्वस्तः स शुनकोऽद्य** मारितस्तेन । **गोदा-नदी-कच्छ-कुडङ्ग-वासिना दृप्तसिंहेन**' इति संस्कृतच्छाया । हालस्य गाथाकोशे पद्यमिदम् । पुष्पावचयायार्थं गोदातीरनिकुञ्जं प्रति स्वगृहा[illegible] मायान्तं गच्छन्तं स्वकीयाभि-सरणविघ्नं कञ्चन युवकब्रह्मचारिणं भीषयितुं कस्याश्चित् कान्तार्थिन्या. कृतगोदावरीतीर-निकुञ्जसङ्केताया उक्तिरियम् । हे धार्मिक, यस्मात् कुक्कुराद् भीतभीतस्त्वम् अत्र ग्रामे भिक्षार्थं प्रविशसि स्म स कुक्कुरवृषो गोदानद्याः कच्छे वर्तमाने लतागहने निवसता दृप्तेन सिंहेन अद्य मारितः, अतोऽत्र ग्रामे अद्यप्रभृति **विश्वस्तः** कुक्कुरभयरहितः सन् भ्रमेत्यर्थः । तत्र आनन्दवर्धनादीनां व्यङ्ग्यत्वेनाऽभिमतस्य अर्थस्य गोदावरीतीरभ्रमणनिषेधस्य अनुमानेनैव बोधो भवतीत्याह—**अत्र गृहे श्वनिवृत्त्ये**त्यादिना । अत्र पद्ये गोदावरीकच्छ-कुडङ्गवासिना सिंहेन मारितत्वात् शुनकस्य निवृत्त्या गृहे (ग्रामे च) विहितं शुनकभीरो-र्धार्मिकस्य निर्भयं भ्रमणं गोदावरीतीरे सिंहस्थितेर्ज्ञानात् भीरोर्धार्मिकस्य गोदावरीतीरे अभ्रमणं विहितमित्यनुमापयति इत्यर्थः यदि शुनकनिवृत्तिसिंहस्थित्योर्ज्ञानं न भवेत् तर्हि गोदावरीतीरभ्रमणनिषेधो नैव गम्येत, तदुल्लेखे च शुनकनिवृत्तिसिंहोपलब्ध्या-गोदावरीकच्छकुडङ्गस्थसिंहज्ञानादेव गोदावरीकच्छकुडङ्गे भीरुक धार्मिकभ्रमणस्य-अभावोऽनुमानेनैव ज्ञायते इति भावः । अनुमानं च [illegible] व्याप्ति प्रदर्श-यति—**यद् यदि**त्यादिना । यद् यद् भीरुभ्रमणं तद् [illegible] ।
तत्र भीरुभ्रमणं व्याप्यम्, ज्ञातो भयकारणाभावो व्यापकः । एतादृश्यां व्याप्तौ सत्या "व्याप्यव्यापकभावो हि भावयोर् यादृगिष्यते । तयोरभावयोस् तस्माद् विपरीतः प्रतीयते" इति वस्तुस्थितेः 'यत्र यत्र ज्ञातभयकारणाभावाभावः (ज्ञातभयकारणम्) तत्र तत्र भीरुभ्रमणाभाव' इति व्याप्तिः स्वत आयाति । गोदावरीतीरे सिंहस्थितेर्ज्ञानम-स्तीति प्रदर्शितायां 'यद् यद् भीरुभ्रमणं तत् तद् भयकारणनिवृत्त्युपलब्धिपूर्वकम्' इति व्याप्तौ **व्यापकस्य** ज्ञातभयकारणाभावस्य **विरुद्धः** अभावः ज्ञातभयकारणरूपः तस्य **उपलब्धिः** गोदावरीतीरे स्थितेर्ज्ञानम् अस्ति; अतः तस्माद् व्यापकाभावस्य [फलितव्याप्तौ व्याप्यरूपस्य (भयकारणाभावाभावस्य = भयकारणस्य)] गोदावरीतीरे स्थितेर्ज्ञानात् प्रदर्शितायां व्याप्तौ व्याप्यस्य भीरुभ्रमणस्य योऽभावस्तस्य (फलितव्याप्तौ व्यापकरूपस्य

अत्रोच्यते—भीरोरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण अन्येन चैवम्भूतेन हेतुना सत्यपि भयकारणे भ्रमतीति अनैकान्तिको हेतुः, शुनो बिभ्यदपि वीरत्वेन सिंहाद् न बिभेतीति विरुद्धोऽपि गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद् वा न निश्चितः, अपि तु वचनात्, न च वचनस्य प्रामाण्यमस्ति अर्थेनाऽप्रति-बन्धाद् इति असिद्धश्च; तत् कथमेवंविधाद् हेतोः साध्यसिद्धिः ?

[भीरुभ्रमणाभावरूपम्] [illegible] ज्ञानं भवतीत्यर्थः। एवञ्च भयकारण-[illegible] ज्ञानं भीरुभ्रमणभावरूपलिङ्गिनो ज्ञानम् अनुमितिरेवेति भावः। फलितम् अनुमानम्—[illegible] भीरुभ्रमणायोग्यं भयहेतुसिंहवत्त्वात् कान्तारवद् इति। अयं च धार्मिकः शुनोऽपि बिभेतीति भीरुरेव, अतो गोदावरीतीर-[illegible] काव्ये पाठकेन श्रावकेण च ज्ञायते इति भावः।

तत्र सिद्धान्तमाह—अत्रोच्यते इत्यादिना। अस्मिन् पूर्वपक्षे सिद्धान्तोऽयमुच्यते इत्यर्थः। पूर्वपक्षोक्तेऽनुमाने दोषानाह—भीरुरपीत्यादिना। भीरोरपि गुरुजनस्य निदेशेन, [illegible] स्वामिनः आज्ञया, [illegible] अन्येन वा केन चिद् एता-दृशेनैव बलवता निमित्तेन [illegible] देशेऽपि भ्रमणं भवतीति 'यत्र यत्र [illegible] तत्र तत्र भीरुभ्रमणाभावः' इति व्याप्तिरेव नास्ति, अतो [illegible] हेतुः भीरुभ्रमणाभावरूपेण साध्येन एकान्तेन (अव्यभि-चारितया = अविचालिततया) सम्बद्ध एव नास्ति, अतः स अनैकान्तिकाख्यः सव्यभिचारा-परपर्यायो हेत्वाभास एव, स च [illegible] अनैकान्तिकभेदेषु मध्ये साध्याभाववद्वृत्तित्वात् साधारणरूपः। अपि च धार्मिकस्य शुनकभीरुत्वमेव शब्दा-दत्र ज्ञायते, शुनकभीरुत्वं च [illegible] भवति, अतः स धार्मिको वीरोऽपि भवितुमर्हति, गोदावरीतीरे च [illegible] बुध्यते, सिंहश्च न नियमेन भयहेतुः वीराणां ततो [illegible]; एवञ्च गोदावरीतीरे सिंहसद्भावमात्राद् त्वया तत्र [illegible] अनुमितौ कर्तव्यायाम् या 'यत्र यत्र सिंहसद्भावस्तत्र तत्र [illegible]' इति व्याप्तिरपेक्ष्यते सैव नास्ति; प्रत्युत 'यत्र यत्र सिंहसद्भावस्तत्र तत्र वीरस्य धार्मिकस्य भ्रमणमवश्यं भवति' इत्येव व्याप्तिरस्ति; भ्रमन्त्येव हि धार्मिका वीरा ग्राममपि प्रविश्य शुनकादिमारणे प्रवृत्तस्य सिंहस्य निवासादिस्थले तन्मारणेन लोकस्य त्राणायेति. एवं च सिंहसद्भावरूपो यस्त्वया दत्तो हेतुः स धार्मिकभ्रमणाभाव-रूपस्य तव साध्यस्य अभावेन धार्मिकभ्रमणेन व्याप्तः, अतः स विरुद्धाख्यो हेत्वाभास एव, साध्याभावव्याप्तो हेतुर्विरुद्ध इति हि तल्लक्षणमिति। अपि च पक्षे गोदावरीतीर-कच्छस्थे लतागहने सिंहसद्भावरूपो हेतुः काव्यस्य श्रोता प्रत्यक्षाद् अनुमानाद् वा न निश्चितः, किन्तु लौकिकात् काव्यरूपाद् वचनात् स ज्ञातः, वचनं तु 'नद्यास्तीरे पञ्च

तथा निःशेषच्युतेत्यादौ (उदा० २०२) गमकतया यानि चन्दनच्यवनादीनि उपात्तानि तानि कारणान्तरतोऽपि भवन्ति, अतश्चात्रैव स्नानकार्यत्वेनोक्तानीति नोपभोगे एव प्रतिबद्धानि इत्यनैकान्तिकानि। व्यक्तिवादिना चाधमपदसहा-यानामेषां व्यञ्जकत्वमुक्तम्। न चात्राधमत्वं प्रमाणप्रतिपन्नमिति कथमनु-मानम्? एवंविधादर्थादेवंविधोऽर्थ उपपत्त्यनपेक्षत्वेऽपि प्रकाशते इति व्यक्ति-वादिनः पुनस्तददूषणम्॥

इति काव्यप्रकाशे (गुणीभूतव्यङ्ग्य)[1] [illegible]-निर्णयो नाम पञ्चम उल्लासः॥ ५ ॥

फलानि सन्ति' इति विप्रलम्भकवाक्यमिव अयथार्थमपि भवति वचनस्य तदर्थेन सह प्रतिबन्धस्य नियतसम्बन्धस्य अभावात्; अतो लौकिकस्य अनाप्तवचनस्य अर्थनिश्चाय-कत्वाभावाद् अप्रमाणरूपाद् वचनात् प्रतीतो गोदावरीतीरे सिंहसद्भावो नैव निश्चितः; एवञ्च त्वदभिमतः 'सिंहसद्भाववत्त्वरूपो' हेतुरेव पक्षे गोदावरीतीरे असिद्ध इति तत्राऽनुमाने 'सिंहसद्भाववत्त्वरूपो' हेतुः स्वरूपासिद्धनामको हेत्वाभास एव, **पक्षे-ऽवर्तमानो व्याप्यत्वेनाऽभिमतो विवादिना दत्तो हेतुः स्वरूपासिद्ध** इति हि तल्लक्षणम् इति। एवञ्च दुष्टाद् हेतोः साध्यसिद्धेरसम्भवाद् 'गोदावरीतीरे सिंहसद्भावज्ञाना-देव तत्र धार्मिकभ्रमणाभावो '**भम धम्मिअ**' इत्यादेः काव्यस्य श्रोत्रा अनुमितिरूपेणैव ज्ञायते' इति तव पक्षः अनुपपन्न [illegible]—म् इत्यभिप्रायः। एवं च '**भम धम्मिअ**' इत्यादौ विधौ वाच्ये सति निषेधस्य अवगमाय व्यञ्जना उपास्यैवेति भावः। वस्तुतस्तु अत्र भ्रमणाभावो न अनुमेयः, किन्तु वक्त्र्याः [illegible] एवेति अत्रानुमानं तत्खण्डनं च तदनुकूलरूपेणैवोपस्थापनीयम्। [illegible] व्यक्तिविवेके तृतीये विमर्शे [illegible] प्रदर्शितम्। मम्मटस्यायं लेखो न केवलं व्यक्तिविवेकमनुसृत्य प्रवृत्त इति प्रतीयते।

निःशेषच्युतचन्दनमित्यादावपि अनुमानेनैव उपभोगावगमो भवति, चन्दनच्यवना-दीनामुपभोगलिङ्गानां तत्र वर्णनादिति अनुमानैकरुचीनां [illegible] भ्रमः स्यादिति तन्निराकर्तुमाह—तथा निःशेषेत्यादि। इदमुदाहरणं प्रथमे उल्लासे एव व्याख्यातम् (उदा० २)। निःशेषच्युतेत्यादौ गमकतया यानि चन्दनच्यवनादीनि उपात्तानि तानि न केवलमुपभोगादेव भवन्ति, किन्तु अन्येभ्यः कारणेभ्योऽपि भवन्ति,

---

१. बन्धनीमध्यगतो भागोऽन्येषु मुद्रितपुस्तकेषु नोपलभ्यते अस्माभिः [illegible] योजितः।

अतएव **तानि** चन्दनच्यवनादीनि **अत्र** निःशेषच्युतेत्यादौ काव्ये स्नानकार्यत्वेन उक्तानि, अतस्तानि चन्दनच्यवनादीनि उपभोगे तद्व्याप्यत्वेन सम्बद्धानि न सन्ति, 'यत्र यत्र चन्दनच्यवनादीनि तत्र तत्र उपभोगः' इति व्याप्तिर्नास्तीति यावत्; एवं च तानि चन्दनच्यवनादीनि उपभोगे साध्ये हेतुत्वेनोपन्यस्यन्ते चेत् तानि अनैकान्तिकहेत्वाभासरूपाणि भवन्ति; न च हेत्वाभासात् साध्यसिद्धिरिति निःशेषेत्यादावपि **नानुमानेन विधिरूपः** (उपभोगरूपः) **अर्थोऽवगम्यते** इति भावः। ननु यदि चन्दनच्यवनादीनि नोपभोगे प्रतिबद्धानि तर्हि कथं तानि उपभोगं व्यञ्जयन्ति इत्यत आह—**व्यक्तिवादिनेत्यादि**। साधारण-[illegible] साहाय्येन चन्दनच्यवनादीनां व्यञ्जकत्वं व्यञ्जनावादिना उक्तमित्यर्थः। एवं चेद् अधमपदसहायानामेव [illegible] हेतुना भवतु, उक्तं च महिमभट्टेन—"वाच्यान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम्। सैवानुमितिपक्षे नो गमकत्वेन सम्मता" (व्य० वि० १।३०-३१ सं० श्लो०) इति चेत् अत्राह—**न चाऽत्राधमत्वमित्यादि**। अधमत्वं व्यञ्जनासामग्रीरूपं भवदपि लिङ्गं भवितुं नार्हति, यतो हि लिङ्गेन नाम प्रमाणभूतज्ञानविषयेण भाव्यम्, न चाऽत्राऽधमत्वं प्रमाणेन ज्ञातमिति अप्रामाणिकाद् अधमत्वात् [illegible]। न चाऽधमत्वं दूतीसम्भोगेनैव, [illegible]तिशयादिना [illegible] अधमत्वोक्तेः सम्भवादित्यपि ज्ञेयम्। ननु एवम् उपपत्तेरभावे कथम् [illegible] चन्दनच्यवनादीनामपि उपभोगव्यञ्जकत्वमपि स्यादित्यत आह—**एवंविधादित्यादि**। वक्तृबोद्धव्यादिवैशिष्ट्यवत् एतादृशादर्थाद् एतादृशोऽर्थः [illegible] प्रतीयते इति स्वीकुर्वतः समान्येन प्रयोजनवल्लक्षणाश्रयणा-ऽनेकार्थकोपयुक्तपदसंयोजन-वक्तृ-बोद्धव्य-काकु-वाक्य-वाच्या-ऽन्यसन्नि-[illegible] व्यञ्जनोपायान् प्रतिपादयतो व्यञ्जनावादिनः **तत्** व्यभिचारित्व-[illegible] सर्वमपि [illegible] इत्यर्थः। रमणीयप्रतीतिसारं हि काव्यम्, न ह्यत्र [illegible] सर्वथा सत्यार्थप्रतिपादनद्वारेण प्रवर्तकत्वं प्रामाणिकमस्ति न वेति विचार्यते [illegible] काव्यस्येति भावः। एवं च व्यङ्ग्यव्यञ्जकयोः व्यापक-व्याप्यभावरूपे नियते सम्बन्धेऽप्रदर्शितेऽपि सामान्यतया [illegible] कवीनां भावकानां चोपकारोऽपि व्यञ्जनावादिनः [illegible] कर्तुं शक्यते एवेति च बोध्यम्। एतादृशस्य अविचित्रस्य व्यङ्ग्यस्य व्यञ्जिकाया व्यञ्जनाया अपि यदि नानुमानेऽन्तर्भावः सम्भवति तर्हि का कथा रसादिव्यञ्जनाया अनुमानेऽन्तर्भावस्येति धूमावगमानन्तरमग्निस्मरणमिव विभावादिप्रतिपत्त्यनन्तरं रसादिप्रतीतिरिति वचो रिक्तमेवेति च बोध्यम्। रसादिश्च व्यङ्ग्य एव नानुमानादिविषय इति [illegible] अभिनवगुप्ताचार्येणतस्य सिद्धान्तीक-

ननु शब्दचित्रेऽर्थस्याचित्रत्वम्, अर्थचित्रे वा शब्दस्य। तथा चोक्तम्—
"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः। न कान्तमपि निर्भूषं विभाति वनिताननम्॥ रूपकादिमलङ्कारं बाह्यमाचक्षते परे। सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्॥ तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी। शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः॥" इति।

धन्वन्तः शाणचक्रे मन्दाकिन्या विपुलपुलिनान्यागतो राजहंसः। अङ्कच्छेदे ललितचरणन्या-[illegible] संसर्पन्त्याः श्रवणपतितं पुण्डरीकं मृगाङ्कः" इत्येतादृशेषु स्थलेषु शब्द-चित्ररहितम् अर्थचित्रम्; [illegible] (उदा० ४) अर्थचित्ररहितं शब्द-चित्रम्, विनिर्गतं मानदमित्यादौ (उदा० ५) शब्दचित्रोपस्कृतमर्थचित्रम् इति मतम् चित्रकाव्यस्य चतुर्षु भेदेषु द्वावेव भेदौ [illegible] न्यूनता चापरो दोषः इत्याशङ्का निवर्तयितुमाह—शब्दार्थचित्रमित्यादि। शब्दचित्रम् अर्थचित्र चेति यत् काव्यद्वयं पूर्वमुदाहृतम्। (उक्तम्) तत्र शब्दचित्रस्य न चित्रार्थरहितत्वम्, न वा अर्थचित्रस्य चित्रशब्द-रहितत्वम् अभिप्रेतम्, किन्तु शब्दचित्रे चित्रार्थस्यापि कियताप्यंशेन स्थितिः, अर्थचित्रे च चित्रशब्दस्यापि स्थितिरेवाभिप्रेता; तथा च तयोः काव्ययोः चित्रस्य शब्दस्य अर्थस्य वा गुणरूपेण प्रधानरूपेण वा स्थितिर्भवति; एवं च शब्दचित्रे चित्रार्थस्य गौणत्वं चित्र-शब्दस्य प्राधान्यम् अर्थचित्रे तु चित्रशब्दस्य गौणत्वम्, चित्रार्थस्य प्राधान्यं भवतीत्यर्थः। एवञ्च शब्दचित्रं वाच्यचित्रमित्यादि सूत्रे (सू० ६) शब्दचित्रस्य [illegible], अर्थचित्रस्य [illegible] अनभिप्रेतत्वात् न [illegible], केवलस्य शब्दचित्रस्य केवलस्य अर्थचित्रस्य च चित्रकाव्यत्वेनाऽनभिमतत्वाद् न च [illegible] भावः। [illegible] शब्दार्थयोः परस्परोपस्कारकत्वेन मञ्जुले साहित्येऽसति तु काव्यत्वस्य नैवोदय इति हृदयम्। अत एव जगन्नाथेन रसगङ्गाधरे तु 'यत्र व्यङ्ग्यचम-त्कारासमानाधिकरणो वाच्यचमत्कारस्तत् तृतीयम् (काव्यम्) [illegible] शब्दचमत्कृतिः प्रधानं तद् अधमं चतुर्थम्' इत्युक्तम्; "यत्र च शब्दार्थचमत्कृत्योः [illegible]-रण्यं तत्र [illegible] पर्यालोच्य यथा लक्षणं व्यवहर्तव्यम्, समप्राधान्ये तु मध्य-मत्वमेव" इति व्यवस्था उक्ता; 'यद्यपि यत्रार्थचमत्कृतिशून्या शब्दचमत्कृतिस्तत् पञ्चमम् अधमाधममपि (काव्यम्) [illegible] तथा एकाक्षरपद्यार्धावृत्ति-यमक-पद्मबन्धादि, तथापि [illegible]-तया वस्तुतः काव्यत्वाभावेन महाकविभिः प्राचीनपरम्परामनुरुन्धानैस्तत्र तत्र निबद्ध-मपि नाऽस्माभिर्गणितम्" इति शब्दार्थयोः परस्परोपस्कारकत्वेन मञ्जुले साहित्येऽसति शब्दस्य काव्यत्वं स्फुटं [illegible]। शब्दचित्रार्थचित्रयोः संसृष्टौ साङ्कर्ये चापि 'प्रधानतो व्यपदेशा भवन्ति' इति न्यायेन तत्र तत्र काव्ये यस्य यस्य आस्वादनातिशय-स्तदनुसारं शब्दचित्रत्वमर्थचित्रत्वं वा व्यवस्थापनीयम्। एवं च शब्दचित्रार्थचित्रयोः

शब्दचित्रं यथा—

> प्रथममरुणच्छायस्तावत् ततः कनकप्रभम्
> तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।
> उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
> सरसबिसिनीकन्दच्छेदच्छविर् मृगलाञ्छनः ॥ उदा० २०३ ॥

संसृष्ट्या सङ्करेण वा चित्रकाव्यभेदानामैकविध्यं भेदौ तु द्वावेवेति बोध्यम्। अत एव तु ध्वनिगुणीभूतव्यङ्ग्ययोः संसृष्ट्या साङ्कर्येण वा जाताः काव्यप्रकाराः काव्यप्रभेदरूपेणैव प्रदर्शिता ग्रन्थकारेण न तु ध्वनिः, गुणीभूतव्यङ्ग्यम्, तत्संसृष्टिः, तत्साङ्कर्यम् इति काव्यभेदा गणिताः। कारिकातोऽर्थादागतं केवलस्य शब्दचित्रस्य केवलस्यार्थचित्रस्य च चित्रकाव्यत्वेनाऽनभिमतत्वं [illegible] प्रतिपत्तये आह—**न तु शब्दचित्रेऽर्थस्येत्यादि।** तत्र शब्दचित्रस्य अर्थचित्रस्य च सम्भूयैव चित्रकाव्यत्वनिर्वर्तकत्वे भामहसम्मतिं प्रदर्शयति—**तथा चोक्तमित्यादिना।** यद्यपि भामहेन अर्थालङ्कारनिरपेक्षस्यैव शब्दालङ्कारस्य शब्दालङ्कारनिरपेक्षस्यैव च अर्थालङ्कारस्य काव्यशोभाहेतुत्वं स्वीकृतमिति प्रतीयते "किन्तया चिन्तया कान्ते नितान्तेति यथोदितम्" (२।५) इत्यत्र [illegible] तथापि भामहकारिकायामन्ते आगतं [illegible] द्वयमिति पदमवलम्ब्य मम्मटो भामहस्याभिमतमुभयालङ्कारत्वं मन्यते इति प्रतिभाति। "न नितान्तादिमात्रेण जायते चारुता गिराम्। वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः॥" (१।३६) इति वदन् भामहोऽपि काव्ये उभयोरलङ्कारयोरावश्यकत्वं प्रतिपादयतीति प्रतिभाति। **कारिकार्थस्तु**—यथा कान्तं ह्रियाश्रिया (लावण्येन) च शोभमानमपि वनिताया मुखं ललाटिकया कर्णिकया [illegible] नासाभरणेन वाऽन्यतमेनाप्यलङ्कारेण महितं विशेषेण नैव शोभते तथैव काव्यशरीरात् शब्दाद् व्यतिरिक्तेनापि रूपकादिना अर्थालङ्कारेण रहितं सन् काव्यमपि नात्यन्तं शोभते इति कविभी रूपकादीनामेवालङ्काराणां समायोजने संरम्भः कार्यः, शब्दस्तु काव्यशरीरं मुखलावण्यमिव स्वाभाविकं तत्र कः संरम्भ इवाभिप्रायेण तस्य काव्यस्य रूपकादिरर्थालङ्कारोऽन्यैरालङ्कारिकैर्बहुधा विकल्प्य प्रतिपादितः। अपरे पुनः **सुबन्तानां** [illegible] तिङन्तानामाख्यातानां च **विशेषेण** मनोहारितया अनुप्रासादिमत्त्वेन कविकृता उत्पत्तिः सृष्टिः समायोजनरूपा एव **सौशब्द्यम्** शब्दरूपस्य काव्यस्य, अनुप्रासादिलक्षणानुगमननिर्वर्त्यत्वाच्च शब्दालङ्कारस्य; अर्थस्य विशिष्टा सृष्टिस्तु न सौशब्द्यमिव काव्यजीवातुभूता काव्यास्वादे प्रथमतः शब्दचमत्कारस्यैव प्राधान्याद् रूपकादिचमत्कारस्य तु केवलं पार्यन्तिकत्वाद् [illegible] लक्षणकविस्वभावमात्रनिर्वर्त्यत्वाभावाच्चार्थालङ्कारस्येति च मन्वाना रूपकादिमलङ्कारं **बाह्यं** काव्यशरीरतो विप्रकृष्टं पार्यन्तिकं कथयन्ति; ते सुबन्तानां तिङन्तानां च विशिष्टसमायोजनरूपामुत्पादनामेव वाचां विला-

अर्थचित्रं यथा—

> ते दृष्टिमात्रपतिता अपि कस्य नात्र
> क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ।
> नीचाः सदैव सविलासमलीकलग्ना
> ये कालतां कुटिलतां च न सन्त्यजन्ति ॥ उदा० २०४ ॥

यद्यपि सर्वत्र काव्येऽन्ततो विभावादिरूपतया पर्यवसानं तथापि स्फुटस्य रसस्यानुपलम्भाद् अव्यङ्ग्यमेतत् काव्यद्वयमुक्तम् । अत्र च शब्दालङ्कार-

---

स्य अलङ्कारं मन्यन्ते; ते हि यता [illegible] नामेव शब्दस्य शोभाकरत्वम्; अर्थानां कविकृता रूपकादिभिर्या विशिष्टा समावेशना तु सौवर्ण्यमिव काव्यस्यान्तरङ्गं न इति ते मन्यन्ते; अस्माकं तु "शब्दार्थौ सहितौ काव्यम्" (भा० अ० १।१६) इति सिद्धान्तिनां शब्दार्थोभयरूपे काव्य-शरीरे शब्दार्थालङ्कारयोर्द्वयोरेव [illegible] शब्दालङ्कारत्वेन अर्थालङ्कारत्वेन चेति द्वयोरेवालङ्कारयोः समुदाय इष्ट इति ।

अर्थचित्रोपस्कृतं शब्दचित्रमुदाहरति—**प्रथममरुणच्छाय** इत्यादि । चन्द्रोदयवर्णनमिदम् । मृगलाञ्छनो निशामुखे प्रथमं **तावत्** सर्वात्मना अरुण (रक्त) कान्तिः, ततः कनकमिव पीतरक्तवर्णः, तदनु प्रियविरहेण भृशं सोत्कण्ठायाः (प्रियं काङ्क्षन्त्याः) तन्व्याः कपोलतलयोः कान्त्या तुल्यया कान्त्या युक्तः 'पाण्डुवर्णः', ततः सरसस्य (आर्द्रस्य) बिसिनीकन्दस्य यश्**छेदः** सद्यश्छिन्नः शुक्ल-चिक्कणः खण्डस्तस्य (शुक्लच्छिदिस्थलस्य) कान्त्या तुल्यया शुभ्रया कान्त्या शुक्लीकृततमस्समर्थः सन् उदयतीत्यर्थः । अत्यष्ट्यां छन्दसि हरिणी वृत्तम् । अत्र सकारयोः, ककारयोः, तकाराणाम्, लकारयोः, क्ष इति संयुक्तयोर्वर्णयोः, रकाराणाम् छकारयोश्च अनुप्रासः प्रधानं तस्यैव आदितः पद्यसमाप्तिं यावद् आस्वादनीयत्वात्. तद्वास्वादम् औपम्यं स्वभावोक्तिश्चार्थचित्रे समुद्दीपयत इति अत्र प्रधानेन शब्दचित्रेण व्यपदेशः काव्यस्येत्यभिप्रायः ।

शब्दचित्रोपस्कृतमर्थचित्रमुदाहरति—**ते दृष्टिमात्रे**त्यादि । ये शोभनपक्ष्मयुक्तनयनानां सुन्दरीणाम् अलकाः खलाश्च **नीचाः** कल्पितत्वाद् ह्रस्वा अधमा वा सदैव सविलासम् **अलीके** ललाटे मिथ्याव्यवहारे वा लग्नाश्च सन्तः **कुटिलतां** कुञ्चितत्वमथवा कपटम्, **कालताम्** कृष्णत्वं कृष्णकर्म-(पाप) युक्ततां वा च न त्यजन्ति ते पक्ष्मलदृशामलकाः खलाः (दुर्जनाः) च दृष्टिविषये एव आगता अपि सन्तः कस्य पुरुषस्य धैर्यविघाताय अमुक्तत्वाय वा न भवन्ति ? भवन्त्येवेत्यर्थः । शक्वर्यां छन्दसि वसन्ततिलका वृत्तम् । कथाख्यायिकामुखादौ खलनिन्दापरं कस्यचित् पद्यमिदं प्रतिभाति । अत्र प्रकृतखलाऽप्रकृतालकानामुभयेषां समानरूपानेकधर्मान्वयरूपं दीपकम् अर्थचित्रं प्रधानं तस्यैवात्रास्वाद्यतरत्वात्; दीपकलक्षणं च "सकृद् वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् । सैव

भेदाद् बहवो भेदा., ते चालङ्कारनिरूपणे निर्णेष्यन्ते ।

इति काव्यप्रकाशे शब्दार्थचित्रनिरूपण नाम षष्ठ उल्लासः ॥ ६ ॥

क्रियासु बह्वीषु कारकस्यैक दीपकम्' इति (सू० १५३) । अत्र अलीकशब्दस्य परिवृत्त्य-सहत्वाच्छब्दश्लेष · लकाराणां सकाराणा च अनुप्रास इति सत्यपि शब्दचित्रे आस्वादे तस्याऽप्राधान्यं बोध्यम् ।

ननु चतुर्वर्गफलप्राप्तिसाधनस्य वस्तुन काव्येऽनिबन्धनीयत्वात्, चतुर्वर्गफलप्राप्तिसाधनस्य वस्तुनस्तु अवं कस्यापि रसस्य भावस्य वाऽङ्गत्वेनेति सर्वस्यापि वस्तुनो विभावादि-रूपतया रसादिव्यञ्जकत्वं भवत्येवेति अव्यङ्ग्यं काव्यमेव न सम्भवति; शब्दार्थचित्रत्वे-नोदाहृतयोरेतयोः काव्ययोरपि क्रमेण शृङ्गारस्य निर्वेदाख्यस्य भावस्य च व्यङ्ग्यत्वात् चित्रकाव्यनिरूपणमिदमसङ्गतमित्यत आह—यद्यपीत्यादि । वृत्तिमच्छब्दजन्यस्य चमत्का-रस्यैव काव्यत्वनिर्वर्तकत्वात् चित्रकाव्ये अस्फुटं प्रतीयमानस्यापि रसादेः पार्यन्तिकस्य चमत्कारनिष्पादकत्वाभावात् शब्दार्थचित्रयोरेव तत्र चमत्कारनिष्पादकत्वात् तत्र परिदुर्बल-तया प्रतीयमानमपि रसादिव्यङ्ग्यमविगणय्य रसादिचमत्कारमूलककाव्यव्यतिरेकेणाऽस्य चित्रकाव्यस्य प्रतिपादनं कृतमित्यभिप्रायः । यथा ध्वनिकाव्यप्रभेदाश्चतुर्थे विस्तरेण प्रति-पादिता., गुणीभूतव्यङ्ग्यकाव्यप्रभेदाश्च पञ्चमे, तथैवाऽत्र चित्रकाव्यप्रभेदाः क्रमप्राप्ता निरूपणीया इत्यत्राऽऽह—अत्र चेत्यादि । चित्रकाव्येऽपि बहवः प्रभेदाः सन्ति तेचाऽत्र निरूपणीया एव, तथापि रसादिव्यङ्ग्यरहितत्वेन उदाह्रियमाणा बहवः शब्दार्थचित्र-काव्यप्रभेदा विरसतामावहन्ति इति शब्दार्थालङ्कारस्वरूपज्ञानेनैव तेषा स्वरूपमपि ज्ञातुं शक्यते इति च ते अलङ्कारनिरूपणेनैव तन्त्रेण निर्णेष्यन्ते इति चित्रकाव्यप्रभेदा नात्र विस्तरेण प्रतिपाद्यन्ते इति भावः । यद्यपि अलङ्कारप्रकरणे अर्थालङ्कारनिरपेक्षाः शब्दा-लङ्काराः शब्दालङ्कारनिरपेक्षाश्चार्थालङ्कारा निर्णेष्यन्ते, शब्दार्थचित्रयोस्तु अन्योन्यस्य अन्योन्योपस्कारकत्वेन प्रधानगौणभावेन साहित्यमप्यावश्यकमिति न शब्दार्थालङ्का-रनिरूपणेनैव शब्दार्थचित्रनिरूपणं सर्वथा भवति, तथाऽपि शब्दालङ्कारेषु अर्थालङ्का-रेषु च परिचितेषु अस्मिन्नुल्लासे उक्ते शब्दार्थचित्रयोः सम्भूय चित्रकाव्यत्वनिर्वर्तकत्वे च परिज्ञाते तु शब्दचित्रकाव्यानि अर्थचित्रकाव्यानि चाऽनुगन्तु शक्यान्येवेति शब्द-चित्राणि अर्थचित्राणि च नात्र पृथङ्निरूप्यन्ते उदाह्रियन्ते च वैरस्यभयाद् ग्रन्थगौरव-भयाच्चेति तु हृदयम् ॥

इति श्रीमन्निरवद्यविद्यमानवेदान्तवेदार्थसद्ध्ववर्ति-श्रीरङ्गाचल-
दक्षिणजनपदान्तर्गत-कामकूट-नगराभिजन-सामान्यि-
गार्ग्येय-कौण्डिन्यायनाचार्यशिवराजकृतौ
हैवल्याङ् काव्यप्रकाशविवृतौ
षष्ठ उल्लासस्सम्पूर्णः ॥ ६ ॥

अथ सप्तम उल्लासः

काव्यस्वरूपं निरूप्य दोषाणां सामान्यलक्षणमाह—

(सू० ७३) मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः ।

उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः ॥ ४८ ॥

हतिरपकर्षः । शब्दाद्या इति आद्यग्रहणाद् वर्ण-रचने ।

धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायते इति प्रथमं काव्यलक्षणोद्देशक्रमम् (सू० ३) उल्लङ्घ्यापि काव्यधर्मिस्वरूपं षष्ठोल्लासपर्यन्तं निरूपितम् । इदानीं लक्षणोद्देशक्रमेण प्रथमम् अदोषाविति पदं व्याकर्तुम् अभावस्य स्वरूपतो निरूपणमशक्यमिति प्रतियोगिनिरूपणेन तन्निरूपणाय दोषा निरूप्यन्ते इत्यभिप्रायेणाह— **काव्यस्वरूपमित्यादि** । दोषांश्च भरत-भामह-दण्डि-वामन-रुद्रटा-ऽऽनन्दवर्धन-महिमभट्ट-प्रभृतिभिः निरूपितानेव सम्यक् सङ्कलय्य व्यवस्थाप्य च प्रदर्शयिष्यति । तत्र च भरतेन नाट्यशास्त्रस्य षोडशेऽध्याये "निगूढमर्थान्तरमर्थहीनं भिन्नार्थमेकार्थमभिप्लुतार्थम् (असंश्लिष्टार्थम्) । न्यायादपेतं विषमं विसन्धिः शब्दच्युतं वै दश काव्यदोषाः" इत्यादिना (१६। ८८-९४) दोषा निरूपिताः; **भामहेन** च—नेयार्थम्, क्लिष्टम्, अन्यार्थम्, अवाचकम्, अयुक्तिमत्, गूढशब्दाभिधानम्, श्रुतिदुष्टम्, अर्थदुष्टम्, कल्पनादुष्टम्, श्रुतिकष्टम् (१।३७-५३); हीनतादय उपमादोषाः (२।३९-४०), अपार्थम्, व्यर्थम्, एकार्थम्, ससंशयम्, अपक्रमम्, शब्दहीनम्, यतिभ्रष्टम्, भिन्नवृत्तम्, विसन्धि, देश-काल-कला-लोक-न्याया-ऽऽगमविरोधि, प्रतिज्ञा-हेतु-दृष्टान्त-हीनम् (४।१-५१, ५।१-६१), अपुष्टार्थता, वक्रोक्तिहीनता, ग्राम्यता, अकुशलता (१।३४-३५), अहृद्यम्, अनुनिर्भेदम्, अपेशलम् (५।६२), छिन्नपदम् अस्वर्थम्, बहुपूरणम्, आकुलम् (५।६७) इति दोषा विचारिताः; [illegible] प्रदर्शिता (१।५४); **दण्डिना च**—अपार्थादयो भामहोक्ता दशैव दोषाः काव्येषु वर्ज्या उक्ताः (३।१२५-१७८), दोषाणामदोषत्वे दिक्प्रदर्शनं च कृतम् (३।१७९-१८५); **वामनेनाऽपि**—'गुणविपर्ययात्मानो दोषाः' इति दोषसामान्यलक्षणमुक्त्वा पददोषाः असाधुत्वादयः, पदार्थदोषाः अन्यार्थत्वादयः, वाक्यदोषा वृत्तभेदादयः, वाक्यार्थदोषाः व्यर्थत्वादयः (२।१।१-२२; २।२।१-२४), ओजोविपर्ययात्मप्रभृतयश्च सूक्ष्माः दोषाः (२।२।२४ वृत्तौ), उपमादोषा. (४।२।८८) च निरूपिताः; **रुद्रटेन च**—न्यूनपदम् अधिकपदम्, अवाचकम्, दुष्टक्रमम्, अपुष्टार्थम्, अचारुपदम् (२।८) इति दोषाः सूचिताः, षष्ठोद्देशे—असमर्थम् अप्रतीतम्, विसन्धि, विपरीतकल्पनम्, ग्राम्यम्, देश्यम् इति पददोषाः (६।१-२७) उक्ताः, अन्येऽपि पददोषा एवमेव वेद्या इति चोक्तम् (६।२८); सङ्कीर्णम्, गर्भितम्, गतार्थम् इति वाक्यदोषा प्रतिपादिताः (६।४०-४५)

अर्थदोषेषु—अपहेतुः, अप्रतीतः, निरागमः, बाधयन्, असम्बद्धः, ग्राम्यः, विरसः, तद्वान् (अव्यभिचारिविशेषणयुक्तः), अतिमात्रः इति दोषा निरूपिताः (११।१-२७) उपमादोषेषु चत्वार उक्ताः (११।२४-३६), दोषाङ्कुशा अपि प्रदर्शिताः (३।२९-३०, ४३, ११।१८-२३)। **आनन्दवर्धनेन तु** अभिनवार्थप्रतिपादनैकरसिकेन—असमर्थदुष्टानां श्रुतिदुष्टादीनां दोषाणां हेयोपादेयत्वविवेक प्रदर्शिता (२।११) रसदोषा तथा तत्परिहारस्तु स्वोपज्ञतया सम्यक् प्रकाशिताः (३।१८-३३); **महिमभट्टेनाऽपि** व्यक्तिविवेके द्वितीये विमर्शे [illegible] दोषसामान्यलक्षणं च प्रदर्श्य विधेयाविमर्श-प्रक्रमभेद-क्रमभेद-पौनरुक्त्य-वाच्यावचना-ऽवाच्यवचन-रूपेण षड्धा विभक्ताः अवाच्यवचनं परित्यज्य पञ्चधैव विभज्य उपक्रान्ताः अनौचित्यमूला बहवो दोषाः प्रदर्शिताः, यत्र मम्मटोक्ता बहवो दोषा अन्तर्भवन्ति; **भोजेनाऽपि**—असाधु, अप्रयुक्तम्, कष्टम्, अनर्थकम्, अन्यार्थकम्, अपुष्टार्थम्, असमर्थम्, अप्रतीतम्, क्लिष्टम्, गूढम्, नेयार्थम्, सन्दिग्धम्, विरुद्धम्, अप्रयोजकम्, देश्यम्, ग्राम्यम् इति पददोषाः; (अ० क० आ० १।८-९। शब्दहीनम्, क्रमभ्रष्टम्, विसन्धि, पुनरुक्तिमत्, व्याकीर्णम्, वाक्यसङ्कीर्णम्, अपदम्, वाक्यगर्भितम्, भिन्नलिङ्गम्, भिन्नवचनम्, न्यूनोपमम्, अधिकोपमम् भग्नच्छन्दः, भग्नयति, अशरीरम् (क्रियापदहीनम्), अरीतिमत् इति वाक्यदोषाः; (स० क० आ० १।१८-२०। अपार्थम्, व्यर्थम् एकार्थम्, ससंशयम्, अपक्रमम्, खिन्नम्, अतिमात्रम्, परुषम्, विरसम्, हीनोपमम्, अधिकोपमम् असदृशोपमम्, अप्रसिद्धोपमम्, निरलङ्कारम्, अश्लीलम्, विरुद्धम् इति वाक्यार्थदोषाः प्रतिपादिताः (स० क० आ० १।४८-४९); दोषाङ्कुशाश्च नैमित्तिकगुणत्वेन (१।६०) दोषगुणतान्त्या प्रतिपादिताः (१।८०-१६६)। तत्र दोषाणां निरूपणं च सामान्यविशेषलक्षणप्रदर्शनपूर्वकं कृतं सुप्रतिपदं भवतीति दोषसामान्यलक्षणमाह—**मुख्यार्थेत्यादि**। रसादिरूपमुख्यार्थापकर्षको दोष इति दोषसामान्यलक्षणम्। मुख्यार्थस्य हतिर्हननमपकर्षणमित्यर्थः। कृतो बहुलमिति वक्तव्यमिति वचनात् क्तिनन्तस्य करणार्थकत्वं बोध्यम्। मुख्यार्थस्य हतिर्यस्मात् स इति व्यधिकरणबहुव्रीहिरिति [illegible]। वामनस्तु "अवर्ज्यो बहुव्रीहिर्जन्माद्युत्तरपदः" (५।२। १०) इति वदन् क्वाँश्चिदेव व्यधिकरणबहुव्रीहीननुमन्यते न सर्वान्। मुख्यार्थं विवृणोति—**रसश्चेत्यादिना**। रस्यते इति रसः इति योगार्थग्रहणाद् रसपदेनाऽत्र रसभावादिषु चित्रास्वादादिषु चाऽनुगतस्य आस्वादमात्रस्य ग्रहणम्, तेन काव्यास्वादापकर्षजनको दोष इत्युक्तं भवति। एवं हि चित्रेऽपि दोषसम्भावना तदभावे यत्नस्य करणीयत्वं च घटते। प्रधानं मुख्यशब्दार्थं प्रदर्श्य औपचारिकमपि तदर्थं निर्दिशति—**तदाश्रयाद् वाच्य** इति आस्वादस्य वाच्यार्थबोधोत्तरवर्तित्वाद् आस्वादं प्रति साक्षाद् हेतुत्वात् शब्दवृत्त्युपस्थाप्यो वाच्यादिरूपो रसादिव्यतिरिक्तोऽर्थोऽपि मुख्य इत्युपचर्यते इत्यर्थः। अथवा रसपदं रसभावादिपरम् रसस्य सुखरूपस्य पुरुषार्थस्य मुख्यत्वं स्वतः सिद्धमेवेति नि-

विशेषलक्षणमाह—

(सू० ७४) दुष्टं पदं श्रु[1]तिकटु च्यु[2]तसंस्कृत्यप्र[3]युक्तमस[4]मर्थम् ।
नि[5]हतार्थमनु[6]चितार्थं नि[7]रर्थकमवा[8]चकं त्रिधा[9]ऽश्लीलम् ॥ ४९ ॥
स[10]न्दिग्धम[11]प्रतीतं ग्रा[12]म्यं ने[13]यार्थमथ भवेत् क्लि[14]ष्टम् ।
अ[15]विमृष्टविधेयांशं विरु[16]द्धमतिकृत् समासगतमेव ॥ ५० ॥

हेतुको निर्देशः, वाच्यस्य तु अन्यथात्वात् सहेतुकं मुख्यत्वं कथितं बोध्यम् । **तदाश्रयाद् वाच्यः** इत्यस्य च **तस्य** वाच्यस्य **आश्रयाद्** [illegible] मुख्यार्थत्वस्याऽऽश्रयणात् चित्ररूपो वाच्योऽर्थोऽपि मुख्यो भवतीत्यर्थः । एवञ्च वाच्यार्थापकर्षजनकोऽपि दोष इत्यर्थः । कथं तर्हि पद-वाक्य-वर्ण-रचनादिदोषाः प्रतिपाद्यन्ते इत्यत्राऽऽह—**उभयोपयोगिन** इत्यादि । पदवाक्यरूपाः शब्दाः वर्णरचनादयश्च आस्वाद आस्वाद-वाच्यार्थोभयोपयोगिन इति शाब्देऽर्थे शब्दादिगतधर्माणामपि प्रतिभासात् शब्दादेरहृद्यया प्रतीत्य विहृतेन हृदयेन काव्यास्वादस्य कर्तुमशक्यत्वाच्च पदवाक्यादिगता दोषा अपि आस्वादस्य वाच्यार्थस्य चापकर्षं जनयन्तीति शब्दादिष्वपि दोषा उच्यन्त इत्यर्थः । एवमपि शब्दचित्रेऽपि दोषसम्भावना तत्परिहारयत्नस्य करणीयता च सङ्गृहीता । हति-लक्षणमाह—**हतिरपकर्ष** इति । अपकर्षश्च उद्देश्यप्रतीतिविघातरूपः । आद्यपदग्राह्यमाह—**शब्दाद्या** इत्यादिना । वर्णाः कादयोऽत्राभिप्रेताः, रचना तद्विन्यासानुपूर्वी । निरूपयिष्यते च वर्णदोषो रचनादोषश्च वाक्यमात्रगतदोषेषु । तत्र केचन दोषा आस्वादं साक्षादपकर्षन्ति, रसव्यक्तिं मन्थरां कृत्वा, रसे विषयान्तरबोधकाटवं संयोज्य रसव्यक्तिं प्रतिबध्नन्ति, यथा रसादेः स्वशब्देन वाच्यत्वप्रभृतयः, वर्णरचनादोषाश्च केचन आस्वादाश्रयार्थापकर्षणेन यथा अनुभावविभावादि-कष्टव्यक्तिप्रभृतयः अपुष्टार्थत्वादयः, असमर्थत्व-निहतार्थत्व-च्युतसंस्कृतित्व-क्लिष्टत्व-निरर्थकत्व-नेयार्थत्व-विरुद्धमतिकृत्त्वादयः, केचन पुनः अर्थाश्रयशब्दसौन्दर्यापकर्षणेन अर्थेऽपि कथञ्चित् स्वधर्मस्य सङ्क्रमणेन तत्सौन्दर्यमपकृष्य आस्वादमपकर्षन्ति यथा श्रुतिकटुत्वादयः । एवञ्च रसगतत्वेन (आस्वादगतत्वेन), अर्थगतत्वेन, शब्दगतत्वेन च दोषा वस्तुतस्त्रिधेति ज्ञेयम् ॥ ७३ ॥

दोषसामान्यलक्षणमुक्त्वा दोषविशेषलक्षणं प्रक्रमते—**दुष्टं पदमि**त्यादिना । यद्यपि मुख्यार्थस्य साक्षादेवापकर्षका आस्वाद (रस—) दोषाः पूर्वम्, ततः [illegible] मुख्यार्थस्याऽपकर्षका अर्थदोषाः, ततः [illegible] मुख्यार्थस्यापकर्षकाः शब्ददोषा वक्तव्या इत्युचितम्, तथापि अर्थचित्रेऽर्थस्य शब्दचित्रे शब्दस्य च मुख्यतेति तद्दोषाणामपि साक्षान्मुख्यार्थापकर्षकत्वस्य सम्भवात्, काव्यलक्षणे शब्दार्थयोः प्राधान्येन गृहीतत्वाद् रसस्य आस्वादस्य वा [illegible] काव्यलक्षणोद्देशक्रमानुरोधेन पूर्वं शब्ददोषान्, ततोऽर्थदोषान् प्रतिपाद्याऽन्ते रसदोषान् वक्ष्यति ।

[१] श्रुतिकटु परुषवर्णरूपं कष्टम्, यथा—

अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥ उदा० २०५ ॥

अत्र कार्तार्थ्यमिति ।

शब्ददोषा अपि वर्णगताः रचनागताः पदगताः पदांशगताः वाक्यगता इति पञ्चधा. अर्थदोषाश्च पदार्थगता वाक्यार्थगताः विभावादिगताश्चेति त्रेधा; रसदोषाश्च रसप्रतीत्यवरोधका रसप्रतीतिव्यवधानोत्पादकाः [illegible] । यद्यपि वाक्यस्यैव [illegible] परिच्छेदाय दोषविचारस्तथापि [illegible] निर्दोषेषु सत्सु तन्निष्पाद्यं वाक्यमपि निर्दोषं भवेत् "तिथादृशाद् वै जायते तादृगेव भवति" इति न्यायादिति वर्णादिगतदोषनिरूपणमपि युक्तमेव । एवमपि यद्यपि शब्ददोषेषु वाक्यदोषाः पददोषाः पदांशदोषाः रचनादोषाः वर्णदोषा इति क्रमेण तद्वैपरीत्येन वा निरूपणं युक्ततरं तथापि शब्दार्थशरीरे काव्ये विश्लेष्य विचारणीये अर्थवतो लघुतमस्य शब्दस्य पदरूपस्यैव प्रथमं विचारः कार्य इति मत्वा पददोषान् प्रथममाह—**दुष्टं पदमित्यादिना** । श्रुतिकटु, च्युतसंस्कृति, अप्रयुक्तम्, असमर्थम्, निहतार्थम्, अनुचितार्थम्, निरर्थकम्, अवाचकम्, त्रिविधरूपेण अश्लीलम्, सन्दिग्धम्, अप्रतीतम्, ग्राम्यम्, नेयार्थम् च पदम्; **अथ** क्लिष्टम्, अविमृष्टविधेयांशम्, विरुद्धमतिकृत् च समासपदं दुष्टं भवति; तत्र [illegible] क्लिष्टम्, अविमृष्टविधेयांशम्, विरुद्धमतिकृत् च समस्तं पदमेव भवति, न असमस्तम् पदम्; श्रुतिकटुप्रभृतीनि तु असमस्तं समस्तं च पदं भवतीत्यर्थः । अत्रास्य सूत्रस्य पददोषविभागमात्रकरत्वे विशेषलक्षणाकथनात् प्रतिज्ञाहानिः, न्यूनता च; लक्षणपरत्वे च [illegible] गोविन्दठक्कुरादिभिर्यत् चोद्यते, यच्च श्रुतिकटुप्रभृतिपदानां रूढोऽर्थो लक्ष्यः योगार्थो लक्षणम् इति, श्रुतिकटुप्रभृतिपदवाच्यत्वं लक्षणमिति, श्रुतिकटुप्रभृतिपदानामावृत्त्या तेषां यौगिकानां लक्षणत्वं रूढानां लक्ष्योपस्थापकत्वमिति च उच्यते तत् सर्वमस्थाने; कारिकया विभागं कृत्वा वृत्त्या लक्षणोदाहरणयोः प्रदर्शितत्वात्, कारिकावृत्तिरूपेणैव ग्रन्थस्य निर्वर्तनादित्यस्माकं प्रतिभाति ॥ ७४ ॥

[१] श्रुतिकटु-लक्षणमाह—**श्रुतिकटु** इत्यादि । श्रवणोद्वेजकवर्णयुक्तं दृढकठोरयत्नोच्चारणीयं बालवनितादिभिः कष्टेन उच्चारयितुं शक्यं पदं श्रुतिकटुरूपं दुष्टं बोध्यम् । श्रुतिकटुपद-घटितं काव्यमुदाहरति—**अनङ्गमङ्गलेत्यादि** । कुट्टिनी स्वस्याः प्रयोक्तुर्युवकस्य इष्टनायिकासमागममनुध्यायति । स युवा तन्वङ्ग्याः कामदेवसुगृहरूपस्य अपाङ्गस्य (नेत्रत्रिभागस्य) भङ्गीनां (चेष्टाविशेषाणाम्) तरङ्गैः आलिङ्गितः सन् कदा कृतार्थताम् (सिद्धप्रयोजनताम्) लप्स्यते इत्यर्थः । 'विभाषा कदाकर्ह्योः' (अष्टा० ३।३।५) इति प्रामाण्याद् भविष्यदर्थकोऽत्र लट् । अत्र कार्तार्थ्यमितिपदं श्रुतिकटुरूपं

[२] च्युतसंस्कृति व्याकरणलक्षणहीनं यथा—

एतन् मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ।
तत् पल्लीपतिपुत्रि, कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः ॥ उदा० २०६ ॥

अत्र अनुनाथते इति । 'सर्पिषो नाथते' (उदा० २०७) इत्यादौ इव आशिषि एव नाथतेः आत्मनेपदं विहितम् "आशिषि नाथः" (वा० १।३।२१) इति; अत्र तु याचनमर्थः; तस्माद् 'अनुनाथति स्तनयुगम्' इति पठनीयम् ।

[illegible]—अत्र कार्तार्थ्यमित्यादि । अनित्योऽयं दोषः रौद्रादावस्य गुणत्वात् । सत्वर-प्रसन्नस्य स्वदमानस्य त प्रति उन्मुखस्य स्थितेर्वा श्रोत्रोद्वेगजननेन रसास्वादमन्थरीकरणम् अस्य दोषस्य दूषणताया बीजम् । (उदा० २०५) [१] ।

[२] च्युतसंस्कृतिलक्षणमाह—च्युतसंस्कृतीत्यादि । व्याकरणरूपं यद् लक्षणशास्त्र तद्विरुद्धं पदं च्युतसंस्कृतिरूपं दुष्टं भवतीत्यर्थः । सद्व्याकरणं संस्कृतमधिकृत्यैवेदं लक्षणम् । वस्तुतस्तु यस्याः कस्या अपि सद्व्याकरणाया दुर्व्याकरणाया अव्याकरणाया अपि भाषायाः काव्ये लौकिकस्वाभाविकपदस्वरूपविरुद्धस्वरूपं पद दुष्टमित्येव लक्षणं युक्ततरम्. 'शब्दार्थव्यवहारे च प्रसिद्धिरेव प्रमाणम्' (ध्व० आ० २।२७ वृत्तौ) इत्यभियुक्तोक्तेः । एवञ्चास्य दोषस्य नामाऽपि अपस्वरूपं पदमित्येव वक्तव्यम् च्युतसंस्कृतिं पदं दुष्टमुदाहरति—**एतन् मन्देत्यादि** । हे पल्लीपतिपुत्रि एतद् मन्दविपक्वतिन्दुकफलवत् श्याममध्यभागम् ईषद्गौरप्रान्तभागञ्च तव कुचयुगं पुलिन्दयुवककरस्पर्शक्षमं हन्त लक्ष्यते, तस्मात् हे पल्लीपतिपुत्रि, कुम्भाभयाभ्यर्थनादीनं कुञ्जरकुलं 'कुचयुग' पत्रावृतं माकृथाः, इति त्वाम् अनुनाथते (याचते) इत्यर्थः । अथवा कुञ्जरकुलं त्वाम् अनुनाथते, अतः कुचयुगं पत्रावृतं न कुरुष्व इति सम्बन्धः । त्वत्कुचयुगस्य पत्रानावृतत्वे तदासक्तमनसः पुलिन्दयुवकस्य अस्मत्कुम्भभेदने आदरो मन्दः स्यादिति अस्मत्त्राणं स्यादिति कुञ्जरकुलाभिप्रायः कल्पितः । क्षान्तिः इति (क्षमा इति वा) स्पर्शादीनामनुद्वेगेन सहनीयता कामसूत्रे प्रसिद्धा । अत्र अनुनाथते इति पदं च्युतसंस्कृतीत्याह—**अत्र अनुनाथते इतीति** । तत्र हेतुमाह—**सर्पिष इत्यादिना** । अनुदात्तेतो नाथतेरात्मनेपदं सिद्धमिति सिद्धेऽप्यात्मनेपदे "आशिषि नाथः" इति वार्तिककारवचनम् 'इदं भूयात्' इति इच्छारूपायामाशिषि अर्थे एव नाथतेरात्मनेपदं स्याद् याच्ञोपतापैश्वर्यादिषु मा भूदिति नियमार्थमिति अत्र याचनेऽर्थे आत्मनेपदि अनुनाथते इति पदं व्याकरणलक्षणविरुद्ध-त्वात् च्युतसंस्कृतीत्यर्थः । पदार्थान्तरसापेक्षत्वाद् वाक्यमत्र दुष्टमिति चेद् न प्रकृत्यर्थ-मात्रस्योपसंग्रहणेन नियमनात् । सर्पिषो नाथते इत्यस्य सर्पिर्मे भूयाद् इत्याशास्ते इत्यर्थः । "आशिषि नाथः" इति (अष्टा० २।३।५५) सूत्रेण कर्मणि षष्ठ्या अन्वयव्याख्यानात् । "नाथते

[३] अप्रयुक्तं तथाऽऽम्नातमपि कविभिर्नादृतम्, यथा—

यथाऽयं दारुणाचारः सर्वदैव विभाव्यते ।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा ॥ उदा० २०७ ॥

अत्र दैवतशब्दो "दैवतानि पुंसि वा" (अ० को० १।१।९) इति पुंस्याम्नातोऽपि न केन चित् प्रयुज्यते ।

[४] असमर्थं यत् तदर्थं पठ्यते न च तत्राऽस्य शक्तिः, यथा—

तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतः ।
सुरस्रोतस्विनीमेव हन्ति सम्प्रति सादरम् ॥ उदा० २०८ ॥

अत्र हन्तीति गमनार्थम् ।

रात्मनेपदिनः 'आशिषि नाथः' इत्यात्मनेपदविधानम् आशिषि नित्यार्थम्, तेन याच्ञादौ विकल्प इति ज्ञापितं भवति, अत एव 'नाथसे किमु पतिं न भूभृतः' (कि० १३।५८) इत्यादि सिध्यतीति क्रीडोऽनुसम्परिभ्यश्चेति सूत्रे (अष्टा १।३।२१) मैत्रेयः, ज्ञापकसमुच्चये च पुरुषोत्तम-देवेनाप्येतल्लिखितम्, अतः उदाहरणान्तरमत्र बोध्यम्, यथा—'महाराजन् शृणुष्वेदं स्वादितोऽहं विधात्रया । भाग्यवन्तस्य पुंसस्य पिता मरति यौवने' इत्यादि" इति श्रीधरे-णोक्तम् । [illegible] सहृदयहृदयं मुख्यार्थस्वादं वैरस्येन युनक्तीति इदमेवाऽत्र दूषकताबीजं बोध्यम् । नित्यश्चायं दोषः ॥ उदा० २०६ ॥

[३] अप्रयुक्तलक्षणमाह—अप्रयुक्तं तथेत्यादिना । भाषाया प्रयुज्यमानमपि कविभि-रनादरादप्रयुक्तं पदं काव्ये प्रयुक्तं सद् दुष्टं भवतीति तात्पर्यम् तथा तेन रूपेण आम्नातं भाषाप्रयोगानुगामिनि व्याकरणे कोषे वा पठितमपि पदं कविभिरनादृतं सदप्रयुक्तं भवतीति शब्दार्थः । उदाहरति—यथाऽयमित्यादि । यस्मादयं पुरुषः सदैव क्रूरकर्मा दृश्यते तस्मादस्य उपास्यः पिशाचोऽथवा राक्षसोऽस्ति इत्यहं मन्ये इत्यर्थः । तत्र दोषं निर्दिशति—अत्र दैवतेत्यादिना । कविसमयविलङ्घनप्रयोजनानुसन्धानव्यग्रतया मुख्यार्थ-प्रतीतिविलम्बो दूषकताबीजम् इति वदन्ति । वयं तु नेमं दोषं युक्तं मन्यामहे, भाषायां प्रयुज्यमानस्य पदस्य अर्थौचित्यादिकमनुल्लङ्घ्य काव्येऽपि प्रयोगः कर्तुं शक्य एवेत्यस्माकम् मतम् । उदाहरणानि सुभाषितावलौ वल्लभदेवसङ्गृहीतायां सुभाषितरत्न-कोशे विद्याकरसङ्गृहीते च दृश्यानि । अयं दोषो यदि युक्तस्तर्हि नित्य एव स्यात् । श्लेषेऽस्याऽदोषतेति वक्ष्यति ।

[४] असमर्थदोषलक्षणमाह—असमर्थं यदित्यादि । तदर्थकतया व्याकरणकोषादौ पठितस्याऽपि यस्य पदस्य यथाऽर्थे प्रत्यायनशक्तिर्नास्ति तत्रार्थे प्रयुक्तं तत् पदम् असमर्थ-मित्यर्थः । उदाहरति—तीर्थान्तरेष्वित्यादि । अन्येषु तीर्थेषु कृतेन स्नानेन येन-येन सत्कृतम् (= सुकृतम्) समुपार्जितं स एष पुरुषः सम्प्रति सादरं गङ्गां (= गच्छति)

[४] निहतार्थं यद् उभयार्थम् अप्रसिद्धेऽर्थे प्रयुक्तम्, यथा—

यावक-रसार्द्र-पाद-प्रहार-शोणित-कचेन दयितेन ।
मुग्धा साध्वस-तरला विलोक्य परिचुम्बिता सहसा ॥उदा० २१०॥

अत्र शोणितशब्दस्य रुधिरलक्षणेनार्थेन उज्ज्वलीकृतलक्षणोऽर्थो व्यवधीयते ।

इत्यर्थो विवक्षितः । तत्र दुष्टं पदं निर्दिशति—**अत्र हन्तीति** । यद्यपि **'हन हिंसागत्योः'** इति पठ्यते तथापि पदान्तरयोगेन प्रत्ययविशेषयोगेन वा [illegible] [illegible], यथा पद्धतिः जवनम्, जङ्घा, उद्धन इत्यादौ न सर्वत्र; धातुपाठे तु [illegible] हन्तेर्गत्यर्थत्वं पठ्यते, अतो यन्तीत्यादेर्गच्छतीत्यादावर्थे नास्ति शक्तिरिति गच्छतीत्यर्थे हन्तीति पदमसमर्थम् (अशक्तम्), [illegible] कविना प्रयुक्तमिति दुष्टमिति ग्रन्थकृतोऽभिप्रायः । वस्तुतस्तु "[illegible] शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते । तद् [illegible] कम्बोजेष्वेव भाषितो भवति विकार एनमार्याः भाषन्ते शव इति" [illegible] वचनस्वरसात् कुत्र चिद् देशे काले वा [illegible] निरपवादमेवेति निर्णीयते; अतो 'यत् तदर्थं पठ्यते न च तत्राऽस्य तस्मिन् देशे काले वा शक्तिः प्रसिद्धा तदेतादृशं पदं तस्मिन् देशे काले वा काव्ये प्रयुक्तं दुष्टं भवतीत्यर्थः आश्रयणीयः । अत्र अर्थानु-[illegible] [illegible] [illegible] विलम्ब-स्तदित्यन्ये । नित्योऽयं दोष इत्येके, प्रयोग[illegible] विनाऽपि [illegible] जानातं [illegible] इत्यन्ये । ॥उदा० २०९॥

[५] [illegible]—**निहतार्थं** [illegible] । केषाञ्चित् पदाना प्रसिद्धा अप्रसिद्धाश्च अनेके अर्था भवन्ति, तत्र यस्य पदस्य प्रसिद्धतरेण अर्थेन निहतः (सूर्यप्रकाशेन चन्द्रप्रकाश इव अभिभूतः) सन् विवक्षितोऽर्थो न प्रकाशते तत् पदं काव्ये प्रयुक्तं निहतार्थरूपं दुष्टं भवतीत्यर्थः । उदाहरति—[illegible] । नायिकाया अलक्तकरसार्द्रेण पादेन प्रहाराद् आरक्तीभूताः कचा यस्य तेन दयितेन मम [illegible] रुधिरमेवाऽऽगतमस्येति भ्रान्ता भयेन तरला मुग्धा नायिका विलोक्य इयं साध्वसवतीति ज्ञात्वा विलम्बे कृते सति नायिकाया भ्रमस्योच्छेदः स्यात् ततश्चेयं पुनरपि दुराराध्यैव स्यादिति सहसा परिचुम्बितेत्यर्थः । तत्र दोषमुद्भावयति—**अत्र शोणितेत्यादिना** । नानार्थस्य शोणितशब्दस्याऽत्र विवक्षितः उज्ज्वलीकृतत्वरूपः ([illegible]) अर्थः प्रसिद्धतरेण रुधिररूपेणाऽर्थेन झटिति बुद्धिविषयमागच्छता अभिभूयते (आच्छाद्यते), पश्चाद् रुधिररूपस्यार्थस्य अन्वयाभावे ज्ञाते सत्येव विवक्षितोऽर्थः कथञ्चित् प्रतीयते इति प्रसिद्धतरेणार्थेन विवक्षितस्यार्थस्य व्यवधानं भवतीत्यर्थः । पदार्थोपस्थितिविलम्बेन मुख्यार्थबोधविलम्बो दूषकताबीजमत्र । अस्य श्लेषादौ अदोषतां वक्ष्यतीत्यनित्योऽयं दोषः ॥उदा० २१०॥

[६] अनुचितार्थं यथा—

तपस्विभिर् या सुचिरेण लभ्यते प्रयत्नतः सत्त्रिभिरिष्यते च या ।
प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः
॥उदा० २११॥

अत्र पशुपदं कातरतामभिव्यनक्तीति अनुचितार्थम् ।

[७] निरर्थकं पादपूरणमात्रप्रयोजनं चादि पदम्. यथा—

उत्फुल्ल-कमल-केसर-पराग-गौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥उदा० २१२॥

अत्र हि-शब्दः ।

[८] अवाचकं यथा—

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषा दरः ॥ उ० २१३ ॥

अत्र जन्तुपदमदातर्यर्थे विवक्षितं तत्र च नाऽभिधायकम् ।

---

[६] अनुचितार्थमिति नामैवाऽन्वर्थं सत् लक्षणरूपमिति न पृथग् लक्षणं प्रतिपाद्यमिति नाम गृहीत्वा उदाहरति—**अनुचितार्थं यथेति** । यद्यप्यनौचित्यं पदस्य बोध्यम् । या गतिः तपस्विभिः सुचिरेण लभ्यते, या च सत्ररूपं सोमयागविशेषं कुर्वाणैः ब्राह्मणैः महता यत्नेन प्राप्तुमिष्यते तां गतिं युद्धरूपेऽश्वमेधे हतत्वात् पशुतामुपागता अतः एव यशस्विनो वीरा आशु प्रयान्तीत्यर्थः । अत्र वर्णनीयशौर्यतिरस्कारककातरत्वरूपार्थ-व्यञ्जकार्थकमिति पशुपदमिति तदनुचितार्थमित्याह—**अत्र पशुपदमित्यादिना** । विवक्षितार्थतिरस्कारकार्थोपस्थितिर्दूषकताबीजम्. अतोऽयं नित्यो दोषः । विरुद्धमतिकृत पदान्तरसापेक्षत्वात् ततोऽस्य भेदः ॥उदा० २११॥

[७] निरर्थकं लक्षयति—**निरर्थकमित्यादिना** । पक्षान्तरव्यावर्तनाद्यर्थरहितं तु-हि-च-स्म-ह-वै-प्रभृति पदं केवलं वृत्तपादपूरणाय प्रयुक्तं दुष्टं भवतीत्यर्थः । उदाहरति—**उत्फुल्लेत्यादि** । नागानन्दे पद्यमिदम् (१।१३) उत्फुल्लस्य कमलस्य केसराणां पराग इव गौरी द्युतिर्यस्यास्तथाभूते हे भगवति गौरि, युष्मत्प्रसादेन मम अभीष्टं प्रकृष्टरूपतया सिद्धयतु इत्यर्थः । अत्र 'हि' इति पदं न हेत्वाद्यर्थकं न वा "स एव हि महादेवः" इत्यादाविव वाक्यालङ्कारार्थमिति तदत्र दुष्टमित्याह—**अत्र हि-शब्द इति** । निरर्थक पदं प्रयुञ्जानस्य वचसि आदराभावः, तादृशपदप्रयोगप्रयोजनानुसन्धानव्यग्रतया मुख्यार्थ-प्रतीतिविलम्बो वा दूषकताबीजम् । नित्यश्चायं दोषः ॥ उदा० २१२ ॥

[८] अवाचकमिति नामैवान्वर्थं सन् लक्षणरूपमिति न पृथग् लक्षणं प्रतिपाद्यमिति नाम गृहीत्वा उदाहरति—**अवाचकं यथेति** । विवक्षितस्यार्थस्य शक्त्या लक्षणया वाऽपि

यत् च उपसर्गाद् अर्थान्तरगतम्, यथा—

जङ्घाकाण्डोरुनालो नख-किरण-लसत्-केसराली-करालः
प्रत्यग्रालक्तकाभा-प्रसर-किसलयो मञ्जु-मञ्जीर-भृङ्गः ।
भर्तुर् नृत्तानुकारे जयति निज-तनु-स्वच्छ-लावण्य-वापी-
सम्भूताम्भोज-शोभां विदधदभिनवो दण्डपादो भवान्याः ॥ उदा० २१५ ॥

अत्र दधदित्यर्थे विदधदिति ।

[९] अश्लीलं त्रिधेति व्रीडा-जुगुप्सा-मङ्गलव्यञ्जकत्वात्, यथा—

नाऽऽसीदिति कथमुर्वशीदर्शनं तत्कालमिति चेत् कथ न भवतीति । स्वप्ने उर्वशी दृष्टवतः पुरूरवस उक्तिरियमिति चन्द्रिकाकारादयः । विक्रमोर्वशीये तु नेदं पद्यमिदानीमुपलभ्यते । यत्रेति च न रात्रिवाचकं किन्तु कालमात्रस्यैव वाचकमेव, तथाऽपि विधेयप्राधान्यविवक्षया तस्य कालस्यैव सा इति परामर्शः । अत्र दिनमिति नाऽऽसीदित्यनेन लब्धस्य तमोमयत्वस्य वैपरीत्य प्रतिपादयितुमुपात्तमिति तत् प्रकाशमयमित्यर्थकं विवक्षितम्, किन्तु दिनरूपे धर्मिणि योगमनपेक्ष्यैव रूढ्या दिनपदं शक्तं न तु प्रकाशमयत्वधर्मविशिष्टरूपेणेति दिनपदमत्र विवक्षितार्थाऽवाचकं इत्यभिप्रायेणाह—अत्रदिनमित्यादि ॥ उदा० २१४ ॥

उपसर्गेण धात्वर्थस्यान्यत्र नीतेऽपि शक्तिभ्रमात् कवयो निरुपसर्गधात्वर्थे सोपसर्गं धातुं प्रयुञ्जते, तच्च तत्राऽशक्तं विवक्षितार्थावाचक भवति, तत् परिहरणीयमित्यभिप्रायेणाह—यच्चेत्यादि । जङ्घाकाण्डरूपो महान् नालो यस्य सः, पादाङ्गुलिनखकिरणा एव केसरास्तेषामाल्या तुङ्गः, अभिनवस्य लाक्षारसस्य आभायाः प्रसर एव किसलयो यस्य सः, मञ्जुर्मञ्जीर एव भृङ्गो यस्य स भवान्या इदम्प्रथमतया नृत्ते प्रवृत्तः कोमलो भर्तुर्महादेवस्य ताण्डवनृत्याश्रिताङ्गविक्षेपरूपस्य नृत्तस्यानुकारे करणीये प्रसह्य ऊर्ध्वीकृतः दण्डरूपः पादः निजतनुरूपा या स्वच्छस्य लावण्यरूपस्य सलिलस्य वापी तत्र सम्भूतस्य कमलस्य शोभां विशेषेण धारयन् सन् जयति (उत्कर्षेण वर्तते) इत्यर्थो विवक्षितः । अत्र दधदित्यर्थे प्रतिपादनीये प्रयुक्तं विदधदिति पदम् उपसर्गसंसर्गात् करणरूपेऽर्थान्तरे गतं तद्विवक्षितार्थस्याऽवाचकमित्यभिप्रायेणाह—अत्र दधदित्यादि ॥ उदा० २१५ ॥

[९] अश्लीलमिति नामैवाऽन्वर्थं सत् लक्षणरूपमिति न पृथग् लक्षणं प्रतिपाद्यमिति नाम गृहीत्वा तत्प्रकारान् प्रदर्शयति—अश्लीलं त्रिधेत्यादिना । श्रीर्यस्यास्ति तत् श्रीलम् सिध्मादिभ्यश्चेति लच् (अष्टा ५।२।९७), कपिरकादिपाठाल्लत्वम् (अ० ८।२। १८ वा०) इति श्रीधरः । अन्येतु सम्यग्वशीकरणसम्पत्तिः श्रीः तां लातीति श्रीलम्, श्रीलमेव श्लीलम् पृषोदरादित्वात् न श्लीलम् अश्लीलमित्यन्ये । अश्लीलं व्रीडाजुगुप्साऽमङ्गलव्यञ्जकत्वात् कान्त्यभाववद्, ग्राम्यन्तु स्वत एव शोभारहितं नाऽसभ्यार्थव्यञ्जकत्वेनेत्यनयोर्भेदः । अश्लीलं त्रिविधमपि पुनः प्रत्येकं त्रिविधं सम्भवति—क्वचिद् अविवक्षितस्य प्रकृतेऽनन्वयिनोऽपि नानार्थकशब्दबलादागतस्याऽर्थस्य व्रीडाद्यालम्बन-

[क] साधनं सुमहद् यस्य यन्नान्यस्य विलोक्यते ।
तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम् ॥उदा० २१६॥

[ख] लीलातामरसाहतोऽन्यवनिता-निःशङ्क-दष्टाधरः
कश्चित् केसर-दूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तस्य सा
भ्रान्त्या धूर्ततयाऽथवा नतिमृते तेनाऽनिशं चुम्बिता ॥उदा० २१७॥

[ग] मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्
घनरुचिरकलापो निःसपत्नोऽस्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्हः ॥उदा० २१८॥

एषु साधन-वायु-विनाश-शब्दाः व्रीडादिव्यञ्जकाः ।

व्रीडादिव्यञ्जकत्वात्, क्वचिदविवक्षितस्य प्रकृतेऽनन्वयिनोऽपि व्रीडादिव्यञ्जकस्य अर्थस्य स्मारकत्वात्, क्वचिद् विवक्षितस्यैवार्थस्य व्रीडाद्यालम्बनत्वादिति । [क] तत्र अविवक्षित प्रकृतेऽनन्वयिनमपि व्रीडाव्यञ्जकमर्थं नानार्थकत्वाद् बोधयद् अश्लीलं पदमुदाहरति—साधनं सुमहदित्यादिना । यद् अन्यस्य न विलोक्यते तादृशं सुमहत् साधनं (सैन्यम्) यस्य तस्य बुद्धिमतोऽस्य राज्ञः कोपेन कुटिलीकृतां भ्रुवं कोऽन्यः सहेतेत्यर्थः' । अत्र काऽन्येति नागोजिकल्पितः पाठो द्वितीयोऽर्थश्च असङ्गत एव वाक्यस्यैवाऽश्लीलत्वप्रसङ्गेन प्रकरणविरोधात् । अत्र साधनमितिपदं [illegible] पुरुषध्वजं बोधयतीति व्रीडाव्यञ्जकत्वादश्लीलम् । [ख] अविवक्षितस्य प्रकृतेऽनन्वयिनोऽपि जुगुप्साव्यञ्जकस्यार्थस्य स्मारकमश्लीलं पदमुदाहरति—लीलातामरसेत्यादौ । अन्यवनितया निश्शङ्कं दष्टोऽधरो यस्य स इति स्वकीयया नायिकया लीलाकमलेन आहतः कश्चिद् विलासी कमलकेसरपरागदूषितेक्षण इव नेत्रे निमील्य स्थितोऽभूत् ततो नायकधूर्ततारहस्यमजानाना मूढा सा नायिका कुड्मलाकारतां नीतेन मुखेन नेत्रपीडोपशमाय तस्य नेत्रयोः फूत्कारं ददती स्थिता, अथ तेन नायकेन अस्याः कोपोऽपगत इति भ्रान्त्या कोपेऽगतेऽपि मुग्धामिमां चुम्बेयमिति धूर्ततया वा नतिं विनाऽपि सा बहुकालं चुम्बितेत्यर्थः । अत्र वायुमिति पदम् अविवक्षितस्य प्रकृतेऽनन्वयिनोऽपि जुगुप्साव्यञ्जकस्य अपानवायोः स्मारकमित्यश्लीलं बोध्यम् । [ग] विवक्षितस्यैव अर्थस्य अमङ्गलव्यञ्जकत्वेनाऽश्लीलं पदमुदाहरति—मृदुपवनेत्यादौ । मृदुना पवनेन विविधं विभक्तोऽस्य मयूरस्य निबिडो मनोहरश्च कलापो मम प्रियाया विनाशाद् विजेतृप्रतिस्पर्धिरहितो जातः, सुकेश्या मत्प्रियायाः सुरतविगलितबन्धने विचित्रकुसुमगर्भकादियुक्ते केशपाशे सति तु एषोऽस्य मयूरस्य

[१०] सन्दिग्धं यथा—

आलिङ्गितस् तत्र भवान् साम्पराये जयश्रिया ।
आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥उदा० २१९॥

अत्र वन्द्यामिति किं हठहृतमहिलायां किं वा नमस्यामिति सन्देहः ।

[११] अप्रतीतं यत् केवले शास्त्रे प्रसिद्धम्, यथा—

सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः ।
विधीयमानमप्येतन् न भवेत् कर्म बन्धनम् ॥उदा० २२०॥

बर्हं कं हरेत् (कस्य मनो हरेत्) ? इत्यर्थः; अस्य बर्हस्य तिरस्कारकेण मत्प्रियायाः केश-पाशेनैव सर्वदा मनसो हरणात् तस्मिन् सति एष बर्हः कस्याऽपि मनोहर्तुम् अशक्तः, इदानीं तु तदभावादयमपि मनो हरिष्यति केषाञ्चिदिति भावः । "बर्हं पिच्छदलेऽस्त्रि-याम्" इति मेदिनिकरकोषाद् बर्हस्य पुंस्त्वमपि साध्वेव; वाक्यभेदात् शब्दभेदाच्च न पौनरुक्त्यदोषोऽपि । अतिशक्वर्यां छन्दसि मालिनी वृत्तम् । अत्र विनाशादिति पदस्य विवक्षितस्यैव मरणरूपस्यार्थस्य अमङ्गलव्यञ्जकत्वाद् विनाशादिति पदमत्र अश्लीलं बोध्यम् । त्रिष्वपि उदाहरणेषु दुष्टपदानां निर्देशं सहेतुकं करोति—**एषु साधनेत्यादिना** । अत्र [illegible] दूषकताबीजम् । अतएव शमकथादौ नास्य दोषतेत्यनित्योऽयं दोषः ॥उदा० २१६-१८॥

[१०] सन्दिग्धमिति नामैवाऽन्वर्थं सत् लक्षणरूपमिति न लक्षणस्य पृथक् प्रतिपादन-मावश्यकमिति नाम गृहीत्वा उदाहरति—**सन्दिग्धं यथेति** । 'अर्थः पदम्' इति (शु० य० प्रा० ३।२) इति वस्तुस्थितिरिति यस्य पदस्य अर्थे सन्देहस्तत् पदस्वरूपमेव सन्दिग्धं भवति तादृशं सन्दिग्धं पदं दुष्टं भवतीति ज्ञेयम् । **श्लोकस्य तु**—युद्धे जयश्रिया आलिङ्गितः तत्र भवान् (पूज्यः) त्वम् आशीर्वादपरम्परां श्रुत्वा हठहृतराजपत्न्यां कृपां कुरु इत्यर्थो विवक्षितः । वृत्ते महिलाशब्दो महिषीपरः, 'महिषी महिला समा' इति विश्वकोषात् । दोषमुद्भावयति—**अत्र वन्द्यामित्यादिना** । अत्र वन्द्यामिति पदं हठहृतराजपत्न्यामित्यर्थकं सप्तम्यन्तं किं वा नमस्यामित्यर्थकं द्वितीयान्तमिति सन्देह इति वन्द्यामिति पदं सन्दिग्ध-मिति मम्मटस्य अभिप्रायः । वस्तुतस्तु आशीःपरम्परायाः वन्द्यात्वं न सुसङ्गतम्, कृपापा-त्रस्य चाऽऽकाङ्क्षा इति 'आशीःपरम्परां कर्णे कृत्वा हठहृतराजपत्न्यां कृपां कुरु' इत्येवार्थः सुबोध इति वन्द्यामिति पदं हठहृतराजपत्न्यामित्यर्थकं सप्तम्यन्तमिति निश्चयात् नेदं सन्दिग्धं पदम् । 'आशीः परम्परां कर्णे कृत्वा वन्द्यां कृपां कुरु' इति तु युक्ततरः पाठः । सन्दिग्धोदाहरणं तु भोजेनोक्तम्—'नीलो लोहितनीर्तिर्यो दहत्यन्ते जगत्त्रयम् । स एष हि महादेवस्त्रिषु लोकेषु पूज्यते' इति सूक्तम्, अत्र वह्निरर्कः शिवो वेति न निश्चीयते इति स एवाह । सन्दिग्धे दूषकताबीजन्तु अर्थानिश्चयेन आस्वादानुदयः । अस्य व्याजस्तुतिपर्य-वसायित्वादौ सति तु गुणत्वादनित्योऽयं दोषः ॥उदा० २१९॥

अत्राऽऽशयशब्दो वासनापर्यायो योगशास्त्रादावेव प्रयुक्तः।

[१२] ग्राम्यं यत् केवले लोके स्थितम्, यथा—

राकाविभावरीकान्तसंक्रान्तद्युति ते मुखम्।
तपनीयशिलाशोभा कटिश्च हरते मनः ॥उदा० २२१॥

अत्र कटिरिति।

[१३] नेयार्थं 'काश्चिन्नैव त्वशक्तितः' (न० वा० ३।१।८) इति यद् निषिद्धं लाक्षणिकम्, यथा—

---

[११] अप्रतीतलक्षणमाह—**अप्रतीतं यदित्यादिना**। केवले शास्त्रे प्रसिद्धं पदम् (लोके अप्रसिद्धम्) अप्रतीतमर्थमिति काव्ये प्रयुक्तं दुष्टं भवतीति भावः। काव्यास्वादका हि प्रायो नागरका लौकिकाः शास्त्रविदस्तु न इति शास्त्रमात्रप्रसिद्धात् पदात् तेषामर्थानुपस्थितिरित्यस्य दोषत्वम्। उदाहरति—सम्यग्ज्ञानेत्यादिना। **सम्यग्ज्ञानं** विवेकख्यातिः प्रकृतिपुरुषविवेकज्ञानमिति यावत्, तदेव महाज्योतिस्तेन नाशिता **आशयाः** चित्तभूमौ शयाना वासना (=संस्काराः) यस्य तस्य भावं प्राप्तस्य पुरुषस्य मुक्तस्वभावात् क्रियमाणमपि एतत् कर्म बन्धनं न भवेदित्यर्थः। अत्र दोषमुद्घाटयति—**अत्राऽऽशयेत्यादिना**। आदिशब्दात् पुराणादिग्रहणम्। तच्छास्त्रमात्रप्रसिद्धत्वादपि **ऊह्यमिति** आदिशब्देन व्यज्यते इति कश्चित्। मम्मटस्य तु शास्त्रमात्रप्रसिद्धत्वमेवाभिप्रेतम्, न शास्त्रविशेषमात्रप्रसिद्धत्वम्। अत्र लौकिकं काव्यपाठकं प्रति अप्रतीतत्वमिति दूषकताबीजम् प्रतिपाद्यप्रतिपादकयोर्ज्ञत्वे स्वयं वाऽपि परामर्शेऽप्य गुण इतिवक्ष्यतीति अनित्योऽयं दोषः ॥ उदा० २२० ॥

[१२] ग्राम्यलक्षणमाह—**ग्राम्यं यदित्यादिना**। यत् पदं केवलेन अविदग्धेन जनेन प्रयुज्यमानम् (विदग्धैरप्रयुज्यमानम्) तत् पदं ग्राम्यं नाम दुष्टं भवतीति भावः। विदग्धेषु प्रायो नागरकेषु अप्रसिद्धं पदमिति तद्विरुद्धत्वेन ग्राम्यत्वेन अस्य दोषस्य नामकरणम् पारिभाषिकम् न तु ग्रामे भवं ग्राम्यमिति यौगिकम्। यदा तु काव्यस्य सर्वजनीनता स्वीक्रियते तदाऽयं दोषो नैव स्वीकार्यः। उदाहरति—**राकाविभावरीत्यादिना**। पूर्णसुख **तपनीयस्य** सुवर्णस्य शिलायाः शोभा इव शोभा यस्याः सा ते **कटिः** नितम्बश्च मनो हरतीत्यर्थः। 'कटाच्छ्रोणिवचने' (अष्टा० ४।१।४१, ग० सू०) इति ङीपन्तः कटीशब्दोऽत्र न्याय्यः। अत्र नितम्बार्थकं कटिरिति पदं विदग्धैरप्रयुज्यमानमिति ग्राम्यमित्यभिप्रेत्य आह—**अत्र कटिरितीति**। वस्तुतस्तु वाक्यमेवेदमविदग्धस्येव प्रतिभाति। विदग्धैरप्रयोज्यत्वमत्र दूषकताबीजम्। अधमप्रकृत्युक्तिषु ग्राम्यो गुण इति वक्ष्यतीति अनित्योऽयं दोषः ॥ उदा० २२१ ॥

[१३] नेयार्थलक्षणमाह—**नेयार्थं काश्चिदित्यादिना**। वाक्यार्थविचारकुशलेन कुमा-

> शरत्काल-समुल्लासि-पूर्णिमा-शर्वरी-प्रियम् ।
> करोति ते मुखं तन्वि चपेटापातनातिथिम् ॥ उदा० २०२ ॥

अत्र चपेटापातनेन निर्जितत्वं लक्ष्यते ।

अथ समासगतमेव दुष्टमिति सम्बन्धः । अन्यत् केवलं समासगतं च ।

रिल्लभट्टेन 'काश्चिन्नैव स्वशक्तितः' इति रूढिप्रयोजनान्यतरशून्यतया विवक्षितार्थबोधनाऽसमर्था या परैरभिमता लक्षणा निषिद्धा तादृशीं लक्षणामादाय प्रयुक्तं लाक्षणिकं पदं दुष्टं भवतीत्यर्थः । एवञ्च रूढिप्रयोजनान्यतरशून्यलक्षणोपजीवि पदं नेयार्थमिति फलितोऽर्थः । **नेयो** न्यायं विना कवेः स्वेच्छया बलात् प्रापणीयः (कल्पनीयः) अर्थो यस्य तन्नेयार्थमिति नाम निर्वचनम् । क्वचित्तु वृत्तौ "**निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् । क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव स्वशक्तितः**" इति पूर्णः श्लोकः पठ्यते । यद्यप्यपेक्षितार्थमात्रप्रतिपादनशीलस्य मम्मटस्य स्वभावेन विरुद्धोऽयं श्लोकः तथाऽपि तदर्थोऽत्र लिख्यते बुद्धिवृद्धये—इह [illegible] अनादिकालप्रवृत्तत्वेन निरूढाः, यथा—शुक्लादिषु (शुक्लः पट इत्यादौ), कर्मणि कुशल इत्यादौ च; काश्चित् प्रयोजनादिवशाद् आगताद् अर्थबोधनसामर्थ्याद् यथा अभिधानानि क्रियन्ते तथा एतर्हि क्रियन्ते, यथा—[illegible] चक्रवाक इति, गङ्गायां घोष इत्यादि च; काश्चनतु [illegible] नैव क्रियन्ते, यथा—[illegible] गुणवचनेष्वपि शुक्लादिषु इव लक्षणाभावाद् गन्ध [illegible] प्रयोगो न भवति । कथं पुनरिहाऽविशिष्टे सम्बन्धे सति न लक्षणेति ? तत्रोक्तम् [illegible] यथा भवता समाने गुणशब्दत्वे शुक्लादीनां गुणोपसर्जनद्रव्यवचनत्वं न रूपादीनां तथा मम लक्षणेत्यर्थः । उदाहरति—शरत्कालेत्यादिना । हे तन्वि, तव मुखं शरत्काले समुल्लासिनं पूर्णिमाशर्वरीप्रियं [illegible] **चपेटापातनस्य** करतलप्रहारस्य **अतिथिं** पात्रं करोतीत्यर्थः । अत्र मुखस्य करतलस्याऽभावेन चन्द्रे [illegible] च चपेटापातनपदेन निर्जितत्वं [illegible] किन्तु [illegible] लक्षणाऽनुपपन्नेति चपेटापातनपदं [illegible]—**अत्र चपेटे**त्यादि । [illegible] दूषकताबीजम् । नित्यश्चायं दोषः ॥ उदा० २०२ ॥

'अथ भवेत् क्लिष्टम्' (सू० ७४) इत्यादिकारिकांशस्याऽन्वये भ्रमो माभूद् इति तं स्फुटीकरोति—**अथ समासगतमेवे**त्यादिना । अथ क्लिष्टम्, अविमृष्टविधेयांशम्, विरुद्धमतिकृच्च दुष्टं पदं समासगतमेव भवति इत्यन्वयो भवतीत्यर्थः तादृशे सम्बन्धे सति [illegible]—**अन्यदि**त्यादि । श्रुतिकटुप्रभृति **नेयार्थं** यावद् दुष्टं पदं तु अखण्डं समासगतं च भवतीत्यर्थः ।

[१४] क्लिष्टं यतोऽर्थप्रतिपत्तिर्व्यवहिता, यथा—

अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः ।
सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम् ॥ उदा० २२३ ॥

अत्र अत्रिलोचनसम्भूतस्य चन्द्रस्य ज्योतिरुद्गमेन भासिभिः कुमुदैरित्यर्थः ।

[१५] अविमृष्टः प्राधान्येन अनिर्दिष्टो विधेयांशो यत्र तत्, यथा—

मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत् प्रयासः ॥ उदा० २२४ ॥

---

[१४] क्लिष्टलक्षणमाह—**क्लिष्टं यत** इत्यादिना । यस्मात् समस्तात् पदाद् विशेष्येऽरूढाद् अर्थप्रतीतिः (विशेष्यकल्पनां कृत्वैव भवतीति अर्थप्रतीतिर्विशेष्यकल्पनया व्यवहिता सती) विलम्बिता भवति तत् समस्तं पदं क्लिष्टं भवतीत्यर्थः । क्लिष्टं समासपदम् उदाहरन्ति—**अत्रिलोचने**त्यादि । हे भूपाल, तव चरित्रम् (यशः) अत्रेर्लोचनात् सम्भूतस्य ज्योतिषः (चन्द्रस्य) उद्गमेन भासनशीलैः (कुमुदैः) सदृशं सद् अतीव शोभते इत्यर्थः । अत्र विवक्षितार्थप्रतीतिः चन्द्रस्य कुमुदानां च कल्पनायां कृतायां सत्यामेव विलम्बेन भवतीति 'अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः' इति समस्तं पदं क्लिष्टमित्यभिप्रायेणाह—**अत्र अत्रिलोचने**त्यादि । विवक्षितविशिष्टार्थप्रतीतिविलम्बो दूषकताबीजम् । समस्तपदरूपविशेषणेनैव विशेष्यस्य प्रतिपत्तौ सत्यां तु नैवाऽयं दोषः, यथा—'निधानगर्भामिव सागराम्बराम्' (रघु० ३।९) [दृश्यम्—का० अ० सू० वृ० ५।१।१०] ॥ उदा० २२३ ॥

[१५] अविमृष्टविधेयांशमिति नामैवाऽन्वर्थं लक्षणमस्ति अतो न पृथग् लक्षणं प्रतिपादनीयमिति नाम्न एव योगार्थं स्फुटयन्नाह—**अविमृष्ट** इत्यादिना । विधेयाविमर्श इत्यप्यस्यैव दोषस्य नाम किन्तु तद् न पददोषरूपमिति न युक्तम् । उद्देश्यविधेयलक्षणे च कुमारिलोक्ते यथा—"यच्छब्दयोगः प्राथम्यं सिद्धत्वं चाऽप्यनूद्यता । तच्छब्दयोग औत्तर्यं साध्यत्वं च विधेयता" इति, यः क्रियावान् न पण्डितः, अदेङ् गुणः, घटः कार्यः इत्यादि उदाहरणम् । एवं च उद्देश्यविधेययोः पृथक्पदाभ्यां प्रतिपादनमावश्यकम्, न समस्तेन पदेन तयोः प्रतिपादनं कार्यम् । उद्देश्यस्य विधेयस्य च एकसमासकुक्षौ पातनाद् विधेयप्राधान्यं न प्रतीयते इति समासरूपमेवेदं दुष्टं पदं भवति । पश्चान्निर्दिष्टविधेयकं बहुव्रीहिमविमृष्टविधेयांशमुदाहरन्ति—**मूर्ध्नामुद्वृत्ते**त्यादिना । हनुमन्नाटकेऽष्टमेऽङ्के रावणस्योक्तिरियम्—(महादेवस्याग्रतः नवनवगलकर्तने) **उद्वृत्त**

अत्र मिथ्यामहिमत्वं नाऽनुवाद्यम्, अपि तु विधेयम् ।

यथा वा—

> स्रस्तां नितम्बादवरोपयन्ती पुनः पुनः केसरदामकाञ्चीम् ।
> न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥उदा० २०५

अत्र द्वितीयत्वमात्रमुत्प्रेक्ष्यम् । मौर्वीं द्वितीयामिति युक्तः पाठः ।

निर्मर्यादं यथा स्यात् तथा कर्तनेन अविरलं गलाद् गलन्ती या रक्तस्य **संसक्ता**ऽविच्छिन्ना ईशाङ्घ्र्योर्लग्ना या धारा तया **धौतौ यौ** ईशाङ्घ्री तत्प्रसादेन **उपनतः** प्राप्तो यो जयस्तेन जगति जातो मिथ्या महिमा येषां तेषां मूर्ध्नाम्, कैलासस्य **उल्लासने** उत्तोलने या इच्छा तस्याः **व्यतिकरः** संयोगस्तस्य **पिशुनानां** सूचकानाम् **उत्सर्पिणा** प्रसृमरेण दर्पेण उद्धुरत्वम् एषां भुजानां च किम् एतदेव फलं यद् लङ्कानगरीरक्षणेऽपि **प्रयासो** दुष्करताजन्यो यत्नातिशयः ? इत्यर्थः । उद्वृत्तकृत्तेत्यादि मूर्ध्नां विशेषणम्, तादृशोत्कटक्लेशसहिष्णुत्वेन लोकोत्तरशौर्यस्य व्यक्तेः, दोष्णां विशेषणत्वे तु स्वमस्तकच्छेदे पौरुषस्याऽनभिव्यक्तेः । अत्र दोषं प्रदर्शयति—**अत्र मिथ्यामहिमत्व**मित्यादिना । यदि अत्र रावणस्य मूर्ध्नां मिथ्यामहिमत्वम् उद्देश्यतया (अनुवाद्यतया) पूर्वमेव सिद्धं स्यात् तर्हि इदानीं नगरीलक्षणे प्रयासोऽनुचितो न भवेदिति तदनौचित्यप्रतिपादनमसङ्गतं स्यात्, अनौचित्यप्रतिपादनसङ्गतये च पूर्वं मूर्ध्नाम् दुष्करेण कर्मणा यद् महिमवत्त्वमासीद् इदानीं नगरीरक्षणेऽपि जातेन प्रयासेन तद् मिथ्या जातम् इति वक्तव्यम्, तथैव च विवक्षितं कविनेति मिथ्यात्वं विधेयं प्राधान्येन निर्देश्यम्, किन्तु प्रमादाद् विधेयस्य न पृथग् निर्देशः कृतः, बहुव्रीहिसमासकुक्षौ विधेयं निक्षिप्तम्; तत्र चैकार्थीभावस्वीकारेण इतरपदार्थप्राधान्येनाऽन्वितस्य मिथ्यात्वरूपस्य स्वार्थस्य उपस्थित्या अप्राधान्याद् विधेयत्वस्याऽनिर्देश इति उद्वृत्तकृत्तेत्यादि समासपदमविमृष्टविधेयांशमित्यभिप्रायः ॥ उदा० २०४ ॥

कर्मधारयसमासपदम् अविमृष्टविधेयांशमुदाहरति—**स्रस्ता**मित्यादिना । कुमारसम्भवस्य तृतीये सर्गे पार्वत्या वर्णनमिदम् (३।५५) । नितम्बात् स्रस्ताम् 'अत्र स्थापिता इयं प्रथममौर्वीच्छेदकठिनकार्यस्य महादेवविजयस्य समये सुलभा स्याद्' इति स्थानविदा मदनेन न्यासीकृतां कार्मुकस्य द्वितीयमौर्वीमिव बकुलमालाकाञ्चीं पुनः पुनः स्वस्थाने स्थापयन्ती स्थावरराजकन्या अदृश्यतेत्यन्वयः । अत्र मौर्व्या अनुत्प्रेक्षणीयत्वात् तस्या द्वितीयत्वमेव प्राधान्येन उत्प्रेक्ष्य विधेयम्, किन्तु कर्मधारये तत्पुरुषे उत्तरपदार्थस्य प्राधान्याद् द्वितीयत्वम् अप्रधानं जातमिति न द्वितीयत्वस्य विधेयता प्राधान्येन निर्दिष्टेति द्वितीयमौर्वीमिति पदमविमृष्टविधेयांशमित्यभिप्रेत्याह—**अत्र द्वितीयत्वे**त्यादि । दोषपरिहाराय पाठान्तरं निर्दिशति—**मौर्वीं द्वितीया**मिति । न चास्मिन् पाठेऽपि अप्राप्तगुरुभावान्तलघु नाम **हतवृत्तं** स्यात्; यः खलु पादान्ते लघोरपि गुरुभाव

यथा वा--

वपुर् विरूपाक्षमलक्ष्यजन्मना दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने
॥ उदा० २२६ ॥

अत्र अलक्षिता जनिर् इति वाच्यम् ।

उक्तः न यतौ कश्चन दीर्घीभावो भवतीति [illegible] व्यवस्थापितो [illegible]-पादविषय एव [illegible] स्वीक्रियते, [illegible] प्रथम-[illegible] क्वचिद् वसन्ततिलकादौ [illegible] स्वीक्रियते न सर्वत्र. ह्रस्वेषु छन्दस्सु वृत्तानां प्रथमतृतीयपादयोर्यतेरभावादिति केचिद्मन्यन्ते. [illegible]-[illegible] वृत्तमध्ये यतेरसम्मतत्वेऽपि अन्येषां मते सर्वेषु छन्दस्सु वृत्तानां पादान्तेषु यतेः सम्मतत्वेन न केवलं वसन्ततिलकादौ किन्तु लघुतरछन्दोवृत्तेष्वपि [illegible]-लघोर्गुरुभावः सुश्रवश्चेद् भवत्येव; अत एव [illegible] कालिदासेन 'यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे । भास्वन्ति रत्नानि [illegible] पृथूपदिष्टां दुदुहुर्धरित्रीम्" इत्यादौ प्रथमतृतीयपादान्तगतस्यापि लघोर्गुरुभाव [illegible]-जातिष्वपि बहुशः स्वीकृतः; [illegible] क्षेमेन्द्रेणाऽपि स्वकृते--"तौ जन्मगूढौ चरणेन यस्य कष्टौ निविष्टौ हृदि कामकोपौ । तं दुस्सहास्ता ज्वलदिन्द्रवज्र-पातोपमाः क्लेशदशा विशन्ति" इति इन्द्रवज्रोदाहरणे प्रथमतृतीयपादान्तगतयोरपि लघ्वोर्गुरुभावः स्वीकृतः. "[illegible] श्रव्यतैव गरीयसी" (सुवृत्त० २।५) इति सिद्धान्तितम् । अतएव मम्मटनिर्दिष्टः पाठभेदो युक्त एव ॥उदा० २२५॥

बहुव्रीहिसमासमेव [illegible] अविमृष्टविधेयांशं शिष्यधीवैशद्यायोदाहरन्ति--वपुर्विरूपाक्षमित्यादिना । तपस्यन्तीं पार्वतीं [illegible] महादेव-स्योक्तिरियम् (कु० स० ५।७२) । हे बालमृगाक्षि पार्वति, त्रिलोचनस्य वपुः विरूपाक्षम् अस्ति, अज्ञातजन्मना अस्ति, धनमपि दिगम्बरत्वेनैव (नास्तीति) ज्ञापितमस्ति इति [illegible]-कुल-[illegible] समस्तं गुणकदम्बकं यद् वरेषु मृग्यते तद् व्यस्तम् (एकैकम्) अपि किं त्रिलोचने अस्ति ? अपि तु नास्त्येवेत्यर्थः । अत्र अलक्ष्यजन्मतेति पदेन जन्मनोऽलक्ष्य-त्वमेव विधेयम्, तच्च चाऽत्र प्राधान्येन न निर्दिष्टम्, किन्तु भावरूपे तद्धितार्थे गुणीभूते अलक्ष्यजन्मलक्षणे अन्यपदार्थे गुणीभूतं कृत्वा निर्दिष्टमिति अलक्ष्यजन्मेति समस्तं पदम-विमृष्टविधेयांशमित्याशयः । अत्र दोषपरिहाराय पाठभेदं निर्दिशन्ति-अलक्षिता जनिर् इति वाच्यमिति ॥उदा० २२६॥

नञ्-समासम् अविमृष्टविधेयांशमुदाहरन्ति--आनन्दसिन्धुरित्यादिना । भवत आनन्दसागरः भवतोऽतिचपलस्य चेतसो बन्धनस्य एकमेव स्थानं च या भवत्प्रिया पुरा सर्व-

यथा वा—

आनन्दसिन्धुरतिचापलशालिचित्त-
सन्दाननैकसदनं क्षणमप्यमुक्ता ।
या सर्वदैव भवता तदुदन्तचिन्ता तान्ति
तनोति तव सम्प्रति धिग् धिगस्मान् ॥उदा० २२७॥

अत्र न मुक्तेति निषेधो विधेयः; यथा—'**नवजलधरः सन्नद्धोऽयं न दृप्त-निशाचरः, सुरधनुरिदं दूराकृष्टं न तस्य शरासनम् । अयमपि पटुर् धारासारं न बाणपरम्परा कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी**' (उदा० २२८) इत्यत्र; न तु अमुक्तानुवादेन अन्यद् अत्र किञ्चिद् विहितम्, यथा—'**जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः । अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्**' (उदा० २२९) इत्यत्र अत्रस्तत्वाद्यनुवादेन आत्मनो गोपनादि ।

दैव क्षणमपि भवता अमुक्ता तस्या वियुक्ताया उदन्तस्य (=वृत्तान्तस्य) चिन्ता एतर्हि भवतो ग्लानिं तनोति; एतादृशो व्यतिकरोऽस्माभिर् द्रष्टव्य इति अस्मान् धिग्धिगित्यर्थः । अत्र अमुक्ता इत्युद्दिश्य विधेयमन्यत् किञ्चिद् नास्तीति न मुक्ता इति निषेध एव प्राधान्येन असमस्तेन नञा विधेयो यथा नवजलधर इत्यादौ असमस्तेन नञा निषेधस्य विधिः कृतः, किन्तु तथा अकृत्वा निषेधः समासेन गुणीभूततां नीत इति अमुक्तेति समस्तं पदम् अविमृष्टविधेयांशम् इत्यभिप्रायेणाह—**अत्र न मुक्ते**त्यादि । न च अमुक्तत्वस्यैव विधिर्भवतु इति वाच्यम्, क्षणमपीत्यस्य मुक्तत्वेन सम्बन्धो विवक्षितः, अमुक्तत्वस्य विधाने तु समासैकदेशेन क्षणमपीत्यस्य अन्वयस्याऽनुपपत्तेः स न भवेदिति । निषेधस्यैव विधेयत्वे नञोऽसमस्तत्वेनैव प्रयोगः कर्तव्य इत्यत्र दृष्टान्तमाह—**यथा नवजलधर** इत्यादिना । विक्रमोर्वशीये (४।७) उर्वशीविरहे पुरूरवसो मेघादौ जाते दृप्तनिशाचरादिभ्रमे अपगते विवेकवचनमिदम् । अयं दृश्यमान उद्गतः पदार्थः सन्नद्धो नवो जलधरोऽस्ति, न दृप्तो निशाचरः, इदं च दूरमाकृष्टम् मणिधनुः, न तस्य निशाचरस्य कार्मुकम्; अयमपि तीव्रो वारासारोऽम्बुकणसम्पातः न निशाचरमुक्ता बाणपरम्परा; एषा च कनकनिकषरेखेव स्निग्धोज्ज्वला विद्युत्, न मम प्रिया उर्वशी इत्यर्थः । यदि अत्रापि अदृप्तनिशाचर इत्यादिः समासः क्रियेत तर्हि विवक्षितार्थप्रतिपत्तिर्न स्याद् इति बोध्यम् ॥उदा० २२८॥ यत्र निषेधस्य प्राधान्येन विधेयता न भवति किन्तु प्राधान्येन विधेयमन्यदेव किञ्चिद् भवति तत्र तु नञः समासेन गुणीभावो युक्तो भवति यथा-जुगोपात्मानमत्रस्त इत्यादौ अत्रस्तत्वादेरनुवादेन आत्मगोपनादि विहितम्, अतः तत्र युक्तो नञो गुणीभावः; आनन्दसिन्धुरित्यादौ तु अमुक्तताऽनुवादेन नान्यत् किञ्चित् प्राधान्येन विहितमिति न तत्र नञो गुणीभावो युक्त इत्याह—**न त्वमुक्तानुवादेने**त्यादिना । **जुगोपात्मान**मित्यादेः श्लोकस्यार्थस्तु—स दिलीपो यमाद् **अत्रस्तो**ऽभीतः सन् पुरुषार्थसाधनमिति आत्मानं (=शरीरं)

[१६] विरुद्धमतिकृद् यथा—

सुधाकरकराकारविशारदविचेष्टितः ।
अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ॥उदा० २३०॥

अत्र कार्यं विना मित्रम् इति विवक्षितम् अकार्ये मित्रम् इति तु प्रतीतिः ।

यथा वा—

चिरकालपरिप्राप्तलोचनानन्ददायिनः ।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ॥उदा० २३१॥

अत्र कण्ठग्रहम् इति वाच्यम् ।

यथा वा—

रक्ष, अशरणः सन् धर्मम् अदृष्टार्थकं नित्यनैमित्तिकादिकर्म चकार, अलुब्धः सन् धनमाददे, अनासक्तः सन् विषयसुखमन्वभवदिति । विवक्षितोऽर्थ [illegible]-कताबीजम् । नित्यश्चायं दोषः ॥उदा० २२९॥

[१६] नामैवान्वर्थं लक्षणरूपमिति पृथग् लक्षणमनुक्त्वैव नाम गृहीत्वा उदाहरन्ति—**विरुद्धमतिकृद् यथेति ।** प्रकृतार्थविरुद्धस्य प्रकृतार्थ[illegible] प्रकृतार्थबोधे सन्दे-कस्य वा अर्थस्य बोधं यत् करोति तद् विरुद्धमतिकृत् पदं दुष्टं बोध्यम् । विविधेषु विरुद्धमतिकृत्सु पदेषु सम्भवत्सु समासान्तरबोधजनकं दुष्टं विरुद्धमतिकृत् पदमुदाहरन्ति—**सुधाकरे**त्यादिना । चन्द्रकिरणसदृशं निर्मलं प्रगल्भं च चरित्रं यस्य स असौ एक कार्यं विनैव मित्रमस्ति, तस्य गुणगौरवविषये किमधिकं वर्णयामहे इत्यर्थः । अत्र **कार्यस्य** प्रयोजनस्य अभावोऽकार्यम् इत्यव्ययीभावः, अकार्यं मित्रम् अकार्यमित्रमिति मयूरव्यं-सकादित्वात्पुरुषः इति अकार्यमित्रमित्यस्य प्रयोजनं विनैव सज्जनत्वेन मित्रमित्यर्थो विव-क्षितः, किन्तु अनयोः समासवृत्त्योरभिन्नत्वेन न कार्यम् अकार्यम् तत्र मित्रमित्यर्थो झटिति प्रतीयते इति अकार्यमित्रमिति समासपदं सज्जनमित्ररूपं प्रकृतार्थविरुद्धमतिकृत् सद् दुष्ट-मित्यभिप्रेत्याह—**अत्र कार्य**मित्यादि ॥उदा० २३०॥

शिष्यबुद्धिवैशद्याय विरुद्धार्थनिरूढपदरूपं विरुद्धमतिकृत् समासपदमुदाहरन्ति—**चिरकाले**त्यादिना । कान्ता चिरकालेन परिप्राप्तस्य नयनानन्ददायिनः कान्तस्य सहसा कण्ठाश्लेषं करोतीत्यर्थो विवक्षितः । अत्र विवक्षितार्थबोधाय कण्ठग्रहमिति वाच्यम्, तदनुक्त्वा गलग्रहम् इत्युक्तम्, तत् तु रोगविशेषे निरूढमिति प्रकरणबलात् कथञ्चिदु-[illegible] कण्ठाश्लेषरूपमर्थं तिरस्कृत्य गलग्रहरूपमेवार्थं प्रकट[illegible] विरुद्धमतिकृद्बोध्यमित्यभिप्रायेणाऽऽह—**अत्र कण्ठे**त्यादि मम्मटेन दत्तं पाठान्तरं न लोकवृत्तानुकूलमिति 'कान्तस्य कुरुते कान्ता कण्ठाश्लेषं दृढं मुदा' इति पाठः कार्यः ॥उदा० २३१॥

शिष्यनिपुणतासिद्धये विवक्षितविशेषणत्वे पदस्वरूपविशेषवैचित्र्यप्रसङ्गेन अवि-वक्षितविशेषपरत्वसम्भावनया उत्पादकं विरुद्धमतिकृत् समस्तं दुष्टं पदमुदाहरन्ति—

न त्रस्तं यदि नाम भूतकरुणासन्तानशान्तात्मनस्
तेन व्यारुजता धनुर् भगवतो देवाद् भवानीपतेः ।
तत्पुत्रस्तु मदान्धतारकवधाद् विश्वस्य दत्तोत्सवः
स्कन्दः स्कन्द इव प्रियोऽहमथवा शिष्यः कथं विस्मृतः ॥उदा० २३२॥

अत्र भवानीपतिशब्दो भवान्याः पत्यन्तरे प्रतीतिं करोति ।

यथा वा—

गोरपि यद्वाहनतां प्राप्तवतः सोऽपि गिरिसुतासिंहः ।
सविधे निरहङ्कारः पायाद् वः सोऽम्बिकारमणः ॥उदा० २३३॥

न त्रस्तमित्यादिना । महावीरचरिते परशुरामस्योक्तिरियम् (२।२८) । यदि तेन दाशरथिना रामेण महादेवस्य धनुर्भग्नं कुर्वाणेन भूतेषु करुणायाः प्रसरेण शान्त आत्मा यस्य तादृशाद् भगवतो देवाद् भवानीपतेः न भीतं तर्हि तद् उचितमस्तु नाम, तेन मदान्धस्य तारकस्य वधेन विश्वस्य दत्त उत्सवो येन तादृशो महादेवपुत्रः स्कन्दः कथं विस्मृतः, अथवा तस्यापि दत्तविश्वोत्सवत्वेन भयाहेतुत्वेऽपि महादेवस्य स्कन्द इव प्रियः शिष्यः क्षत्रियकुलान्तकोऽहं कथं विस्मृतः ? (महादेवधनुर्भङ्गे मत्तः तस्य भयं कथं न जातम् ?) इत्यर्थः । तत्र दोषं दर्शयति—**अत्र भवानीपतीत्यादिना** । भवाद् इति प्रयोगेणैव विवक्षिते महादेवाद् इत्यर्थे लभ्ये भवशब्दाद् ङीषं विधाय तदन्तेन पतिशब्दस्य समासं कृत्वा भवानीपतेरिति कथनं व्यर्थमिति नूनमस्याऽधिकोऽर्थः स्यादिति कल्पनां कारयित्वा तद् देवदत्तपत्न्या पतिः इत्यादि इव भवान्याः पत्यन्तरस्य (उपपतेः) प्रतीतिं करोति, एवञ्च प्रकृतस्य महादेवरूपस्यार्थस्य अभिभावकं पत्यन्तररूपं विरुद्धमर्थं प्रत्याययद् भवानीपतेरिति समासपदं विरुद्धमतिकृदिति भावः ॥उदा० २३२॥

समस्यमानपदस्य द्व्यर्थकतया विरुद्धमतिकृत् समस्तं पदं प्रपञ्चार्थं पुनरपि उदाहरति—**गोरपीत्यादिना** । यस्य महेशस्य वाहनतां प्राप्तवतो गोवृषभस्याऽपि निकटे अतिक्रूरतया प्रसिद्धोऽपि पार्वत्या वाहनभूतः सिंहो निरहङ्कारो भवति स अम्बिकाया रमणो युष्मान् पायादित्यर्थः । अत्र रमणशब्दस्य प्रीतिकरार्थत्वेन उपपत्यर्थत्वेन च द्व्यर्थकतया अम्बिकारमण इति पदं गौरीपतिरित्यर्थमिव गौर्या उपपतिरित्यर्थमपि उपस्थापयतीति विवक्षितार्थतिरस्कारकार्थबोधकत्वाद् अम्बिकारमण इति पदं विरुद्धमतिकृद् इत्याशयेनाऽऽह—**अत्र अम्बिकेत्यादि** । अत्र अम्बिकारमण इति पदं मातृपतिरित्यर्थं बोधयतीति विरुद्धमतिकृदिति प्राचीना आधुनिकाश्च टीकाकाराः, किन्तु अम्बिकारमण इत्यस्य मातृपतिरित्यर्थो दुर्लभः, न च स प्रकृतमहादेवरूपार्थविरुद्धमतिकृदित्यस्माभिरुपर्युक्तोऽर्थः परिगृहीतः । पूर्वस्मिन् उदाहरणे पतिशब्दस्य प्रयोगात् पतिशब्दस्य च भर्तरि रूढत्वाद् न सहसा पत्यन्तरस्य प्रतीतिः, अत्र तु रमणशब्दस्य यौगिकत्वाद् "न तादृशी

अत्र अधिकारमण इति विरुद्धां धियमुत्पादयति ।

श्रुतिकटु समासगतं यथा—

सा दूरे च सुधासान्द्रतरङ्गितविलोचना ।
बर्हिनिर्ह्लादनार्होऽयं कालश्च समुपागतः ॥उदा० २३४॥

एवम् अन्यदपि ज्ञेयम् ।

(सू० ७५) **अपास्य च्युतसंस्कारमसमर्थं निरर्थकम् ।**
वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपि केचन ॥५१॥

केचन न पुनः सर्वे ।

प्रीतिमुपैति नारी विचित्रशय्यां शयिनाऽपि कामम् । यथा हि दूर्वादिविकीर्णभूमौ प्रयाति सौख्यं रतकान्तसङ्गात्" इति उपपतेः अतिशयेन रमणत्वस्य लोके प्रसिद्धत्वात् रमण-शब्दः सहसा उपपतेर्बोधं जनयतीति च दूर्वोदाहरणादस्य वैलक्षण्यम् बोध्यम् ॥उदा० २३३॥

क्लिष्टम्, अविमृष्टविधेयांशम्, विरुद्धमतिकृच्च दुष्टं पदं समासगतमेव भवति; श्रुतिकटुप्रभृति नेयार्थं यावद् दुष्टं पदं तु अखण्डपदगतं समासपदगतं च भवतीति क्लिष्ट-लक्षणात् प्राक् प्रतिपादितम्; तत्र दिक्प्रदर्शनाय समासगतं श्रुतिकटु उदाहरति—**सा दूरे चे**त्यादिना । विरहिणो रामस्योक्तिरियमिति टीकाकाराः । सुधया पूर्णे तरङ्गिते (तरङ्गतुल्यचञ्चले) विलोचने यस्याः सा सीता च दूरे अस्ति, अयं मयूराणां निर्ह्लादने योग्यो घनागमरूपः कालश्च समुपागतः, कथं तद्विरहः सोढव्य इत्यर्थः । अत्र बर्हि-निर्ह्लादनार्ह-पदघटकस्य समासस्य श्रुतिकटुत्वं बोध्यम् ॥उदा० २३४॥

अखण्डपदगतानां च्युतसंस्कारादीनामुदाहरणैरेव तेषां स्पष्टत्वाद् ग्रन्थविस्तरभयाच्च आह—**एवमन्यदपि ज्ञेय**मिति । अनेनैव प्रकारेण समासगतच्युतसंस्कृत्यादि अपि उक्तेऽर्थे व्युत्पन्नेन स्वयमेव ज्ञातुं शक्यमित्यर्थः ॥७४॥

उक्तेषु दोषेषु कांश्चिद् वाक्येऽप्यतिदिशति—**अपास्य च्युते**त्यादिना । च्युतसंस्कारत्वम्, असमर्थत्वम्, निरर्थकत्वं च विहाय अवशिष्टा एते श्रुतिकटुप्रभृतयो दोषाः [१ श्रुतिकटु, २ अप्रयुक्तम्, ३ निहतार्थम्, ४ अनुचितार्थम्, ५ अवाचकम्, ६ अश्लीलम्, ७ सन्दिग्धम्, ८ अप्रतीतम्, ९ ग्राम्यम्, १० नेयार्थम्, ११ क्लिष्टम्, १२ अविमृष्टविधेयांशम्, १३ विरुद्धमतिकृच्च] वाक्येऽपि भवन्तीत्यर्थः । दोषाणां वाक्यगतत्वञ्च अन्वयबोधजनकपदसमूहरूपवाक्यगतनानापदवृत्तित्वमेव । एकवाक्यघटकेषु नानापदेषु च्युतसंस्कृतिषु असमर्थेषु निरर्थकेषु वा सत्सु तु सर्वथा तदर्थानुपस्थित्या तादृशपदघटितत्वेन वाक्यत्वस्यैवाऽभावात् च्युतसंस्कृतित्वादेर्न वाक्यगतत्वमिति बोध्यम् । व्याकरणस्य पदसंस्कारकत्वमतेन च्युतसंस्कृतित्वस्य वाक्येऽसंभव इत्यपि केचित्; किन्तु तन्नातिरमणीयम्, "पदवाक्यप्रमाणज्ञः" (उ० रा० च० प्र०) "पद-वाक्य-प्रमाणाब्धेः परं पार-

क्रमेणोदाहरणम्—

[वाक्यगतं श्रुतिकटुत्वं यथा—]

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनतार्प्सीत् सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ॥ उदा० २३५ ॥

[वाक्यगतम् अप्रयुक्तत्वं यथा—]

स रातु वो दुश्च्यवनो भावुकानां परम्पराम् ।
अनेडमूकताद्यैश्च द्यतु दोषैरसम्मतान् ॥ उदा० २३६ ॥

अत्र दुश्च्यवन इन्द्रः, अनेडमूको मूकबधिरः ।

मुपेयुषः । वाक्यस्यैकवाक्यत्वे अबाध इति साहमन्" (वेदान्तकल्पतरौ ३।३।२६) इत्यादौ व्याकरणस्य पदशास्त्रत्वेन व्यवहारे सत्यपि, कृदन्ते तद्धिते च व्याकरणस्य पदव्याकरणपरत्वे इव दृष्टेऽपि च वस्तुतो व्याकरणस्य पदव्याकरणद्वारा वाक्यव्याकरणे एव तात्पर्यात् । मीमांसाया वाक्यशास्त्रत्वं तु वाक्यार्थ-विचारकत्वादिति[illegible] च ज्ञेयम् । श्रुतिकटुप्रभृतिषु केचन दोषाः [श्रुतिकटु, निहतार्थम्, निरर्थकम्, त्रिविधमश्लीलम्, सन्दिग्धम्, नेयार्थम् च] पदस्यांशे (खण्डे) अपि भवन्तीति बोध्यम् ॥ ५१ ॥

वाक्यगतानां श्रुतिकटुत्वप्रभृतीनामुदाहरणानि क्रमेणाऽऽह—तत्र [१] **श्रुतिकटुत्वं वाक्यगतम्** उदाहरति—सोऽध्यैष्टेत्यादि । भट्टिकाव्ये (रावणवधे) दशरथवर्णनमिदम् (१।२) । दशरथो वेदान् अधीतवान्, देवान् यज्ञैः पूजितवान्, पितॄन् तर्पितवान्, बन्धून् सम्मानितवान्, काम-क्रोध-लोभ-मोह-मद-मात्सर्याणां षण्णां वर्गं विजितवान्, नीतौ रतवान्, शत्रूंश्च यथा हनने मूलघातेन सहितं हननं भवति तथा हतवानित्यर्थः । अत्र चकारबलाद् एकवाक्यता आगच्छतीति एकवाक्यगतानां नानापदानां श्रुतिकटुत्वमिति वाक्यमेव श्रुतिकटु इत्यभिप्रायः । आख्यातवाक्येषु परस्परनिराकाङ्क्षत्वेन भिन्नेषु एकैकस्य पदस्य श्रुतिकटुत्वेन न वाक्यदोषत्वमित्यन्यत्र पदान्येव श्रुतिकटूनि, पितॄनतार्प्सीदित्यत्र व्यजेष्ट षड्वर्गमित्यत्र च एकान्वयबोधकयोर् द्वयोः पदयोः श्रुतिकटुत्वाद् वाक्यस्य श्रुतिकटुत्वमित्यन्ये । अस्य वैयाकरणोक्तित्वेऽपि स्वस्य वैयाकरणतायाः प्रतिपिपादयिषया अप्रयुक्तत्वाद् अत्र श्रुतिकटुत्वं दोष एवेति ग्रन्थकारस्याऽभिप्रायो बोध्यः ॥ २३५ ॥

[२] वाक्यगतम् अप्रयुक्तत्वम् उदाहरति—**स रातु व** इत्यादिना । दुश्च्यवनः (इन्द्रः) युष्माकं कल्याणानां परम्परां ददातु, अपि च युष्माकमसम्मतान् (शत्रून्) मूकबधिरत्वाद्यैर्दोषैः खण्डयतु इत्यर्थः । अत्राऽपि चकाराद् एकवाक्यता आगच्छतीति एकवाक्यगतयोः इन्द्रार्थक-दुश्च्यवन-मूकबधिरार्थकाऽनेडमूकपदयोः कोषे पठितयोरपि कविभिरप्रयुक्तयोः सत्त्वाद् अत्र वाक्यगतमप्रयुक्तत्वं बोध्यम् ॥ उदा० २३६ ॥

[वाक्यगत निहतार्थत्वं यथा—]

सायक-सहाय-बाहोर् मकरध्वज-नियमित-क्षमा-ऽधिपते ।
अब्जरुचिभास्वरस् ते भातितरामवनिप श्लोक. ॥ उदा० २३७ ॥

अत्र सायकादयः शब्दाः खड्ग-उदधि-भू-चन्द्र-यश:स्वर्थेषु [illegible] प्रसिद्धा ।

[वाक्यगतम् अनुचितार्थत्वं यथा—]

कुविन्दस् त्वं तावत् पटयसि गुणग्राममभितो
यशो गायन्त्येते दिशि दिशि च नग्नास् तव विभो ।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा
तथापि त्वत्कीर्तिर् भ्रमति विगताच्छादनमिह ॥ उदा० २३८ ॥

अत्र कुविन्दादिशब्दोऽर्थान्तरं प्रतिपादयन् उक्तश्लोकस्थानस्य तिरस्कारं व्यनक्तीत्यनुचितार्थं ।

---

[३] वाक्यगतं निहतार्थत्वम् उदाहरति—सायकसहायेत्यादिना । हे राजन्, सायक-सहायः (खड्गयुक्तः) बाहुर् यस्य तथाभूतस्य, मकरध्वजेन (समुद्रेण) परिच्छिन्ना या क्षमा (पृथ्वी) तस्या अधिपतेः तव अब्जस्य (चन्द्रस्य) रुचिः इव भास्वरः श्लोकः (यशः) शोभनेतराम् इत्यर्थः । अत्र सायक-मकरध्वज-क्षमा-ऽब्ज-श्लोक-शब्दाः शर-मदन-क्षान्ति-कमल-पद्येष्वर्थेषु प्रसिद्धत्वात् प्रसिद्धार्थतिरोहितविवक्षितप्राकरणिकार्थकाः इति वाक्य-गतं निहतार्थत्वमत्र बोध्यम् ॥ उदा० २३७ ॥

[४] वाक्यगतमनुचितार्थत्वमुदाहरति—कुविन्दस्त्वमित्यादिना । हे विभो, कुं (पृथ्वीं) प्राप्तवान् त्वं शौर्यादीनां समूहम् (अहो अस्य एतादृशी विद्या, एतादृशं दानम्, एतादृशी नीतिः, एतादृशं शौर्यम् इत्यादेः प्रशंसाया लाभेन) पटुं करोषि, एते नग्नाः (वन्दिनः) दिशि दिशि तव यशो गायन्ति, तथापि शरज्ज्योत्स्ना इव गौराणि स्फुटानि विकटानि च यानि सर्वाण्यपि अङ्गानि तैः सुभगा त्वत्कीर्तिः इह लोके विगतम् आच्छा-दनं (व्यवधानं) यस्मिन् कर्मणि यथा स्यात् तथा भ्रमतीति वाच्योऽर्थः । व्यङ्ग्योऽर्थस्तु तन्तुवायस्त्वं तन्तुसमूहं पटं करोषि, एते नग्नाः त्वत्तो पटस्य लाभात् तव यशो गायन्ति, एवं वस्त्रस्य समृद्धौ सत्यामपि तव कीर्तिनाम्नी स्त्री विगतवस्त्रं यथा स्यात् तथा भ्रमतीति । अत्र प्राकरणिकेऽर्थे अभिधाया नियमनाद् व्यञ्जनया द्वितीयोऽर्थः प्रतीयते, स चाऽसङ्गतो माभूदिति प्राकरणिकाऽप्राकरणिकयोरुपमेयोपमानभावः आश्रीयते, तथा च राज्ञोऽनुचितं तन्तुवायौपम्यं वाक्यलभ्यमिति वाक्यमनुचितार्थं बोध्यमित्याशयेनाऽऽह—अत्र कुविन्दादि-शब्द इत्यादि । अत्र स्फुटविकटसर्वाङ्गपदेन विगताच्छादनमिति पदेन च असभ्योऽर्थोऽपि प्रकाश्यते इति वाक्यगतमश्लीलत्वमपि बोध्यमिति त्वन्यत् ॥ उदा० २३८ ॥

[वाक्यगतम् अवाचकत्वं यथा—]

प्राभ्रभ्राड् विष्णुधामाप्य विषमाश्वः करोत्ययम् ।
निद्रां सहस्रपर्णानां पलायनपरायणाम् ॥ उदा० २३९ ॥

अत्र प्राभ्रभ्राड्-विष्णुधाम-विषमाश्व-निद्रा-पर्ण-शब्दाः प्रकृष्टजलद-गगन-सप्ताश्व-सङ्कोच-दलानामवाचकाः ।

[वाक्यगतं व्रीडाश्लीलत्वं यथा—]

भूपतेरुपसर्पन्ती कल्पना वामलोचना ।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ ॥ उदा० २४० ॥

अत्र उपसर्पण-प्रहरण-मोहन-शब्दा व्रीडादायित्वादश्लीलाः ।

---

[५] वाक्यगतमवाचकत्वमुदाहरन्ति—**प्राभ्रभ्राडित्यादिना** । अयं विषमाश्वः (सूर्यः) प्रकृष्टेन अभ्रेण भ्राजमानमपि विष्णुपदं प्राप्य सहस्रपत्राणां (कमलानां) सङ्कोचं दूरीकरोतीत्यर्थः । अथवा प्रकृष्टमभ्रं कृष्णो मेघः तद्वद् भ्राजते यो विष्णुस्तस्य धाम व्योम प्राप्येति । अत्र दोषं दर्शयति—**अत्र प्राभ्रभ्राडित्यादिना** । अत्र प्राभ्रभ्राट्प्रभृतिशब्दैः योगार्थमादाय सामान्यतया धर्मिणा बोधनाद् वक्तुस् तात्पर्यं कथञ्चिद् बुध्यते इति वाचकत्वमस्ति, किन्तु **प्राभ्र**प्रभृतयः शब्दाः प्रकृष्टजलदादिरूपाणां धर्मिविशेषाणामवाचका इति वाक्यगतमवाचकत्वं बोध्यमित्यभिप्रायः । वृत्तौ प्राभ्रभ्राडिति पाठ लेखकादिप्रमाणजन्यः प्रतिभाति । श्रीधर-महेश्वरादयश्चात्र प्राभ्रशब्दस्यैवाऽवाचकत्वं व्याचक्षते न तु प्राभ्रभ्राट्शब्दस्य । वामनाचार्यझळकीकरस्य तद्वाक्यांशानेव बहुश आदाय नागेश्वरीकरणाभिमानं कर्तुर्हरिशङ्करस्य च 'अत्र प्राभ्रभ्राडिति प्रकृष्टजलदे······ ······अवाचकम्' इति व्याख्यानं तयोरेव 'प्रकृष्टोऽभ्रभ्राड् यत्र तद्' इति प्रस्तुतश्लोकव्याख्यांशेन विरुद्धमिति तयोरभिप्रायं न विद्मः । वृत्तौ पर्णशब्दस्य दलावाचकत्वं यदुक्तं तदपि न युक्तम्, "पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्" इति कोशात्; कमलाभिधायके सहस्रपत्रशब्दे उत्तरपदस्य [illegible] तु व्याख्येयम् । अथवा पत्रशब्दस्य पुष्पपत्रस्याऽपि वाचकं पर्णशब्दस्य तु अतथात्वं कल्प्यम् ॥ उदा० २३९ ॥

[६–क] वाक्यगतं व्रीडाऽश्लीलत्वमुदाहरन्ति—**भूपते**रित्यादिना । वामे (द्विषतः प्रति विरुद्धे) लोचने यस्यास्तादृशी द्विपदभिमुखमुपसर्पन्ती भूपतेः सेना तत्तच्छस्त्रास्त्रप्रयोगोत्साहेन युक्ता सती विपक्षसम्मोहनं चकारेति विवक्षितोऽर्थः । **उपसर्पन्ती** उपसृप्तके रतविशेषे (का० सू० २।८।६,२१) प्रवर्तमाना रिरंसावेशेन पुरुषं कम्पयुक्तं कुर्वती वामलोचना रतेषु पुरुषेण प्रयोज्यानि यानि अपहस्तक-प्रसृतक-मुष्टि-समतलकरूपाणि प्रहणनानि (का० सू० २।७।३) तत्र उत्साहेन युक्ता सती भूपते**र्मोहनम्** च्युतिसुखमादधौ इति व्रीडादायी अर्थोऽप्यत्र प्रतीयते इति अत्र व्रीडाश्लीलत्वं दोषमित्याशयेनाह—**अत्रोपसर्पणे**त्यादि ॥ उदा० २४० ॥

[वाक्यगतं जुगुप्साश्लीलत्वं यथा—]

तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गं च भुञ्जते ।
इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्तनम् ॥ उदा० २४१ ॥

अत्र वान्तोत्सर्ग-प्रवर्तन-शब्दा जुगुप्सादायिन ।

[वाक्यगतम् अमङ्गलाश्लील यथा—]

पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे ।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम् ॥ उदा० २४२ ॥

अत्र पितृगृहमित्यादौ विवक्षिते श्मशानादिप्रतीतावमङ्गलार्थत्वम् ।

[वाक्यगतं सन्दिग्धत्वं यथा—]

सुरालयोल्लासपरः प्राप्तपर्याप्तकम्पनः ।
मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम् ॥ उदा० २४३ ॥

अत्र किं सुरादिशब्दा देव-सेना-शर-विभूत्यर्थाः किं मदिराद्यर्था इति सन्देह ।

[६—ख] वाक्यगतं जुगुप्साश्लीलत्वमुदाहरति—**तेऽन्यैर्वान्त**मित्यादिना । येषां कवीनाम् इतरकविकल्पितार्थग्रहणे प्रवर्तनं भवति ते अन्यैर्वान्तम् अदन्ति, परेषाम् **उत्सर्गम्** पुरीषं च भुञ्जते इत्यर्थः । अत्र वान्तोत्सर्गशब्दौ मुख्यार्थे एव जुगुप्सादायी, प्रवर्तनशब्दस्तु प्रवृत्त्यर्थकत्वेनोपात्तोऽपि तस्य मूत्रपुरीषोत्सर्ग-वमनेषु प्रसिद्धतया तत्-स्मारकत्वाद् व्रीडाजनक इति वाक्यगतानामनेकेषां पदानां व्रीडादायित्वाद् अत्र वाक्यगतं व्रीडाश्लीलत्वं बोध्यमित्याशयेनाह—**अत्र वान्तोत्सर्गे**त्यादि ॥ उदा० २४१ ॥

[६—ग] वाक्यगतम् अमङ्गलाश्लीलत्वमुदाहरति—**पितृवसतिमह**मित्यादिना । पतिगृहे पुत्रसन्तप्तायाः कस्याश्चिदुक्तिरियम् । अहम् मदीयसेवकजनेन सह पितृगृहं गच्छामि, यत्र पवित्रे कुले स्थितायाः मम हृदयं तत्क्षणे एव निश्शेषशोकशल्यं भवतीत्यर्थो विवक्षितः । अत्र पितृवसतिं श्मशानं गच्छामि यत्र **पावकान्वये** चिताग्निसम्बन्धे सति मम हृदयम् अशेषशोकशल्यकं भस्मरूपं भवतीत्यमङ्गलार्थोऽपि पितृवसतिशब्दबलात् तत्सम्बन्धिनः पावकशब्दबलाच्च प्रतीयते इति अत्रामङ्गलाश्लीलत्वं वाक्यगतं बोध्यमित्याशयेनाह—**अत्र पितुर्गृह**मित्यादिना ॥ उदा० २४२ ॥

[७] वाक्यगतं सन्दिग्धत्वम् उदाहरति—**सुरालये**त्यादिना । अत्र देवगृहदर्शनकर्मे तत्परः प्राप्तपर्याप्तसेनः बाणेषु प्रवणः भास्वती (शोभमाना) भूतिः (सम्पत्तिः) यस्य एतादृश एष विलोक्यतामित्यर्थो वा मदिरागृहोल्लासपरः प्राप्तपर्याप्तकम्पो याचनप्रवण. शोभनभस्मवान् एष विलोक्यतामित्यर्थो वा विवक्षित इति स्तुतिर्वा निन्दा वेति सन्देहः प्रकरणाद्यभावात् सुर-कम्पन-मार्गण-भूति-शब्दैः प्रभवतीति वाक्यगतं सन्दिग्धत्वमत्र बोध्यम् इत्याशयेनाह—**अत्र किं सुरादिशब्दा** इत्यादिना ॥ उदा० २४३ ॥

[वाक्यगतम् अप्रतीतत्वं यथा—]

तस्याऽधिमात्रोपायस्य तीव्रसंवेगताजुषः ।
दृढभूमिः प्रियप्राप्तौ यत्नः स फलितः सखे ॥ उदा० २४४ ॥

अत्र अधिमात्रोपायादयः शब्दा योगशास्त्रमात्रप्रयुक्तत्वादप्रतीताः ।

[वाक्यगतं ग्राम्यत्वं यथा—]

ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः ।
करोति खादनं पानं सदैव तु यथा तथा ॥ उदा० २४५ ॥

अत्र गल्लादयः शब्दा ग्राम्याः ।

[वाक्यगतं नेयार्थत्वम् उदाहरन्ति—]

वस्त्रवैदूर्यचरणैः क्षतसत्त्वरजःपरा ।
निष्कम्पा रचिता नेत्रयुद्धं वेदय साम्प्रतम् ॥उदा० २४६॥

---

[८] वाक्यगतम् अप्रतीतत्वम् उदाहरति—**तस्याधिमात्रे**त्यादिना । हे सखे, **अधिमात्रोपायस्य** श्रेष्ठाधिकश्रद्धावीर्यादिसाधनस्य (यो० सू० १।२०) **तीव्र संवेगताजुषः** क्रियाहेतुकदृढतरसंस्कारवत्त्वं प्राप्तस्य (यो० सू० १।२१) तस्य योगिनो **दृढभूमिः** स्थिरः (यो० सू० १।१४) यत्नः प्रियस्य आत्मसाक्षात्कारस्य प्राप्तौ फलित इत्यर्थः । अधिमात्रोपायस्य तीव्रसंवेगस्य दृढभूमिरभ्यास आसन्नाय समाधिलाभाय समाधिफलाय च भवतीति योगशास्त्रसिद्धान्तोऽत्रानुसन्धेयः (यो० सू० १।१४, २०, २१, २२) । अत्र अधिमात्रोपाय-तीव्रसंवेग-दृढभूमि-शब्दाः उक्तेषु विवक्षितेष्वर्थेषु योगशास्त्रे एव प्रसिद्धाः, लोके अप्रतीतार्था इति वाक्यगतमप्रतीतत्वमत्र बोध्यमित्याशयेनाह-**अत्राधिमात्रे**त्यादि ।
॥ उदा० २४४ ॥

[९] वाक्यगतं ग्राम्यत्वमुदाहरति—**ताम्बूलभृते**त्यादि । ताम्बूलपूर्णकपोलोऽयं मानुषो **भल्लं** निश्छलं वाक्यं वदति, खादनं पानं तु सदैव सभ्यां रीतिमुत्सृज्य येन केनाऽपि प्रकारेण करोतीत्यर्थः । अत्र गल्ल-भल्ल-खादन-शब्दा विदग्धैरप्रयुज्यमाना इति ग्राम्याः, अतोऽत्र वाक्यगतं ग्राम्यत्वं बोध्यमित्याशयेनाह—**अत्र गल्लादय** इत्यादि ।
॥ उदा० २४५ ॥

[१०] वाक्यगतं नेयार्थत्वमुदाहरति—**वस्त्रवैदूर्ये**त्यादिना । **वस्त्र**मम्बरं तस्य **वैदूर्यं** मणिः तस्य चरणैः पादैः (सूर्यकिरणैः) निष्कम्पा अचला (भूः) क्षतं निरस्तं **सत्त्वरजःपरं** तमो (ध्वान्तम्) यस्याः सा तादृशी रचिता, अतोऽधुना नेत्रद्वन्द्वं **वेदय** बोधय (उद्घाटय) इत्यर्थो विवक्षितः । यथा द्विरेफपदं भ्रमरपदपरं भ्रमरपदवाच्यमर्थं लक्षयति, यथा वा रथाङ्गनामा इति पदं चक्रवाकं लक्षयति तथैव वस्त्र-वैदूर्य-चरणसत्त्वरजःपर-निष्कम्प-युद्ध-वेदय-पदानि अम्बर-मणि-पाद-तमो-ऽचला-द्वन्द्व-बोधय-पदपराणि सूर्य-किरण-ध्वान्त-भू-युग्म-समुन्मीलनार्थान् लक्षयन्तीति विचार्य प्रयुक्तानि, किन्तु एतानि पदानि तान्

अत्राम्बररत्नपादैः क्षतनमा अचला भूः कृता नेत्रद्वन्द्वं बोधयेति नेयार्थता ।

[वाक्यगतं क्लिष्टत्वं यथा—]

धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥उदा० २४७॥

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धे क्लिष्टत्वम् ।

[वाक्यगतम् अविमृष्टविधेयांशत्वं यथा—]

न्यक्कारो ह्ययमेव मे यदरयस् तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर् भुजैः ॥उदा० २४८॥

अर्थात् लक्षयितुं न शक्तानि (लोकान् बोधयितुम् असमर्थानि) इति अस्या लक्षणाया "कश्चिन्नैव त्वशक्तितः" इति निषेधविषयतयाऽत्र नेयार्थत्वं वाक्यगतं बोध्यमित्याशयेनाह—अत्राम्बररत्नपादैरित्यादि ॥उदा० २४६॥

[११] वाक्यगतं क्लिष्टत्वम् उदाहरति—**धम्मिल्लस्ये**त्यादिना मृगशावाक्ष्या युवत्या अपूर्वबन्धविच्छित्तेः संयतकेशपाशस्य शोभां विलोक्य कस्य मानसं न रज्यति इति अन्वयबोधः आसत्तिज्ञानविलम्बाद् विलम्बितो भवतीति क्लिष्ट इति अत्र वाक्यगतं क्लिष्टत्वं बोध्यमित्याशयेनाह—अत्र **धम्मिल्लस्ये**त्यादि ॥ उदा० २४७ ॥

[१२] वाक्यगतम् अविमृष्टविधेयांशत्वमुदाहरति—**न्यक्कारो ह्ययमे**वेत्यादिना । हनुमन्नाटके चतुर्दशेऽङ्के रामकृतराक्षसक्षयं विचिन्तयतो रावणस्य स्वावधीरणोक्तिरियम् । यद् वशीकृतभुवनत्रयस्य ममाऽपि अरयः सन्ति अयमेव मम न्यक्कारः (अवमाननम्), तत्राऽपि तापसमनुष्यभक्षकस्य मम यद् असौ तापसः अरिः अयम् अधिकतरो न्यक्कारः, तादृशस्तापसोऽप्यसौ अरिः यद् अत्रैव लङ्कायां मम समीपे एव राक्षसानां कुलम् आबालवृद्धवनितं निहन्ति, अयं जीवता रावणेन सहनीयो न्यक्कारः, एतादृशे न्यक्कारे जातेऽपि अहो भुवनत्रयस्वामित्वाभिमानी लोकत्रयरावणो रावणोऽपि प्राणिति; इन्द्रजितमपि धिगेव; बलात् कारितेन प्रबोधेन युक्तेन कुम्भकर्णेनाऽपि किं प्रयोजनं साधितम्; स्वर्ग एव ग्रामटिका (अल्पग्रामः) तस्या विलुण्ठनेन मया अतीव महत् कार्यं कृतमिति अभिमानभरेण वृथैव उच्छूनैरेभिः प्रसिद्धपराक्रमैः विंशत्या भुजैरपि किं प्रयोजनमिदानीमित्यर्थः । अत्र प्रासमहिमत्वादिकमनूद्यं न्यक्कारः पूर्वमप्राप्तो विधेयः, उक्तञ्च श्लोकवार्त्तिके—"यच्छब्दयोगः प्राथम्यं सिद्धत्वं चाप्यनूद्यता । तच्छब्दयोग औत्तर्यं साध्यत्वञ्च विधेयता" इति । तत्र उद्देश्यं प्रागुपादेयम्, विधेयं पश्चाद् उपादेयम्, एवं कृते एव तयोरुद्देश्यविधेयभावः स्फुटो भवति; अत एव तु "वृद्धिरादैच्" (अष्टा० १।१।१) इत्यत्र महाभाष्ये "सतो हि

अत्र 'अयमेव न्यक्कारः' इति वाच्यम्, उच्छूनत्वमात्रं चाऽनुवाद्यम् न वृथात्वविशेषितम्। अत्र च शब्दरचनाविपरीता कृतेति वाक्यस्यैव दोषो न वाक्यार्थस्य।

यथा वा—

अपाङ्गसंसर्गि तरङ्गितं दृशोर्भ्रुवोररालान्तविलासि वेल्लितम् ।
विसारि रोमाञ्चनकञ्चुकं तनोस् तनोति योऽसौ सुभगे तवागतः ॥ उदा० २४९ ॥

काचित् कार्येण भवितव्यम्, तद् यथा—इतरत्राऽपि सतो नामनिर्देशस्य देवदत्त इति संज्ञा क्रियते" इत्युक्त्वा "कथं वृद्धिरादैच् ?" इत्याशङ्क्य "एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते" इति महाभाष्यकारः सिद्धस्याऽनुवाद्यस्य प्राक् प्रयोज्यत्वं विधेयस्य च पश्चात् प्रयोज्यत्वं सूचयामासः भट्टाचार्योऽपि—"अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्। न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति" श्लोकवार्त्तिके स्फुटमुक्तवान् महिमभट्टोऽप्येतदनुदितवान् (२।९४ सं० श्लो०)। उदाहृते पद्ये तु कविना विधेयो न्यक्कारः प्रागुपात्तः, अयम्पदनिर्दिष्टमुद्देश्यं तु पश्चादुपात्तमिति स्फोटोद्देश्यविधेयभावो स्फुटो जातः, विधेयस्य प्रागुपादानाद् उद्देश्यतया भ्रमेण तस्य अप्राधान्येन निर्देशो जात इति उद्देश्यविधेययोर्वैपरीत्येन व्युत्क्रमत्वेन दुष्टत्वमिति चाऽत्र वाक्यगतमविमृष्टविधेयांशत्वं दोषमित्याशयेनाह—अत्र **अयमेव न्यक्कार इति वाच्यमिति**। प्रसङ्गात् पद्ये वर्तमानमन्यमपि दोषं दर्शयति—उच्छूनत्वमात्रमित्यादिना। अत्र उच्छूनाना भुजानां वृथात्वं किमेभिर्भुजैरित्यनेनोक्तमिति वृथापदं पुनरुक्तमिति केचित्; उच्छूनत्ववैयर्थ्यस्य वृथापदेन भुजानां वैयर्थ्यस्य किमेभिर्भुजैरिति प्रतिपादनमिति न पुनरुक्तता, किन्तु उच्छूनत्वमनूद्य विधेयस्य वृथात्वस्य समासे गुणीभावात् पदगतं विधेयाविमर्शत्वमित्यन्ये; स्वर्गविलुण्ठनजन्यत्वम् उच्छूनत्वस्यैव न तु वृथोच्छ्वयनस्य, इदानीमेव उच्छ्वयनस्य वृथात्वस्य प्राप्तेः, अतो वृथात्वविशेषितोच्छ्वनत्वे स्वर्गविलुण्ठनजन्यत्वस्य अन्वयाद् अभवन्मतयोगत्वमत्रेति महेश्वरः; वृथोच्छूनभुजानां किमेभिर्भुजैरिति वृथात्वविधाने नीलघटे नीलत्वस्य विधाने (नीलघटो नील इत्यत्र) इव विधिरसङ्गतः स्यादिति इदमपि वाक्यगतमेव विधेयाविमर्शत्वमिति महेशचन्द्रदेवः। अनुवाद्य-विधेययोः अर्थरूपत्वाद् अर्थदोषोऽयं न शब्ददोष इत्याशङ्क्येनेत्याह—अत्र चेत्यादि। रचनायाः शब्दधर्मत्वेन रचनाविशेषस्य शब्दनिष्ठतया विधानव्युत्क्रमदोषोऽपि शब्दस्यैवेति ग्रन्थकर्तुरभिप्रायः। विवक्षितस्यार्थस्यैव दुष्टत्वे अर्थदोषता, विवक्षितार्थोपस्थापनासमर्थस्तु शब्द एवाऽपराध्यति इति हृदयम् ॥ उदा० २४८ ॥

विधेयस्य अनुपस्थित्याऽपि तस्य प्राधान्येनाऽनिर्देशो भवतीति प्रकारान्तरेणागतं वाक्यगतमविमृष्टविधेयांशत्वमुदाहरति—**यथा वेति**। असौ दूरदेशं गतोऽस्य च तव हृदि

अत्र योऽसाविति पदद्वयमनुवाद्यविधेयार्थतया विवक्षितमनुवाद्यमात्रप्रतीतिकृत् ।

तथा हि प्रक्रान्त-प्रसिद्धा-ऽनुभूतार्थविषयम् तच्छब्दो यच्छब्दोपादानं नापेक्षते । क्रमेणोदाहरणम्—

[१] कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥उदा० २५०॥

वर्तमानो यः तव दृशोर् नेत्रप्रान्तसम्बद्धं तरङ्गितं करोति, तव भ्रुवोः वक्रे प्रान्ते विलासि वेल्लितम् (इतस् ततो वलनम्) विस्तारयति, तव तनोः सर्वाङ्गव्यापकं रोमाञ्चरूपं कञ्चुकं तनोति, (असौ = सः) आगत इत्यर्थः । तत्र विधेयांशस्यानुपस्थितिं प्रदर्शयति—अत्र योऽसावित्यादिना । यस् तव एवं करोति असौ (= सः) आगत इति विवक्षया कविना य इति पदम् अनुवाद्यार्थतया असौ इति पदं विधेयार्थतया उपात्तम्, किन्तु यच्छब्दसन्निहिता इदमेतददश्शब्दा यच्छब्दोपस्थाप्यस्य अनुवाद्यस्यैव सान्निध्यप्रसिद्ध्यादिकं बोधयन्ति इति अनुवाद्यस्यैव विशेषणरूपा न विधेयस्येति अत्र योऽसाविति पदद्वयमनुवाद्यमात्रप्रतीतिकृदिति 'योऽसौ आगतः सन् तव एवं करोति' इत्येतादृशोऽनुवाद्यस्यैवार्थस्योपस्थित्या विधेयांशस्योपस्थितेरभावाद् यच्छब्दस्य साकाङ्क्षतया वाक्यगतं विधेयाविमर्शत्वमत्र बोध्यमित्याशयः । प्रयुञ्जते हि कवयः इदमेतददश्शब्दान् यच्छब्दसन्निहितान् अनुवाद्यविषयतयैव, तथा—"यदेतच्चन्द्रान्तर् जलदलवलीलां वितनुते, तदाचष्टे लोकः शशक इति" इति, "युधि योऽसौ विजयार्जुनैकमल्ल." इत्यादि च ॥उदा० २४१॥

ननु यद्यपि 'यत्तदोर्नित्योऽभिसम्बन्धः' इति प्रवादम् तथापि केवलस्य तच्छब्दस्य यच्छब्दस्य च कुत्रचिद् निराकाङ्क्षत्वं दृश्यते इति अत्राऽपि तथैव निराकाङ्क्षत्वं किं न स्याद् इत्याशङ्कायां यादृशे स्थले केवलस्यापि तच्छब्दस्य यच्छब्दस्य च निराकाङ्क्षत्वं भवति नेदं तादृशं स्थलम् इति प्रदर्शयितुं यादृशे स्थले केवलस्यापि तच्छब्दस्य यच्छब्दस्य च निराकाङ्क्षत्वं भवति तादृशानि स्थलानि परिगणय्य प्रदर्शयति—**तथाही**-त्यादिना । तथाहीत्यतः पूर्वं लेखकप्रमादात् किञ्चिद् हीनं प्रतिभाति, प्रतिज्ञातस्यैव प्रपञ्चने एव वा **तथाही**त्यस्य प्रयोज्यत्वाद्; न चाऽत्र प्रतिज्ञोपलभ्यते । अतएव अथ तथाहीत्यतः पूर्वं 'न चाऽत्र तच्छब्दोपादानं विनाऽपि यच्छब्दस्य निराकाङ्क्षत्वं किं न स्यादिति वाच्यम्, यत्तदोः केवलयोर् निराकाङ्क्षतायाः क्वाचित्कत्वात्' इति पाठः कल्पनीयः । अथवा मम्मटशैलीदोष एवाऽयं यदयं यत्र तत्र अस्फुटमल्पतरञ्च वक्ति । तत्र प्रथमं यच्छब्दोपादानं विनाऽपि निराकाङ्क्षस्य तच्छब्दस्य स्थलान्याह—**प्रक्रान्ते**-त्यादिना । यत्र तच्छब्दः [१] प्रक्रान्तार्थविषयः (पूर्वोपात्तार्थविषयः), [२] लोकप्रसिद्धार्थविषयः [३] अनुभूतार्थविषयको वा भवति तत्र तच्छब्दो यच्छब्दोपादानं नापेक्षते इत्यर्थः ।

क्रमेण एकैकमुदाहरणमाह तत्र [१] प्रक्रान्तार्थविषयं यच्छब्दोपादानानपेक्षिणं

[२] द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस् त्वमस्य लोकस्य
च नेत्रकौमुदी ॥उदा० २५१॥

[३] उत्कम्पिनी भयपरिस्खलितांशुकान्ता ते लोचने प्रतिदिशं विधुरे क्षिपन्ती ।
क्रूरेण दारुणतया सहसैव दग्धा धूमान्धितेन दहनेन न वीक्षिताऽसि
॥उदा० २५२॥

यच्छब्दस्तु उत्तरवाक्यगतत्वेनोपात्तः सामर्थ्यात् पूर्ववाक्यगतस्य तच्छब्द-
स्योपादानं नापेक्षते, यथा—

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके ।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः ॥उदा० २५३॥

तच्छब्दमुदाहरति—**कातर्यं**मित्यादिना । रघुवंशे पद्यमिदम् (१७।४७) । शौर्यरहिता सामदानादिप्रयोगमात्ररूपा नीतिः कातरत्वमेव, नीतिरहितं केवलं शौर्यमपि कुक्कुर-शृगालादिकर्तृत्वमेव, अतः स पूर्वोक्तनामा [अतिथिनाम राजा] संयुक्ताभ्यामुभाभ्यां नीतिशौर्याभ्यां कार्यसिद्धिम् अन्विष्टवानित्यर्थः । अत्र स इति तच्छब्दः प्रक्रान्तार्थविषयक इति यच्छब्दोपादानं नापेक्षते इति बोध्यम् ॥उदा० १५०॥

[२] प्रसिद्धार्थविषयकं यच्छब्दोपादानानपेक्षिणं तच्छब्दमुदाहरति—**द्वयंगत**मित्यादिना । कुमारसम्भवे पद्यमिदम् (५।७१) । कपालिनो भूतेशस्य समागमस्य प्रार्थनया क्रियमाणया **सा प्रसिद्धा** प्रागेव भूतेशशिरोगता चन्द्रस्य कान्तियुक्ता कला अस्य लोकस्य नेत्रानन्दिनी त्वं चेति द्वयम् इदानी शोच्यतां गतमित्यर्थः । अत्र सा इति तच्छब्दः प्रसिद्धार्थविषयकत्वाद् यच्छब्दोपादानं नापेक्षते इति बोध्यम् ॥उदा० २५१॥

[३] अनुभूतार्थविषयकं यच्छब्दानपेक्षिणं तच्छब्दमुदाहरति—**उत्कम्पिनी**त्यादिना । तापसवत्सराजे (२।१६) दग्धत्वेन सम्भावितां वासवदत्तां प्रति वत्सराजस्योक्तिरियम् । उद्गतकम्पवती भयपरिस्खलितोत्तरीयप्रान्ता **ते मयाऽनुभूते (वारं वारं दृष्टे) विधुरे** कातरे लोचने प्रतिदिशं रक्षकदर्शनलोभेन क्षिपन्ती त्वं **क्रूरेण** प्रवृद्धत्वात् कठोरेण अग्निना निष्करुणतया विचारं विनाऽकस्मादेव दग्धाऽसि, धूमेनान्धतां प्राप्तेन दहनेन त्वं न दृष्टाऽसि, यदि दृष्टा अभविष्यः तर्हि तव सौन्दर्येण मुग्धः सोऽपि त्वां नाऽधक्ष्य-दित्यर्थः । अत्र ते इति तच्छब्दोऽनुभूतार्थविषय इति यच्छब्दोपादानं नापेक्षते इति बोध्यम् ॥२५२॥

तच्छब्दस्य क्वचिद् यच्छब्दोपादानानपेक्षत्वं प्रतिपाद्य यच्छब्दस्यापि तच्छब्दोपादाना-नपेक्षत्वं क्वाचित्कं प्रतिपादयति—**यच्छब्दस्तु** इत्यादिना । अर्थतः पूर्वस्मिन्नपि शब्दतः पश्चादुपात्ते वाक्ये प्रयुक्तो यच्छब्दः अर्थतः परस्मिन्नपि शब्दतः पूर्वमुपात्ते वाक्ये तच्छब्दं सहसैवाक्षेप्तुमलमिति तच्छब्दोपादानं नापेक्षते इत्यर्थः । उदाहरति—**साधुचन्द्रमसी**-

प्रागुपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकाङ्क्षः यथात्रैव श्लोके अन्यद्वितीयपादयोर्व्यत्यासे ।

द्वयोरुपादाने तु निराकाङ्क्षत्वं प्रसिद्धम् । अनुपादानेऽपि सामर्थ्यात् क्वचिद् द्वयमपि गम्यते, यथा—

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ उ० २५४ ॥

त्यादिना । अभिनन्दकृते रामचरिते पद्यमिदम् । सौन्दर्येणाऽधिके चन्द्रमसि उदिते सति पद्मैर्यद्मुकुलितं तत् समीचीनं कृतम्, तेन उदयं प्राप्नुवता चन्द्रमसा तु नित्यं जयेन युक्ते कामिनीमुखे पराभवकरणप्रयत्नेन धाष्टर्य कृतमित्यर्थः । पुनःशब्दोऽत्र तु-शब्दार्थे । अत्र 'अभिरामताधिके चन्द्रमसि (उदिते सति) पुष्करैर्यद् मीलितम्' इत्यस्मिन् शब्दतः पश्चादुपात्ते वाक्ये वर्तमानो यच्छब्दः 'साधु कृतम्' इत्यस्मिन् शब्दतः पूर्वमुपात्ते वाक्ये तच्छब्दं सहजैवाऽऽक्षेप्तुं समर्थ इति तच्छब्दोपादानं नापेक्षते इति बोध्यम् ॥उदा० २५३॥

यच्छब्दस्य तच्छब्दानपेक्षत्वं क्वाचित्कमिति स्फुटं कर्तुमाह—प्रागुपात्त इत्यादि । शब्दतोऽपि पूर्वस्मिन् वाक्ये उपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकाङ्क्ष एव भवति, यथा—"**मीलितं यदभिरामताधिके साधु चन्द्रमसि पुष्करैः कृतम् । उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः**" इति पाठे । एतादृश एव पाठः कृतोऽभूत् कविना प्राक्, किन्तु तत्र काव्यमीमांसकानां विमतिं दृष्ट्वा—"**सङ्कुचद्भिरभिरामताधिके साधु चन्द्रमसि पुष्करैः कृतम् । उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः**" इति पाठसंशोधनं कृत्वा कविना आलोचनोपयोगः सम्यक् कृत इति तद्विमर्शकाः ।

प्रसङ्गात् प्रतिपादितसाकाङ्क्षत्वप्रत्युदाहरणरूपेण वा आह—**द्वयोरुपादाने तु** इत्यादि । यत्र तु यत्-तदोर् द्वयोरप्युपादानं तत्र "यदुवाच न तन्मिथ्या यद् ददौ न जहार तत्" (रघु० १७।४२) इत्यादौ यदः तदो वाऽपि निराकाङ्क्षत्वं प्रसिद्धमेवेत्यर्थः । यत्र यत्-तदोर् द्वयोरपि अनुपादानं तत्राऽपि सति आर्थे यत्-तदोरभिसम्बन्धे यत्-तद्-द्वयमपि आक्षिप्यते इति प्रत्युदाहरणप्रकारान्तरमपि निर्दिशति—**अनुपादानेऽपीत्यादिना** । यत्-तदोरुभयोरनुपादानेऽपि सामर्थ्यात् क्वचिद्द्वयमपि गम्यते इत्यत्रोदाहरणमाह—**ये नामे**-त्यादिना । **मालतीमाधवे पद्यमिदम्** (१।७) यद्यपि अस्य पद्यस्य पूर्वार्धमुभयोरुपादाने निराकाङ्क्षताया उदाहरणं भवति तथापि उभयोरुपादाने निराकाङ्क्षतायाः प्रसिद्धतरत्वाद् न तदुदाहरणार्थमिदं पद्यम्, "अत्र य उत्पत्स्यते तं प्रतीति" इत्येव वृत्तौ निर्देशात् । ये नाम केचिद् (इदानीन्तना अस्मद्देशजाः सर्वे) मम अवहेलनं कुर्वन्ति, ते किमपि जानन्ति (वस्तुतः ते) किमपि न जानन्ति, अतः तान् प्रति एष मालतीमाधवप्रकरणरचनारूपी यत्नो न, न बधिरे गीयते इति न्यायात्, किन्तु कालोऽयं निरवधिः अतः

अत्र य उत्पत्स्यते तं प्रतीति।

एवं च तच्छब्दानुपादानेऽत्र साकाङ्क्षत्वं प्रसिद्धम्।

न चासाविति तच्छब्दार्थमाह।

"असौ मरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमण्डलाग्रणीः।

वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः" (उदा० २५५)।

अत्र हि न तच्छब्दार्थप्रतीतिः, प्रतीतौ वा

"करवालकरालदोःसहायो युधि योऽसौ विजयार्जुनैकमल्लः।

यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं स्यात्" (उदा० २५६)

इत्यत्र स इत्यस्यानर्थक्यं भवेत्। अथ

"योऽविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः।

स्वात्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम्" (उदा० २५७)

इति इदंशब्दवद् अदश्शब्दः तच्छब्दार्थमभिधत्ते इत्युच्यते तर्हि अत्रैव

कदाचिद् मम तुल्यगुणो य उत्पत्स्यते तं प्रति; पृथ्वी च विपुलाऽस्ति अतः इदानीमपि कुत्रचिद् देशे मत्तुल्यगुणो यो भवति तं प्रति च मम एष यत्न इत्यर्थः। उदाहरणत्वं सङ्गमयति—**अत्र य** इत्यादिना ॥ उदा० २५४ ॥

यत्-तदोः साकाङ्क्षत्वस्य निराकाङ्क्षत्वस्य च स्थलानि विविच्य अपाङ्गसंसर्गीत्यादौ (उदा० २४९) यच्छब्दानुपादाने तच्छब्दस्योपादानाभावाद् साकाङ्क्षत्वं प्रकृतदोषस्वरूपेण सिद्धमित्याह— **एवञ्चे**त्यादिना।

ननु यच्छब्दाकाङ्क्षापूरणाय इदमेतददश्शब्दानां प्रयोगोऽपि क्रियते कविभिः, अत्रापि (अपाङ्गसंसर्गीत्यादौ) अदश्शब्दः प्रयुक्त एवेति कथं यच्छब्दस्य साकाङ्क्षत्वं कथं वा दोष इत्याशङ्कां समाधत्ते —**न चासावितीत्यादिना**। इदमेतददश्शब्दाः तच्छब्दार्थं नाऽभिदधति, **असौ मरुच्चुम्बिते**त्यादौ अदश्शब्दात् तच्छब्दार्थस्याऽप्रतीतेः, यदि इदमेतददश्शब्दाः तच्छब्दार्थमभिदध्युः तदा **करवालकराले**त्यादौ स इत्यस्यानर्थक्यं स्यात्; अथ **योऽविकल्प**मित्यादौ यथा अस्येति इदंशब्दस्तच्छब्दार्थमभिधत्ते तथैव अदश्शब्दोऽपि तच्छब्दार्थमभिधत्ते इति अपाङ्गसंसर्गीत्यादौ अदश्शब्देन यच्छब्दाकाङ्क्षायाः पूरणात् कथं दोषस्तत्र प्रदर्श्यते इत्युच्यते तर्हि यथा अत्र **योऽविकल्पमि**त्यादौ पूर्ववाक्ये उपात्तस्य यच्छब्दस्य आकाङ्क्षां पूरयितुम् इदंशब्द उत्तरवाक्ये उपात्तस्तथैव अपाङ्गसंसर्गीत्यादौ अपि अदश्शब्दो वाक्यान्तरे उपादानमर्हति, यच्छब्दाकाङ्क्षापूरणाय प्रयुक्तोऽदश्शब्द अपाङ्गसंसर्गीत्यादौ इव यस्मिन् वाक्ये यच्छब्दस्योपादानं **तत्रैव** वाक्ये उपादानं नार्हतीत्यर्थः। एवं च इदमेतददश्शब्दा उत्तरवाक्ये उपात्ता एव पूर्ववाक्ये उपात्तस्य यच्छब्दस्याकाङ्क्षा पूरयितुं शक्नुवन्ति, नतु यस्मिन्नेव वाक्ये यच्छब्दोपादानं तस्मिन्नेव वाक्ये उपात्ता इति, अपाङ्गसंसर्गीत्यादौ तु यददसोरव्यवधानेन समानलिङ्गविभक्तिवचनकत्वेन चैक-

यथा वा—

> किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
> मात्रा स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा।
> मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्यानुजोऽसौ गुरुर्
> माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम् ॥ उदा० २६० ॥

अत्रार्यस्येति तातस्येति च वाच्यम् न त्वनयोः समासे गुणीभावः कार्यः। एवं समासान्तरेऽपि उदाहार्यम्।

इति पूर्वस्मिन् वाक्ये उपात्तयोर् द्वयोर् यच्छब्दयोरेकतरस्य आकाङ्क्षायाः पूर्तये उत्तर-वाक्ये एकस्य तच्छब्दस्य उपात्तत्वेऽपि द्वितीयस्य तच्छब्दस्य अनुपादानाद् द्वितीयस्य यच्छब्दस्य साकाङ्क्षत्वमापद्यते, न च साकाङ्क्षता प्रतीतिस्तत्र भवतीति शङ्कामुत्थाप्य समाधत्ते—**ननु कथमित्यादिना**। प्रश्नाभिप्रायं प्रकाशयति—**अत्र हीत्यादिना**। एवं च ननु कथं कल्याणानामित्यादौ पूर्ववाक्ये यद् यद् इत्युक्त्वा उत्तरवाक्ये तत् मे इत्युक्त-मिति प्रश्नस्याशयः। यदि पूर्ववाक्यगतस्य सर्वस्य यच्छब्दस्य प्रत्येकम् उत्तरवाक्यगततच्छ-ब्दाकाङ्क्षा तर्हि कल्याणानामित्यादौ **यद् यद्** इति द्वयोर् यच्छब्दयोः **तद् (मे)** इत्येकेनैव तच्छब्देन कथं निराकाङ्क्षत्वमिति प्रश्नस्य हृदयम्। मालतीमाधवे सूत्रधारकृतसूर्यप्रार्थ-नारूपस्य **कल्याणानामित्यादि**पद्यस्य अर्थस्तु—हे विश्वमूर्ते सर्वात्मक सूर्य, त्वं कल्याण-कारकाणां तेजसां पात्रमसि, त्वं भक्तानां पुण्यां सम्पत्तिं करोषि, अथ नाट्यारम्भे नाट्य-[illegible] मयि दृष्टिं देहि; हे देव, प्रसीद; हे जगन्नाथ, प्रणतस्य मे कायिकं वाचिकं मानसं ज्ञात्वाऽज्ञात्वा वा कृतं यद् यत् पापं तद् बाधस्व, हे भगवन्, भूरिणे आशंसनीयाय शुभाय भद्रं निर्दोषम् भद्रम् अभीष्टमर्थं देहीति। अत्र यद् यद् इत्यनेन कायिकं वाचिकं मानसं चानेकात्मकतां प्राप्तं सर्वावस्थं पापमनूद्यते, तथाभूतमेव च पापं तच्छब्देन परामृश्यते इति यद्यदित्यस्य तदित्यनेन निराकाङ्क्षत्व-मेवेत्याह—**उच्यते यद्यदितीत्यादिना**। **यत्पदार्थस्तत्पदेन परामृश्यते** इत्येव नियमो न तु **यावन्तो यच्छब्दास्तावन्त एव तच्छब्दा** इति नियमः इति मम्मटस्याऽभिप्रायः प्रतीयते। वस्तुतस्तु यद्यदिति न पदद्वयं किन्तु वीप्सार्थको द्वित्वमापन्न एक एव यच्छब्दादेशोऽयमिति न काऽपि शङ्का, यच्छब्दादेशेनैव वीप्सायां प्रतीतायां तच्छब्दस्य द्वित्वापन्नादेशाभावोऽप्यु-चित एवेतिचान्ये वदन्ति ॥ उदा० २५९ ॥

समस्तानामपि अनेकेषां पदानां दुष्टत्वे वाक्यगतमविमृष्टविधेयांशत्वं सम्भवतीति व्युत्पादनाय उदाहरणान्तरमाह—**यथा वेति**। रामवनवासविषये लक्ष्मणस्य वितर्को-क्तिरियम् अनिश्चिताकारा नाट्यदर्पण-दशरूपकावलोक-व्यक्तिविवेकेषूदाहृता। स विनया-र्जवादिगुणवत्त्वेन प्रसिद्धो भरतो लोभेन आक्रान्तः किम् येन मात्रा द्वारभूतया एतद् रामवनप्रस्थापनरूपं कार्यमेवम्प्रकारेण कपटं कृत्वा तेन कृतम्; अथवा न भरतेनेदं कृतम्,

किन्तु मे मध्यमा मातैव कैकेयी सर्वामुलभा अजाता गता यथा एतत् सर्वं कृतम्; अथवा मम एतत् कुर्वता भर्त्रेनैतदेवं कृतम्' इति सर्वोऽलघुना गतया मध्यमया मात्रैवैतत् कृतम्' इति च द्वयमपि चिन्तितं मिथ्या यतोऽसौ गुरुः (मम ज्येष्ठो भ्राता भरतः) आर्यस्य (श्रीरामरूपस्य अग्रजस्य) अनुजः, मध्यमा माता च तातस्य (अस्मज्जनकस्य [महापुरुषस्य]) कलत्रम्, अतोऽनयोर्द्वयोरपि एतत्कार्यकारित्वमसम्भवि, अत इदमनुचितं कार्यं नूनं विधात्रैव कृतमित्यर्थः। अत्र उत्कर्षाधायकत्वेन विधित्सितस्य विशेषणत्वेन शब्दतो गुणीभूतस्यापि अर्थतः प्रधानस्य आर्यसम्बन्धरूपस्य तातसम्बन्धरूपस्य च विशेषणस्य 'आर्यस्य अनुजः' इति 'तातस्य कलत्रम्' इति असमस्तेन पदेनाऽभिधानं युक्तम्, यथा—'रामस्य बाहुरसि' (उ० रा० च० ४।१०) इत्यादौ, 'स्कन्दस्य मातुः पयसां रसज्ञः' (रघु० २।३६) इत्यादौ; अत्र तु सम्बन्धरूपस्य विशेषणस्य समासेन गुणीभावाद् अविमृष्टविधेयांशता बोध्येत्याशयेनाह—अत्रार्यस्येत्यादि। यद्यपि समस्त-पदद्वयनिष्ठत्वेन वाक्यदोषत्वमिति विचारः, [illegible] 'स रातु वो दुश्च्यव-नः' इत्यादौ (उदा० २०६) इव अत्राऽपि दुष्टपदद्वयगतत्वेनैव वाक्यदोषता मम्मटस्या-भिप्रेता इति ज्ञायते उद्देश्यविधेय[illegible] वाक्यगतदोषत्वे पदगतमविमृष्ट-विधेयांशत्वमेव ग्रन्थकृतोक्तमसङ्गतं स्यात् उद्देश्यविधेयभावगतदोषं विहाय अविमृष्टवि-धेयांशत्वस्य कुत्राप्यसम्भवात् ॥ २३० ॥

तत्पुरुषसमासविषये वाक्यगताविमृष्टविधेयांशत्वमुदाहृत्य एवमेव अन्यसमास-विषयेऽपि वाक्यगताविमृष्टविधेयांशत्वं बोध्यमित्याह—**एवं समासान्तरेऽपि उदाहार्यम्** इति। तत्र च तृतीयातत्पुरुष-कर्मधारय-द्विगु-बहुव्रीहि-द्वन्द्वानाम् उदाहरणानि च व्युत्पित्सु-हिताय सङ्गृह्यन्ते। तत्र—

(क) तृतीयासमासे यथा—"धात्रा स्वहस्तलिखितानि ललाटपट्टे को वाऽक्षराणि परिमार्जयितुं समर्थः" इति। अत्र स्वहस्तेनेति वाच्यम्।

(ख) कर्मधारये यथा—"तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि। तं च संहितममोघमाशुगं व्याजहार हरसूनुसन्निभः" इति (रघु० ११।८३), अत्र अमोघमाशुगमिति वक्तव्यम्, न तु अमोघस्य प्राधान्येन विवक्षितस्य कर्मधारये गुणी-भावो न्याय्यः।

(ग) द्विगौ यथा—"ब्रह्मा विष्णुश्च रुद्रश्च त्रिलोकीमधिकुर्वते" इति। अत्र त्रीन् लोकान् इति युक्तः पाठः।

(घ) बहुव्रीहौ यथा—"यः स्थलीकृतविन्ध्याद्रिराक्रान्तपयोनिधिः। यश्च तापित-वातापिः स मुनिः श्रेयसेऽस्तु वः" इति। अत्र "येन स्थलीकृतो विन्ध्यो येनाऽऽक्रान्तः पयोनिधिः। वातापिस् तापितो येन स मुनिः श्रेयसेऽस्तु वः" इति युक्तः पाठः।

(ङ) द्वन्द्वे यथा—"सीताया ऊर्मिलायाश्च सदृशौ रामलक्ष्मणौ" इति अत्र "सीतायाः सदृशो राम ऊर्मिलायाश्च लक्ष्मणः" इति वक्तव्यम्।

[वाक्यगतं विरुद्धमतिकृत्त्वं यथा—]

श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्तयः ।
विग्रहक्षपणेनाद्य शेरते ते गतासुखाः ॥ उदा० २६१ ॥

अत्र क्षमादिगुणयुक्ता सुखमासते इति विवक्षिते हता इति विरुद्धा प्रतीतिः ।

पदैकदेशे यथासम्भवं क्रमेणोदाहरणम्—

[पदैकदेशगतं श्रुतिकटुत्वं यथा—]

अलमतिचपलत्वात् स्वप्नमायोपमत्वात्,
परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः ।
इति यदि शतकृत्वस् तत्त्वमालोचयामस्
तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥ उदा० २६२ ॥

अत्र त्वादिति । यथा वा—

वाक्यगतं विद्धमतिकृत्त्वम् उदाहरति—**श्रितक्षमाः** इत्यादिना । आश्रितक्षान्तयः अनुरक्तजनपदा कल्याणालिङ्गितशरीरा सामाद्युपायलब्धसिद्धयस् ते राजान विग्रहस्य (युद्धस्य) क्षपणेन (त्यागेन) गतम् असुखं येषां ते तादृशाः सन्तः अद्य शेरते इत्यर्थो विवक्षितः । किन्तु भूमिं श्रिता रक्तोद्गमस्थानभूताः श्रृगालीसमाक्रान्तशरीरास् ते राजानो विग्रहस्य (शरीरस्य) नाशेनाऽद्य गतप्राणेन्द्रियाश्च (हताः) सन्तः शेरते इति उक्तविवक्षितार्थविरुद्धोऽर्थः प्रतीयते इति वाक्येऽत्र विरुद्धमतिकृत्त्वं बोध्यमित्याशयेनाह—**अत्र क्षमादी**त्यादि ॥ उदा० २६१ ॥

"पदस्यांशेऽपि केचन" (सू० ७५) इतिकारिकांशस्य विवरणायाह—**पदैकदेशे** इत्यादि । तत्र १. श्रुतिकटुत्वम्, २. निहतार्थत्वम्, ३. निरर्थकत्वम्, ४. अवाचकत्वम्, ५. अश्लीलत्वं त्रिविधम्, ६. सन्दिग्धत्वम्, ७. नेयार्थत्वम् च पदस्यांशेऽपि भवन्तीति बोध्यम् ।

[१] पदैकदेशगतं श्रुतिकटुत्वमुदाहरति—**अलमतिचपलत्वा**दित्यादिना । विह्लणचरिते (५८) पद्यमिदम् । अङ्गनायाः सङ्गमस्य अतिचपलत्वात् स्वप्नमायातुल्यत्वात् परिणामविरसत्वाच्च अङ्गनायाः सङ्गमेन अलम् इति यदि शतवारमपि वस्तुस्वभावमालोचयामस्तथापि बाह्यैर्वाक्यादिभिरङ्गनाया निन्दायां कृतायामपि अन्तर्गतं चेतो हरिणाक्षीं न विस्मरतीत्यर्थः । अत्र त्वादिति श्रुतिकटु इत्याह—**अत्र** त्वादिति । पदाक्षरेषु कस्यचित् कटुत्वे पदैकदेशगतं श्रुतिकटुत्वं बोध्यम् । वस्तुतस्तु त्वादिति न श्रुतिकटु किन्तु तत् पुनः पुनः कथितं सद्दुष्टं बोध्यमत्र ॥ उदा० २६२ ॥

तद् गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरलभ्य एव ।
अपेक्षते प्रत्ययमङ्गलब्ध्यै बीजाङ्कुरः प्रागुदयादिवाम्भः ॥ उदा० २६३ ॥
अत्र द्ध्यै ब्ध्यै इति श्रुतिकटु ।
[पदैकदेशगतं निहतार्थत्वं यथा—]
यश्चाप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर् बिभर्ति ।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम् ॥ उदा० २६४ ॥
अत्र मत्ता शब्दः क्षीबार्थेन निहतार्थः ।

[पदैकदेशगतं निरर्थकत्वं यथा—]
आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्पद्-विरहानलेन च ततः सन्तापितानां दृशाम् ।
सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा ॥ २६५ ॥

अत्र दृशामिति बहुवचनं निरर्थकम्, कुरङ्गेक्षणाया एकस्या एवोपादानात् । नच "अलसवलितैः प्रेमार्द्रार्द्रैः" इत्यादिवद् (उदा० २६६) व्यापारभेदाद् बहुत्वं

पदैकदेशगतश्रुतिकटुत्वस्योदाहरणान्तरमाह—**तद् गच्छेत्यादि** । कुमारसम्भवे (३।१८) पद्यमिदम् हे काम, त्वं तस्मात् कार्यसिद्ध्यर्थ गच्छ, स्कन्दोत्पादनसाहाय्य-करणेन देवकार्य कुरु, स्कन्दोत्पादनरूपोऽयमर्थो यद्यपि महादेवपार्वतीसङ्गमरूपेण अर्थान्तरेण निष्पाद्यस्तथापि यथा वीजजन्योऽप्यङ्कुर उदयात् प्राग् उदयाय जलमपेक्षते तथैवायमप्यर्थः स्वरूपसम्पत्त्यै निमित्तकारणं त्वामपेक्षते इत्यर्थः । प्रतीयते यस्मात् कार्यमिति प्रत्ययः कारणम् । अत्र दोषं प्रदर्शयति—**अत्र द्ध्यै ब्ध्यै इति श्रुतिकटु** इति ॥ उदा० २६३ ॥

[२] पदैकदेशगतं निहतार्थत्वमुदाहरति—**यश्चाप्सर** इत्यादिना । कुमारसम्भवे पद्य-मिदम् (१।४) । यो हिमालयोऽप्सरसा विलासार्थकानां तिलकपत्रकादीनाम् अलङ्काराणां सम्पादयित्रीं मेघखण्डेषु सङ्क्रमय्य विभक्तो रागो यया ताम् मध्याह्नादावपि सन्ध्या-भ्रमस्य जननाद् अकालसन्ध्यामिव भासमानां धातुमत्तां शिखरैर् बिभर्ति स हिमालय उत्तरस्यां दिशि अस्तीत्यर्थः । अत्र पदैकदेशरूपस्य मत्ता-शब्दस्य मतुबुत्तरतल्प्रत्ययरूपस्य विवक्षितोऽर्थः । सुप्रसिद्धेन क्षीबा इत्यर्थेन तिरोहित इति मत्ता-शब्दः पदांशरूपो निहतार्थ इत्याह—**अत्र मत्ते**त्यादिना ॥ उदा० २६४ ॥

[३] पदैकदेशगतं निरर्थकत्वमुदाहरति—**आदावञ्जनपुञ्जे**त्यादिना । भाविनं विरहं विचार्य रुदत्याः कस्याश्चित् वर्णनमिदम् । इयं मृगाक्षी पूर्वम् अञ्जनपुञ्जलिप्तवपुषां ततः श्वासानिलोल्लासितेन प्रोत्सर्पता विरहानलेन सन्त्रासितानां नयनानाम् सम्प्रत्येव अश्रुपयसा अतिशयेन निषेकं मनसिजस्य देवस्य भल्लीनां पानकर्म इव कुरुते इत्यर्थः ।

व्यापाराणामनुपात्तत्वात्। न च व्यापारेऽत्र दृक्शब्दो वर्तते। अत्रैव कुरुते इत्यात्मनेपदमप्यनर्थकम्, प्रधानक्रियाफलस्य कर्त्रसम्बन्धे कर्त्रभिप्रायक्रियाफला-भावात्।

[पदैकदेशगतम् अवाचकत्वं यथा—]

चापाचार्यस् त्रिपुरविजयी कार्त्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर् भूरियं हन्तकारः।
अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस् तव परशुना लज्जते चन्द्रहासः॥ उदा० २६७॥

अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः।

तत्र दोषं प्रदर्शयति—**अत्र दृशामि**त्यादिना। "अलसवलितैः प्रेमार्द्रार्द्रैर् मुहुर् मुकुलीकृतैः क्षणमभिमुखैर् लज्जालोलैर् निमेषपराङ्मुखैः। हृदयनिहितं भावाकूतं वदद्भिरिवेक्षणैः कथय सुकृती कोऽयं मुग्धे त्वयाऽद्य विलोक्यते" इति अमरुशतकपद्ये यथा ईक्षणव्यापारा उपात्ता न तथात्रेति **नचालसे**त्यादेरर्थः। अत्र दृक्शब्दस्य व्यापाराऽवाचित्वम्, व्यापारवा-चित्वे अञ्जनपुञ्जलिप्तवर्णामित्यादिविशेषणानामनन्वयस्य [illegible] **न च व्यापारे** इत्यादि। अन्यस्मिन्नपि पदांशे दोषं दर्शयति—**अत्रैव कुरुते** इत्यादिना। प्रधानस्य क्रियाफलस्य मल्लीनानकमसाध्यमन्मथसन्दर्भितजगद्विजयलक्षणस्य मृगनयना-गतत्वेन अनभिप्रेतत्वात् क्रियाफलस्य कर्त्रभिप्रायत्वाभावाद् नात्मनेपदप्रयोगः सार्थक इत्याह—**प्रधानक्रियाफलस्ये**त्यादिना। न चाऽत्र अनुनाथते इत्यत्र (उदा० २०६) इव च्युतसंस्कृतित्वम्, कामदेवगतस्याऽपि फलस्य नायिकायामारोपेण साधुत्वस्य सुवचत्वात्, आरोपफलाभावात्तु निरर्थकत्वं सुस्थम्। न चात्र इव अनुनाथते इत्यत्रापि पदांशदोषत्वं तत्र प्रकृत्यर्थासम्भवप्रयुक्तत्वेन पदस्यैव दुष्टत्वात्, अत्र तु प्रकृत्यर्थदोषाभावाद् न पद-दोषत्वम्, किन्तु प्रत्ययमात्रस्य दुष्टत्वात् पदांशदोषत्वमेव॥ उदा० २६५॥

[४] पदांशगतम् अवाचकत्वम् उदाहरति—**चापाचार्ये**त्यादिना। बालरामायणे (२।३७) परशुरामं प्रति रावणस्योक्तिरियम्। तव धनुर्विद्यागुरुस् त्रिपुरविजयी हरः, त्वया कार्त्तिकेयो विजितः, त्वया शस्त्रेण स्वस्थानाद्दूरमुत्क्षिप्तः समुद्रस् तव गृहम्, इयं सर्वाऽपि भूस् तव अतिथये देया षोडशग्रासात्मिका भिक्षा इव इति एतत् सर्वं तव उत्कर्षचिह्न-मस्त्येव, किन्तु त्वन्मातुः रेणुकाया कण्ठस्य च्छेदं कृतवता तव परशुना पूर्वं बद्धस्पर्धः मम असिः एतादृशनीचकर्मकारिणाऽपि मया कदाचित् स्पर्धा कृता इति विचार्य इदानीं लज्जते इत्यर्थः। अत्र दोषं प्रदर्शयति—**अत्र विजेय** इत्यादिना। विजेयत्वेनोक्तौ उत्कर्षस्य स्फुटतया अप्रतीतेर् विजित इत्यर्थ एव विवक्षित इति क्तप्रत्ययार्थे विवक्षिते कृत्यप्रत्यय-प्रयोगोऽवाचको बोध्यः॥ उदा० २६७॥

[पदांशगतं व्रीडाश्लीलत्वं यथा—]

अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः ।
परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव ॥ उदा० २६८ ॥

अत्र पेल-शब्द ।

[पदांशगतं जुगुप्साश्लीलत्वं यथा—]

यः पूयते सुरसरिन्मुखतीर्थसार्थ-स्नानेन शास्त्रपरिशीलनकीलनेन ।
सौजन्य-मान्य जनिरूर्जितमूर्जितानां सोऽयं दृशोः पतति कस्यचिदेव पुंसः ॥
॥ उदा० २६९ ॥

अत्र पूय-शब्द ।

[पदांशगतम् अमङ्गलाऽश्लीलत्वं यथा—]

विनयप्रणयैककेतनं सततं योऽभवदङ्ग तादृशः ।
कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः ॥ उदा० २७० ॥

अत्र प्रेत-शब्दः ।

[पदांशगतं सन्दिग्धत्वं यथा—]

कस्मिन् कर्मणि सामर्थ्यमस्य नोत्तपतेतराम् ।
अयं साधुचरस् तस्मादञ्जलिर् बध्यतामिह ॥ उदा० २७१ ॥

[५-क] पदैकदेशगतं व्रीडादायि अश्लीलत्वम् उदाहरति—**अतिपेलवमि**त्यादिना । परोक्षे कार्यस्य हन्ता प्रत्यक्षे प्रियवादी (शठः) जनः अतिकोमलं स्वल्पं मन्दं च वदति, परमार्थतस्तु स कालकूटेन उत्कटविषविशेषेण निर्मितमिव हृदयं वहतीत्यर्थः । अतः पेलवपदांशरूपः पेलशब्दो लाटभाषायाम् पुरुषाण्डकोषवाचक इति व्रीडादायी ॥ उदा० २६८ ॥

[५-ख] पदैकदेशगतं जुगुप्सादायि अश्लीलत्वमुदाहरति—**यः पूयते** इत्यादिना । यो भागीरथ्यादितीर्थव्रातेषु स्नानेन शास्त्राणां परिशीलनेन स्थिरीकरणेन च विमलः क्रियते, यः सौजन्यमान्यजन्मा अर्जितानाम् (बलवताम्) अपि ऊर्जितम् (बलम्) अस्ति, सोऽयं महापुरुषः कस्यचित् पुण्यवतः पुरुषस्यैव दृशोः पततीत्यर्थः । अत्र **पूयते** इति पदस्यांशः पूयशब्दः कोथजन्यक्लेदप्रत्याय्यकत्वाद्जुगुप्सादायी ॥ उदा० २६९ ॥

[५-ग] पदांशगतम् अमङ्गलव्यञ्जकम् अश्लीलत्वम् उदाहरति—**विनयप्रणयैकके**तनमित्यादिना । हे सखि, यः सततं तव विनयस्य प्रणयस्य च एकमात्रं स्थानमभवत् तादृशः स इदानीं तस्यास् त्वत्सपत्न्या अभिप्रेतपदं (वशं) समागतः सन् तद्वत् प्राग्वत् कथं दृश्यताम्, किन्तु अन्यथा दृश्यते इत्यर्थः । अत्र अभिप्रेतपदमिति पदस्यांशभूतः प्रेतशब्दो मृतार्थस्मारकत्वेन अमङ्गलव्यञ्जको बोध्यः ॥उदा० २७० ॥

[६] पदांशगतं सन्दिग्धत्वम् उदाहरति—**कस्मिन् कर्मणी**त्यादिना । अस्य पुरुषस्य सामर्थ्यं कस्मिन् कर्मणि न ज्वलति ? सर्वस्मिन्नपि ज्वलत्येव; अयं पुरुषः साधुचरः, तस्माद् अस्मिन् पुरुषे अञ्जलिर् बध्यतामित्यर्थः । अत्र साधुचर इति पदस्यांशे चर-शब्दे

अत्र किं पूर्वं साधुरुत साधुषु चरतीति सन्देहः ।

[पदांशगतं नेयार्थत्वं यथा—]

किमुच्यतेऽस्य भूपालमौलिमालामहामणेः ।
सुदुर्लभं वचोबाणैस्तेजो यस्य विभाव्यते ॥ उदा० २७२ ॥

अत्र वचःशब्देन गीःशब्दो लक्ष्यते । अत्र खलु न केवलं पूर्वपदम्, यावदुत्तरपदमपि पर्यायपरिवर्तनं न सहते । जलध्यादौ उत्तर-पदमेव वडवानलादौ पूर्वपदमेव ।

दोषं दर्शयति—**अत्र किं पूर्व**मित्यादिना । भूतपूर्वे चरट् (अ० ५।३।५३) इति चरट्प्रत्ययोऽपि सम्भवति, चरेष्टः (अ० ३।२।१६) इति टप्रत्ययोऽपि सम्भवति, प्रकरणस्य चाभावाद् वक्तृतात्पर्यं सन्दिग्धमेवेत्यभिप्रायः । अत्र भूतपूर्वार्थकत्वे इदानीमसाधुत्वस्य बोधादञ्जलिबन्धविधिरसङ्गतः स्यादिति अर्थस्य निश्चयादत्र दोषो नास्तीति वक्तुं शक्यते । किन्तु कस्मिन् कर्मणीति नीचकर्मण्यपीति व्यञ्जनाद् 'दुर्जनं प्रथमं वन्दे' इति न्यायाद् नीचेऽपि अञ्जलिबन्धविधेः सम्भवात् प्रकरणाभावाच् च भवत्येव सन्देहः ॥ उदा० २७१ ॥

[७] पदांशगतं नेयार्थत्वम् उदाहरति—**किमुच्यतेऽस्ये**त्यादिना । यस्य तेजो गीर्वाणैरपि सुदुर्लभं प्रतीयते अस्य भूपालमौलिमालाया मेरुस्थानीयमहामणेः किमधिकं वर्ण्यते इत्यर्थः । अत्र दोषं प्रदर्शयति—**अत्र वचःशब्देने**त्यादिना । बाणपूर्ववर्ती गीःशब्दो वच आदिपदैःपरिवृत्तिं न सहते गीर्वाणशब्दस्यैव देवेषु रूढत्वादिति वचोबाणशब्दे वच इति पदांशो गीःशब्दं लक्षयितुं प्रयुक्तः, किन्त्वत्र लक्षणायाः "काश्चिन्नैव त्वशक्तितः" इति निषेधस्य विषयत्वाल् लक्षणायाः पदांशाश्रितत्वाच् च पदैकदेशगतं नेयार्थत्वं बोध्यमित्याशयः । [illegible] प्रदर्शितोदाहरणे लक्षणाया आश्रयणीयत्वस्य प्रदर्शनाय चाऽऽह—**अत्र खल्वि**त्यादिना । अत्र गीर्वाणशब्दे गीरिति पूर्वं पदम् बाण इति उत्तरं पदं च पर्यायेण परिवृत्तिं न सहेते इत्यर्थः । गीर्वाणशब्दस्यैव देवेषु रूढत्वाद् वचोबाण-वाग्बाणादिशब्दैः गीःशब्द-गीर्दिशिखादिशब्दैश्च न देवा अभिधीयन्ते इति बोध्यम् । एवमेवाऽन्येऽपि योगरूढाः समासशब्दा बोध्याः प्रसङ्गेनाह—**जलध्यादा**वित्यादिना । **जलध्यादौ** उत्तरपदमेव पर्यायपरिवर्तनं न सहते पूर्वपदं तु सहते, यथा जलधिः, तोयधिः, वार्धिः, पयोधिरिति । वारिनिधिः जलनिधिः पयोनिधिरित्यपि प्रयुज्यते । एवमेव जलधर-पयोधरादयो ज्ञेयाः । समुद्रे जलधर-जलदादिशब्दास्तु न प्रयुज्यन्ते । **वडवानलादिषु** यौगिकेषु शब्देषु पूर्वपदमेव पर्यायेण परिवृत्तिं न सहते, उत्तरपदं तु सहते, यथा—वडवानलः, वडवाग्निः, वडवदहन इति । **भूभृदादिशब्देषु तु पूर्वं पदम् उत्तरं पदं च पर्यायपरिवर्तनं सहते** इत्यपि बोध्यम्, यथा—भूभृत्, भूमिभृत्, क्ष्माभृत्, क्षोणिभृत्, क्षितिभृत्, उर्वीभृत्, महीभृत्, भूधरः, भूमिधरः, क्ष्माधरः, क्षोणीधरः, क्षितिधरः, उर्वीधरः, महीधरः, इत्यादयः ॥ उदा० २७२ ॥

यद्यपि असमर्थस्यैव अप्रयुक्तादयः केचन भेदाः तथापि [illegible] विभागेन प्रदर्शिता इति भेदप्रदर्शनेनोदाहृतत्वात् इति च विभज्योक्ताः ।

(सू० ७६) [1]प्रतिकूलवर्णं [2]उपहत-[3]लुप्तविसर्गं [4]विसन्धि [5]हतवृत्तम् ।
[6]न्यूनाऽधिक-[7]कथि[8]तपदं [9]पतत्प्रकर्षं [10]समाप्तपुनरात्तम् ॥५२॥
[11]अर्धान्तरैकवाचकम् [12]अभवन्मतयोगम् [13]अनभिहितवाच्यम् ।
[14]अपदस्थपद-[15]समासं [16]सङ्कीर्णं [17]गर्भितं [18]प्रसिद्धिहतम् ॥५३॥
[19]भग्नप्रक्रम[20]मक्रम[21]ममतपरार्थं च वाक्यमेव तथा ।

[१] रसानुगुणत्वं वर्णानां वक्ष्यते, तद्विपरीतं प्रतिकूलवर्णम् । यथा शृङ्गारे—

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम् ।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥ उदा० २७३ ॥

अत्र काव्यदोषनिरूपणे निरूपितानामपि च्युतसंस्कृतासमर्थानुचितार्थवाचकाश्लील-सन्दिग्धाप्रतीतक्लिष्टाविमृष्टविधेयांशविरुद्धमतिकृतां दोषाणां काव्यभिन्ने भाषाप्रयोगेऽपि परिहरणीयत्वं बोध्यम् ।

ननु अवाचक-निहतार्थ-नेयार्थेष्वपि विवक्षितार्थबोधनसामर्थ्याभावाद् असमर्थभेदा एव तेऽपीति कथं तेषां पृथक् पृथक् प्रतिपादनं कृतमित्यत्राह—**यद्यपीत्यादि** । रुद्रटेन (६।२–७) इमे असमर्थभेदा विभागेनोदाहृताः, भोजेन च सरस्वतीकण्ठाभरणे पृथग्दोषत्वेनैव प्रतिपादिता इति बोध्यम् । व्युत्पित्सुहिताय विभागेनैव प्रतिपादनं युक्तम्, अन्यथा रसापकर्षकत्वेन दोषैकध्यमेव प्रतिपादनीयमिति प्रसज्येतेति भावः । (सू० ७५) ।

अथ वाक्यमात्रगतान् दोषान् प्रदिदर्शयिषुराह—**प्रतिकूलवर्णमित्यादि** । १. प्रतिकूलवर्णं वाक्यम्, २. उपहतविसर्गं वाक्यम्, ३. लुप्तविसर्गं वाक्यम्, ४. विसन्धि वाक्यम्, ५ हतवृत्तं वाक्यम्, ६. न्यूनपदं वाक्यम्, ७. अधिकपदं वाक्यम्, ८. कथितपदं वाक्यम्, ९. पतत्-प्रकर्षं वाक्यम्, १०. समाप्तपुनरात्तं वाक्यम्, ११. पद्यार्धान्तरगताऽर्धान्तरान्वय्येकमात्रपदं वाक्यम्, १२. अभवदिष्टान्वयं वाक्यम्, १३. अनभिहितवाच्यं वाक्यम्, १४. अस्थानस्थपदं वाक्यम्, १५. अस्थानस्थसमासं वाक्यम्, १६. सङ्कीर्णं वाक्यम्, १७. गर्भितं वाक्यम्, १८. प्रसिद्धिविरुद्धं वाक्यम्, १९. भग्नप्रक्रमं वाक्यम्, २०. अक्रमं वाक्यम्, २१. अमतपरार्थं वाक्यं च दुष्टं भवतीत्यर्थः ॥ ५२–५३½ ॥

[१] प्रतिकूलवर्णत्वं निरूपयति—**रसानुगुणत्वमि**त्यादिना । वर्णानां तत्-तद्-रसानुगुणत्वम् अष्टमे उल्लासे वक्ष्यते (सू० १००, १०१), तद्विपरीतं तत्-तद्-रसास्वादोद्बोधप्रतिबन्धकवर्णत्वं प्रतिकूलवर्णत्वं वाक्यस्य बोध्यम् । श्रुतिकटुत्वं पदे वाक्ये वा सकृदपि श्रुतिकटुवर्णप्रयोगे भवति, प्रतिकूलवर्णत्वं तु वाक्येऽसकृत् तत्-तद्-रसप्रतिकूलवर्णप्रयोगे एव भवति इत्यनयोर्भेदः । रसव्यक्तिविरोधित्वं चाऽस्य दूषकताबीजम् । नित्यश्चाऽयं दोषः ।

रौद्रे—

> देशः सोऽयमरातिशोणितजलैर् यस्मिन् ह्रदाः पूरिताः
> क्षत्रादेव तथाविधः परिभवस् तातस्य केशग्रहः ।
> तान्येवाऽहितहेतिघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
> यद् रामेण कृतं तदेव कुरुते द्रोणात्मजः कोपनः ॥ उदा० २७४ ॥

अत्र हि विकटवर्णत्वं दीर्घसमासत्वं चोचितम्, यथा—"**प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वेधाविधाऽऽविर्भवत्-क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात् । उज्ज्वालः परशुर् भवत्वशिथिलस् त्वत्-कण्ठपीठातिथिर् येनाऽनेन जगत्सु खण्डपरशुर् देवो हर ख्याप्यते**" (उदा०१७५) । यत्र तु न क्रोधस् तत्र चतुर्थपादाभिधाने तथैव शब्दप्रयोगः ।

शृङ्गारे प्रतिकूलवर्णं वाक्यमुदाहरति—**अकुण्ठोत्कण्ठयेत्यादि** । नायिकासमागमोत्सुकस्योक्तिरियम् । हे कलकण्ठि दूति, त्वम् उत्तरोत्तरं वर्धमानया उत्कण्ठया कण्ठपर्यन्तं व्याप्तं मा कम्बुकण्ठ्यास् तस्या नायिकायाः कण्ठे क्षणमात्रमपि आश्लिष्टं कुरु; मम तदालिङ्गनौत्सुक्यजन्यकण्ठपीडामपहरेत्यर्थः । अत्र ओजोव्यञ्जकानां टवर्गीयवर्णानां शृङ्गारव्यञ्जने प्रतिबन्धकत्वमिति प्रतिकूलवर्णत्वं बोध्यम् ॥ उदा० २७३ ॥

रौद्रे प्रतिकूलवर्णत्वमुदाहरति—देश **सोऽयमित्यादिना** । वेणीसंहारे (३।३३) क्रुद्धस्य अश्वत्थाम्नः कर्णं प्रति उक्तिरियम् । अयं देशोऽपि स एव कुरुक्षेत्रदेशो यत्र भार्गवेण रामेण शत्रुशोणितजलैः ह्रदाः पूरिताः, कार्तवीर्याख्यात् क्षत्रात् परशुरामतातस्य जमदग्नेः केशग्रहरूपः पराभवो यथाविधः तथाविध एव मम तातस्याऽपि धृष्टद्युम्नाख्यात् क्षत्रादेव जातः केशग्रहरूपः पराभवः, यानि परशुरामस्य शत्रुप्रहरणनाशकानि गुरूणि शाणसितानि अस्त्राणि, ममापि परशुरामाद् मम तातेन प्राप्तानि अहितहेतिघस्मराणि गुरूणि भास्वन्ति च तानि एव अस्त्राणि; अतो द्रोणपुत्ररूपोऽहमपि जनः क्रोधनेन जमदग्निपुत्रेण रामेण यद् यादृशं वैरनिर्यातनं कृतं तादृशमेव पितृवैरनिर्यातनं क्षत्रक्षयरूपं कुरुते इत्यर्थः । अत्र क्रोधस्थायिभावके रौद्रे रसे वाक्यस्य विकटवर्णत्वमुचितम्, तद् नास्तीति वाक्यस्य प्रतिकूलवर्णत्वं बोध्यमित्याह—**अत्र** हीत्यादिना । प्रसङ्गाद् रौद्रे वाक्यस्य दीर्घसमासत्वं च उचितमिति प्रकृतेऽनावश्यकत्वान्नोक्तम् । रौद्रे विकटवर्णं दीर्घसमासं च वाक्यं प्रतिकूलवर्णत्वप्रत्युदाहरणरूपं व्युत्पित्सुहिताय प्रदर्शयति—**प्रागप्राप्ते**त्यादि । महावीरचरिते (२।३३) [illegible] दाशरथिं प्रति जामदग्न्यस्योक्तिरियम् । रे रे क्षत्रियकुमार, प्रागप्राप्तनमनस्य माहेश्वरस्य धनुषः (त्वत्कृतेन) द्वेधाविधानेन आविर्भवता क्रोधेन प्रेरितस्य भीमस्य भार्गवस्य भुजस्तम्भेन उच्चालित उद्गतज्वालाकः कठोरोऽयं परशुः येन अनेन परशुना देवो हरो जगत्सु खण्डपरशुरिति ख्याप्यते, क्षणात् त्वत्कण्ठपीठस्यातिथिर्भवतु इत्यर्थः । हरेण स्वपरशोरेकः खण्डः स्वशिष्याय

[२] उपहत उत्वं प्राप्त , [३] लुप्तो वा विसर्गो यत्र तत्, यथा—
धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः ।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविना ॥ उदा० २७६ ॥

[४] सन्धेर् वैरूप्यम् विश्लेषोऽश्लीलत्वं कष्टत्वं च ।

तत्राद्यं यथा—

राजन् विभान्ति भवतश्चरितानि तानि इन्दोर्द्युतिं दधति यानि रसातलेऽन्तः ।
धीदोर्वले अतितते उचितानुवृत्ती आतन्वती विजयसम्पदमेपु भातः ॥
॥ उदा० २७७ ॥

परशुरामाय दत्त इति प्रसिद्धिरत्रानुसन्धेया । अत्र क्रोधप्रधानेषु आद्येषु त्रिषु चरणेषु रेफ-णकार-टकार-बाहुल्याद् अनुकूलवर्णत्वं बोध्यम्; यत्र तु चतुर्थे चरणे गुरुस्मरणेन तद्भक्तिभावोद्रेकाद् न क्रोधः प्रधानं तत्र चतुर्थचरणकथने क्रोधाभावानुरूप एव विकट-वर्णरहितो दीर्घसमासशून्यश्च शब्दप्रयोगोऽस्तीत्यभिप्रायेणाऽऽह—यत्र तु इत्यादि ॥
॥ उदा० २७४-७५ ॥

[२] नाम्न एवाऽन्वर्थस्य लक्षणरूपत्वेन लक्षणान्तरानपेक्षत्वाद् उपहतविसर्गमिति नामैव विवृणोति—**उपहत** इत्यादिना । उपहत उत्वं प्राप्तो विसर्गो यस्मिन् वाक्ये तद् उपहतविसर्गं वाक्यं दुष्टं भवतीत्यर्थः । विसर्ग इत्यत्रैकवचनस्य जात्यभिप्रायकत्वाद् यत्र वाक्ये नैरन्तर्येणाऽनेके विसर्गा उत्वं प्राप्तास् तद् वाक्यं दुष्टमित्यभिप्रायो बोध्यः । सहृदय-वैरस्योत्पादकत्वं चास्य दूषकताबीजम् । नित्यश्चायं दोषः । अत्रोदाहरणं तु **धीरो विनीतो** इत्यादिः पूर्वार्धो बोध्यः । इह संसारे स एव राजा धीरः, शास्त्रसंस्कृतः, निपुणः, सुन्दरश्चास्तीति तदर्थः ।

[३] पूर्वत्रेवैव लुप्तविसर्गत्वं विवृणोति—लुप्तो विसर्गो यत्र तत् लुप्तविसर्गं वाक्यं दुष्टं भवतीति । अत्राऽपि पूर्ववद् यत्र वाक्ये नैरन्तर्येणानेके विसर्गा लुप्तास् तद्वाक्यं दुष्टमित्यभिप्रायो बोध्यः । सहृदयवैरस्योत्पादकत्वमेवास्यापि दूषकताबीजम् । नित्य एवायमपि दोषः । अत्रोदाहरणं तु **यस्य भृत्या** इत्यादिरुत्तरार्धो बोध्यः । यस्य राज्ञः सेवकाश्च बलेन गर्विताः भक्ता बुद्धिजन्यप्रभावशालिनश्च सन्तीति तस्यार्थः ।

वस्तुतस्तु उपहतलुप्तविसर्गं वाक्यं दुष्टमिति एकदोषतापर एव मम्मटाभिप्रायो वृत्ति-वैशिष्ट्यात् प्रतीयते; पृथक्पृथगेव द्वयोर् दोषयोरभिप्रेतत्वे पृथक् पृथगेव लक्षणोदाहरणयोः प्रदर्शनीयत्वाच्च । तथापि उपहतविसर्गाभावस्थले लुप्तविसर्गस्य, लुप्तविसर्गाभावस्थले उपहतविसर्गस्य च वैरस्यहेतुतायाः सम्भवाद् इमौ पृथग् दोषौ मन्तव्यौ ॥ उदा० २७६ ॥

[४] विसन्धित्वं विवृणोति—**सन्धेर् वैरूप्यमि**त्यादिना । सन्धेर् वैरूप्यं यत्र वाक्ये तद् वाक्यं दुष्टं भवतीति पूर्वदोषविवृतिवाक्यांशानुवर्तनगम्योऽर्थः । सन्धेर्वैरूप्यं च सन्धेर्विश्लेषः, सन्धौ अश्लीलत्वम्, सन्धौ कष्टत्वं संस्कृतवाक्यमध्ये शुद्धस्य स्वरस्य

यथा वा—

तत उदित उदारहारहारि-द्युतिरुच्चैरुदयाचलादिवेन्दुः ।
निजवंश उदात्तकान्तकान्तिर्बत मुक्तामणिवच् चकास्त्यनर्घः ॥उदा० २७८

संहितां न करोमीति स्वेच्छया सकृदपि दोषः, प्रगृह्यादिहेतुत्वेन त्वसकृत् ।

[सन्धौ अश्लीलत्व यथा—]

वेगादुड्डीय गगने चरण्डामरचेष्टितः ।
अयमुत्तपते पत्री ततोऽत्रैव रुचिङ्कुरु ॥ उदा० २७९ ॥

दुर्लभतया विलक्षणत्वेन भानात् सहृदयोद्वेजकत्वं बन्धशैथिल्यकरणं च दूषकताबीजम् । नित्यश्चायं दोषः ।

तत्र त्रिविधेषु विसन्धिषु विश्लेषरूपं सन्धेर्वैरूप्यमुदाहरति—**राजन् विभान्ती-**त्यादिना । सन्धेर्विश्लेषोऽपि द्वेधा भवति, "वाक्ये तु सा विवक्षामपेक्षते" इति स्थितया संहिताया अविवक्षया; लौकिके प्रयोगे संहिताजन्यस्य स्वरविकारस्य नित्यमेवाऽभावाच्चेतिबोध्यम् । हे राजन्, यानि रसातलेऽपि अन्तःप्रविष्टानि चन्द्रस्य कान्ति धारयन्ति तानि भवतः चरितानि शोभन्ते, भवतोऽत्यन्तमेव विस्तृते उचितयोरवसरयोः अनुवृत्ती कुर्वती बुद्धिवाहुबले च विजयस्य सम्पत्ति प्राप्य शोभेते इत्यर्थः । यत्र **तानि इन्दोः** इत्यत्र सन्धेः अविवक्षया विश्लेषः **धीदोर्बले अतितते उचितानुवृत्ती आतन्वती** इत्यत्र एतादृशे लौकिके प्रयोगे संहिताजन्यस्वरविकारस्य नित्यमेवाभावाद् विश्लेषः । एतादृशलौकिकप्रयोगज्ञानं च संस्कृते "ईदूदेद्द्विवचनं प्रगृह्यम्" (अ० १।१।११), "प्लुतप्रगृह्या अचि नित्यम्" (अष्टाः ६।१।१२५) इत्यादिनाऽनुशासनेन कर्तव्यम् ॥ उदा० २७७ ॥

लौकिके प्रयोगे संहिताजन्यस्य अभावाद् भवितुः सन्धिविश्लेषस्य प्रकारान्तरमुदाहरति—**यथावेति** । पतिंवरा प्रति सख्या उक्तिरियं **तत उदित** इत्यादिका । बत हे राजपुत्रि, उच्चैरुन्नताद् उदयाचलाद् ततः पूर्वोक्ताद् वंशयाद् उत्पन्नो स्थूलमुक्तादामहारिदीप्तिः उद्भटकमनीयकान्तिः श्रेष्ठ एव राजा निजकुले मुक्तामणिवत् शोभते इत्यर्थः । अत्र **तत उदित उदारे**त्यत्र **निजवंश उदात्ते**त्यत्र च संहितायां सत्यामपि तज्जन्ये विसर्गलोपे च सत्यपि स्वरविकारस्य अभावाद् विश्लेषो बोध्यः विश्लेषप्रकारयोर्दोषत्वे विशेषमाह—**संहितां ने**त्यादिना । कविविवक्षाधीनो विश्लेषः कवेरशक्तिमनुमापयतीति सकृदपि प्रयुक्तो हृदयालुहृदयोद्वेजकत्वाद् दुष्टः, भाषास्वभावकृतस्तु विश्लेषः कवेरशक्ति नाऽनुमापयति इति सकृत् प्रयुक्तः अदुष्टः, असकृत् प्रयुक्तस् तु पूर्वोक्तप्रकारेण वैरस्यं बन्धशैथिल्यं च करोतीति दुष्टो बोध्य इत्याशयः ॥ उदा० २७८ ॥

सन्धिजन्याश्लीलत्वकृतं विसन्धित्वमुदाहरति—**वेगादुड्डीये**त्यादिना । नायकाधिष्ठितं सङ्केतस्थानं सूचयन्त्या दूत्या उक्तिरियम् । हे सखि, अयं पक्षी जवाद् उड्डीय

अत्र सन्धावश्लीलता ।

[सन्धौ कष्टत्वं यथा—]

उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः ।
नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक् ॥ उदा० २८० ॥

[५] हतं लक्षणानुसरणेऽप्यश्रव्यम्, अप्राप्तगुरुभावान्तलघु, रसाननुगुणं च वृत्तं यत्र ।

क्रमेणोदाहरणम्—

[लक्षणानुसरणेऽपि अश्रव्यत्वं यथा—]

अमृतममृतं कः सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् ।
सकृदपि पुनर् मध्यस्थः सन् रसान्तरविज् जनो
वदतु यदिहान्यत् स्वादुस्यात् प्रियादशनच्छदात् ॥ उदा० २८१ ॥

गगने उद्भटचेष्टितः चरन् सन् दीप्यते, तस्माद् अत्रैव विहाराय रुचिं कुरु इत्यर्थः । अत्र सन्धितो डुड्डी-रण्डा-चिङ्कु-स्मरणात् कश्मीरादिदेशेषु देश्यभाषायां डुड्डीशब्दस्य स्त्रीयोन्यर्थकत्वात्, रण्डशब्दस्य संस्कृते विधवार्थकत्वात् कश्मीरादिदेशेषु देश्यभाषायां चिङ्कुशब्दस्य स्त्रीशिश्निकार्थकत्वात् (भगमध्यस्थ शिश्नाकाराङ्कुरवाचित्वात्) यथायथं व्रीडा-अमङ्गल-जुगुप्सा प्रतीतेः सन्धावश्लीलत्वं बोध्यमित्यभिप्रेत्याह—अत्र सन्धावित्यादि । डुड्डीत्यादि-तत्-तद्-देश्यभाषापदस्मारिकाणां संस्कृतपदसन्धिजन्यानां वर्णानुपूर्वीणां तत्-तत्-देशजान् सहृदयान् प्रत्येव ॥ उदा० १७९ ॥

सन्धौ कष्टत्वमुदाहरति—**उर्व्यसावत्रे**त्यादिना । पथिकं प्रति तत्रत्यपथिकस्योक्ति-रियं । अस्मिन् मरुदेशस्य अन्ते शोभनावस्थानवती महती असौ तरुपङ्क्तिर्गच्छन्ति, अतः **अत्र** सरलतया (ऊर्ध्वस्थितशिरस्कतया) गन्तुं न युज्यते, तस्मात्त्वं किञ्चित् शिरो नमयेत्यर्थः । अत्र 'उर्व्यसौ' इति, 'तर्वाली' इति 'गर्वन्ते' इति, 'चार्ववस्थितिः' इति 'नात्रर्जु' इति च सन्धौ कटुत्वरूपं कष्टत्वं बोध्यम् ॥ उदा० २८० ॥

[५] हतवृत्तत्वं विवृणोति—**हतं लक्षणे**त्यादिना । लक्षणाऽननुसरणे लक्षणानुसरणेऽपि केनचिद् वैगुण्येन सहृदयश्रवणोद्वेगजनकं वृत्तं यत्र तद् वाक्यं हतवृत्तम्, अप्राप्त-गुरुभावेऽन्तलघुरक्षरो बन्धशैथिल्यापादको यत्र तादृशं वृत्तं यत्र तद् वाक्यं हतवृत्तम्, रसानुकूलं वृत्तं यत्र तच् च वाक्यं हतवृत्तं भवतीत्यर्थः । वृत्तं नाम मादौ उक्थादौ वा छन्दसि प्रस्तारेण वृत्तः (सम्पन्नः) छन्दसोऽवान्तभेदः, अत एव पिङ्गलश् छन्दसि अधिकृते (२।१) वृत्तमिति पुनर् अधिकरोति (५।१) । वृत्तशब्देनात्र जातयोऽपि उपल-क्ष्यन्ते । "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेद्" (१४) इति गङ्गादासोक्ता वृत्त-जातिपरिभाषाऽत्रानुसन्धेया । तत्र "तस्माद्-

अत्र 'यदिहान्यत् स्वादु स्यात्' इत्यश्रव्यम् ।

यथा वा--

जं परिहरिउं तीरइ मणअं पि ण सुन्दरत्तणगुणेण ।
अह णवर जस्स दोसो पडिपक्खेहिं पि पडिवण्णो ॥ उदा० २८२ ॥

अत्र द्वितीयतृतीयगणौ सकारभकारौ ।

व्यभिचारेण श्रव्यतैव गरीयसी'' (सुवृत्त २।५) इति वृत्तविशेषज्ञैः वृत्ते श्रव्यतायाः प्रधानता प्रतिपादिता, अत. श्रव्यताविघातो महान् दोष., श्रव्यताविघातश्च वृत्तलक्षणाऽनुसरणेन वृत्तभङ्गात्. 'स्वेतमाऽऽक्रम्यन्तु नेच्छन्ति मुनयो यतिम्'' (छन्दोमञ्जर्यां प्रथमस्तवके एकादशश्लोकविवरणे) इति स्थिते, यतिनिरपेक्षतां स्वीकृत्य वृत्तलक्षणेनुसृतेऽपि मतेर् भङ्गात्, अन्यस्माद् वा कस्माच् चिद् वैगुण्याच् च भवति ।

तत्र वृत्तभङ्गमुलकाश्रव्यत्वयुक्तवृत्तोदाहरणस्यसत्कविकृते काव्ये दुर्लभत्वात् तद् न कविबुभूषुमतिसन्धत्ते इति तदुपेक्ष्य [illegible]ोदाहरणं प्रदर्शयति— **अमृतममृत**मित्यादि । अमृतम् अमृतमेव, अर्थाद् अमृतं स्वादु, न तत्र सन्देहलेशोऽपि- मधूनि माक्षिक-भ्रामर क्षौद्र-पौत्तिक-छात्रा-[illegible]-[illegible] **अन्यथा** अस्वादूनि न, किन्तु स्वादून्येव भवन्ति, आम्रस्य निष्पन्नरस (पक्वं) फलमपि अविकमेव मधुरम्, पुनः (परन्तु) रसभेदज्ञः (आस्वादचञ्चु) कोऽपि पुरुषो मध्यस्थः सन् यदि इहलोके प्रियादशनच्छदाद्अन्यत् स्वादुतरं स्यात तर्हि तद् वदतु इत्यर्थः । अत्र हरिणीवृत्ते प्रतिपादे षष्ठेऽक्षरे गते यतिरुचिता, किन्तु चतुर्थे पादे हा इति षष्ठेऽक्षरे गतेऽपि परपदानुसन्धानेन यतिः सम्यङ् न भवतीति अस्य वृत्तस्य अश्रव्यता बोध्येत्याशयेनाह—अत्र यदिहान्यदित्यादि ॥ उदा० २८१ ॥

लक्षणानुसरणेऽपि अश्रव्यत्वं प्रकारान्तरैरपि सम्भवतीति दिक्प्रदर्शनायोदाहरति— **जं परिहरिउं** इयादि । **'यत् परिहर्तुं तीर्यते मनागपि न सुन्दरत्वगुणेन । अयं केवलं यस्य दोषो प्रतिपक्षैरपि प्रतिपन्नः'** इति संस्कृतच्छाया । यदयं कामो मनोहारित्वगुणेन हेतुना त्यक्तुं मनागपि न पार्यते, जरास्वपि विविधैः प्रकारैः आविर्भवितृणा मान्मथाना विकाराणां परिहर्तुमशक्यत्वात्, यस्याऽयं दोषः कामशास्त्रप्रतिपक्षभूतैः मोक्षशास्त्रैरपि केवलं प्रतिपन्नः, ननु परिहृत इत्यर्थः । आनन्दवर्धनकृतविषमबाणलीलायां पद्यमिदम्, कामोऽत्र वर्ण्यमानोऽस्तीति श्रीधरसोमेश्वरादयः । गाथा जातिः । तल्लक्षणं यथा— ''पढमं बारह मत्ता बीए अट्ठारहेहिँ संजुत्ता । जह पढमं तह तीअं पञ्चदहविहूसिआ गाहा'' इति । अत्र च गाथालक्षणेऽनुसृतेऽपि मात्राछन्दसो [illegible] गणेषु द्वितीयतृतीययोः सकार-भकार-गणरूपयोर् गणयोर् योगे गुर्वोर् निरन्तरत्वात् पादान्तस्य लघुत्वापातात् तत्र यतेः सम्पगश्रवणाच्चाश्रव्यत्वं बोध्यमित्याशयेनाह—**अत्रद्वितीये**त्यादि । वृत्तानां श्रव्यत्वाऽश्रव्यत्वे सुवृत्ततिलकद्वितीयविन्यासोक्ते अन्यस्मिन् विषये जिज्ञासुभिः परिशीलनीये ॥ उदा० २८२

[अप्राप्तगुरुभावान्तलघुत्वं यथा—]

विकसितसहकारतारहारि-परिमलगुञ्जितपुञ्जितद्विरेफः ।
नवकिसलयचारुचामरश्रीर् हरति मुनेरपि मानसं वसन्तः ॥ उदा० २८३ ॥

अत्र हारि-शब्दः । हारिप्रमुदितसौरभेति पाठो युक्तः ।

यथा वा—

अन्यास् ता गुणरत्नरोहणभुवो कन्या मृदन्यैव सा
सम्भाराः खलु तेऽन्य एव विधिना यैरेष सृष्टो युवा ।
श्रीमत्-कान्ति-जुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलाद्
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च ॥ उदा० २८४ ॥

अप्राप्तगुरुभावान्तलघुवृत्तं हतवृत्तमुदाहरति—**विकसितेत्यादि** । विकसितस्य सहकारस्य तारेणाऽत्युत्कटेन अतिमनोहरेण गन्धेन हेतुना गुञ्जिताः (गुञ्जनं प्राप्ताः) पुञ्जिता द्विरेफा यस्मिन् सः, नवपल्लवरूपाणां चारुचामराणां श्रीर् यस्मिन् स एतादृशो वसन्तो मुनेरपि मानसं हरतीत्यर्थः । अत्र 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा'' इति लक्षणात् प्रथमपादस्याऽन्ते गुरुरक्षरः आवश्यकः, सच 'गन्ते' (पि० सू० १।१०) इति शास्त्रात् अत्राप्यस्त्येव, तथापि हारि इत्यत्र स्वरूपतो लघोरिकारस्य गुरुकार्यकारित्वं (बन्धदार्ढ्यकारित्वम्) नास्ति इति वैरस्यमावहति. अतः अप्राप्तगुरुभावान्तलघुवृत्तमिदं हतवृत्तमित्याशयेनाह—**अत्र हरिशब्द** इति । 'यत् पादान्ते-लघोरपि गुरुभाव उक्तः तत् सर्वत्र द्वितीयचतुर्थपादविषयम्, प्रथमतृतीयपादविषयं तु वसन्ततिलकादेरेव'' इति विश्वनाथेन उक्तं तु हेयमेव ''गन्ते'' इति शास्त्रेण विरुद्धत्वात्, इति प्रकृतोदाहरणे लघोर्गुरुभावो न शास्त्रसिद्धः स्यात् तर्हि तु अस्य ग्रन्थकारस्य ''लक्ष्यानुसरणेऽपि'' इति वचनम् इदमुदाहरणं च कथं परस्परं सङ्गते स्यातामिति च । दोषपरिहाराय पाठान्तरमुपदिशति—**हारिप्रमुदितेत्यादि** । एवं च ''ग्रादिपरः'' (पि०-सू० १।११) इति सूत्राद् गुरुत्वस्य लाभाद्बन्धदार्ढ्यलाभाच्च न दोष इत्याशयः ॥उदा० २८३॥

प्रकारान्तरेणापि अप्राप्तगुरुभावान्तलघुवृत्तं हतवृत्तं सम्भवति तत्परिहारश्च तथैव सम्भवतीति च उदाहरति—**अन्यास्ता** इत्यादि । यस्मिन् दृष्टे सति श्रीमत्-कान्तिजुषां मूढमनसां शत्रूणां करतलाद् अस्त्राणि, श्रीमत्-कान्तिजुषां मूढमनसां स्त्रीणां नितम्ब-स्थलाद् वस्त्राणि च पतन्ति स एष युवा ब्रह्मणा यैः पदार्थैरुत्पादितः ता गुणरत्नोत्पत्ति-भूमयो विलक्षणा एव सा अस्मिन् युवके राजनि पार्थिवभागत्वेन अनुगता उपादानकारण-रूपा कन्या (अन्यनिर्मितौ अविनियुक्ता) मृद् अपि अन्यैव न सर्वसाधारणा; ते अस्योत्पादने अपेक्षिता अवशिष्टाः सम्भारा अपि अन्ये एवेत्यर्थः । याभिश्च यया च यैश्च इति यैरिति पुंलिङ्गयच्छब्दैकशेषः ''पुमान् स्त्रिया.'' (अष्टा० १।२।६७) इति प्रामाण्यात् । अत्र चतुर्थ-पादान्तस्थस्य चकाराऽकारस्य गुरुत्वं यद्यपि छन्दश्शास्त्रसिद्धं तथापि बन्धशैथिल्याद् न

अत्र वस्त्राण्यपि इति पाठे लघुरपि गुरुतां भजते ।

[रसाननुगुणवृत्तं हतवृत्तं यथा—]

हा नृप हा बुध हा कविबन्धो विप्रसहस्रसमाश्रयदेव ।
मुग्ध-विदग्ध-सभान्तररत्न, क्वाऽसि गतः क्व वयं च तवैते ॥ उदा० २८५ ॥

हास्यरसव्यञ्जकमेतद् वृत्तम् ।

[६] न्यूनपदं यथा—

> तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
> वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
> विराटस्याऽऽवासे स्थितमनुचितारम्भनिभृतं
> गुरुः खेदं खिन्ने मयि भजति नाद्यापि गुरुषु ॥उदा० २८६॥

अत्रास्माभिरिति, खिन्ने इत्यस्मात् पूर्वम् इत्थम् इति च ।

तद् गुरुकार्यकारीति दोषः, वस्त्राण्यपि इति पाठे तु संयोगोच्चारणविलम्बेन गुरूच्चारण-कालकला पूर्यते इति सहृदयानुभवाद् लघोरपि [illegible] इत्याशयेनाह—अत्र वस्त्राण्यपीत्यादि ॥ उदा० २८४ ॥

प्रकृतरसाऽननुगुणावृत्तं हतवृत्तं वाक्यमुदाहरति—**हा नृपे**त्यादि । कस्मिश्चिद् राजनि मृते तस्य चाटुकाराणामुक्तिरियम् । हे राजन्, हे प्राज्ञ, हे कविबन्धो, हे ब्राह्मणानां सहस्रस्य समाश्रयभूत स्वामिन्, हे मुग्धानां [illegible] सभाया मध्ये रत्नभूत, हा हा त्वं क्व गतोऽसि तव सेवका एते वयं च क्व (वनान्ते) प्राप्ताः स्म इत्यर्थः । अत्र करुणे हास्यरसानुगुणं दोधकवृत्तं प्रयुक्तम्, हास्यश्च करुणस्य विरोधीति दोधकवृत्तमत्र प्रकृतरसाननुगुणं त्र्येयमित्याशयेनाह—**हास्यरसे**त्यादि । वृत्तानां रसविशेषानुगुणत्वाऽननुगुणत्वस्य विवेचनं च नाट्यशास्त्रे सप्तदशेऽध्याये प्राप्यते । क्षेमेन्द्रेणाऽपि—''आरम्भे सर्गबन्धस्य कथाविस्तरसङ्ग्रहे । शमोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम् । शृङ्गारालम्बनोदारनायिकारूपवर्णनम् । वसन्तादि तदङ्गं च दीप्तं स्यादुपजातिभिः ॥ रथोद्धताविभावेषु भव्या चन्द्रोदयादिषु । षाड्गुण्यप्रगुणा नीतिर् वंशस्थेन विराजते ॥ वसन्ततिलकं भाति सङ्करे वीररौद्रयोः । कुर्यात् सर्गस्य पर्यन्ते मालिनी द्रुततालवत् ॥ उपपन्नपरिच्छेदकाले शिखरिणी वरा । औदार्यरुचिरौचित्यविचारे हरिणी मता ॥ साक्षेपक्रोधधिक्कारे परं पृथ्वी भरक्षमा । [illegible] मन्दाक्रान्ता विराजते ॥ शौर्यस्तवे नृपादीनां शार्दूलक्रीडितं मतम् । सावेगपवनादीनां वर्णने स्रग्धरा वरा ॥ दोधक-तोटक-नर्कुट-युक्तं मुक्तकमेव विराजति सूक्तम् । निर्विषयस्तु रसादिषु तेषां निर्नियमश्च सदा विनियोगः ॥ इति सुवृत्ततिलके तृतीये विन्यासे वृत्तानां विनियोगविशेषः प्रदर्शितः ॥ उदा० २८५ ॥

[६] न्यूनपदमिति नामैव लक्षणरूपमन्वर्थत्वादिति नामोपादायोदाहरति—**न्यूनपदं**

[७] अधिकपदं यथा—

स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसङ्क्रान्तनिशातशास्त्रतत्त्वः ।
अविरुद्धसमन्वितोक्तियुक्तः प्रतिमल्लास्तमयोदयः स कोऽपि ॥उदा० २८७॥

अत्र आकृतिशब्दः ।

यथा वा—

इदमनुचितमक्रमश्च पुंसां यदिह जरत्स्वपि मान्मथा विकाराः ।
यदपि च न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा ॥उदा० २८८॥

अत्र कृतमिति, तथा च 'यदपि च न कुरङ्गलोचनानाम्' इति पाठे निराकाङ्क्षैव प्रतीतिः । कृतं प्रत्युत प्रक्रमभङ्गमावहति ।

यथेति । अनुपात्तविवक्षितार्थवाचकपदत्वं न्यूनपदत्वं बोध्यम् । पदज्ञानविरहकृता विवक्षितार्थस्य झटित्यप्रतिपत्तिर्दूषकताबीजम् । न्यूनपदं क्वचिद् गुण इति वक्ष्यतीति अनित्योऽयं दोषः । **तथाभूतां दृष्ट्वे**त्यादिपद्यार्थस्तु—राजसभायां द्रौपदीं रजोवतीं दुःशासनकृष्टवसनकेशपाशां दृष्ट्वा वल्कलधरैरस्माभिः द्वैतवने व्याधैः सह सुचिरमुषितं च दृष्ट्वा, अस्माभिर्विराटस्य गृहे अनुचितसूदसूत्रादिकर्मनिरतैस्तथा गुप्तं स्थितञ्च दृष्ट्वा इत्थं खिन्ने मयि अस्माकं गुरुर् ज्येष्ठोऽग्रजः खेदं भजति, किन्तु अद्यापि कुरुषु विषये खेदं न भजतीत्यर्थः । अत्र उषितम् स्थितम् इति क्रिययोः कर्तृपदमस्माभिरिति न्यूनम्, एभिः समुचितैः कारणैः इत्थं समुचितेन प्रकारेण खिन्ने मयीत्यस्यार्थस्य विवक्षितत्वात् खिन्ने इत्यस्मात्पूर्वम् इत्थमिति पदं च न्यूनमिति न्यूनपदमिदं वाक्यमित्याशयेनाह—**अत्रास्माभिरि**त्यादि । इत्थमिति कारणसमुच्चयनिर्देशपरमिति महेश्वर-नागोजिभट्ट-वामनादीनां व्याख्यानं त्वहृद्यमेव क्त्वान्तैरेव हेतूनां लाभात् ॥ उदा० २८६ ॥

[७] अधिकपदमित्यपि नामैवान्वर्थं लक्षणरूपमिति पृथग् लक्षणमप्रदर्श्यैव उदाहर्तुमाह—**अधिकपदं यथेति** । उपात्ताविवक्षितार्थवाचकपदत्वम् अधिकपदत्वं बोध्यम् । निष्प्रयोजनशब्दश्रवणजन्यं श्रोतृवैमुख्यं दूषकताबीजम् । अधिकपदं क्वचिद् गुण इति वक्ष्यतीति अनित्योऽयं दोषो बोध्यः । विद्वत्-प्रशंसारूपस्य **स्फटिकाकृती**त्यादिपद्यस्यार्थस्तु-स्फटिकाकृतिवद् निर्मलः, निकामं लोके प्रसारितः सूक्ष्मः शास्त्रार्थो येन तादृशः, वादिभिः अनिवारिता समन्विता या उक्तिस्तया उक्तः, प्रतिमल्लरूपाणां वादिनाम् अस्तमय एव उदयो यस्य स कोऽपि महापुरुषः इति । अत्र स्फटिकमेव निर्मलतायामुपमानं विवक्षितम्, उपात्तेऽपि आकृतिपदे तन्निरपेक्षतया स्फटिकेनैवोपमितेः पर्यवसानाद् आकृतिपदम् अधिकमिति अधिकपदं वाक्यमेतदित्याशयेनाह—**अत्राऽऽकृतिशब्द** इति ॥ उदा० २८७ ॥

प्रपञ्चार्थमन्यमपि अधिकं पदमुदाहरन्ति—इदमनुचितमित्यादिना । विद्या-कालिदासयोरिति सुभाषितरत्नकोशे, शीलभट्टारिका-भोजराजयोरिति केचित् । यद् इह लोके जरत्सु अपि पुरुषेषु मान्मथा विकारा भवन्ति इदं पुंसामनुचितम्, आश्रमधर्मविरोधाद् व्युत्क्रमश्च, यच्च च स्त्रीणां जीवितं रतमेवापि वा स्तनपतनावधि न कृतं ब्रह्मणा इदमपि

[८] कथितपदं यथा—

अधिकरतलतल्पं कल्पितस्वापलीला-
परिमिलननिमीलत्-पाण्डिमा गण्डपाली ।
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीलायौवराज्याभिषेकम् ॥ उदा० २८९ ॥

अत्र लीलेति ।

[९] पतत्-प्रकर्षं यथा—

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत् सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः ।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर् यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते ॥ उदा० २९० ॥

अनुचितम् **अक्रमो** ह्यनन्तर्यादोल्लङ्घनमेव चेत्यर्थः । अत्र 'यदपि च न कुरङ्गलोचनानां स्तनजघनादधि जीवितं रतं वा' इति पाठेनैव निराकाङ्क्षा विवक्षितार्थ प्रतीतिर्भवतीति कृतमिति पदमधिकम्, अतोऽधिकपदं वाक्यमेतदित्याशयेनाऽऽह—**अत्र कृत**मित्यादि । कृतमिति पदस्योपादानं न केवलमधिकपदत्वमेवावहति किन्तु प्रक्रमभङ्गमपीत्याह— **कृतम् प्रत्युत** इत्यादिना । पूर्वार्धे पुन्धर्मे अनौचित्यम् उक्तम्, उत्तरार्धे स्त्रीधर्मेऽपि अनौचित्ये वक्तव्ये तद् अनुक्त्वा उक्तस्त्रीधर्मकरणाद् विधेः कर्मणोऽनौचित्यमुक्तमिति प्रक्रमभङ्गो वेदितव्यः । **कृतमिति प्रत्युत** इत्यादि **तथा** चेत्यतः पूर्वमन्यैः पठ्यते, किन्तु अस्माभिः व्यवस्थापितः पाठ एवार्थदृष्ट्या युक्ततरः प्रतिभाति ॥ उदा० २८८ ॥

[८] कथितपदमिति नामैवान्वर्थं लक्षणकार्यकारीति लक्षणमनुक्त्वैवोदाहर्तुमाह— **कथितपदं यथेति** । प्रयोजनशून्यत्वे सति समानार्थकेन समानवर्णानुपूर्वीकेण तस्मिन्नेव वाक्ये पूर्वमपि प्रयुक्तेन पदेन युक्तत्वं कथितपदत्वं बोध्यम् । दूषकताबीजन्तु कविशक्ति-दारिद्र्यस्योन्नयनेन विमुखस्य श्रोतुरुपभुक्ते भोगे इव विरसताया जननमेव । नायिकां प्रति सख्या उक्तेः **अधिकरतलतल्प**मित्यादेः पद्यस्याऽर्थस्तु—हे सुतनु, करतलरूपे तल्पे कल्पितायां स्वापलीलायां परिमिलनेन (पीडनेन) तिरोभवन् धवलिमा यस्याः सा एता-दृशी तव गण्डपाली कस्य नायकस्य चुम्बनदशनादौ स्मररूपनरपतेर् लीलायां विषये यौवराज्ये (मुख्याधिकारे) अभिषेकं तत्त्वतो व्यञ्जयतीति । अत्र चतुर्थपादमध्यस्थं द्वितीयं लीलापदं प्रक्रमभङ्गपरिहारादिप्रयोजनाभावेऽपि पूर्वेण प्रथमपादान्तस्थेन लीला-पदेन समानार्थकसमानवर्णानुपूर्वीकत्वेन च प्रयुक्तमिति कथितपदमिदं वाक्यमित्याश-येनाऽऽह—**अत्र लीलेतीति** । **इतिर्हेतौ** । लीलेति पदाद् इदं वाक्यं कथितपदमित्यर्थः । दीर्घे समासपदे समानयोः पदयोः प्रयोगादपि कथितपदत्वं सम्भवति चेत् तदत्राऽपि अखण्डपदाभिप्रायेण नानापदगतत्वाद् वाक्यदोषत्वमस्य बोध्यमिति भीमसेनदीक्षितस्य मतम् ॥ उदा० २८९ ॥

[१०] समाप्तपुनरात्तं यथा—

केङ्कारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो
झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः ।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण-
क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ॥ उदा० २९१ ॥

[११] द्वितीयार्धगतैकवाचकशेषप्रथमार्धं यथा—

मसृणचरणपातं गम्यतां भूः सदर्भा विरचयसिचयान्त मूर्ध्नि घर्मः कठोरः ।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः पथि पथिकवधूभिर् वीक्षिता शिक्षिता च
॥ उदा० २९२ ॥

---

[९] नामैवान्वर्थं लक्षणकार्यकारीति लक्षणमनुक्त्वैवोदाहरन्ति **पतत्प्रकर्षं यथेति ।** पतन् ह्रसन् प्रकर्ष उत्कर्षो विकटबन्धादिकृतो यस्मिन् तद् वाक्यं पतत्प्रकर्षं दुष्टमित्यभिप्रायः । बन्धशैथिल्यानुभवकृतं वैरस्यमेवात्र दूषकताबीजम् । अनित्यश्चायं दोषः । उदाहरणं च यथा—**कः क. कुत्रे**त्यादि । यस्मात् पञ्चास्यः (सिंहः) सिंहीप्रेमजन्यसिंहीक्रोडकण्डूयनादिविलासस्थिरीकृतैकदेशवासो वर्तते तस्माद् महान् मध्यमः क्षुद्रोऽपिवा कः को वनसूकरो दुर्धर्षशब्दकारी दुर्निवारकरालदंष्ट्राप्रचण्डविक्षेप इव भयङ्करः सन् कस्मिन् वा वनप्रान्ते न घुरेत्, सर्वोऽपि घुरेदेव; एवमेव कः को वा करी विकसितकमलं कं वा सरो विकमलं कर्तुं नोद्यतो भवेत्, सर्वोऽपि उद्यत एव स्यात्; एवमेव के वा अरण्यमहिषाः कानि वा वनानि नोन्मूलयेयुः, उन्मूलयेयुरेवेत्यर्थः । कस्कादित्वात् तु कस्क इति पठनीयमपि कविना बन्धवैकट्याय कः क इति पठितम्, वस्तुतस्त्विदं च्युतसंस्कृत्येव । अत्र यथोत्तरम् अर्थप्रकर्षे सत्यपि बन्धस्य पतत्प्रकर्षत्वं स्फुटम् । यमवाहनजातिकत्वात् करितो महिषस्य प्रकर्षं मन्यन्ते ॥ उदा० २९० ॥

[१०] समाप्तं क्रियाकारकान्वयेन पर्यवसितं सद् विशेषाभिधित्सां विनैव तद्वाक्यान्वयिपदाभिधानेन पुनरात्तं वाक्यं समाप्तपुनरात्तमित्यन्वर्थं नामैव लक्षणकार्यकारि । निराकाङ्क्षे वाक्ये निष्प्रयोजनपदप्रक्षेपजन्यं सहृदयवैमुख्यमेव दूषकताबीजम् । अनित्योऽयं दोषः । उदाहरणं यथा—**केङ्कार** इत्यादि । मदनधनुष्टङ्काररूपः सुरतक्रीडारूपपिकाङ्गनारुतरूपो रतिरूपमञ्जरीभ्रमरझङ्काररूपो लीलारूपचकोरीवाशितरूपश्च सुरतारम्भे तन्व्याः कञ्चुलिकाया अपसारणे भुजयोराक्षेपेण स्खलतां कङ्कणानां क्वाणो वः प्रेमाणं विस्तारयतु इति क्रियाकारकान्वयेन समाप्तमपि वाक्यं पुनः नववयोलास्यार्थकवेणुस्वनरूप इति कङ्कणक्वाणविशेषणपदाभिधानेन पुनरुपात्तमिति निराकाङ्क्षस्याऽपि प्रयोजनविशेषं विनैव पुनरुपादानेन कदर्थनाद् वाक्यस्य दुष्टत्वं बोध्यम् । नवेत्यादिविशेषणस्य प्रतिपाद्यार्थानुगुणत्वेऽपि प्रयोजनविशेषासमर्पकत्वात् तद् विनाऽपि वाक्यस्य निराकाङ्क्षत्वाच्चेदं वाक्यं दुष्टमेवेतिबोध्यम् ॥ उदा० २९१ ॥

[१२] अभवन् मत इष्टो योगः सम्बन्धो यत्र तद्, यथा—

> येषां तास् त्रिदशेभदानसरितः पीताः प्रतापोष्मभिर्
> लीलापानभुवश् च नन्दनवनच्छायासु यैः कल्पिताः ।
> येषां हुङ्कृतयः कृतामरपतिक्षोभाः क्षपाचारिणां
> किं तैस् त्वत्-परितोषकारि विहितं किञ्चित् प्रवादोचितम् ॥उदा० २९३॥

अत्र 'गुणानां च परार्थत्वादसम्बन्धः समत्वात्' (ध० मी० ३।१।११।१२) इत्युक्तनयेन यच्छब्दनिर्दिष्टानाम् अर्थानां परस्परमसमन्वये यैरित्यत्र विशेष्यस्याऽप्रतीतिरिति । क्षपाचारिभिरिति पाठे युज्यते समन्वयः ।

---

[११] अर्थान्तरगतैकवाचकं दुष्ट वाक्यं द्वितीयार्धगतैकवाचकरूपप्रथमार्धरूपमुदाहरति—सम्पूर्णचरणेत्यादि । बालरामायणे (६।३६) वनाद् निवृत्तस्य सुमन्त्रस्य दशरथं प्रत्युक्तिरियम् । जनकपुत्री वनवासगमने पथि [illegible] लोचनैर् वीक्षिता, 'भूमिः सदर्भा विद्यते तत् तस्मात् [illegible] यथा स्यात् तथा गम्यताम्; घर्मः कठोरोऽस्ति, तस्माद् वस्त्रान्तं मूर्ध्नि कुरु' इति शिक्षिता चेत्यर्थः । अत्र तद् इति पश्चार्धगतमेकमात्रं पद पूर्वार्धान्वयि, 'भूः सदर्भा तद् [illegible] गम्यताम्, घर्मः कठोरः तद् मूर्ध्नि सिचयान्तं कुरु' इत्यन्वयात् । अत्र अर्थान्तरपतितस्य पदस्य विलम्बेनोपस्थित्या अन्वयबोधे विलम्बः श्रोतृवैमुख्यकृद् दूषकताबीजम् । नित्यश्चायं दोषः । अस्य दोषस्य क्लिष्टता अस्थानस्थपदता वा उचितेति विवेचकाः ॥ उदा० २९२ ॥

[१२] अभवन् असम्भवन् मतोऽभिमतो योगोऽन्वयो पदार्थाना यत्र तद् वाक्यं दुष्टं भवतीत्यर्थः । अत्रापि नानैवान्वर्थं लक्षणकार्यकारि । अभवन्मतयोगत्वं च वाक्यस्य अनेकधा सम्भवति—क्वचिद् अभिमतान्वययोः पदयोर्विभक्तेर्भेदात्, क्वचित् पदन्यूनतया, क्वचित् परस्परमाकाङ्क्षाया अभावात्, क्वचिद् वाच्यव्यङ्ग्ययोर् विवक्षितस्य योगस्य अभावात्, क्वचित् समासेन एकस्मिन्नेव पदार्थे अवरुद्धतया पदार्थस्य अभिमतैरन्वयस्याऽसम्भवात्, क्वचित् पुनर्व्युत्पत्तिविरोधादिति । [illegible] विवक्षितार्थभिन्नार्थबोधकत्वं दूषकताबीजम् । नित्योऽयं दोषः । तत्र अभिमतान्वययोः पदयोर्विभक्तेर्भेदेन आगतम् अभवन्मतयोगत्वमुदाहरति—**येषां तास् त्रिदशेभे**त्यादिना । हनुमता लङ्कायां दग्धायां वीरमुख्यान् राक्षसान् अधिक्षिपतः कस्यचिद् रावणं प्रति उक्तिरियम् । येषां क्षपाचारिणां प्रतापोष्मभिर् देवहस्तिमदजलधाराः पीताः, यैः क्षपाचारिभिः नन्दनवनच्छायासु क्रीडापानभूमयो रचिताः, येषां च क्षपाचारिणां हुङ्काराः कृतेन्द्रक्षोभा अभूवन् तैः त्वत्-परितोषकारि उक्तप्रवादोचितम् अधुना किञ्चित् कृतं किमु ? नैव कृतमित्यर्थो विवक्षितः । किन्त्वत्र **येषां यैः येषाम्** इति यच्छब्दनिर्दिष्टानामर्थानां विशेषणभूतानां परार्थत्वेन तुल्यानां परस्परम् अभेदेन अन्वयस्याऽसम्भवाद् एकतमयच्छब्दार्थविशेष्येणान्वयबोधस्य अजननाद् यच्छब्देषु प्रत्येकं स्वस्वविशेष्याकाङ्क्षिषु येषां येषामित्यनयोर् यच्छब्दार्थयोस् तु क्षपाचारिणामित्यस्यार्थेन विशेष्येण सह अभेदेनान्वयो

यथा वा—

त्वमेवंसौन्दर्या स च रुचिरतायाः परिचित:
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिह सुभगे संवदति वा—
मतः शेषं यत् स्याज् जितमिह तदानीं गुणितया ॥ उदा० २९४ ॥

अत्र यदित्यत्र तदिति, तदानीमित्यत्र यदेति वचनं नास्ति । चेत् स्याद् इति युक्तः पाठः ।

यथा वा—

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाऽऽकर्णय येन येन सहसा यद् यत् समासादितम् ।
कोदण्डेन शराः शरैररिशिरस् तेनाऽपि भूमण्डलं
तेन त्वं भवता च कीर्तिरनघा कीर्त्या च लोकत्रयम् ॥ उदा० २९५ ॥

भवति यैरित्यस्य यच्छब्दार्थस्य तु क्षपाचारिणामित्यस्यार्थेन सह विवक्षितोऽपि अभेदान्वयो न सम्भवति भिन्नविभक्तिकत्वादिति अभवन् मता योगोऽत्रबोध्यः । जैमिनीयसूत्राभिप्रायस्तु—पदार्थानां गुणप्रधानभावेनैव परस्परमन्वयो न तु गुणानां गुणैः प्रधानानां प्रधानैर्वा परस्परं निराकाङ्क्षत्वादिति बोध्यः । यदि क्षपाचारिणामित्यस्य स्थाने क्षपाचारिभिः इति पठ्यते तदा त्रयोऽपि यच्छब्दार्थाः समशीर्षिकया धावित्वा प्रधानेन **तैः क्षपाचारिभिरित्यनेन** प्रतिबन्धमान्तरस्यैवाऽन्वयमनुभवन्तीत्यभिप्रायेणाह—**क्षपाचारिभिरित्यादि** । क्षपाचारिभिरिति पाठेऽपि भिन्नविभक्तिकत्वाद् येषामिति षष्ठ्यन्तस्यान्वयो न स्यादितिचेन्न तत्पदेन भिन्नविभक्तिकेनाऽपि अन्वयस्य बोधनाद्, तत्पदस्य च समानविभक्तिकेन क्षपाचारिभिरित्यनेनान्वयात् तत्पदपरामृष्टानां सर्वेषां यत्पदार्थानां क्षपाचार्यभेदलाभात् ॥ उदा० २९३ ॥

न्यूनतानिबन्धनम् अभवन्मतयोगत्वमुदाहरति—**त्वमेवंसौन्दर्येत्यादि** । काचित् सखी नायिकामाह—हे सुभगे, त्वम् एतादृशाद्वितीयसौन्दर्ययुक्ता असि, स च प्रकृतो नायकोऽपि सौन्दर्येण परिचितः (सौन्दर्ययुक्तः) अस्ति, युवां द्वौ एव वैदग्धीनां परां काष्ठामाश्रयथः, तस्माद् **इति** पूर्वोक्तेन प्रकारेण युवयोर्द्वन्द्वं भाग्येन सम्यक् मिलति, अतः परं यत् शिष्टं परिणयजं सम्मेलनं तदपि यदि स्यात् तदानीम् इहलोके गुणितया जितमित्यर्थः । अत्र यत् शेषं तद् यदा स्यात् तदानी गुणितया जितमित्यर्थः प्रतिपिपादयिषितः. अतो यत्पदस्य तदानीम्पदेनैवान्वयोऽभिमतः स च न सम्भवति यत्-पद-तदानीम्-पदयोः परस्परम् आकाङ्क्षाया अभावादिति अभवन्मतयोगत्वं बोध्यम् । चेत् स्याद् इति पाठे चेदित्यस्य यदेत्यर्थकताया अपि सम्भवाद् अतः शेषं यदा स्यात् तदानी गुणितया जितमित्यभीष्टः सम्बन्धो भवतीति **चेत् स्याद् इति युक्तः पाठ** इत्यभिप्रायः ॥ उदा० २९४ ॥

आकाङ्क्षाविरहनिबन्धनमभवन्मतयोगत्वमुदाहरति—**सङ्ग्रामाङ्गणेत्यादि** । हे महा-

अत्र आकर्णनक्रियायाः कर्मत्वे कोदण्डं शरानित्यादि. वाक्यार्थस्य कर्मत्वे कोदण्डाः शरा इत्यादि प्राप्तम् । न च यच्छब्दार्थस् तद्विशेषणं वा कोदण्डादि । न च केन केनेत्यादिप्रश्नः ।

यथा वा—

चापाचार्यस् त्रिपुरविजयी इत्यादि (उदाहृतचरं पद्यम्-२६७) ॥उदा० २६६॥

अत्र भार्गवस्य निन्दायां तात्पर्यम्, कृतवता इति परशौ सा प्रतीयते । कृतवत इति प्रयोगे मतयोगो भवति ।

राज, सङ्ग्रामरूपे अङ्गने सङ्गतेन भवता धनुषि अधिज्ये कृते सति येन येन यद् यत् सहसा समासादितं तत् समाकर्णय; कोदण्डेन (धनुषा) शरा आसादिताः, शरैः शत्रुशिर आसादितम्, शत्रुशिरसाऽपि भूमण्डलम् आसादितम्, तेन भूमण्डलेन त्वमासादितः, भवता च अनघा कीर्तिरासादिता, कीर्त्या च लोकत्रयमासादितम् इत्यर्थः । अत्र पूर्वोत्तरार्धयोरेकवाक्यत्वेन अन्वयः कवेरभिप्रेतः इत्यभ्युपगम्य तस्य असम्भवित्वं प्रदर्श्य अभवन्मतयोगत्वं स्फुटीकरोति—**अत्राकर्णनक्रियायेत्यादिना** । अत्र एकवाक्यतायै पूर्वार्धे प्रयुक्तेन आकर्णयेति आकर्णनक्रियायाः कर्मत्वे कोदण्डं शरान् इत्यादि प्राप्तं भवति तच्च नास्तीति उत्तरार्धगतपदार्थानाम् आकर्णनक्रियायां कर्मत्वेन अन्वयोऽसम्भवी, उत्तरार्धस्य वाक्यार्थरूपेण कर्मतया आकर्णनक्रियायामन्वये विवक्षितेऽपि "यो यो वीर समायातस् तं तं शृणु महीपते । भीष्मो द्रोणः कृपः कर्णः सौमदत्तिर् धनञ्जयः" इत्यादाविव उत्तरार्धगतपदार्थवाचिनां पदानां प्रथमान्तता प्राप्नोतीति कोदण्डाः शराः इत्यादिः प्रयोग आवश्यकः, स च नास्तीति उत्तरार्धस्य आकर्णनक्रियायां वाक्यार्थरूपेण कर्मतयाऽन्वयोऽपि असम्भवन्नेव; कोदण्डादेर्यच्छब्दार्थत्वेऽभिमतेऽपि कोदण्डादेः पुनरुपादानं व्यर्थं स्यात्; येन येन यद् यद् इति यच्छब्देभ्यः कोदण्डादीनामप्रतीतेश्च तथाऽभ्युपगमे निरवकाशः इति यच्छब्दद्वाराऽपि काण्डादीनामाकर्णनक्रियायामन्वयोऽसम्भवन्नेव; कोदण्डादेर्यच्छब्दविशेष्यत्वे यच्छब्दविशेषणत्वे वाऽभिमतेन येन कोदण्डेन ये शराः समासादिताः तान् आकर्णय, कोदण्डेन येन शरा ये समासादितास् तान् आकर्णय इति वा वाक्यार्थस्य पर्यवसानं स्यादिति विशेषस्याऽऽकाङ्क्षाया अनिवृत्तिः स्यात् । येन येन यद् यत् समासादितमिति समान्यतोऽवगमने केन केन किं किम् इति विशेषस्य प्रश्ने सति तदुत्तरतया कोदण्डेन शरा इत्यादि उत्तरार्धं सङ्गतं भवितुमर्हति. किन्तु तादृशः प्रश्नोऽपि अत्र नास्तीति नानेनाऽपि प्रकारेण उत्तरार्धं पूर्वार्धेन समन्वितं भवतीति कवेरभिमत एकवाक्यत्वेन पूर्वोत्तरार्धयोरन्वयोऽभवन् बोध्य इत्याशयः । वस्तुतस्तु आसादितमित्यस्य क्रियापदस्य वचनादिविपरिणामेनाऽनुषङ्गेन 'कोदण्डेन शराः समासादिताः' इत्यादीनां वाक्यान्तराणामारम्भ एव कवेरभिमतः, आक्षिप्तं केन केन किं किमिति प्रश्नमादाय येन यदासादितं तदाकर्णयेति प्रतिज्ञाय प्रश्नं विनाऽपि 'कोदण्डेन शराः' इत्यादिको निर्देशः कर्तुं शक्य इति वाऽपि वाक्यान्तरारम्भः सुश्लिष्टः पूर्वापर्येणेति न कोऽपि दोष इति इदमपि

यथा वा—

> चत्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः
> सङ्ग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता ।
> कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
> राजन्योपनिमन्त्रणाय रसति स्फीतं हतो दुन्दुभिः ॥ उदा० २९७ ॥

अत्र अध्वरशब्दः समासे गुणीभूत इति न तदर्थः सर्वैः संयुज्यते ।

यथा वा—

जङ्घाकाण्डोरुनाल० इत्यादि (उदाहृतचरं पद्यम्-२१५) ॥ उदा० २९८ ॥

अत्र दण्डपादगता निजतनुः प्रतीयते, भवानीसम्बन्धिनी तु विवक्षिता ।

काव्यप्रकाशयवनस्य कण्ठाश्लिष्टकुलाङ्गनाप्रकर्षैवेति बोध्यम् ॥ उदा० २९५ ॥

व्यङ्ग्यस्य विवक्षितेन सह योगस्याभावे अभवन्मतयोगत्वमुदाहरति—चापाचार्य इत्यादि । काव्यप्रकाशस्थमिदमत्रैवोल्लासे सप्तषष्ट्युत्तरद्विशततमे उदाहरणे । अत्र रावणस्य भार्गवेण सह युद्धमनभिलषितमिति भार्गवोपेक्षाऽत्र व्यङ्ग्या । भार्गवोपेक्षा च भार्गवनिन्दायां कृतायामेव सङ्गता भवति, न तत्परशुमात्रनिन्दया, आयुधान्तरवता भार्गवेण सह युद्धस्य सम्भवात् । कृतवतेत्यस्य परशुविशेषणतया तु परशावेव निन्दा प्रतीयते, एवञ्च प्रकरणबलात् प्रतिपाद्यत्वेन ज्ञाताया भार्गवोपेक्षाया न सङ्गतिरिति अभवन्मतयोगत्वमत्र बोध्यम् । मतयोगो भार्गवनिन्दासङ्गतिरूपः ॥ उदा० २९६ ॥

समासेन एकत्रैवावरुद्धतया पदार्थस्याभिमतैः पदार्थान्तरैः अन्वयस्याभावे अभवन्मतयोगत्वमुदाहरति—**चत्वारो वय**मित्यादि । भट्टनारायणकृते वेणीसंवरणे (१।२५) दुन्दुभिध्वनिमाकर्ण्य 'प्रिये रणयज्ञः प्रवर्तते' इति उक्तवतो भीमसेनस्योक्तिरियम् । (सङ्ग्रामरूपे सोमयागे) अहं कनिष्ठा भ्रातरश्चेति वयं चत्वारस् तत्-तद्-गणे मुख्या ऋत्विजः अध्वर्यूद्गातृहोतृब्रह्मरूपाः, स भगवान् कृष्णः कर्मणामुपदेष्टा सभ्यरूप ऋत्विक्, राजा युधिष्ठिरः सङ्ग्रामाध्वरे दीक्षितः (गृहीतनियमः) यजमानः, पत्नी द्रौपदी यावद् दुर्योधनवधं केशसंवरणाद्यभावरूपं व्रतं गृहीतवतीति व्रतवती, दुर्योधनादयः कौरव्याः संज्ञपनीयाः पशवः, सभायां दुश्शासनेन कृतः प्रियायाः यः केशान्तराकर्षणादिरूपः परिभवस्तेन जनितस्य क्लेशस्योपशान्तिः फलम्, क्षत्रियाणामाह्वानाय ताडितो दुन्दुभिः **स्फीतम्** महद् ध्वनितं यथा स्यात् तथा शब्दायते इत्यर्थो विवक्षितः । अत्र सङ्ग्रामाध्वरस्य अधिकरणतया ऋत्विगादिषु सर्वेषु अन्वयो विवक्षितः, किन्तु सङ्ग्रामाध्वरशब्दस्य नरपतिविशेषणेन दीक्षितशब्देन सह समस्तत्वात् समासे एकार्थीभावेन अन्यविशेषणत्वेनोपस्थितस्य अपरत्र विशेषणत्वेनान्वयस्य अप्राप्तेः सङ्ग्रामाध्वरस्य ऋत्विगादिषु नान्वयः सम्भवति इति अभवन्मतयोगत्वं बोधयन्नित्याह— अत्राध्वरशब्द इत्यादि । "कौरव्याः पशवः" इति भट्टनारायणप्रयोगश्चिन्त्यः (कुरवः इति साधु) इति माधवीयधातुवृत्तौ (६।११४) आचार्यसायणः ॥ उदा० २९७ ॥

[१३] अनभिहितवाच्यम् अवश्यवक्तव्यमनुक्तं यत्र, यथा—

अप्राकृतस्य चरितातिशयैश्च दृष्टैरत्यद्भुतैरपहृतस्य तथापि नास्था ।
कोऽप्येष वीरशिशुकाकृतिरप्रमेयमाहात्म्यसारसमुदायमयः पदार्थः ॥
उदा० २९९ ॥

अत्राऽपहृतोऽस्मीति अपहृतत्वस्य विधिर्वाच्यः तथापीत्यस्य द्वितीयवाक्यगतत्वेनैवोपपत्तेः ।

यथा वा—

एषोऽहमद्रितनयामुखपद्मजन्मा प्राप्तः सुरासुरमनोरथदूरवर्ती ।
स्वप्नेऽनिरुद्धघटनाधिगताभिरूप-लक्ष्मीफलामसुरराजसुतां विधाय ॥
उदा० ३०० ॥

अत्र मनोरथानामपि दूरवर्तीति अप्यर्थो वाच्यः ।

सम्बन्धिपदविशेषान्वयस्वभावविरोधमूलम् अभवन्मतयोगमुदाहरति—उद्धृ[illegible]डो-रुनाल इत्यादि । व्याख्यातमिदं पद्यमत्रैवोल्लासे (उदा० २१५) । सम्बन्धिपदानां निज-स्वाऽऽत्मादीनां प्रधानक्रियान्वयिनि कारके एव अन्वयो भवतीति अत्र निजतनोर् भवान्या सह अन्वये विवक्षितेऽपि तथा न प्रतीयते किन्तु दण्डपादेनान्वयः प्रतीयते इति अभवन्मतयोगत्वं बोध्यमित्याशयेनाह—**अत्र दण्डपादगते**त्यादि ॥ उदा० २८९ ॥

[१३] अनभिहितवाच्यं दुष्टं वाक्यं स्फुटीकरोति—**अनभिहिते**त्यादिना । अवश्यं वक्तव्यम् अनुक्तं यस्मिन् तद् वाक्यम् अनभिहितवाच्यं दुष्टमित्यर्थः । वाचकपदस्य न्यूनत्वे न्यूनपदत्वम्, उद्देश्यविधेयत्वादिद्योतकनिपातादेर् न्यूनत्वे त्वयं दोष इत्यनयोर्भेदो बोधः । विवक्षितार्थबोधविलम्ब एवात्र दूषकताबीजम् । नित्यश्चाऽयं दोषः । उदाहरति—**अप्राकृतस्ये**त्यादिना । महावीरचरितनाटके सीतास्वयंवरे रामेण धनुषि भञ्जिते परशु-रामस्य स्वगतोक्तिरियम् (२।३९) । अदृष्टपूर्वैः अश्रुतपूर्वैः दृष्टैः श्रुतैश्च अस्य चरित्रो-त्कर्षैरपहृतस्य **अप्राकृतस्य** विदग्धस्य मम तथापि अत्र दशरथपुत्रेण क्षत्रियकेणैव धनुर्भग्न-मिति निश्चयो न भवति, यतो नायं दशरथपुत्रः किन्तु एष समीपे दृश्यमानो रामो राम इत्युच्यमानः कोऽपि जनैः सम्यगपरिचितो वीरशिशुरूपः अन्यत्राऽप्रमितानां सौन्दर्यसारा-णां समुदायेन रचितः पदार्थोऽस्तीत्यर्थः । अत्र अनभिहितवाच्यत्वं प्रदर्शयन्ति—**अत्र अप-हृतोऽस्मी**त्यादिना । अत्र उत्तरवाक्यगतं तथापीति पदं यद्यपीत्यारब्धं पूर्ववाक्यमाकाङ्-क्षति इति यद्यपीत्यस्याक्षेप्यत्वेऽपि तदन्वयोचितं पूर्वं वाक्यमावश्यकमिति पूर्ववाक्यत्वेन अपहृतोऽस्मीति अपहृतत्वस्य विधिरवश्यं वक्तव्यः स च नोक्त इति अनभिहितवाच्यत्वं बोध्यमित्याशयः । तथापि इत्यत्र तच्छब्दः पूर्वप्रक्रान्तार्थवाचक इति पूर्ववाक्यस्याभावे-नैव तदर्थसङ्गतिरित्यभिप्रायेणाह—**तथापी**त्यस्येत्यादि ॥ उदा० २९९ ॥

उक्ते उदाहरणे विधेयाविमर्शेन संसृष्टिरस्तीति तदसंसृष्टमुदाहरणान्तरमाह—**एषोऽह**मित्यादि । उषाहरणनाटके पद्यमिदम् । सुराणामसुराणां च मनोरथस्य दुष्प्राप्यः

यथा वा—

त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः ।
कमपराधलवं मम पश्यसि त्यजसि मानिनि दासजनं यतः ॥ उदा० ३०१॥

अत्र अपराधस्य लवमपीति वाच्यम् ।

[१४] अस्थानस्थपदं यथा—

प्रियेण सङ्ग्रथ्य विपक्षसन्निधौ निवेशितां वक्षसि पीवरस्तने ।
स्रजं न का चिद् विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥
उदा० ३०२ ॥

अत्र काचिन् न विजहौ इति वाच्यम् ।

[पार्वत्या उपायै दत्ताद् वराद् अनेन रूपेणाऽत्र प्राप्त इति] अद्रिनन्दनाया. पार्वत्या मुखपद्माद् [वररूपेण] जातः एषोऽहं बाणासुरसुतामुषां स्वप्ने अनिरुद्धेन श्रीकृष्णपौत्रेण सह घटनया (समागमरूपेण) प्राप्तं परमसौन्दर्यसम्पन्ने. फलं यया तादृशीं विधाय प्राप्त इत्यर्थ. । अनुपलभ्यमानाकरस्य अस्य पद्यस्य व्याख्याने टीकाकाराणां बहवो मतभेदाः आकरानुपलम्भादसमाधेयाः । अत्र अप्यर्थेऽनभिहिते अन्यमनोरथविषयत्वं सुरासुरदुरि-न्द्रियविषयत्वं वा प्रतीयते विवक्षितं कस्याऽपि मनोरथस्याऽगम्यत्वं तु न प्रतीयते इति अप्यर्थोऽवश्यं वाच्यः स चाऽनुक्त इति अनभिहितवाच्यत्वं बोध्यमित्याशयेनाह—**अत्र मनोरथानाम**पीत्यादि ॥ उदा० ३०० ॥

प्रपञ्चार्थं समासाविषयेऽपि अनभिहितवाच्यत्वमुदाहरति—**त्वयि निबद्धे**त्यादिना । विक्रमोर्वशीये (४।५५) गिरिनदीमुर्वशीं मन्यमानस्य पुरूरवसस् तां प्रति उक्तिरियम् । हे मानिनि, त्वयि निबद्धा रतिर् येन तादृशस्य प्रियवादिनः प्रणयभङ्गे पराङ्मुखं (विमुखं भीरु वा) चेतो यस्य तथाभूतस्य मम कम् अपराधस्य लवं पश्यसि यतोऽपराध-लवाद् दासभूतं जनं (मां) त्यजसीत्यर्थः । अत्र अप्यर्थेऽनभिहिते अपराधलवं न, किन्तु महान्तमपराधं पश्यसि इति प्रतीयते, न चाऽयं प्रतिपिपादयिषितोऽर्थः, अतो लवमपीति अप्यर्थोऽवश्यं वक्तव्यः स च नोक्त इति अनभिहितवाच्यमिदं वाक्यमित्यभिप्रायेणाह—**अत्र अपराधस्ये**त्यादि ॥ उदा० ३०१ ॥

[१४] अस्थानस्थपदमिति नामैवान्वर्थं लक्षणरूपमिति पृथग् लक्षणमप्रतिपाद्यैव उदाहर्तुमाह—**अस्थानस्थपदं यथे**ति । श्रुतयैव वर्णानुपूर्व्या विवक्षितस्वार्थानुभावकेनाऽपि स्व-साकाङ्क्षात् स्थानात् व्यवहिते स्थाने प्रयुक्तेन पदेन युक्तं वाक्यम् अस्थानस्थपदं वाक्यमुच्यते । आसत्तिवैगुण्येन विवक्षितार्थविरुद्धार्थबोधकत्वं दूषणतावीजम् । नित्योऽयं दोषः । उदाहरति—**प्रियेण सङ्ग्रथ्ये**त्यादि । किरातार्जुनीये जलक्रीडावर्णनप्रसङ्गे (८।३७) कस्याश्चिद् नायिकाया वर्णनमिदम् । **विपक्षस्य** सपत्नीजनस्य सन्निधौ प्रियेण संग्रथ्य पीवरस्तने वक्षसि उपहितां मालां जलेन म्लानामपि काचिन् नायिका न जहौ, यतः खलु गुणाः प्रेम्णि वसन्ति न वस्तुनि इत्यर्थः । अत्र काचिद् नायिका तादृशीमपि

यथा वा—

लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे
मुद्राङ्कः शितिकन्धरेन्दुशकलेनान्तःकपोलस्थलम् ।
पार्वत्या नखलक्ष्मशङ्कितसखीनर्मस्मितव्रीडया
प्रोन्मृष्टः करपल्लवेन कुटिलाताम्रच्छविः पातु व. ॥उदा० ३०३॥

अत्र नखलक्ष्मेत्यत. पूर्वं कुटिलाताम्रेति वाच्यम् ।

[१५] अस्थानस्थसमासं यथा—

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्-क्षणात्-
फुल्लत्-कैरवकोशनिस्सरदलिश्रेणीकृपाणं शशी ॥उदा० ३०४॥

स्रजं न विजहौ इति विवक्षितेऽपि अस्थानस्थनञोऽपराधाद् 'न काचिद् विजहौ किन्तु सर्वा एव विजहुः' इति विरुद्धं प्रतीयते इति अस्थानस्थपदत्वं बोध्यम्, तत्-परिहाराय च काचिन्न विजहौ (काचित् स्रजं नो विजहौ) इति वाच्यमित्याशयेनाह—**अत्र काचि-दित्यादि** ॥ उदा० ३०२ ॥

प्रकारान्तरेणाऽपि अस्थानस्थं पदं वाक्यदोषवीजं भवतीति प्रदर्शनाय उदाहरणान्तर-माह—**लग्नः केलिकचेत्यादि** । सुरतक्रीडायां यः कचग्रहस्तेन श्लथायां जटायां लम्बमानेन नीलकण्ठस्य इन्दुखण्डेन निद्रावस्थायां कपोलस्थलमध्ये लग्नः प्रियार्पितं नखचिह्नमिदमिति शङ्कितायाः सख्याः नर्मस्मितेन जातया व्रीडया पार्वत्या करपल्लवेन प्रोन्मृष्टः कुटिला-ताम्ररूपो मुद्राङ्को वः पातु इत्यर्थः । अत्र कुटिलाताम्रच्छवित्वं नखलक्ष्मशङ्काहेतुरिति कुटिलाताम्रच्छविरिति नखलक्ष्मशङ्कितसखीनर्मस्मितव्रीडयेत्यत. पूर्वमेव प्रयुक्तमुपयुक्तं भवति न तु पश्चात् प्रयुक्तमिति अस्थानस्थपदत्वं बोध्यमित्याशयेनाह—**अत्र नखेत्यादि** ॥ उदा० ३०३ ॥

[१५] अस्थानस्थसमासमिति नामैवान्वर्थ लक्षणकार्यकारीति पृथग् लक्षणमप्रतिपाद्यै-वोदाहर्तुमाह—**अस्थानस्थसमासं यथेति** । ओजोगुणरहितेऽर्थे माधुर्यवति प्रसादवति वा शृङ्गारादौ रसे च दीर्घे समासे प्रयुक्ते अयं दोषोलब्धास्पदो भवति । सहृदयवैमुख्यापाद-कत्वं दूषकताबीजम् । अपदस्थसमासं क्वचिद् गुण इति वक्ष्यति । अतोऽनित्योऽयं दोषः । उदाहरन्ति—**अद्यापीत्यादि** । वसुकल्पस्येदं पद्यमिति सरस्वतीकण्ठाभरणे । अद्यापि मयि पूर्णेऽपि एष नायिकानां मानः स्तनरूपशैलदुर्गेण अनाक्रमणीये नायिकानां हृदि स्थातुं वाञ्छति धिक् इति क्रोधादिव ईषल्लोहितः असौ द्युलोकस्थः, प्रोद्यन्तः दूरतरं प्रसारिताः कराः (किरणाः) यस्य तादृशः शशी उदयक्षणे उत्फुल्लन्ति यानि कैरवाणि (सितोत्प-लानि) तेषां कोशाः (कुड्मलानि) एव कोशाः (खड्गनिधानानि) तेभ्यो निस्सरन्ती या

अत्र क्रुद्धस्योक्तौ समासो न कृतः, कवेरुक्तौ तु कृतः ।

[१६] सङ्कीर्णं यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति, यथा—

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम् ।
ननु मुञ्च हृदयनाथ कण्ठे मनसस्तमोरूपम् ॥उदा० ३०५॥

अत्र 'पादगत बहुगुण हृदयनाथ किमिति न पश्यसि, इमं कण्ठे गृहाण, मनसस् तमोरूपं कोपं मुञ्च' इति । एकवाक्यतायां तु क्लिष्टमिति भेदः ।

[१७] गर्भितम् यत्र वाक्यस्य मध्ये वाक्यमनुप्रविशति; यथा—

परापकारनिरतैर् दुर्जनैः सह सङ्गतिः ।
वदामि भवतस् तत्त्वं न विधेया कदाचन ॥उदा० ३०६॥

अत्र तृतीयपादो वाक्यान्तरमध्ये प्रविष्टः ।

अलिपङ्क्तिः सैव कृपाणस्त कर्षति (निष्कालयति) इत्यर्थः अत्र पूर्वार्धे क्रुद्धस्य शशिनः कविनिबद्धवक्तुः उक्तौ ओजोगुणव्यञ्जकार्थे समासमकृत्वा उत्तरार्धे ओजोगुणानिरपेक्षायां कवेरुक्तौ दीर्घः समासः कृत इति अस्थानस्थसमासत्वं बोध्यमित्यभिप्रायेणाह—अत्र क्रुद्धस्येत्यादि ॥उदा० ३०४॥

[१६] यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति तद् वाक्यं सङ्कीर्णं नाम दुष्टं भवतीत्याह—सङ्कीर्णमित्यादिना । विवक्षितार्थप्रतीतिविलम्बो दूषकताबीजम् । नित्यश्चायं दोषः । उदाहरति—किमितीत्यादि । अस्मिन्नेव दोषे रुद्रटकृते काव्यालङ्कारे उदाहृतं पद्यमिदम् (६।४२) पादप्रणतं बहुभिर्गुणैर्युक्तं तव हृदयस्य नाथं किमिति न पश्यसि ? इमं (तव हृदयस्य नाथं) कण्ठे गृहाण, ननु मनसस् तमोरूपं (चेतोगततमोगुणभागरूपं) कोपं विमुञ्चेत्यर्थः । अत्र पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि इति वाक्यस्य हृदयनाथमिति पदं ननु मुञ्चेत्यादिवाक्यान्तरेऽनुप्रविष्टम् इमं कण्ठे गृहाणेति वाक्यस्य कण्ठे इति पदं ननु मुञ्चेत्यादि वाक्यान्तरे प्रविष्टम्, मनसस् तमोरूपं कोपं मुञ्चेति वाक्यस्य कोपमिति पदं किमिति न पश्यसीत्यादौ वाक्यान्तरे प्रविष्टम् इति सङ्कीर्णत्वं बोध्यमित्यभिप्रायेण वाक्यविभागं प्रदर्शयति—अत्र पादगतमित्यादिना । अस्य दोषस्य क्लिष्टाद् भेदं प्रदर्शयति—एकवाक्यतायामित्यादिना । एकवाक्यतायां क्लिष्टत्वम्, सङ्कीर्णत्वं तु अनेकवाक्यतायामित्यनयोर्भेद इत्यर्थः ॥उदा० ३०५॥

[१७] यत्र वाक्ये मध्ये अन्यद् वाक्यमेव प्रविशति तद् वाक्यं गर्भितं नाम दुष्टं भवतीत्याह—गर्भितमित्यादिना । अन्वयबोधविलम्बोऽत्र दूषकताबीजम् । गर्भितत्वं क्वचिद् गुण इति वक्ष्यति, अतोऽनित्योऽयं दोषः । एकस्यैव वाक्यस्य मध्ये वाक्यान्तरस्य प्रवेशेन जातं गर्भितत्वमुदाहरति—परापकारेत्यादिना । व्यवहारपाटवतत्त्वं भवतो वदामि, परपीडारतैर्दुर्जनैः सह सङ्गतिः कदाऽपि न कार्या इत्यर्थः । अत्र 'परापकारनिरतैर्दुर्जनैः सह सङ्गतिर् न विधेया' इति वाक्यस्य मध्ये 'वदामि भवतस् तत्त्वम्' इति वाक्यं प्रविष्टं सत् परापकारेत्यादिवाक्यस्यान्वयं विलम्बितं करोतीति दुष्टमिदं वाक्यमित्यभिप्रेत्याह—

यथा वा—

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्-सक्तोऽयं न किञ्चिद् गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद् गदितुमिति गतेवाम्बुधिं यस्य कीर्तिः ॥उदा० ३०७॥

अत्र विदितं तेऽस्तु इति एतत् कृतम्, प्रत्युत लक्ष्मीस्ततोऽपसरतीति विरुद्ध-मतिकृत् ।

[१८] प्रसिद्धिहतम् "**मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति । स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम्**" (रुद्रककृते काव्यालङ्कारे ६।२५) इति प्रसिद्धिमतिक्रान्तम्, यथा—

अत्र तृतीयपाद इत्यादि । **तृतीयपादः** तृतीये पादे स्थितं वाक्यं लक्षयति ॥ उदा० ३०६ ॥

प्रपञ्चार्थं हेतुहेतुमद्भावादिना वाक्यैकवाक्यतापन्ने वाक्ये वाक्यान्तरस्य प्रवेशेन जातं गर्भितत्वमुदाहरति—**लग्नं रागे**त्यादिना । हर्षदत्तस्य पद्यमिदमिति सुभाषितावलौ वल्लभदेवः (श्लो० २४९५) । यस्य राज्ञः कीर्तिः लक्ष्म्याः मत्पितरमेवं निवेदयेति नियोगात् समुद्रं प्रति 'हे अम्बुधे, रागावृताङ्ग्या यया असियष्ट्या इह सङ्ग्रामे शत्रूणां कण्ठे सुदृढं यथा स्यात् तथा लग्नम्, या च असियष्टिरिह सङ्ग्रामे मातङ्गानामपि उपरि पतन्ती परपुरुषैः (शत्रुभटैः) दृष्टा तया सक्तोऽयं त्वज्जामाता राजा न किञ्चिदपि युक्तायुक्तं विचारयति, अतस्तेनाहं भृत्येभ्यो दत्ताऽस्मि, इदं ते विदितमस्तु' इति सन्देशं वक्तुं गतेवेत्यर्थः । अत्र तत्-सक्तोऽयं न किञ्चिद् गणयति, [अतः] तेन भृत्येभ्यो दत्ताऽस्मि' इति वाक्यैकवाक्यतापन्नस्य वाक्यस्य मध्ये 'विदितं तेऽस्तु' इति वाक्यान्तरं प्रविष्टमिति गर्भितत्वं बोध्यम् । पूर्वस्मिन् उदाहरणे वदामि भवतस्तत्त्वमिति वाक्यं गर्भरूपमपि अन्वयबोधं विलम्बयदपि वक्तव्यस्वार्थस्य अतिरहस्यतया व्यञ्जने उपयोगिता न तदे-कान्तेन दूषकम्, अत्र तु राज्ञः प्रभूतलक्ष्मीकत्वे विवक्षितेऽपि 'विदितं तेऽस्तु' इति वाक्य-भङ्ग्या मदनिर्देशहृदयनिरसन निश्चयेन प्रकाशनात् त्याज्योऽयमिति व्यज्यते इति लक्ष्मी-स्ततोऽपसरतीति प्रतीयते, एवञ्च गर्भरूपं 'विदितं तेऽस्तु' इति वाक्यमेकान्तेन दूषक-मित्यभिप्रेत्याह—**अत्र विदित**मित्यादि ॥ उदा० ३०७ ॥

[१८] यद् वाक्यं 'मञ्जीर-रसना-भ्रमर-घण्टादिषु रणित-शिञ्जित-गुञ्जित-क्वणितादि, पक्षिषु कूजितवाशितादि, सुरते स्तनित-मणितादि, मेघ-सिंहादिषु गर्जित-ध्वनितादि महाकविभिः लोके विदग्धैश् च प्रयुज्यमानमिति शब्दविशे-षाणां चमत्कारिप्रयोगविषयस्य या प्रसिद्धिः' तां प्रसिद्धिमतिक्रान्तं तद् वाक्यं **प्रसिद्धिहतं** नाम दुष्टं भवतीत्यर्थः । विशेषणविशेष्यसन्निधानविशेषमूलकोऽयं दोषः इत्यस्य वाक्यदोषत्वम् । प्रयोगस्य सर्वथाऽनिषेधाच्च नास्य अप्रयुक्तता । प्रसिद्धिप्रतिकूल-त्वजन्यसहृदयहृदयोद्वेगहेतुत्वं दूषकताबीजम् । नित्यश्चायं दोषः । वृत्तौ उपात्तायाः

महाप्रलय-मारुत-क्षुभित-पुष्करावर्तक-प्रचण्डघन-गर्जित-प्रतिरुतानुकारी मुहुः ।
रव श्रवणभैरव. स्थगितरोदसीकन्दरः कुतोऽद्य ममरोदधेरयमभूतपूर्वः
॥ उदा० ३०८ ॥

अत्र रवो मण्डूकादिषु प्रसिद्धो न तूक्तविशेषे सिंहनादे ।

[१९] भग्नः प्रक्रमः प्रस्तावो यत्र. यथा—

नाथे निशाया नियतेर् नियोगादस्तङ्गते हन्त निशाऽपि याता ।
कुलाङ्गनानां हि दशानुरूपं नात. परं भद्रतरं समस्ति ॥ उदा० ३०९ ॥

अत्र गते इति प्रक्रान्ते याता इति प्रकृतः । गता निशापीति युक्तम् ।

ननु 'नैकं पदं द्विः प्रयोज्यं प्रायेण' इत्यन्यत्र (का० अ० सू० वृ० ५।१।१), कथितपदं दुष्टम्' इति च इहैवोक्तम् (सू० ७६. उदा० २८९), तत् कथमेकस्य पदस्य द्विः प्रयोगः ? उच्यते—उद्देश्य-प्रतिनिर्देश्यव्यतिरिक्तो विषय एकपद-

---

प्रसिद्धिविरोधिकायाः कारिकाया मुद्रिते रुद्रटालङ्कारे तु अयं पाठः—"मञ्जीरादिषु रणितप्रायान् पक्षिषु च कूजितप्रभृतीन् । मणितप्रायान् सुरते मेघादिषु गर्जितप्रायान् । (दृष्ट्वा प्रयुज्यमानानेवम्प्रायान् प्रयुञ्जीत । अन्यत्रैतेऽनुचिता शब्दार्थत्वे समानेऽपि)" इति । उदाहरति—**महाप्रलयेत्यादि** । वेणीसंवरणे (३।४) रणशब्दं श्रुतवतोऽश्वत्थाम्न उक्तिरियम् । अद्य अयम् महता प्रलयमारुतेन क्षुभितयोः (मेघयोः) यत् प्रचण्डं घनं (निबिडं) च गर्जितं तस्य प्रतिध्वनेरनुकर्ता श्रवणयोर् भयङ्करः अकाण्ड एवात्र भूमिकायामभूतपूर्वोदयो रवः कस्मात् समरोदधेर् जायते ? इत्यर्थः । अत्र रवो मण्डूकादिषु प्रसिद्धौ रणस्थवीरनिर्ह्रादविषये प्रयुक्त इति प्रसिद्धिविरुद्धत्वेनानुचितत्वात् सहृदयहृदयोद्वेगं कृत्वा चमत्कारापकर्षं करोतीत्याशयेनाह—**अत्र रव** इत्यादि । अत्र **प्रतिरुतानुकारीत्यपि** दुष्टं रुतस्य पक्षिजातिध्वनित्वादिति श्रीधरः ॥ उदा० ३०८ ॥

[१९] भग्नो भेदं प्रक्रमः प्रस्तावः (उपक्रमः) यस्मिन् तद् वाक्यं भग्नप्रक्रमं नाम दुष्टं भवतीत्यभिप्रेत्याह—**भग्न. प्रक्रम** इत्यादि । प्रकृतिप्रक्रमं भङ्गम् उदाहरति—**नाथे निशाया** इत्यादि । व्यक्तिविवेके उदाहृतं पद्यमिदम् प्रक्रमभेदप्रकरणे द्वितीये विमर्शे । विधेर् वियोगाद् निशाया नाथे चन्द्रे अस्तं गते सति निशाऽपि हन्त गता, [उचितञ्चैतद्] यतो हि पतिव्रतानां कुलस्त्रीणां पतिवियोगदशानुरूपं प्रियानुगमनादस्माद् अन्यद् भद्रतरं कृत्यं न सम्भवतीत्यर्थः । अत्र अस्तं **गते** इति गमिरूपायां प्रकृतौ उपक्रान्तायां पश्चाद् **याता** इति यातिरूपायाः प्रकृतेः प्रयोगः 'भिन्नशब्दाभ्यामुपस्थापित एकोऽप्यर्थोभिन्नवद् भाति' इति यातेति पदेन गमनस्योपादानेऽपि नाऽनुगमनत्वेन प्रतीतिर्भवति इति एकरसप्रवृत्ताया. प्रतीतेः परिस्खलनेन वैरस्यमादधाति, अतः प्रकृतिप्रक्रमभङ्गोऽत्र दोष इत्याशयेनाह—**अत्र गते** इत्यादिना । महिमभट्टोक्तमेव दोषपरिहारोपायं प्रदर्शयति—**गता निशाऽपीति युक्तमिति** ।

प्रयोगनिषेधस्य। तद्वति तु विषये प्रत्युत तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः, तथाहि—"**उदेति सविता ताम्रस्ताम्र एवास्तमेति च। सम्पत्तौ च विपत्तौ च महतामेकरूपता**" (उदा० ३१०) अत्र रक्त एवास्तमेति इति यदि क्रियेत तदा पदान्तरप्रतिपादित स एवार्थोऽर्थान्तरतयेव प्रतिभासमान प्रतीतिं स्थगयति।

यथा वा—

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसङ्ख्यामतिवर्तितुं वा।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ उदा० ३११ ॥

अत्र प्रत्ययस्य। सुखमीहितुं वेति तु युक्तः पाठः।

ननु एकमेव पदं द्विवारं प्रायेण न प्रयोज्यमिति काव्यविद्भिरन्यत्राऽपि उक्तम्, कथितपदं वाक्यं दुष्टं भवतीति इहैव भवताऽपि उक्तम् उदाहृतञ्च, तस्मात् कथमेकस्यैव पदस्य द्विः प्रयोगो दोषपरिहारोपाय उपदिश्यते भवता? अत्रोच्यते—यत्र उद्देश्य-प्रतिनिर्देश्यभावः (अर्थान्तरसङ्क्रमितवाच्यध्वनि-विषयता, लाटानुप्रासविषयता च) न भवति तत्रैव "नैकः पदं द्विः प्रयोज्यम्" इत्यभिमतं काव्यविदाम्, तच्च **प्रायेणे**ति पदेन ज्ञापितमेव तैरपि, अस्माभिरपि तथैवाऽभिप्रेत्य कथितपदं वाक्यं दुष्टमित्युक्तम्; उद्देश्य-प्रतिनिर्देश्यभावयुक्ते विषये तु उद्दिष्ट-प्रतिनिर्दिष्टयोरभेदस्य ज्ञापनाय उद्देशे यस्य शब्दस्य सर्वनाम्नो वा प्रयोगः कृतः प्रतिनिर्देशेऽपि तस्यैव शब्दस्य सर्वनाम्नो वा प्रयोगोऽवश्यं कार्यः, अन्यथा स एवाऽर्थोऽपिशब्दान्तरप्रतिपादितः सन् अर्थान्तरतयेव प्रतिभासमानः ऐक्यप्रतीतिं तिरोधत्ते इति दोषो भवति, यथा—**उदेति सवितेत्**यादौ रक्त एवास्तमेति चेति यदि क्रियेत तदा पदान्तरप्रतीतिविरोधाद् दोषो भवति; एवञ्च नाथे निशाया इत्यादावपि गमनाऽनुगमनप्रत्यायनाय गते इति उपक्रान्ते गता इति प्रयोक्तुं युज्यत एवेति अस्मदुक्तो दोषपरिहारोपायः साधुरेव वेदितव्य इत्याशयेनाऽऽह—**ननु नैकं** पदमित्यादिना। 'न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते' इति मते शाब्दबोधे शब्दोऽपि भासते इति पदान्तरोपादाने प्रतीतेरप्यन्यथात्वं भवति, मतान्तरेऽपि पर्यायपदाभ्यामुपस्थापितोऽर्थोऽभिन्नोऽपि शक्ततावच्छेदकमहिम्ना भिन्न इव प्रतीयते इति बोध्यम्। **उदेति सवितेत्**यादि भग्नप्रक्रमप्रत्युदाहरणपद्यं तु निगदव्याख्यातम् ॥ उदा० ३०९–१० ॥

प्रक्रान्तस्य प्रत्ययस्य भेदेन युक्तं भग्नप्रक्रमं वाक्यमुदाहरति—यशोऽधिगन्तुमित्यादि। इदमुदाहरणं प्रकृतिविभेदभग्नप्रक्रमोदाहरणेषु उपन्यसनीयम्। किरातार्जुनीये पद्यमिदम् (३।४०)। यशः प्राप्तुं सुखं लब्धुं मनुष्याणां महतीं सङ्ख्यामतिक्रम्य वर्तितुं (लोके श्रेष्ठत्वेन गण्यो भवितुं) वाऽपि निरुत्सुकानां किन्तु साध्ये सातिशयं निरन्तरं च अभियोगं (पुनः पुनः प्रवृत्ति) कुर्वतां जनानां सिद्धिः स्वयमेव समुत्सुकेव अङ्कमागच्छतीत्यर्थः। अत्र

[यथा वा—]

ते हियालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चाऽस्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥ उदा० ३१२ ॥

अत्र सर्वनाम्नः । अनेन विसृष्टा इति तु वाच्यम् ।

[यथा वा—]

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर् हि चूते द्विरेफमाला सविशेषसङ्गा ॥ उदा० ३१३ ॥

अत्र पर्यायस्य । महीभृतोऽपत्यवतोऽपीति युक्तम् । अत्र सत्यपि पुत्रे कन्या-रूपेऽपत्ये स्नेहोऽभूदिति केचित् समर्थयन्ते ।

निमित्तार्थकस्य तुमुन्-प्रत्ययस्य प्रक्रमे निमित्तार्थकस्यैवाऽपि अन्यस्य टा-प्रत्ययस्योपादानेन प्रक्रान्तस्य प्रत्ययस्य भेदात् भग्नप्रक्रमत्वं बोध्यमित्याशयेनाह—**अत्र प्रत्ययस्येति** । सुखमी-हितुं वेति युक्तं पाठं मन्यमानं महिमभट्टमनुसरन्नाह—**सुखमीहितुमित्यादि** । सुखे एव औत्सुक्यनिवृत्तिर्वा भवति न सुखेहायामिति सुखमीहितुं निरुत्सुकतामित्यन्वयः कथं युक्तः स्यादिति देवा एतज् ज्ञातुमर्हन्ति ॥उदा० ३११॥

प्रक्रान्तस्य सर्वनाम्नो भेदेन युक्तं भग्नप्रक्रमं वाक्यमुदाहरति—**ते हिमालयमित्यादि** । ते सारुन्धतीकाः सप्त ऋषयो हिमालयं 'साधु यामः' इत्यापृच्छ्य पुनर् महादेवसकाशं प्राप्य अस्मै महादेवाय कन्याधिगमरूपमर्थं सिद्धं विज्ञाप्य अनेन महादेवेन 'साधु गच्छन्तु भवन्तः' इति विसृष्टाः सन्तः आकाशमुद्ययुरित्यर्थः । अस्मै इति निर्दिष्टत्वाद् अनेनेति प्रतिनिर्देशः कार्य इत्याह—अनेनेत्यादिना । इदमप्युदाहरणं महिमभट्टेनैव सङ्गृहीतमत्रोपात्तम् ॥उदा० ३१२॥

प्रक्रान्तस्य पर्यायस्य भेदेन युक्तं भग्नप्रक्रमं महिमभट्टसङ्गृहीतं वाक्यमुदाहरति—**महीभृत इत्यादि** । कुमारसम्भवे पद्यमिदम् (१।२७) । मैनाकाख्यपुत्रयुक्तस्याऽपि तस्य हिमालयपर्वतस्य दृष्टिः तस्मिन् उमारूपे अपत्ये तृप्तिं न जगाम, (उचितमेवैतत्), यतोऽनन्तपुष्पस्याऽपि मधोर् भ्रमरपङ्क्तिः रसाले सविशेषमासक्ता भवतीत्यर्थः । अत्र दृष्टान्त-बलात् सामान्ये सति विशिष्टे आदरातिशयः प्रतिपिपादयिषित इति विज्ञायते, तथा च अपत्य (पुत्र) सामान्ये सत्यपि अपत्य (पुत्र) विशेषे आदरातिशयो वर्णयितव्यः स च अपत्ये इति पुत्रस्याऽपि वाचकस्य पदस्य प्रयोगेऽपि पर्यायस्य भेदाद् न स्फुट इति भग्नप्रक्रमत्वं बोध्यमित्याशयेनाऽऽह—**अत्र पर्यायस्येति** । तत्र वर्णनीया पुत्रीति भग्नप्रक्रमदोषपरिहाराय **'तस्मिन् हि पुत्रे न जगाम तृप्तिम्'** इति वक्तुं न युज्यते इति उपायान्तरेण [प्रक्रमस्यैव परिवर्तनेन] भग्नप्रक्रमदोषपरिहारोपायं महिमभट्टप्रदर्शितमेव उपदिशति—**महीभृतोऽपत्यवतोऽपीति युक्तमिति** । अत्र सत्यपि पुत्रे कन्यारूपेऽप्यपत्ये स्नेहोऽभूदिति विवक्षितमिति न कोऽपि दोष इति केचित् समर्थयन्ते, किन्तु दृष्टान्तवैषम्यं परिहर्तुं विवक्षां मनाक् परिवर्त्याऽपि महीभृतोऽपत्यवतोऽपीत्येव पठनीयमित्याशयेनाऽऽह—**अत्र सत्यपीत्यादि** ।

[यथा वा—]

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान् न पद नृपश्रियः ।। उदा० ३१४ ।।

अत्रोपसर्गस्य पर्यायस्य च । 'तदभिभाव: कुरुते निरायतिम् । लघुतां भजते निरायतिर् लघुताभाङ् न पदं नृपश्रियः' इति युक्तम् ।

[यथा वा—]

काचित् कीर्णा रजोभिर् दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मी-
रश्रीका काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर् वात्या इवान्या प्रतिपदमपरा भूमिवत् कम्पमानाः
प्रस्थाने पार्थिवानामशिवमिति पुरोभावि नार्यः शशंसुः ।।उदा० ३१५।।

अपत्यशब्दस्य पुत्रशब्दस्य च वंशापतनहेतुत्वरूपं शक्यतावच्छेदकमेवेति तयोरेकार्थप्रतिपादकत्वरूपं पर्यायत्वमत्र व्यवहृतं बोध्यम् ।। उदा० ३१३ ।।

प्रक्रान्तस्य उपसर्गस्य पर्यायस्य च भङ्गेन युक्त भग्नप्रक्रमं वाक्यमुदाहरति—**विपदोऽभिभवन्तीत्यादि** । किरातार्जुनीये (२।१४) युधिष्ठिरं प्रति भीमस्योक्तिरियम् । इदमपि महिमभट्टेनोदाहृतं पद्यम् । पराक्रमरहितं जनं विपत्तयोऽभिभवन्ति, विपत्तियुक्तं जनं सदुदर्कस् त्यजति, सदुदर्करहितस्य लघुता नियता भवति, लघुतायुक्तश्च नृपश्रियो भाजनं न भवतीत्यर्थः । सुन्दरी वृत्तम् । अत्र **विपद** इति **वी**त्युपसर्गेणोपक्रम्य **आपदुपेत**मिति आ इत्युपसर्गस्योपादानात् उपसर्गस्य प्रक्रमभङ्गः, लघुतेत्युपक्रम्य अगरीयानिति पर्यायान्तरोपादानात् पर्यायस्य च प्रक्रमभङ्ग इति द्विधा भग्नप्रक्रममिदं वाक्यमित्याशयेनाह—**अत्रोपसर्गस्य पर्यायस्य चेति** । उक्तदोषपरिहाराय पाठान्तरमुपदिशति—**तदभिभव** इत्यादि । वस्तुतस्तु सर्गे उपात्तस्य सुन्दरीनामकस्य वृत्तस्य भङ्गस्य भयात् तदभिभव इति पाठोऽयुक्त एव, एवञ्च "विपदोऽभिभवन्त्यविक्रमं ह्यभिभूतिः कुरुते निरायतिम् । लघुतां भजते निरायतिर् लघुताभाङ् न पद नृपश्रियः" इत्येव पाठो युक्ततर । न च हीत्यस्य निरर्थकत्वमवधारणस्य सुसङ्गतत्वात् । न च तदभिभव इति पाठेऽपि वैतालीयलक्षणयोगाद् वृत्तभङ्गाभाव', अस्मिन् सर्गे अन्येषु पद्येषु समपादस्य द्वादशाक्षरताया अदर्शनेन अस्मिन् सर्गे प्रयुक्तस्य वृत्तस्य वैतालीयताया कवेरनभिप्रेतत्वस्य निश्चयात्, अन्त्यं विहायान्येषु पद्येषु सुन्दरीलक्षणस्यैव योगात् । महिमभट्टस्तु उपसर्गप्रक्रमभेदोदाहरणत्वेनैवेदं पद्यमुपन्यस्य दोषपरिहाराय द्वितीयपादस्य "तदुपेतं विजहाति चायतिः" इति पाठान्तरं कल्पितवान् ।।उदा० ३१४।।

प्रक्रान्तस्य वचनस्य तिङन्तस्य च भङ्गेन युक्त भग्नप्रक्रमं वाक्यमुदाहरति—**काचित् कीर्णेत्यादि** । शिशुपालवधे पद्यमिदम् (१५।६६) । शिशुपालपक्षस्थानां राज्ञां युद्धार्थं प्रस्थानस्य समये काचिद् राजपत्नी रजस्वला जाता, ततश्च मन्दमुखशोभा सती (रजो-

अत्र वचनस्य तिङन्तस्य च । काश्चित् कीर्णारजोभिर्दिवमनुविदधुर् मन्दवक्त्रेन्दुशोभा निःश्रीका' इति 'कम्पमाना' इत्यत्र 'कम्पमापुः' इति च पठनीयम् ।

[यथा वा—]

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विस्रब्धैः क्रियतां वराहपतिभिर् मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ॥ उदा० ३१६ ॥

अत्र कारकस्य । विश्रब्धा रचयन्तु सूकरवरा मुस्ताक्षतिं पल्वले इत्यदुष्टम् ।

वती मन्दवक्त्रसदृशचन्द्रशोभां) दिवमनुचकार, काश्चिद् राजपत्न्यो व्याकुलीभूतचित्ता अत एव अश्रीकाश्च सत्यः अश्रीका विक्षिप्तप्राणिका दिश इव अन्तर्दाहं दधिरे, अन्या राजपत्न्य वातसमूहा इव पदे पदे भ्रमिं प्रापुः, अपरा राजपत्न्य भूमिवत् कम्पमाना अभूवन् इत्यनेन प्रकारेण राज्ञा पत्न्य अग्रे आगच्छद् अमङ्गलं सूचयामासुरित्यर्थः । अत्र काचिद् इति एकवचनेनोपक्रम्य काश्चिद् अन्याः अपरा इति बहुवचनानामुपादानाद् जातेन वचनप्रक्रमभङ्गेन, अनुविदधौ दधिरे भ्रेमुः इति वाक्ये प्रधानैः तिङन्तैः उपक्रम्य कम्पमाना इत्यत्र तिङन्तस्यानुपादानाद् जातेन तिङन्तप्रक्रमभङ्गेन च युक्तं भग्नप्रक्रमं वाक्यमिदमित्याशयेनाह—**अत्र वचनस्ये**त्यादि । युक्तं पाठमुपदिशति—**काश्चित् कीर्णा** इत्यादिना । महिमभट्टोऽपि वचनप्रक्रमभेदोदाहरणत्वेनैवेदं पद्यमुपन्यस्य प्रथमपादस्येदमेव पाठान्तरमुपदिष्टवान्, तिङन्तप्रक्रमभेदं तत्समाधानं चोक्तवान् । यदि वस्तुगत्या वचनभेद आवश्यको भवेत् तर्हि तु नानेन दोषेण भाव्यम् ॥उदा० ३१५॥

प्रक्रान्तस्य कारकस्य भङ्गेन युक्तं भग्नप्रक्रमं वाक्यमुदाहरति—**गाहन्तां महिषा** इत्यादि । शकुन्तलादर्शननिवृत्तमृगयाभिलाषस्य दुष्यन्तस्य सेनापतिं प्रति अभिज्ञानशाकुन्तले (२।६) वाक्यमिदम् । अद्य तावद् अरण्यमहिषा शृङ्गैर्मुहुस्ताडितम् उपकूपजलाशयस्य सलिलं गाहन्ताम्, मृगयूथ च छायायुक्ते स्थाने बद्धकदम्बकं सद् रोमन्थं शीलयतु, वन्यसूकरपतिभिरपि विश्रब्धैः सद्भिः अल्पसरसि मुस्तानामकतृणविशेषस्योत्खननं क्रियताम्, इदमस्माकं धनुरपि शिथिलज्याबन्धं सद् विश्रान्तिं लभतामित्यर्थः । अत्र गाहन्ताम् अभ्यस्यतु इति च कर्तृकारकवाचितिङन्ताभ्यामुपक्रमे क्रियतामिति कर्मकारकवाचितिङन्तोपादानात् कारकस्य प्रक्रमभङ्गेन युक्तं भग्नप्रक्रमं वाक्यमिदम् इत्याह—**अत्र कारकस्येति** । उक्तदोषपरिहाराय पाठान्तरमुपदिशति—**विश्रब्धा रचयन्तु** इत्यादि । वस्तुतस्तु क्षतेः का नाम रचनेति मुस्ताक्षतिं रचयन्तु इति अन्वयो न सहृदयहृदयमावर्जयति; अतो वामनकल्पितो नागोजिभट्ट-परिष्कृतो 'विश्रब्धः कुरुतां वराहनिवहो मुस्ताक्षतिं पल्वले' इति पाठो युक्ततरः । वामनेन हि "विश्रब्धं कुरुतां वराहविततिर् मुस्ताक्षतिं पल्वले' इति पाठः कल्पितः (का० अ० सू० वृ० १।२। १) । महिमभट्टस्तु "कुर्वन्त्वस्तभियो वराहततयो मुस्ताक्षतिं पल्वले' इति पाठमुपपन्नं मन्यते ॥ उदा० ३१६ ॥

[यथा वा—]

अकलित-तपस्-तेजो-वीर्य-प्रथिम्नि यशोनिधा-
ववितथमदाध्माते रोषान् मुनावभिधावति ।
अभिनव-धनुर्-विद्या-दर्प-क्षमाय च कर्मणे
स्फुरति रभसात् पाणिः पादोपसङ्ग्रहणाय च ॥ उदा० ३१७ ॥

अत्र क्रमस्य । पादोपसङ्ग्रहणायेति पूर्वं वाच्यम् ।

एवमन्यत्राप्यनुसर्तव्यम् ।

[२०] अविद्यमानः क्रमो यत्र, यथा—

द्वय गतं सम्प्रति शोचनीय तां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस् त्वमस्य लोकस्य च नेत्रकौमुदी ॥
उदा० ३१८ ॥

प्रक्रान्तस्य क्रमस्य भङ्गेन युक्तं भग्नप्रक्रमं वाक्यमुदाहरति—**अकलिते**त्यादि । धनुर्भङ्गेन कुपिते भार्गवे समागते महावीरचरिते (२।३०) दाशरथेर् वाक्यमिदम् । अपरिमिततपस्तेजोवीर्यविस्तारे यशसा प्रदीप्ते समूलेन मदेन परिपूर्णे रोषाद् मामभिगच्छति मुनौ भार्गवे मम पाणि. अभिनवया धनुर्विद्यया यो दर्पम् तद्योग्याय बाणकर्षणरूपाय कर्मणे च पादोपसङ्ग्रहणाय च आवेगाच् चेष्टते इत्यर्थः । चकाराभ्यां तुल्यकालता व्यज्यते । हरिणी वृत्तम् । अत्र अकलिततपस्-तेजोवीर्यप्रथिम्नि यशोनिधौ इति विशेषणयोरर्थः, अवितथमदाध्माते रोषाद् अभिगच्छति इति विशेषणयोरर्थश्च यथाक्रमं पादोपसङ्ग्रहण[illegible] कर्मणो हेतू इति [illegible] पादोपसङ्ग्रहणाय च अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे इति निर्देशो युक्तः, स च न कृत इति प्रक्रान्तस्य क्रमस्य भङ्गेन युक्तं भग्नप्रक्रममिदं वाक्यमित्याह—**अत्र क्रमस्ये**त्यादिना ॥ उदा० ३१७ ॥

एवमेव "धैर्येण विश्वास्यतया महर्षेस् तीव्रादरातिप्रभवाच्च मन्योः । वीर्यं च विद्वत्सु सुते मघोनस् स तेषु न स्थानमवाप शोकः" (कि० ३।३४) इत्यादौ विभक्तेः प्रक्रमभङ्गः, अन्ये च प्रक्रमभङ्गभेदा 'शशी दिवसधूसरो विगतयौवना कामिनी' इत्यादौ शोभनत्वेन प्रतीतस्य [illegible] विवक्षितस्य क्रमस्य द्वितीय-तृतीय-चतुर्थ-वाक्येषु भङ्गेन क्रमप्रक्रमभङ्ग इत्येवमादयो वेदितव्या इत्याह—**एवमन्यत्राप्यनुसर्तव्यम्** इति । तत्र कालविशेषप्रक्रमभङ्गो महिमभट्टोदाहृतो यथा—"सस्नुः पयः पपुरनेनिजुरम्बराणि जक्षुर् बिसान् धृतविकासिबिसप्रसूनाः । सैन्याः [illegible] प्रवादममृजन् नगनिम्नगानाम्" इत्यत्र । तत्र पाठान्तरं च तेनैव कल्पितं यथा—"सस्नुः पयांसि पपुरम्बरमानिनेजुर् जक्षुर् बिसं विकचमस्य दधु. प्रसूनम् । सैन्याः श्रियामनुपभोगनिरर्थकत्व-दोषं वनेषु सरितां प्रसभं ममार्जुः" इति । यद्यपि महिमभट्टेनायं कालविशेष-

अत्र त्वंपदानन्तरं चकारो युक्तः ।

[यथा वा—]

शक्तिर् निस्त्रिंशजेयं तव भुजयुगले नाथ दोषाकरश्रीर्
वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टनी खड्गयष्टिः ।
आज्ञेयं सर्वगा ते विलसति च पुरः किं मया वृद्धया ते
प्रोच्येवेत्थं प्रकोपाच् छशिकरसितया यस्य कीर्त्या प्रयातम् ॥ उदा० ३१९ ॥

तथा—

लग्नं रागावृताङ्ग्या इत्यादौ ॥ उदा० ३२० ॥

प्रक्रमभेद स्वयमनादृतस्तथापि पाणिनिव्याख्यातृपतञ्जलिवचनप्रामाण्याद् वयन्त्व-त्राद्रियामहे ॥

[२०] यस्मिन् वाक्ये यत्पदानन्तर यत्-पदोपादानमुचितं ततोऽन्यत्र तत्पदोपादानात् समुचित. क्रमोऽविद्यमानो भवति तद् वाक्यम् अक्रमं सद् दुष्ट भवतीत्यभिप्रेत्याह—**अविद्यमान** इत्यादिना । उदाहरति—**द्वयं गतमि**त्यादि । कपालिनो भूतेशस्य समागमस्य प्रार्थनया क्रियमाणया सा प्रसिद्धा प्रागेव भूतेशशिरोगता चन्द्रस्य कान्तियुक्ता कला, अस्य लोकस्य नेत्रानन्दकारिणी त्व चेति द्वयम् एतर्हि शोच्यता गतमित्यर्थः । अत्र त्वम्पदानन्तरं चपदोपादानमनुचितं किन्तु तथाऽकृत्वा लोकस्य-पदानन्तरं चपदोपादानं कृतमिति अक्रमत्वं बोध्यमित्यभिप्रेत्याह—**अत्र त्वमि**त्यादि ॥ उदा० ३१८ ॥

निपातानाम् एवादीना व्यवच्छेद्यानन्तरम्, पुनरादीनां व्यतिरेच्यानन्तरम् इवादीना-मुपमानानन्तरम्, चादीना समुच्चेयानन्तरम् अनुपादाने अक्रमत्वं भवतीति दिक्प्रदर्शनायो-दाहृत्य निर्देशार्थानाम् इत्थमादिपदानामपि परामृश्यानमनुपादाने अक्रमत्वं भवतीति व्युत्पादनाय उदाहरणान्तरमाह—**शक्तिर् निस्त्रिंशजे**त्यादि । हे नाथ इय खड्गजा [खलजा वा] शक्तिः [शक्तिनाम्नी नायिका वा] तव भुजयुगले प्रतिवसति, इयं दोषाकरश्रीः [चन्द्रशोभा, महामूर्खच्छविर् वा] तव वक्त्रे प्रतिवसति, एषा महाकुट्टनी [शत्रुमर्दनी शम्भली वा] खड्गयष्टिः [स्त्री वा] तव पार्श्वे प्रतिवसति, इयं सर्वगा [सर्वैर् मान्या सर्वैरुपभोग्या वा] आज्ञा [आज्ञानाम्नी वराङ्गना वा] पुरो विलसति, अतः एतादृशस्य दुर्वृत्तस्य तव वृद्धया (जरत्या स्फीतया वा) मया किम् प्रयोजनम् ? इत्थं प्रोच्य इव यस्य (नृपस्य) राज्ञः शशिकरसितया कीर्त्या (नायिकया) प्रकोपात् प्रयातमित्यर्थः । "निस्त्रिंशो निर्घृणे (खले) खड्गे" इति हैमानेकार्थसङ्ग्रहः (३।७५९) । इत्थंशब्दस्याऽ-व्यवहितपूर्ववर्त्यर्थपरामर्शकत्वाद् अत्रापि पादत्रयार्थपरामर्शकस्य इत्थशब्दस्य पादत्रयान-न्तरं प्रयोगो न्याय्यः, किन्तु तथाऽकृत्वा प्रोच्यपदव्यवधानेन प्रयोगः कृत इति अक्रमत्वं बोध्यमित्यभिप्रायेणाह—**अत्र इत्थमि**त्यादि ॥ उदा० ३१९ ॥

प्रपञ्चार्थम् उदाहरणान्तरमपि निर्दिशति—**लग्नं रागावृते**त्यादि । व्याख्यातमिदमत्रै-वोल्लासे (उदा० ३०७) । तत्राऽपि पादत्रयार्थपरामर्शकस्य इतिशब्दस्य भृत्येभ्यः इत्यतः

'इति श्रीनियोगाद्' इति वाच्यम् ।

[२१] अमतः प्रकृतविरुद्ध परोऽर्थो यत्र; यथा—

रामसन्मथशरेण ताडिता दुस्सहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥ उदा० ३२१ ॥

अत्र प्रकृते रसे विरुद्धस्य शृङ्गारस्य व्यञ्जकोऽपरोऽर्थः ।

अर्थदोषानाह—

(सू० ७७) **अर्थोऽपुष्टः[1] कष्टो[2] व्याहत[3]-पुनरुक्त[4]-दुष्क्रम[5]-ग्राम्याः[6] ॥ ५४ ॥**
सन्दिग्धो[7]निर्हेतुः[8] प्रसिद्धि[9]-विद्या-विरुद्धश्[10]च ।
अनवीकृतः[11] सनियमा[12]-ऽनियम[13]-विशेषा[14]-ऽविशेष-[15]परिवृत्ताः ॥५५॥
साकाङ्क्षो[16]ऽपदयुक्तः[17] सहचरभिन्नः[18] प्रकाशितविरुद्धः[19] ।
विध्यनुवादा[20]युक्तस्[21] त्यक्तपुनस्स्वीकृतो[22]ऽश्लीलः[23] ॥ ५६ ॥

दुष्ट इति सम्बध्यते ।

समनन्तरमेव प्रयोग उचितः, किन्तु तथा न कृतमिति अक्रमत्वम्बोध्यमित्याशयेनाह—**इति श्रीनियोगा**दिति वाच्यमिति ॥ उदा० ३२० ॥

[२१] यत्र वाक्ये प्रकृतरसादिविरुद्धोऽपरोऽर्थो व्यज्यते तद् वाक्यममतपरार्थं नाम दुष्टं भवतीत्याह—**अमत. प्रकृतविरुद्ध** इत्यादिना । वक्ष्यमाणे प्रतिकूलविभावादिग्रहे दोषे वाच्योऽर्थः प्रकृतरसविरुद्धः, अत्र तु व्यङ्ग्योऽर्थ एव तथेत्यनयोर्भेदः । प्रकृतरसापकर्ष-कत्वमेवात्र दूषकताबीजम् । नित्योऽयं दोषः । उदाहरति—**राममन्मथे**त्यादि । मन्मथ-तुल्यस्य रामस्य दुःसहवेगेन शरेण उरसि ताडिता सा निशाचरी (ताटका) गन्धयुक्तेन रुधिररूपेण रक्तचन्दनेन लिप्ता सती जीवितान्तकस्य वसतिं (यमनगरीं) जगामेत्यर्थः प्रकृतः । प्रकरणेन अभिधायां तत्रैव नियन्त्रितायामपि शब्दशक्तिमहिम्ना 'सा निशासु चरन्ती अभिसारिका अभिरामस्य मन्मथस्य दुःसहेन शरेण मनसि ताडिता सती गन्ध-वद्भ्यां कुङ्कुमचन्दनाभ्यामुपलिप्ता सती प्राणेश्वरस्य नायकस्य वासस्थानं जगाम इत्यर्थो-ऽपि प्रतीयते इति प्रतीयमानश्चायमर्थः शृङ्गारविषयः प्रकृतबीभत्सरसविरुद्ध इति वाक्य-मिदममतपरार्थमित्याशयेनाह—**अत्र प्रकृते** इत्यादि ॥ उदा० ३२० ॥

पद-तदंश-वाक्य-गतान् दोषान् निरूप्य अर्थदोषानिदानीमाह—**अर्थोऽपुष्ट** इत्यादिना । (१) अपुष्टः, (२) कष्टः, (३) व्याहतः, (४) पुनरुक्तः, (५) दुष्क्रमः, (६) ग्राम्यः, (७) सन्दिग्धः (८) निर्हेतुः, (९) प्रसिद्धिविरुद्धः, (१०) विद्याविरुद्धः, (११) अनवीकृतः, (१२) सनियमपरिवृत्तः, (१३) अनियमपरिवृत्तः, (१४) विशेषपरिवृत्तः, (१५) अविशेष-परिवृत्तः, (१६) साकाङ्क्षः, (१७) अपदयुक्तः, (१८) सहचरभिन्नः, (१९) प्रकाशित-विरुद्धः, (२०) विध्ययुक्तः, (२१) अनुवादायुक्तः, (२२) त्यक्तपुनस्स्वीकृतः, (२३) अश्लीलश्च अर्थः प्रत्येकं दुष्टो भवतीत्यर्थः । **दुष्टं पदम्** इत्यादिसूत्रस्थं (सू० ७४)

क्रमेणोदाहरणानि—

(१) [अपुष्टार्थत्वं यथा—]

अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः ।
मरुदुल्लासित-सौरभ-कमलाऽऽकर-हासकृद् रविर् जयति ॥उदा० ३२२॥

अत्र अतिविततत्वादयोऽनुपादानेऽपि प्रतिपाद्यमानमर्थं न बाधन्ते इत्यपुष्टाः, न तु असङ्गताः पुनरुक्ता वा ।

दुष्टमिति पदमत्र लिङ्गविपरिणामेन सम्बध्यते इत्याह—**दुष्ट इति सम्बध्यते** इति ॥ ५५–५७ ॥

उदाहरणेषु प्रत्येकम् उदाहर्तव्यविषयनामग्रहणे ग्रन्थगौरवं स्यादिति लाघविक आचार्य आह—**क्रमेणोदाहरणानीति** । अस्माभिस्तु पाठकसौकर्याय प्रत्येकमुदाहरणे उदाहर्तव्यविषयनिर्देशोऽपि प्रक्षिप्य प्रदर्श्यते ।

(१) यस्यार्थस्य शब्देनाऽनुपादानेऽपि विवक्षितस्यार्थस्य वैकल्यं न भवति सोऽर्थोऽपुष्ट इत्युच्यते । अविवक्षितेऽप्यर्थे वृत्तानुरोधादिना तद्वाचकपदोपादाने अधिकपदत्वम्, स्वरूपप्रतिपादनायार्थे विवक्षितेऽपि तस्याऽर्थस्य प्रकृतानुपयोगित्वेन अर्थलभ्यतया वा शब्देनोपादानानर्हत्वेऽपुष्टत्वमित्यनयोर् भेदः । अपुष्टत्वं व्यर्थत्वमेवेति प्रतीतार्थको व्यर्थशब्द एव उपादेयः भोजस्तु "व्यर्थमाहुर् गतार्थं यद् यच् च स्यान्निष्प्रयोजनम्" इति सरस्वतीकण्ठाभरणे प्रथमे परिच्छेदे (लक्षणश्लो० ४७) व्यर्थमेवेममर्थमाह । किमित्ययं ग्रन्थकार इममर्थमपुष्टमुक्त्वा अप्रतीतार्थकेन शब्देन व्यवहरतीति न जानीमहे । यदि अर्थस्य नास्ति व्यर्थताऽत्र तदापि तस्य शब्देन प्रतिपादने व्यर्थतास्त्येवेति न विस्मर्तव्यम् । कवेः प्रतिभादारिद्र्यस्योन्नयनेन श्रोतुर्वै मुख्यं दूषकताबीजम् । नित्यश्चायं दोषः । उदाहरति—**अतिविततेत्यादि** । अत्यन्तदीर्घगगनरूपायाः सरण्या गमनागमने विषये परित्यक्तो विश्रान्तिसुखभोगो येन तादृशः, मरुद्भिरुल्लासितं सौरभं यस्य तादृशस्य पद्मसमूहस्य हासस्य कर्ता रविः सर्वोत्कर्षेण वर्तते इत्यर्थः । अत्र अतिविततत्वगगनानन्दमरुदुल्लासितसौरभत्वरूपा अर्था अनुपात्ता सन्तोऽपि अतिवितते निरवलम्बे व्योम्नि विश्रान्तिरहितेन गमनागमनेन इतराविकास्यकमलविकासकारी रविरिति प्रतिपिपादयिषितं रवेरुत्कर्षं विकलं न कुर्वन्तीति ते अपुष्टाः (व्यर्थाः) इत्याह—**अत्राविततेत्यादिना** । अतिविततत्वस्य प्रकृतोपयोगित्वेऽपि तद् गगनशब्दस्य अर्थादेव लभ्यते इति तस्य शब्देनोपादाने अनर्हत्वम्, एवमेव आनन्दस्याऽपि, सोऽपि विश्रमशब्दादेव लभ्यते इति, मरुदुल्लासितसौरभत्वस्य च प्रकृतानुपयोगित्वमेवेति बोध्यम् । रुद्रटेन प्रक्रान्तानुपयोगी प्रक्रान्तक्रमात् प्राप्तोऽर्थोऽसम्बद्धो दुष्टः (११।८) इति, 'यो यस्याव्यभिचारी स गुणादिस् तद्विशेषणं क्रियते । परिपूरयितुं छन्दो यत्र स तद्वानिति ज्ञेयः "(११।१५) इति च यौ दोषौ उक्तौ तौ वस्तुतः अपुष्टार्थरूपावेवेत्यभिप्रेत्याह—**न त्वसङ्गता** इति । अर्थस्य सङ्गतत्वेऽपि शब्देनाऽनुपयोगित्वे

(२) [कष्टत्वं यथा—]

सदा मध्ये यासामियममृतनिस्यन्दसुरसा
सरस्वत्युद्दामा वहति बहुमार्गा परिमलम् ।
प्रसादं ता एता घनपरिचिता केन महताम्
महाकाव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः ॥ उदा० ३२३ ॥

अत्र यासां कविरुचीनां मध्ये सुकुमार-विचित्र-मध्यमा-ऽऽत्मकत्रिमार्गा भारती चमत्कारं वहति ता गम्भीरकाव्यपरिचिताः कथम् इतरकाव्यवत् प्रसन्ना भवन्तु; यासामादित्यप्रभाणां मध्ये त्रिपथगा वहति ता मेघपरिचिताः कथं प्रसन्ना भवन्तीति संक्षेपार्थः ।

(३) [व्याहतत्वं यथा—]

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।

प्रकृतानुपयोगित्वे चायं दोष इति नात्रार्थोऽपुष्ट इति वाच्यमित्यभिसन्धिः । अर्थाल्लब्धस्यार्थस्य शब्देन प्रतिपादने च न पुनरुक्तत्वमपि वक्तुं युज्यते इत्याशयेनाह— न पुनरुक्तता वेति ॥ उदा० ३२१ ॥

(२) यस्य प्रतीतिः क्लेशेन भवति सोऽर्थः कष्ट इत्युच्यते । उदाहरति—**सदा मध्ये यासा**मित्यादि । सन्दर्भग्रन्थितिरिहात्र रूपकताबीजम् । नित्यश्चायं दोषः स्वकाव्यस्य गम्भीरचमत्कारजनकार्थशालितया स्फुटार्थत्वाभावेऽपि न दुष्टत्वमिति विवक्षोः कवेरुक्तिरियम् । यासां कविरुचीनां (काव्यरूपाणाम्) मध्ये सदा सुधास्राविणी सुरसा, प्रौढा सुकुमारविचित्रमध्यमात्मकमार्गत्रितयवर्ती इयं काव्यरूपा भारती परिमलं (चमत्कारं) वहति (दधाति) ता एता अत्यन्तमेवाभ्यस्ताः अनुभवरूपेण स्फुरिताश्च सत्यो मधुरा महतां कवीनां रुचयः (अभिप्रायविशेषाः) व्योम्नि इवात्यन्तमेवाऽपरिच्छेद्ये महाकाव्ये (काव्यमार्गे) केन प्रकारेण सुबोधत्वं यान्तु इत्यर्थः । पक्षान्तरे तु—यासाम् आदित्यप्रभाणां मध्ये सदा जलस्राविणी सुमधुरा महती त्रिपथगामिनी इयं स्वर्गङ्गाख्या सरस्वती (नदी) सुराङ्गनाङ्गसम्भवं सौगन्ध्यं वहति ता एताः प्रकाशेन मनोहरा महतां द्वादशानामादित्यानां प्रभा महाकाव्यसदृशे व्योम्नि मेघसम्बद्धा वर्षकालभवाः सत्यः केन प्रकारेण स्वच्छतां यान्तु (शरदादिकालभवप्रभावद्) इत्यर्थः । अत्र प्रकृतस्याऽर्थस्य अप्रकृतस्य उपमानरूपस्याऽर्थस्य च रचनान्तरेण प्रतिपादितस्याऽपि स्वरूपत एव दुर्बोधत्वमिति कष्टत्वं बोध्यम् । क्लिष्टत्वादिकन्तु शब्ददोषस्तत्रार्थो रचनान्तरे कृते सुखेनैव प्रतीयते इति । अर्थस्य कष्टत्वादेवेदं पद्यं वृत्तिकृद् व्याचष्टे—अत्र **यासा**मित्यादिना । संक्षेपार्थ इत्यस्य स्थाने संक्षिप्तोऽर्थ इति पाठो युक्ततरः ॥ उदा० ३२२ ॥

(३) ''उत्कर्षो वाऽपकर्षो वा प्राग् यस्यैव निगद्यते । तस्यैवाथ तदन्यश्चेद् व्याहतोऽर्थस्तदा भवेत्'' इति प्राचीनैरुक्तं व्याहतलक्षणं श्रीधरादिभिरुक्तम् । येन केनाऽपि

मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ॥ उदा० ३२४ ॥

अत्रेन्दुकलादयो यं प्रति पस्पशप्राया स एव चन्द्रिकात्वमुत्कर्षार्थमारोपयति इति व्याहतत्वम् ।

(४) [पुनरुक्तत्वं यथा—]

(अरे रे अर्जुन अर्जुन, सात्यके सात्यके, न युक्त ईदृशो मन्-नातस्य मुन्शोकभ्रान्त्या न्यस्तशस्त्रस्य दिवमुपगच्छतः केशाकर्षणरूपः पराभवः ।
अपि च—)

कृतमनुकृतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर् निर्मर्यादैर् भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥ उदा० ३२५ ॥

प्रकारेण परस्परविरुद्धयोरर्थयोः शब्देनोपादाने व्याहतत्वं भवतीति तु बोध्यम्, अतएव 'जयशत्रुकुलं कृत्स्नं जयविश्वम्भरामिमाम् । न च ते कोऽपि विद्वेष्टा सर्वभूतानुकम्पिनः'' इत्यत्राऽपि व्याहतत्वम् । **अत्रेन्दुकलादय** इत्यादिर्वृत्तिग्रन्थोऽप्यत्रैवाऽनुकूलः । असमन्वितार्थे सहृदयवैमुख्यमेव दूषकताबीजम् । बालमत्तोन्मत्ताद्युक्तौ व्याहतत्वं बाल्यादिव्यञ्जकत्वाद् गुणत्वमित्यनित्योऽयं दोषः । उदाहरति—**जगति जयिन** इत्यादिना । मालतीमाधवप्रकरणे (१।३६) माधवस्योक्तिरियम् । ते ते उत्कृष्टा नवेन्दुकलाचन्द्रिकापद्मादयोऽन्ये पदार्था लोके प्रकृतिमधुराः प्रसिद्धाः सन्ति ये लोकस्य मनो मदयन्ति, मम तु यद् इयं विलोचनयोः कृते चन्द्रिका (इव आह्लादिका) मालती लोके नयनविषयं प्राप्ता स एक एव अस्मिन् जन्मनि महानुत्सवो न त्वन्य इत्यर्थः । हरिणी वृत्तम् । अत्र यं माधवं प्रति नवेन्दुकलाचन्द्रिकादयः पदार्थाः सूचका इव हृदयक्षोभकरा इति अहृद्या (उपेक्षणीया वा) स एव मालत्यामुत्कर्षार्थं चन्द्रिकात्वमारोपयतीति शब्देनैव प्रतिपादनाद् व्याहतत्वं बोध्यमित्याह—**अत्रेन्दुकलादय** इत्यादिना । यत्र प्रतिपिपादयिषितार्थविरुद्धोऽर्थो न शब्देन बोध्यते किन्तु अर्थेन प्रकाश्यते तत्र अर्थस्य प्रकाशितविरुद्धत्वमत्र तु विरुद्धत्वमेवेति विवेक्तव्यम् ॥ उदा० ३२४ ॥

(४) शब्देन प्रतिपादितस्य पर्यायान्तरेण शब्देनैव पुनः प्रतिपादने पुनरुक्तत्वं भवति । तस्यैव पदस्य पुनरुपादाने तु कथितपदत्वं भवतीति पूर्वमुक्तम् । अर्थात् प्रतिपन्नस्य शब्देन प्रतिपादने तु अपुष्टार्थत्वमुक्तम् । निष्प्रयोजनद्विरभिधानात् श्रोतुर्वैमुख्यं दूषकताबीजम् । प्रयोजने सति त्वदोष इत्यनित्यताऽस्य बोध्या । उदाहरति—**(अरे रे अर्जुन—कृतमनुकृत**मित्यादिना । वेणीसंवरणे अश्वत्थाम्न उक्तिरियम् । यद्यपि बन्धन्यन्तर्गतो गद्यभागो न मूलकोषेषु पठ्यते तथापि तं विना उदाहरणसङ्गतिप्रदर्शनवाक्यस्य

अत्र अर्जुन अर्जुनेति, भवद्भिरिति चोक्ते सभीमकिरीटिनामिति किरीटि-पदार्थ पुनरुक्तः ।

यथा वा—

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन् मम पितरि गुरौ सर्वधन्वीश्वराणाम् ।
कर्णाऽलं सम्भ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्कां
ताते चापद्वितीये वहति रणधुरं को भयस्याऽवकाशः ॥ उदा० ३२६॥

(५) [दुष्क्रमत्वं यथा—]

भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव ।
विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम् ॥ उदा० ३२७ ॥

अत्र मातङ्गस्य प्राग् निर्देशो न्याय्यः ।

दुर्बोधत्वात् उदाहरणत्वस्यैव वाऽस्फुटत्वात् सोऽस्माभिर्योजितः । इदमन्यायेन मद्गुरुहनरूपं महापातकं यैर् निर्मर्यादैर् मनुष्यपशुभिर् उद्यतायुधैर् भवद्भिः स्वयं कृतम्; अथवाऽन्येन कृतमनुमतम्; अथवा अन्याय्यमपि तत् केवलं दृष्टम्, न तु तत्परिहाराय प्रयतितम्, नरकासुरशत्रुणा सह भीमेन अर्जुनेन च सह तेषां सर्वेषाम् (कर्तुः धृष्टद्युम्नस्य अनुमन्तॄणा सात्यक्यादीना द्रष्टॄणामन्येषां च) रुधिरेण मेदसा मांसेन च अहमश्वत्थामा दिशां बलिं करोमीति पद्यस्यार्थः । अत्र दोषं प्रकाशयति—**अत्र अर्जुनेत्यादिना** ॥ उदा० ३२५ ॥

पुनरुक्तं पदार्थमुदाहृत्य तथाभूतं वाक्यार्थमुदाहरति—**अस्त्रज्वालेत्यादिना** । वेणीसंवरणे (३।८) अश्वत्थाम्न उक्तिरियम् । अस्त्ररूपज्वालाव्याप्तस्य शत्रुसैन्यजलधेर् मध्ये वडवाग्नौ इव आचरति सर्वधन्वीश्वराणां गुरौ मम पितरि द्रोणाचार्ये दुर्योधनसेनाथे स्थिते सति हे कर्ण सम्भ्रमेण (भयेन) अलम्, हे कृपाचार्य युद्धं गच्छ, हे कृतवर्मन् शङ्का त्यज, चापसहाये मम ताते द्रोणाचार्ये युद्धभारं वहति (सेनापतौ) सति को मना भयस्य अवकाश इत्यर्थः । अत्र दोषं प्रदर्शयति—**अत्र चतुर्थेत्यादिना** । सर्वधन्वीश्वराणा गुरौ मम पितरि सेनानाथे स्थिते सति अलं सम्भ्रमेणेत्युक्ते पुनः ताते चापद्वितीये वहति रणधुरं को भयस्याऽवकाश इति स एवार्थः चतुर्थपादे उक्त इति पौनरुक्त्यम् ॥ उदा० ३२६ ॥

(५) "प्राग्वाच्य उच्यते पश्चात् पश्चाद् वाच्योऽथवाऽग्रतः । कविना शक्तिवैकल्याद् योऽर्थस्तं दुष्क्रमं विदुः" इति श्रीधरः । पदसन्निवेशरूपाया रचनाया प्रस्तुतार्थाप्रत्यायकत्वेऽक्रमत्वम्, अर्थक्रमस्यानौचित्ये तु दुष्क्रमत्वमिति विवेकः । अनुचितक्रमाभिधायके सहृदयवैमुख्यं दूषकताबीजम् । नित्यश्चायं दोषः । उदाहरति—**भूपालरत्नेत्यादिना** । निर्दैन्यं यथास्यात् तथा प्रदानेन प्रथितोऽभ्युत्सवो येन तथाभूत हे नृपश्रेष्ठ,

(६) [ग्राम्यत्वं यथा—]

स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते ।
तदपि साम्प्रतमाहर कूर्परं त्वरितमूरुमुदञ्चय कुञ्चितम् ॥ उदा० ३२८ ॥

एषोऽविदग्धः ।

(७) [सन्दिग्धत्वं यथा—]

मात्सर्यमुत्सार्य विचार्यकार्यमार्याः समर्यादमिदं वदन्तु ।
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥उदा० ३२९॥

अत्र प्रकरणाद्यभावे सन्देहः । शान्तशृङ्गार्यन्यतराभिधाने तु निश्चयः ।

त्वं मह्यम् अश्वं देहि अथवा मदालसं हस्तिनं देहीत्यर्थः । अत्र गुरुदानस्याऽशक्तौ लघुदानस्य औचित्याद् गुरोरेव प्रथमकन्दनया प्रार्थनस्यौचित्याद् वा मातङ्गस्य प्राङ्निर्देश उचितः, तथाऽकरणाद् दुष्क्रमत्वं बोध्यमित्यभिप्रेत्याह—अत्र **मातङ्गस्येति** ॥ उदा० ३२७ ॥

(६) "स ग्राम्योऽर्थो रिरंसादिः पामरैर् यत्र कथ्यते । वैदग्ध्यवक्रिमलवं हित्वैव वनितादिषु" इति श्रीधरः । सहृदयमस्यहृदयोद्वेगो दूषकताबीजम् । विदूषकाद्युक्तौ अनुचितत्वादनित्योऽयं दोषः । उदाहरति—**स्वपिति यावदि**त्यादिना । रन्तुं (शीकितुं) प्रवर्तितमानस्य अविदग्धस्योक्तिरियम् । यावत् कालमयम् अस्मद् गृहे वर्तमानो जनो न विबुध्यते तावत् कालम् अहं त्वत्समीपे स्वपिमि (त्वां शीके), तव किं ह्रियते एतावता, तस्माद् अयि प्रिये साम्प्रतं मदुपधानार्थं त्वत् कूर्परमाहर, आकुञ्चितं तव ऊरुयुगं च त्वरितं प्रसारितं कुरु इत्यर्थः । "सम्प्रयोगो रतं रहः शयनं मोहनमिति सुरतपर्यायाः" (का० सू० २।१।३२) इति स्वपिमीति शीकनमेव साक्षादुच्यते, तदनुसारिणश्चान्येऽर्थाः अपि साक्षादुच्यन्ते इति ग्राम्यत्वमर्थस्य बोध्यम् । एतदेव सूचयति—**एषोऽविदग्ध** इति । अविदग्धोऽप्रहतधीः, कलाऽनभिज्ञः, यथाजातोऽसभ्य इति यावत् ॥ उदा० ३२८ ॥

(७) सन्देहप्रयोजकस्वरूपवानर्थः सन्दिग्धः । उद्देश्यनिश्चयाभाव एव दूषकताबीजम् । सन्देहस्यैवोद्देश्यत्वे न दोष इति अनित्योऽयं दोषः । उदाहरति—**मात्सर्यमुत्सार्ये**त्यादिना । हे कार्याकार्यविचारचतुरा आर्याः, भवन्तः कस्मिन्नपि विषयेऽकारणकं द्वेषं परित्यज्य प्रमाणमर्यादां च पालयित्वा विधेयं सम्यग् विचार्य 'पर्वताना मेखलाभागाः सेव्याः किम् मन्मथावेगजसम्भोगौत्सुक्यसूचकमन्दस्मितसुन्दरवदनारविन्दानां विलासिनीनां कट्याः पश्चाद् भागाः सेव्याः ?' इति उदाहरन्तु इत्यर्थः । अत्र प्रकरणाद्यभावे भूधरनितम्बानां सेव्यत्वं विलासिनीनितम्बानां वा सेव्यत्वं किं निर्दिधारयिषितमिति निश्चयो न भवतीति सन्दिग्धोऽयमर्थो वेदितव्य इत्याह—**अत्र प्रकरणे**त्यादिना । शान्तस्य शृङ्गारिणो वा वक्तुः प्रकरणाद् निश्चये जाते तु विलासिनीनितम्बानामेव सेव्यत्वं भूधरनितम्बानामेव वा सेव्यत्वं प्रतिपिपादयिषितमिति निश्चीयते इति न दोष इत्याह—**शान्तशृङ्गारी**त्यादिना ॥ उदा० ३२९ ॥

(८) [निर्हेतुत्वं यथा—]

> गृहीतं येनाऽसीः परिभवभयाद् नोचितमपि
> प्रभावाद् यस्याऽभूद् न खलु तव कश्चिद् न विषयः ।
> परित्यक्तं तेन त्वमसि सुतशोकाद् न तु भयाद्
> विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ॥ उदा० ३३० ॥

अत्र शस्त्रमोचने हेतुर् नोक्तः ।

(९) [प्रसिद्धिविरुद्धत्वं यथा—]

> (क) इदं ते केनोक्तं कथय कमलातङ्कवदने
> यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम् ।
> इदं तद् दुस्साधाक्रमणपरमास्त्रं स्मृतिभुवा
> तव प्रीत्या चक्रं करकमलमूले विनिहितम् ॥ उदा० ३३१ ॥

अत्र कामस्य चक्रं लोकेऽप्रसिद्धम् ।

यथा वा—

> (ख) उपपरिसरं गोदावर्याः परित्यजताध्वगाः
> सरणिमपरो मार्गस् तावद् भवद्भिरवेक्ष्यताम् ।

---

(८) हेतुसापेक्षोऽपि हेतुं विनैवोपात्तोऽर्थो निर्हेतुः । अन्यसाकाङ्क्षत्वे साकाङ्क्षत्वम्, हेतुसाकाङ्क्षत्वे निर्हेतुत्वमिति विशेषः । उद्देश्यप्रतीत्यभावो दूषकताबीजम् । प्रसिद्धि-बलात् स्वतः प्रतीतौ तु अनुपादानेऽपि न दोष इत्यनित्योऽयं दोषः । उदाहरति = **गृहीतं येने**त्यादिना । वेणीसंवरणे (३।१९) द्रोणे हते शोकाकुलस्य अश्वत्थाम्नः स्वशस्त्रं प्रति उक्तिरियम् । हे शस्त्र, येन मत्पित्रा द्रोणाचार्येण ब्राह्मणवृत्तिविरुद्धत्वादनुचितमपि त्वं क्षत्रियकृतानादरभयाद् गृहीतमासीः, यस्य प्रभावात् तव कश्चिदपि योधा विषयो न न अभूत्, तेन मत्पित्रा त्वं भयाद् न किन्तु पुत्रशोकात् त्यक्तमसि; अहमपि यतः (यस्मिन् दिशि) तुभ्यं स्वस्ति (विश्रमसुखम्) भवति तस्मिन् दिशि त्वां त्यक्ष्यामि इत्यर्थः । अत्र द्रोणाचार्यकर्तृकशस्त्रत्यागे सुतशोकादिति हेतुरुक्तः, अश्वत्थामकर्तृकशस्त्रमोचनेऽपि पितृमरणशोकादिति हेतुर् वक्तव्यः, स च नोक्त इति निर्हेतुत्वं शोध्यमित्याशयेनाह— **अत्र शस्त्रे**त्यादि ॥ उदा० ३३० ॥

(९) प्रसिद्धिविरुद्धत्वं निगदव्याख्यातम् । वाक्यार्थप्रतीतिबाधकत्वं च दूषकता-बीजम् । उत्पातादिना तत्प्रतीतौ तु न दोष इति अनित्योऽयं दोषः । प्रसिद्धिविरुद्धश्च लोकप्रसिद्धिविरुद्धः कविप्रसिद्धिविरुद्धश्चेति द्वेधा । तत्र लोकप्रसिद्धिविरुद्धमुदाहरति— (क) **इदं ते केने**त्यादिना । हे कमलातङ्कप्रदवदने (चन्द्रवदने) इदं तव केन प्रतारकेण उक्तं यतो वचनाद् एतस्मिन् त्वत्करमूलस्थे वलयाकारे पदार्थे इदं हेम्नः कटकमिति बुद्धिं कुरुषे तत् कथय; (वस्तुतस्तु त्वं तेन स्थगेन प्रतारिताऽसि), इदं तु दुराराध्यानां जितेन्द्रियाणाम् आक्रमणे अमोघमस्त्रं मनसिजेन तव प्रीत्या त्वत्करकमलमूले स्थापितं चक्रमस्तीत्यर्थः । अत्र दोषं प्रदर्शयति—**अत्र कामस्ये**त्यादिना ॥ उदा० ३३१ ॥

इह हि विहितो रक्ताशोकः कयाऽपि हताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥ उदा० ३३२ ॥

अत्र पादाघातेनाऽशोकस्य पुष्पोद्गमः कविषु प्रसिद्धो न पुनरङ्कुरोद्गमः ।
[तत्र प्रत्युदाहरणं यथा—]

(ग) सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद् विधुः ।
तदनु भवतः कीर्तिः केनाऽप्यगीयत येन सा
प्रियगृहमगाद् मुक्ताशङ्का क्व नाऽसि शुभप्रदः ॥उदा० ३३३ ॥

कविप्रसिद्धिविरुद्धत्वमुदाहरति—(ख) **उपपरिसर**मित्यादिना । गोदावरीतीरानुगत-मार्गस्थाशोककलिकादर्शनविदीर्णहृदयस्य उत्सुकस्य पान्थस्य अन्यान् पथिकान् प्रति वाक्यमिदम् । हे अध्वगाः, यूयं गोदावर्यास्तटस्य समीपेन गतां सरणिं परित्यजत, यावद् अशोकः कोरकितो भवति तावद् भवद्भिरपरो मार्गोऽन्विष्यताम्, यतो हि अत्र गोदावरीतटसरण्यां कयाऽपि शिञ्जितनूपुरचरणेन हताशया युक्तया मत्ततरुण्या रक्ताशोकः चरणकमलन्यासेन उद्गच्छन्नवाङ्कुरपरिवृतः कृत इत्यर्थः । अत्र कविप्रसिद्धिविरुद्धत्वं दर्शयति—**अत्र पादाघातेने**त्यादि ॥ उदा० ३३२ ॥

प्रसिद्धिविरुद्धदोषप्रत्युदाहरणमाह—(ग) **सुसितवसने**त्यादिना । कश्चन राजानं प्रति तच्चाटुकारस्योक्तिरियम् । हे राजन्, कदाचन ज्योत्स्नाप्रकाशे सति सुश्वेतवस्त्रभूषणायां सुदृशि अभिसारिकायां स्वैरं प्रियगृहं गच्छन्त्यां सत्यां चन्द्रोऽस्तं गतोऽभूत्, ततः पश्चात् केनाऽपि भवतः कीर्तिरगीयत येन कीर्तिगानेन हेतुना (प्रकाशे जाते) सा निश्शङ्का प्रियगृहमगात्, अतस्त्वं क्व शुभप्रदो नाऽसि ? किन्तु सर्वत्र शुभप्रदोऽसीत्यर्थः । अत्र दोष-सम्भावनां तन्निवृत्तिं च दर्शयति—**अत्राभूतोऽपी**त्यादिना ।

कविप्रसिद्धयश्च—"पूर्वे हि विद्वांसः सहस्रशाखं साङ्गं च वेदमवगाह्य शास्त्राणि चाववुध्य देशान्तराणि द्वीपान्तराणि च परिभ्रम्य यानर्थानुपलभ्य प्रणीतवन्तस्तेषां देशकालान्तरवशेन अन्यथात्वेऽपि तथात्वेनोपनिबन्धो यः स कविसमयः" इति राजशेखरेण काव्यमीमांसाया चतुर्दशेऽध्याये परिभाषिताः, नाम-जाति-द्रव्य-गुण-क्रियारूपस्य असतो निबन्धनम्, सतोऽप्यनिबन्धनम्, नियमः इति वर्गीकृताः तत्रैव विस्तरेण निरूपिता उदाहृताश्च तत एवावगन्तव्याः । विश्वनाथोक्तास्तु जिज्ञासुहिताय सङ्गृह्यन्ते । "मालिन्यं व्योम्नि पापेऽयशसि धवलता वर्ण्यते हासकीर्त्योः, रक्तौ च क्रोधरागौ सरिदुदधिगतं पङ्कजेन्दीवरादि । तोयाऽऽधारेऽखिलेऽपि प्रसरति च मरालादिकः पक्षिसङ्घो, ज्योत्स्ना पेया चकोरैर् जलधरसमये मानसं यान्ति हंसाः ॥ पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यैर् यूनामङ्गेषु हाराः स्फुटति च हृदयं विप्रयोगस्य तापैः । मौर्वीरोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतोर् भिन्नं स्यादस्य बाणैर् युवजनहृदयं स्त्रीकटाक्षेण तद्वत् ॥ अहन्यम्भोजं निशायां विकसति कुमुदं चन्द्रिका शुक्लपक्षे,

अत्राऽमूर्तापि कीर्तिः ज्योत्स्नावत् प्रकाशरूपा कथितेति लोकविरुद्धमपि कविप्रसिद्धेर् न दुष्टम् ।

(१०) [विद्याविरुद्धत्वं यथा—]

(अ) सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥ उदा० ३३४ ॥

ग्रहोपरागादिकं विना रात्रौ स्नानं धर्मशास्त्रेण विरुद्धम् ।

(आ) अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते ।
षाड्गुण्यानुसृतिम् तस्य सत्यं सा निष्प्रयोजना ॥ उदा० ३३५ ॥

एतद् अर्थशास्त्रेण

(इ) विधाय दूरे केयूरमनङ्गाङ्गनमङ्गना ।
बभार कान्तेन कृतां करजोल्लेखमालिकाम् ॥ उदा० ३३६ ॥

मेघध्वानेषु नृत्यं भवति च शिखिनां नाप्यशोके फलं स्यात् । न स्याज् जाती वसन्ते न च कुसुमफले गन्धसारद्रुमाणामित्याद्युन्नेयमन्यत् कवि-समय-गतं सत्कवीनां प्रबन्धे ॥'' इति । अन्यच् च—''स्त्रीणां स्पर्शात् प्रियङ्गुर् विकसति बकुलः सीधुगण्डूषसेकात् पादाघातादशोकस् तिलक-कुरवकौ वीक्षणालिङ्गनाभ्याम् । मन्दारो नर्मवाक्यात् पटुमृदुहसनाच् चम्पको वक्त्रवाताच् चूतो गीताद् नमेरुर् विकसति च पुरो नर्तनात् कर्णिकारः ।' इति ॥ उदा० ३३३ ॥

(१०) विद्याविरुद्धत्वं नाम शास्त्रविरुद्धत्वम् । अत्राभिमतार्थप्रत्ययविरहो दूषकताबीजम्, विरुद्धार्थप्रतीतौ सहृदयवैमुख्यं वा । नित्यश्चायं दोषः । शास्त्रविरुद्धत्वं च शास्त्रभेदाद् भिद्यते इति विभिन्नैः शास्त्रैर्विरुद्धा अर्था उदाह्रियन्ते । तत्र धर्मशास्त्रविरुद्धोऽर्थो यथा (अ) **सदा स्नात्वे**त्यादिना । अयं पण्डितः सदा निशीथिन्यामेव स्नात्वा सम्पूर्णं दिनं नानाविधानि शास्त्राणि स्वयं व्याचष्टे, परव्याख्यातानि शृणोति चेत्यर्थः । दोषमुद्घाटयति—**ग्रहोपरागे**त्यादिना । ''राहुदर्शनसङ्क्रान्ति-विवाहा-ऽत्यय-वृद्धिषु । स्नानदानादिकं कुर्युर् निशि काम्यव्रतेषु च'' इत्यादिकं हि धर्मशास्त्रम् रात्रिस्नानविषयम् । केचन तु रात्रेर् मध्यं यामद्वयमेव स्नानादौ त्याज्यं मन्यन्ते । शातातपस्तु—''स्नानं दानं तथा श्राद्धमनन्तं राहुदर्शने । आसुरी रात्रिरन्यत्र तस्मात् तां परिवर्जयेद्'' इत्याह ॥ उदा० ३३४ ॥

(आ) नीतिशास्त्रेण विरुद्धमर्थमुदाहरति—**अनन्यसदृश**मित्यादिना । यस्य पुरुषस्य भुजयोर् बलमनुपमं विलोक्यते तस्य नीतिप्रसिद्धं सन्धि-विग्रह-याना-ऽऽसन-द्वैध-संश्रयानुसरणं निष्प्रयोजनमित्यर्थः । महाबलस्यापि षाड्गुण्यानुसरणं नीतिशास्त्रेण विधीयते इति एतत् तद्विरुद्धम् ॥ उदा० ३३५ ॥

(इ) कामशास्त्रेण विरुद्धमर्थमुदाहरति—**विधाये**त्यादिना । अनङ्गक्रीडाभूमिरूपा

केयूरपदे नखक्षतं न विहितमिति एतत् कामशास्त्रेण ।

(ई) अष्टाङ्गयोगपरिशीलनकीलितेन दुस्साध्यसिद्धिसविधं विदधद् विदूरे ।
आसादयन्नभिमतामधुना विवेकख्यातिं समाधिधनमौलिमणिर् विमुक्तः
॥ उदा० ३३७ ॥

अत्र विवेकख्यातिः सम्प्रज्ञातः पश्चादसम्प्रज्ञातः ततो मुक्तिर् न तु विवेकख्यातौ, एतद् योगशास्त्रेण ।

एवं विद्यान्तरैरपि विरुद्धमुदाहार्यम् ।

अङ्गना केयूरमपसार्य तत्-स्थाने (कफोणिप्रदेशस्थे प्रगण्डप्रान्ते) कान्तेन कृतां नखक्षतपङ्क्ति बभारेत्यर्थः । तत्र काममूत्रे "कक्षे वक्षः स्तनौ गलः पृष्ठं जघनमूरू च स्थानानि" (२।४।५) इति वात्स्यायनमल्लनागः; अतो न हि प्रगण्डप्रान्तो नखक्षतस्थानम् इति एतत् कामशास्त्रेण विरुद्धम् बोध्यम् इत्यभिप्रेत्याह—**केयूरपदे नखक्षत**मित्यादि ॥उदा० ३३६॥

(ई) योगशास्त्रेण विरुद्धमर्थमुदाहरति—**अष्टाङ्गयोगे**त्यादिना । समाधिधनानां योगिनां शिरोमणिरसौ यम-नियमा-ऽऽसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिभिरष्टभिरङ्गैर् युक्तस्य योगस्य (यो० सू० २।२९) अभ्यासेन स्थिरीकरणेन (यो० सू० ३।११–१२) च योगाभ्यासप्रसङ्गप्राप्तं दुस्साधाया सिद्धेः मुक्तिरूपाया सम्पत्स्यमानायाः सूचकत्वात् **सविधम्** अतीतानागतज्ञानादिरूपम् (यो० सू० ३।१६) सामीप्यमात्रं विदूरे कुर्वन् [समाधावुपसर्गरूपा. सिद्धीरितीन्द] (यो० सू० ३।३७) अभिमतां सर्वथा विवेकख्यातिं (यो० सू० ४।२८) प्राप्नुवन् अधुना विमुक्तः (यो० सू० ३।५०) इत्यर्थः । दोषं स्फुटीकरोति—**अत्र विवेके**त्यादिना । सम्प्रज्ञातसमाधौ अन्तिमाऽवस्था विवेकख्यातिः, विवेकख्यातौ सत्या (यो० सू० ४।२८) धर्ममेघोऽसम्प्रज्ञातः समाधिः, ततो मुक्तिर् भवतीति योगशास्त्रसिद्धान्तः, न तु विवेकख्यातिलाभेनैव मुक्तिरिति; अत इद योगशास्त्रेण विरुद्धमित्यर्थः । अत्र **'विवेकख्यातिः ततः सम्प्रज्ञातः'** इति असङ्गतवृत्तिपाठानुसारि झडकीकरव्याख्यानं हेयम् पातञ्जलयोगसूत्रविरोधात् । **अस्माभिः परिगृहीतः** श्रीधरकृतविवेकानुकूलः पाठ एव सुसङ्गतो बोध्यः । यदि तु झड़कीकरधृतो वृत्तिपाठ एव प्रामाणिकम् तर्हि पातञ्जलाद् योगदर्शनादन्यद् योगशास्त्रं मम्मटस्याऽभिप्रेतं मन्तव्यम् । वस्तुतस्तु विवेकख्यातिसम्पत्तौ नान्तरीयकतयेव मुखेन धर्ममेघसमाधे मुक्तेश्च लाभो भवतीति योगशास्त्राभिप्रायानुसारं विवेकख्यातिमाहात्म्यप्रदर्शनाभिप्रायेण **विवेकख्यातिमासादयन् विमुक्त** इति वक्तुं युज्यत एवेति नात्र पुरोभागित्वमाविष्कर्तव्यम् ॥ उदा० ३३७ ॥

एवमेव शास्त्रान्तरैर् विरुद्धा अर्था अपि **उदाहार्या** अनुगमनीया इत्याह—**एवं विद्यान्तरैरि**त्यादिना । भोजस्तु देश-काल-युक्ति-प्रतिज्ञौ-चित्य-विरुद्धान् अर्थान् अपि उदाहृतवान् । (स० क० आ० १।५५–५६) ।

(११) [अनवीकृतत्वं यथा—]

प्राप्ताः श्रियः सकलकामदुघास् ततः किं दत्तं पदं शिरसि विद्विषतां ततः किम्।
सन्तर्पिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस् ततः किम्॥
उदा० ३३८॥

अत्र 'ततः किम्' इति न नवीकृतम्।

तत् [नवीकृतम्] तु यथा—

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता॥ उदा० ३३९॥

(१२) [सनियम-परिवृत्तत्वं यथा—]

यत्रानुल्लिखिताक्षमेव निखिलं निर्माणमेतद् विधे—
रुत्कर्षप्रतियोगि कल्पनमपि न्यक्कारकोटिः परा।

---

(११) कोऽप्यर्थः पुनः पुनरेकयैव भङ्ग्या निर्दिष्टोऽनवीकृत सन् दुष्टो भवति। पिष्टपेषणन्यायेनाऽसकृत्प्रकाशनेन वा सहृदयहृदयोद्वेजकत्वं दूषकताबीजम्। नित्यश्चायं दोषः पर्यायान्तरोपादानेऽपि भङ्ग्यभेदेऽयं दोषो भवत्येवेति नाऽस्य कथितपदेऽन्तर्भावः। उदाहरति—**प्राप्ताः श्रिय** इत्यादिना। सुभाषितत्रिशत्यां वैराग्यशतके पद्यमिदम् (६७)। यदि ब्रह्मात्मज्ञानं न भवति तर्हि यदि सकलकामदाः सम्पदः प्राप्ताः स्युस् तथापि ततः किम् भवति, यदि शत्रूणां शिरसि पदं दत्तं स्यात् तथापि ततः किम् भवति, यदि प्रिया जना विभवैः सन्तर्पिताः स्युस्तथापि ततः कि भवति, यदि प्राणिनां शरीरैः आकल्पान्तात् स्थितं स्यात् तथापि ततः किं भवति नाऽऽत्यन्तिकमैकान्तिकं च श्रेयः प्राप्तं भवतीत्यर्थः। अत्र ततः किम् इति पुनः पुनः उक्तमिति अनवीकृतत्वं बोध्यम्॥ उदा० ३३८॥

अनवीकृतदोषप्रत्युदाहरणतया नवीकृतत्वमुदाहरति—**यदि दहतीत्यादिना**। यदि अग्निर् दहति एतद् (दहनम्) अग्नेः स्वभावेनैव सिद्धमिति अत्र अद्भुतम् किम्? यदि पर्वतेषु गौरवमस्ति तर्हि तदपि पर्वतानां स्वाभाविकमेवेति ततः किमाश्चर्यं स्यात्? समुद्रस्य पानीयं सदैव लवणं भवति स्वभावादेव तदपि नाऽनित्यमित्यनाश्चर्यकरम्, अविषादिताऽपि अन्येषु दुर्लभाऽपि सतां प्रकृतिसिद्धैवेति सत्सु तस्या उपलम्भे न विस्मयो भवतीत्यर्थः। अत्र पर्यवसाने एक एवाऽप्यर्थो भङ्गीभेदेन निर्दिष्ट इति अलङ्काररूपः (मालारूपप्रतिवस्तूपमालङ्काररूपः) इति बोध्यम्॥ उदा० ३३९॥

(१२) **सनियमः** (सावधारणः) वक्तव्योऽपि **परिवृत्तः** अन्यथा (निरवधारणः) कृतोऽर्थो सनियमपरिवृत्त इत्युच्यते। अर्थे विवक्षिते सति न्यूनपदत्वाऽनभिहितवाच्यत्वयोरवसरः, अवधारणरूपेऽर्थे एव अविवक्षिते तु सनियमपरिवृत्तत्वम्। कविव्युत्पत्तिमान्द्य-

याताः प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्-सम्पदस्
तस्याऽऽभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम् ॥ उदा० ३४० ॥

अत्र 'छायामात्रमणीकृताश्मसु मणेः' तस्याश्मतैवोचितेति सनियमत्वं वाच्यम् ।

(१३) [अनियमपरिवृत्तत्वं यथा—]

वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस् ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर् दक्षिणस् ते समुद्रः ।
वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्चन्त्यभीक्ष्णं
स्वच्छेऽन्तर् मानसेऽस्मिन् कथमवनिपते, तेऽम्बुपानाभिलाषः ॥उदा० ४४१॥

ज्ञानजननद्वारा सहृदयवैमुख्यजनकत्वं दूषकताबीजम् । नित्यश्चायं दोषः । उदाहरति—**यत्रानुल्लिखिताक्ष**मित्यादिना । यस्मिन् चिन्तामणौ सति ब्रह्मण एतत् सर्वं निर्माणं अनाकृष्टानि अक्षाणि येन तादृशम् (इन्द्रियाणाम् अनाकर्षकम्) भवति, यत्र चिन्तामणौ विषये तस्य उत्कर्षविधेः कल्पनमपि अवज्ञायाः परा काष्ठा भवति, यस्य गुणसम्पदः प्राणिनां मनोरथस्यापि गतीरतीत्य याताः सन्ति तस्य स्वस्य आभासेन मणीकृतानि अश्मानि येन तादृशस्य सुमणेः (चिन्तामणेः) मणित्वेन अन्यमणिभिः समानता न युक्ता किन्तु तेभ्यो विशिष्टम्, अश्मत्वमेव उचितमित्यर्थः । अवधारणे कृते सति गुणान्तर-व्यवच्छेदेन अश्मतामात्रस्यैव निन्दा कृता भवति, अवधारणाभावे तु निन्दा नातिशयिता भवति इति अन्यमणीनां चिन्तामणेरपकर्षो न सम्यक् प्रतीयते । सावधारणत्वे तु निन्दातिशयः प्रतिपिपादयिषितः सम्यक् प्रतीयते इति तदर्थं पाठान्तरमुपदिशति—**छाया**मात्रेत्यादि । छायामात्रेण मणीकृतानि अश्मानि येन स चाऽसौ सुमणिः तस्य चिन्तामणेः तादृशस्वच्छायामात्रकृतमणीनां मध्ये मणित्वेन सामान्यं नोचितं किन्तु अश्मतयाऽपि वैशिष्ट्यमेव वरमित्यर्थः । कुन्तकोक्त्यनुजीवीदं वचनम् (१।२९) ॥ उदा० ३४० ॥

(१३) **अनियमो** निरवधारणो वक्तव्योऽपि **परिवृत्तो**ऽन्यथा (सावधारणः) कृतोऽर्थः अनियमपरिवृत्त इत्युच्यते । अर्थेऽविवक्षिते सति अधिकपदत्वम्, अनुचिते सत्यपि अवधारणरूपेऽर्थे कविना विवक्षिते तु अयं दोषः । कविव्युत्पत्तिमान्द्यज्ञानजननद्वारा सहृदयवैमुख्यजनकत्वं चाऽत्र दूषकताबीजम् । नित्यश्चायं दोषः । उदाहरति—**वक्त्राम्भोज**मित्यादिना । मृगयायां गतं पिपासितम् "एलोशीरलवङ्गचन्दनलसत्कर्पूरकस्तूरिका-जातीपाटलकेतकैः सुरभितं पानीयमानीयताम्" इति भणितवन्तं विक्रमार्कं प्रति मागध-स्योक्तिरियमिति भोजप्रबन्धे वल्लालसेनः । बाणस्येदं पद्यमिति सुभाषितावलौ वल्लभदेवः (श्लो० २५५२) । हे राजन्, त्वद्वक्त्ररूपम् अम्भोजं सरस्वती [नदी] अधिवसति, तवाधरः शोणः [नदः] एव, काकुत्स्थस्य रामस्य वीर्यस्य स्मृतेः करणे पटुस् ते दक्षिणो

अत्र शोण एवेति नियमो न वाच्य. ।

(१४) [विशेषपरिवृत्तत्वम् उदाहरति—]

श्यामां श्यामलिमानमानयत भो· सान्द्रैर् मषीकूर्चकैर्
मन्त्रं तन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां श्रियम् ।
चन्द्रं चूर्णयत क्षणाच्च च कणश कृत्वा शिलापट्टके
येन द्रष्टुमहं क्षमे दश दिशस् तद्वक्त्रमुद्राङ्किता ॥ उदा० ३४२ ॥

अत्र ज्यौत्स्नीमिति श्यामाविशेषो वाच्यः ।

(१५) [अविशेषपरिवृत्तत्वं यथा—]

बाहुः [illegible] [दक्षिणः समुद्रः=दक्षिण. समुद्रः], एता वाहिन्य (सेना एव नद्यः) भवतः पार्श्वं क्षणमपि न त्यजन्ति, निरन्तरं स्वच्छे अस्मिन् मानसे (स्वान्ते सरसि) च सति तव अन्तर् अम्बुपानाभिलापः कथं भवतीत्यर्थः । समुद्रोऽपि सेतुबन्ध-दर्शनाद् [illegible] इति बोध्यम् । अत्र अधरे शोणत्वस्यावधारणे कृते अधरस्य अन्यजलाशयात्मकत्वाभावस्य प्रतीतौ [illegible] शोण एवेति सावधारणं न वक्तव्यमित्याह—**अत्र शोण एवे**त्यादि । सदैव शोण इति योजनायां तु अस्थानस्थपदत्वं स्यादिति श्रीधरादयः ॥ उदा० ३४१ ॥

(१४) विशेषो वक्तव्योऽपि परिवृत्तोऽन्यथा (अविशेष.) कृतोऽर्थो विशेषपरिवृत्त इत्युच्यते । येन रूपेण पदस्य न शक्तिस् तेन रूपेण बोधस्य कविना विवक्षितत्वे अवाच-कत्वम्, कविना विवक्षितेन प्रकारेण (सामान्यरूपेण) बोधं जनयितुं पदस्य शक्तौ सत्यामपि विशेषस्यैवोचितत्वेऽयं दोषः । कविना विवक्षितस्यार्थस्यैव दुष्टत्वादयमर्थ-दोषः । आकाङ्क्षाविरहेण विरोधादिना चान्वयबोधस्य प्रतिबन्धो दूषकताबीजम् । नित्योऽयं दोष. । उदाहरति—**श्यामां श्यामलिमान**मित्यादिना । राजशेखरकृतायां विद्धशालभञ्जिकाया (३।१) मृगाङ्कावलीविरहखिन्नस्य विद्याधरमल्लस्योक्तिरियम् । भोः परिजनाः, यूय घनैर् मषीकूर्चकैः रात्रिं कृष्णत्वमानयत, मन्त्रमथवा तन्त्रमपि प्रयुज्य श्वेतानामुत्पलानां शोभां हरत, (रात्र्याः श्वेतोत्पलानां च शोभाया हेतुम्) चन्द्रं च शिलापट्टके संस्थाप्य उपलेन क्षणादेव कणशः कृत्वा चूर्णयत, येन (उद्दीपकतया सन्तापकैश् चन्द्रप्रमुखैस् तैः कृतस्य प्रतिबन्धस्यापगमात्) अहं मृगाङ्कावलीवक्त्ररूपया मुद्रया अङ्किता दश दिशो द्रष्टुं शक्नोमीत्यर्थः । अत्र श्यामायाः (तमिस्रायाः) श्याम-त्वेन श्यामीकरणस्य विफलतया आपातात् सामान्येन रात्रिवाचकस्य श्यामाशब्दस्यो-पादानमनुचितम्, ज्योत्स्नयुक्तरात्रिवाचकशब्दोपादानेन ज्योत्स्नीमिति विशेषो वाच्य इत्याह—**अत्र ज्यौत्स्नी**मित्यादिना ॥ उदा० ३४२ ॥

(१५) **अविशेषो** वक्तव्योऽपि **परिवृत्तो**ऽन्यथा (विशेषः) कृतोऽर्थः अविशेषपरिवृत्तः (सामान्यपरिवृत्तः) इत्युच्यते । विवक्षितार्थनिर्वाहो दूषकताबीजमत्र । उदाहरति—

कल्लोलवेल्लितदृषत्-परुषप्रहारै रत्नान्यमूनि मकरालय माऽवमंस्थाः ।
किं कौस्तुभेन विहितो भवतो न नाम याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि ॥
उदा० ३४३ ॥

अत्र एकेन किं न विहितो भवतः स नाम' इति सामान्यं वाच्यम् ।

(१६) [साकाङ्क्षत्वं यथा—]

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्रुह्यन् दाशरथिर् विरुद्धचरितो युक्तस् तया कन्यया ।
उत्कर्षं च परस्य मानयशसोर् विस्रंसनं चाऽऽत्मनः
स्त्रीरत्नं च जगत्-पतिर् दशमुखो देवः कथं मृष्यते ॥ उदा० ३४४ ॥

कल्लोलवेल्लितेत्यादिना । भल्लटकविकृते भल्लटशतके (श्लो० ६२) पद्यमिदम् सुभाषितावलौ तु भागवतत्रिविक्रमस्य पद्यमिदमित्युक्तम् (श्लो० ८६६) । हे वारिधे, त्वं महोर्मिभिः विलोलीकृतानां पाषाणानां प्रहारैः अमूनि त्वयि आश्रितानि रत्नानि न तिरस्कुरु, (यतो हि रत्नानामाश्रयणेन तव गौरवमतीव वृद्धं भवति, तथाहि) कौस्तुभेन त्वदाश्रितेन किन्नाम विष्णुरपि भवतः पुरतो याच्ञाप्रसारितकरो न कृतः ? इत्यर्थः । अत्र एकेनाऽपि रत्नेन एतादृशस्योत्कर्षस्य लाभाद् रत्नानामवमाननं न युक्तमित्यर्थो विवक्षित , किन्तु रत्नविशेषस्य कौस्तुभस्योपकारकत्वेऽपि अनुपकारकानामन्येषां रत्नसामान्यानामवमाननं न अयुक्तं स्यादिति विवक्षितस्यार्थस्य अनिर्वाहः, तन्निर्वाहाय च 'एकेन किं न विहितो भवतः स नाम' इति पाठः कार्य इत्याह—**अत्र एकेने**त्यादिना । कुन्तकवचनानुसारीदं वचनं बोध्यम् (कुन्तककृते काव्यालङ्कारे १। का० ९, उदा० २५) ॥ उदा० ३४३ ॥

(१६) हेतुभिन्नस्य अन्यस्य अनुपात्तस्यार्थस्य आकाङ्क्षया युक्तोऽर्थः साकाङ्क्ष इत्युच्यते । कल्प्यस्यार्थस्य झटित्यप्रतीतेः विवक्षितस्यार्थस्य सम्यगप्रतीतिर् दूषकताबीजम् । नित्य एवायं दोषः । उदाहरति—**अर्थित्वे प्रकटीकृतेऽपी**त्यादिना । सीताप्राप्तिविषये भग्नाशस्य रावणामात्यस्य माल्यवतो महावीरचरिते (२।९) उक्तिरियम् । प्रभोरपि रावणस्य अर्थित्वे प्रकटीकृतेऽपि कन्यारूपफलप्राप्तिर्न जाता, नैतावदेव किन्तु वैपरीत्यमपि यतः नाटकावधादिना द्रोहं कुर्वन् यज्ञनाशनादिरक्षसचरितविरुद्धयज्ञसंरक्षणादिरूपेण चरितेन युक्तो दशरथपुत्रः तया प्रार्थ्यमानया कन्यया युक्तो जातः; एवं च परस्य उत्कर्षं च आत्मनो मानस्य यशसश्च विस्रंसनं च सीतारूपं स्त्रीरत्नं च देवः (विजिगीषुः) जगतां पतिर् दशमुखः कथं मृष्यते इत्यर्थः । अत्र चकारत्रयेण त्रयाणामेव एकक्रियान्वयित्वं वक्तुर् विवक्षितमिति स्त्रीरत्नस्यापि मर्षणक्रिययैवाऽन्वयो वक्त्रा विवक्षितः, परन्तु रत्नस्य मर्षणायोग्यत्वेन प्रतीतौ अन्वयानुपपत्तिपरिहाराय स्त्रीरत्नमिति उपेक्षितुम् इत्यपेक्षते इति अत्रार्थस्य साकाङ्क्षत्वं बोध्यमित्याशयेनाह—**अत्र स्त्रीरत्नमि-**

अत्र 'स्त्रीरत्नम्' उपेक्षितुम् इत्याकाङ्क्षति । न हि परस्येत्यन्वयो योग्यः ।

(१७) [अपदयुक्तत्वं यथा—]

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर् नवं
भक्तिर् भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्तिर् द्रुहिणान्वये च तदहो नेदृग् वरो लभ्यते
स्याच् चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥ उदा० ३४५ ॥

अत्र स्याच् चेदेष न रावण इत्यत एव समाप्यम् ।

(१८) [सहचरभिन्नत्वं यथा—]

श्रुतेन बुद्धिर् व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा ।
निशाशशाङ्केन धृतिः समाधिना नयेन चाऽलङ्क्रियते नरेन्द्रता ॥उदा० ३४६॥

त्यादि । स्त्रीरत्नम् उपेक्षितु कथं मृष्यते इत्यत्र तुमुन्नन्तार्थस्य कर्मत्वेनान्वयः, अव्यय-कृतां भावार्थकत्वेन स्त्रीरत्नस्योपेक्षां कथं मृष्यते इत्यर्थः । ननु स्त्रीरत्नमिति उपेक्षितुमिति नापेक्षते परस्य स्त्रीरत्नं कथं मृष्यते इत्यन्वयस्य सम्भवाद् [illegible]—**न हि परस्ये**त्यादि । 'अयमेति राज्ञः पुत्रः पुरुषोऽपसार्यताम्' इत्यत्र सम्बन्धनिराकाङ्क्षेण राज्ञा पुरुषो यथा नान्वीयते, यथा च 'गिरिर् देवदत्तो भुक्तमग्निमान्' इत्यादौ विजातीयव्यव-धानाद् नाऽन्वयः तथैवाऽत्र आकाङ्क्षायाः सन्निधेश्चाभावादन्वयो न युज्यते इति भावः श्रीधरस्य वर्णितः ॥ उदा० ३४४ ॥

(१७) यत्र यस्याभिधानं विवक्षितार्थप्रतीतिविधानकं तादृशेऽनुपयुक्ते स्थाने तस्य अभिधानमपदयुक्तत्वम् । **अपदे** अस्थाने **युक्तः** सम्बद्धोऽपदयुक्त । विरुद्धप्रतीतिकृत्त्वं दूपकताबीजम् । नित्यश्चायं दोषः । वस्तुतस्तु इदं व्याहतत्वेनैव गतार्थं प्रतिभाति । उदाहरति—**आज्ञा शक्रे**त्यादिना । बालरामायणे (१।३६) पद्यमिदम् । जनकं प्रति जनकपुरोहितस्य शतानन्दस्योक्तिरियम् । अस्य रावणस्याऽऽज्ञा इन्द्रशिरोधार्या, शास्त्रा-ण्येव नवं (युवकस्येव पटु न जरत इव मलिनम्) चक्षुः, पिनाकशालिनि भूतनाथे शिवे भक्तिः, लङ्केति प्रसिद्धा दिव्या पुरी [illegible] उत्पत्तिरपि ब्रह्मणः कुले, तस्माद् अहो अन्य एतादृशो गुणगणयुक्तो वरो न लभ्यते यदि एष रावणो (रावयति पीडाजननेन आक्रन्दयति लोकान् इति रावणः) न स्यात्; किन्तु सर्वत्र जने सर्वे गुणाः क्व भवन्ति इत्यर्थः । गुणशालित्वेऽपि रावणत्वेन प्रतिपादिता उपेक्षा क्व नु पुनरित्यादिना व्याहन्यते इति क्व नु पुनरित्यादेरर्थस्याऽपदयुक्तत्वं बोध्यम् ॥ उदा० ३४५ ॥

(१८) समभिव्याहृतविजातीयोऽर्थः सहचरभिन्नः । सहृदयानुभूतौ विसंस्थुलत्वस्य जननम् अथवा उत्कृष्टस्याऽपि हेयतायाः निकृष्टस्याऽपि उपादेयतायाः प्रतीतिर् दूषकता-बीजम् । नित्यश्चायं दोषः । उदाहरति—**श्रुतेन बुद्धि**रित्यादिना । शास्त्रश्रवणेन बुद्धिः अलङ्क्रियते, द्यूतादिप्रसक्त्या आपत्प्रसक्त्या वा मूर्खता अलङ्क्रियते, मदेन नारी अलङ्क्रि-

अत्र श्रुतादिभिरुत्कृष्टैः सहचरितैर् व्यसनमूर्खतयोर् निकृष्टयोर् भिन्नत्वम् ।

(१९) [प्रकाशितविरुद्धत्वं यथा—]

लग्नं रागावृताङ्ग्या इति ॥ उदा० ३४७ ॥

अत्र विदित तेऽस्तु इत्यनेन श्रीस्तस्मादपसरतीति विरुद्धं प्रकाश्यते ।

(२०) [विध्ययुक्तत्वं यथा—]

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निस्सोमकम् ।
इयं परिसमाप्यते रणकथाद्य दोःशालिना-
मपैति रिपुकाननातिगुरुरद्य भारो भुवः ॥ उदा० ३४८ ॥

अत्र शयितः प्रयत्नेन बोध्यसे इति विधेयम् ।

वाताहारतया जगद् विषधरैरास्वाद्य निश्शेषितं
ते ग्रस्ता पुनरभ्रतोयकणिकातीव्रव्रतैर् बर्हिभिः ।

यते, जलेन नदी अलङ्क्रियते, चन्द्रेण रात्रिः अलङ्क्रियते, योगेन धर्मचिन्तया वा धैर्यम् अलङ्क्रियते, नीत्या राजत्वम् अलङ्क्रियते इत्यर्थः । अत्र श्रुतबुद्ध्यादिभिरुत्कृष्टैः व्यसनमूर्खत्वयोर्निकृष्टयोर् विजातीयत्वात् सहचरभिन्नत्वं बोध्यम् ॥ उदा० ३४६ ॥

(१९) विवक्षितार्थप्रतिकूलार्थव्यञ्जकोऽर्थ प्रकाशितविरुद्ध इत्युच्यते । विरुद्धप्रतीतिकृत्त्वमेव दूषकताबीजम् । नित्यश्चायं दोषः । व्याहतविशेष एवायं प्रतीयते । उदाहरति—**लग्नं रागे**त्यादिना । व्याख्यातमिदं पद्यं प्राग् अत्रैवोल्लासे (उदा० ३०७) । अत्र दोषं प्रदर्शयति—**अत्र विदितमि**त्यादिना ॥ उदा० ३४७ ॥

(२०) अविधेयस्य विधानाद् विधिक्रमस्य अनुचितत्वाद् वा अर्थस्य अयुक्तविधिकत्वं भवति । विधेयाविमर्शस्य शाब्दत्वाद् दुष्क्रमे दुष्टत्वाद् अत्र तु क्रमदोषाद् विधेरयुक्तत्वप्रसङ्ग इति ताभ्यामस्य भेदः । विवक्षितार्थनिर्वाहान् समुचितक्रमत्यागात् विवक्षितार्थप्रतीतिविलम्बाद् वा श्रोतुरुद्वेगो दूषकताबीजम् । नित्य एवायं दोषः । उदाहरति—**प्रयत्नपरिबोधिते**त्यादिना । द्रोणवधकुपितस्य अश्वत्थाम्नो दुर्योधनसमाश्वासनार्थं वाक्यमिदं वेणीसंवरणे (३।३४) । हे राजन्, वैतालिकस्तुतिभिः प्रयत्नेन प्रतिबोधनीयः सन् अद्य त्वं सर्वां निशां निद्रास्यसि, यतोहि मत्पराक्रमाद् अद्य भुवनं केशवरहितं पाण्डवशून्यं पाञ्चालविहीनं च भविष्यति; अद्य बाहुबलशालिनामियं सङ्ग्रामवार्ता समाप्ता भविष्यति, अद्य रिपुकाननेन अतिगुरुर् भुवो भारश्चापयास्यतीत्यर्थः । पूर्वदिनपर्यन्तं चिन्ताऽलब्धगाढनिद्रस्त्वं स्वयमेव जागर्षि स्म, अद्य तु मया त्वदीयानां सकलरिपुबलानां क्षये कृते सुखं सुप्तः स्तुतिपरम्पराभिः प्रयत्नेन प्रतिबोध्यो भविष्यसीति शयनस्याऽनूद्यत्वे प्रतिबोधनस्य च विधेयत्वे विवक्षिते यद् विपर्ययेण निर्देशः तेन विपरीतोऽर्थः प्रतीयते इति विधिविपर्ययरूपोऽयं दोष इत्याशयेनाह—**अत्र शयितः प्रयत्नेने**त्यादिना ॥ उदा० ३४८ ॥

अत्र विदितं तेऽस्तु इत्युपसंहृतोऽपि तेनेत्यादिना पुनरुपात्तः ।

(२३) [अश्लीलत्वं यथा—]

उद्यतस्य परं हन्तुं स्तब्धस्य विवरैषिणः ।
यथाऽऽशु जायते पातो न तथा पुनरुन्नतिः ॥ उदा० ३५२ ॥

अत्र पुंव्यञ्जनस्यापि प्रतीतिः ।

यत्रैको दोषः प्रदर्शितस् तत्र दोषान्तराण्यपि सन्ति, तथापि तत्र तेषाम-प्रकृतत्वात् प्रकाशनं न कृतम् ।

(सू० ७८) कर्णावतंसादिपदे कर्णादि-ध्वनि-निर्मितिः ।
सन्निधानादिबोधार्थम् ... ... ॥

पूर्वोक्तकारकस्यैव विशेषणमात्रस्य पुनरुपादानम्, अत्र तु अप्रयोजकस्य कारकान्तरस्य पुनरुपादानमित्यनयोर् भेदः । उदाहरति—**लग्नं रागावृताङ्ग्या** इत्यादि । व्याख्यानमिदं पद्यं प्रागत्रैवोल्लासे (उदा० ३०७) । अत्र 'न किञ्चिद् गणयति' इत्यन्तेन प्रतिपादितो 'विदितं तेऽस्तु' इति उपसंहृतोऽपि रागदोषः 'तेनाऽस्मि दत्ता भृत्येभ्यः' इति पुनरुपात्तः, 'तेनाऽस्मि दत्ता भृत्येभ्य' इत्युपादानं च प्रकृतेऽप्रयोजकम्, उत्प्रेक्षाया उपसंहृतेनैव निर्वाहादिति त्यक्तपुनःस्वीकृतत्वं बोध्यम् इत्याशयेनाह—**अत्र विदित**मित्यादिना ॥ उदा० ३५१ ॥

(२३) व्रीडादिकरोऽर्थोऽश्लीलः सहृदयोद्वेजकत्वं प्रकृतरसापकर्षकत्वं वा दूषकता-बीजम् । अनित्योऽयं दोषः । उदाहरति—**उद्यतस्य पर**मित्यादिना । शत्रून् हन्तुं समुद्य-तस्य अनम्रस्थिरस्य परच्छिद्रान्वेषिणः पुरुषस्य यथा आशु पातो जायते तथा आशु पुनरुन्नतिर् न भवतीत्यर्थः । अत्र स्त्रीयोनिं बाधितुं समुद्यतस्य दृढस्य स्त्रीयोनिच्छि-द्रान्वेषिणः पुरुषध्वजस्य वीर्यस्खलनाद् यथाऽऽशु शैथिल्यं जायते तथा आशु पुनर् दृढता (स्तब्धता) न भवतीत्यर्थो व्रीडाकरोऽपि प्रतीयते इति अश्लीलत्वं बोध्यमित्याशयेनाह—**अत्र पुंव्यञ्जने**त्यादि । अत्र शब्दानां परिवृत्तिसहत्वाद् अर्थदोषत्वं बोध्यम् ॥उदा०३५२॥

लक्ष्ये दोषसाङ्कर्यस्य अकिञ्चित्करत्वाद् अनेकदोषयुक्तानि उदाहरणानि अपि प्रदर्शि-तानि तथापि प्रकृतस्य दोषस्यैव तत्र तत्र प्रकाशनं कृतं न तु उदाहरणपद्ये वर्तमानाना सर्वेषा दोषाणामित्याह—**यत्रैको दोष** इत्यादिना । एतस्य दिक्प्रदर्शनं च लग्नं रागावृता-ङ्ग्या (उदा० ३०७, ३४७, ३५१) इत्यत्र त्रीन् दोषान् प्रकाशयता मम्मटेनैव कृतम् ।

यद्यपि सर्वेषां दोषाणां निर्णये कृते विषयविशेषे यथासम्भवं केषाञ्चिद् दोषाणाम-दोषत्वं गुणत्वमेव वाऽपि प्रदर्श्य दोषाङ्कुशा निरूपणीयाः, रसदोषाश्चेदानीमपि अनि-रूपिता इति नायं दोषाङ्कुशनिरूपणावसरः तथापि वामनादिभिः साक्षादुक्तदोषाणाम-विचारितत्वात् तदाश्रितक्रमानुसारं हि दोषाङ्कुशान् निरूपयितुमाह—**कर्णावतंसादी**त्यादि । काव्यालङ्कारसूत्रवृत्तौ (२।१।१९) सङ्ग्रहश्लोकत्वेन वामनेन विरचितः श्लोक एवाऽयं

अवतंसादीनि कर्णाद्याभरणान्येवोच्यन्ते । तत्र कर्णादिशब्दाः कर्णादिस्थिति-प्रतिपत्तये, यथा—

(क) अस्याः कर्णावतंसेन जितं सर्वं विभूषणम् ।
तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डलम् ॥
अपूर्वमधुरामोदप्रमोदितदिशस् ततः ।
आययुर् भृङ्गमुखराः शिरश्शेखरशालिनः ॥ उदा० ३५३ ॥

अत्र कर्ण-श्रवण-शिरः-शब्दा सन्निधानप्रतीत्यर्थम् ।

(ख) विदीर्णाभिमुखारातिकराले सङ्गरान्तरे ।
धनुर्-ज्या-किण-चिह्नेन दोष्णा विस्फुरितं तव ॥ उदा० ३५४ ॥

अत्र धनुश्शब्द आरूढत्वावगतये । अन्यत्र तु "ज्याबन्धनिष्पन्दभुजेन यस्य विनिश्श्वसद्वक्त्रपरम्परेण । कारागृहे निर्जितवासवेन दशाननेनोषितमाप्रसादात्" (रघु० ६।४०) इत्यादौ (उदा० ३५५) केवलो ज्या-शब्दः ।

ग्रन्थकारेण कारिकारूपेण परिगृहीत. । उद्देशक्रमानुसारं पददोषाणामेव प्रथममपवादेषु वक्तव्ये अनुपदमर्थदोषा निरूपिता इति सान्निध्यानुरोधात् प्रथममर्थदोषाणामेव विषयविशेष्येऽदोषत्वं प्रतिपादयितुमिदमाह । कर्णावतंसादिपदेषु अवतंसादिपदैरेव कर्णाभरणादेर् बोधनात् कर्णादिपदं पुनरुक्त्यावहं यद्यपि तथापि अवतंसादिपदानि पेटिकादिषु स्थापितेष्वपि कर्णाभरणादिषु प्रयुज्यन्ते इति न तैः अवतंसादीनां कर्णादिसान्निध्यादिकं बोध्यते इति कर्णादिसन्निकर्षादिबोधनाभिप्रायेण अवतंसादौ अपि कर्णादिपदसंयुतिर्न दुष्यति इत्यर्थः । 'कर्णादिध्वनि-निर्मिति' इत्यस्य स्थाने 'कर्णादिपदयोजनम्' इति पाठो ज्यायान् ॥

(क) कर्णादिपदानां पुनरुक्त्यहेतुतामुदाहरति—**अस्याः कर्णावतंसेन**त्यादिना । इदमुदाहरणमपि वामनेनैवोदाहृतमुपजीव्यात्र संगृहीतम् (२।२।१४) । अत्र अवतंसादयो न स्वयमेव एवम्प्रभावाः किन्तु एतस्या श्रवणादिभिर् योगादिति वर्णनीयायाः प्रकर्षो विवक्षितः । **अपूर्वमधुरे**त्यादेरर्थस्तु—ततो यैः अपूर्वेण मधुरेण गन्धपुष्पादिगुणेन प्रमोदिताः (सुगन्धिता.) दिशस्ते भृङ्गैर् मुखराः शिरस्थैः शेखरैः शोभमाना. पुरुषा आययुरिति । अत्र **कर्ण-श्रवणे**त्यादौ उपात्ता इति शेषः ॥ उदा० ३५३ ॥

(ख) धनुश्शब्दस्य ज्याशब्देन सह प्रयोगेऽपि पुनरुक्त्यहेतुतामुदाहरति—**विदीर्णाभिमुखे**त्यादिना । इदमप्युदाहरणं वामनेनैवोदाहृतमत्र सङ्गृहीतम् (२।२।१३) हे राजन्, पूर्वं त्वया शरविद्धाः पश्चात् क्रोधातिशयेन त्वदभिमुखा ये शत्रवस् तैः भयङ्करे युद्धे धनुष्यारोपिताया मौर्व्याः किणः चिह्नं यस्य तेन तव भुजेन सम्यक् चेष्टितमित्यर्थः । अत्र ज्याया धनुषि आरूढत्वस्य बोधाय धनुःशब्दः प्रयुक्तः, ज्याया धनुपि आरूढत्वस्य बोधेऽनपेक्षिते सति तु **ज्याबन्धे**त्यादाविव केवलो ज्याशब्दः प्रयोक्तव्य इत्याह—**अन्यत्र तु**

(ग) प्राणेश्वरपरिष्वङ्ग-विभ्रमप्रतिपत्तिभिः ।

मुक्ताहारेण लसता हसतीव स्तनद्वयम् ॥ उदा० ३५६ ॥

अत्र मुक्तानामन्यरत्नामिश्रितत्वबोधनाय मुक्ताशब्दः ।

(घ) सौन्दर्यसम्पत् तारुण्यं यस्यास् ते ते च विभ्रमाः ।

षट्पदान् पुष्पमालेव कान् नाऽऽकर्षति सा सखे ॥उदा० ३५७ ॥

अत्रोत्कृष्टपुष्पविषये पुष्पशब्दः । निरुपपदो हि मालाशब्दः पुष्पस्रजमेवाभिधत्ते ।

(सू० ७०) .... **स्थितेष्वेतत् समर्थनम्** ॥ ५७ ॥

न खलु कर्णावतंसादिवज् जघनकाञ्चीत्यादि क्रियते ।

इत्यादिना । **ज्याबन्धे**त्यादिपद्यं [illegible] पठितमपि परिष्करणे पूर्णं पठ्यते । लङ्केश्वरेणेति प्रचलितपाठस्थाने दशाननेनेति युक्ततरः पाठोऽप्यत्रावधेयो विवेचकैः । रघुवंशे षष्ठे सर्गे (४०) पद्यमिदम् । यस्य कार्तवीर्यस्य बन्धनालये निर्जितेन्द्रेणापि दशाननेन रावणेन मौर्वीबन्धनिश्चेष्टविग्रहनिबाहुना, विशेषेण निश्श्वसती मुखपङ्क्तिर् यस्य तथाभूतेन च सता (कार्तवीर्य-) प्रसादपर्यन्तं स्थितमित्यर्थः ॥ उदा० ३५४–३५५ ॥

(ग) मुक्ताशब्दस्य हारशब्देन सह प्रयोगेऽपि पुनरुक्तत्वहेतुमुदाहरति—**प्राणेश्वरे**त्यादिना । इदमुदाहरणं वामनेनापि अनेनैव रूपेणोदाहृतम् (२।२।१५) । नायिकाकृते प्राणेश्वरालिङ्गने ये **विभ्रमास्** तेषां **प्रतिपत्तिभिः** (स्वस्मिन् सङ्क्रान्तिभिः) लसता (अन्यरत्नामिश्रितेन अतएव शुभ्रेण) मुक्ताहारेण नायिकायाः स्तनद्वयं हसतीवेत्यर्थः । "हारो मुक्तावलिः" इति अमराद् हारशब्दो मुक्तामालायामेव प्रसिद्ध इति मुक्ताहारशब्दे मुक्ताशब्दोऽनपेक्षितोऽपि विशेष्यविशेषणयोरिति न दुष्ट इति अभिप्रेत्याऽऽह—**अत्र मुक्ताना**मित्यादि । रत्नान्तरमिश्रितमुक्तामालायामपि मुक्ताप्राधान्ये हारशब्दः प्रयुज्यते इति वृत्तिकृतो मतम् ॥ उदा० ३५६ ॥

(घ) पुष्पशब्दस्य मालाशब्देन सह प्रयोगेऽपि पुनरुक्तहेतुतामुदाहरति—**सौन्दर्यसम्पदि**त्यादिना । हे सखे, यस्या युवत्याः सौन्दर्यसम्पत्, लोभनीयं तारुण्यम्, अनुभवैकवेद्यास् ते ते विभ्रमाश् च सन्ति सा युवती सुरभिपुष्पमाला भ्रमरान् इव कान् युवकान् न आकर्षति, सर्वानेव आकर्षतीत्यर्थः । उत्कृष्टपुष्पं सुरभि पुष्पम् ॥ उदा० ३५६ ॥ ॥ ७८ ॥

ननु ईदृशप्रयोजनानां प्रायः सर्वत्र वक्तुं शक्यत्वात् पुनरुक्तत्वाऽपुष्टार्थत्वादिपरिहारे कवीनां संरम्भो न स्यादित्याशङ्क्यामाह—**स्थितेष्वेत**दित्यादि । महाकविभिः प्रयुक्तेषु चमत्कारितया स्थितेषु पदेषु एतत् समर्थनं प्रवर्तते; अचमत्कारिषु पदेषु तु एतादृशं समर्थनं न प्रयोक्तव्यम्, एतादृशीं युक्तिमाश्रित्य उष्ट्रकरभ-जघनरसना-नितम्बकाञ्ची प्रभृतिपदप्रयोगोऽपि कविभिर् न कर्तव्य इत्याशयः ॥ ५७ ॥

'जगाद मधुरां वाचं विशदाक्षरशालिनीम्' (उदा० ३५८) इत्यादौ क्रियाविशेषणत्वेऽपि विवक्षितार्थसिद्धौ "गतार्थस्याऽपि विशेष्यस्य विशेषणदानार्थं क्वचित् प्रयोगः कार्यः" इति (का० अ० सू० वृ० २।२।१८) न युक्तम्, युक्तत्वे वा **"चरणत्र-परित्राण-रहिताभ्यामपि द्रुतम् । पादाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते"** (उदा० ३५९) इति उदाहार्यम् ।

(सू० ८०) **ख्यातेऽर्थे निर्हेतोरदुष्टता** ... ...।

यथा—

चन्द्रं गता पद्मगुणान् न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥ उदा० ३६० ॥

पुनरुक्तस्याऽदुष्टता प्रकारान्तरेणापि सम्भवतीति तत्पक्षं निरस्यन्नाह— **जगाद मधुरा-**मित्यादिना । जगादेति क्रियया उक्तार्थस्याऽपि वाचमिति विशेष्यस्य न पुनरुक्तत्वं न वाऽनर्थक्यं मधुरां विशदाक्षरशालिनीमिति विशेषणाभ्यां तस्य नवीकृतत्वात् तदर्थमेव तस्योपादानाद्, अन्यथा विवक्षितार्थप्रतिपादनमेवासम्भवि स्यादिति वामनस्य आशयः (२।१।१८) । "गतार्थस्याऽपि विशेष्यस्य विशेषणदानार्थं क्वचित् प्रयोगः कार्यः" इति नियमे क्वचित्पदेन एतादृशस्य स्थलस्य सङ्ग्रहो नोचितः, एतादृशे स्थले 'जगाद मधुरं विद्वान् विशदाक्षरशालि च' इत्यादिरूपेण विशेषणस्य क्रियाविशेषणत्वेनैव प्रयोक्तुं शक्यत्वाद्, यत्र विशेषणस्य क्रियाविशेषणत्वादिना प्रयोगो न सम्भवति तत्रैव गतार्थस्यापि विशेष्यस्य विशेषणदानार्थं प्रयोगोऽदुष्ट इति मम्मटस्याशयः प्रतीयते । शैलीदोषात् तु मम्मटस्य नियमे एव अरुचिरिव प्रतिभाति । नियमे अरुचेरभावे 'युक्तत्वे वा' इति कथनमनुपपन्नं स्यात् । उक्तस्य नियमस्य युक्तमुदाहरणमुपन्यस्यति— **चरणत्र-परित्राणे**त्यादिना । उपानद्भ्यां कृतेन परित्राणेन रहिताभ्यामपि पादाभ्यां दूरं मार्गं द्रुतं व्रजन्नपि एष दुःखितो न भवतीत्यर्थः । अत्र [illegible] पादविशेषणं चरणत्रपरित्राणरहितत्वं विवक्षितार्थविधानेन कथमप्युपात्तुं न शक्यते इति व्रजतिक्रिययैवाक्षिप्तयोरपि पादयोरुपादानं न दोषायेति भावः । [illegible] दूरमध्वानं व्रजन्नपि न खिद्यते इत्युक्तौ चरणत्रपरित्राणराहित्यं कर्तरि सार्वदिकमिति प्रतीयेत, तेन च खेदाभावानुकूलेन न खिद्यते सदानग्नपादभिल्लादिवदितिविवक्षितो व्रजनसामर्थ्यविशेषप्रकर्षो न प्रतीयेतेति विचारणीयम् ॥ उदा० ३५८-३५९ ॥

अर्थदोषाणां मध्ये पुनरुक्तत्वस्य अपवादान् निरूप्य निर्हेतुत्वस्य स्थलविशेषेऽदोषत्व नीतिज्ञाति-पादेनाऽह—**ख्यातेऽर्थे** इत्यादिना । योऽर्थोऽनेन हेतुना एवंरूपो भवतीति लोके प्रसिद्धम् तस्मिन्नर्थे हेतोरनुपादानमपि न दोषायेत्यर्थः । निर्हेतुत्वस्यादोषत्वमुदाहरति— **चन्द्रङ्गते**त्यादिना । कुमारसम्भवे पद्यमिदम् (१।४३) चञ्चला लक्ष्मीः चन्द्रं प्राप्ता सती पद्मगुणान् सौरभादीन् नानुभवति (रात्रौ पद्मस्य सङ्कोचात्), दिवा विकसत्कमलाश्रिता-

अत्र रात्रौ पद्मस्य सङ्कोचः, दिवा चन्द्रमसश्च निष्प्रभत्वं लोकप्रसिद्धमिति न भुङ्क्ते इति हेतुं नापेक्षते।

(सू० ८१) ... ...–ऽनुकरणे तु सर्वेषाम्।

सर्वेषां श्रुतिकटुप्रभृतीनां दोषाणाम्।

यथा—

(क) मृगचक्षुषमद्राक्षमित्यादि कथयत्ययम्। (उदा० ३६१)

(ख) पश्यैष च गवित्याह (उदा० ३६२)

(ग) सुत्रामाणं यजेति च॥ उदा० ३६३॥

(सू० ८२) **वक्त्राद्यौचित्यवशाद् दोषोऽपि गुणः क्वचित् क्वचिन् नोभौ॥ ५८॥**

वक्तृ-प्रतिपाद्य-व्यङ्ग्य-वाच्य-प्रकरणादीनां महिम्ना दोषोऽपि क्वचिद् गुणः, क्वचिद् न दोषो न गुणः।

सती चन्द्रसम्बन्धिनी शोभां नानुभवति (दिवा चन्द्रस्य निष्प्रभत्वात्), उमाया मुखं प्राप्य तु लक्ष्मीः चन्द्रपद्मोभयगतां शोभां प्रापेत्यर्थः। अत्र न भुङ्क्ते इत्यत्र हेतू प्रसिद्धिबलाज् झटित्येव प्रतीयेते इति निर्हेतुत्वमत्राऽदुष्टमित्याह—**अत्र रात्रावित्यादिना**॥उदा० ३६०॥

प्रसङ्गानुरोधात् प्रथमम् अर्थदोषापवादान् प्रदर्श्य इदानीं स्थलविशेषे श्रुतिकटु-प्रभृतीनां सर्वेषां दोषाणामपवादमाह—**अनुकरणे तु सर्वेषामिति**। अनुकरणे तत्-तद्-दूषकताबीजाभावाद् वैरस्यस्य अभावेन पदादीनामदुष्टत्वं बोध्यम्।

(क) अनुकरणे श्रुतिकटुपदस्य अदुष्टतामुदाहरति—**मृगचक्षुषमित्यादिना**। अत्र शृङ्गारविषयेऽद्राक्षमिति पदं श्रुतिकटु तथापि अदुष्टमनुकरणात्मकत्वाद् इति मम्मटस्य भावः। वस्तुतस्तु अनुकरणात्मकस्याऽस्य वाक्यस्य पुरुषविशेषोक्तिप्रदर्शनमात्रपरत्वेन शृङ्गारविषयत्वाभावाच् चिन्त्यमिदम्॥ उदा० ३६१॥

(ख) अनुकरणे च्युतसंस्कृतिपदस्य अदुष्टतामुदाहरति—**पश्यैष चेत्यादिना**। 'न केवला प्रकृतिः प्रयोक्तव्या' (व्या० म० भा० १।२।६४, ३।१।९४) इति पतञ्जलि-प्रोक्तसंस्कृतभाषास्वभावविरुद्धत्वात् केवलप्रकृतिरूपं गो इति प्रातिपदिकं प्रयुज्यमानं च्युतसंस्कृति सदपि अदुष्टमनुकरणात्मकत्वादिति बोध्यम्॥ उदा० ३६२॥

(ग) अनुकरणे अप्रयुक्तपदस्य अदुष्टतामुदाहरति—**सुत्रामाणमित्यादिना**। "सुत्रामा गोत्रभिद् वज्री" (ना० अ० १।१।४२) इति कोषे इन्द्रपर्यायित्वेन पठितमपि सुत्रामेति पदं कविभिरप्रयुज्यमानत्वादप्रयुक्तं सदप्यदुष्टमनुकरणात्मकत्वादिति बोध्यम्॥ उदा० ३६३॥

वक्तृ-बोद्धव्य-व्यङ्ग्य-वाच्य-प्रकरणादीनां वैशिष्ट्याद् दोषोऽपि क्वचिद् गुणो भवति, क्वचिच् च दोषो नाऽपि दोषो न वा गुणो भवतीत्याह—**वक्त्राद्यौचित्येत्यादिना**।

[क, ख] तत्र वैयाकरणादौ वक्तरि प्रतिपाद्ये च रौद्रादौ च रसे व्यङ्ग्ये कष्टत्वं गुणः । क्रमेणोदाहरणम्—

(१) दीधीङ्वेवीङ्समः कश्चिद् गुणवृद्ध्योरभाजनम् ।
क्विप्-प्रत्ययनिभः कश्चिद् यत्र सन्निहिते न ते ॥ उदा० ३६४ ॥

(२) यदा त्वामहमद्राक्षं पदविद्याविशारदम् ।
उपाध्याय तदाऽस्मार्षं समस्प्राक्षं च सम्मदम् ॥ उदा० ३६५ ॥

(३) अन्त्रप्रोतबृहत्कपालनलकक्रूर-क्वणत्-कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।

[क, ख] वक्तृवैशिष्ट्याद् बोद्धव्यवैशिष्ट्याच् च कष्टत्वस्य अर्थदोषस्य वक्तृवैशिष्ट्याद् रसवैशिष्ट्याच् च श्रुतिकष्टत्वस्य (श्रुतिकटुत्वस्य) पदादिदोषस्य च गुणत्वं भवतीत्याऽऽह—**तत्र वैयाकरणादा**वित्यादिना ।

(१) वक्तुः वैशिष्ट्याद् कष्टत्वस्य अर्थदोषस्य गुणतामुदाहरति—**दीधीङ्वेवीङि**त्यादिना । अस्मिन् प्रदेशे कीदृशा जनाः सन्तीति कस्यचित् प्रश्ने उत्तरमिदम् । अत्र कश्चिज् जनो यथा दीधीङ्धातुः वेवीङ्धातुश्च 'दीधीवेवीटाम्' (अष्टा० १।१।६) इति निषेधाद् गुणवृद्ध्योरभाजनं भवति तथैव दयादाक्षिण्यादिगुणस्य समुन्नतेश्च अभाजनमस्ति, कश्चिज् जनः पुनः क्विप्प्रत्ययतुल्योऽस्ति यत्र यथा क्विप्प्रत्यये 'क्ङिति च' (अष्टा० १।१।५) इति निषेधाद् गुणवृद्धी सन्निहिते न भवतस्तथैव गुणवृद्धी सन्निहिते अपि न भवत इत्यर्थः । अत्रोपमानस्य व्याकरणमात्रप्रसिद्धत्वेन दुर्ज्ञेयत्वात् कष्टत्वेऽपि वक्तुर् वैयाकरणत्वाद् तस्य आत्मनो वैयाकरणत्वस्य ख्यापने प्रवृत्तेश्च न दोष इति ग्रन्थकारस्याशयः । अत्र हि व्याकरणव्युत्पत्तिविच्छित्तेरास्वादेन दोषाच्छादनं क्रियते इति मम्मटस्य भावः । वस्तुतस्तु काव्यास्वादस्य तत्काव्यनिबद्धवक्तृबोद्धव्यविषयकत्वाभावात् काव्यश्रोतॄन् प्रति च व्याकरणव्युत्पत्तिविच्छित्तेरास्वाद्यतैवेति नियमस्याभावाद् व्याकरणविमुखाना भावकानां कृते व्याकरणविच्छित्तेरनास्वाद्यत्वादिदं चिन्त्यमेव ॥उदा० ३६४॥

(२) प्रसङ्गानुरोधाद् अत्रापि प्रथमम् अर्थदोषापवादम् उदाहृत्य अथ उद्देशक्रमेण पदादिदोषापवादान् उदाहरिष्यति ये दोषाः यथाक्रमम् तदपवादा अपि तथैव ज्ञेयाः । तत्र बोद्धव्यवैशिष्ट्याच् श्रुतिकटुरूपस्य कष्टस्य गुणतामुदाहरति—**यदा त्वामि**त्यादिना । व्याकरणविद्यानिपुणं त्वामहं यदा दृष्टवान् तदा मम गुरुं स्मृतवान् हर्षञ्च प्राप्तवानस्मीत्यर्थः । अत्र अप्राक्षम्, अस्मार्षम्, अस्प्राक्षमिति च पदानि श्रुतिकटूनि अपि बोद्धव्यस्य वैयाकरणत्वाददुष्टानि इति ग्रन्थकर्तुरभिप्रायः । पूर्वोक्तन्यायाद् इदमपि चिन्त्यमेव ॥ उदा० ३६५ ॥

(३) रसविशेषरूपव्यङ्ग्यानुकूलत्वेन कष्टत्वस्य (श्रुतिकटुत्वस्य) गुणतामुदाहरति—**अन्त्रप्रोते**त्यादिना । महावीरचरिते प्रथमेऽङ्के पद्यमिदम् (१।३५) । ताडका

सन्-पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ॥ उदा० ३६५ ॥

पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोल-स्तनभार-भैरववपुर् दर्पोद्धतं धावति ॥ उदा० ३६६ ॥

(४) वाक्यवशाद् यथा—

मातङ्गाः किमु वल्गितैः किमफलैराडम्बरैर् जम्बुकाः
सारङ्गा महिषा मदं व्रजथ किं शून्ये च शूरा न के ।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः शनैः
सिन्धुध्वानिनि हुङ्कृते स्फुरति यत् तद् गर्जितं गर्जितम् ॥ उदा० ३६७ ॥

अत्र सिंहे वाच्ये परुषाः शब्दाः ।

(५) प्रकरणवशाद् यथा—

रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वाऽनुरक्तं जनं
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः ।
उत्कण्ठा-घटमान-षट्पद-घटा-सङ्घट्ट-दष्ट-च्छदस्

दृष्ट्वा लक्ष्मण आह—अन्त्रेषु ग्रथितैर् बृहद्भिः कपालास्थिभिर् नलकास्थिभिश्च क्वणन्ति यानि कङ्कणबहुलानि प्रेङ्खितानि भूषणानि तेषां रवैः आकाशम् आक्रोदयन्ती तथा प्रथमं पीतस्य ततश्छर्दितस्य रक्तस्य यः कर्दमः तस्य यो घनः प्राग्भारः (सेकः) तेन घोरं उल्लसन् यो व्यालोलस्तनयोर् भारस्तेन भयङ्करं वपुर् यस्याः सा इयं का दर्पेणोद्भटं यथा स्यात् तथा धावति ? इति । अत्र रेफसंयोगैर् वर्गचतुर्थवर्णैः मूर्धन्यादिवर्णैश्च परुषायाः श्रुतिकटुत्वरचनायाः । रचनायाः पदविशे- षानुपूर्वीविशेषरूपाया बीभत्सानुगुणत्वाद् गुणत्वं बोध्यम् ॥ उदा० ३६६ ॥

(४) परुषरचनारूपस्य श्रुतिकष्टत्वस्य वाच्यवशाद् गुणत्वमुदाहरति—**मातङ्गाः किमु** इत्यादिना । हे हस्तिनः युष्माकं वल्गितैः किम् ? हे जम्बुकाः युष्माकमफलैः समारम्भैः किम् ? हे हरिणाः हे वन्यमहिषाश् च किमिति इदानीं मदं कुरुध्वे ? शून्ये विषये (देशे) तु न के शूराः, सर्वेऽपि शूरा भवन्त्येव; कोपस्य उद्रेकेण उत्थिता ग्रीवायाः स्कन्धस्य च रोम्णामग्रभागा यस्य तथाभूतस्य सिंहस्य सिन्धौ इव ध्वानिनि हुङ्कारे अग्रे स्फुरति सत्यपि तु यद् गर्जितं तदेव सार्थकं गर्जितमित्यर्थः । अत्र सिंहे वाच्ये कोपाटोपेत्यादयः श्रुतिकष्टाः शब्दाः तद्युक्ता रचना वा गुणरूपा एवेत्याह—अत्र सिंहे इत्यादिना ॥ उदा० ३६७ ॥

(५) श्रुतिकष्टस्य प्रकरणवशाद् गुणत्वमुदाहरति—**रक्ताशोके**त्यादिना । विक्रमोर्व- शीये पाठान्तररूपेण उपलभ्यमानं पद्यमिदम् । विरही पुरूरवाः पृच्छति—हे रक्ताशोक, कृशोदर्यां तस्यामनुरक्तं जनं मां त्यक्त्वा सा (कृशोदरी) क्व नु गता ? (वातावधूतं शाखाग्रं दृष्ट्वा पुरूरवा पुनः पृच्छति—) सा मया न दृष्टा इति मिथ्यैव वातावधूतं

अत्र शिरोधूननेन कुपितस्य वचसि ।

(६) क्वचिद् नीरसे न गुणो न दोषः, यथा—

शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरवघनैर् घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघै पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस् तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेर्
दत्तार्घाः सिद्धसङ्घैर् विदधतु घृणयः शीघ्रमंहोविघातम् ॥ उदा० ३६९ ॥

[ग, घ] अप्रयुक्तनिहतार्थौ श्लेषादावदुष्टौ यथा—

येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतो
यश् चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत् ।

शिरः कम्पयसि किम् ? (कमप्युत्तरमप्राप्य कुपितः पुरूरवाः पुनरभियुङ्क्ते—) उत्कण्ठया भृशं प्रवृत्तानां भ्रमराणां समूहेन सङ्घट्टेन दष्टाः छदाः यस्य सोऽयं भवत. पुष्पोद्गमः तस्याः कृशोदर्याः पादाहतिं विना कुतः स्यात्, अतः सा त्वया दृष्टैव किमर्थं न दृष्टेति ब्रूपे वृथेति । अत्र अशोकशिरोविधूननेन कुपितस्य पुरूरवस उक्तौ वाच्यानुकूल्यमनपेक्ष्य स्थिता परुपरचना उत्कण्ठाघटमानेत्यादिका गुण एवेति आह—अत्र **शिर-** इत्यादिना । व्यङ्ग्यवैशिष्टचस्य वक्त्राद्यौचित्यविविक्तत्वेऽपि कथं नेदं वक्तृवैशिष्ट्योदाहरणमिति मम्मट एव जानातु । धातावधूतमित्यधिकारे "कम्पने चलि." इति (पा० धा० पा० भ्वा० ५३६) नियमादत्र चलयसीति भाव्यम् । "अन्तरान्तरेण युक्ते" (अ० २।३।४) इत्यत्र मध्ये इत्यर्थकौ अन्तरा अन्तरेणेति निपातौ विवक्षितौ विज्ञायेते 'अन्तरा तां मां कमण्डलुः' इति भाष्योदाहरणात्, 'अन्तरेणाहवनीयं च गार्हपत्यं च प्राङ् तिष्ठन्नप उपस्पृशति' (शतपथे १।१।१।१) इत्यादिवैदिकप्रयोगेभ्यश्च; तथाऽपि कवयो विनार्थकत्वेनेममन्तरेणेति निपातं परिगृह्य प्रयुञ्जते । महाभाष्यकारेणापि एतादृशः प्रयोगः कृतः ॥ उदा० ३६८ ॥

(६) 'क्वचिद् न दोषो न गुणः' इति पूर्वमुक्तस्य वाक्यांशस्य स्फुटीकरणं कृत्वा तत्रोदाहरणमाह—**शीर्णघ्राणेत्यादि ।** मयूरकविकृते सूर्यशतके (श्लो० ६) पद्यमिदम् । पापानां समूहैः शीर्णं घ्राणाङ्घ्रिपाणि येषां तान् व्रणयुक्तैरवयवैरुपलक्षितान् घर्घराव्यक्तशब्दान् दीर्घश्वासान् कुष्ठिनो जनान् गदाद् निर्गता कुर्वन् य एव सूर्यः पुनर् नवान् करोति तस्य, यस्य हृदये द्विगुणा निबिडा या करुणा तदायत्ता निर्विघ्ना भक्तोद्धारकर्त्री चित्तवृत्तिरस्ति, तस्य सूर्यस्य सिद्धसङ्घैर् दत्तार्घाः रश्मयो वः पापस्य विघातं कुर्वन्तु इत्यर्थः । अत्र भाववत्यपि नीरसे अनुप्रासप्रधाने शब्दचित्रकाव्यरूपे पद्ये वर्तमानश्रुतिकष्टत्वं न गुणो न वा दोष इति ग्रन्थकर्तुरभिप्रायः ॥ उदा० ३६९ ॥

[ग, घ] न केवलं कष्टत्वस्यैव, अन्येषामपि दोषाणां क्वचिददोषत्वं क्वचिद् गुणत्वं च भवतीति प्रदर्शयिष्यन् च्युतसंस्कृतित्वाऽसमर्थत्वयोः अनुकरणं विहायाऽन्यत्राऽदोषताया अभावाद् नित्यदोषत्वेन ते परिहाय अप्रयुक्तत्वहितार्थत्वयोः श्लेषयमकादौ अदोषत्वं

यस्याऽऽहुः शशिमच्छिरोहर इति स्तुत्यं च नामाऽमराः
पायात् स स्वयमन्धकक्षयकरस् त्वां सर्वदोमाधवः ॥ उदा० ३७० ॥

अत्र माधवपक्षे शशिमदन्धकक्षयशब्दौ अप्रयुक्तविहतार्थौ ।

[ङ] अश्लीलं क्वचिद् गुणः, यथा सुरतारम्भगोष्ठ्यां "द्व्यर्थैः पदैः पिशुनयेच् च रहस्यवस्तु" इति कामशास्त्रस्थितौ—

करिहस्तेन सम्बाधे प्रविश्यान्तर् विलोडिते ।
उपसर्पन् ध्वजः पुंसः साधनान्तर् विराजते ॥ उदा० ३७१ ॥

प्रतिपाद्य उदाहरति—**येन ध्वस्तेत्यादिना** । चन्द्रकस्य पद्यमिदमिति सुभाषितावली वल्लभदेव । येन दग्धमन्मथेन बलिजितः केशवस्य कायः पुरा त्रिपुरविजये अस्त्रीकृतः (शरता नीतः), यश्च उद्धत वासुक्यादिसर्पहारकङ्कणः, यो गङ्गां च अधारयत्, यस्य शिरः शशियुक्तं अमराः यस्य हर इति स्तुत्यं नाम आहुः सः अन्धकनामकदैत्यक्षयकरः उमाधवः स्वयं त्वां सर्वदा पायादिति उमाधवपक्षेऽर्थः । माधवपक्षे तु—येन (बाल्ये क्रीडायाम्) अनः (शकटम्) ध्वस्तम्, अभवेन (अजन्मना) येन बलिजयनशीलः कायः पुराऽमृतहरणावसरे स्त्रीत्वं नीतः, यश्च दृप्तस्य कालीयाख्यस्य सर्पस्य हन्ता, यश्च रवे शब्दब्रह्मणि (वेदे) तत्प्रतिपाद्यत्वेनानुस्यूतः (शशिमथः [राहोः] शिरो हरतीति) 'शशिमच्छिरोहर' इति स्तुत्यं नाम वदन्ति, सः (अन्धकानाम् [=वृष्णीनाम्] क्षयम् [=निवासम्] करोतीति) अन्धकक्षयकरः चतुर्वर्गफलप्रदो माधवः स्वयं पायादित्यर्थः । अत्र माधवपक्षे शशिमच्छब्दोऽप्रयुक्तः, अन्धकक्षयकरशब्दो निहतार्थः तथापि श्लेषकृतवैचित्र्याच्छन्नौ तौ न सहृदयोद्वेगकरौ न च निष्प्रयोजनौ इत्यदुष्टौ इत्याशयेनाऽऽह—**अत्रमाधवे**त्यादि ॥ उदा० ३७० ॥

[ङ] अवसरविशेषे प्रयुक्तं सद् अश्लीलत्वमपि भवतीत्याह—**अश्लीलं क्वचिदि**त्यादिना । अनुचितार्थ निरर्थकावाचकानां नित्यदुष्टत्वात् तान्यपहाय अश्लीलत्वापवादा उक्ताः तत्र व्रीडाव्यञ्जकस्याऽश्लीलस्यार्थस्य गुणत्वमुदाहरति—**करिहस्तेने**त्यादिना । सम्बाधे (योधसम्मर्दे) करिणोहस्तेन अन्तः प्रविश्य विलोड्य सावकाशे कृते सति साधनस्य (सैन्यस्य) अन्तर् (मध्ये) प्रविश्य उपसर्पन् वीरस्य पुरुषस्य केतुर् विराजते इत्यर्थः उदासीनविषयः । अत्र उक्तेनार्थेन आच्छादिति—"सम्बाधे (भगे) उत्तानाभ्यां तर्जन्यनामिकाभ्यां परस्परं श्लिष्टाभ्यां तत्पृष्ठलग्नमध्यमया चेति तिसृभिरङ्गुलिभिर्निर्वृत्तेन दीर्घदण्डिकाकार देशीयकल्पितशिश्नतुल्येन करिहस्तेन अन्त प्रविश्य विलोडिते सति (एवं च भगेक्लेदिते विकासिते च सति) साधनस्य (=योन्या.) अन्तः प्रविश्य सुखेन गतागतं कुर्वन् पुरुषस्य शिश्नो विराजते" इत्यर्थः सम्प्रयोक्तव्य द्रवणीयप्रन्दर्भविषय प्रतीयते । स च व्रीडादायी सन्नपि उदासीनवञ्चनया स्वार्थसम्पत्त्या च रसमुत्कर्षयतीति सुरतारम्भगोष्ठ्यां द्व्यर्थैः पदैः रहस्यं सूचयेदिति कामशास्त्रसिद्धान्तस्यानुकूलश्चेति

[यथा च] शमकथासु—

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे ।
क्लेदिनि स्त्रीव्रणे शक्तिरकृमेः कस्य जायते ॥ उदा० ३७२ ॥

[यथा वा—]

निर्वाण-वैर-दहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥ उदा० ३७३ ॥

अत्र भाव्यमङ्गलसूचनम् ।

[च] सन्दिग्धमपि वाच्यमहिम्ना क्वचिद् नियतार्थप्रतिपत्तिकृत्त्वेन व्याजस्तुतिपर्यवसायित्वे गुणः, यथा—

इदं काव्यं सुरतारम्भगोष्ठयां प्रयुक्तं सद् न केवलं दुष्टं किन्तु गुणवदपि भवतीतिभावः । वात्स्यायनो मल्लनागोऽप्याह—"गूढाश्लीलानां च वस्तूनां समस्या परिभाषणम्" (का० सू० २।१०।३) इति । द्व्यर्थैं पदैरित्यादिरित्यंश उदाहरणस्पष्टीकरणाय उदाहरणपद्यानन्तरं पठनीयः । तत्पाठश्च-'द्व्यर्थैः पदैः पिशुनयेच् चरहस्यवस्तु' इति हि सुरतारम्भगोष्ठीविषये कामशास्त्रस्थितिः इति युक्ततरो बोध्यः ॥ उदा० ३७१ ॥

जुगुप्साप्रदस्य अश्लीलस्य गुणत्वमुदाहरति—उत्तानोच्छूनेत्यादिना । मृतस्योत्तानीभूतस्य उच्छूनस्य मण्डूकस्य पाटितेन कृमिजुष्टेन उदरेण सदृशे क्लेदयुक्ते स्रवत्पिच्छिलोपस्नेहे व्रणतुल्ये भगे अकृमेः कस्य पुरुषस्य आसक्तिः स्यादित्यर्थः । अत्र मुख्योऽर्थ एव जुगुप्सादायी, तथापि स शमकथाप्रसङ्गे वैराग्योत्पादनद्वारा रसोत्कर्षक इति गुणरूप इति बोध्यम् ॥ उदा० ३७२ ॥

अमङ्गलरूपस्य अश्लीलस्य वाक्यगतस्य गुणत्वमुदाहरति—**निर्वाणवैरे**त्यादिना । भट्टनारायणकृते वेणीसंवरणे प्रथमेऽङ्के सूत्रधारस्योक्तिरियम् । युधिष्ठिरादयः पाण्डुपुत्राः शत्रूणा कलहस्योपशमात् शान्तवैराग्नयः सन्तः श्रीकृष्णेन सह नन्दन्तु, अनुरक्ता प्रसाधिता च भूर्यैस्ते तादृशाः खण्डितयुद्धाः) भृत्यैः सहिताः दुर्योधनादयः कुरुराजसुताश्च स्वस्था भवन्तु इत्यर्थः । अत्र आहतदेहाः रक्तेन रञ्जिता भूर् यैस्ते तादृशाः सभृत्याः दुर्योधनादयः कुरुराजपुत्राः स्वर्गस्थाः (मृताः) भवन्तु इति अमङ्गलरूपोऽर्थ प्रतीयते । स्वस्थः स्वर् तिष्ठतीति स्वस्थः, रेफस्य विसर्गे तल्लोपः "वा शर्प्रकरणे खर्परे लोपः" (व्या० म० भा० ८।३।३६) इति प्रामाण्यात् । अत्रायममङ्गलरूपोऽर्थःसूत्रधारविवक्षितभाव्यर्थसूचकत्वेन प्रेक्षकहृदयावर्जक इति न केवलमदुष्ट किन्तु गुणरूप इति भावेनाऽऽह—**अत्र भाव्यमङ्गलसूचनमि**ति । एवमेव अप्रसिद्धासभ्यार्थान्तरं सम्बाधः इत्यादि गुप्तमश्लीलम् पदम्, जन्मभूमिः इत्यादिलाक्षणिकेनासभ्यार्थेनान्वितं लक्षितमश्लीलं यद्, लोकेन संवृतम् "सुभगा, भगिनी, उपस्थानम्, अभिप्रेतम्, कुमारी, दोहदम् इत्यादि संवीतमश्लीलं पदं चादुष्टमिति वामनः (२।१।१६,१७,१८) ॥ उदा० ३७३ ॥

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥ उदा० ३७४ ॥

[छ] प्रतिपाद्यप्रतिपादकयोर् ज्ञत्वे सति अप्रतीतं गुणः, यथा—

आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोत्कर्षाद् विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम् ॥ उदा० ३७५ ॥

[च] सन्दिग्धस्यापि क्वचिद् विषयविशेषे गुणत्वं भवति, तथा वर्णनीयराजादिमहिम्ना प्रकृतार्थनिश्चायकत्वेन व्याजस्तुतिपर्यवसायित्वे सन्दिग्धत्वमपि गुण इति प्रतिपाद्योदाहरति—**पृथुकार्तस्वरेत्यादि** । राजानं प्रति कवेरुक्तिरियम् । हे राजन्, विपुलसुवर्णपात्रैर्युक्तम् अलङ्कृतसर्वसेवकजनं विलसन्तीभिः करेणुभिर्व्याप्तं तव सदनम्, बालानामार्तक्रोशनस्य पात्रम्, भुवि उषिताः सर्वे परिजनाः कलत्रपुत्रादयो यत्र तत् तादृशम्, (बवयोः श्लेषेऽभेदात्) बिले छिद्रे सीदन्तीति बिलसत्काः मूषकास्तेषां रेणुभिर्व्याप्तं मम सदनं च सम्प्रति (त्वत्तो धनस्य लाभात् प्राक्) सममित्यर्थः । अत्र पृथुकार्तस्वरमित्यादीनि विशेषणानि द्व्यर्थकत्वाद् आपाततः सन्दिग्धानि अपि दैन्यनाशकराजवर्णने एव कवेस् तात्पर्याद् व्याजस्तुतिपर्यवसायित्वेन राजविषयकरतिभावोत्कर्षकत्वाद्गुणरूपाणीति भावः ॥ उदा० ३७४ ॥

[छ] वक्तृश्रोत्रोस् तच्छास्त्रपटुत्वे सति अप्रतीतत्वं गुण इति प्रतिपाद्य उदाहरति—**आत्मारामा** इत्यादिना । वेणीसंहारे श्रीकृष्णवञ्चनायोद्यतं दुर्योधनं ज्ञात्वा 'आर्य, किमसौ दुरात्मा सुयोधनो वासुदेवमपि भगवन्तं स्वेन रूपेण न जानाति ?' इति पृच्छन्तं सहदेवं प्रति भीमसेनस्योक्तिरियम् । आत्मैव आरामः (क्रीडास्थानम्) येषां ते, आत्ममात्रावलम्बिनि भेदसंसर्गभानरहिते निर्विकल्पे समाधौ कृतरतयः, ज्ञानस्योत्कर्षाद् नाशितमिथ्याज्ञानसंस्काराः सत्त्वगुणमात्रविश्रान्ता योगिनो यं साक्षाद् निर्देष्टुमशक्यं तमसां ज्योतिषां च परस्ताद् वर्तमानं प्रकृतेरपि प्राग्वर्तिनं पुराणं सर्वावभासकं पुरुषं मोहान्धो दुर्योधनसदृशो जनः कथं वेत्तीत्यर्थः । अत्र निर्विकल्पादिशब्दा आत्ममात्रावलम्बनादिषु अर्थेषु योगशास्त्रमात्रे प्रसिद्धा इत्यप्रतीताः, तथाप्यत्र वक्तृश्रोतारौ योगशास्त्रज्ञौ भीमसेनसहदेवौ इति तेषां न दुष्टत्वमिति मम्मटस्याशयः । अत्र प्रतिपाद्यप्रतिपादकपदाभ्यां सामाजिकवक्तारौ च विवक्षितौ, एतेन सामाजिकस्य रसोद्बोधात् तयोस्तज्ज्ञत्वमकिञ्चित्करमित्यपास्तमिति मम्मटाभ्धानुयायिनौ गोविन्दठक्कुरनागोजिभट्टौ । वस्तुतस्तु यद्यत्राप्रतीतत्वमस्ति तर्हि भीमसेनसहदेवयोर्योगशास्त्रज्ञत्वेन न तस्य गुणत्वं सम्भवति, काव्यस्य सहृदयविषयत्वात् । इदं च काव्यं नाटकान्तर्गतमिति प्रेक्षकाणां च सर्वेषां न योगशास्त्रज्ञत्वमिति कथमत्राप्रतीतत्वस्य गुणत्वमुदाहर्तुं शक्यम् । स्वयं वा परामर्शे इत्युदाहरणान्तरं

स्वयं वा परामर्शे, यथा—

षडधिकदशनाडीचक्रमध्यस्थितात्मा
हृदि विनिहितरूपः सिद्धिदस् तद्विदां य ।
अविचलितमनोभिः साधकैर् दृश्यमान.
स जयति परिणद्धः शक्तिभि शक्तिनाथ. ॥ उदा० ३७६ ॥

[ज] अधमप्रकृत्युक्तिषु ग्राम्यो गुण.; यथा—

फुल्लुक्करं कलमकूरणिहं वहन्ति जे सिन्धुवारविडवा मह वल्लहा दे ।
जे गालिदस्स महिसीदहिणो सरिच्छा दे किं च मुद्ध विअइल्लपसूणपुञ्जा ॥
॥ उदा० ३७७ ॥

अत्र कलमकूर-महिषीदधिशब्दा ग्राम्या अपि विदूषकोक्तौ ।

प्रदर्शयतो मम्मटस्य प्रतिपाद्यपदेन च न सामाजिका अभिप्रेता इत्यपि सुधिया सुबोधमेव ॥ उदा० ३७५ ॥

श्रोतारमनपेक्ष्य वक्तु. स्वयम्परामर्शेऽपि अप्रतीतत्वं गुण इति प्रतिपाद्योदाहरति—**षडधिकेत्यादिना** । मालतीमाधवे (५।१) कपालकुण्डलाया स्वयम्परामर्शोऽयम् । यः खलु षोडशानां नाडीना मणिपूराख्यस्य हृदयप्रदेशे स्थितस्य चक्रस्य मध्येस्थितः आत्मा यस्य तादृशः, हृदि विशेषेण निहितं चैतन्यरूपं यस्य तथाभूतः, तद्विदामणिमादिसिद्धिदो निश्चलचित्तैरुपासकैः साक्षात्क्रियमाण ज्ञानेच्छाकृतिरूपाभि शक्तिभिर्व्याप्त स शक्तिनाथो जयतीत्यर्थः । अत्र योगशास्त्रमात्रप्रसिद्धत्वेनाऽप्रतीतत्वस्यादर्शनस्य वक्त्र्याः कपालकुण्डलायाः स्वयम्परामर्शाद् गुणत्वमिति मम्मटस्याऽऽशयः, स च पूर्वोदाहरणव्याख्यानोक्तयुक्त्या अनुपपन्न एव बोध्य ॥ उदा० ३७६ ॥

[ज] ग्राम्यत्वस्य गुणतायाः स्थलं निर्दिश्य तामुदाहरति—**फुल्लुक्करमित्यादिना** । **फुल्लोत्करं कलमकूरनिभं वहन्ति ये सिन्धुवारविटपा मम वल्लभास्ते । ये गालितस्य माहिषीदध्न. सदृक्षास् ते किं च मुग्धविचकिलप्रसूनपुञ्जाः**" इति संस्कृतच्छाया । राजशेखरकृते कर्पूरमञ्जरीनाम्नि सट्टके विदूषकस्योक्तिरियम् (१।१९) । कलमभक्तसदृशं पुष्पपुञ्जं ये वहन्ति ते निर्गुण्डीवृक्षशाखा मम प्रियाः सन्ति; तथा ये पटखण्डे संस्थाप्य जलाशनिस्स्रावणेन निर्जलीकृतस्य महिष्या दध्न सदृशाः सुन्दर-मदनद्रुम-पुष्पपुञ्जा ते च मम प्रियाः सन्तीत्यर्थः । "कङ्केल्लिफुल्लच्छटा" (सुभाषितरत्नकोषे श्लो० १८६) इत्यादौ फुल्लशब्द पुष्पार्थकः संस्कृतेऽपि प्रयुज्यते, तथैव कूरशब्दोऽपि भक्तार्थेसंस्कृतभाषाया एव, तथा च यादवः—"जीवदाऽन्नाऽशनाऽन्धासि कूरं भक्त प्रसादनम्" इति (४।३।७५) । अत्र हास्यपोषकत्वाद् विदूषकोक्तौ ग्राम्याः शब्दा अपि गुणभूता इत्याऽऽह-अत्र कलमकूरेत्यादिना ॥ उदा० ३७७ ॥

[झ] न्यूनपदं क्वचिद्गुणः, यथा—

> गाढालिङ्गन-वामनीकृतकुच-प्रोद्भूत-रोमोद्गमा
> सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।
> मा मा मानद माऽति मामलमिति क्षामाक्षरोल्लापिनी
> सुप्ता किन्नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥ उदा० ३७८ ॥

क्वचिद् न गुणो न दोषः, यथा—

> तिष्ठेत् कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यति
> स्वर्गायोत्पतिता भवेन् मयि पुनर् भावार्द्रमस्या मनः ।
> तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
> सा चात्यन्तमगोचरं नयनयोर् यातेति कोऽयं विधिः ॥उदा० ३७९॥

अत्र पिहितेत्यतोऽनन्तरं 'नैतद् यतः' इत्येतैर् न्यूनैः पदैर् विशेषबुद्धेरकरणाद् न गुणः । उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं बाधते इति न दोषः ।

[झ] पदादिसाधारणदोषापवादान् प्रदर्श्य वाक्यमात्रदोषेषु प्रतिकूलवर्णत्वादीन् नित्यान् दोषान् परिहाय न्यूनपदत्वस्य गुणत्वमुदाहरति—**गाढालिङ्गने**त्यादिना । अमरुशतके पद्यमिदम् । गाढेन आलिङ्गनेन वामनीकृतौ कुचौ यस्याः सा चासौ प्रकटरोमाञ्चा, घनस्य स्नेहरसस्य (आनन्दस्य) आधिक्येन विगलत् श्रीमद् नितम्बाम्बरं यस्याः सा; हे मानखण्डक, मा मा माम् (आयासय) मा माम् अति (पीडय), अलम् इति अस्पष्टाक्षरोल्लापिनी मम प्रिया सुप्ता किन्नु, निश्चलत्वाद् मृता किन्नु, मे मनसि लीना किन्नु, अथवा मम मनसि विलयमेव गता किन्नु इत्यर्थः । अत्र आयासयेति पीडयेति पदे न्यूने अपि गुणत्वकरे हर्षसम्मोहातिशयव्यञ्जनद्वारा शृङ्गारोत्कर्षकत्वादित्याशयः ॥ उदा० ३७८ ॥

न्यूनपदत्वं क्वचिद् गुणोऽपि न भवति दोषोऽपि न भवतीति प्रतिपाद्य तदुदाहरणमाह—**तिष्ठेत् कोपवशा**दित्यादि । विक्रमोर्वशीये (४।९) विरहिणः पुरूरवसः उक्तिरियम् । सा उर्वशी देवशक्त्या तिरस्करिण्या विद्यया वा अन्तर्हिता अत्रैव तिष्ठेत्, (नैतद् युक्तम्, यतः) स चिरं न कुप्यति; सा स्वर्गं गन्तुम् ऊर्ध्वं गता भवेत्, किन्तु (नैतद् युक्तम्, यतः) अस्या उर्वश्या मनो मयि भावेन (प्रीत्या) पूर्णम्; मम पुरोवर्तिनीं तां हर्तुम् असुरा अपि न समर्थाः, तथापि सा मम नयनयोर् अत्यन्तमेव अविषयतां प्राप्ता इति अयं को विधिर् वर्तते इत्यर्थः । अत्र न्यूनपदत्वस्य गुणत्वाभावं दोषत्वाभावं चाऽऽह—**अत्र पिहिते**त्यादिना । **विशेषबुद्धेरकरणाद्** वितर्करूपस्य भावस्य न्यूनपदतयाऽपोषणात् । पदन्यूनतायां सत्यामपि दीर्घं न सा कुप्यति इत्यादिकम् उत्तरं ज्ञानं तिष्ठेत् कोपवशादित्यादिकं पूर्वं ज्ञानं बाधते इति विवक्षितस्यार्थस्य झटित्येव प्रतीतेर् न्यूनपदताऽत्र दोषोऽपि नेति भावः ॥ उदा० ३७९ ॥

[ञ] अधिकपदं क्वचिद् गुणः, यथा—

यद् वञ्चनाहितमतिर् बहु चाटुगर्भं कार्योन्मुखः खलजनः कृतकं ब्रवीति ।

तत् साधवो न न विदन्ति विदन्ति किन्तु कर्तुं वृथा प्रणयमस्य न पारयन्ति ॥ उदा० ३८० ॥

यथा वा—

वद वद जितः स शत्रुर् न हतो जल्पंश्च तव तवाऽस्मीति ।

चित्रं चित्रमरोदीद् हा हेति परं मृते पुत्रे ॥ उदा० ३८१ ॥

इत्येवमादौ हर्षभयादियुते वक्तरि ।

[ट] कथितपदं गुणो लाटानुप्रासे अर्थान्तरसङ्क्रमितवाच्ये विहितस्याऽनुवाद्यत्वे च । क्रमेणोदाहरणानि—

(१) सितकर-रुचिर-विभा विभाकराऽऽकार धरणिधव कीर्तिः ।

पौरुषकमला कमला सैव तवैवाऽस्ति नान्यस्य ॥ उदा० ३८२ ॥

[ञ] अधिकपदत्वस्य विशेषप्रतिपत्तिस्थले गुणत्वमुदाहरति—**यद् वञ्चनाहिते**त्यादि भगवत्तारारोग्यस्य पद्यमिदम् (सु० २७१) प्रतारणे कृता बुद्धिर् येन तादृशः स्वकार्यसाधनाय उन्मुखो दुर्जनः प्रियवाक्ययुक्तं मिथ्याभूतं बहु यद् ब्रवीति तत् साधवो न विदन्ति इति न किन्तु तत्त्वतो विदन्त्येव; अस्य दुर्जनस्य कृतकमपि प्रणयं कुसुमसुकुमारहृदयत्वाद् वृथा कर्तुं न शक्नुवन्तीत्यर्थः । अत्र "द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः" इति न्यायाद् नञ्द्वययोगेन ज्ञानातिशये लब्धे पुनर् विदन्तीति पदम् एते एव जानन्ति नतु प्रणयभञ्जनेन अन्यं ज्ञापयन्तीति विशेषकत्वाद् अधिकपदं गुण इत्यभिप्रेत्याऽऽह—**अत्र न बिदन्ती**त्यादि ॥ उदा० ३८० ॥

हर्षभयादियुक्ते वक्तरि अधिकपदत्वं हर्षभयादिव्यञ्जकत्वाद् गुणरूपं भवतीत्युदाहरति—**वद वदे**त्यादि । रणभूमेर् आगतं प्रसन्नवदनं सेनापतिं दृष्ट्वा राजा हर्षाद् आह—वद वद स शत्रुर् जितः ? इति; सेनापतिराह—(स शत्रुर्जितः) तवास्मि तवास्मि इति भयाद् जल्पन् स न हतः, किन्तु पुत्रे रणे मृते सति स शत्रुः दुःखभाराद् हा हेति चित्रं चित्रं यथा स्यात् तथा अरोदीदित्यर्थः । "विषादे विस्मये हर्षे दैन्ये कोपेऽवधारणे । प्रसादनेऽनुकम्पायां वाक्यं तद् द्विस्त्रिरुच्यते" इति वस्तुगतिरत्र स्मरणीया ॥ उदा० ३८१ ॥

[ट] कथितपदस्य गुणतामाह—**कथितपदं गुण** इत्यादिना ।

(१) लाटानुप्रासच्छायया सहृदयहृदयावर्जनात् तन्निर्वाहकं कथितं पदं गुणतां प्राप्नोतीति अत्रोदाहरणमाह—**सितकरे**त्यादि । हे सूर्यसदृशप्रचण्डप्रताप **नृप**, चन्द्रकिरणतुल्यशोभनकान्ति, कीर्तिः, पराक्रमलक्ष्मी, सा प्रसिद्धा लक्ष्मीः (सम्पत्तिः) च तव एव अस्ति अन्यस्य नास्तीत्यर्थः । अत्र कर-कर इति विभा-विभा इति कमला-कमला इति च लाटानुप्रासः । तन्निर्वाहकत्वात् कथितपदत्वस्य गुणत्वमत्र बोध्यम् ॥ उदा० ३८२ ॥

(२) ताला जाअन्ति गुणा जाला दे सहिअएहिँ घेप्पन्ति ।
रइ-किरणा-णुग्गहिआइँ होन्ति कमलाइँ कमलाइँ ॥ उदा० ३८३ ॥

(३) जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥ उदा० ३८४ ॥

[ठ] पतत्-प्रकर्षमपि क्वचिद् गुणः, यथोदाहृते प्रागप्राप्तेत्यादौ (उदा० ३८५)।

[ड] समाप्तपुनरात्त क्वचिद् गुण, यत्र न विशेषणमात्रप्रदानार्थं पुनर्ग्रहणम्, अपि तु वाक्यान्तरमेव क्रियते; यथा अत्रैव-प्रागप्राप्तेत्यादौ (उदा० ३८६)।

[ढ] अपदस्थसमासं क्वचिद् गुणः, यथोदाहृते रक्ताशोकेत्यादौ (उदा० ३८७)।

---

(२) अर्थान्तरसङ्क्रमितवाच्ये ध्वनौ ध्वनिना सहृदयहृदयाह्लादनात् तन्निर्वाहकं कथितं पद गुणता प्राप्नोतीत्यत्रोदाहरणमाह—**ताला जाअन्ती**त्यादि । आनन्दवर्धनकृत-विषमबाणलीलाया गाथेयम् । **'तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते । रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि'** इति संस्कृतच्छाया । द्वितीयं कमलानीति पदं विकाससौरभसौन्दर्यादिमत्कमलपरम् । असाधारणत्वादिकमत्र व्यङ्ग्यम् ॥उदा० ३८३ ॥

(३) विवक्षितान्यपरवाच्ये विवक्षितार्थनिर्वाहकं कथितं पद गुणता प्राप्नोतीत्यत्रोदाहरणमाह—**जितेन्द्रियत्वं विनयस्ये**त्यादि । अत्र पूर्ववाक्ये जितेन्द्रियत्वेन विनयो विहित, स एवोत्तरवाक्ये गुणप्रकर्षनिमित्तत्वेनानूद्यते एवमेवोत्तरत्रापि, एवमुत्तरोत्तरं विहितस्यानुवादेन विवक्षितकारणमालालङ्कारस्य निर्वहणात् कथितपदत्वं गुण इत्याशयः ॥ उदा० ३८४ ॥

[ठ] वाच्याद्यनुगुणत्वे पतत्-प्रकर्षत्वमपि गुण इति संसूच्य तदुदाहरण निर्दिशति—**प्रागप्राप्ते**त्यादि पूर्वमुदाहृत पद्यम् (उदा० २७५) । व्याख्यातमिदं प्रागत्रैवोल्लासे । तत्र चतुर्थे पादे गुरोः स्मृत्या क्रोधस्याऽपगमनाद् मसृणान्येव पदानि समुचितानीति पतत्प्रकर्षस्याप्यदुष्टतेति भाव (उदा० ३८५)।

[ड] वाक्यान्तरत्वेनैवोपादाने समाप्तपुनरात्तत्वस्याऽपि गुणत्वं प्रतिपाद्य उदाहरणं निर्दिशति—**प्रागप्राप्ते**त्यादि । व्याख्यातमिद प्राक् (उदा० २७५) । विशेषणस्य विशेष्यमाकाङ्क्षत्वाद् जनितान्वयबोधविशेष्यपदावृत्तिकल्पने प्रतीतिविलम्ब पुनरुपादीयमानविशेषण विनैव वाक्यस्य निराकाङ्क्षत्वञ्च समाप्तपुनरात्तत्वे दूषकताबीजम्, तच्च येनानेनेत्यादिवाक्यान्तरारम्भसत्त्वेन, पदानामनाकाङ्क्षत्वेऽपि वाक्ययो. सर्वनाम्ना यच्छब्देन आकाङ्क्षाया उत्थापनात् प्रागप्राप्तेत्यादौ नास्तीतिनात्र पुनरात्तत्व दोष इत्याशयः (उदा० ३८६)।

[ढ] अस्थानस्थसमासत्वदोषस्य प्रतिप्रसवमाह **अस्थानस्थसमासमि**त्यादिना । उदाहरति—**रक्ताशोके**त्यादिना प्रागप्युदाहृतेन पद्येन (उदा० ३६८) । तत्र वातावधूत शिरो दृष्ट्वा कुपितस्य पुरूरवस उक्तौ नो दृष्टेत्यादावपि दीर्घे समासे कर्तव्येऽपि क्रोधोत्पत्त्य-

[ण] गर्भितत्वं तथैव, यथा—

हुमि अवहत्थिअ-रेहो णिरङ्कुसो अह विवेअ-रहिओ वि ।
सिविणे वि तुमम्मि पुणो पत्तिहि भत्ति ण पसुमरामि ॥उदा० ३८८॥

अत्र प्रतीहीति मध्ये दृढप्रत्ययोत्पादनाय ।

एवमन्यदपि लक्ष्यात् प्रेक्ष्यम् ।

(सू० ८३) व्यभिचारि[1]-रस[2]-स्थायि[3]भावानां शब्दवाच्यता ।
कष्टकल्पनया व्यक्तिरनुभाव[4]-विभावयोः[5] ॥५९॥

व्यवहितोच्चारितानि नो दृष्टेत्यादीनि बहूनि पदानि परित्यज्य उत्कण्ठेत्यादावेव दीर्घः समासः कृत इति अपेक्षाविशेषादस्थानस्थसमासता बोध्या। सा च विरहोन्मत्तस्य पुरूरवस उक्तौ उन्मादव्यक्तिद्वारा रसस्य पोपिकेति गुण एवेति मम्मटाशयो भीमसेनदीक्षितवर्णितोऽत्राऽऽदर्तव्यः सुधीभिः । अस्मिन्नुदाहरणे गोविन्दठक्कुरेणाऽमङ्गलं प्रदर्शिता, श्रीधरेण चेदमुदाहरणं न व्दान्यातमित्यत्राऽवधानं देयं विचक्षणैः (उदा० ३८७) ।

[ण] गर्भितत्वस्याऽपि दृढप्रत्ययहेतुत्वे गुणत्वं भवतीत्यभिप्रेत्योदाहरति—**हुमि अवे**त्यादिना । "**भवामि अपहस्तित-रेखो निरङ्कुशोऽथ विवेकरहितोऽपि । स्वप्नेऽपि त्वयि पुनः प्रतीहि भक्तिं प्रस्मरामि**" इति संस्कृतच्छाया । आनन्दवर्धनकृतायां विषमबाणलीलायां पद्यमिदमिति सोमेश्वरः । हे स्वामिन्, अहं त्यक्तमर्यादारेख उच्छृङ्खलो धर्माधर्मविचारशून्योऽपि यदि भवामि, तथापि त्वयि (सत्यं जानीहि) भक्तिं न विस्मरिष्यामीत्यर्थः । कामदेवस्य मधुमलयानिलादिभिः सहचरैः सह समागमे निजस्वभावव्यञ्जिका यौवनस्येयमुक्तिः कामं कदापि न त्यजामीति पर्यवसिता प्रकृतरसप्रकर्षाधायिनीति दृढप्रत्ययोत्पादकेन 'प्रतीहि' वाक्येन गर्भितमपीदं वाक्यं गुणभूतमेवेत्यभिप्रायः ॥ उदा० ३८८ ॥

एवं दोषान्तरमपि क्वचिद् गुणः, क्वचिद् न गुणो न दोषश्चेति लक्ष्यविशेषदर्शनाद् बोद्धव्यमिति शिष्यस्य सौवी प्रतिभा वितर्कशक्तिः च उद्बोधयिपति—**एवमन्यदपी**त्यादिना । उक्तिप्रत्युक्त्योः सङ्कीर्णत्वं गुणः, यथा—'बाले नाथ विमुञ्च मानिनि रुषं रोषान् मया किं कृतं खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि। तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते नन्वेतन मम का तवास्मि दयिता नास्मीत्यतो रुद्यते' इत्यादि सोमेश्वरादिभिः प्रपञ्चितं तत एव बोध्यम् ॥

ध्वनिसिद्धान्तप्रचारात् प्राक् स्थितैराचार्यैर् विचारितान् दोपान् तदपवादांश्च निरूप्य आचार्यानन्दवर्धनोपज्ञान् साक्षाद् रसभङ्गहेतून् दोषानिदानीं सङ्गृह्य निरूपयति—**व्यभिचारी**त्यादिना । रसदोषाश्च केचिद् रसप्रतीत्यवरोधकाः, केचिद् रसप्रतीतौ व्यवधानस्योत्पादकाः, केचित् तु रसप्रतीतिविलम्बजनकाः । (१) व्यभिचारिणां स्वशब्दवाच्यता, (२) रसाना रसशब्देन शृङ्गारादिशब्देन वा वाच्यता, (३) स्थायिभावाना स्वशब्दवाच्यता, (४) अनुभावाना कष्टकल्पनया व्यक्तिः, (५) विभावानां कष्टकल्पनया

प्रतिकूल-वि[६]भा[७]वा[८]दिग्रहो दीप्ति[९]: पुनः पुनः ।
अकाण्डे प्रथन[१०]-च्छेदावङ्गस्याप्य[१२]तिविस्तृतिः ॥६०॥
अङ्गिनोऽननुसन्धानं[१३] प्रकृतीनां विपर्ययः[१४] ।
अनङ्गस्याऽभिधानं[१५] च रसे दोषा स्युरीदृशा[१६] ॥६१॥

(१) स्वशब्दोपादान व्यभिचारिणो यथा—

सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुताऽवलोकनविधौ दीना कपालोदरे
पार्वत्या नवसङ्गमप्रणयिनी दृष्टि: शिवायाऽस्तु वः ॥उदा० ३८९॥

अत्र व्रीडादीनाम् । 'व्यानम्रा दयितानने मुकुलिता मातङ्गचर्माम्बरे, सोत्कम्पा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि । मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे' इत्यादि तु युक्तम् ।

(२) रसस्य स्वशब्देन शृङ्गारादिशब्देन वा वाच्यत्वम् । क्रमेणोदाहरणम्—

[क] तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम् ।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः ॥उदा० ३९०॥

व्यक्तिः, (६) प्रतिकूलविभावग्रहः, (७) प्रतिकूलव्यभिचारिग्रहः (८) प्रतिकूलानुभावग्रहः, (९) रसस्य पुनः पुनर् दीप्तिः, (१०) रसस्य अकाण्डे प्रथनम्, (११) रसस्य अकाण्डे छेदः, (१२) अङ्गस्याऽतिविस्तरेण वर्णनम्, (१३) अङ्गिनोऽननुसन्धानम्, (१४) प्रकृतीनां विपर्ययः, (१५) अनङ्गस्य अभिधानम् चेति पञ्चदश, (१६) एतादृशा अन्ये च अनौचित्यमूला रसदोषाः सम्भवन्तीत्यर्थः ॥५९–६१॥

(१) व्यभिचारिणां स्वशब्देनोपादाने दोषमुदाहरन्ति—**सव्रीडे**त्यादिना । दयितस्य शिवस्य मुखे (साम्मुख्ये सति) सव्रीडा, मातङ्गचर्मरूपे दयितस्याम्बरे विषये मातङ्गमारणस्मृत्या विभावाभावकल्पनया वा सशोका, प्रियभूषणे भुजगे सत्रासा, मौलिबद्धे अमृतस्यन्दिनि चन्द्रे विषये आकाशस्थायी चन्द्रोऽत्र कथमिति साश्चर्या, दयितशिरसि स्थिताया जाह्नव्या अवलोकनस्य विधौ पतिकृतप्रमदान्तरसम्पर्कबुद्ध्या ईर्ष्यासहिता, भूतेशभिक्षापात्ररूपकपालस्य रिक्तमुदरं दृष्ट्वा दीना, प्रियनवसङ्गमे प्रीतियुक्ता च पार्वत्याः दृष्टिर् युष्माकं कल्याणाय अस्तु इत्यर्थः । व्यभिचारिणोऽपि हि स्वैः स्वैरनुभावैः प्रकाश्यमानाम् तन्मयीभावयोग्या भवन्ति, ततश्च ते रसानुकूलौपयिका भवन्ति, स्वशब्देनोपादाने तु न तथेति रसभङ्गा भवतीतिभावः । रसभङ्गपरिहाराय पाठान्तरमुपदिशन्ति—**व्यानम्रे**त्यादि ॥उदा० ३९०॥

(२) ब्रह्मशब्देन ब्रह्मण इव रसशब्देन शृङ्गारादिशब्देन वा रसस्य लक्षणया प्रतिपादने दोषं निर्दिशन्ति—**रसस्य स्वशब्देने**त्यादिना ॥उदा० ३९०॥

[ख] आलोक्य कोमलकपोलतलाभिषिक्त-व्यक्तानुरागसुभगामभिरामर्न्दनम्।
पश्यैष बाल्यमतिवृत्य विवर्तमानः शृङ्गारसीमनि तरङ्गितमातनोति॥
उदा० ३९१ ॥

(३) स्थायिनो यथा—
सम्प्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
टणत्कारैः श्रुतिगतैरुत्साहस् तस्य कोऽप्यभूत् ॥उदा० ३९२॥

अत्रोत्साहस्य ।

(४) [अनुभावानां कष्टकल्पनया व्यक्तिर् यथा—]
कर्पूरधूलिधवलद्युतिपूरधौत-दिङ्मण्डले शिशिररोचिषि तस्य यूनः ।
लीलाशिरोंऽशुक-निवेश-विशेष-क्लृप्ति-व्यक्त-स्तनोन्नतिरभून्नयनावनौ सा ॥
उदा० ३९३ ॥

[क] रसशब्देन रसस्य लक्षणया प्रतिपादने दोषमुदाहरति—**तामनङ्गे**त्यादिना । कामस्य विजयमङ्गलक्ष्मीं किञ्चिदुच्चे स्तनमूले (नखक्षताद्यवलोकनाय) लोकिते यया ता नायिकां दृष्टवतोऽस्य युवकस्य अविच्छिन्नः कोऽपि अनिर्वचनीय. (शृङ्गारो) रस अजायतेत्यर्थः । विभावादिभिर् व्यञ्जनीयस्य रसस्य स्वशब्देनैवोपादाने सहृदयानां वैमुख्याद् दोषत्वं बोध्यम् ॥ उदा० ३९० ॥

[ख] रसस्य शृङ्गारशब्देनोपादाने दोषमुदाहरति—**आलोक्ये**त्यादिना । कोमलयो. कपोलतलयोः प्रतिष्ठितेन व्यक्तेन रिरंसाजन्येन रागेण शोभमाना सर्वाङ्गसुन्दरी नायिकामालोक्य बाल्यात् परा दशां प्राप्त. पुलकाञ्चितः कटाक्षादिभिश्चाऽयं नायकः शृङ्गाररसस्य पार्श्वे सविलास गतागतं करोति पश्येत्यर्थः । अत्र विभावादिभिर् व्यज्यमानोऽपि-रसः स्वशब्दोपात्त. सन् अपकृष्यते इति बोध्यम् ॥ उदा० ३९१ ॥

(३) स्थायिभावस्य स्वशब्देनोपादाने दोषमुदाहरति—**सम्प्रहारे** इत्यादिना । युद्धे आयुधै परस्परं क्रियमाणाना ताडनाना श्रुतै. टणत्कारैस् तस्य वीरस्य कोऽप्यनिर्वचनीय उत्साहोऽभूदित्यर्थ. । अत्र उत्साहस्य वीरस्थायिभावस्य स्वशब्देनोपादानाद् रसापकर्षः सहृदयहृदयसाक्षिक. । अत्र 'प्रमोदस्तस्य कोऽप्यभूत्' इति चतुर्थचरणपाठे दोषाभाव, 'स्थायिभावोऽस्य कोऽप्यभूत्' इति पाठे च सामान्यतः स्वशब्देन वाच्यताया उदाहरण स्यादिति बोध्यम् ॥ उदा० ३९२ ॥

(४) अनुभावाना कष्टया कल्पनया व्यक्तिमुदाहरति—**कर्पूरे**त्यादिना । चन्द्रे कर्पूरस्य चूल्या इव धवलायाः कान्त्याः समुदायेन उज्ज्वलीकृतं दिङ्मण्डलं येन तादृशे सति, लीलार्थस्य शिरोंऽशुकस्य निवेशविशेषस्य रचनया व्यक्ता स्तनयोः उन्नतिर् यस्याः सा नायिका तस्य युवकस्य नयनगोचरेऽभूदित्यर्थः । अत्र नायकगता अनुभावा साक्षाद् न प्रतीयन्ते किन्तु शृङ्गारयोग्येन चन्द्ररूपेणोद्दीपनविभावेन नायिकारूपेण आलम्बन-

अत्रोद्दीपनालम्बनरूपाः शृङ्गारयोग्या विभावा अनुभावपर्यवसायिनः स्थिता इति कष्टकल्पना ।

(५) [विभावानां कष्टकल्पनया व्यक्तिर् यथा—]

परिहरति रतिं मतिं लुनीते स्खलति भृशं परिवर्तते च भूयः ।
इति बत विषमा दशाऽस्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥उदा० ३९४॥

अत्र रतिपरिहारादीनामनुभावानां करुणादावपि सम्भवात् कामिनीरूपो विभावो यत्नतः प्रतिपाद्यः ।

(६,७) [प्रतिकूलविभावस्य ग्रहः, प्रतिकूलव्यभिचारिणो ग्रहश्च यथा—]

प्रसादे वर्तस्व प्रकटय मुदं सन्त्यज रुषं
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥ उदा० ३९५ ॥

अत्र शृङ्गारे प्रतिकूलस्य शान्तस्य अनित्यताप्रकाशनरूपो विभावस् तत्-प्रकाशितो निर्वेदश्च व्यभिचारी उपात्तः ।

(८) [प्रतिकूलानुभावग्रहो यथा—]

विभावेन च निमित्तेन कथञ्चित् कल्पन्ते, एवं च कष्टेन कल्प्यमानास्ते रसं सम्यङ् न व्यञ्जयन्तीति अनुभावानां कष्टकल्पनया व्यक्ती रसदोषः । अनुभावपर्यवसायिनः यथाकथञ्चिदनुभावाक्षेपकाः, न झटितीत्यर्थः ॥ उदा० ३९३ ॥

(५) विभावस्य कष्टकल्पनया व्यक्तिमुदाहरति—**परिहरतीत्यादिना** । अस्य पुरुषस्य विषमा अवस्था वस्तुस्पृहां दूरीकरोति, अर्थालोचनं व्यवच्छिनत्ति, भृशं स्खलयति, भूयो भूयः परिवर्तयति, एवम्प्रकारेण अस्य देहं हठाद् अवशं करोति, अत्र (निरुपाये) कथङ् किङ् कुर्म इत्यर्थः । अत्र कामिनीरूपस्य आलम्बनविभावस्य प्रकरण-बलादेव गम्यत्वाद् रसप्रतीतिर् विलम्बते इति दुष्टता ॥ उदा० ३९४ ॥

(६,७) प्रतिकूलविभावस्य ग्रहं प्रतिकूलव्यभिचारिणो ग्रहं च एकेनैव पद्येन उदाहरति—**प्रसादे वर्तस्वेत्यादिना** । चन्द्रकस्य कवेः पद्यमिदमिति शार्ङ्गधरपद्धतौ उक्तम् । प्रणयकुपितां नायिकां प्रति नायकस्योक्तिरियम् । हे विवेकरहिते मूढे, गतः कालरूपो हरिणो न परावर्तितुं शक्नोति; अत हे प्रिये, प्रसन्ना भव, हर्षं प्रकटय, कोपं त्यज, अमृतसदृशं तव वचनं तव कोपात् शुष्यन्ति मम अङ्गानि सिञ्चतु, मम सुखानाम् आकरमिव तव मुखं क्षणम् मदभिमुखं कुरु इत्यर्थः । अत्र प्रकृतशृङ्गार-विरोधिनः शान्तस्य विभावव्यभिचारिणोरुपादानं प्रकृतं शृङ्गारं विरसीकरोति निर्वेदानु-वेधमात्रेणापि रतेर् विच्छेदादिति दुष्टता बोध्या ॥ उदा० ३९५ ॥

णिहुअ-रमणम्मि लोअण-पहम्मि पडिए गुरुण मज्झम्मि ।
सअल-परिहार-हिअआ वण-गमणं एव्व महइ वहू ॥ उदा० ३९६ ॥

अत्र सकलपरिहार-वनगमने शान्तानुभावौ । इन्धनाद्यानयनव्याजेनोपभोगार्थं गमनं चेद् न दोषः ।

(९) दीप्तिः पुनः पुनः, यथा—कुमारसम्भवे रतिविलापे ।

(१०) अकाण्डे प्रथनम् यथा—वेणीसंहारे द्वितीयेऽङ्के अनेकवीरक्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णने ।

---

(८) प्रतिकूलविभावादिग्रहमुदाहरति—**णिहुअ-रमणम्मीत्यादि** । '**निभृत-रमणे लोचनपथे पतिते गुरूणां मध्ये । सकल-परिहार-हृदया वनगमनमेवेच्छति वधू**' इति संस्कृतच्छाया । गाथासप्तशत्या वेबरसम्पादितायां पद्यमिदम् (प० ९८७) । गुप्तकान्ते (जारे) गुरूणां मध्ये दृष्टिपथे आगते सति सकलस्य गृहकार्यस्य परित्यागे हृदयं यस्याः सा वधूः वनगमनमेव वाञ्छतीत्यर्थः । सर्वं परित्यज्य वनं प्रति व्रजनं परिव्राजः कार्यमिति सकलपरिहार-वनगमने इन्धनानयनादिव्याजोल्लेखरहिते शान्तानुभावौ तौ च प्रकृतं शृङ्गारं विच्छिन्त इति दुष्टता बोध्या । इन्धनानयनादिव्याजनिर्देशे सति तु सकलगृहकार्यत्यागपूर्वकं वनगमनमपि न शान्तानुभावत्वेन प्रतीयते इति न तत्र दोष इत्याह—इन्धनेत्यादिना ।। उदा० ३९६ ।।

(९) रसस्य पुनः पुनर् दीप्तिर्दोष इत्येव ग्रन्थाक्षरार्थः । गोविन्दठक्कुरस् तु अङ्गरसादीनामेव पुनः पुनर् दीप्तिर्दोषः, अङ्गिनां तु पुनः पुनर् दीप्तिर् न दोषो महाभारतादौ शान्तादेः पुनः पुनर् दीप्तौ अपि वैरस्याभावादिति मन्यते । वस्तुतस्तु शान्तो हि परमो रस इति यथा मन्त्रेषु न जामिता (पुनरुक्तिदोषः) ब्रह्मणो वा उपनिषत्सु बहुभिः प्रकारैः निरूपणेऽपि न वैरस्याधायकत्वं तथैव शान्तस्य पुनः पुनर् दीप्तावपि न दोषत्वम्, अन्येषां तु रसानाम् अङ्गिनामपि पुनः पुनर् दीप्तिरदोष एव । अत एव आनन्दवर्धनोऽपि—"पुनश्चायमन्यो रसभङ्गहेतुरवधारणीयो यत् परिपोषं गतस्यापि रसस्य पौनःपुन्येन दीपनम्, उपभुक्तो हि रसः स्वसामग्रीलब्धपरिपोषः पुनः पुनः परामृश्यमानः परिम्लानकुसुमकल्पः कल्पते" (३।१९ वृत्तौ) इत्येवाऽऽहस्म । रतिविलापः कुमारसम्भवे चतुर्थसर्गे द्रष्टव्यः ।

(१०) अनवसरे रसविशेषस्य प्रथनमपि रसभङ्गहेतुर् दोषः । यद्यपि "समीहा रतिभोगार्था विलासः स तु कीर्तितः" (ना०शा० १९।७६) इत्येवंलक्षणो विलासः प्रतिमुखसन्धेरङ्गत्वेनोक्तम् तथापि वेणीसंहारस्य द्वितीयेऽङ्के प्रतिमुखसन्धौ अस्य भरतमतस्याऽनुसरणायैव कृतं विलासरूपस्य भानुमत्या सह दुर्योधनस्य शृङ्गारस्य वर्णनं प्रकृतस्य वीररसस्याऽननुगुणमनवसरे एव प्रथितं दुष्टं बोध्यम्, सन्ध्यङ्गस्याङ्गघटनमपि प्रकृतरसानुपघातेनैव कार्यमिति । मुनिरपि आह हि—"इष्टस्यार्थस्य रचना वृत्तान्तस्याऽनुपक्षयः ।

(११) अकाण्डे छेदो यथा—वीरचरिते द्वितीयेऽङ्के राघवभार्गवयोः धाराधिरूढे वीररसे 'कङ्कणमोचनाय गच्छामि' (उदा० ३९७) इति राघवस्योक्तौ।

(१२) अङ्गस्य अप्रधानस्य अतिविस्तरेण वर्णनं यथा—हयग्रीववधे हयग्रीवस्य [वर्णनम्]।

(१३) अङ्गिनोऽननुसन्धानं यथा—रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाया विस्मृतिः।

रागप्राप्तिः प्रयोगस्य गुह्यानाञ्च निगूहनम् ॥ आश्चर्यवदभिख्यानं प्रकाश्यानां प्रकाशनम्। अङ्गानां षड्विधं ह्येतदुक्तं शास्त्रे प्रयोजनम् ॥ (ना०शा० १९।५१-५२) इति। आनन्दवर्धनोऽपि—"सन्धि-सन्ध्यङ्गघटनं रसाभिव्यक्त्यपेक्षया। न तु केवलया शास्त्रस्थितिसम्पादनेच्छया" (३।१२) इति सन्धिसन्ध्यङ्गोपनिषदनात्। दुर्योधनस्य शृङ्गारवर्णनम्" इति मम्मटप्रयोगोऽसमर्थसमासत्वाद् दुष्टः, दुर्योधनस्य शृङ्गारस्य कविकृतं वर्णनं ह्यत्राभिप्रेतम्।

(११) प्रकृतरसोपघातकतया अनवसरे रसस्य च्छेदो दुष्टः, स च यथा महावीरचरिते द्वितीयेऽङ्के राघव-भार्गवयोः धारावाहिनि वीररसे प्रतिपादिते सति तदुचितं व्यवहारमकस्मादुत्सृज्य "देव्यः कङ्कणमोचनाय मिलिता राजन् वरः प्रेष्यताम्" (२।५०) इति कञ्चुक्युक्तिं श्रुत्वा जनकशतानन्दाभ्यां "वत्स रामभद्र श्वश्रूजनस्त्वामाह्वयति, तद् गम्यताम्" इत्युक्ते वैवाहिकमङ्गलसूत्रविसर्जनरूपाय लौकिकाय उत्सवविशेषाय यियासोः जामदग्न्यात् पलायितुकामस्येव रामस्य ("जामदग्न्य, एवमादिशन्ति गुरवः" इति वाक्येन ध्वनितायाः 'कङ्कणमोचनाय गच्छामि' इत्युक्तौ।

(१२) अङ्गस्यातिविस्तृतेरुदाहरणत्वेन तु हयग्रीववधमहाकाव्यस्य इदानीमनुपलभ्यमानत्वाद् विश्वनाथेन एतद्दोषोदाहरणत्वेनोक्तं किरातार्जुनीयाष्टमसर्गवर्णितं सुराङ्गनाविलासादि आलोचनीयम्। "वंश-वीर्य-श्रुतादीनि वर्णयित्वा रिपोरपि। तज्जयाद् नायकोत्कर्षकथनं च धिनोति नः" (काव्यादर्श=१।२२) इत्युक्तावपि प्रतिनायकस्यातिविस्तरेण वर्णनं दोष एवेत्यपि मम्मटाभिप्रायं वर्णयन्ति श्रीधरादयः।

(१३) अङ्गिनोऽननुसन्धानस्योदाहरणं यथा रत्नावल्यां चतुर्थेऽङ्के सिंहलेश्वरकञ्चुकिनो बाभ्रव्यस्य सिंहलेश्वरामात्यस्य वसुभूतेश्च आगमने राज्ञा उदयनेन नायकेन रत्नावलीनाम्न्याः सागरिकाया नायिकाया विस्मृतिः, ततश्च नाटिकाप्रतिपाद्यः शृङ्गारो रसो विच्छिन्नप्राय इति मम्मटोक्तेरर्थः प्रतिभाति। वस्तुतस्तु सम्प्रति उपलभ्यमानायां रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमनात् प्रभृति सागरिकावार्ता प्रचलत्येव; सागरिकां त्रातुमग्निमपि प्रवेष्टुं राजा स्वयमेव उद्यतो भवतीति च नास्ति मम्मटोक्तिरसङ्गतिः। श्रीधरादयस्तु टीकाकारा विजयवर्मवृत्तान्ताकर्णने हृदयं दत्तवतो वत्सराजस्य सागरिकाविस्मृतिं वर्णयन्ति। बाभ्रव्यागमनात् पूर्वं विजयवर्मागमनात् प्रभृति इन्द्रजालदर्शनवृत्तान्तं यावद् विजयवर्मवृत्तान्ताकर्णने इन्द्रजालदर्शने च हृदयं दत्तवता राज्ञा सागरिकाया

(१४) प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च; वीर-रौद्र-शृङ्गार-शान्त-रसप्रधाना धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्ता., उत्तमाऽधममध्यमाश् च। तत्र रति-हास-शोकाऽद्भुतानि अदिव्योत्तमप्रकृतिवद् दिव्येष्वपि; किन्तु रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया; तद्वर्णनं हि पित्रोः सम्भोगवर्णनमिवाऽत्यन्तमनुचितम्। "**क्रोधं प्रभो संहर संहरेति यावद् गिरः खे मरुतां चरन्ति। तावत् स वह्निर् भवनेत्रजन्मा भस्मावशेषं मदनं चकार**" (उदा० ३९८) इत्युक्तवद् भ्रुकुट्यादिविकारवर्जितः सद्यः फलदः क्रोध, स्वर्ग-पाताल गमन-समुद्रोल्लङ्घनाद्युत्साहश्च दिव्येष्वेव; अदिव्येषु तु यावद-वदानप्रसिद्धमुचितं वा तावदेवोपनिबन्धव्यम्; अधिकं तु निबध्यमानमसत्य-प्रतिभासेन 'नायकवद् वर्तितव्यं न [illegible]' इत्युपदेशेन पर्यवस्येत्। दिव्यादिव्येषु उभयथापि। [illegible] दिव्यादानामिव धीरोदात्ता-दीनाम् अन्यथावर्णनं विपर्ययः। तत्र भवन् भगवन्निति उत्तमेन, न अधमेन, मुनिप्रभृतौ, न राजादौ; भट्टारकेति न राजादौ परमेश्वरेति न मुनिप्रभृतौ प्रकृतिविपर्ययापत्तेर् वाच्यम्। एवं [illegible] वेषव्यवहारादिक समुचितमेवोपनिबन्धव्यम्।

विस्मरणात् तु रसविच्छेदः प्रतीयते। एवञ्च बाभ्रव्यागमने भविष्यति सतीति कष्टेन मम्मटोक्तिसङ्गतिः कार्या। अत्र च दुष्टैव खलुमम्मटशैली।

(१४) आनन्दवर्धनेन प्रबन्धस्य रसादिव्यञ्जकताया निरूपणस्य प्रसङ्गे प्रतिपादितस्य प्रकृत्यौचित्यस्य (३।१० वृत्तौ) विपर्ययं [illegible] रसदोषं निरूपयति—**प्रकृतय** इत्यादिना। प्रकृतिः रसाभिव्यक्तिमूलभूतो विभावः। स च द्विविधः—आलम्बनविभावः उद्दीपनविभावश्च। तत्र नायकादिः प्रथमः। देशकालादिर् द्वितीयः। तत्र पितृप्रधान-कुटुम्बके भारतवर्षे प्रबन्धेषु नायकाना प्राधान्यात् तत्स्वरूपगुणादिविज्ञाने तद्वैगुण्य परिहरणीयं परिचितं स्यादिति नायकभेदान् प्रदर्शयति—**दिव्या अदिव्या** इत्यादिना। यस्य चरितं सर्वथाऽपि उत्तानं लघु अहृदयस्पर्शि च न स नायको विनेयहृदये सम्यक् प्रभावं कुर्यादिति गम्भीरेण महता हृदयस्पर्शिना च चरित्रेण युक्ता महासत्त्वा धीरा एव [illegible] इति सर्वेऽपि नायका धीरा एव। तत्रापि रसविशेषप्रवण-त्वाद् धीरोदात्तादयश्चतुर्विधा नायकाः तेऽपि गुणोत्कर्षाऽपकर्ष-तन्माध्यस्थ्यैस्त्रिविधाः। एवञ्च षट्त्रिंशद् नायकभेदाः। तत्रापि धीरललितास्तु [illegible] भिद्यन्ते इति द्वासप्ततिर् नायकभेदाः। एवमेव नायिकाप्रकारादयोऽपि यथायथं साहित्य-दर्पणादिभ्योऽवगन्तव्याः। तत्र प्रकृत्यौचित्यदिक्प्रदर्शनायाह—**तत्र रति-हासे**त्यादि। यदि देवतालम्बना देवानां रतिरपि रसो भवति तर्हि सम्भोगेनैव किमपराद्धं स्यात्? देवतयोः सम्भोगात्मिका रतिर् यदि न रसीभवति तर्हि रसाभासनिरूपणे सा वाच्या

(१५) अनङ्गस्य रसानुपकारकस्य **वर्णनं** यथा कर्पूरमञ्जर्यां नायिकया स्वात्मना च वसन्तस्य वर्णनमनादृत्य वन्दिवर्णितस्य राज्ञा प्रशंसनम् ।

रसादिरत्रावधानं देयं सुधीभिः । धीरोदात्तादिप्रकृत्यौचित्यमपि सर्वथानुसरणीयमित्याह—**एवमुक्तस्यौचित्यस्ये**त्यादिना । तत्र धीरोदात्तादिषु क्रमेण सात्वत्यारभटीकैशिकीभारती-वृत्तीनां प्राधान्यं वर्णनीयम् । एते च धीरोदात्तादिशब्दाः यथोक्तगुणसम्पत्तिनिबन्धनाभि-धायिनो वस्तुस्वरूपमात्रेऽवस्थितिद्योतकाः, न तु ब्राह्मणादिरिव जात्या कश्चिद् व्यवस्थित-रूपो धीरोदात्तादिरस्ति । इतरथा महाकविप्रबन्धेषु विरुद्धानेकरूपाभिधानमसङ्गतमेव स्याद्, जातेरनपायित्वात् । तथा च भवभूतिना एक एव जामदग्न्यो "ब्राह्मणातिक्रम-त्यागः" इत्यादिना (म० वी० च० २।१०) रावणं प्रति धीरोदात्तत्वेन "कैलासोद्धार-सारत्रिभुवनविजये" इत्यादिना (म० वी० च० २।१३) रामादीन् प्रति प्रथमं धीरोद्धत-त्वेन, "पुण्या ब्राह्मणजातिः" (म० वी० च० ४।२२) इत्यादिभिश्च धीरशान्तत्वेनोप-वर्णितः । न चाऽवस्थान्तराभिधानमनुचितम्, अङ्गभूतनायकानां नायकान्तरापेक्षया महासत्त्वभावादेरव्यवस्थितत्वात् । अङ्गिनस्तु रामादेरेकप्रबन्धोपपन्नात् प्रत्येकरूप-त्वाद् आरम्भोपात्तावस्थातोऽवस्थान्तरोपादानमन्याय्यं यथा धीरोदात्तत्वेना-ऽभिमतस्य रामस्य च्छद्मना वालिवधाद् असद्भावत्वतयः अवस्थापरित्यागः इति धनिक—(द० रू० अ० २।५) श्रीधरादयः । भाषाप्रयोगेऽपि प्रकृतिविशेषौचि-त्यस्य दिक्प्रदर्शनं कर्तुमाह—**तत्र भवन्नि**त्यादि । तत्र भवन्, भगवन् इति उत्तम-प्रकृतिना मुनिप्रभृतौ एव वाच्यम् न तु राजादौ; मुनिप्रभृतावपि अधमप्रकृतिना तु न वाच्यम् । एवमुत्तमप्रकृतिनाऽपि भट्टारकेति राजादौ न प्रयोक्तव्यम् परमेश्वरेति मुनि-प्रभृतौ च न वाच्यम् । अभिनेयार्थकाव्यविषयेऽन्यत्रप्रायो मौनमवलम्बमानोऽप्ययं ग्रन्थ-कारोऽत्र प्रायेणाभिनेयार्थकाव्यविषयकं सम्बोधनप्रयोगनियमं प्रदर्शितवान् । एतद्विषये-ऽधिकं जिज्ञासुभिः नाट्यशास्त्रस्योनविंशोऽध्यायः, दशरूपकावलोकः (२।६३–६६) साहित्यदर्पणस्य षष्ठः परिच्छेदः (श्लो० १४४–१५६) भावप्रकाशनस्य नवमोऽधिकारो वा पर्यालोचनीयः । उद्दीपनविभावौचित्यदिक्प्रदर्शनायाऽऽह—**एवं देशकाले**त्यादि । देशौ-चित्यज्ञानाय काव्यमीमांसायाः सप्तदशोऽध्यायस्तथाऽन्ये भावप्रकाशादयश्च ग्रन्था अध्येतव्याः । कालविभागज्ञानायापि काव्यमीमांसाया अष्टादशोऽध्यायस्तथाऽन्ये च ग्रन्थाः पठनीयाः ।

(१५) रसानुपकारकस्य वर्णनादपि रसोऽपकृष्यते इति तादृशं वर्णनमपि रसदोषः । तत्रोदाहरणमाह—यथा कर्पूरमञ्जर्यामित्यादिना । प्रथमजवनिकान्तरे द्वादशात् पद्यात् पश्चाद् 'देवि दक्खिणावहणरिंदणंदिनि' इत्यादिना राज्ञा कृतस्य, त्रयोदशात् पद्यात् पश्चाद् 'देव अहं वि तुज्झ' इत्यादिना देव्या कृतस्य च वसन्तवर्णनस्याऽनादरं कृत्वा षोडशात् पद्यात् पश्चात् 'पिए विब्भमलेहए, एक्को अहं बड्ढावओ तुज्झ, एक्का तुमं बड्ढाविआ मज्झ । किं उण दुवे वि अम्हे बड्ढाविआ कंचणचंड-रअणचंडेहिँ वंदीहिँ' इति वन्दिकृतस्य वसन्तवर्णनस्य राज्ञा प्रशंसनम्; देव्या अपि—'जधा किल निवेदिदं

(१६) ईदृशा इति नायिकापादप्रहारादिना नायककोपादिवर्णनम्। उक्तं हि ध्वनिकृता—"अनौचित्याद् ऋते नाऽन्यद् रसभङ्गस्य कारणम्। प्रसिद्धौचित्यबन्धस् तु रसस्योपनिषत् परा" इति (ध्व० आ० वृ० ३।१४)।

इदानीं क्वचिददोषा एते इत्युच्यते—

(सू० ८४) **न दोष स्वपदेनोक्तावपि सञ्चारिण क्वचित्।**

यथा—

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस् तैर् बन्धुवधूजनस्य वचनैर् नीता [illegible] पुन.।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे
संरोहत्-पुलका हरेण हसता श्लिष्टा शिवायाऽस्तु व ॥उदा० ३९९॥

वंदीहिँ' इत्यादिना तत्प्रशंसनं प्रकृतस्य रसस्य उपकारविशेषाकरणाद् दुष्टमिति भाव.। 'नायिकया स्वात्मना च वसन्तस्य वर्णनम्' इत्यत्र 'वन्दिवर्णितस्य राज्ञा प्रशंसनम्' इत्यत्र च कर्तरि तृतीया भाष्योदाहरणस्वरसप्रतिकूला (२।३।६६–३)। केषाचिद् मते तु साध्वी एव सा, तथा च जयादित्य—"केचिदविशेषेणैव [illegible] इच्छन्ति — [illegible]शासनमाचार्येण आचार्यस्य वा" इति (काशिका २।३।६६)।

(१६) कारिकायां "रसे दोषाः स्युरीदृशाः" इति सूचितदिक्प्रदर्शनं [illegible]—**ईदृशा इतीत्यादिना**। एतादृशा अन्येऽपि अनौचित्यमूला रसदोषाः स्वयं परिचित्य परिहरणीया इति भाव.। रसदोषमूलं ध्वनिकृन्मतमाह—**अनौचित्यादित्यादिना**। रसदोषपरिहाररहस्यञ्चाह—**प्रसिद्धौचित्यमित्यादिना**।

रसदोषान् निरूप्य तदपवादमाह—**इदानीं क्वचिदित्यादिना**।

यत्र अनुभावोपादानेन सञ्चारिणो न सम्यगभिव्यक्तिस् तत्र सञ्चारिणः स्वपदेनोक्तौ सम्यगभिव्यक्तिर् भवति चेत् सञ्चारिणः स्वपदेनोक्तावपि न दोषो भवतीत्यभिप्रेत्याह—**न दोषः स्वपदेनोक्ताविन्यादि**। [illegible] —**औत्सुक्येनेत्यादिना**। रत्नावल्यां मङ्गलाचरणपद्यमिदम्। नवे पतिसङ्गमे उत्सुकतया कृतत्वरा, स्वाभाविकया लज्जया पुनः पुनर् व्यावर्तमाना, पुनस् तत्कालोचितैर् भ्रातृजायादि-बन्धुवधूजनवचनैः पुन पत्युराभिमुख्यं प्रापिता, अग्रे पतिं दृष्ट्वा सम्भ्रम प्राप्ता, अथ च हरेण हसता आश्लिष्टा उद्गच्छद्रोमाञ्चा गौरी युष्माकं कल्याणाय भवतु इत्यर्थः। अत्र औत्सुक्यस्य सञ्चारिणः स्वपदेन उक्तावपि अदोषतामुपपादयति—**अत्र औत्सुक्यशब्द** इत्यादिना। औत्सुक्यस्य अनुभावैः सम्यग् अनभिव्यञ्जनीयत्वं स्फुटीकर्तुमुदाहरणान्तरमाह—**अत एव "दूरादुत्सुकम्"** (उदा० ७०) इत्यादिना। सहसाप्रसरणादिरूपस्य औत्सुक्यानुभावस्य स्फुटतया औत्सुक्यव्यञ्जकत्वस्य अभावाद् दूरादुत्सुकमित्यादौ अपि स्वपदेनैव औत्सुक्यस्योपादानं कृतमित्यर्थ.। तत्र विवलितत्वादयो व्रीडाप्रेमाद्यनुभावा यथा व्रीडाप्रेमादीन् भावान्

अत्र औत्सुक्यशब्द इव तदनुभावो न तथा प्रतीतिकृत्। अत एव "दूरादुत्सुकम्" इत्यादौ (उदा० ४००) व्रीडाप्रेमाद्यनुभावानां विवलितत्वादीनामिवोत्सुकत्वानुभावस्य सहसाऽप्रसरणादिरूपस्य तथाप्रतीतिकारित्वाभावाद् उत्सुकमिति कृतम्।

(सू० ८५) **सञ्चार्यादेर् विरुद्धस्य बाध्यस्योक्तिर् गुणावहा ॥ ६२ ॥**

बाध्यत्वेनोक्तिर् न परं न दोषो यावत् प्रकृतरसपरिपोषकृत्।

यथा—

'क्वाऽकार्यं शशलक्ष्मण. क्व च कुलम्' इत्यादौ (उदा० ४०१)

अत्र वितर्कादिपूद्गतेष्वपि चिन्तायामेव विश्रान्तिरिति प्रकृतरसपरिपोषः।

"**पाण्डु क्षामं वक्त्रं हृदयं सरसं तवालसं च वपुः। आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः.**" (उदा० ४०२) इत्यादौ साधारणत्वं पाण्डुतादीनामिति न विरुद्धम्।

स्फुटतया व्यञ्जयन्ति न तथा सहसाप्रसरणादि. औत्सुक्यमिति बोध्यम्। रति सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीयेत्युक्तत्वात् इदमुदाहरणं किमित्युपन्यस्तम् ॥ उदा० ३९९ ॥

वाच्यस्य तु प्रकृतरसविरुद्धस्यापि सञ्चार्यादेः उक्ति. न केवलम् अदोषः, किन्तु प्रकृतरसपरिपोषकत्वाद् गुण एवेत्याह—**सञ्चार्यादे**रित्यादिना। उदाहरति—**क्वाकार्य**मित्यादिना। व्याख्यातमिदं प्राक् (उदा० मङ्—९४)। अत्र चतुर्णां पादानां पूर्वैः भागैः प्रतिपादितानां शान्तसञ्चारिणां वितर्क-मति-शङ्का-धृतीनाम् उत्तरैर् भागैः प्रतिपादितैः औत्सुक्य-स्मरण-दैन्य-चिन्ताभिर् बाधात् परिपुष्टायां चिन्तायामेव काव्यस्य पर्यवसानमिति प्रकृतविप्रलम्भशृङ्गारपरिपोषो भवतीति अत्र शृङ्गारविरोधिन. शान्तस्य सञ्चारिणां बाध्यत्वेनोक्तिर् गुण एवेत्याह—**अत्रवितर्कादिष्वि**त्यादिना ॥ उदा० ४०१ ॥

ननु ध्वनिकारेण "विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम्। बाध्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला" (३।२०) इत्युक्त्वा विरोधिनोऽप्यङ्गिनोऽङ्गभावं प्राप्तानामुक्तेः अदुष्टत्वे उदाहरणं 'पाण्डु क्षामम्' इत्यादि उपन्यस्तम् तत् कथ त्वया अङ्गभावं प्राप्तस्य अङ्गिना सह अविरोधो रसदोषापवादत्वेन न प्रतिपाद्यते इत्यत्र आह—**पाण्डु क्षामं वक्त्र**मित्यादि। हे सखि, तव पाण्डु क्षामं च वदनम्, आर्द्रं हृदयम्, अलसं शरीरं च तव हृदयस्याऽन्तर् वर्तमानं शरीरान्तरं प्राप्यैव चिकित्सितुं शक्यं रोगं निश्चिततया आवेदयतीत्यर्थः। अत्र पाण्डुतादीना विप्रलम्भशृङ्गाराङ्गत्वमपीति पाण्डुतादीनां प्रकृतेन शृङ्गारेण सह विरोध एव नास्तीति नास्ति अङ्गभावप्राप्तिप्रदर्शनद्वारकाविरोधप्रदर्शनप्रयासावश्यकतेति सम्मटस्याशयः। अभिनवगुप्तस्तु अत्र करुणोचितो व्याधिः (क्षेत्रियः) श्लेषभङ्ग्या स्थापित इति करुणोचितस्यापि व्याधेः शृङ्गाराङ्गत्वाद् विरोधपरिहारेणादुष्टत्वमिति मन्यते ॥ उदा० ४०२ ॥

"सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः। किन्तु मत्ताङ्गनापाङ्ग-भङ्गलोलं हि जीवितम्" (उदा० ४०३) इत्यत्राऽपिआद्यमर्धं वाध्यत्वेनैवोक्तम्। जीवितादपि अधिकम् अपाङ्गभङ्गस्य अस्थिरत्वमिति प्रसिद्धभङ्गुरोपमान-तयोपात्तं शान्तमेव पुष्णाति, न पुनः शृङ्गारस्याऽत्र प्रतीतिस् तदाङ्गा-ऽप्रतीतेः; न तु विनेयोन्मुखीकरणमत्र परिहारः, शान्तशृङ्गारयोर् नैरन्तर्यस्या-ऽभावाद्; नाऽपि काव्यशोभाकरणम् रसान्तराद् अनुप्रासमात्राद् वा तथाभावात्।

ननु ध्वनिकारेण "विनेयानुन्मुखीकर्तुं काव्यशोभार्थमेव वा। तद्विरुद्धरससंस्पर्शस् तदङ्गाना न दुष्यति" (३।३०) इत्यादिना विरोधिनि रसे शृङ्गाराङ्गसमावेशो न विरोधीति उक्तम्: तस्य च त्वया रसदोषापवादत्वेन अप्रतिपादनाद् न्यूनतेत्यत्राह— **सत्यं मनोरमे**त्यादि। सुन्दर्योऽवश्यमेव मनोहराः, ऐश्वर्याणि अपि अवश्यमेव रम्याणि, किन्तु मनुष्याणां जीवितं मत्तानाम् अङ्गनानां कटाक्षेण तुल्यं चञ्चलम् इत्यर्थः। अत्र ध्वनिकारोक्ते उदाहरणे आद्यमर्धं वाध्यत्वेनैवोक्तम् इति नाऽङ्गतया तस्य अविरोधित्वम्, किन्तु वाध्यतयैव तस्याऽविरोधित्वम्; अतो नास्ति न्यूनतेत्याशयः। उपमाने सामान्य-धर्माधिक्यस्य प्रतीतेः मत्ताङ्गनापाङ्गानां भङ्गुरत्वं जीवितस्य भङ्गुरत्वादपि अधिकमिति तदपि निर्वेदहेतुरेवेति तस्यापि शान्ताङ्गतैव न शृङ्गाराङ्गतेति तद् "विरोधिनि रसे शृङ्गाराङ्गसमावेशो न विरोधी" इत्यस्योदाहरण भवितुं नार्हतीतिभावः। अत्र यद्यपि आस्वादे शान्त-शृङ्गारयोर् न नैरन्तर्यम्, तथापि आपाततः प्रतीतमपि प्रियं शृङ्गार-मादाय विनेयो जनः शास्त्रकाव्ये प्रवर्तिष्यते; पश्चात् तु तस्य शान्तास्वादप्रियता स्यात् ततः पूर्वमापाततः प्रतीतं शृङ्गाराङ्गमपि शान्ताङ्गतयैव परिणतं भविष्यतीति कविना शान्तेऽपि शृङ्गाराङ्गाण्यपि युक्त्या प्रयोक्तव्यानीति [illegible] गूढोऽभिसन्धिः कथं [illegible] गेनाऽपि मम्मटेन नाऽऽकलित इति न विद्मः। शोभा हि मनोहारित्वम्, एव च आपाततः शृङ्गाराङ्गत्वेन प्रसिद्धानां पदार्थानां [illegible] निवेशनेनाऽपि काव्यस्य शृङ्गारिजनमनोहारित्वं कर्तुं शक्यते इति चोपदेशः कविशिक्षागुरोरानन्दवर्धनस्य माननीय एवेति मम्मटस्य **नापि काव्यशोभाकरण-मित्यादि** वचनमपि रिक्तमेव प्रतिभाति। [illegible] शान्ताद् मत्ताङ्गनापाङ्गभङ्गलोलमित्यत्र वर्तमानाद् अनुप्रासमात्राद् वापि अस्य काव्यस्य शोभायाः समुदयाद् नाऽत्र काव्यशोभार्थं शृङ्[illegible] मम्मट-जल्पितार्थः। "प्राक्प्रतिपादितस्वरूपस्य रसस्य रसान्तरेण न विरोधो नाप्यङ्गाङ्गिभावो भवतीति रसशब्देनाऽत्र तत्-स्थायिभाव उपलक्ष्यते" इति वक्ष्यमाणोऽपि अत्र ध्वनि-कारप्रयुक्तशृङ्गाराङ्गशब्दोपलक्षितेऽर्थविशेषेऽवधानं न दत्ते इति मम्मटस्य पुरोभागिताऽत्र स्फुटा॥उदा० ४०३॥

(सू० ८६) **आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः।**
रसान्तरेणान्तरितो नैरन्तर्येण यो रसः ॥६३॥

वीर-भयानकयोः एकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयितव्यः। शान्त-शृङ्गारयोस्तु नैरन्तर्येण विरोध इति रसान्तरमन्तरे कार्यम्, यथा नागानन्दे शान्तस्य जीमूतवाहनस्य 'अहो गीतम् अहो वादित्रम्' (उदा० ४०४) इत्यद्भुतम् अन्तर् निवेश्य मलयवतीं प्रति शृङ्गारो निबद्धः। न परं प्रबन्धे, यावद् एकस्मिन्नपि वाक्ये रसान्तरव्यवधिना विरोधो निवर्तते; यथा—

भूरेणुदिग्धान् नव-पारिजात-मालारजोवासितबाहुमध्याः।
गाढं शिवाभिः परिरभ्यमाणान् सुराङ्गनाश्लिष्टभुजान्तरालाः॥
सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान्।
संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः कल्पलतादुकूलैः॥
विमानपर्यङ्कतले निषण्णाः कुतूहलाविष्टतया तदानीम्।
निर्दिश्यमानान् ललनाङ्गुलीभिर् वीराः स्वदेहान् पतितानपश्यन्॥(उदा०४०५)

रसदोषापवादान्तरमाह—**आश्रयैक्ये विरुद्ध** इत्यादिना। रसदोषापवादप्रकरणमिदमिति उपक्रान्ता शैली च अनुपालनीयेति च अस्याः कारिकायाः—"आश्रयैक्ये विरुद्धोऽपि न तथा भिन्नसंश्रयः। रसान्तरेणान्तरितो नैरन्तर्येण यः पुनः" इति पाठो युक्ततरः। वृत्तिपाठोऽपि तदनुकूलतयैव नेतव्यः। यो रस आश्रयस्य ऐक्ये सति रसान्तरेण विरुद्धो भवति सोऽपि आश्रयस्य भेदे सति तेन विरुद्धो न भवतीति अदुष्ट एव भवति, यो रसो नैरन्तर्ये सति रसान्तरेण विरुद्धो भवति सोऽपि रसान्तरेण व्यवधाने सति विरुद्धो न भवतीत्यर्थो विवक्षितो बोध्यः। वृत्तिग्रन्थः स्फुटः। न केवल महावाक्यरूपे प्रबन्धे किन्तु एकस्मिन्नपि वाक्ये रसान्तरव्यवधाने सति विरोधिनोः रसयोर् विरोधो निवर्तते इत्यत्रोदाहरणमाह—**भूरेणुदिग्धा**नित्यादि। ध्वन्यालोके (३।२७ वृत्तौ) उदाहृतानि पद्यानीमानि। विशेषकं चेदम्। तथाचाहुः—"द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः पादैर् विशेषकम्। कलापकं चतुर्भिस् स्यात् तदूर्ध्वं कुलकं स्मृतम्" इति। युद्धे देहस्य त्यागात् सद्यः स्वर्गं गताः, देवभावेन तदेव युद्ध द्रष्टुमागता वीराः केचन विमान-पर्यङ्कतले निषण्णा नवपारिजातमालारजोवासितबाहुमध्याः सन्तः स्वर्लोकसुन्दरी-जनाङ्गुल्या निर्दिश्यमानान् पतितान् रजसा समुक्षितान् स्वदेहान् कुतूहलाविष्टतया तदानीमपश्यन्; अन्ये पुनः केचन तादृशा वीरा सुराङ्गनाश्लिष्टवक्षसः सन्तः तादृशान् शृगालीभिर् गाढमालिङ्गितान् स्वदेहान् अपश्यन्; अन्ये पुन. केचन तादृशा वीराः चन्दनवारिसेकयुक्तैः सुगन्धवद्भिः कल्पवृक्षप्रसूतैः दुकूलैः संवीजिताः सन्तः तादृशान् रक्तक्लिन्नैः फटफटायमानैः मांसाशिनां गृध्रादीनां पक्षिणां पक्षैरुपवीज्यमानान् पतितान् स्वदेहानपश्यन्नित्यर्थः। अथवा विमानपर्यङ्कतले निषण्णा नवपारिजातमालारजोवासित-

अत्र बीभत्स-शृङ्गारयोर् अन्तर् वीररसो निवेशितः ।

(सू० ८७) **स्मर्यमाणो विरुद्धोऽपि साम्येनाऽथ विवक्षितः ।**
अङ्गिन्यङ्गित्वमाप्तौ यौ तौ न दुष्टौ परस्परम् ॥६४॥

यथा—

(१) अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ उदा० ४०६ ॥

एतद् भूरिश्रवस समरभुवि पतितं हस्तमालोक्य तद्वधूरभिदधौ । तत्र पूर्वावस्थास्मरणं शृङ्गाराङ्गमपि करुणं परिपोषयति ।

(२) **दन्तैः** क्षतानि करजैश्च विपाटितानि
प्रोद्भिन्नसान्द्रपुलके भवतः शरीरे ।

बाहुमध्या, [illegible] चन्दनवारिसेकैः सुगन्धिभिः कल्पलतादुकूलैः संवीजिता वीरा ललनाङ्गुलीभिर् निर्दिश्यमानान् स्वदेहान् तदानीं कुतूहलाविष्टतया अपश्यन्नित्यन्वयः । अत्र शिवाभिर्भुज्यमानशवशरीरलक्षणविभाववर्णनप्रकाशितस्य बीभत्सस्य सुराङ्गनालिङ्गनवर्णनप्रकाशितस्य शृङ्गारस्य च मध्ये यद्यपि वीररसप्रकाशकं किमपि न पठितं तथापि वीराः इति सर्ववाक्यान्वयित्वेन प्रतीतस्य वीररसस्य सत्त्वात् तेन व्यवधानाद् बीभत्सशृङ्गारयोरविरोधः । स्वदेहानिति स्वर् गतानामपि पूर्वदेहाभिमानवर्णनादाश्रयैक्येऽपि रसान्तरव्यवधानकृतस्य विरोधिनोरपि रसयोरविरोधस्येदमुदाहरणम् । अथ वीर एवाऽत्र रसो न पुनः शृङ्गारो न वा बीभत्सः, किन्तु वीरं प्रति रति-जुगुप्से व्यभिचारिभूते, तत् कुतोऽत्र विरोध इति चेत् ? सत्यम्, भवत्वेवम्, किन्त्वेवमपि उदाहरणत्वमत्रोपपन्नमेव शृङ्गार-बीभत्सस्थायिनोर् विरोधाद् इति लोचनकारादयः ॥उदा० ४०५॥

रसदोषापवादान्तरमाह—**स्मर्यमाण** इत्यादिना । प्रकृतरसविरुद्धोऽपि प्रकृतरसपरिपोषकतया स्मर्यमाणः सन् अदुष्टो भवति; श्लेषेण उपमानतया वा प्रकृतरसेन सह साम्येन विवक्षितः सन् प्रकृतरसविरुद्धोऽपि रसो न दुष्टो भवति; अविरोधिनि अङ्गिनि अङ्गत्वं प्राप्तौ तु परस्परं विरुद्धावपि रसौ दुष्टौ न भवत इत्यर्थः ॥ ६४ ॥

(१) तत्र प्रकृतरसविरुद्धमपि प्रकृतरसपरिपोषकत्वेन स्मर्यमाणतया अदुष्टं रसमुदाहरति—**अयं स रसनोत्कर्षी**त्यादिना । व्याख्यातमिदं पद्यं प्राक् (उदा० १५५) । अत्र करुणे वाक्यार्थीभूते प्राग् अनुभूताः स्मर्यमाणा विलासाः शोकावेगमधिकतरं जनयन्तीति सम्भोगाङ्गानामपि एतेषां करुणं प्रति अनुकूलत्वाद् [illegible] । सत्यं मनोरमा (उदा० ४०३) इत्यादौ शृङ्गारप्रतीतिर् नास्तीति अभिनिविशमानेन मम्मटेन कथमत्राऽपि शृङ्गाराङ्गं नास्ति स्मर्यमाणस्य विलासादेरत्र शृङ्गाराङ्गत्वाभावात् प्रत्युत तस्य करुणाङ्गत्वादेवेति नोक्तमिति न विद्मः ॥ उदा० ४०६ ॥

दत्तानि रक्तमनसा मृगराजवध्वा
जातस्पृहैर् मुनिभिरप्यवलोकितानि ।।उदा०४०७।।

अत्र कामुकस्य दन्तक्षतादीनि यथा चमत्कारकारणानि तथा जिनस्य, यथा चापर शृङ्गारी तदवलोकनात् सस्पृहम् तद्वद् एतद्द्रष्टारो मुनय इति साम्य-विवक्षा।

(३–क) क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः पातितयावकैरिव गलद्वाष्पाम्बुधौताननाः ।
भीता भर्तृकरावलम्बितकरास्त्वद्वैरिनार्योऽधुना
दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ।। उदा० ४०८ ।।

अत्र चाटुके राजविषया रतिः प्रतीयते। तत्र करुण इव शृङ्गारोऽप्यङ्गमिति तयोर् न विरोधः; यथा—"**एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर। एवमाशा ग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभि**" (उदा० ४०९) इत्यत्र एहीति क्रीडन्ति गच्छेति क्रीडन्तीति क्रीडनापेक्षयो आगमन-गमनयोर् न विरोधः।

---

(२) साम्येन विवक्षितस्य प्रकृतविरोधिनोऽपि रसस्य अदुष्टत्वमुदाहरति—**दन्तैः क्षतानी**त्यादिना। बोधिसत्त्वं प्रति कस्यचिच् चाटूक्तिरियम्। हे जिन! (सिंह्यै दयया स्वशरीरं दत्तवतः) तव उद्गतनिबिडरोमाञ्चे शरीरे, रक्ते मनो यस्यास् तया मृगराजवध्वा (सिंह्या) दत्तानि दन्तैः कृतानि क्षतानि, नखरैः कृतानि विपाटितानि च वयमप्येवंविधा दयालवो भूयास्मेति जातस्पृहैर् मुनिभिरपि अनुरक्तचित्तया मृगाख्य-पुङ्गातिविशेषनृपमहिष्या दत्तानि दन्तैः कृतानि क्षतानि करजैः कृतानि विपाटितानि च वयमपि एवं राजमहिषीकामिता भूयास्मेति जातस्पृहैः पारदारिकैः पुरुषैरिव अवलोकितानीत्यर्थः। अत्र उपमानभावेन गृहीतः शृङ्गारो धर्म (दया) वीरेण शमस्थायिना वा सह साम्येन विवक्षित इति शृङ्गारस्याप्यत्राऽदुष्टत्व बोध्यम्। साम्य-विवक्षां स्फुटीकरोति—**अत्र कामुकस्ये**त्यादिना। यथा कामुकस्य कान्तपरयुवतीदत्तानि दन्तक्षतादीनि आनन्दकारणानि तथा जिनस्य बुभुक्षितसिंहीदत्तानि दन्तक्षतादीनि आनन्द-कारणानि; यथा च कामुकस्य परयुवतीसङ्गस्य दर्शनाद् अन्यः कामुकः सस्पृहस्तथैव एतस्य बोधिसत्त्वशरीरदानस्य द्रष्टारो मुनयोऽपि वयमपि एवंविधा उपशान्ता शरीरा-भिमानरहिता भूयास्मेति सस्पृहा इति शृङ्गाराङ्गाना शमाङ्गानाञ्च विभावानुभावानां साम्येन विवक्षेत्यर्थ ।। उदा० ४०७ ।।

(३—क) तुल्यकक्षयोरङ्गयोः परस्परं विरुद्धयोरपि अङ्ग्यनुगमनवशात् परस्परम् अविरोधम् उदाहरति—**क्रामन्त्य क्षतकोमले**त्यादिना। कंचिद् राजानं प्रति कस्यचित् कवेश्चाटुकमिदम्। हे राजन् पातिताभिनवलाक्षारसैरिव क्षतकोमलाङ्गुलिगलद्रक्तैः पादैः सकुशाः स्थलीः क्रामन्त्यः गलदश्रुधौताननाः भीताः पतिहस्तावलम्बितहस्ताः तव शत्रोः स्त्रियः इदानीं पुनरपि जायमानविवाहा इव वनाग्निं परितो भ्रमन्तीत्यर्थः। अत्र परस्परं विरुद्धयोरपि करुण-शृङ्गारयोर् भावाङ्गतया विरोधाभाव इत्याह—**अत्र चाटुके**

(३-ख) क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवाऽऽर्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥उदा० ४१०॥

अत्र त्रिपुररिपुप्रभावातिशयस्य करुणोऽङ्गम्, तस्य तु शृङ्गारः; तथापि न करुणे विश्रान्तिरिति तस्याऽङ्गतैव। अथवा प्राग् यथा कामुक आचरतिस्म तथाऽद्य शराग्निरिति शृङ्गारपरिपोषितेन करुणेन मुख्य एवार्थ उपोद्वल्यते; उक्तं हि—"**गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। प्रधानस्योपकारे हि तथा भूयसि वर्तते**" इति।

इत्यादिना। लौकिकोऽयं न्यायो यद् विरोधिनोरपि पराङ्गभूतयोरविरोध इत्याह—**यथा एहि गच्छे**त्यादिना। श्लोको वृत्तिग्रन्थश्च निगदव्याख्यातः। ॥ उदा० ४०८-४०९ ॥

(३-ख) अतुल्यकक्षयोः परस्परं विरुद्धयोरपि अङ्गयोः अङ्गभाववशात् परस्परमविरोधमुदाहरति—**क्षिप्तो हस्तावलग्न** इत्यादिना। अमरुशतके पद्यमिदम्। तत्कालकृतापराधो धृष्टः कामुक इव अश्रुपूर्णनयनाभिः त्रिपुरसुन्दकामिनीभिः प्रतिक्षिप्तोऽपि सन् हस्ते अवलम्ब कुर्वन्, ततश्च दृढं ताडितोऽपि अंशुकाञ्चलं गृह्णन्, ततश्च केशेषु गृह्णन् सन् दूरीकृतः, ततश्च चरणयोर् निपतितोऽपि सद् (प्रणयकोपसंभ्रमेणेव) भयसम्भ्रमेण अनवलोकितः, ततश्च बलादालिङ्गन् सन् अपि यो निराकृतः स त्रिपुरदाहकालजः शम्भोः शराग्निः युष्माकं दुरितं भस्मीकरोतु इत्यर्थः। पुरा धृष्टो नायक एताः प्रति एतादृशं व्यवहारं कुर्वतेस्म, हन्तेदानी शराग्निरेवं करोतीति करुणस्य शृङ्गारोऽङ्गम्, तथापि न करुणे वाक्यार्थविश्रान्तिः, किन्तु त्रिपुरारिप्रभावातिशये एवेति करुणस्यापि भाव प्रति अङ्गत्वमेव। एवं च अङ्गभूतयोः शृङ्गारकरुणयोर् न विरोध इत्यभिप्रायः। ननु एकस्याङ्गस्य अन्यस्याङ्गेन सह कथं विरोधाभाव इत्यत आह—**अथवा प्रागि**त्यादि। प्राग् यथा कामुक आचरति स्म तथाऽद्य शराग्निरिति उपमानभावेन शृङ्गारः करुणं पुष्णाति, एवं च पुष्टः करुणः अपुष्टकरुणापेक्षया मुख्यं शाम्भवशराग्निविषयकं भावमधिकतरम् उपोद्वलयति; एवं च शृङ्गारस्य न केवलं करुणं प्रत्येव अङ्गत्वं किन्तु भावं प्रत्यपि परम्परयोपकारकत्वेन अङ्गत्वमस्त्येवेति भावः। एवं चैकार्थप्रवणयोर् बलवच्छत्रुविजयमिच्छतोः परस्परं विरोधिनोः राज्ञोरिव परस्परं विरोधिनोरपि शृङ्गारकरुणयोरत्र विरोधस्यापगमो भवतीति तात्पर्यम्। अङ्गाङ्गस्यापि परस्परमुपकारकत्वे नाट्यशास्त्राचार्यभरतसम्मतिं दर्शयति—**गुणः कृतात्मसंस्कार** इत्यादिना। अङ्गान्तरकृतात्मसंस्कारम् अङ्गम् प्रधानमुपकर्तुं गच्छति, एवं च सति तत् कृतात्मसंस्कारम् अङ्गं प्रधानस्य अधिकतरे उपकारे समर्थं भवतीत्यर्थः। ॥ उदा० ४१० ॥

प्राक्प्रतिपादितस्वरूपस्य रसस्य रसान्तरेण न विरोधो नाऽपि अङ्गाङ्गिभावो भवतीति रसशब्देनाऽत्र तत्स्थायिभाव उपलक्ष्यते ॥

इति काव्यप्रकाशे दोषदर्शनो नाम सप्तम उल्लासः ॥७॥

ननु वेद्यान्तरसम्पर्कशून्यानां रसानां द्वितीयेन योगस्यैवासम्भवात् कथं तेषां परस्पर विरोधोऽङ्गाङ्गिभावो वेति रसानां विरोध-तत्परिहारा-ऽङ्गाऽङ्गिभावादे कथनमेतत् सर्वमसङ्गतमित्याशङ्क्याऽऽह—**प्राक्प्रतिपादितेत्यादि** । स्थायिभावोऽयं चण्डीदासविश्वनाथादिभि खण्डरसत्वेन प्रतिपादितः । तथाहि—"अङ्ग बाध्योऽथ संसर्गाद् यद्यङ्गी स्याद् रसान्तरे । नास्वाद्यते समग्रं यत् तत खण्डरस स्मृत." इति । मुनिरपि व्यभिचारित्वमनुमन्यते । तथाहि—"रसान्तरेष्वपि रसा भवन्ति व्यभिचारिणः । तथाहि हासः शृङ्गारे रतिः शान्ते च दृश्यते । क्रोधो वीरे भयं शोके जुगुप्सा च भयानके । उत्साह-विस्मयौ सर्वरसेषु व्यभिचारिणः ।" इति । **स्थायिभाव** इत्यस्यापि अन्यत्र स्थायित्वेन दृष्टत्वात् स्थायीभावत्वेन उपचर्यमाणो भाव इत्येवार्थः, 'अयं स रसनोत्कर्षी' (उदा० ४०६) इत्यादौ रत्यादेः स्थायित्वस्याऽप्यभावादिति शुभम् ॥

इति श्रीहिमवत्खण्डस्थनेपालदेशमध्यवर्ति-किरातुङ्गाचलाङ्कितजनपदान्तर्गत-
तास्कूट-ग्रामाभिजन-[illegible]-कौण्डिन्यायना-ऽऽचार्य-
शिवराजकृतौ हैमवत्याख्य काव्यप्रकाश-विवृतौ
सप्तम उल्लासः सम्पूर्णः ॥७॥

■

अथ अष्टम उल्लासः

एवं दोषानुक्त्वा गुणालङ्कारविवेकमाह—

(सू० ८८) ये रसस्याऽङ्गिनो धर्माः शौर्यादय इवा-ऽऽत्मनः ।
उत्कर्षहेतवस् ते स्युरचलस्थितयो गुणाः ॥६५॥

आत्मन एव हि यथा शौर्यादयो नाऽऽकारस्य, तथा रसस्यैव माधुर्यादयो गुणा न वर्णानाम्। क्वचित् तु शौर्यादिसमुचितस्या-ऽऽकारमहत्त्वादेर् दर्शनाद् 'आकार एवास्य शूरः' (उदा० ४११) इत्यादेर् अन्यत्र अशूरेऽपि विततात्कृतित्व-मात्रेण 'शूरः' (उदा० ४१२) इति; क्वाऽपि शूरेऽपि मूर्तिलाघवमात्रेण 'अशूरः' (उदा० ४१३) इति [illegible] यथा व्यवहरन्ति तद्वद् मधुरादिव्यञ्जक-

---

यद्यपि गुणनिरूपणमेव क्रमप्राप्तमिति तदेव कर्तव्यं तथापि प्राचीनैर् भट्टोद्भटप्रभृति-भिर् गुणालङ्कारयोरभेदस्य प्रतिपादितत्वात् तयोरभेदे [illegible] कार्य स्यादिति गुणालङ्कारभेदव्यवस्थापनमेव प्रथमं कार्यमिति तदेव प्रतिजानीते—**एवं दोषा**[illegible] ।

गुणालङ्कारविवेकाय गुणलक्षणमाह—**ये रसस्ये**त्यादिना । यथा [illegible]युक्तस्य सत्त्वस्य शौर्यादयो धर्मा तथा काव्ये अङ्गिरूपस्य रसस्य उत्कर्षका. अव्यभिचारिणः (नित्याः) ये धर्मास् ते गुणा उच्यन्ते इत्यर्थः । एवं च रसधर्मत्वे सति रसोत्कर्षकत्वम् रसोत्कर्षकत्वे सति रसाव्यभिचारित्वम्, अव्यभिचारेण रसोपकारकत्वं वा गुणत्वमिति गुणलक्षणं फलितम् । एवं च शृङ्गारादिगतं विशिष्टमाह्[illegible] गुण इति बोध्यम् । शेषं [illegible] वक्ष्यामः ॥ ६५ ॥

वर्णेषु य. [illegible] [illegible] स भ्रममूल इति भ्रमहेतुनिर्देश-[illegible]—**आत्मन एवे**त्यादिना । यथा शौर्यादयः सत्त्वस्यैव (अन्तःकरणस्यैव) धर्मा न स्थूलस्य शरीरस्य तथा माधुर्यादयोऽपि रसस्यैव गुणाः न वर्णानाम्, तथापि यथा सत्त्वस्वभावं बोद्धुमसमर्था अविवेकिनो लौकिकाः कुत्रचित् शौर्यस्थूलत्वयोः सहचारस्य दर्शनाद् आकार एवाऽस्य शूर." इति औपचारिकाद् व्यवहाराच् च अन्यत्र अशूरेऽपि-स्थूलत्वमात्रेण अयं शूर इति, शूरेऽपि कृशत्वमात्रेण अयमशूर इति व्यवहरन्ति तथैव काव्यसारभूतस्य रसस्य स्वभावं बोद्धुमसमर्था वामनादयोऽपि माधुर्यादिस् तद्व्यञ्जक-सुकुमारादिवर्णाना च क्वचिद् मधुरादिरसे काव्ये सहचारस्य दर्शनात् सुकुमारादिपु वर्णेपु वर्णा एव मधुरा इत्यादे. [illegible] व्यवहाराच् च अमधुरादिरसे (वीरादिरसे) काव्ये प्रयुक्तेषु अपि सुकुमारादिषु वर्णेषु [illegible] व्यवहरन्ति, मधुरादिरसे (शृङ्गारा-दिरसे) काव्ये प्रयुक्तेषु अपि परुषेषु वर्णेषु अमाधुर्यादिकं व्यवहरन्ति, किन्तु यथा सत्त्व-स्वभावं बोद्धुमसमर्था अविवेकिनो लौकिका भ्रान्तास्तथैव इमे वामनादयोऽपि भ्रान्ता इत्यर्थः । एवं च माधुर्यादयो रसधर्मा एव; ते च समुचितैर् वर्णैर् व्यज्यन्ते, न तु ते वर्णमात्राश्रया इति वक्तव्यसारः । वर्णविशेषाणां [illegible]त्वमुदाहरिष्यति ।

सुकुमारादिवर्णानां माधुर्यादिव्यवहारप्रवृत्ते:. अमधुरादिरसाङ्गानां वर्णानां सौकुमार्यादिमात्रेण माधुर्यादि, मधुरादिरसोपकरणानां तेषाम् असौकुमार्यादेः अमाधुर्यादि रसपर्यन्तविश्रान्तप्रतीतिवन्ध्या व्यवहरन्ति । अत एव माधुर्यादयो रसधर्माः समुचितैर् वर्णैर् व्यज्यन्ते न तु वर्णमात्राश्रयाः । यथैषां व्यञ्जकत्वं तथोदाहरिष्यते ।

(सू० ८९) उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास् तेऽनुप्रासोपमादयः ॥६७॥

ये वाचकवाच्यलक्षणाङ्गातिशयमुखेन मुख्यं रसं सम्भविनमुपकुर्वन्ति ते कण्ठाद्यङ्गानाम् उत्कर्षाधानद्वारेण शरीरिणोऽपि उपकारका हारादय इवाल-ङ्काराः, यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसायिनः; क्वचित् तु सन्तमपि नोपकुर्वन्ति; यथाक्रममुदाहरणानि—

आकारः शरीरमित्यर्थः । **अविश्रान्तप्रतीतयः** तत्त्वे अविश्रान्ता प्रतिपत्तिर् येषां ते, वाच्य-ज्ञाना, अतत्त्वज्ञाः भ्रान्ता इति यावत् । **रसपर्यन्तविश्रान्तप्रतीतिवन्ध्या** रसपर्यन्ते (रसं प्राप्य) विश्रान्ता सवाच्यत्वेन निश्चयरूपप्राप्त्या वा स्थिरीभूता या प्रतीतिः (प्रतिपत्तिः) तत्र वन्ध्या तादृशी प्रतिपत्तिं स्वान्ते उत्पादयितुमसमर्थाः । रसस्वभावानभिज्ञा इत्यर्थः । अथवा रसपर्यन्ते विश्रान्तानां रसे नियतरूपेण स्थितानां गुणानां ज्ञाने असमर्था इत्यर्थः । इद-न्त्वत्र विवेक्तव्यं यद्—यद्यपि माधुर्यौजःसौन्दर्याणि शब्दगुणा अपि सन्ति, तथापि ते शब्दालङ्काररूपा एव न तु काव्यगुणरूपा, काव्यगुणरूपा माधुर्यादयस् तु यमकादेः शृङ्गारादौ अनुचितता क्वचिच्च उचितता तथैव मधुरशब्दशरीरस्याऽलङ्कारस्य कुत्रचि-दुचितता कुत्रचित् तु अनुचितता, एवमेव ओजोवच्छब्दशरीरस्यापीत्यादि बोध्यम् ।

यद्यपि नायमलङ्कारनिरूपणावसरस्, तथापि प्रकृतगुणालङ्कारभेदस्य ज्ञानाय गुणस्वरूपज्ञानेन सह अलङ्कारस्वभावज्ञानमपि आवश्यकमिति अत्रैव अलङ्कारस्वभावं निरूपयति—उपकुर्वन्तीत्यादिना । यदि यत्र अनुप्रासोपमादयः सन्ति तत्र काव्ये रसोऽ-प्यस्ति चेत् तं रसं ये शब्दशोभाद्वारा अर्थशोभाद्वारा वा क्वचिद् उपकुर्वन्ति क्वचिच् च सन्तमपि तं रसं नोपकुर्वन्ति, असति तु रसे (रसविहीनान्ये काव्याभासे चित्रे) शब्दार्थवैचित्र्यमात्रपर्यवसायिनो भवन्ति; यथा कण्ठाद्यङ्गशोभाकरणद्वारेण शरीरिणोऽपि उपकारका लौकिका हारादयोऽलङ्काराः शरीरिणा सहानियतेन सम्बन्धेन सम्बद्धास् तथैव रसेन सह अनियतेन सम्बन्धेन सम्बद्धास् ते अनुप्रासोपमादयः अलङ्कारा इति व्यवह्रियन्ते इत्यर्थः । यद्यप्यत्र मम्मटेन अलङ्कारसामान्यलक्षणं न प्रतिपिपादयिषितम्, किन्तु गुणव्यवच्छेदका अलङ्कारस्वभावा एव अत्र तेन प्रतिपिपादयिषितास्तथापि तन्मते अनु-प्रासोपमादिषु सर्वत्र अनुगतम् अलङ्कारसामान्यलक्षणं तु 'शब्दार्थान्यतरनिष्ठं चमत्कृति-जनकत्वम् अलङ्कारत्वम्' इत्येव बोद्धव्यम् । एतेन **ये वाचकवाच्येत्यादिर्** वृत्तिग्रन्थोऽपि व्याख्यात. ॥६६॥

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥ उदा० ४१४ ॥

इत्यादौ वाचकमुखेन ।

मनोरागस् तीव्रं विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूम ज्वलति विधुतः पावक इव ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती ॥ उदा० ४१५ ॥

इत्यादौ वाच्यमुखेन अलङ्कारौ रसमुपकुरुतः ।

चित्ते चिहुट्टदि न खुट्टदि सा गुणेषु सेज्जाइ लोट्टदि विसप्पदि दिम्मुहेपु ।
बोलम्मि वट्टदि पवट्टदि कव्वबन्धे झाणे ण तुट्टदि चिरं तरुणी तरट्टो ॥ उदा०४१६॥

वाचक(शब्द)रूपाङ्गोत्कर्षद्वारेण मुख्यं रसमुपकुर्वन्तमलङ्कारमुदाहरति—**अपसारये-** त्यादिना । दामोदरगुप्तकृते कुट्टिनीमते विरहिण्या उक्तिरियम् (प० १०२) हे सखि, कर्पूरम् अपनय, हारमपि दूरे कुरु, कमलैः अपि इदानीं कि कार्यम् ? शीतलैः बिसैः अपि अलम् अलम् इति काचिद् बाला सततं सखी ब्रूते इत्यर्थः अत्र । अमयु लकारानुप्रास शब्दमलङ्कुर्वन् विप्रलम्भशृङ्गारमुपकरोतीत्यभिप्रायेणाह—इत्यादौ वाचकमुखेनेति ॥उदा० ४१४॥

वाच्यरूपाङ्गोत्कर्षद्वारेण मुख्यं रसमुपकुर्वन्तम् अलङ्कारमुदाहरति—**मनोरागस् तीव्र-** मित्यादिना । मालतीमाधवे(२।१)मालत्या लवङ्गिकां प्रति उक्तिरियम् । हे सखि, इदानी मम माधवविषयकश् चित्तानुरागो निरन्तरं तीव्रं विषमिव विविधप्रकारेण सर्वतः सञ्चरति; प्रकर्षेण मनोमथनशीलोऽयं चित्तानुरागो वातेन प्रज्वलितः पावक इव निर्धूमं यथा स्यात् तथा ज्वलति; अयं चित्तानुरागः अतिशयेन गुरुः (सान्निपातिकः) ज्वर इव प्रत्यङ्गं पीडयति; तस्माद् एतस्माद् मनोरागरूपाद् महत आधेर् मां रक्षितुं वरान्तरानु- सरणकारो मम पिता न प्रभवति, तदप्रतिषेधिनी माता च न प्रभवति, भवती अपि न प्रभवतीत्यर्थः । अत्र निर्धूमेत्यादिका उपमा विमर्शणादेरतिशयं बोधयन्ती विप्रलम्भमुत्कृष्टं करोति ॥उदा० ४१५॥

शब्दवैचित्र्यमात्रपर्यवसायी अलङ्कारो यथा—स्वच्छन्दोच्छलदित्यादौ (उदा० ४)
अर्थवैचित्र्यमात्रपर्यवसायी अलङ्कारो यथा—विनिर्गतं मानदमित्यादौ (उदा० ५)

सत्यपि रसे तदनुपकारकं शब्दालङ्कारमुदाहरति—**चित्ते चिहुट्टदीत्यादिना** । **'चित्ते तिष्ठति न क्षीयते सा गुणेषु शय्यायां लुठति विसर्पति दिङ्मुखेषु । वचने वर्तते प्रवर्तते काव्यबन्धे ध्याने न त्रुट्यति चिरं तरुणी प्रगल्भा ।'** इति संस्कृतच्छाया । राजशेखरकृत- कर्पूरमञ्जरीसट्टकस्य द्वितीयजवनिकान्तरे सिद्धभैरवानन्देन योगबलादानीताया विदर्भा- धिपस्य वल्लभराजस्य सुतायाः कर्पूरमञ्जर्या दर्शनात् प्रभृति तस्यामनुरक्तस्य **तामनु-**

इत्यादौ वाचकमेव,

मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम् ।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥४१७॥

इत्यादौ वाच्यमेव, न तु रसम् । अत्र च बिसलता जीवं रोद्धुं न क्षमेति प्रकृताननुगुणा उपमा ।

एष एव च गुणालङ्कारप्रविभागः । एवं च 'समवायवृत्त्या शौर्यादयः, संयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः, ओजः प्रभृतीनाम् अनुप्रासादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डरिकाप्रवाहेणैषां भेदः" इत्यभिधानमसत् ।

सन्धाय तन्मयीभूतस्य राजन् चन्द्रपालस्योक्तिरियम् । सा प्रगल्भा तरुणी मम चित्ते तिष्ठति, सा सौन्दर्यादिगुणेषु न क्षीयते (यथा यथा चिन्त्यते तथा तथा अधिकतरसौन्दर्यादिमती प्रतीयते), मम शय्याया मत्पार्श्वे लुठतीव प्रतीयते, दिङ्मुखेषु विसर्पति (सर्वतः सैव दृश्यते), मम वचने (मम या कांचनापि प्रार्थनां स्वीकरोति), मद्विषयके काव्यबन्धे प्रवर्तते, मम ध्याने न त्रुटचति (मम मनसो नापसरति) इत्यर्थः । अत्र विप्रलम्भश्रृङ्गारकोमलताप्रतिकूलत्वात् परुषटकारानुप्रासः सन्तमपि विप्रलम्भं नोपकरोति, केवलं शब्दमेवालङ्करोतीत्याह—**अत्र वाचकमेवे**ति ॥उदा० ४१६॥

सत्यपि रसे तस्याऽनुपकारकमर्थालङ्कारमुदाहरति—**मित्रे क्वापी**त्यादिना । प्रवरसेनस्येदं पद्यमिति सम्भावयन्ति । सन्ध्याकालस्थचक्रवाकवर्णनमिदम् । सूर्ये कुत्रापि गते सति, कमलवने मुद्रिते ग्लायति (शोकात् खिद्यमाने) च सति, भृङ्गेषु गुञ्जत्सु सत्सु, स्वस्य पुरतः दयिताम् अनुवर्तमानं सारसं पक्षिणं विलोक्य वियोगिना चक्रवाकेन मृणालवल्ली न भुक्ता न च त्यक्ता, किन्तु शरीराद् निर्गन्तुं वाञ्छतः स्वस्य जीवनस्य रोधाय अर्गला इव सा विषलता कण्ठे निहितेत्यर्थः । अत्र विप्रलम्भश्रृङ्गारे वियोगिनो मर्तुमीहा समुचिता, न तु मरिष्यामि किमु इति जीवरोधाय कण्ठे अर्गलाया निधानमिति अर्गलेव इति उपमा प्रकृताननुगुणेति इयमुपमा सन्तमपि रस नोपकरोति, केवलमर्थमेवोपकरोतीत्याह—**इत्यादौ वाच्यमे**वेत्यादिना । अत्र वियोगिनो विसलतया जीवं रोद्धुमीहा वर्ण्यमाना अनुचितेति प्रकृताननुगुणा उपमा इति वक्तव्ये **अत्र च बिसलते**त्यादिका वाक्यरचना मम्मटस्य शैल्या दोषं प्रमाणयति **क्षमा** उचितेत्यर्थः ॥४१७॥

ननु उद्भट–वामनादिभिः काव्यशास्त्रगुरुभिर् गुणालङ्कारविचारोऽन्यथा कृतः कथं त्वयाऽन्यथा उच्यते इति संशयेनाक्रान्त प्रत्याह—**एष एवे**त्यादि । "परो भूतेष्वनुक्रोशस् तत्त्वज्ञाने परा दया । येषां तेषामनद्रोहे निरता मतिः" इति शिष्टमर्यादामवलम्ब्य

यद् अपि उक्तम्—"काव्यशोभायाः कर्तारो धर्मा गुणा, तदतिशयहेतवस् तु अलङ्कारा." इति (का० अ० सू० ३।१।१-२) तदपि न युक्तम्; यतः किं समस्तैर् गुणैः काव्यव्यवहार उत कतिपयैः ? यदि समस्तैः तत् [illegible] गौडी पाञ्चाली च रीतिः काव्यस्यात्मा ? अथ कतिपयैः, तत् तत् "**अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्य. प्रोद्यन्नुल्लसत्येष धूमः**" (उदा० ४१८) इत्यादौ ओजः

गुणालङ्कारतत्त्वविषयेऽत्राद् निगृह्णाति—**एवञ्चे**त्यादिना । **एवं च** = अस्मदुक्तगुणाऽलङ्कारभेदव्यवस्थितौ सत्याम् । गुणालङ्काराभेदवादिनामुद्भटादीनां मतं निरस्यति—**समवायवृत्त्ये**त्यादिना । अपृथक्सिद्धानाम् आधार्याधाररूपाणां तथात्वेन प्रत्यये हेतुः सम्बन्धः समवायः इति उच्यते, पृथक्सिद्धयोरप्राप्तयोः [illegible] सम्बन्ध. संयोग. । लौकिकाश्च **शौर्यादयो** गुणा आत्मारूढे सत्त्वे समवायसम्बन्धेन तिष्ठन्ति, हारादयोऽलङ्काराश् च सत्त्वाधिष्ठिते शरीरे संयोगसम्बन्धेन तिष्ठन्तीति लौकिकयोर् गुणालङ्कारयोर् **भेदो**ऽस्तु नाम, काव्यगतयोर् गुणालङ्कारयोस्तु उभयोरपि सहितशब्दार्थरूपे काव्ये समवायसम्बन्धेनैव स्थितिरिति तयोर् नास्ति भेदः; तथापि पूर्वैराचार्यैः **भेदेन** प्रतिपादितौ ताविति आस्माकीनैरपि भेदेनोल्लिखितौ केवलम्, वस्तुतस्तु अय भेदो गड्डरिकाप्रवाहन्यायेनैवेति भामहविवरणादौ यद् भट्टोद्भटादिभिरुक्तं तदसदेव, गुणालङ्कारयो. भेदस्य प्रतिपादितत्वादित्यर्थः । यथा गड्डरिका (मेषी) काचिदेका केनचित् निमित्तेन पुरोगच्छति, इतरास् तु विनैव निमित्तविचारं तामनुगच्छन्ति अग्रिमायाः कूपादौ पाते जाते सति इतरा अपि वार्यमाणा अपि कूपादौ पतन्तीति प्रसिद्धिः, तथा केनाऽपि पूर्वाचार्येण कयाचिद् भ्रान्त्या किञ्चिदुक्ते सति विनैव विचारं तद् अनुकुर्वन्ति. तद्वदेव केनापि प्राक्तनेन अलङ्कारौ कदाचिद् भ्रान्त्या भिन्नत्वेनोक्तौ आधुनिकास्तु विनैव विचार तदनुसरणेन तयोर्भेदं वदन्ति इति [illegible] ।

इदानीं गुणालङ्कारभेदवादिनो वामनस्य मतमपि [illegible]—**यदप्युक्त**मित्यादिना । **काव्यशोभायाः कर्तार** इति लौकिक[illegible]विद्यमान काव्यरूपयो शब्दार्थयोर् विद्यमानो लोकमनोरञ्जक कश्चिद् विशेषः शोभा, तन्निष्पादका इत्यर्थः । **तदतिशयहेतव** इति गुणनिष्पादितशोभाप्रकर्षकरा इत्यर्थ. । [illegible]व्यते न गुणरहितमिति भावः । गुणानां समुदिताना काव्यशोभानिष्पादकत्वे स्वीकृते गौडी पाञ्चाली च रीतिः काव्यस्य आत्मा न स्यात्, एकैकस्य गुणस्यापि काव्यशोभाकरत्वे अद्रावत्रेत्यादौ अपि वामनाभिमतेषु ओजःप्रभृतिषु गुणेषु सत्सु [illegible] स्यादित्याह—**यतः किं समस्तै**रित्यादिना । वामनमते गुणा न रसधर्मा इति अद्रावत्रेत्यादावपि तदभिमतगुणानामस्तित्वम् । न च मम्मटमतेनापि अत्र प्रातिभासिकस्यौजोगुणस्य अनुप्रासस्य अलङ्कारस्य च सत्त्वाद् दोषस्य च कस्यचिदपि अभावात् काव्यत्वव्यवहारप्राप्तिः समानेति शङ्क्यम्, तन्मतेऽत्र गुणव्यतिरिक्तस्य प्रव्यक्तस्य अलङ्कारस्य स्फुटस्य रसस्य वाऽप्यभावात् काव्यत्व-

प्रभृतिषु गुणेषु सत्सु काव्यव्यवहारप्रवृत्तिः। "**स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी। अस्याधरच्छदरसो न्यक्करोतितरां सुधाम्**" (उदा० ४१९) इत्यत्र च विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारप्रवर्तकौ।

इदानीं गुणानां भेदमाह—

(सू० ९०) **माधुर्यौजः प्रसादाख्यास् त्रयस् ते न पुनर् दश।**

एषां क्रमेण लक्षणमाह—

प्रमध्वनेरभावात्। चित्रकाव्येऽपि मम्मटस्ते शब्दार्थचित्रयोरुभयोरेव गुण-प्रधानभावेन स्थितेरव्यञ्जकत्वाद्, अत्र च शब्दालङ्कारे स्वीकृतेऽपि तद्भेदत्वलक्षणालङ्कारस्याभावात्। वामनाभिमतगुणसत्त्वेऽपि काव्यत्वभावस्य प्रदर्शनेन तदीयगुणलक्षणे अन्वयव्यभिचारं प्रदर्श्य तदभिमतगुणनिरपेक्षस्यापि अलङ्कारस्य काव्यत्वनिष्पादकत्वं प्रदर्श्य तदीयगुण-लक्षणे व्यतिरेकव्यभिचारं च दर्शयति—**स्वर्गप्राप्ति**रित्यादिना। उत्तमा अङ्गना पुंसः कृते अनेनैव मानुषेण देहेन वर्गसुखलाभः, अस्या उत्तमाया अङ्गनाया अधरस्य रसः सुधां नीचैः करोतीत्यर्थः। अत्र 'एकगुणहानिकल्पनायां शेषगुणसाम्यदार्ढ्यकल्पना विशेषोक्तिः' (४।३।२३) इति वामनोक्तविशेषोक्तिलक्षणस्य दिव्यदेहरूपैकगुणहानिकल्पनया सुखदाय-कत्वादिरूपशेषगुणसाम्यदार्ढ्यस्य कल्पितत्वात् सङ्गतिरिति विशेषोक्तिरलङ्कारोऽस्ति: अधररसस्योपमेयस्य उपमानत्वेन प्रसिद्धत्वात् तस्य च सुधारसाद् आधिक्यस्य वर्णनाद् व्यतिरेकोऽलङ्कारः एतौ च वामनाभिमतं गुणमनपेक्ष्यैवात्र काव्यत्वनिष्पादकौ इति वामनेन स्वीकर्तव्यम्, तन्मते रसस्य काव्यत्वनिष्पादकत्वेनानुल्लेखात्। ये च वामनमत-सिद्धाः प्रसादादयः तेऽपि नाऽत्र सन्ति, तथाप्यत्र सहृदयहृदयसाक्षिकं काव्यत्वं वामनेनापि-नापलपितुं शक्यम्। एवं च वामनाभिमतगुणानामभावेऽपि काव्यशोभाया निष्पत्त्या काव्यशोभानिष्पादकत्वरूपं वामनोक्तं गुणस्वरूपमसदेव। गुणेन निष्पादितायाः शोभाया उत्कर्षकोऽलङ्कार इति वामनोक्तमलङ्कारलक्षणमपि एतेनैव खण्डितं वेदितव्यम्, गुणं गुणनिष्पादितां शोभां च अनपेक्ष्यैव अलङ्कारयोरुक्तयोः काव्यशोभानिष्पादकत्वस्यात्र स्वर्गप्राप्तिरित्यादौ वामनेन स्वीकर्तव्यत्वात्। एतावता च गुणालङ्कारयोर् भेदोऽस्ति, स च भेदो न वामनप्रतिपादितप्रकारकः किन्तु अस्मत्प्रतिपादितप्रकारक एवेति प्रति-पादितं ग्रन्थकृता॥ उदा० ४१८-४१९॥

एवं गुणनिरूपणौचित्यं प्रदर्श्य गुणसामान्यनिरूपणं च विधाय गुणभेदनिरूपणं प्रारभते—**इदानीं गुणानां भेदमाहे**त्यादिना। माधुर्यम्, ओजः, प्रसाद इति आख्यया वामनोक्तैः गुणैः समाना अपि स्वरूपतो वामनाभिमत-तत्-तद्-नामक गुणेभ्योऽतीवभिन्ना-त्रय एव काव्यगुणा वेदितव्या न दश दश शब्दगता अर्थगताश्च गुणा इति सूत्रस्य भावः। (सू० ९०)।

(सू० ९३) **दीप्त्याऽऽत्मविस्तृतेर् हेतुरोजो वीररसस्थिति ॥६८॥**
चित्तस्य विस्ताररूपदीप्तत्वजनकत्वमोजः ।
(सू० ९४) **बीभत्सरौद्ररसयोस् तस्याऽऽधिक्यं क्रमेण च ।**
वीराद् बीभत्से ततो रौद्रे सातिशयमोजः ॥
(सू० ९५) **शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः ॥६९॥**
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ।
अन्यदिति व्याप्यमिह चित्तम् । सर्वत्रेति सर्वेषु रसेषु सर्वासु रचनासु च ।

प्रकर्षवत् । "माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः" इति (२।८) । अभिनवगुप्तस्तु—"सम्भोगशृङ्गारात् मधुरतरो विप्रलम्भः, ततोऽपि मधुरतमः करुणः" इत्याह तत्रैव लोचने ॥

ओजो निरूपयति—**दीप्त्यात्मे**त्यादिना । वीररसे अनुभूयमाना द्वेष्यादिसम्बन्धजनिता या दीप्तिरूपा चेतसो विस्तृतिः प्रज्वलनसदृशी तज्जनकत्वं वीररसनिष्ठं वैलक्षण्यम् आस्वादविशेषात्मकं यत् तदोज इत्यर्थः । एतेन वृत्तिग्रन्थोऽपि व्याख्यातः ॥ ६८ ॥

ओजसो बीभत्सादौ आधिक्यं प्रतिपादयति—**बीभत्से**त्यादिना । द्वेष्यविषयसम्पर्केण चेतसो दीप्तेर् जनकत्वं हि ओजः; तच्च वीरे द्वेष्यविजिगीषामात्रमिति तत्र नातिमात्रम्, बीभत्से तु जुगुप्सितविषयेऽत्यन्तमेव तीव्रा त्यागेच्छेति तत्रातिमात्रमोजः, रौद्रे त्वपकारिणि चित्रवधावधिकः प्रयास इति तत्रातिमात्रतरमोज इति सम्प्रदायविदः गोविन्दठक्कुर-नागोजिभट्ट-श्रीविद्याचक्रवर्तिप्रभृतयः । वयन्तु वीराद्बीभत्सेऽधिकतरम् ओजः न उपलभामहे ॥(सू० ९४)॥

प्रसादं निरूपयति—**शुष्केन्धनाग्निव**दित्यादिना । शुष्कमिन्धनं यस्य तादृशो वह्निर् यथा स्वव्याप्यमिन्धनान्तरं सहसैव व्याप्नोति यथा वा स्वच्छं जलं स्वव्याप्यं स्वच्छ-पटादिकं सहसैव व्याप्नोति तथैव यो रसनिष्ठो गुणः सहृदयप्रतिपत्तृचित्तवृत्तिसंवादेन सहृदयप्रतिपत्तृचित्तं सहसैव व्याप्नोति असौ चित्तवृत्त्यन्तरोदयरूपकालुष्याभावहेतुत्वरूपः सर्वरसनिष्ठो गुणः प्रसाद उच्यते इत्यर्थः । अन्यदित्यस्यार्थो दुर्बोध इति व्याचष्टे—**अन्यदिती**त्यादिना । अन्यदितिपदेन इह प्रकृते दार्ष्टान्तिके व्याप्यं चित्तं बोद्धव्यमित्यर्थः । **सर्वत्रे**त्यादिना । मुख्यया वृत्त्या सर्वेषु स्थितः, गौण्या वृत्त्या च तत्-तद्-रसविशेषानुकूलासु रचनासु स्थित इत्यर्थः । (सू० ९५) ।

यद्यपि रसादिनिरूपणादेव एतेषां गुणानां निरूपणं गतार्थमिव भवति तथापि शृङ्गारादिषु तज्जातीयेषु रसाभासेषु च अनुगतम्, वीरादिषु तज्जातीयेषु रसाभासेषु भावादिषु च अनुगतम्, तथा सर्वेषु रसेषु रसाभासभावभावाभासादिषु अनुगतं च धर्म-विशेषं निर्दिश्य रसानामेव दृष्टन्तरेण निरूपणं कर्तुमेव गुणानामप्युपन्यासः । अथवा रसादिभ्योऽपृथग्भूतानामपि गुणानां वाक्येभ्योऽपृथग्भूतानामपि पदानामिव अपोद्धार-

(सू० ९६) **गुणवृत्त्या पुनस् तेषां वृत्तिः शब्दार्थयोर् मता ॥७०॥**

(सू० ९७) **केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः ।**

अन्ये भजन्ति दोषत्वं कुत्रचिन् न ततो दश ॥७१॥

गुणवृत्त्या उपचारेण, तेषां गुणानाम्, आकारे शौर्यस्येव ।

कुतस् त्रय एव न दशेत्याह—

बहूनामपि पदानाम् एकपदवद् भासनात्मा यः श्लेषः, यश्च आरोहावरोह-क्रमरूप समाधिः, या च विकटत्वलक्षणा उदारता, यश् च ओजोमिश्रितशैथिल्यात्मा प्रसादस् तेषामोजस्यन्तर्भावः । पृथक्पदत्वरूपं माधुर्यं भङ्ग्या साक्षादु-

---

न्यायेन पृथक् निरूपणं कृतं वेदितव्यम् । अन्ये तु शब्दार्थालङ्कारादिसमुदायस्य निरस्तावयवावयविविभागस्य काव्यत्वमिति स्फुटं प्रतिपादयन्ति । आह हि कुन्तकः—"अलङ्कृतिरलङ्कार्यमपोद्धृत्य विविच्यते । तदुपायतया तत्त्वं सालङ्कारस्य काव्यता" इति (का० अ० १।६) ॥

ननु गुणानां रसधर्मत्वे कथं शब्दार्थयोर् माधुर्यवृद्धिः आलङ्कारिकाणाम् ? कथं च त्वयापि काव्यलक्षणे शब्दार्थौ सगुणौ इत्युक्तम् ? कथं वा प्रसादस्य सर्वासु रचनासु स्थितिः प्रतिपाद्यते ? [illegible] **—गुणवृत्त्येत्यादि** । तेषां गुणानां स्वव्यञ्जकतादिसम्बन्धेन लक्षणया शब्दार्थयोः स्थितिर् व्यवह्रियते इत्यर्थः । आकारे शौर्यस्येव इति दृष्टान्तः शब्दार्थयोः गुणस्य उपचारेण वृत्तेः स्फुटीकरणार्थः ॥ ७० ॥

न पुनर् दश इति प्रतिज्ञामुपपाद्य माधुर्यौजःप्रसादाख्यास् त्रय एव रसधर्मभूता गुणा इति स्वमतं द्रढयन्नाह—**कुतस् त्रय एवे**त्यादि । वामनोक्तेषु शब्दगतत्वेन अर्थगतत्वेन चाऽभिमतेषु उभयेषु दशसु गुणेषु मध्ये केचिद् गुणाः एतेषु माधुर्यौजःप्रसादेषु अन्तर्भवन्ति, केचन गुणाः दोषत्यागाद् भङ्ग्यन्तरेण (दोषाभावरूपेण) अस्माभिरनुमता अपि न गुणरूपाः किन्तु दोषाभावरूपाः, केचन तु कुत्रचित् स्थलविशेषेषु दोषत्वं प्राप्नुवन्ति न गुणत्वमिति न हि शब्दगुणाः दश न वाऽर्थगुणा दश स्वीकर्तुं शक्या इत्यर्थः ॥७१॥

तत्र प्रथमं शब्दगुणानामन्तर्भावादिप्रकारं दर्शयति—**बहूनामपी**त्यादिना । "यत्रैकपदवद्भावः पदानां भूयसामपि । अनालक्षितसन्धीनां स श्लेषः परमो गुणः" (का० अ० सू० वृ० ३।१।२५) इति वामनलक्षितस्य श्लेषस्य, "आरोहन्त्यवरोहन्ति क्रमेण यतयो हि यत् । समाधिर् नाम स गुणस् तेन पूता सरस्वती" इति वामनलक्षितस्य समाधेः, "विकटत्वं हि बन्धस्य कथयन्ति ह्युदारताम् । वैचित्र्यं न प्रपद्यन्ते यया शून्याः पदक्रमाः" इति वामनलक्षितताया उदारतायाः, "श्लथत्वमोजसा मिश्रं प्रसादं तु प्रचक्षते । अनेन न विना सत्यं स्वदते काव्यपद्धतिः" इति वामनेन लक्षितस्य प्रसादस्य च **ओजसि** अर्थाद् ओजोव्यञ्जकतया ओजोऽङ्गभूतायां रचनायामन्तर्भावः, (अङ्गाङ्गिनोरभेदस्योपचारेण ओजसीति वचनम्); "बन्धे पृथक्पदत्वं च माधुर्यमुदितं बुधैः । अनेन हि पदन्यासाः

पात्तम् । प्रसादेनार्थव्यक्तिर्गृहीता । मार्गाभेदरूपा समता क्वचिद् दोषः, तथाहि 'मातङ्गाः किमु वल्गितैः' (उदा० ४२०) इत्यादौ सिंहाभिधाने मसृणवर्णन्यासो गुणः । कष्टत्व-ग्राम्यत्वयोर् दुष्टताभिधानात् तन्निराकरणेन अपारुष्यं सौकुमार्यम् औज्ज्वल्यरूपा कान्तिश् च स्वीकृते । एवं न दश शब्दगुणाः ।

"पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा । प्रौढिर् व्यास-समासौ च साभिप्रायत्वमस्य च" (का० अ० सू० वृ० ३।२।२) इति या प्रौढिरोज इत्युक्तं तद् वैचित्र्यमात्रं न गुणः, तदभावेऽपि काव्यव्यवहारप्रवृत्तेः । अपुष्टार्थत्वाधिक-पदत्वानवीकृतत्वामङ्गलरूपाश्लील-ग्राम्याणां निराकरणेन साभिप्रायत्वरूप-

---

कामं [illegible]" इति वामनलक्षितं माधुर्यन्तु भङ्ग्यन्तरेण रसधर्मतया आह्लाद-त्वस्योपादानेन आह्लादकत्वोपकारितया 'अवृत्तिरल्पवृत्तिर् वा माधुर्ये घटना तथा' इति असमस्तत्वस्योपादानेन च कण्ठरवेणैवोपात्तम्; "पश्चादिव गतिर् वाचः पुरस्तादिव वस्तुनः । यत्रार्थव्यक्तिहेतुत्वात् सोऽर्थव्यक्तिः स्मृतो गुणः" इति वामनलक्षिता अर्थव्यक्तिरपि रसधर्मत्वेन झटितिचित्तव्यापकत्वस्योपादानेन झटितिचित्तव्यापकत्वोपकारितया "श्रुतिमात्रेण शब्दात् तु येनार्थप्रत्ययो भवेत् । साधारणः समग्राणां स प्रसादो गुणो मतः" (सू० १०२) इति स्फुटार्थकत्वस्योपादानेन च अस्माभिर् भङ्ग्यन्तरेणोक्तैव; "प्रतिपादं प्रतिश्लोकमेकमार्गपरिग्रहः । दुर्बन्धो दुर्विभावश्च समतेति मतो गुणः" इति वामनेन लक्षिता च मार्गाभेदरूपा क्वचित् प्रागुदाहृते "मातङ्गाः किमु वल्गितैः" (उदा० ३६७) इत्यादौ स्थलविशेषे दोष एव भवति, तत्र प्रत्युत मार्गभेदरूपा असमता एव गुणो भवति, अतः सा न गुणः; "बन्धस्याजरठत्वं च सौकुमार्यमुदाहृतम् । एतेन वर्जिता वाचो रूक्षत्वात् न श्रुतिक्षमाः" इति वामनेन लक्षितं सौकुमार्यं श्रुतिकटुत्वरूपकष्टत्वदोषाभावरूपम्, न गुण इति यद् दोषाभावरूपत्वेनोपात्तम्, "औज्ज्वल्यं कान्तिरित्याहुर् गुणं गुणविशारदाः । पुराणचित्रस्थानीयं तेन बन्ध्यं कवेर् वचः" (का० अ० सू० वृ० ३।१।२५) इति वामनेन लक्षिता कान्तिरपि ग्राम्यत्वरूपदोषाभावरूपा न गुण इति सा दोषाभावरूपत्वेनैवोपात्ता; एवं च वामनोक्तानां दशानां शब्दगुणानां मध्ये केषांचित् साक्षात् प्रकारान्तरेण वा माधुर्यादिषु त्रिष्वेवान्तर्भावात्, केषांचिद् दोषाभावरूपत्वाद्, अन्येषां च दोषरूपत्वाद् न दश शब्दगुणाः स्वीकर्तव्या इत्यर्थः । "बन्धस्योज्ज्वलत्वं नाम यदसौ कान्तिरिति, यदभावे पुराणच्छायेत्युच्यते" (का० अ० सू० वृ० ३।१।२५) इति स्फुटीकृतायाः कान्तेः कथं ग्राम्यत्वाभावरूपत्वमिति तु न विद्मः । औज्ज्वल्यं शालिकादिसाधारणपदविन्यासवैपरीत्येन अलौकिकशोभाशालित्वमिति झडकीकरादीनां व्याख्यानं तु अन्याय्यं उपरिप्रदर्शितवामनस्पष्टीकरणविरोधात् । पदप्रयोगवैचित्र्याभावरूपानवीकृतत्वाभावरूपत्वं तु औज्ज्वल्यस्य वामनाभिमतस्य स्वीकर्तुं शक्यम् । एवं च कान्तेर् दोषाभावरूपताऽपि सुस्था । 'बहूनामपि पदानामेकपदवद्भासमानात्मा' इति मम्मटप्रयोगोऽसमर्थसमास सत्वाद् दुष्टः, कारकाणां समासैकदेशेन अन्वये कथंचित् स्वीकर्तुमशक्यत्वात् । गोष्ठीप्रियाणां कवीनां काव्यमीमांस-

मोजः, अर्थवैमल्यात्मा प्रसादः, उक्तिवैचित्र्यरूपं माधुर्यम्, अपारुष्यरूपं सौकुमार्यम्, अग्राम्यत्ववपुरुदारता च स्वीकृतानि । अभिधास्यमानस्वभावोक्त्यलङ्कारेण रसध्वनिगुणीभूतव्यङ्ग्याभ्यां च वस्तुस्वभावस्फुटत्वरूपाऽर्थव्यक्ति , दीप्तरसत्वरूपा कान्तिश्च स्वीकृते । क्रम-कौटिल्या-ऽनुल्बणत्वोपपत्तियोग-रूपघटनात्मा श्लेषोऽपि विचित्रतामात्रम् । अवैषम्यरूपा समता दोषाभावमात्रं न पुनर् गुणः । कः खलु अनुन्मत्तोऽन्यस्य प्रस्तावे अन्यद् अभिदध्यात् । अर्थदृष्टिरूपः समाधिः अपि न गुण. ।

(सू० ९८) **तेन नार्थगुणा वाच्याः** ....

वाच्या· वक्तव्याः ।

कानां च प्रयोगा धर्मप्रियाणां कृते न सर्वथाऽनुसरणीया इति तु चित्ते स्थापनीयं विवेकशीलैः ।

शब्दगुणानां वामनाभिमतानां स्वाभिमतगुणान्तर्भावादिकं प्रदर्श्य इदानी वामनोक्ताना दशानामर्थगुणानामन्तर्भावादिकं प्रदर्शयति—**पदार्थे वाक्यरचन**मित्यादिना । वामनमते अर्थगुणानामपि नामानि तु श्लेष इत्यादीन्येव किन्तु तेषां लक्षणानि भिन्नानि । तत्र 'अर्थस्य प्रौढिरोज.' (का० अ० सू० ३।२।२) इति अर्थौजोलक्षणम् वामनकृतम् । प्रौढिश्च 'अथ नयनसमुत्थं ज्योतिरत्रेः' (रघु० ९।७५) इत्यादौ इव चन्द्रादौ पदार्थे प्रतिपादनीये 'अत्रेर् नयनसमुत्थं ज्योतिः' इत्यादेर् वाक्यस्य रचनम्, "कान्तार्थिनी सती मङ्केतस्थानं गच्छन्ती' इत्यादौ वाक्यादौ वाक्यार्थे प्रतिपादनीये अभिसारिकेत्यादेः पदस्य प्रयोगः, एकस्य वाक्यस्यार्थस्य बहुभिर् वाक्यैः प्रतिपादनम्; बहूनां वाक्यानामर्थस्य एकेन वाक्येन प्रतिपादनम्, पदानामभिप्रायविशेषगर्भत्वञ्चेति पञ्चधा । तत्र पूर्वेषां चतुर्णां प्रौढिप्रकाराणां वैचित्र्यमात्रत्वम्, न तु गुणत्वम्, वामनाभिमतस्य [illegible] गुणत्वस्य तेषु अभावात्, तेषामभावेऽपि काव्यव्यवहारस्य प्रवृत्तेः, यच् च साभिप्रायत्वरूपमोजस् तदपि अपुष्टार्थत्वरूपदोषाभावरूपमिति भङ्ग्यन्तरेण कविसंरम्भविषयत्वेन स्वीकृतम्, प्रयोजकमात्रपदपरिग्रहजन्योऽर्थवैमल्यात्मा प्रसादोऽपि (का० अ० सू० ६।२।३) अधिकपदत्वदोषाभावरूप इति भङ्ग्यन्तरेण स्वीकृत एव, उक्तिवैचित्र्यरूपं माधुर्यमपि वामनोक्तम् (३।२।१०) अनवीकृतत्वाभावरूपमिति तदपि प्रकारान्तरेण गृहीतमेव; मृतः इत्यादौ परुषेऽप्यर्थे यशः शेष इत्यादेरपरुषस्यार्थस्य प्रयोगेण आगतम् अपारुष्य सौकुमार्यम् इति वामनोक्तं सौकुमार्यमपि अमङ्गलरूपाश्लीलत्वाभावरूपमेवेति तदपि यथातथं दोषाभावरूपतयैव स्वीकृतम्; अग्राम्यत्वमुदारता (३।२।१३) इति वामनोक्ता उदारताऽपि ग्राम्यत्वाभावरूपैवेति तेनाऽपि स्वीकृतमेवेति साऽपि दोषाभावरूपतयैव स्वीकृता । स्वीकृतं च स्वीकृतश्च स्वीकृता च स्वीकृतानि, नपुंसकमनपुंसकेनैकवच्चान्यतरस्यामिति प्रामाण्यात् (अष्टा० १।२।६९) । 'वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः' इति वामनेन परिभाषिता अर्थव्यक्तिश्च दशमे उल्लासे अभिधास्यमानेन स्वभावोक्त्यलङ्कारेण

गतार्था, अलङ्काररूपैव च सा, तादृशीमर्थव्यक्तिं विनाऽपि काव्यव्यवहारप्रवृत्ते: काव्यत्वप्रयोजकतया [illegible] तत्राऽभावात्; 'दीप्तरसत्वं कान्तिः' (३।२।१५) इति वामनेनोक्ता कान्तिरपि रसमूलतया न गुणत्वेन ग्राह्या रसस्य गुणत्वस्यौचित्यादिति अत्र ग्रन्थे प्रतिपादितेन रसध्वनिना, भावध्वनिना, रसाभासादिध्वनिना अपराङ्गरसादिव्यङ्ग्येन च यथौचिति यथायथं सङ्गृहीता। वामनोक्तं श्लेषाख्यमर्थगुणं निराकर्तुं तदुक्तं श्लेषलक्षणसूत्रमिदम्—क्रमकौटिल्येत्यादि। **क्रमः** इदं कृत्वा इदं कर्तव्यमिति परिपाटी, **कौटिल्यम्** लोकशास्त्रविलक्षणा वक्रता, कस्याप्यर्थस्य अन्यविकल्पेनानवभासनम् **अनुल्बणत्वम्**, कथम् एवंविधोऽर्थः सङ्गच्छेतेति अनुपपत्तिसमाधानौपयिकार्थनिवेशनमुपपत्तिः। एभिर् योजनम् अर्थस्य **योगः**, स एव **घटने**त्युच्यते, सैव च श्लेष इति वामनमतम् (३।२।४) तदुदाहरणं च तेनैवोक्तम्—"दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादराद् एकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः। ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसाम् अन्तर्-हास-लसत्-कपोलफलकां धूर्तोऽपरां चुम्बति" इत्यमरुकपद्यम्। अत्र च पश्चादुपेत्य एकस्याः स्वकीयायाः नयने पिधाय अपरा प्रच्छन्नानुरागा तत्सखी चुम्बनीयेति **क्रमः**, लीलाच्छलेन एकस्या नयने पिधाय अपरस्याश्चुम्बनं **कौटिल्यम्**, एकस्या नयनयोर् पिधानेन अपरस्याश्चुम्बनेन चोभयत्र लीलासंविभाग इव कृत इति धूर्तताया **अनुल्बणत्वम्**, उक्तविधाया लीलाया अनुपपत्तेः समाधानाय 'एकासनसंस्थिते' इति, 'पश्चादुपेत्य' इति, 'नयने पिधाय' इति 'ईषद्वक्रितकन्धरः' इति चाऽर्थानां निवेशन**मुपपत्ति**रित्येतैः एतत्पद्यप्रतिपाद्यस्याऽर्थस्य योगाद् अत्र श्लेषो गुण इति तस्याऽऽशयः। पद्यस्यार्थस्तु—धूर्तो नायकः अतिप्रिये नायिके एकासनोपविष्टे दृष्ट्वा आदरात् ताभ्यामलक्षितः सन् पृष्ठतः उपेत्य विहितनेत्रनिमीलनाख्यक्रीडानुबन्धच्छलः सन् एकस्याः स्वकीयाया नायिकाया नयने हस्ताभ्यामाच्छाद्य ईषन्नमितशिरोधरः सञ्जातरोमाञ्चश्च सन् अनुरागोल्लसन्मानसां स्मितशोभितकपोलाम् प्रच्छन्नानुरागाम् स्वकीयामखीमन्यां नायिकां चुम्बति इति। अत्र उक्तविधघटनाविशेषरूपः श्लेषो न गुणः किन्तु विचित्रत्वमात्रमेव, अस्याऽभावेऽपि काव्यव्यवहारप्रवृत्तेः, एतादृशस्य विचित्रत्वस्य रसनिष्ठधर्मतायाश्चाऽभावाच्चेति मम्मटपक्षः। 'अवैषम्यं समता' इति वामनेन सूत्रिता (३।२।५) 'अवैषम्यं प्रक्रमाभेदः समता' इति वृत्त्या विवृता समताऽपि न गुणः, प्रक्रान्तविरुद्धोपादानाभावरूपा सा दोषाभावरूपैवेति, "च्युतसुमनसः कुन्दाः पुष्पोद्गमेष्वलसा द्रुमाः, मलयमरुतः सर्पन्तीमे वियुक्तधृतिच्छिदः। अथ च सवितुः शीतोल्लासं लुनन्ति मरीचयो न च जरठतामालम्बन्ते क्लमोदयदायिनाम्" इत्यादौ (का० अ० सू० वृ० ३।२।५) ऋतुसन्धिप्रतिपादनप्रक्रमे "मलयमरुतः सर्पन्तीमे वियुक्तधृतिच्छिदः" इत्यादेर् वसन्तस्फुटलिङ्गाद्युपादानम् उन्मत्तप्रलपितमिति "मनसि च गिरं वध्नन्तीमे किरन्ति न कोकिला" इत्यादिना तत्परिहारो न गुणतामारोढुमीष्टे इति मम्मटस्याऽऽशयः। "सुगमत्वं समता" (का० अ० सू० ३।२।६ द्र०) इति पक्षेऽपि नास्या गुणतोपपद्यते, प्रसादव्यञ्जकत्वे

(सूत्र ९९) ··· ···· ···· **प्रोक्ताः शब्दगुणास्तु ये ।**
वर्णाः समासो रचना तेषां व्यञ्जकतामिता ।।७२।।

के कस्येत्याऽऽह—

(सूत्र १००) **मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू ।**
अवृत्तिर् मध्यवृत्तिर् वा माधुर्ये घटना तथा ।।७३।।

ट-ठ-ड-ढ-वर्जाः स्पर्शाः कादयो मान्ताः शिरसि निजवर्गान्त्ययुक्ताः, तथा रेफ-णकारौ ह्रस्वान्तरितौ इति वर्णाः; समासाभावो मध्यः समासो वेति समासः; तथा माधुर्यवती पदान्तरयोगे च रचना माधुर्यस्य व्यञ्जिका ।

(द्र० सू० १०२) एव तस्या उपक्षीणत्वादिति बोध्यम् । वामनेन अर्थगुणत्वेनोक्तं समाधिं दूषयितुमाह—**अर्थस्यायोने**रित्यादि । कविना आत्मनैव अवधानेन निरीक्षणाद् दृष्टस्य अर्थस्य स्वप्रतिभायोनित्वेऽपि अनन्ययोनित्वाद् [illegible] अन्यकाव्यच्छायानुहरणेन कल्पितस्य अन्यच्छायायोनेर्वार्थस्य काव्ये उपलब्धिः समाधिरिति "अर्थदृष्टिः समाधिः" (३।२।७) इत्यादेर् वक्तुर् वामनस्याऽभिप्रायः । अयोनिः अन्यच्छायायोनिर् वाऽर्थोऽपि काव्यस्य शरीरमेवेति न च शरीरमेव गुण इति वामनोक्तः समाधिरपि न गुण इति मम्मटस्याऽभिसन्धिः ।

वामनोक्तानां शब्दगुणानामर्थगुणानाञ्च स्वोक्तगुणान्तर्भावादिकमुपसंहरति—**तेन नाऽर्थगुणा वाच्या** इति । वाच्या इत्यस्य वक्तुमर्हा इत्यर्थं इति स्फुटीकरोति—**वाच्या वक्तव्या** इति (सू० ९८)।

वर्णादीनां लक्षणया माधुर्यादिव्यवहारो न स्वत इति सिद्धान्तं वर्णादीनां माधुर्यादिभिर् व्यङ्ग्यव्यञ्जकभावसम्बन्धस्य लक्षणाहेतोः प्रदर्शयितुमिच्छन्नाह—**प्रोक्ता शब्दगुणाः** इत्यादि । यद्यपि उपराचाद् माधुर्यादीनां शब्दस्य चाऽर्थस्य च गुणत्वं स्वीकृतं तथापि अर्थस्य माधुर्यादिगुणव्यञ्जकता [illegible] निरूपिता, वर्ण-समास-रचनानां तु रसव्यञ्जकताऽपि तत्राऽपि अनिरूपिताऽवशिष्टैव (द्रष्टव्यम्-सू० ६३; १४९ तमाद् उदाहरणात् परत्र वृत्तिग्रन्थश्च) इति सेदानीं निरूपणीयेति प्रयोजनवशाद् औपचारिकान् शब्दगुणानेव परामृशति—**प्रोक्ता शब्दगुणास्तु ये** इति । शब्दगतत्वेनोपचरिता ये माधुर्यादयो गुणास् तेषां व्यञ्जकत्वं **वर्णाः** व्यञ्जनविशेषरूपाः, **समासः** अनेकपदयोजनजन्यप्रातिपदिकरूप, **रचना** पदविशेषानुपूर्वीविशेषगुम्फरूपा च प्राप्ता भवन्तीत्यर्थः ।।७२।।

माधुर्यव्यञ्जकान् वर्णादीन् निर्दिशति—**मूर्ध्निवर्गे**त्यादिना । संयोगादौ स्थितेन स्व-स्ववर्गपञ्चमेन वर्णेन संयुक्ताः टवर्गीयवर्णभिन्नाः स्पर्शाः (कचतपवर्गीया वर्णाः), लघोः स्वरात् परौ लघोरेव स्वरात् पूर्वौ चेति उभयतो ह्रस्वेन स्वरेणान्तरितौ रेफ-णकारौ चेति वर्णाः, असमासानि द्वित्राणां पदानां समासेन वा निष्पन्नानि पदानीति सत्त्वेनाऽसत्त्वेन वाऽपेक्षणीयः समासः, 'प्रतिम**न् तद**ङ्गम्' 'तद**ङ्गम् भ**ङ्गीभिः' इत्यादाविव माधुर्य-

उदाहरणम्—

अनङ्गरङ्गप्रतिमम् तदङ्गम् भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तितानि ॥उदा०४२१॥

(सूत्र १०१) योग आद्य-तृतीयाभ्यामन्त्ययो रेण तुल्ययोः ।
टादिः श-षौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ॥७४॥

वर्गप्रथमतृतीयाभ्यां तद्द्वितीयचतुर्थयोः रेफेणाध उपरि उभयत्र वा यस्य कस्यचित्, तुल्ययोस्तेन तस्यैव सम्बन्धः, टवर्गोऽर्थाद् णकारवर्जः, शकार-षकारौ; दीर्घः समासः; विकटा सङ्घटना ओजसः । उदाहरणम्—

मूर्ध्नामुद्वृत्तकृत्तेत्यादि ॥ उदा० ४२२॥

व्यञ्जकवर्णविकारवत्तया पदानां परस्परं सन्धिः (गुम्फो रचना वा) च माधुर्ये व्यञ्जकताम् इता भवन्तीति पूर्वेणान्वयः । एतेन वृत्तिग्रन्थोऽपि व्याख्यातः । अत्रोक्तभिन्नानां वर्णादीनां सकृदप्यनुपादानं भूयसे गुणाय, सकृदुपादानमदोषाय, असकृदुपादानं तु दोषायेति बोध्यम् । ''स्वयं हाराकारा गलतिजलधारा कुवलयाद्'' इत्यादौ दीर्घान्तरितस्यापि रेफस्य माधुर्यव्यञ्जकतायाः दर्शनाद् असंयुक्तौ रणौ इति व्याख्येयमिति केचित्, तत्र कोमलत्वमात्रं न माधुर्यव्यञ्जकत्वमिति यथाश्रुतमेव साधु इत्यन्ये ॥७३॥

माधुर्यव्यञ्जकवर्णादीनुदाहरति—**अनङ्गरङ्गे**त्यादिना । मदनरङ्गस्थानसदृशं तद् अनुभवैकगोचरं रमण्या अङ्गं वशीकरणहेतु-नयन-नर्तन-वदन-वलन-गमन-विलसनादिरूप-विशेषरूपाभिर् भङ्गीभिस् तथा अङ्गीकृतं यथा एता रमण्यङ्गमारूढा भङ्ग्यः युवकानां चेतांसि सहसैव उपशान्तान्यविषयचिन्तनरूपवृत्त्यन्तराणि (वृत्त्यन्तररहितानि अर्थाद् रमण्यङ्गभङ्ग्येकप्रवणानि) कुर्वन्तीत्यर्थः । अत्र संयोगादौ स्थितैः स्वस्ववर्गपञ्चमैः संयुक्ताः गकारास् तकाराश् च वर्णाः, अन्यत्र समासाभावः 'अनङ्गरङ्गप्रतिमम्' इत्यत्र, 'आनताङ्ग्याः' इत्यत्र, 'शान्तापरचिन्तितानि' इत्यत्र च द्वित्राणामेव पदानां समासः इत्येतादृशः समासः, 'प्रतिमन् तदङ्गम्' इति 'तदङ्गम् भङ्गीभिः' इति च मधुरा पदघटना च माधुर्ये व्यञ्जकतां गता बोध्याः ॥ उदा० ४२१ ॥

ओजोव्यञ्जकवर्णादीन् निर्दिशति—**योग आद्ये**त्यादिना । स्व-स्ववर्गप्रथमतृतीयाभ्यां वर्ग-द्वितीय-चतुर्थयोः संयोगेन युक्ता वर्णाः, रेफेण सह यस्य कस्यापि व्यञ्जनस्य संयोगेन युक्ता वर्णाः, उद्वृत्तकृत्तादाविव वर्गप्रथमयोः वर्गतृतीययोर्वा अन्ययोः तुल्ययोर्वा संयोगेन युक्ता वर्णाः णकारवर्जः टवर्गः, शकार-षकारौ चेति वर्णाः; बहूनां पदानां समासः, ओजोव्यञ्जकपरुषवर्णसंयोगनिष्पादकवर्णविकारवत्तया परुषवर्णवत्त्वेन परम्परानुरूपतया च विकटतां प्राप्तः पदानां परस्परं सन्धिः (गुम्फो रचना वा) च ओजसि व्यञ्जकतामिता भवन्तीत्यर्थः । योग आद्येत्यादौ सूत्रेऽपि लिङ्गविपरिणामेन व्यञ्जकतामितानि भवन्तीति पूर्वेणान्वयः ॥७४॥

ओजोव्यञ्जकवर्णादीनुदाहरति—**मूर्ध्नामुद्वृत्ते**त्यादिना । व्याख्यातमिदं प्राक् सप्तमे

(सू० १०२) श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत् ।
साधारणः समग्राणां स प्रसादो गुणः स्मृतः ॥ ७५ ॥

समग्राणां रसादीनां समासानां सङ्घटनानां च ।

उदाहरणम्—

परिम्लानम् पीनस्तनजघनसङ्गादुभयतस्
तनोर् मध्यस्याऽन्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ॥उदा० ४२३॥

उल्लासे (उदा० २२४) । अत्र मूर्ध्नामित्यत्र अङ्घ्रिप्रसादेत्यत्र [illegible] प्रयास इत्यत्र च यथायथं संयोगादिगतेन संयोगान्तगतेन वा रेफेण संयोगः, इदानीन्तने प्रायः सर्वेषां संस्कृत[illegible] उच्चारणे तु उद्वृत्तकृत्तेत्यत्राऽपि (उद्विरत्तविरत्तेत्यु-च्चारणात्) रेफसंयोगः, उद्वृत्तकृत्तेत्यत्र तकारस्य तकारेणैव संयोगः, उल्लासनेत्यत्र लकारस्य लकारेणैव संयोगः; मित्थ्येत्यत्र इच्छेत्यत्र च वर्गप्रथमद्वितीययोः, उद्धुरेत्यत्र वर्ग[illegible] संयोग इति यथोक्तेन संयोगेन युक्ता वर्णाः, ईशेत्यत्र पिशुनेत्यत्र च शकारः, दोष्णामित्यत्र एषामित्यत्र रक्षण इत्यत्र च षकारः, उद्वृत्तेत्यादिः कैलासोल्ला-सनेत्यादिश्च दीर्घः समासः, गलद्रक्तेत्यत्र जगज्जातेत्यत्र च ओजोव्यञ्जकसंयोगवत्तया उद्वृत्तकृत्तेत्यत्र सक्तसंसक्तेत्यत्र अङ्घ्रिप्रसादेत्यत्र [illegible] च ओजो-व्यञ्जकत्वे परस्परप्रतिस्पर्धिपदवत्तया च कृता रचना (पदगुम्फः) चेति ओजसि व्यञ्जकतां गता बोध्याः ॥ उदा० ४२२ ॥

प्रसादव्यजकं [illegible]—**श्रुतिमात्रेण**त्यादिना । वर्णरूपस्य पदरूपस्य, रचना-रूपस्य, वा शब्दस्य **येन** अर्थप्रतीत्युपकारकत्वरूपेण गुणेन हेतुना शब्दस्य श्रवणमात्रेण शब्दात् झटिति अर्थप्रतीतिर् भवति स सर्वेषामप्युक्तानां शब्दप्रकाराणां सर्वेषां रसानां च साधारणः प्रसादव्यञ्जकतया प्रसादत्वेनोपचरितो रस[illegible]गुणवादि[illegible]मतो गुणो बोध्यः इत्यर्थः । अर्थवोधोपकारकाः सर्वप्रकारा एव वर्णाः समासा रचनाश्च प्रसादे व्यञ्जकता-मिता-भवन्तीति फलितोर्थः । एवं च शब्दानां प्रसादव्यञ्जकत्वे अप्रसिद्धपद-क्लिष्टवाक्या-[illegible] ॥ ७५ ॥

प्रसादव्यञ्जकम् उदाहरति—**परिम्लान**मित्यादिना । रत्नावल्याम् (२।१२) साग-रिकामुद्दिश्य वत्सराजस्योक्तिरियम् । सागरिकायाः वसन्तविभवदर्शनभयाद् न्युब्जकायं शयनात् पीनयोः स्तनयोर् निपीडनात् पीनस्य जघनस्य च निपीडनाद् उभयतः परिम्लानं तस्याः मध्यस्य कृशत्वात् परिमर्दनमप्राप्य अन्यः (मध्ये) हरितम्, तस्याः गलितयोः भुजलतयोराक्षेपैः परिवर्तनैश्च हेतुभिः विपर्यस्तरचनम् इदं कमलिन्याः पत्रै रचितं शयनं तस्याः कृशाङ्ग्याः सागरिकायाः सन्तापं वदतीत्यर्थः । अत्र सङ्गात् कृशाङ्ग्या इत्यादौ रसानुकूलाः संयुक्ता वर्णाः, रसानुकूलो मध्यमः समासः, म्लानम्पीनेत्यादिका रसानुकूला

यद्यपि गुणपरतन्त्राः सङ्घटनादयस् तथाऽपि—

(सू० १०३) वक्तृ-वाच्य-प्रबन्धानामौचित्येन **क्वचित् क्वचित्।**
रचना-वृत्ति-वर्णानामन्यथात्वमपीष्यते ॥ ७६ ॥

क्वचिद् वाच्यप्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादयः, यथा—

मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्-प्रलय-घन-घटाऽन्योन्यसङ्घट्टचण्डः।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्-सिंहनादप्रतिरसितसखो दुन्दुभिम् नाड़ितोऽयम् ॥
॥ उदा० ४२४ ॥

अत्र हि न वाच्य क्रोधादिव्यञ्जकम्, अभिनेयार्थञ्च काव्यमिति तत्प्रतिकूला उद्धता रचनादयः, वक्ता चाऽत्र भीमसेनः।

रचना यथान्वयं पदानां प्रयोगैः कृता अक्लिष्टा वाक्यरचना च झटित्यर्थबोधनद्वारा प्रतिपत्तृचेतः प्रतिपाद्यरसप्रवणं कर्तुं सहायका भवन्तीति अत्र वर्णादीनां प्रसादव्यञ्जकत्वं ॥ उदा० ४२३ ॥

यदि त्वदुक्तो माधुर्यादिव्यञ्जकविभागो यथार्थोऽभविष्यत् तर्हि उद्धृतादयो रचनादयः सर्वत्रैव माधुर्यादिर् विरुद्धाः अभविष्यन्, न तु तथा हृदयालूनां प्रतीतिः; अतो रचनादीनां गुणव्यञ्जकतया गुणाङ्गत्वम्, गुणानां च रसधर्मत्वमेवेति च रिक्तं वचः इत्याक्षेपं परिहर्तुं सत्यपि क्वाचित्के उक्तविधवर्णादिमाधुर्यादिव्यञ्जकव्यङ्ग्यभावाऽभावे न तावता प्रतिप्रसवेन उत्सर्गो निरवलम्बो भवति, न हि कतिपये अपवादा उत्सर्गान् अयथार्थान् कर्तुं प्रभवन्तीति हृदि निधाय वामनादीनां गुणानां सङ्घटनादीनां च ऐकात्म्यमिति पक्षस्य गुणानां सङ्घटनादीनां च अनियतं सम्बन्धं प्रदर्श्य खण्डनाय च आह— **यद्यपि गुणपरतन्त्रा** इत्यादि। क्वचिद् वक्त्रौचित्यादेव वाच्यरसप्रबन्धानपेक्षया रचनावृत्तिवर्णानां गुणाऽपारतन्त्र्यम्, क्वचिद् वाच्यौचित्यादेव वक्तृ-प्रबन्ध-रसानपेक्षया रचनादीनां गुणाऽपारतन्त्र्यम्, क्वचित् पुनः प्रबन्धौचित्यादेव वक्तृ-वाच्य-रसानपेक्षया रचनादीनां गुणापारतन्त्र्यमपि इष्यते इति वक्तृ-वाच्येत्यादिकारिकाया अर्थः ॥ ७६ ॥

वक्त्रौचित्यादेव रचनादीनां गुणापारतन्त्र्यमुदाहरति—**मन्थायस्ते**त्यादिना। वेणीसंहारे (१।२२) भीमस्योक्तिरियम्। मन्थनेन दूरं समन्ततः क्षिप्तं यत् समुद्रजलं तेन व्याप्तानि कुहराणि यस्य तादृशस्य मन्थने चलतो मन्दरस्य ध्वनिरिव गम्भीरः, वादनदण्डकृतेषु आघातेषु सत्सु गर्जन्तो ये प्रलयकालभवा मेघास्तेषां समूहानामन्योन्यसङ्घर्ष इवातितीव्रशब्दवान्, कृष्णाया (द्रौपद्याः) क्रोधस्य अग्रदूत इव, दुर्योधनादेः कुरुकुलस्य निधनस्य सूचकेन उत्पातरूपेण निर्घातेन (मेघशब्देन) युक्तो वात इव प्रतीयमानः, अस्माकं सिंहनादस्य प्रतिध्वनेः सखा (सदृशः) असौ दुन्दुभिः केन ताडितः ? इत्यर्थः। अत्र वक्त्रौचित्यादेव वाच्यप्रबन्धानपेक्षा उद्धता रचनादयः प्रयुक्ताः। एते च वक्तुः

क्वचिद् वक्तृ-प्रबन्धानपेक्षया वाच्यौचित्यादेव रचनाऽऽदयः, यथा—

प्रौढच्छेदानुरूपोच्चलनरयभवत्-सैंहिकेयोपघात-
[illegible]रविरथेनारुणेनेक्ष्यमाणम् ।
कुर्वत् काकुत्स्थवीर्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजां
भाङ्कारैर् भीममेतन् निपतति वियतः कुम्भकर्णोत्तमाङ्गम् ॥उदा०४२५॥

क्वचिद् वक्तृवाच्यानपेक्षया प्रबन्धोचिता एव एते । तथा हि—आख्यायिकायां शृङ्गारेऽपि न मसृणा वर्णादयः, कथायां रौद्रेऽपि नात्यन्तम् उद्धताः, नाटकादौ रौद्रेऽपि न दीर्घसमासादय. ।

उद्धतत्वस्य व्यञ्जनाय उपयुज्यन्ते । एवञ्च [illegible] अपि ते शोभन्ते एव । दीर्घसमासाद् अर्थप्रतिपत्तौ विलम्बाद् अभिनयेन झटिति तदर्थप्रत्यायनस्य चाऽसम्भवित्वाद् रूपकप्रतिकूलेयं रचना । वाक्यार्थस्य प्रश्नात्मकत्वात् क्रोधादेरभावाच्च दीर्घः समासो वाच्यस्य अननुकूल एव ॥उदा० ४२४॥

वाच्यौचित्यादेव रचनादीना [illegible] ।
छलितरामनाम्निनाटके पद्यमिदमिति केषाञ्चित् प्रवादः । कृत्यारावणाख्ये नाटके वैतालिकस्योक्तिरियमिति श्रीधरः । वलातिशयेन कृतो यश्छेदः तदनुरूपस्य कुम्भकर्णशिरउच्चलनस्य वेगेन जायमानो यो राहुग्रामभ्रमजन्यत्रासः तेन मार्गपरिवर्तनाय आकृष्टा ये अश्वास्तैर् वक्रतया संस्थापितो रविरथो येन तथाभूतेन अरुणेन दृश्यमानम्, ग्रीवारन्ध्रेषु प्रविष्टानां वायूनां भाम्भामितिशब्दैः रामपराक्रमस्य स्तुतिं कुर्वदिव एतद् भयङ्करं कुम्भकर्णोत्तमाङ्गम् आकाशाद् निपततीत्यर्थः । अत्र च वैतालिकोक्तौ क्रोधाद्यभावाद् वक्तुः नाटकवाच्यत्वात् प्रबन्धस्य च प्रतिकूला अपि गुणापारतन्त्र्येण स्थिता अपि च उद्धता रचनादयो वाच्यस्य कुम्भकर्णोत्तमाङ्गस्य भयङ्करत्वेन उद्धतत्वात् शोभन्ते एव । उ० ४२५।

क्वचिच् च वक्तृवाच्ययोरनपेक्षया गुणाऽपारतन्त्र्येण च प्रबन्धौचित्यबलादेव च रचनादयः शोभन्ते इत्याह—**क्वचिद् वक्तृवाच्ये**त्यादिना । तत्र चिरन्तनेन आलङ्कारिकेण भामहेन आख्यायिकालक्षणम्—"संस्कृतानाकुलश्रव्यशब्दार्थपदवृत्तिना ! गद्येन युक्तोदात्तार्था सोच्छ्वासाऽऽख्यायिका मता । वृत्तमाख्यायते तस्या नायकेन स्वचेष्टितम् । वक्त्रं चाऽपरवक्त्रं च काले भाव्यर्थशंसि च । कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता । कन्याहरणसङ्ग्रामविप्रलम्भोदयान्विता" इति (१।२५-२७), कथालक्षणं च—"न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि । संस्कृतासंस्कृता चेष्टा कथाऽपभ्रंशभाक् तथा ॥ अन्यै. स्वचरितं तस्यां नायकेन तु नोच्यते । स्वगुणाऽऽविष्कृतिं कुर्यादभिजातः कथं जनः" (१।२८,२९) इति उक्तम् । अभिनवगुप्तोऽपि लोचने तदेवानुमेने (३।७) । दण्डिना तु काव्यादर्शे भामहमतेऽपि आख्यायिकाकथयोर् वर्ण्यवस्तुमूलको भेदो नास्तीति तयोर् भेदं

एवमन्यदपि औचित्यमनुसर्तव्यम् ॥

इति काव्यप्रकाशे गुणालङ्कारभेदनियतगुणनिर्णयो नाम अष्टम उल्लासः ॥८॥

खण्डयित्वा (१।२३-२७) "तत् कथाख्यायिकेत्येका जातिः सञ्ज्ञाद्वयाङ्किता । अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः." (१।२८) इत्युक्तम् व्याकरणमहाभाष्यकारो "लुबाख्यायिकाभ्यो बहुलम्" (४।३।८७) इति वार्त्तिके "वासवदत्ता", सुमनोत्तरा, भैमरथी" इत्युदाहरन्तौ वररुचिपतञ्जली आख्यायिकायां सर्वा अपि आख्यानजातीरन्तर्भावयन्ताविव प्रतीयेते । अथवा आख्यायिकाभ्य इति बहुवचनाद् आख्यायिकाप्रकारेभ्यः कथाप्रभृतिभ्य इत्यर्थोऽपि युज्यते एव । नामलिङ्गानुशासनकारोऽमरसिंहस्तु "आख्यायिकोपलब्धार्था" (१।६।५) इति "प्रबन्धकल्पना कथा" (१।६।६) इति च वदन् प्रमाणान्तरेण ज्ञातस्य सत्यस्य वृत्तान्तस्य वर्णनया युक्ताम् आख्यायिकाम्; उपदेश-रसास्वादादितात्पर्येण कविना कल्पितस्य वृत्तान्तस्य वर्णनया युक्तां कथां मन्यते इति विज्ञायते । तत्र विकटबन्धप्रधानाऽऽख्यायिकेति तत्र शृङ्गारेऽपि न कोमलवर्णादयः प्रयोक्तव्याः । कथा तु सुकुमाररचनाप्रायेति तत्र रौद्रेऽपि नातीवोद्धताः वर्णादयः प्रयोक्तव्याः दीर्घसमासेन अर्थस्य प्रतिपत्तौ विलम्बस्य करणाद् अभिनयेन तस्यार्थस्य झटिति प्रत्यायनस्य चासम्भवित्वाद् नाटकादिषु रूपकेषु उपरूपकेषु च रौद्रेऽपि न दीर्घसमासादयः प्रयुज्यन्ते, न च प्रयोक्तव्याः कविभिरिति भावः ।

एवमेव मुक्तक-सन्दानितक-विशेषक-कलापक-कुलक-पर्यायबन्ध-परिकथा-खण्डकथा-सकलकथा-सर्गबन्धा-ऽऽदिषु च यथायथमौचित्यमनुसर्तव्यम् इत्याह—एवमन्यदप्यौचित्यमित्यादि । एवं च गुणनैरपेक्ष्येणापि रचनादीनां स्थितेर् दर्शनाद् न गुणाना रचनादीनां च ऐकात्म्यम्, क्वचिद् व्यभिचारेऽपि रचनादिविशेषाणां प्रायेण गुणविशेषव्यञ्जकतया गुणाङ्गत्वमेवेति च स्थितमिति भावः ॥

इति श्रीहिमवत्खण्डस्थनेपालदेशमध्यवर्ति-त्रिरतुङ्गाचलाङ्कितजनपदान्तर्गत-ताम्रकूट-नगराभिजन-नागनाथि-गाङ्गेय-कौण्डिन्यायना-ऽऽचार्य-शिवराजकृतौ हैमवत्यां काव्यप्रकाशविवृतौ
अष्टम उल्लासस् सम्पूर्णः ॥ ८ ॥

■

अथ नवम उल्लासः

गुणविवेचने कृते अलङ्काराः प्राप्तावसरा इति सम्प्रति शब्दालङ्कारानाह—

काव्यलक्षणोद्देशक्रमेणेदानीमलङ्कारा निरूपणीया इत्याह—**गुणविवेचने** इत्यादिना 'उपकुर्वन्ति तं सन्तम्' (सू० ९९) इत्यादिना अलङ्काराणां काव्ये उपलभ्याना स्थितीनां मम्मटेन वर्णितत्वेऽपि [illegible] सर्वालङ्कारानुगतं न सम्यक् प्रतिपादितम्, केवलं "वैचित्र्यञ्चालङ्कारः" इति तत् सूच्यते (स्वप्नेऽपि समरेषु [illegible] - ख्याने, उदा० ४७४), "वैचित्र्यमलङ्कारः" इति च [शब्दश्लेपस्य अर्थश्लेषभिन्नतायाः प्रतिपादनस्यावसरे च (पृ० ३९१)]। तथापि तन्मतेन [illegible] रसभावादिभिन्नं शब्दार्थान्यितरनिष्ठं [illegible] वोध्यम्। अन्ये तु रसवादिनः 'साक्षात्, परम्परया वा रसभावाद्युत्कर्षजनकत्वे सति विलक्षणवैचित्र्याधायक-काव्यधर्मत्वमलङ्कारत्वम्' इति, 'यत्र रसो नास्ति यत्र च सत्यपि रसादौ अलङ्कारस्य रसाद्युपकारकत्वं नास्ति तत्र उक्तिवैचित्र्यमात्रप्रयोजकेषु अनुप्रासोपमादिषु [illegible] रो गौण एव इत्याहुः।

तत्र चिरन्तनालङ्कारिकमते इव मम्मटमतेऽपि अलङ्कृतिरलङ्कार इत्येव अलङ्कारशब्दार्थः, न तु अलङ्करणम् अलङ्कार इति। एवञ्च मम्मटमते वैचित्र्यं सौन्दर्यं वाऽलङ्कारः। स चाऽलङ्कारः क्वचित् कविभिः रसाद्युपकारकतया प्रयुज्यते, क्वचित् च रसादिनिरपेक्षतया। तत्र पूर्वस्मिन् कल्पे अलङ्कारस्य काव्याङ्गत्वमेव, द्वितीये तु कल्पे अलङ्कारस्य न काव्याङ्गत्वमात्रम्, किन्तु चित्राख्यतृतीयकाव्यभेदप्राणत्वमेव। एव च मम्मटेन अलङ्काराः प्रकारद्वयेनैव निरूपणीयाः अलङ्कारस्वरूपाणि तु उभयोः पक्षयोः समानान्येवेति, चित्रकाव्यस्य संसृष्टिरूपत्वे सङ्कररूपत्वे वाऽपि तस्य स्वरूपस्यावबोधः [illegible] संसृष्टि-सङ्करप्रकारदिक्प्रदर्शनसहितेनैव सुकर इति च यद्यपि उक्तयोः पक्षयोः अलङ्काराणां स्वरूपाणि न पृथक् प्रदर्शनीयानि तथापि उदाहरणानि तु उभयप्रकाराणि प्रदर्शनीयान्येव; तथापि रसादिरहितत्वेन उदाह्रियमाणा अलङ्कारा. प्रतिपत्तृवैमुख्यमावहन्ति इति (द्र० १२७ सू० वृत्त्यन्तिमभागः) प्रायेण रसोपकारकत्वेन स्थितानेवाऽलङ्कारानत्रोदाहरिष्यति। अलङ्कारलक्षणेभ्यस्तु उभयेऽप्यलङ्कारा बोद्धुं शक्या इति [illegible] निरूपयति। अलङ्काराश्च शब्दालङ्काराः शब्दार्थोभयालङ्काराः अर्थालङ्काराश्चेति त्रिधा। तत्र काव्ये शब्दो ह्यर्थस्यापि मूलमिति शब्दस्य प्राधान्यात् पूर्वं शब्दालङ्कारा निरूपणीयाः। शब्दालङ्कारश्च शब्दाश्रितोऽलङ्कारः। [illegible] च अन्वयव्यतिरेकपरीक्षणेन। एवं च शब्दान्वयव्यतिरेकानुविधायी अलङ्कारः शब्दालङ्कार इति निष्कर्षः। अधिकं दशमे उल्लासे सङ्करालङ्कारनिरूपणान्ते वक्ष्यामः। रसोपकारकत्वस्यैवालङ्कारत्वे शब्दालङ्काराणामपि अर्थोपस्कारद्वारा रसोपकारकत्वम् मम्मटानुयायिनोऽलकस्याभिप्रेतमिति **भण तरुणी**त्याद्युदाहरणस्थवृत्तिग्रन्थतो ज्ञायते।

(सू० १०४) यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते ।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस् तथा द्विधा ॥ ७७ ॥

तथेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च ।

तत्र सभङ्गश्लेषेण यथा—

नारीणामनुकूलमाचरसि चेज् जानासि कश् चेतनो
वामानां प्रियमादधाति हितकृन् नैवाबलानां भवान् ।
युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः
सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः ॥ उदा० ४२६ ॥

शब्दालङ्कारास् तु मम्मटोक्ताः षट् । तदयं सङ्ग्रहः—'वक्रोक्तिरनुप्रासो यमकं श्लेष-चित्रके । पुनरुक्तवदाभासः शब्दालङ्कृतयस्तु षट्' इति । पुनरुक्तवदाभासस्तु उभयालङ्काररूपोऽपीति बोध्यम् । शब्दालङ्कारेषु अनुप्रास-यमक-श्लेषाः वेदेष्वपि उपलभ्यन्ते ।

यद्यपि शब्दालङ्कारेषु अनुप्रास एव प्रथममुपादेयस्तस्याऽर्थानिरपेक्षत्वादिहेतोराद् आबालमनोरञ्जनकारित्वाच्च; वक्रोक्तिस्तु श्लेषादूर्ध्वमुपादेया; तथापि "वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा परं चित्रम्" इति आर्याजातिनिरवगरुद्रटोक्तिं पदानुपूर्विकन्यायेन अनुसरन् वक्रोक्तिमेव प्रथमं निरूपयति—यदुक्तमित्यादिना । "वक्रोक्तिः काव्यजीवितम्" इति "सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते । यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना" इति च परैः प्रतिपादितस्य अलङ्कारस्य शब्दालङ्कारविशेषमात्रतायाः प्रतिपादनाय वक्रोक्तेरिह प्रथममुपादानमिति झळकीकरादीनां कथनं तु असङ्गतम्, परैः प्रतिपादितायाः वक्रोक्तेः मम्मटोक्तायाश्च वक्रोक्तेः सुदूरं भिन्नत्वात् । एकेन वक्त्रा एकमर्थमादाय उक्तं वाक्यं श्रोत्रा शब्दस्याऽनेकार्थतां काकुं वा निमित्तं कृत्वा अन्यस्मिन् अर्थे यद् योज्यते सा वक्रोक्तिरित्युच्यते; सा च श्लेषवक्रोक्तिः काकुवक्रोक्तिश्चेति द्वेधा भवतीत्यर्थः । अपह्नुतौ स्वोक्तेः स्वयमेवाऽन्यथाकरणाद् नातिव्याप्तिरिति केचित् । अपह्नुतेरर्थालङ्कारत्वादिति तु युक्तम् । यदित्वपह्नुतिरपि शब्दालङ्कारः स्यात् तर्हि तु साऽप्यत्रापि निरूपिता स्याद्, न च निरूपिताऽस्ति । इयं खलु वक्रोक्तिर् न वाकोवाक्ये (प्रश्नोत्तरवाक्ये) एव किन्तु स्वतोऽपि अन्येनोक्तस्यान्यथा योजनेऽपि भवतीति गोविन्द-ठक्कुरः ॥ ७७ ॥

तत्रपदभङ्गश्लेषनिमित्तां वक्रोक्तिमुदाहरति—नारीणामित्यादिना । नारीणाम् अनुकूलम् आचरसि चेत् त्वं लोकस्थितिं जानासीति वक्तुरभिप्रायः, तत्र अरीणां हितं नाचरसि चेत् तत्रनभिज्ञोऽस्मि इत्यर्थमादाय आह इतरः—कः चेतनो जनः वामानां (स्वस्य प्रतिकूलानाम्) प्रियं करोति ? इति । तत्र वनितानां को हितं करोतीत्यर्थमनुसरन्नाह प्रथमः—तर्हि किं भवान् अबलानां हितकृत् (हितकारी) न ? इति । तत्र किं भवान् अबलाना हितस्य कर्तको न ? इत्यर्थमादाय आह द्वितीयः—बलाभावेन प्रसिद्धं स्वरूपं

अभङ्गश्लेषेण यथा—

अहो केनेदृशी बुद्धिर् दारुणा तव निर्मिता।
त्रिगुणा श्रूयते बुद्धिर् न तु दारुमयी क्वचित् ।। उदा० ४२७ ।।

काक्वा यथा—

गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ ? ।। उदा० ४२८ ।।

(सू० १०५) **वर्णसाम्यमनुप्रासः** ....।

स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं वर्णसाम्यम्। रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः।

यस्य तादृशस्य स्त्रीजनस्य हितस्य कर्तनं किमुचितम् ? इति । तत्र बलासुरनाशकतया प्रसिद्धं स्वरूपं यस्य तस्येन्द्रस्य हितस्य कर्तनं किमुचितमित्यर्थमादायाह प्रथमः— पुरन्दरस्य यद् मतम् (इष्टम्) तस्य नाशं कर्तुं भवतः सामर्थ्यमेव कुतः इति । सति सामर्थ्ये औचित्यानुसारं हितकर्तनं क्रियेत न वा, सामर्थ्यस्यैव अभावे तु सर्वथैव हितकर्तनं न कर्तुं शक्यते इति तदौचित्यानौचित्यविचारो वृथेति भावः । अत्र च लक्षण-सङ्गतिः स्फुटा । अत्र शब्दालङ्कारत्वं च शब्दानां परिवृत्त्यसहत्वात् । वैचित्र्यन्तु अर्थ[illegible]मेव ।। उदा० ४२६ ।।

पदाभङ्गश्लेषनिमित्तां वक्रोक्तिमुदाहरति—**अहो केनेदृशी**त्यादिना हे सखे, तव बुद्धिरेतादृशी दारुणा (क्रूरा) अहो केन निर्मितेति प्रथम आह; तत्र दारुणेत्यस्य काष्ठेने-त्यर्थमुपादायेतर आह—बुद्धिम् त्रिगुणात्मिकाया मायायाः कार्यत्वात् सत्त्वरजस्तमोरूप-गुणत्रयात्मिका भवतीति वेदान्ताचार्याणामुपदेशः श्रूयते; दारुघटिता बुद्धिरिति तु न कुत्रापि श्रूयते इति । अत्राऽपि लक्षणसङ्गतिः स्फुटा ।। उदा० ४२७ ।।

काकुनिमित्तां वक्रोक्तिमुदाहरति— **गुरुजने**त्यादिना । [illegible]—हे सखि, मान्यजन-परतन्त्रत्वेन दूरतरं देशं गन्तुमुद्यतोऽसौ मम प्रियो भ्रमरकुलैः कोकिलैश्च (शब्दायमानैः) रमणीये वसन्तसमये नागमिष्यतीति । सखी तदेव वाक्यं नायिकां प्रति काक्वा पठति—हे सखि, केवलं गुरुजनपरतन्त्रतया दूरतरं देशं गन्तुमुद्यतोऽसौ तव प्रियो भ्रमरकुलैः कोकिलैश्च रमणीये वसन्तसमये न आगमिष्यति ? (आगमिष्यत्येव) इत्यर्थः ।। उदा० ४२८ ।।

अनुप्रासं निरूपयति—**वर्णसाम्यमित्यादिना** । वाक्ये व्यञ्जनाऽऽवृत्तिरनुप्रास इत्यर्थः । अनुप्रासं निर्वक्ति—**रसाद्यनुगत** इत्यादिना । चित्रे तु नेदं निर्वचनं सार्थकम् । तत्र सौन्दर्यानुगतः प्रकृष्टो न्यासोऽनुप्रास इति निर्वचनं कर्तव्यम् । वर्णसाम्यमिति व्यञ्जन-सदृशत्वमिति च पदे न सुसङ्गते तत्स्थाने वर्णावृत्तिः इति च व्यञ्जनावृत्तिरिति च सम्यक् । (सू० १०५) ।

(सू० १०६) ....　　....　　.... **छेकवृत्तिगतो द्विधा ।**

छेका विदग्धाः, वृत्तिर् नियतवर्णगतो रसविषयो व्यापारः । गत इति छेकानुप्रासो वृत्त्यनुप्रासश् च ।

किं तयोः स्वरूपमित्याऽऽह—

(सू० १०७) **सोऽनेकस्य सकृत् पूर्वः**　....　...　..　।

अनेकस्य अर्थाद् व्यञ्जनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः ।

उदाहरणम्—

ततोऽरुणपरिस्पन्दमन्दीकृतवपुः　शशी ।
दध्रे　कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥४२९॥

(सू० १०८)　....　....　.... **एकस्याऽप्यसकृत् परः ॥७८॥**

एकस्य अपिशब्दादनेकस्य व्यञ्जनस्य द्विर् बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रासः ।

(सू० १०९) **माधुर्यव्यञ्जकैर् वर्णैरुपनागरिकेष्यते ।**

अनुप्रासभेदौ निर्दिशति—**छेकवृत्तिगतो** द्विधेति । **विदग्धाः** इति यथा विविधप्रकारेण शोधकद्रव्योपलेपपूर्वकं दग्धं स्वर्णं परिष्कृतं भवति तथैव विविधैः श्रुतैः परिष्कृता जना विदग्धा इत्युच्यन्ते । विदग्धाः बहुश्रुता इत्यर्थः इति निष्कर्षः । तथा चाऽऽहुः—"लौकिके वैदिके चार्थे तथा सामयिकेऽपि च । सम्यक्परिचयप्रौढिर् वैदग्ध्यमिति कीर्त्यते" इति । वृत्तिं निर्वक्ति—**वृत्तिर् नियते**त्यादिना । वर्णगतो रसविषयको व्यञ्जकताविशेषो वृत्तिरित्यर्थः । चित्रे तु नेदं निर्वचनं सार्थकम् । तत्र तु वृत्तिः वर्तनी मार्ग इति अर्थो बोध्यः । एवं च वैदर्भ्यादि-कवि-मार्गानुगतः प्रकृष्टो व्यञ्जनन्यासो वृत्त्यनुप्रास इत्यर्थः । (सू० १०६) ।

छेकानुप्रासं निरूपयति—**सोऽनेकस्ये**त्यादिना । अनेकेषां व्यञ्जनानाम् एकवारमावृत्तिश्च्छेकानुप्रास इत्यर्थः । उदाहरति—**ततोऽरुणपरिस्प**न्देत्यादिना । वाल्मीकेः पद्यमिदमिति वदन्ति । अनिर्ज्ञाताकरमिदं पद्यं काव्यमीमांसायामप्युदाहृतम् । अरुणस्योदयेन मन्दीकृतं वपुर् यस्य तादृशश्चन्द्रः प्रोषितभर्तृविषयकेण कामेन परिक्षीणायाः कामिन्याः कपोलस्य पाण्डुतामिव पाण्डुतां धारयामासेत्यर्थः । स्पन्द-मन्दीत्यत्र नकारदकारयोः काम-कामिनीत्यत्र ककार-मकारयोः गण्ड-पाण्डुतामित्यत्र णकारडकारयोरावृत्तेरत्र छेकानुप्रासता बोध्या ॥उदा० ४२९॥

वृत्त्यनुप्रासलक्षणमाह—**एकस्यापी**त्यादिना । एकस्य द्वयोर् बहूनां वा व्यञ्जनानां द्विवारं बहुवारं वाऽपि आवृत्तिर् वृत्त्यनुप्रास उच्यते इत्यर्थः ।

सा चेयमनुप्रासवती वृत्तिर् माधुर्यव्यञ्जकैर् वर्णैर् युता चेद् उपनागरिकेत्युच्यते, ओजःप्रकाशकैर् वर्णैर् निर्वृत्ता चेत् परुषेत्युच्यते इत्याह—**माधुर्यव्यञ्जकैर्वर्णैरि**त्यादिना । नागरिकया उपमिता उपनागरिका "अवादयः क्रुष्टाद्यर्थे तृतीयया" इति सौनागवार्त्तिक-

(सू० ११०) **ओजःप्रकाशकैस् तैस् तु परुषा** ....।

उभयत्राऽपि प्रागुदाहृतम् ।

(सू० १११) .... **कोमला परैः** ॥७९॥

परैः शेषैः । तामेव केचिद् ग्राम्येति वदन्ति ।

उदाहरणम्—

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥उदा० ४३०॥

(सू० ११२) **केषां चिदेता वैदर्भीप्रमुखा रीतयो मताः ।**

एतास् तिस्रो वृत्तयो वामनादीनां मते वैदर्भी-गौडीया-पाञ्चाल्याख्या रीतय उच्यन्ते ।

(सू० ११३) **शाब्दस् तु लाटानुप्रासो भेदे तात्पर्यमात्रतः** ८०॥

शब्दगतोऽनुप्रासः शब्दार्थयोरभेदेऽपि अन्वयमात्रभेदात् । लाट-जन-वल्लभत्वाच् च लाटानुप्रासः । एष पदानुप्रास इत्यन्ये ।

प्रामाण्यात् । उपनागरिकाया उदाहरणम् "अनङ्गरङ्गप्रतिमं तदङ्गम्" (उदा० ४२१) इत्यादिना माधुर्यव्यञ्जकवर्णाद्युदाहरणैनैव दत्तम्, परुषाया उदाहरणमपि मूर्ध्निमुद्वृत्तकृत्तेत्यादिना (उदा० २२४,४२२) ओजोव्यञ्जकवर्णाद्युदाहरणेनैव दत्तमित्याह—**उभयत्रापी**त्यादिना । (सू० १०९) ।

सैव अनुप्रासवती वृत्तिर् माधुर्यौजोऽन्यतर-व्यञ्जक-व्यञ्जनभिन्नैरवशिष्टै व्यञ्जनैर् निर्वृत्ता चेत् कोमलेत्युच्यते इत्याह—**कोमला परै**रिति । इमामेव केचिद् ग्राम्यां वदन्ति । कोमलाया उदाहरणं प्रदर्शयति—**अपसारये**त्यादिना । व्याख्यातमिदं प्रागष्टमे उल्लासे (उदा० ४१४) । अत्र संयोगादौ स्थितेन स्वस्ववर्गपञ्चमेन संयुक्ता स्पर्शाः, उभयतो ह्रस्वेनान्तरितौ रेफणकारौ च नेति न उपनागरिकात्वम्; स्वस्ववर्गप्रथमतृतीयाभ्यां वर्ग-द्वितीय-चतुर्थयोः सयोगेन युक्तानि व्यञ्जनानि, रेफेण सह यस्य कस्यापि व्यञ्जनस्य संयोगेन युक्तानि व्यञ्जनानि, समानयोः व्यञ्जनयो संयोगेन युक्तानि च व्यञ्जनानि च न सन्तीति नैव परुषात्वम्; किन्तु परुषात्वमेवेति मम्मटस्याशयः । अस्माकं तु आस्वाद-जनने उपनागरिकातः कोमलाया वैशिष्ट्यं नानुभवपथमागच्छति ॥उदा० ४३०॥

अन्येषां मते एता वृत्तयो वैदर्भी—गौडी—पाञ्चाल्यो रीतय उच्यन्ते इत्याह—**केषाञ्चि-दि**त्यादिना । कुन्तकेन तु वैदर्भादयो मार्गाः प्रकारान्तरेण युक्तियुक्ततररूपेण च व्यवस्था-पिताः (१।२४–५८) ।

लाटानुप्रासं निरूपयति—**शाब्दस्तु** इत्यादिना । प्रतीतपदार्थध्वनिः शब्दः । तस्य आवृत्तिः शाब्दोऽनुप्रासः । शब्दार्थयोरभेदेऽपि अन्वयमात्रभेदात् शब्दस्य आवृत्तौ शाब्दोऽ-

(सू० ११४) **पदानां सः** ···· ···· ···· ···· ···· ।

स इति लाटानुप्रासः ।

उदाहरणम्—

यस्य न सविधे दयिता दवदहनस् तुहिनदीधितिस् तस्य ।
यस्य च सविधे दयिता दवदहनस् तुहिनदीधितिस् तस्य ॥ ४३१ ॥

(सू० ११५) ···· ···· ···· **पदस्यापि** ···· ···· ····।

अपिशब्देन स इति समुच्चीयते ।

उदाहरणम्—

वदनं वरवर्णिन्यास् तस्याः सत्यं सुधाकरः ।
सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत् ॥ उदा० ४३२ ॥

(सू० ११६) ···· ···· ···· ···· **वृत्तावन्यत्र तत्र वा ।**
नाम्नः स वृत्त्यवृत्त्योश् च ···· ···· ···· ।

एकस्मिन् समासे, भिन्ने वा समासे, समासासमासयोर् वा नाम्नः प्रातिपदिकस्य न तु पदस्य सारूप्यम् ।

नुप्रासो भवति । स च लाटदेशभवानां कवीनां प्रिय इति लाटानुप्रासः उच्यते । एतमेवान्ये केचन पदानुप्रासं भणन्ति इति कारिकावृत्त्योः पिण्डीकृतोऽर्थः ॥८०॥

स लाटानुप्रासः पदानामावृत्त्या भवतीत्याह—**पदानां स** इति । उदाहरति—**यस्य न सविधे** इत्यादिना । यस्य युवकस्य समीपे कान्ता न भवति तस्य चन्द्रो विरहोद्दीपकतया दावाग्निर्भवति, यस्य तु युवकस्य समीपे कान्ता भवति तस्य वनाग्निरपि चन्द्रो भवतीत्यर्थः । अत्र बहूनां पदानां तात्पर्यमात्रभेदेन आवृत्तिरिति लाटानुप्रासो बोध्यः । अत्र पूर्वार्धे तुहिनदीधितिमुद्दिश्य दवदहनत्वं विधेयम्, उत्तरार्धे तु दवदहनमुद्दिश्य तुहिनदीधितित्वं विधेयमिति अन्वयभेदात् तात्पर्यभेदो ज्ञेय ॥ उदा० ४३१ ॥

एकस्यैव पदस्याऽपि अन्वयमात्रभेदेन आवृत्तौ लाटानुप्रासो भवतीत्याह—**पदस्याऽपीति** । स लाटानुप्रास एकस्यापि पदस्य अन्वयमात्रभेदेन आवृत्तौ भवतीति सूत्रवृत्त्योः पिण्डीकृतोऽर्थः । उदाहरति—**वदनं वरवर्णिन्या** इत्यादिना । तस्या उत्तमाया योषाया वदनं चन्द्र एव, किन्तु चन्द्रः कलङ्करहितः क्व नु भवेत् ? न क्वापीत्यर्थः । एवं च चन्द्रस्य तस्या मुखे आरोपोऽनुचित इति भावः । अत्र एकस्यैव सुधाकरपदस्य अन्वयमात्रभेदेन आवृत्तिरिति एकपदगतो लाटानुप्रासो बोध्यः । अन्वयभेदश्च पूर्वस्य सुधाकरपदस्य विधेयपरत्वेन उत्तरस्य चोद्देश्यपरत्वेन बोध्यः ॥ उदा० ४३२ ॥

यद्ययं लाटानुप्रासो नाम (=प्रातिपदिक) रूपैकशब्दगतो भवति तदाऽस्य **तत्र** एकस्मिन्नेव समस्ते पदे प्रातिपदिकस्य आवृत्त्या, एकस्मिन् समस्ते पदे उपात्तस्य प्रातिपदिकस्य **अन्यत्र** समस्तपदान्तरे आवृत्त्या, समस्तपदे उपात्तस्य प्रातिपदिकस्य असमस्ते पदे असमस्ते पदे उपात्तस्य प्रातिपदिकस्य समस्ते पदे वा आवृत्त्या चेति त्रयो

उदाहरणम्—

सितकर-कर-रुचिर-विभा विभाकराकार धरणीधव कीर्तिः ।
पौरुषकमला कमला साऽपि तवैवाऽस्ति नान्यस्य ॥ उदा० ४३३ ॥

(सू० ११७) ....**तदेवं पञ्चधा मतः ॥ ८१ ॥**

(सू० ११८) **अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः ।**

यमकम् .... ।

'समरसमरसोऽयम्' (उदा० ४३४) इत्यादौ [illegible]

भेदा [illegible]त्यादिना । **न तु पदस्येति** वामनादीनां लाटानुप्रासे पदानुप्रास इति व्यवहारोऽनुपपन्न इति सूचयति । अत्र वृत्तौ समासे इति सर्वासां कृदन्त-[illegible] वृत्तीनामुपलक्षणम्, कारिकानुरोधात्, तेन 'हंसायते चारुगतेन **कान्ता**, **कान्तायते** स्पर्शसुखेन वारि' इत्यादेरपि सङ्ग्रहो भवतीति वदन्ति । उदाहरति **सितकरे**त्यादिना । हे सूर्यवदुग्रप्रचण्डप्रताप नृप, चन्द्रकिरणतुल्यशोभनकान्तिः कीर्तिः, पराक्रमलक्ष्मीः, सा प्रसिद्धा लक्ष्मीः (सम्पत्तिः) च तव एव अस्ति, नान्यस्य [illegible] । अत्र कर-करेति एकस्मिन्नेव समस्ते पदे प्रातिपदिकावृत्तिः, विभा विभेति भिन्नयोः समस्तयोः पदयोः प्रातिपदिकावृत्तिः, कमला-कमलेति असमस्ते पदे उपात्तस्य प्रातिपदिकस्य समस्ते पदे आवृत्तिरिति आवृत्तानां प्रातिपदिकानाम् अन्वयस्य यथायथं भेदाच्चेमे उक्तविधा लाटानुप्रासा वोध्याः ॥ उदा० ४३३ ॥

लाटानुप्रासनिरूपणमुपसंहरति—**तदेवं पञ्चधा मत** इति ॥८१॥

अत्र पदानुप्रास-स्फुटानुप्रासा-ऽर्थानुप्रासादयोऽन्येऽपि अनुप्रासभेदाः सङ्ग्राह्याः । ते च वामन-कुन्तक-भोज-उद्भट-विद्याधरादिग्रन्थेभ्यो वेदितव्याः ।

अथ यमकं निरूपयति—**अर्थे सती**त्यादिना । अनर्थकानाम् अक्षराणाम् अथवा अर्थे सति तु भिन्नार्थकानाम् अक्षराणां तेनैव क्रमेण पुनः श्रुतिः यमकमुच्यते इत्यर्थः । भरतादिभिर् यमके पुनः श्रुतानामक्षराणामर्थभेदोऽनादृतोऽपि भरताद्यनिरूपितलाटानुप्रासव्यावृत्तये मम्मटेनाऽऽदृत । 'सव्यञ्जनः सानुस्वारः शुद्धो वाऽपि स्वरोऽक्षरम्'' इति (ऋ० प्रा० १८।३२) अक्षरलक्षणमत्रानुसन्धेयम् । यमके हि तैस्तैर् व्यञ्जनैर् युक्तानां तेषां तेषामेव स्वराणामावृत्तिर् भवतीति लक्षणे अक्षरशब्दस्यैव निवेशनमुचितम् । क्वचित् तु व्यञ्जनभेदेऽपि यमकनिर्वाहो भवति । तदुक्तम्—'यमकादौ भवेदैक्यं डलयो रलयोर् बवोः । [illegible] । सबिन्दुकाऽविन्दुकयोः स्यादभेदप्रकल्पनम्'' इति । कालिदासोऽपि 'भुजलतां जडतामवलाजनः' (रघु० ९।४६) इति यमकं प्रायुङ्क्त । यमौ (यमलौ) इव यमकम्, 'इवे प्रतिकृतौ' (अष्टा० ५।३।९६) इति कन् इति केचित् । आवृत्त्या वर्णाः स्थाननियमेन यम्यन्ते इति यमकमित्यन्वर्थं नाम इत्यपरे । यमकञ्च पदयमकमक्षरयमकं चेति द्वेधेति प्रतिपाद्य एकाक्षरावृत्तेरपि यमकत्वं वामनेन प्रोक्तम्, विविध-धव-वनेत्यादि उदाहृतञ्च (४।१।२) भट्टिनापि द्वयोरक्षरयोरावृत्तिरपि यमकत्वे-

भिन्नार्थानामिति न युज्यते वक्तुम् इति अर्थे सति इत्युक्तम् । सा इति सरो रस इत्यादि-वैलक्षण्येन तेनैव क्रमेण स्थिता ।

(सू० ११९) ···· ···· ····पाद-तद्भागवृत्ति तद्यात्यनेकताम् ॥ ८२ ॥

प्रथमो द्वितीयादौ (३), द्वितीयम् तृतीयादौ (२), तृतीयश् चतुर्थे (१), प्रथमम् त्रिष्वपीति (१) सप्त । प्रथमो द्वितीये तृतीयश्चतुर्थे इति, प्रथमश्चतुर्थे द्वितीयस्तृतीये इति द्वे । तदेवं पदानां नवभेदत्वम् । अर्धावृत्तिः श्लोकावृत्तिश्चेति द्वे ।

द्विधा विभक्ते पादे प्रथमादिपादादिभाग. पूर्ववद् द्वितीयादिपादादिभागेषु, अन्तभागोऽन्तभागेषु इति विंशतिर् भेदाः । श्लोकान्तरे हि न भागावृत्तिः । त्रिखण्डे त्रिंशत् । चतुःखण्डे चत्वारिंशत् । प्रथमपादादिभागान्त्यादिभागे

नोदावता (१०।१५) एवं च वर्णानामिति वक्तव्यमनर्थकमिति वदन्ति । मम्मटेन तु अस्मिन् विषये [illegible] प्रदर्शिता-नीति च बह्वक्षरावर्त्तमेव यमकत्वं स्वीकृतमिति प्रतिभाति ।

यमकप्रकारान् प्रदर्शयति—**पादतद्भागेत्यादिना** । पादगतं पादभागगतं चेति यमकं प्रथमं द्वेधा । तत्र पादगतं यमकम् एकादशधा । तत्रापि प्रथमम् एकदा एकमात्रपादावृत्तेः एकदानेकपादावृत्तेश्चेति पादगतं यमकं द्विप्रकारकम् । तत्र **प्रथमे प्रकारे**—यदि प्रथमः पादो द्वितीये पादे यम्यते तदा मुखं नाम यमकम्, यदि तृतीये यम्यते तदा **सन्दंशो** नाम यमकम्, यदि चतुर्थे यम्यते तदा **आवृत्तिर्नाम** यमकम्, यदि द्वितीयः पादस् तृतीये यम्यते तदा **गर्भो** नाम यमकम्, चतुर्थे चेन् स यम्यते तदा **सन्दष्टकं** नाम यमकम्, तृतीयः पादश्चतुर्थे चेद् यम्यते तदा **पुच्छं** नाम यमकम्; प्रथमः पादस् त्रिष्वपि द्वितीयादिषु पादे-यम्यते चेत् तदा **पङ्क्तिर्** नाम यमकं भवतीति शुद्धा एते सप्त पादयमकभेदाः (रुद्रट० ३।३–१२); मुखयमक-पुच्छयमकयोः सङ्करे **युग्मकं** नाम यमकम्, आवृत्तियमक-गर्भयम कयोः सङ्करे **परिवृत्तिर्** नाम यमकम्. **द्वितीये प्रकारे तु**—श्लोकस्य द्वयोः पादयोः आवृत्ति-**समुद्गो** नाम यमकम्; श्लोकस्य चतुर्णां पादानाम् आवृत्तिर् **महायमकं** नाम यमकमिति सङ्कलने पादगतयमकभेदा एकादश (रुद्रट० ३।१३–१९) । एते च रुद्रटेन उदाहृताः । भट्टिकाव्ये दशमे सर्गे च एतेषु बहवो दृश्यन्ते ।

पादभागगतयमकप्रकारान् प्रतिपादयति—**द्विधा विभक्ते पादे** इत्यादिना । द्विधा विभक्तेषु प्रथमादिपादानामाद्यभागः पदावृत्तिरीत्या अक्षरावृत्तिरीत्या वा पूर्ववद् द्वितीयादिपादेषु आद्यभागेष्वेव यदि यम्यन्ते तदा मुखादिनामका एव दश भेदा भवन्ति; प्रथमादिपादानामन्त्यभागे द्वितीयादिपादान्त्यभागेष्वेव यम्यते तदा पूर्ववद् दश भेदा भवन्ति इत्थं द्विखण्डीकृतेषु पादेषु विंशतिरेव भेदा भवन्ति, एकस्य श्लोकस्य पादभागविशेषे उपात्तानामक्षराणां श्लोकान्तरस्य पादभागविशेषे आवृत्तिर् न चमत्कारकारिणीति श्लोकान्तरविषयतया नेमे भेदा भवन्तीति बोध्यम् । प्रतिभागानावृत्तेर् दशविधत्वात्

द्वितीयपादादिगते आद्यार्धादिभागे यम्यते इत्याद्यन्वर्थतानुसारेणानेकभेदम्। अन्तादिकम्, आद्यन्तिकम् तत्समुच्चयः; मध्यादिकम्, आदिमध्यम्, अन्तमध्यम्, मध्यान्तकम्, तेषां समुच्चयः। तथा तस्मिन्नेव पादे आद्यादिभागानां मध्यादि-भागेषु अनियते च स्थाने आवृत्तिरिति प्रभूततमभेदम्।

त्रिखण्डीकृते पादे त्रिंशद् भेदाः, चतुःखण्डीकृते पादे चत्वारिंशद् भेदा एवमेव बोध्याः। एवं पादस्याद्यो भागो पादान्तरस्य आद्य एव अन्त्यो भागोऽन्त्ये एव भागे यम्यते इति सजातीयभागवृत्तिरूपान् पादभागयमकभेदान् उक्त्वा विजातीयभागावृत्तिरूपान् पाद-भागयमकभेदानाह—**प्रथमपादादिगतान्त्यार्धादिभाग** इत्यादिना। प्रथमादिपादानामन्त्या-दिका भागा द्वितीयादिपादानामाद्यादिकेषु भागेषु यम्यन्ते इति अन्वर्थनामानः अन्तादिका-दयः प्रभेदा भवन्ति; तथाहि—**पादस्य द्विखण्डत्वे कल्पिते** यदि प्रथमपादस्यान्त्यमर्धं द्वितीयपादस्याद्ये अर्धे यम्यते तदा **अन्तादिकं** नाम यमकम्, यदि प्रथमपादस्याद्यमर्धं द्वितीयपादस्यान्ते भागे यम्यते तदा **आद्यन्तिकं** नाम यमकम्; प्रथमपादस्य अन्त्याद्यौ भागौ द्वितीयपदस्य आद्यन्तयोर् **भागयोर्** यम्येते चेत् तदा **अन्तादिकाद्यन्तिकयोर् यमकयोः समुच्चयः**, **पादस्य त्रिखण्डत्वे कल्पिते** पूर्वपादस्य मध्यभागः उत्तरपादस्याद्ये भागे यदि यम्यते तदा **मध्यादिकम्** नाम यमकम्, पूर्वपादस्य आद्यो भागः उत्तरपादस्य मध्ये भागे यदि यम्यते तदा **आदिमध्यकम्** नाम यमकम्, पूर्वस्य पादस्य अन्त्यो भाग. उत्तरस्य पादस्य मध्ये भागे यम्यते चेत् तदा **अन्तमध्यकम्** नाम यमकम्, पूर्वस्य पादस्य मध्यो भाग उत्तरस्य पादस्य अन्त्ये भागे यम्यते चेत् तदा **मध्यान्तिकम्** नाम यमकम्, पूर्वस्य मध्याद्यौ भागौ उत्तरस्य आद्यमध्ययोर् भागयोर् यम्येते चेद् **मध्यादिकाऽऽदिमध्ययोः समुच्चयः**, पूर्वस्य अन्त्यमध्यभागौ उत्तरस्य मध्यान्तभागयोश्चेद् यम्येते तदा **अन्तमध्य-मध्यान्तिकयोः समुच्चयः**, अन्येषां प्रकाराणामपि यथायथं समुच्चयः, एवं च प्रथम-द्वितीयपादगतत्वेन तृतीयचतुर्थपादगतत्वेन चेत्येवमादिप्रकारेण बहवो नियतपादभाग-विशेषगतयमकप्रभेदाः। एवमेव चतुःखण्डत्वेऽप्यूह्यम्। पादस्य त्रिखण्डत्वे चतुःखण्डत्वे वाऽपि यद्यपि आद्यन्तकम्, अन्तादिकमिति प्रभेदौ सम्भवतस्तथापि तौ पादस्य द्विखण्डत्वे कल्पिताभ्यामेव ताभ्यां प्रभेदाभ्यां गतार्थौ वेदितव्यौ। यथैव भिन्नपाद-गततया आवृत्त्या आद्यन्तिकादयो यमकप्रभेदास्तथैव एकस्मिन्नेव पादेऽपि अनेकखण्ड-तत्त्वेन कल्पिते आद्यस्य भागस्य मध्ये अन्त्ये च भागे, मध्यस्य अन्त्ये भागे यमनाद् **आदिमध्यम्, आद्यन्तम् मध्यान्तम्** इति यमकप्रभेदा भवन्ति। आदिमध्यान्तलक्षणाद् देशाद् अर्धत्रिभागादिलक्षणाद् देशाद्, अर्धत्रिभागादिलक्षणाद् अवयवाच् च यद् विलक्षणं तद् अनियतं स्थानं तत्र स्वेच्छाकृतत्वेन भूयस्तमभेदमिति अनियतस्थानगतयमकप्रभेद-विवरणं सोमेश्वरकृतं मूलानुगतमेव प्रतीयते। रुद्रटोऽपि—"कमलिनीमलिनी दयितं विना न सहते सह तेन निषेविताम्। यमधुना मधुना निहितं यदि स्मरति सा रतिसारमह-र्निशम्" (३।५७) इति "कमलिनी सरसा सरसामियम्" (३।५८) इत्यादिना च अनियत-

तदेतत् काव्यान्तर्गडुभूतमिति नास्य भेदलक्षणं कृतम् ।
दिङ्मात्र चोदाह्रियते—

सन्नारीभरणोमायमाराध्य विधुशेखरम् ।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय ।। उदा० ४३५ ॥

विनायमेनो नयतासुखादिना विना यमेनोनयता सुखादिना ।
महाजनोदीयत मानसादरं महाजनोदीयतमानसादरम् ॥ उदा० ४३६ ॥

यमकमुदाजहार । अन्ये तु अनियतयमकं गद्यबन्धविषयकं मन्यन्ते । यमकविषयेऽधिकं जिज्ञासुभिः रुद्रटालङ्कारस्य नमिसाधुकृतटीकासहितस्य तृतीयोऽध्यायः पठनीयः । सोमेश्वरकृतकाव्यादर्शसङ्केतश्च पठनीयः । तत्र हि यमकभेदानां वाक्यैः सङ्केतैश्च साधु निरूपणं कृतमस्ति ।

यमकस्य रसानुगुणत्वं मत्वाह—**तदेत**दित्यादि । यथा कोमलेऽपि पुण्ड्रकेक्षुकाण्डे ग्रन्थिश्चर्वणेन रसस्य चूषणे रसास्वादनव्यवधायकस्तथा सरसे काव्येऽपि यमकं गूढार्थानुसन्धानव्यग्रताकरणाद् रसास्वादनव्यवधायकमिति यमकं ग्रन्थकारेणानेन काव्यगडुत्वेनोक्तम् । लोल्लटवचनं चोद्धृतं सोमेश्वरेण नमिसाधुना च—"यमकानुलोमतदितरचक्रादिभिदा हि रसविरोधिन्यः । अभिधानमात्रमेतद् गड्डरिकादिप्रवाहो वा" इति (रुद्रट ३।५९) । किन्तु एवं यमकमात्रेऽरोचकत्वं नाविष्करणीयम्, कालिदासादिभिः रसाद्यविरोधेनापि यमकस्य निबद्धत्वात् आलोचकसत्तमेन सहृदयशिरोमणिना आनन्दवर्धनेनाऽपि देवीशतके बहुशो यमकस्य प्रयुक्तत्वाच्च । नाऽपि यमकविषये सतृणाभ्यवहारित्वमवलम्बनीयम् । तस्माद् "इति यमकमशेषं सम्यगालोचयद्भिः सुकविभिरभियुक्तैर् वस्तु चौचित्यविद्भिः । सुविहितपदभङ्गं सुप्रसिद्धाभिधानं तदनु विरचनीयं सर्गबन्धेषु भूम्ना ।" इति रुद्रटोक्तम् (३।५९) एव उपादेयतममिति च कविभिर् मननीयं च काव्यमीमांसिभिः । अथवा अनेनाऽपि ग्रन्थकारेण कष्टा यमकप्रभेदा एव निन्दिता न तु सुविहितपदभङ्गाः सुप्रसिद्धाभिधाना औचित्यानुगुणाः शक्तिमता कविना सुखेन सुबोधतया च निबद्धा भेदा अपीति सामान्यलक्षणस्य कृतत्वाद् भेदलक्षणानामकृतत्वाच्चोन्नेयं विवेकशीलैः ।। ८२ ।।

प्रथमस्य पादस्य तृतीये पादे यमने निष्पन्न सन्दंशाख्यं यमकमुदाहरति—**सन्नारी**त्यादिना । रुद्रटालङ्कारे उदाहृतं पद्यमिदम् (३।४) । सतीर् नारीर् बिभर्ति या उमा तां याति यस् तं चन्द्रशेखरमाराध्य ततः त्वं सन्ना (मृताः) अरीणाम् इभा यत्र तादृशो रणो यस्य तादृशो मायारहितश्च सन् पृथिवीं जयेत्यर्थः । अत्र यमकं दुष्टमेव अप्रसिद्धाभिधानत्वात् ।। उदा० ४३५ ।।

प्रथमस्य पादस्य द्वितीये पादे तृतीयस्य चतुर्थे यमनाज् जातं युग्मकं नाम यमकमुदाहरति—**विनाऽय**मित्यादिना । महम् अजन्ति क्षिपन्तीति महाजाः दुर्जनास्तान् नुदति यः सः महाजनोदी मानं शत्रूणामभिमानं सादयतीति मानसाच्च महाजनोऽयं विशिष्टो ना (विना) **एनः** अपराधं विना [प्राणिनः स्वस्थानम्] नयता प्राणभक्षकेण **ऊनयता** हानिं

[illegible] ।
सर्वदारणमानैषी दवानलसमस्थित ॥क॥
स त्वारं भरतोऽवश्यमबलव् विततारवम् ।
सर्वदा [illegible]स्थित ॥ ख ॥ उदा० ४३७ ॥

अनन्तमहिमव्याप्तविश्वां वेधा न वेद याम् ।
या च मातेव भजते प्रणते मानवे दयाम् ॥ उदा० ४३८ ॥

कुर्वता सुखभक्षकेण (सुखनाशकेन) यमेन गतज्जीवन्रक्षणाय यतमानानां साद राति ददातीति तादृशम् यथास्यात् तथा अदीयत अखण्डयतेत्यर्थः । मृतं जटायुपं दृष्ट्वा रामं [illegible] महेश्वर । अयं महाजनः [illegible] रातीति तादृशं यथा स्यात् तथा महाक्षेपकक्षेपी **विना** पुरुपपक्षी जटायुः स्वपुरं नयता प्राणघातकेन सुखनाशकेन हीनं **कुर्वता** यमेन अपराधं विना एव मनसोऽरमेव **अखण्ड्यतेति** च तेनोक्तोऽर्थः । रुद्रटालङ्कारे एवोदाहृतमिदं पद्यमपि (३।१४) । कष्टतरं खल्विदं यमकम् ॥ ४३६ ॥

श्लोकावृत्तौ [illegible]ति—**सत्त्वार**मित्यादिना । सत्त्वेन कृत **आरम्भः** सात्त्विकं कर्म तत्र रतः, सर्वेषां दारणे यो मानस्तदैषी तदिच्छाशीलः, दावानलेन सम **स्थितं** स्थितिर् यस्य तथाभूत अलसम् मन्दम् **अवान्** अगच्छन् अर्थात् शीघ्रं गच्छन्, [अस्थितः] **ए** विष्णौ स्थितो विष्णुभक्तः स तु प्रक्रान्तस्तु राजा **अवश्यम्** अव[illegible] अवलम्बितं तारवं तरुसमूहो येन तादृशम् अवलं **विततो** विवृद्ध **आरवो** हाहाशब्दो यस्य तद् **आरं** शत्रुसमूहं सर्वदा अवश्यमेव **भरतः** भरात् (अतिशयेन) रणम् **आनैषीत्** प्रापयामासेत्यर्थः । "अथाऽतिशयो भरः" इत्यमरः (१।१६६) इदमप्युदाहरणं रुद्रटग्रन्थादेव सङ्गृहीतमिति विज्ञायते (३।१८-१९) । कष्टमेवेदमपि यमकोदाहरणम् । महायमकोदाहरणं भट्टिप्रदर्शितम् (१०।२०-२१) दण्डिप्रदर्शितमपि (३।६८-६९) अनुविद्धितपदभङ्गमिति महायमकस्यैव कष्टत्वं विज्ञायते न केवलग्रन्थोक्तस्यैवोदाहरणस्य । "श्रव्यं नातिसमस्तार्थ काव्यं मधुरमिष्यते । आविद्वदङ्गनाबालप्रतीतार्थं प्रसादवत्" इति (२।३) काव्यस्य सरलतायामभिनिविशमानेन भामहेन तु—"प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धि च । प्रसादि स्वाभिधानं च यमकं कृतिनां मतम् । नानाधात्वर्थगम्भीरा यमकव्यपदेशिनी । प्रहेलिका सा ह्युदिता रामशर्माऽच्युतोत्तरे । काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् । उत्सवः सुधियामेव हन्त दुर्मेदसो हता" इति (२।१८-२०) वदता एतादृशा यमकप्रभेदा नैव प्रतिपादिताः ॥ उदा० ४३७ ॥

पादानां द्विखण्डत्वे द्वितीयपादान्त्यभागस्य [illegible] यमने सन्दष्टकं नाम यमकमुदाहरति—**अनन्तमहिमे**त्यादिना । आनन्दवर्धनकृते **देवीशतके** (श्लो० १) **पद्यमिदम्** । अनन्तेन महिम्ना व्याप्तं विश्वं यया तां यां देवीं ब्रह्मा अपि (तत्त्वतो) न जानाति, या च देवी प्रणते मानवे मातेव दयां कुरुते, 'तमांसि ध्वंसमायान्ति यस्यास्

यदानतोऽयदाननोऽनयाऽत्ययं न यात्ययम् ।
शिवेहितां शिवे हितां स्मरामितां स्मरामि ताम् ॥ उदा० ४३९ ॥
सरस्वति, प्रसादं मे स्थितिं चित्तसरस्वति ।
सर स्वतिकुरु क्षेत्र-कुरुक्षेत्र-सरस्वति ॥ उदा० ४४० ॥
ससार साकन् दर्पेण कन्दर्पेण ससारसा ।
शरन् नवाना बिभ्राणा नाविभ्राणा शरन् नवा ॥ उदा० ४४१ ॥
मधुपराजि-पराजित-मानिनी-जन-मनः सुमनःसुरभिश्रियम् ।
अभृत वारितवारिजविप्लवं स्फुटितताम्रतनाभ्रवणं जगत् ॥ उदा० ४४२॥

स्तुत्याऽऽदरेण व. । तस्या. सिद्ध्यै धियां मातुः कल्पन्ता पादरेणवः' इति तत्रत्येन पञ्चमेन श्लोकेन सह अन्वय. । रुचिरमेवेदं यमकम् ॥ उदा० ४३८ ॥

एकस्मिन्नेव त्रिखण्डत्वेन कल्पिते पादे आद्यभागस्य अन्त्ये भागे यमने आद्यन्तिकं नाम यमकमुदाहरति—**यदानत** इत्यादिना । आनन्दवर्धनकृते देवीशतके पद्यमिदम् (श्लो० ४९) । यस्यां देव्याम् आनत' अय जनः **अनया** एव देव्या **अयस्य** शुभस्य दानतो **नयस्य** नीतेः सन्मार्गस्य **अत्ययम्** अतिक्रमणं न याति, तां शिवेन **ईहितां** वाञ्छिता शिवे **हिताम्** अनुकूलां स्मरेण **अमिताम्** अपरिच्छिन्ना वशे अकृता देवीं स्मरामीत्यर्थः । अत्राप्य-कष्टमेव यमकम् ॥ उदा० ४३९ ॥

प्रथमपादाद्यभागस्य द्वितीयपादान्त्यभागे यमनाद् आद्यन्तिकम्, द्वितीयपादान्त्य-भागस्य तृतीयपादाद्यभागे यमनाद् अन्तादिकम्, तृतीयपादान्त्यभागस्य चतुर्थपादाद्यभागे यमनाद् अन्तादिकम्-तृतीयपादाद्यभागस्य चतुर्थपादान्त्यभागे यमनाद् आद्यन्तिकञ्चे-त्येषां समुच्चयमुदाहरति—**सरस्वती**त्यादिना । आनन्दवर्धनकृते देवीशतके पद्यमिदम् । **क्षेत्रं** शरीरमेव **कुरुक्षेत्रं** तत्र सरस्वती नदीव स्थिते हे सरस्वति, प्रसादं **सर** गच्छ प्रसन्ना भव, मच्चित्तरूपे **सरस्वति** सागरे स्थितिं स्वति सुष्ठु कुरु इत्यर्थः । नातिकष्ट-मिदं यमकम् ॥ उदा० ४४० ॥

द्वयोरप्यर्धयोः आद्यन्तिकान्तादिकयोः समुच्चयमुदाहरति—**ससारसाक**मित्यादिना । रुद्रटालङ्कारे उदाहृतं पद्यमिदम् (३।३५) । सारसेन पक्षिणा कमलेन वा सहिता, शरं काशं बिभ्राणा नवभिः अनोभिः (शकटैः) युक्ता, न **वीनां** पक्षिणां **भ्राणः** शब्दः, सोऽविद्य-मानो यस्यां सा अविभ्राणा पक्षिशब्दैरशून्या नवा शरत् कन्दर्पेण साकन् दर्पेण **ससार** प्रवृत्तवतीत्यर्थः । नाविभ्राणा इति पद विहायाऽन्यत्र नाऽतिकष्टमिदमपि यमकम् ॥ उदा० ४४१ ॥

पादाद्यभागादिस्थानादिनियमरहितम् अनियतं यमकमुदाहरति—**मधुपराजी**त्या-दिना । रत्नाकरकविकृते हरविजयकाव्ये (३।५७) वसन्तवर्णनमिदम् । मधुपानां राजिभिः पराजितानि मानिनीजनमनांसि याभिस्ताभिः सुमनोभिः सुरभिः सुगन्धि, (तुषारपात-निवारणेन) वारितो वारिजानां कमलानां विप्लवो नाशो येन तत्, **स्फुटितानि** विकसि-

एवं वैचित्र्यसहस्रैः स्थितमुन्नेनयम् ।

(सू० १२०) **वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः ।**

श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ॥ ८३ ॥

अर्थभेदेन शब्दभेद इति दर्शने काव्यमार्गे स्वरो न गण्यते इति च नये वाच्यभेदेन भिन्ना अपि शब्दा यद् युगपदुच्चारणेन श्लिष्यन्ति भिन्नं स्वरूपम् अपह्नुवते स श्लेषः ।

स च वर्ण-पद-लिङ्ग-भाषा-प्रकृति-प्रत्यय-विभक्ति-वचनानां भेदाद् अष्टधा । क्रमेणोदाहृणम्—

(१) अलङ्कारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः ।

तानि (नवैः पल्लवैः) ताम्राणि ततानि च आम्रस्य वनानि यस्मिन् तत् तादृशं जगत् श्रियं शोभाम् अभृत प्रापदित्यर्थः । इदमपि यमकं हृद्यमेव ॥ उदा० ४४२ ॥

एवमेव अन्येऽपि सम्भवन्तो यमकप्रभेदाः कविभिः प्रयुक्ता ग्रन्थान्तरेभ्यो बोध्याः, अप्रयुक्ता अपि स्वयमूहनीयाः, अस्माभिस्तु यमकप्रभेदाना कष्टत्वात् प्रतिपत्तृवैमुख्यभयाद् ग्रन्थगौरवभयाच्च ते सर्वे न प्रदर्श्यन्ते इत्यभिप्रायेणाऽऽह—**एव वैचित्र्येत्यादि** ॥

श्लेषं [illegible]—**वाच्यभेदेन** [illegible] । समानवर्णानुपूर्वीकत्वेऽपि "अर्थभेदेन शब्दभेदः" इति सिद्धान्ताद् अर्थभेदेन भिन्नयोरपि शब्दयोः [illegible], युगपद् उच्चारणेन (तन्त्रेण प्रयोगात्) परस्परम् आत्यन्तिकात् शब्दात् साम्याद् द्वयोः समानाकार-परिमाणयोः परस्परम् एकै[illegible]विवेकेन समाश्लिष्टयोः एकत्वेनाऽवभासमानयोः पत्रयोरिव एकत्वेनावभासमानयोर् मेलकः श्लेषः। एतेन वृत्तिग्रन्थोऽपि व्याख्यातः। यद्यपि वर्णानुपूर्वीभेदाभावेऽपि उदात्तादि स्वरानुपूर्वीभेदो भवतीति भिन्नार्थयोः शब्दयोस्तादृशो मेलकः क्वचिद् न सम्भवति अपि, यथा शब्दब्रह्मवाचिनो वेदशब्दात् कुशमुष्टिवाचको वेदशब्दः स्वरानुपूर्व्या भिन्नः, तथापि काव्यमार्गे स्वरस्यागणनाद् वर्णानुपूर्वीसाम्ये भिन्नार्थयोः शब्दयोः श्लेषः काव्ये सर्वत्र भवत्येवेति सूचितम्—**काव्यमार्गे** इत्यादिना ॥ ८३ ॥

स च सभङ्गरूपः श्लेषोऽष्टधा भवतीत्याह—**स च वर्णे**त्यादिना । तत्राऽयं विश्वनाथकृतः श्लोकः स्मृत्यनुग्राहकः—'वर्ण-प्रत्यय-लिङ्गानां प्रकृत्योः पदयोरपि । श्लेषाद् विभक्ति-वचन-भाषाणामष्टधा च सः' इति ।

अत्र ग्रन्थकृता उपात्तेन क्रमेण वर्णश्लेषादीनामुदाहरणान्याह—**क्रमेणोदाहरणमिति । वर्णश्लेषलक्षणन्तु** रुद्रटोक्तं यथा—'यत्र विभक्ति-प्रत्यय-वर्ण-वशादैकरूप्यमापतति । वर्णानां विविधानां वर्णश्लेषः स विज्ञेयः" (४।३) इति । (१) वर्णश्लेपोदाहरणं प्रदर्शयति—**अलंकार** इत्यादिना । सुभाषितरत्नकोषे उद्धृतं पद्यमिदम् (श्लो० १३४४) । **स्थाणोः अलङ्कारो** भयजनकं मनुष्यशवशिरोऽस्थि अस्ति, तस्य अनुचरश्च गलिताङ्गो

अवस्थेयं स्थाणोरपि भवति सर्वामरगुरोर्
विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ।। ४४३ ।।

(२) पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ।। उदा० ४४४ ।।

(३,८) भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर् नीते हितप्राप्तये ।
लावण्यस्य महानिधी रसिकता लक्ष्मीदृशोस् तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर् वा हरेः ।।उदा० ४४५।।

भृङ्गवत् कृष्णो [illegible], तस्य धनं च एको जरद्गवोऽस्ति. सर्वेषु अमरेषु श्रेष्ठस्य निर्विकारस्य महादेवस्यापि वक्रे विधौ (चन्द्रे) शिरसि स्थितवति सति इयम् (पौराणिकैः कल्पिता) अवस्था भवति चेद् वक्रे विधौ (दैवे) शिरसि स्थितवति सति वयं मनुष्यवराकाः के ? अस्माकं का का दुरवस्था न स्यादित्यर्थः । अत्र विधौ इत्यत्र विधु-विधि-शब्दयोः उकारेकारयोर् विभक्तिवर्णवशाद् औकारतां प्राप्तयोर् भेदेऽपि अभिन्नत्वेनावभासमानयोः श्लेषाद् वर्णश्लेषो बोध्यः ।। उदा० ४४३ ।।

(२) पदश्लेषमुदाहरति—पृथुकार्तस्वरेत्यादिना । पदश्लेषलक्षणं रुद्रटोक्तं यथा—'यस्मिन् विभक्तियोगः समासयोगश्च जायते विविधः । पदभङ्गेषु विभक्तो विज्ञेयोऽसौ पदश्लेषः' इति (४।५) पृथुकार्तस्वरेत्यादि कवे राजानं प्रति वाक्यम् । हे राजन्, विपुलसुवर्णवाक्यैर्युक्तम्, अलङ्कृतसर्वस्वकजनं विलसन्तीभिः करेणुभिर् व्याप्तं तव सदनम्; बालानामार्तक्रोशनस्य पात्रम्, भुवि उषिताः सर्वे परिजनाः कलत्रपुत्रादयो यत्र तत् तादृशम् (ब-वयोः श्लेषेऽभेदात्) विले छिद्रे सीदन्तीति विलसत्काः मूषकास्तेषां रेणुभिर् व्याप्तं मम सदनं च सम्प्रति (त्वत्तो धनस्य लाभात् प्राक्) सममित्यर्थः । अत्रोभयोरर्थयोः बोधने पदभङ्गभेदात् पदश्लेषत्वं बोध्यम् ।।उदा० ४४४।।

(३,८) लिङ्गश्लेषं वचनश्लेषं चोदाहरति—भक्तिप्रह्वेत्यादिना । भक्त्यानम्राणां विलोकने यः प्रणयः तद्युक्ते तद्युक्ता वा नीलोत्पलेन स्पर्धेते तच्छीले, स्पर्धते तच्छीला वा, समाधौ लग्नैः साधकैर्हितप्राप्तये ईहितप्राप्तये वा ध्यानालम्बनतां नीते नीता वा, सौन्दर्यस्य **महानिधी** अपरिमिताधारभूते **महानिधिः** अपरिमिताधारभूता वा लक्ष्म्या नेत्रयोः रसिकतामादधाने आदधाना वा हरेर् नेत्रे तनुर् वा युष्माकं भवस्य पीडायाः शमनं कुर्याताम् कुर्वीत वेत्यर्थः । अत्र प्रणयिनी इत्यादिषु द्विवचनैकवचनयोः स्त्रीलिङ्ग-नपुंसकलिङ्गयोश्च रूपसाम्येन श्लेषः, महानिधी इत्यत्र प्रथमैकवचन-द्विवचनयोः, कुरुतामित्यत्र लोट्परस्मैपदद्विवचनात्मनेपदैकवचनयोश्च श्लेषो बोध्यः । **लिङ्गश्लेषलक्षणं च रुद्रटोक्तं यथा**—"स्त्रीपुंनपुंसकानां शब्दानां भवति यत्र सारूप्यम् । लघुदीर्घत्वसमासैर् लिङ्गश्लेषः स विज्ञेयः" (४।८) इति । एक-द्वि-बहुवचनानां मिथः सारूप्ये वचनश्लेषः स्फुटः ।।उदा० ४४५।।

एष वचनश्लेषोऽपि ।

(४) महदे सुरसन्ध मे तमव समासङ्गमागमाहरणे ।
हर बहुसरणं तं चित्तमोहमवसर उमे सहसा ॥उदा० ४४६॥

(५) अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥४४७॥

(६) रजनिरमणमौले [illegible]पूर्वसंपत्सहस्रम् ।
प्रथमनिवहमध्ये जातुचित् त्वत्प्रसादादहमुचितरुचिः
स्यान् नन्दिता सा तथा मे ॥उदा० ४४८॥

---

(४) (संस्कृत-प्राकृत-) भाषाश्लेषमुदाहरति—**महदे सुरसन्ध**मित्यादिना । आनन्दवर्धनकृते देवीशतके पद्यमिदमिति वदन्ति । वेबरसम्पादितायां गाथासप्तशत्यामपीदं पद्यम् (प० ९९१) उपलभ्यते **महदे** उत्सवदे हे **उमे** गौरि, सुरैः सन्धा (सन्धानं) यत्र तादृशम् **आगमाहरणे** आगमस्वीकारे तं **समासङ्गम्** आसक्तिम् **अव** रक्ष, **बहु** प्रभूतं **सरणं** प्रसरणं यस्य तच् चित्तस्य मोहमज्ञानम् **अवसरे** समुचिते काले **सहसा** झटित्येव हर निवारयेत्यर्थ । प्राकृतपक्षे तु पदच्छेदप्रकारः—**'मह देसु रसं धम्मे तमवसमासं गमागमाहरणे । हरवहु सरणं त चित्तमोहमवसरउ मे सहसा'** इति । अस्य संस्कृतच्छाया तु—'मम देहि रसं धर्मे तमोवशाम् आशाम् गमागमाद् हर नः । हरवधु, शरणं त्वं चित्तमोहोऽपसरतु मे सहसा' इति । अर्थस्तु—हे पार्वति, धर्मे मम रुचिम् उत्पादय, अस्माकम् अज्ञानरूपतमोमूलाम् आशां संसाराद् हर, मम चेतसि स्थिता मोहस्त्वत्कृपया सहसा अपसरतु, त्वं हि मम शरणमसीति । अत्र संस्कृत-प्राकृतयोः श्लेषः सम्प्रति स्फुटः ॥उदा० ४४६॥

(५) [illegible]**यं सर्वाणी**त्यादिना । अयं विद्यासेवी जनः सर्वाणि शास्त्राणि स्वे हृदये धारयिष्यति, अभिज्ञेषु विषये तानि भणिष्यति च; अयं च विद्यासेवी जनो राजपुत्रः अस्ति इति अमित्राणां सामर्थ्यस्य छेदकः मित्राणां सामर्थ्यस्य कारकश्च भविष्यतीत्यर्थः । अत्र वक्ष्यतीति वहिवच्योर् लृटि रूपं तुल्यमिति, सामर्थ्यकृदित्यत्र कृन्तति-करोत्योः क्विपि रूपं तुल्यमिति च प्रकृत्योरेव भिन्नरूपतया प्रकृतिश्लेषौ बोध्यौ ॥उदा० ४४७॥

(६) विभक्तिभिन्न-प्रत्ययश्लेषमुदाहरति—**रजनिरमणे**त्यादिना । चन्द्रमौलेः चरणकमलावलोकनरूपोत्सवसमये एव सम्यग् आप्तम् अपूर्वसम्पत्सहस्रं यथा स्यात् तथा प्रथमगणमध्ये कदाचित् त्वत्प्रसादाद् अहं समुचितकान्तिः सन् **नन्दिता** आनन्दभोक्ता स्यामित्याशंसा, तथा एवं सति सा गणमध्यगणनैव मम **नन्दिता** नन्दित्वं नन्दिनामकगणाधिपत्वं भविष्यतीत्यर्थः । अत्र यद्यपि स्यान् इत्यत्र स्यात् स्यामिति प्रथमोत्तमपुरुषयोरपि श्लेषः तथापि विभक्तिश्लेषं पृथक् प्रतिपादयिष्यतीति अत्र नन्दितेत्यत्र तृच्-तलोः कृत्तद्धितयोः श्लेष उदाहृतो बोध्यः ॥उदा० ४४८॥

(७) सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः ।
  नयोपकारसांमुख्यमायासि तनुवर्तनम् ॥उदा० ४४९॥

(सू० १२१) भेदाभावात् प्रकृत्यादेर् भेदोऽपि नवमो भवेत् ।

नवमोऽपीति अपिर् भिन्नक्रमः ।

उदाहरणम्—

  योऽसकृत् परगोत्राणां पक्षच्छेदक्षणक्षमः ।
  शतकोटिदतां विभ्रद् विवुधेन्द्रः स राजते ॥उदा० ४५०॥

अत्र प्रकरणादिनियमाभावाद् द्वावप्यर्थौ वाच्यौ ।

ननु स्वरितादि-गुणभेदाद् भिन्नप्रयत्नोच्चार्याणां तदभावादभिन्नप्रयत्नोच्चार्याणां च शब्दानां वन्धे अलङ्कारान्तरप्रतिभोत्पत्तिहेतुः शब्दश्लेषोऽर्थश्लेषश्चेति द्विविधोऽप्यर्थालङ्कारमध्ये परिगणितोऽन्यैरिति कथमयं शब्दालङ्कार उच्यते ?

---

(७) सुप्-तिङ्-विभक्ति-श्लेषमुदाहरति—**सर्वस्वं हरेत्यादिना** । हरं प्रति भक्तस्य, सहचरं प्रति दस्योश्चेयमुक्तिः । तत्र भक्तोक्तिपक्षे—हे शम्भो, त्वं सर्वस्य लोकस्य सर्वस्वमसि, यतो हि त्वं जन्मादिसंसारदुःखच्छेदने तत्परोऽसि, अतो नयोपकारयोः साम्मुख्यं यस्मात् तादृशं शरीरावस्थानं भक्तानुग्रहाय **आयासि** प्राप्नोषीत्यर्थः । दस्यूक्ति-पक्षे तु—हे सहचर, त्वं सर्वस्य जनस्य सर्वस्वं हिरण्यादिकं बलाद् अपहर, त्वं धनवतां कण्ठच्छेदे तत्परो भव, उपकारसम्मुखत्वं **नय** अपनय, परायासदायकं **वर्तनं** जीविकां **तनु** विस्तारयेत्यर्थः । अथवा भक्तोक्तिपक्षे एव अन्या योजना—हे **सर्व** विष्णो, त्वं सर्वस्य भक्तजनस्य लौकिकं स्वमपहर 'यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहम्' इति हि तव भक्तोद्धरणोपायप्रयोग इति, त्वं भक्तसंसारदुःखोच्छेदे तत्परो भव लोकोपकारसम्मुखत्वं प्रति भक्तजनं **नय** प्रवर्तय, भक्तजनस्य **आयासि** कृच्छ्रेणोत्पन्नं **वर्तनं** जीवितं **तनु** विस्तारयेत्यर्थः । अत्र हर-भव-नया-ऽयासि-तनु-पदानि एकत्र सुवन्तानि अन्यत्र तिङन्तानीति सुप्-तिङ्विभक्तिश्लेषा अत्र बोध्याः ॥उदा० ४४९॥

एवं सभेदं सभङ्गपदश्लेषं निरूप्य अभङ्गपदश्लेषं निरूपयति-**भेदाभावादित्यादिना** । वर्णादेर् भेदस्याऽभावेन अभग्नानामेव पदानाम् एकवृन्तगतफलद्वयन्यायेन अर्थद्वयोपस्थापकत्वे श्लेषस्य नवमोऽपि अभङ्गश्लेषाख्यो भेदो भवतीत्यर्थः । (सू० १२१)

अभङ्गश्लेषोदाहरणं यथा—**योऽसकृदित्यादि** । योऽनेकवारं शत्रुवंशानां पक्षस्य (सहायस्य) खण्डने क्षणेनैव समर्थः, शतकोटिना आयुधविशेषेण शत्रुच्छेदकत्वं बिभ्रत् स पण्डितेषु श्रेष्ठो राजा विराजते इति **राजपक्षे**ऽर्थः । **इन्द्रपक्षे** तु योऽनेकवारं श्रेष्ठपर्वतानां पक्षाणां छेदे क्षणेनैव समर्थः, शतकोटिना द्यतीति **शतकोटिदः** तत्ता वज्रेण छेदकत्वं दधानः स **विबुधानां** देवानां राजा इन्द्रो राजते दीप्यते इत्यर्थः । **अत्र** प्रकरणादेरभावाद् अभिधाया अनियन्त्रणाद् द्वावप्यर्थौ वाच्यत्वेनैवोपस्थितौ भवतः इति अत्र श्लेषत्वमेव न द्वितीयस्याऽर्थस्य व्यङ्ग्यतेत्याशयेनाऽऽह—**अत्र प्रकरणादिनियमाभावादित्यादि**।।उदा०४५०॥

उच्यते—इह दो[illegible] शब्दार्थगतत्वेन यो विभागः सोऽन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते; तथाहि—कष्टत्वादि-गाढत्वाद्यनुप्रासादयो व्यर्थत्वादिप्रौढ्याद्युपमादयश्च तद्भाव-तदभावानुविधायित्वादेव शब्दार्थगतत्वेन व्यवस्थाप्यन्ते।

श्लेषविषये काव्यालङ्कारसारसङ्ग्रहकृतो भट्टोद्भटस्य लघुविवृतिकृतः प्रतीहारेन्दुराजस्य रुद्रटादीनां च मतानि निराकृत्य स्वमतं स्थिरं [illegible]—ननु **स्वरितादीत्यादिना**। तथा च भट्टोद्भटः—"एकप्रयत्नोच्चार्याणां तच्छायां चैव बिभ्रताम्। स्वरितादिगुणैर्भिन्नैर्बन्धः श्लिष्टमिहोच्यते। अलङ्कारान्तरगता प्रतिभां जनयत् पदैः। द्विविधैरर्थशब्दोक्तिविशिष्टं तत् प्रतीयताम्" (४।१०,११) इत्याह। तद्विवृतौ प्रतीहारेन्दुराजोऽपि—"एवं च श्लिष्टं द्विविधमपि उपमाद्यलङ्कारप्रतिभोत्पादनद्वारेण अलङ्कारतां प्रतिपद्यते" इति। इदमेव पूर्वपक्षत्वेन अनुवदति—**स्वरितादिगुणभेदा**दित्यादिना। स्वरितोदात्तादिस्वरभेदाद् वर्णादिभेदाच्च भिन्नप्रयत्नोच्चार्याणामपि स्वरानादरणाद् अन्यस्माद् विभक्तियोगसंहिताविचारादितः कुतश्चिदुपाधेश्च अभिन्नप्रयत्नोच्चार्यतां प्राप्तानां शब्दानां बन्धे यः [illegible] सभङ्गपदश्लेषरूपो जतुकाष्ठन्यायेन सम्पन्नः शब्दयोः श्लेषः, यश्च स्वरवर्णानुपूर्व्यादिभेदाभावात् उपाधिं कञ्चिदपि विनैव अभिन्नप्रयत्नोच्चार्याणां शब्दानां बन्धे उपमाद्यलङ्कारान्तरप्रतिभासनमात्रहेतुः अभङ्गपदरूपः एकवृन्तगतफलद्वयन्यायेन सम्पन्नोऽर्थयोः श्लेष इति द्विविधोऽपि श्लेषो दीनारलक्षदैनिकवेतनेन भट्टोद्भटेन तदनुयायिभिश्च अर्थालङ्कारमध्ये एवं गणित इति कथमुभयोरपि सभङ्गाऽभङ्गश्लेषयोः अत्र [illegible] उच्यते? इति आशङ्काग्रन्थार्थः।

[illegible]। द्विविधोऽपि श्लेषोऽर्थद्वयप्रतीतौ सत्यामेवाऽलङ्कारतां प्राप्नोतीति अर्थाश्रितत्वाद् द्वयोरप्यर्थालङ्कारत्वमिति हि तेषाम् अभिसन्धिरिति तदभिसन्धिमूलस्यैव निकृन्तनाय आह—**इह दोषगुणेत्यादि**। आश्रयाश्रयिभावव्यवस्था हि अन्वयव्यतिरेकनियमाद् भवति; एकस्य यत्र स्थितिस्तत्राऽन्यस्य तदनुगमनेनैव नियमेन स्थितिरन्वयनियम इत्युच्यते, तत्स्वरूपं च विद्वांसः "तत्-सत्त्वे तत्-सत्ता" इति संसूचयन्ति, विद्यमानतायां सहभाव इति तस्याऽभिप्रायः, एकस्य यत्र निवृत्तिस्तत्राऽन्यस्यापि नियमेन निवृत्तिर् व्यतिरेकनियम इत्युच्यते; तत्स्वरूपं च विद्वासः "तदभावे तदभावः" इति सूचयन्ति, निवृत्तौ सहभाव इति तस्याभिप्रायः; एवं च कुत्रचित् शब्दविशेषस्य सत्त्वे सत्तां लभमाना असत्त्वे च तत्र असत्त्वमेव भजमाना दोषादयः शब्दगतत्वेन, तद्भिन्नाः कुत्र चिद् अर्थविशेषस्य सत्त्वे सत्तां लभमाना असत्त्वे च तत्र असत्त्वमेव भजमाना दोषादयश्चार्थगतत्वेन स्वीक्रियन्ते; अत एव वामनादिभिरपि कष्टत्वादिगाढत्वाद्यनुप्रासादयः शब्दान्वयव्यतिरेकानुविधायिनः शब्दगतत्वेन, व्यर्थत्वादिप्रौढ्याद्युपमादयश्च अर्थान्व-

'स्वयं च पल्लवाताम्रभास्वत्करविराजिनी' (उदा० ४५१) (का० सा० स०, उदा० ८।१५) इत्यभङ्गश्लेषः 'प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा' (उदा० ४५२) (का० सा० स०, उदा० ८।१५) इति सभङ्गश्लेषश्चेति द्वावपि शब्दैकसमाश्रयाविति द्वयोरपि शब्दश्लेषत्वमुपपन्नम्, न त्वाद्यस्यार्थश्लेषत्वम् ।

अर्थश्लेषस्य तु स विषयो यत्र शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना: यथा—

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥उदा० ४५३॥

न्वयव्यतिरेकानुविधायित्वोऽर्थगतत्वेन श्लेषस्याप्यन्ते इत्यर्थः । गुणवत्—ग्रैव्यादिगुणवत्, वामनादिमतेनैव, स्वमते गुणानां रसधर्मत्वात् ।

उद्भटस्य मतानुयायिना च यत्र अर्थश्लेषत्वमभिमतं तत्रापि श्लेषस्य शब्दविशेषान्वयव्यतिरेकानुविधायित्वात् शब्दश्लेषत्वमेवेति प्रतिपादयति—**स्वयं च** पल्लवेत्यादिना । उद्भटकृते कुमारसम्भवकाव्ये पार्वतीवर्णनमिदम् । पार्वती न केवलं हिमालयेन महता सम्बन्धेनैव श्लाघ्या, किन्तु स्वयमपि, पल्लवैरिव आताम्रैः भास्वद्भिः करैर्विराजिता अस्वापो निद्राभावस्तस्य फलं स्नानसन्ध्यावन्दनादिकं तत्र लुब्धे जने **हितप्रदा** इष्टदात्री या प्रभातसन्ध्या सा इव, पल्लवौ इव **आताम्रौ** अरुणौ **भास्वन्तौ** दीप्तिमन्तौ यौ करौ ताभ्यां विराजिना, मुखेन प्राप्यते इति स्वापं न स्वापम् अस्वापं तस्मिन् फले मोक्षादिके ये लुब्धास्तेषाम् ईहितस्य प्रदा इष्टस्य दात्री अस्तीत्यर्थः । अत्र यद्यपि उद्भटप्रतीहारेन्दुराजयोः श्लेषस्य अर्थालङ्कारत्वमभिमतं तथापि अत्र श्लेषो भास्वच्छब्दस्य अस्वापशब्दस्य च अन्वयव्यतिरेकाभ्याम् अनुविधानं करोतीति शब्दालङ्कार एव; अत्र रुद्रटमतानुसारं (१०।१) पूर्वार्धे पदस्याभङ्गाद् अर्थश्लेषत्वम्, उत्तरार्धे पदस्य भङ्गाद्(रुद्रटालङ्कारे ४।१) शब्दश्लेषत्वमित्यपि न वक्तव्यम्, अन्वयव्यतिरेकाभ्यामुभयत्र श्लेषस्य शब्दैकसमाश्रयत्वस्य निश्चयादिति तन्त्रेणैवाऽत्र उद्भटादेः रुद्रटादेश्च मतयोः खण्डनं कृतं वेदितव्यम् । न चार्थप्रतीत्युत्तरमेव शब्दयोर्भेदस्य ग्रहणे श्लिष्टत्वस्य ग्रहादर्थश्लेषत्वम्, अर्थप्रतीतेः प्राक् शब्दयोर्भेदस्याग्रहणादेवालङ्कारस्वीकारादिति बोध्यम् ॥ उदा० ४५१-४५२ ॥

तर्हि त्वन्मते अर्थश्लेषो नास्त्येव ? इत्यत आह—**अर्थश्लेषस्य तु** इत्यादि । यत्र श्लेषोऽन्वयव्यतिरेकाभ्यां शब्दं नानुविदधाति, किन्तु अर्थमनुविदधाति तत्र अर्थश्लेषत्वं भवति; अस्य चार्थश्लेषस्य अस्माभिरर्थालङ्कारमध्ये एव गणना करिष्यते; किन्तु त्वदीयतीव्रतरजिज्ञासाशान्तये इदानीमप्युदाह्रियते इत्यभिप्रायेणोदाहरति—**स्तोकेनोन्नतिमि-** त्यादि । तुलादण्डस्य अग्रम्, खलश्च अल्पेन ऊर्ध्वगमनं चेतःसमुन्नतिं च, याति प्राप्नोति अल्पेनैव अधोगमनं चेतोऽवसादं च प्राप्नोति इति अहो । तुलाकोटेः खलस्य च वृत्तिरत्यन्तमेव सदृशी विद्यते इत्यर्थः । अत्र स्तोकादिपदनिवर्तनेन अल्पेनोत्कर्षमायातीत्यादौ कृतेऽपि न श्लेषो निवर्तते इति अत्र श्लेषस्यार्थालङ्कारत्वं बोध्यम् ॥ उदा० ४५३ ॥

यच्च भट्टोद्भटेन शिष्टत्वविशेषणमुक्तम्—'अलङ्कारान्तरगतां प्रतिभां जनयत्

न चाऽयमुपमाप्रतिभोत्पत्तिहेतुः श्लेषः अपि तु श्लेषप्रतिभोत्पत्तिहेतुरुपमा। तथाहि—यथा '**कमलमिव मुखं मनोज्ञमेतत् कचतितराम्**" (उदा० ४५४) इत्यादौ गुणसाम्ये, क्रियासाम्ये, उभयसाम्ये वोपमा तथा "**सकलकलं पुरमेतज् जातं सम्प्रति सुधांशुबिम्बमिव**" (उदा० ४५५) इत्यादौ शब्दमात्रसाम्येऽपि सा युक्तैव, तथा ह्युक्तं रुद्रटेन—"स्फुटमर्थालङ्कारावेतावुपमासमुच्चयौ किन्तु। आश्रित्य शब्दमात्रं सामान्यमिहापि सम्भवतः" (४३२) इति।

न च "कमलमिव मुखम्" (उदा० ४५६) इत्यादिः साधारणधर्मप्रयोगशून्य उपमाविषय इति वक्तुं युक्तम्, पूर्णोपमाया निर्विषयत्वापत्तेः।

"**देव त्वमेव पातालमाशानां त्वं निबन्धनम्। त्वञ्चामरमरुद्भूमिरेको लोकत्रयात्मक**"(उदा० ४५७) इत्यादि श्लेषस्य चोपमाद्यलङ्कारविभक्तो विषय

पदैः" इति यदपि प्रतीहारेन्दुराजेनोक्तम्—"एवं च श्लिष्टं द्विविधमपि उपमाद्यलङ्कार-प्रतिभोत्पादनद्वारेण अलङ्कारतां प्रतिपद्यते" इति तदुभयमयथार्थमिति प्रतिपादयितु-माह—**न चाऽयमुपमे**त्यादि। **स्वयञ्च पल्लवाताम्रे**त्यादौ यः श्लेषः स उपमाया य आभासः तस्योत्पत्तेर् हेतुरपि न, किन्तु इव शब्दाद् औपम्यज्ञानस्य अनन्तरमेव श्लेषस्या-ऽऽभासाद् उपमैव तत्र श्लेषप्रतिभाप्रोत्पत्तेर् हेतुरित्यर्थः। ननु **स्वयञ्च पल्लवे**त्यादौ गुणक्रिया-साम्याभावादुपमैव पदबन्ध (सुस्थिति) नाप्नोति, तत् कथं स्वयमलब्धास्पदाऽन्यं प्रतिभासयेदित्यत आह—**तथाही**त्यादि। 'कमलमिव सुन्दरमेतत् मुख दीप्यतेतराम्' इत्यादौ गुणसाम्ये क्रियासाम्ये उभयसाम्ये वा यथा उपमालब्धास्पदा भवति तथैव "एतत् पुरं सम्प्रति चन्द्रबिम्बमिव सकलकलम् (सकलकलायुक्तम्, कलकलशब्दयुक्तं च) जातम्" इत्यादौ शब्दमात्रसाम्येऽपि उपमा लब्धास्पदा भवत्येव; न केवलं मयेदमुच्यते, रुद्रटोऽपि—'यद्यपि उपमा च समुच्चयश्च सत्यमेवार्थालङ्कारौ, तथापि शब्दमात्ररूपं साधारणं धर्ममाश्रित्यापि तौ लब्धास्पदौ सम्भवतः' इत्याह; एवञ्च '**स्वयं च पल्लवाताम्रा**' इत्यादौ अपि गुणसाम्ये क्रियासाम्ये वा अविद्यमानेऽपि पल्लवाताम्रेत्यादेः आस्वापफलेत्यादेश्च शब्दस्यैव साम्यमाश्रित्यापि उपमा लब्धास्पदा भवत्येव; एवञ्चोपमायां लब्धास्पदायामेव श्लेषस्याभासो भवतीति अत्र उपमैव श्लेषप्रतिभोत्पत्तिहेतु, न तु उपमाप्रतिभोत्पत्तिहेतुः श्लेषः इत्यभिप्रायः।

यच्च भट्टोद्भटाभिप्रायं प्रकाशयता इन्दुराजेनोक्तम्—"एतच्च श्लिष्टं द्विविधमपि उपमाद्यलङ्कारप्रतिभोत्पादनद्वारेणाऽलङ्कारतां प्रतिपद्यते। अतोऽनेनाऽनवकाशितत्वात् स्वविषये अलङ्कारान्तराण्यपोद्यन्ते. तेषां विषयान्तरे सावकाशत्वाद्" इति यच्च स मन्यते साधारणधर्मप्रयोगे श्लिष्टशब्दमात्रसाम्ये च श्लेषस्य लब्धास्पदत्वात् स सर्वालङ्-कारापवादस्य श्लेषस्यैव विषय इति "कमलमिव मुखम्" इत्यादिः साधारणधर्मप्रयोग-शून्य एव उपमा विषय इति तदिदमसङ्गतम्, तस्मिन् मते पूर्णोपमाया उच्छेदस्व प्रसङ्गादित्याह—**न च कमलमिवेत्यादिना**।

इति द्वयोर् योगे सङ्कर एव उपपत्तिपर्यालोचने तु उपमाया एवायं युक्तो विषयः, अन्यथा विषयापहार एव पूर्णोपमायाः स्यात् ।

न च "**अविन्दुसुन्दरी नित्यं गलल्लावण्यबिन्दुका**" (**उदा० ४-५८**) [का० सा० सं० उदा० ४।१७] **इत्यादौ** विरोधप्रतिपत्तिहेतुः श्लेषः अपितु श्लेषप्रतिभोत्पत्तिहेतुर् विरोध । तत्रार्थद्वयप्रतिपादकः शब्दश्लेषो द्वितीयार्थस्य प्रतिभानमात्रस्य प्ररोहाभावात् । न च विरोधाभास इव विरोधः श्लेषाभासः श्लेषः । तस्मादेवमादौ श्लेषप्रतिभोत्पत्तिहेतुः अलङ्कारान्तरमेव ।

न च अलङ्कारान्तरविविक्तो नास्य (श्लेषस्य) विषयोऽस्ति **देव त्वमेव पाताल-**मित्यादेः उपमाद्यलङ्कारविविक्तस्य श्लेषविषयस्य सत्त्वात् इत्याह—**देव त्वमेवे**त्यादिना । हे विष्णो, त्वमेव अधोभुवनम्, त्वमेव आशानां दिशां निबन्धनम् (भूलोके एव सूर्यस्य गतेः सत्त्वाद्दिशां नियमात् त्वं) भूलोक इत्यर्थः, त्वमेव पुनः अमराणां मरुतां च भूमिः स्वर्गलोकश्चासीति त्वमेकोऽपि सन् लोकत्रयात्मकोऽसीति **विष्णुपक्षेऽर्थः** । **राजपक्षे** तु हे **देव** राजन्, त्वमेव अलमत्यर्थं पाता रक्षिता, त्वं याचकानामाशानां **निबन्धनं** कारणम्, त्वं चामराणां चमरमृगपुच्छानां ये मरुतः तेषां भूमिः, एवं च **एको**ऽपि जनत्रयात्मकोऽसीत्यर्थः । **केचन** राजानो रक्षितार एव केचन दातार एव, केचन सुखिन एव; अयन्तु त्रिरूपतया जनत्रयात्मकः इतिभावः । अत्र श्लेष एवाऽलङ्कार इति अस्त्येव श्लेषस्यालङ्कारान्तरविविक्तो विषय इतिभावः । एवञ्च लुप्तोपमायाः श्लेषविविक्तस्य विषयस्य सत्त्वात् श्लेषस्य चोपमाविविक्तस्य विषयस्य सत्त्वात् परस्परं निरपेक्षयोः स्वतन्त्रयोस्तुल्यबलयोस्तयोर् योगे साङ्कर्यमेव स्वीकर्तुमुचितमित्याह—**इत्यादिः श्लेषस्य चेत्यादि** । वस्तुतस्तु **स्वयञ्च पल्लवाताम्रेत्यादौ** श्लेषस्य उपमानिर्वाहकत्वेन उपमाङ्गत्वाद् अङ्गिन्या उपमाया एव प्राधान्यात्, प्रधानेन व्यपदेशा भवन्तीति न्यायाद्, उपमानिर्वाहकत्वेऽपि श्लेषस्य पृथग् गणने पूर्णोपमाया असङ्कीर्णस्य विषयस्यैवासम्भवाच्चैवम्प्रकारेण उपपत्तेः पर्यालोचने तु **स्वयञ्च पल्लवेत्यादिः** उपमाया एव विषय इति स्वीकरणीयम् इत्याह—**उपपत्तिपर्यालोचने तु** इत्यादिना ।

"अलङ्कारान्तरगतां प्रतिभां जनयत् पदैः" (४।१०) इति भट्टोद्भटोक्तेन विशेषणम् "अपारिजातवार्ताऽपि नन्दनश्रीर् भुविस्थिता । अविन्दुसुन्दरी नित्यं गलल्-लावण्य बिन्दुका" (उदा०४।१७) इति तदुक्तं श्लेषोदाहरणञ्च व्याचक्षाणेन कौङ्कणेन इन्दुराजेन पूर्वार्धे श्लेषस्य अलङ्कारप्रतिभोत्पत्तिहेतुत्वम्, उत्तरार्धश्लेषस्य विरोधप्रतिभाहेतुत्वञ्च भट्टोद्भटाभिप्रेतं यदभिहितम् तदसमञ्जसमेवेति सूचयन्नाह—न च **अविन्दुसुन्दरी**त्यादि । या च पार्वती उदकमध्यवर्तितया योऽसौ अप्सु प्रतिबिम्बित इन्दुः स इव सुन्दरी, नित्यञ्च गलल्लावण्यबिन्दुप्रवाहा अस्तीत्यर्थः । अविन्दुसुन्दरीत्यत्र बिन्दुभिर् यस्याः सौन्दर्यं नास्ति तस्याः कथं लावण्यबिन्दवः प्रसरेयुरिति विरोधप्रतिभोत्पत्तिहेतुः श्लेष

तथा च **"सद्वंश-मुक्तामणिः"** (उदा० ४५९), **"नाल्पः कविरिव स्वल्पश्लोको देव महान् भवान्"** (उदा० ४६०), **"अनुरागवती सन्ध्या दिवसस् तत्पुरस्सरः। अहो दैवगतिश् चित्रा तथापि न समागमः"** (उदा० ४६१) **"आदाय चापमचलं कृत्वाऽहीनं गुणं विषयदृष्टिः। यश् चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन् नमस्तस्मै"** (उदा० ४६२) इत्यादौ एकदेशविवर्ति[illegible]-व्यतिरेक-समासोक्ति विरोधत्वम् उचितम्, न तु श्लेषत्वम्।

इति इन्दुराजः। मम्मटस्तु—एतादृशेषु स्थलेषु श्लेषो न विरोधप्रतिभासोत्पत्तिहेतुः, किन्तु विरोध एव मुख्यः सन् श्लेषप्रतिभासोत्पत्तिहेतुर् भवति, यतो हि यत्र समकक्षयोर् द्वयोरर्थयोः अन्वययोग्ययोः प्रतिपादकः शब्दो भवति, तत्रैव श्लेषः प्रधानं भवति; अत्र तु 'बिन्दुभिः यस्याः सौन्दर्यं नास्ति तस्याः कथं लावण्यबिन्दवः प्रसरेयुरित्यस्य द्वितीयस्यार्थस्य प्रतिभातमात्रस्य **प्ररोहाभावात्** (शाब्दबोधविषयत्वेनोद्गमस्याभावात्), द्वितीयस्याऽप्यर्थस्य तात्त्विकत्वेनैव शाब्दबोधविषयत्वे तु विरोधस्याऽपि वास्तविकत्वन्यापातात्. तस्य च दोषत्वाद् दोषहेतुः श्लेषोऽपि अलङ्कारो न स्यादिति नैव श्लेषः प्रधानम्, किन्तु विरोध एव प्रधानम्, श्लेषस्य तु प्रतिभास एवाऽत्र इति मन्यते। यदि श्लेषस्य तात्त्विकत्वे द्वितीयस्याऽप्यर्थस्य तात्त्विकतया आपातेन विरोधस्यापि तात्त्विकत्वं दोषत्वं च स्यादिति श्लेषस्याऽप्यतात्त्विकत्वं न हि स्वीकर्तुं शक्यम्, श्लेषस्याऽतात्त्विकत्वे तस्य वैचित्र्यानाधायकत्वात् तस्याऽलङ्कारतायाः एवाऽपायाद्, विरोधस्य तु तात्त्विकत्वे दोषत्वाद् विरोधाभासस्यैव विरोधालङ्कारत्वं स्वीक्रियते इत्याह—**न च विरोधाभास** इत्यादिना। तस्मादेतादृशेषु स्थलेषु अलङ्कारान्तरमेव प्रधानम्, श्लेषस्तु प्रातिभासिक [illegible]।

एवमेव अन्यत्राऽपि यत्र यत्र अलङ्कारान्तरनिर्वर्तकतया श्लेषस्य अङ्गता भवति तत्र तत्र अङ्गिभिरेवाऽलङ्कारान्तरैर् व्यपदेशो न्याय्यो न तु "अनेन (श्लेषेण) अनवकाशत्वात् स्वविषये अलङ्कारान्तराणि अपोद्यन्ते तेषां विषयान्तरे सावकाशत्वाद्" इति इन्दुराजजल्पितमात्रावष्टम्भेन श्लेषेण व्यपदेश इत्य[illegible]—**तथा चे**त्यादि। 'सद्वंशमुक्तामणिः' इत्यस्य 'अयं सद्वंशः सत्कुलमेव सद्-वेणुस् तत्र मुक्तामणिरित्यर्थः। तत्र च एकदेशविवर्तीनि परैरुच्यमाने [illegible] रूपकमेव प्रधानं वंशशब्दे श्लेषस्तु वेणु-कुलरूपकोपयोगितया राज्ञि मुक्तामणित्वारोपे उपयोगितया च रूपकाङ्गम्, अतोऽत्र रूपकेणैव व्यपदेशो न्याय्यो न तु श्लेषेणेति बोध्यम्। **नाल्पः कविरिवेत्यादेः** 'हे राजन्, महान्, भवान् स्वल्पश्लोकः (स्वल्पपद्यः) क्षुद्रः कविरिव स्वल्पश्लोकः (स्वल्पयशाः) नास्तीत्यर्थः। अत्र राज्ञः क्षुद्रकवितो व्यतिरेके श्लोकशब्दश्लेष उपयोगीति श्लेषमूलकव्यतिरेकालङ्कारोऽयम्; श्लेषस्तु व्यतिरेकाङ्गत्वेन अप्रधानमिति न तेनाऽत्र व्यपदेशो युक्त इति भावः। **अनुरागवतीत्यादेः** 'सन्ध्या अनुरागवती अस्ति, दिवसश्च तस्याः पुरस्सरोऽस्ति, अहो दैवगतिर् विचित्रा वर्तते, तथाऽपि तयोः समागमो न भवतीत्यर्थः। अत्र सन्ध्याख्या नायिका प्रेमवती अस्ति, दिवसाख्यो नायकम् तत्सम्मुखोऽस्ति, तथाहि तयोः

शब्दश्लेष इति च उच्यते अर्थालङ्कारमध्ये च लक्ष्यते इति कोऽयं नयः ? किञ्च वैचित्र्यमलङ्कार इति य एव कविप्रतिभासंरम्भगोचरस्तत्रैव विचित्रता इति सैवाऽलङ्कारभूमिः । अर्थमुखप्रेक्षित्वमेषां शब्दानामिति चेद्, अनुप्रासादी-नामपि तथात्वमेवेति तेऽप्यर्थालङ्काराः किं नोच्यन्ते ? [illegible]-वाच्यविशेषस्पर्शकत्वे हि अनुप्रासादीनामलङ्कारता । [illegible]-

---

[illegible] सङ्गमो न [illegible] प्रतीयते । किन्तु प्रकरणात् प्रथमेऽर्थेऽभि-धायनियन्त्रणाद् न श्लेषोऽत्र प्रधानम्, किन्तु श्लिष्टविशेषणमहिम्ना [illegible]-वृत्तान्तरं [illegible] भवति, स च [illegible]ऽत्र प्रतीयमानोऽपि वाच्यार्थोपस्कारक-त्वेनैव तिष्ठति, न तु [illegible] ध्वनितां [illegible] वा भजते इति समासो-क्तिरेवात्रालङ्कार इति भावः । **आदाय चापमचलम्**मित्यादौ **विषमा** लक्ष्यादन्यत्र निहिता **दृष्टिर्** येन तादृशो यो धन्वी **अचलं** निष्क्रियं धनुरादाय **हीनं** निकृष्टं **गुणं** ज्यां कृत्वा **अच्युतो**ऽनिर्गतः शरो यस्य तादृशः सन्नपि आश्चर्यं यथा स्यात् तथा लक्ष्यं विव्याधेति विरोधस्याभासः । तत्र [illegible]—[illegible] त्रिलोचनः अचलं मन्दरपर्वतं धनुः कृत्वा **अहीनं** सर्पप्रभुं वासुकिं ज्यां कृत्वा **अच्युतो** विष्णुः शरो यस्य तादृशः सन् **लक्ष्यं** त्रिपुरा-सुररूपं शरव्यम् आश्चर्यं यथा स्यात् तथा अभाङ्क्षीदिति । अत्र विरुद्धस्यार्थस्य आभास-मात्रत्वेन तुल्यकक्ष्ययोरर्थयोः प्रतिपत्तेरभावाद् न स्वप्रधानोऽत्र श्लेषः, किन्तु विरोधा-भासाङ्गभूत एव स इति [illegible]ऽत्र व्यपदेशो युक्त इति भावः ।

"एकप्रयत्नोच्चार्याणां तच्छायां चैव बिभ्रताम् । स्वरितादिगुणैर् भिन्नैर् बन्धः श्लिष्टमिहोच्यते । अलङ्कारान्तरगतां प्रतिभां जनयत् पदैः । द्विविधैर्[illegible]शब्दोक्तिविशिष्टं तत् प्रतीयताम्" इति वदता (४।१०।११) भट्टोद्भटेन श्लेषविशेषस्य [illegible] शब्दश्लेष इति नाम क्रियते किन्तु तस्याऽपि अर्थालङ्कारमध्ये एव गणना पाठश्च क्रियत इति कोऽयं न्याय इत्याह—**शब्दश्लेष** इत्यादिना । प्रभातसन्ध्येवेत्यादौ [illegible] शब्दश्लेषस्याऽपि अर्थालङ्कारत्वमिति वदतो भवतो वचनं व्याहतम्; शब्दाश्रितत्वे शब्दश्लेषत्वेन व्यपदेशोऽन्याय्य इति च भावः । ये शब्दाः तेषामेवैकप्रयत्नोच्चार्याणां शब्दानां **छायां** सादृश्यं बिभ्रति तदुपनिबन्धे च शब्दश्लिष्टम्; शब्दान्तरे उच्चार्यमाणे सादृश्यवशेन अनुच्चरितस्याऽपि शब्दान्तरस्य श्लिष्टत्वादिति च [illegible]। **अतो** न शब्दालङ्कारतया शब्दश्लेष इति व्यपदेशः, किन्तु [illegible] शब्दयोः परस्परं संश्लिष्टत्वात् तथा व्यपदेशः, अर्थप्रतीत्युत्तरं शब्दयोर् भेदस्य ग्रहे श्लिष्टत्वस्य ग्रहादर्था-लङ्कारत्वम् इति किमनुपपन्नमित्यत्राऽऽह—**किञ्चे**त्यादि । वैचित्र्यमलङ्कार इति, यस्य निष्पादने कवेः प्रतिभाया व्यग्रतया व्यापारः तत्रैव च वैचित्र्यमिति, उक्तोभयविध-श्लेषस्थले च शब्दविशेषसमायोजने एव कविप्रतिभाया व्यग्रतया व्यापार इति शब्दस्यैव वैचित्र्याद् उक्तविधयोः सभङ्गाभङ्गयोः श्लेषयोः शब्दालङ्कारत्वमेवोचितमिति भावः । ननु निरर्थकानां शब्दानां श्लेषस्य असम्भवाद्, अर्थप्रतीत्युत्तरं शब्दयोर् भेदस्य ग्रहे एव

पेक्षयैव गुणदोषता । [illegible] शब्दापेक्षयैव स्थितिरिति तेऽपि शब्दगतत्वेनोच्यन्ताम् । **'विधौ वक्रे मूर्ध्नि'** (उदा० ४६३) इत्यादौ च वर्णादिश्लेषे एकप्रयत्नोच्चार्यत्वेऽर्थश्लेषत्वं शब्दभेदेऽपि प्रसजतीत्येवमादि स्वयं विचार्यम् ।

श्लिष्टत्वस्य ग्रहात् श्लेषस्य अर्थालङ्कारत्वमेवोचितमिति पूर्वपक्षे आह—**अर्थमुखप्रेक्षित्व**मित्यादि । यदि श्लेषशब्दानामर्थमुखप्रेक्षित्वेन श्लेषस्यार्थालङ्कारत्वं स्यात् तर्हि अनुप्रासादीनामपि अर्थमुखप्रेक्षित्वस्य तुल्यत्वात् तेऽपि अर्थालङ्कारा एव स्युः, कथं भट्टोद्भटेन तदनुयायिभिश्च अनुप्रासादीनां शब्दालङ्कारत्वं स्वीक्रियते ? इत्यर्थः । अनुप्रासादीनामर्थमुखप्रेक्षित्वं [illegible]—**रसादिव्यञ्जके** [illegible] । अत्र—'सव्यपेक्षत्वेऽपि ह्यनुप्रासादीनामशब्दालङ्कारता' इति पारिखेन सम्पादितस्य मूलपाठस्य सङ्गतिर् विद्वद्भिः पर्यालोचनीया । रसभावादिविशेषव्यञ्जकं यद् [illegible] यश्च रसभावविशेषव्यञ्जको वाच्यविशेषः तदनुकूलत्वे हि अनुप्रासादीनामलङ्कारतेत्यर्थः प्रतिभाति । अत्रेदन्तु विचार्यम्—गुणालङ्कारविवेकप्रसङ्गे [illegible] प्रदर्शयता मम्मटेन "यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसायिनः, क्वचित् तु सन्तमपि नोपकुर्वन्ति" इत्युक्त्वा (सू० ८९, वृत्तौ) 'चित्ते चिहुट्टदि' इत्यादौ वाचक (शब्द) मात्रोपकारकत्वेनाऽपि अनुप्रासो मम्मटेनाऽपि उदाहृत इति मम्मटस्याऽय सम्भिन्नालापः प्रतीयते इति । [illegible] भट्टोद्भटस्य मते तु अनुप्रासादीनां [illegible] वाच्यविशेषसापेक्षत्वमपि कथमिति न जानीमहे । अथवा सारासारनिर्णयकुशलस्याऽपि मम्मटस्य अलङ्कारस्वरूपविषये विवेकशक्तिरेव दोलायिता प्रतीयते । यदि अर्थमुखप्रेक्षितया अर्थाधिगतत्वमादाय अर्थविशिष्टत्वेन व्यपदेशो न्याय्यः स्यात् तर्हि ये गुणा दोषाश्च [illegible] शब्दगतत्वेन निर्णीतास्तेषामपि अर्थमुखापेक्षित्वमस्त्येवेति तेऽपि अर्थगतत्वेनैव वाच्याः स्युरित्याह—**शब्दगुणे**त्यादिना । यदि तन्मुखापेक्षित्वं तद्गतत्वमिति व्यवस्था स्यात् तर्हि ये गुणदोषालङ्कारा यथायथं वामनादिभिः उद्भटादिभिश्च अर्थगतत्वेन प्रतिपादिता तेऽपि शब्दाभावे खपुष्पायिता एव स्युरिति शब्दमुखप्रेक्षितया शब्दगतत्वेनैव किमिति नोच्यन्ते ? इत्यभिप्रेत्य आह—**अर्थगुणे**त्यादि । यद्यपि 'गड्डरिकाप्रवाहेणैव गुणालङ्कारभेदः' इति वदता भट्टोद्भटेन गुणाः न स्वीकृताः, दोषा अपि काव्यालङ्कारसारसङ्ग्रहे नोक्ताः तथापि [illegible] शब्दगतत्वस्यापत्तिस्तु तन्मतेऽपि भवत्येवेति बोध्यम् । वस्तुतस्तु भट्टोद्भटमतखण्डने तदुक्तावेव अनुपपत्तिः प्रदर्शनीया । तथाऽपि अभङ्गश्लेषमर्थालङ्कारं मन्यमानस्य रुद्रटस्य (१०।१) मतमपि अत्र खण्ड्यते इति तदुक्तावप्यापत्तेः प्रदर्शनमुचितमेव । गुणास्तु रुद्रटेनाऽपि नैवोक्ता इति अत्र तदुपादानं चिन्त्यम् । स्वरवर्णानुपूर्वीभेदाभावे तन्त्रेणोच्चार्याणाम् अभङ्गानां शब्दानां श्लेषोऽर्थश्लेषः, स्वरादिभेदेऽपि तदनादरणाद् एकप्रयत्नोच्चार्यतामापन्नानां सभङ्गानां शब्दानां श्लेषः शब्दश्लेषः इति भट्टोद्भट-रुद्रटादिकथनमप्यसङ्गतमेव, 'विधौ वक्रे मूर्ध्नि' इत्यादौ (उदा० ४४३) विधु-विधिप्रभृतीनां शब्दानां भेदे सति उद्भटादीनां

(सू० १२२) तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ॥८४॥

सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्ग-मुरज-पद्माद्याकारमुल्लास-यन्ति तच्चित्रं काव्यम्। कष्टं काव्यमेतदिति दिङ्मात्रं प्रदर्श्यते।

तत्र शब्दश्लेषत्वेऽभिमतेऽपि विधौ इत्यादेः सर्वथैकप्रयत्नोच्चार्यतया [illegible]-वस्थानुसारम् अर्थश्लेषत्वस्य प्रसङ्गात्। एतादृशानि अन्यान्यपि दूषणानि भट्टोद्भटादिमते अवगन्तव्यानि विवेकशीलैः स्वयमपि विविच्य यथोचितं निर्णेयम्, न केवलम् अस्माभिरुक्त-मित्येतावता विनैव विचारं यत् किञ्चिद् झटित्याश्रयणीयं न वा परेणोक्तमिति वृथैव द्वेष्टव्यमित्यभिप्रायेणाह—**विधौ वक्रे मूर्ध्नि इत्यादि**।

यद्यपि रुय्यकाद् मम्मटः प्राचीनः, मम्मटश्चात्र मुख्यरूपेण भट्टोद्भटदण्डिवामन-रुद्रटानां मतान्येव खण्डयति तथापि ताभिरेव युक्तिभिः रुय्यकोक्तमपि खण्डितं भवतीति बोद्धव्यम्। मम्मट-रुय्यकयोः पौर्वापर्ये भ्रान्त्या प्रभाकरनागोजिभट्टझळकीकरादयस्तु रुय्यक-मतखण्डनपरतयैवाऽत्र प्रायेण वाक्ययोजनां कुर्वन्ति।

चित्रं नाम चित्रकाव्यं निरूपयति—**तच्चित्रमित्यादिना**। कारिकार्थो वृत्तौ स्फुटः। यद्यपि लिखितलिप्यक्षरविन्यासस्य खड्गादिसन्निवेशवत्त्वे चित्रत्वं तथापि श्रोत्राकाशसम-वेतवर्णात्मकशब्दरूपत्वेनैव तेषां लिप्यक्षराणां लोके प्रतीतेरस्य शब्दचित्रत्वम्; अथवा लिखिताक्षरविन्यासे खड्गाद्याकृतिनिर्वर्तनाय वर्णरूपशब्दविशेषाणां सन्निवेशविशेषस्याऽऽ-वश्यकाद् एवास्य शब्दचित्रत्वम्। [illegible] कथमलङ्कारत्वमिति चेत् कवि-नैपुण्यविशेषानुमितिजन्यविस्मयजनकत्वेन विचित्रत्वादेवेति बोध्यम्, वैचित्र्यमलङ्कारः इति वृत्तिकृता अनुपदमेव अलङ्कारसामान्यलक्षणस्य प्रतिपादितत्वात्। इदन्त्व चित्र-काव्यरूपत्वेनैवावतिष्ठते न कदापि काव्यस्य [illegible] वा कोटिमुत्कर्षयतीति सूचनाय **'चित्रमलङ्कारः'** इत्यनुक्त्वा **'चित्रं काव्यम्'** इत्युक्तम्। चित्रं चित्रालङ्कारयुक्तमित्यर्थ इति, चित्रमलङ्कार इति सुगमः पाठ इति झळकीकरस्य कथनं ग्रन्थकृद्भावानवबोधमूल-कम्, अस्य चित्रालङ्कारस्य काव्ये कीदृशं स्थानमिति विवेके शैथिल्यस्य सूचकं च। **कष्टं** कष्टसाध्यं कष्टबोध्यार्थं चेदं काव्यमिति विनेयवैमुख्यभयाद् रुद्रटादिभिः (रुद्रट ५।१-२३) विस्तरेण प्रदर्शितस्यापि अस्य काव्यस्य अस्माभिर्दिङ्मात्रं प्रदर्श्यते इत्याह—**कष्टं काव्यमि-त्यादिना**। चित्रकाव्यमात्रविषयमिदं शब्दचित्रं षष्ठे उल्लासे एव निरूपणीयमपि अत्र [illegible] निरूपितमिति किमत्र अद्भुतरसोप-कारकत्वं मम्मटस्याऽभिप्रेतम्? ओमितिचेत् तदुचितं नवेति च विवेचनीयं विचक्षणैः। यदि उचितमेव तर्हि तु वृत्तौ 'चित्रं काव्यम्' इत्यस्य स्थाने 'चित्रमलङ्कारः' इति पठनमपि उचितं स्यात् ॥८४॥

खड्गबन्धोदाहरणं यथा—मारारिशक्रेत्यादि श्लोकद्वयम्। रुद्रटेनोदाहृतं पद्यद्वय-मिदम्। (५।६-७) **मारस्य** मन्मथस्य **अरिः** शत्रुः शम्भुः, **शक्रः** इन्द्रः, **रामः** परशुरामः,

उदाहरणम्—

मारारिशक्ररामेभमुखैरासाररंहसा ।
साराब्धस्तवा नित्यं नदार्तिहरणक्षमा ।।क।।
माता नतानां सङ्घट्टः श्रियां बाधितसम्भ्रमा ।
मान्याऽथ सीमा रामाणां शम् मे दिश्यादुमाऽऽदिमा ।।ख।।
उदा० ४६४।।

खड्गबन्धः ।

सरलावहलारम्भतरलालिबलारवा ।
वारलावहला मन्दकरलाऽवहलामला ।। उदा० ४३५ ।।

मुरजबन्धः ।

इभमुखो गणेशः, एतैः आसारस्य वर्षधारासम्पातस्य रंहेणाऽविच्छेदेन सार मान्... उत्कृष्टं यथा स्यात् तथा आरब्धः स्तवो यस्यास्तथा भूता, नित्यमेव तेषां माराग्प्रिभृती- नाम् **आर्तेः** पीडाया हरणे समर्था; प्रणताना मातेव माता, श्रियां **सङ्घट्टः** सम्मेलनस्थानम्, बाधितः सम्भ्रम उद्वेगो यया सा, निर्विशेषतया सर्वैः मान्या, अथ रामाणा **सीमा** परा काष्ठा, आदिमा च उमा मह्यं कल्याणं **दिश्याद्** ददातु इत्यर्थः । अत्र उपमारूपकाद्यर्था- लङ्कारलेशयोगेन शब्दचित्रकाव्यत्वं निर्वहणीयं भवति । खड्गबन्धाकारो यथा—

मुरजबन्धमुदाहरति—**सरला बहलेत्यादि** । रुद्रटेनैवोदाहृतम् इदमपि पद्यम्(५।१९)। **सरलः** एकविधो दीर्घः **आसमन्ताद्** बहलेन आरम्भेण तरलानाम् अलिबलानां भ्रमरसैन्या- नामारवः शब्दो यस्या सा, **वारलाभिर्** हंसीभिर् बहला, अमन्दा उद्योगिनः **करलाः** राजकरग्राहिणो यस्यां सा, बहलमत्यर्थमेवाऽमला शरद् वर्तते इत्यर्थः । अत्राऽपि स्वभा- वोक्तिलेशयोगेन चित्रकाव्यत्वं निर्वहणीयं भवति । मुरजबन्धाकारो यथा—

भासते प्रतिभासार रसाभाताहताविभा ।
भावितात्मा शुभा वादे देवाभा बत ते सभा ॥ उदा० ४८६ ॥

पद्मबन्धः ।

रसासार रसा सारसायताक्ष क्षतायसा ।
सातावात तवातासा रक्षतस्त्वस्त्वतक्षर ॥उदा० ४८७॥

सर्वतोभद्रम् ।

पद्मबन्धमुदाहरति—**भासते प्रतिभासारे**त्यादि । हे प्रतिभा सारो यस्य तादृश, प्राज्ञश्रेष्ठ राजन्, **रसैः** शृङ्गारादिभिः **आभाता** शोभिता, अहता **आविभा** समन्तात् शोभा यस्याः सा, **भाविताल्मा** एकाग्रीकृतहृदया **वादे** [illegible] शुभा **देवैर्** विजिगीषुभिः पण्डितैः **आभा** यस्याः सा तादृशी बत ते सभाऽस्तीत्यर्थः । अष्टदलपद्मबन्धप्रकारो यथा—

(सू० १२३) पुनरुक्तवदाभासो विभिन्नाकारशब्दगा ।
एकार्थतेव.... ....।

भिन्नरूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वेन मुखेऽवभासनं पुनरुक्तवदाभासः ।

स च—

(सू० १२४).... .... शब्दस्य .... ।

सभङ्गाऽभङ्गरूपकेवलशब्दनिष्ठः ।

उदाहरणम्—

अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः ।
भाति सदा नत्याऽगः स्थिरतायामवनितिलकः ॥उदा० ४६८॥

अधुना भट्टोद्भटेन शब्दालङ्कारेषु आदावेव पठितमपि पुनरुक्तवदाभासं तस्य उभयालङ्कारत्वस्याऽपि सम्भवात् शब्दार्थालङ्कारप्रकरणान्तराले निरूपयति—**पुनरुक्तवदाभास** इत्यादिना । यद्यपि परम्परितरूपक-शब्दहेतुकोपमा-हि-शब्दहेतुकार्थान्तरन्यास-प्रभृतयोऽपि शब्दार्थोभयान्वयव्यतिरेकानुविधायित्वात् उभयालङ्काराः सन्ति तथाऽपि तेषु अर्थवैचित्र्यस्योत्कटतया तेषामर्थालङ्कारमध्ये एव निरूपणङ्क्रियते । भिन्नरूपयोः सार्थकनिरर्थकयोरपि शब्दयोः आपाततः एकार्थकतया प्रतीतेः पुनरुक्तवद् अवभासनं पुनरुक्तवदाभास इति कारिका-वृत्त्योः पिण्डीकृतोऽर्थः । (सू० १२३) ।

स च पुनरुक्तवदाभासः सभङ्गरूपकेवलशब्दनिष्ठः अभङ्गरूपकेवलशब्दनिष्ठोऽपि सम्भवतीति प्रसङ्गमाह—**स च शब्दस्ये**त्यादिना । (सू० १२४) ।

तत्र सभङ्गकेवलशब्दनिष्ठं पुनरुक्तवदाभासमुदाहरति—**अरिवधे**त्यादिना । **अरिवधदा** शत्रुविनाशदात्री **ईहा** चेष्टा येषां ते ये **शरिणः** शरवन्तो योधास्तान् ईरयति प्रेरयतीति **अरिवधदेहशरीरः सहसा** हठेन रथिभिः सुष्ठु **ऊता** योजिता तुरगाः **रथिसूततुरगाः पादातं** पदातिसमूहश्च यस्य तादृशः, स्थिरतायाम् **अगः** पर्वत इव भूतः अवनितलतिलकोऽयं राजा सदा **नत्या** नम्रतया भातीत्यर्थः । अत्र भिन्नशब्दतदर्थानुसारित्वाद् निरर्थकस्य देहशब्दस्य सार्थकस्य शरीर-शब्दस्य चेति, तस्मादेव हेतोः निरर्थकस्य सारथिशब्दस्य सार्थकस्य सूतशब्दस्य चेति, उक्तादेव हेतोः निरर्थकयोः दान-त्याग-शब्दयोश्च आपाततः पुनरुक्ततया भासनमिति पुनरुक्तवदाभासत्वं बोध्यम् । उभयेषां शब्दानां पर्यायपरिवृत्त्यसहत्वात् सभङ्गत्वाच्च पुनरुक्तवदाभासस्य सभङ्गशब्दनिष्ठत्वमत्र बोध्या ॥उदा० ४६८॥

चकासत्यङ्गनारामा कौतुकाऽऽनन्दहेतवः ।
तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः ॥उदा० ४६९॥

(सू० १२५) .... तथा शब्दार्थयोरयम् ॥८५॥

उदाहरणम्—

तनुवपुरप्यन्योऽसौ करि-कुञ्जर-रुधिर-रक्त-खरनखरः ।
तेजो-धाम महः-पृथु-मनसामिन्द्रो हरिर् जिष्णुः ॥उदा० ४७०॥

अत्रैकस्मिन् पदे परिवर्तिते नाऽलङ्कार इति शब्दाश्रयः, अपरस्मिंस्तु परिवर्तितेऽपि स न हीयते इति अर्थनिष्ठ इति उभयालङ्कारोऽयम् ।

इति काव्यप्रकाशे शब्दालङ्कारनिर्णयो नाम नवम उल्लासः ॥ ९ ॥

अभङ्गशब्दनिष्ठं पुनरुक्तवदाभासमुदाहरति—**चकासत्यङ्गने**त्यादिना । अङ्गनासु आसमन्ताद् रमन्ते इति **अङ्गनारामाः** विरहशून्याः कौतुकेन नृत्यगीतादिना य आनन्दस्तस्य हेतवः, सुष्ठु मनो येषां ते सुमनसः **विबुधाः** पण्डिताश्च तस्य राज्ञः पार्श्ववर्तिनश्**चकासति** शोभन्ते इत्यर्थः । अत्र अङ्गना-रामाशब्दयोः स्त्र्यर्थकत्वेन अवभासनात्, कौतुकाऽऽनन्दशब्दयोर् मनोविनोदार्थकतया, सुमनो-विबुधशब्दयोः देवार्थकतया चाऽवभासनात् पुनरुक्तवदाभासत्वं बोध्यम् । अत्र उभयेषाम् अभङ्गानाम् अङ्गनादिशब्दानां पर्यायपरिवृत्त्यसहत्वाद् अभङ्गशब्दमात्रनिष्ठता पुनरुक्तवदाभासस्य बोध्या । न चाऽङ्गनाशब्दस्य पर्यायपरिवृत्तिसहत्वं शङ्क्यं स्त्रीविशेषवाचकस्याऽस्य पर्यायस्यैवाभावादिति वदन्ति । अङ्गनाशब्दः स्त्रीविशेषवाचकशब्दान्तरप्रयोगेऽपि पुनरुक्तवदाभासो नापयातीति चिन्त्यमिदम् । आनन्दशब्दस्याऽपि निर्विशेषानन्दार्थकतादिकल्पनेन पर्यायाभावं मन्यन्ते टीकाकृतः । पर्यायपरिवृत्तिर्वास्तु पर्यायशब्दान्तरेऽपि [illegible] अत्राऽपि शब्दः परिवृत्तिं सहते इति एतदंशे पुनरुक्तवदाभासस्य शब्दमात्रनिष्ठत्वं चिन्त्यम् ॥उदा० ४६९॥

पुनरुक्तवदाभासः शब्दार्थोभयनिष्ठोऽपि भवतीत्याह—**तथा शब्दार्थयोरयमिति** । उभयनिष्ठता च उभयान्वयव्यतिरेकानुविधायित्वादिति बोध्यम् ॥ ८५ ॥

शब्दार्थोभयनिष्ठं पुनरुक्तवदाभासमुदाहरति—**तनुवपुरि**त्यादिना । सिंहवर्णनमिदम् । असौ **हरिः** सिंहः **तनुवपुरपि** अल्पशरीरोऽपि बले **अन्यः** अनल्पशरीरः, करिकुञ्जराणां श्रेष्ठगजानां रुधिरेण रक्ताः खरा नखरा यस्य तादृशः, तेजसां धाम आश्रयः, **महसा** तेजसा **पृथु** महद् मनः सत्त्वं येषां **तेषाम् इन्द्रः** प्रभुः जिष्णुः जयनशीलश्चाऽस्तीत्यर्थः । आर्या जातिः । अत्र तनु-वपुश्शब्दयोः शरीरार्थकतया, करि-कुञ्जरशब्दयोर् गजार्थकतया रुधिर-रक्तशब्दयोः क्षतजार्थकतया, तेजो-धाम-महश्शब्दानां तेजोऽर्थकतया, इन्द्र-हरि-जिष्णु-शब्दानां देवराडर्थकतया चावभासनात् पुनरुक्तवदाभासत्वम् । अत्र तनु-कुञ्जर-रक्त-धाम-हरि-जिष्णुशब्दाः पर्यायपरिवृत्तिं न सहन्ते, वपुः-करि-रुधिरे-ऽन्द्रशब्दास्तु पर्यायपरिवृत्तिं सहन्ते इति पुनरुक्तवदाभासस्य शब्दार्थोभयनिष्ठत्वं बोध्यमित्याशयेनाऽऽह—

अत्रैकस्मिन्निदर्शनम् । "भुजङ्गकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः । जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः" इति अलङ्कार[illegible] (१०।३, उदा०) शशिशुभ्रांशुशीतगुरित्यत्र अर्थमात्रगतत्वमपि बोध्यम् ।

यद्यपि भोजेन [illegible] चतुर्विंशतिः शब्दालङ्काराः (स० क० आ० २।३-५) प्रदर्शितास्तथापि तेषु केषाञ्चिद् दोषाभावमात्रत्वम्, केषांचिदुक्तेष्वन्तर्भावः केषांचित् तु रसप्रकाशावरणत्वमेवेति तानुपेक्ष्य, मात्राबिन्दुच्युतकादिकाः प्रहेलिकाश्च उपेक्ष्य रुद्रटादिमतानुसारं मम्मटः पञ्चैव शब्दालङ्कारान् न्यरूपयद् इति बोध्यम् ॥

इति श्रीहिमवत्[illegible]जनपद-
न्तर्गत-ताम्रकूट-ग्राम-अभिजन-[illegible]-कौण्डिन्न्या-
यनाचार्य-शिवराजकृतौ हैमवत्या[illegible]-
विवृतौ नवम उल्लासः ॥९॥

अथ दशम उल्लासः

अर्थालङ्कारानाह—

(सू० १२६) साधर्म्यमुपमा भेदे

उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्ध उपमा । भेदग्रहणमनन्वयव्यवच्छेदाय ।

एवं [illegible] निरूप्य अर्थालङ्कारनिरूपणं प्रार[illegible] [illegible]। अर्थाश्रितोऽलङ्कारः अर्थालङ्कार । [illegible] चाऽन्वयव्यतिरेकपरीक्षणेन कार्यम् । अर्थालङ्कारेषु उपमा-रूपके वेदेष्वपि बाहुल्येनोपलभ्येते । आचार्ययास्कोऽपि—उपमां बहुधा प्रतिपादयति (३।४।१८) । नाट्यशास्त्राचार्यो भरतोऽपि उपमा-रूपक-दीपकान् (१७।४३) अलङ्कारत्वेनैव शोभो (श्लेषो)-ऽदाहरण-(अर्थान्तरन्यास)-हेतु-संशय-दृष्टान्ता-ऽभिप्राय(उत्प्रेक्षा)-[illegible]-दिष्ट(स्वभावोक्ति)-गुणातिशय(व्यतिरेक)-विशेषोक्ति (व्यतिरेक)-सारूप्यादीन्(भ्रान्तिमदादीन्) लक्षणत्वेन चेति बहून् आधुनिकान् अर्थालङ्कारान् प्रत्यपीपदन् (१७।१-५) । भामहदण्डिवामनोद्भटरुद्रटादयश्च अलङ्कारान् स्व-स्वमनीषयाऽपि विकल्पितवन्तः । उक्तं च दण्डिना—"काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते । ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति" इति (२।१) । तत्र रुद्रटोऽर्थालङ्कारबीजानि इमानि अमंस्त—"अर्थस्याऽलङ्कारा वास्तवमौपम्यमतिशय-श्लेषः । एषामेव विशेषा [illegible]" (७।९) । [illegible] सादृश्यबीजकान् अलङ्कारान् पूर्वं प्रतिपादयति । रुय्यको [illegible]-सादृश्य-विरोध-शृङ्खलाबन्ध-[illegible]-गूढार्थप्रतीति-मूल[illegible] क्रमेण प्रत्यपीपदत् । मम्मटेन तु अलङ्कारानुक्रमे युक्तियुक्ता सङ्गतिः सार्वत्रिकतया नाऽऽश्रिता । तथापि अत्राऽपि सादृश्यमूलका एव अलङ्काराः प्रथमं प्रतिपाद्यन्ते । तत्राऽपि **उपमैव कविवंशमाता** इति तामेव प्रथमं लक्षयति—**साधर्म्यमुपमा भेदे** इति । तद्धर्मवत्तया प्रसिद्ध उदाह्रियमाणः पदार्थ **उपमानम्**, तद्धर्मवत्तया वर्णनीयो मुख्यः पदार्थ उपमेयम्, तयोर् भेदे सति समानेन धर्मेण सम्बन्ध उपमा । ननु सूत्रे उपमानोपमेययोरग्रहणात् कथं तयोर् बोध इत्यत्राऽऽह—**उपमानोपमेययो**रेवेत्यादि । यद्यपि वैशेषिकादिभि: कार्यकारणादिकयोरपि साधर्म्यं स्वीक्रियते, तथापि अत्र साधर्म्यशब्दस्य सादृश्यहेतुसाधर्म्यपरतया वृत्तिसङ्कृतिर् बोध्या । भेदग्रहणाभिप्रायमाह—**भेदग्रहणमि**त्यादिना । केन चिद् उप समीपे मीयते परिच्छिद्यते किञ्चिद् अनया इति उपमा, 'आतश्चोपसर्गे (अ. ३।३।१०६) इति प्रामाण्यात् । (सू०१२६)

(सू० १२७) ··· ···· **पूर्णा लुप्ता च सा—** ···· ···· ।

उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा, एकस्य द्वयोः त्रयाणां वा लोपे लुप्ता ।

(सू० १२८) ···· ··· ···· ····ऽग्रिमा ।

श्रौत्यार्थी च भवेद् वाक्ये समासे तद्धिते तथा ॥८६॥

अग्रिमा पूर्णा ।

यथेवादिशब्दा यत्परास् तस्यैवोपमानताप्रतीतिः इति यद्यपि उपमानविशेषणानि एते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् सम्बन्धं प्रतिपादयन्ति इति तदुपादाने श्रौती उपमा । तथैव "तत्र तस्येव" (अष्टा० ५।१।११६) इत्यनेन इवार्थे विहितस्य वतेः उपादाने ।

'तेन तुल्यं मुखम्' (उदा० ४७१) इत्यादौ उपमेये एव, 'तत् तुल्यमस्य' (उदा० ४७२) इत्यादौ च उपमाने एव 'इदं च तच् च तुल्यम्' (उदा० ४७३)

उपमाया उक्तात्लक्षणात् तत्र उपमानम्, उपमेयम्, उभयानुगतः (साधारणधर्मः), तद्वाचकं पदं चेति चतुष्टयमपेक्षितं भवतीति ज्ञायते, तत्र एतेषां चतुर्णामपि पदार्थानां शब्देनैवोपादाने उपमा **पूर्णा**, एकस्य द्वयोः त्रयाणां वाऽनुपादाने **लुप्ता** इत्युच्यते इत्याह—**पूर्णा लुप्ता च सेति** । एतेन वृत्तिग्रन्थोऽपि व्याख्यातः । भेदप्रदर्शनम् एभिः प्रकारैः उपमा काव्यशोभायै प्रयोक्तुं शक्यते प्रयुज्यते च कविभिरिति कविवृन्दबुद्धिविकासार्थम् । एवमेवाऽन्येष्वप्यलङ्कारेषु बोध्यम् । (सू० १२७) ।

पूर्णोपमा श्रौती आर्थी चेति प्रथमं द्वेधा, ततः श्रौती पूर्णोपमा वाक्यगा, समासगा, तद्धितगा चेति त्रिधा, आर्थी पूर्णोपमाऽपि वाक्यगा, समासगा, तद्धितगा चेति त्रिधैवेति पूर्णोपमा षड्विधा भवतीत्याह—**अग्रिमा श्रौत्यार्थीत्यादिना** ।

उपमा कीदृशे स्थले श्रौती भवतीत्याह—**यथेवादिशब्दा** इत्यादिना । यद्यस्य धर्मविशेषं प्रतिपादयति इति वस्तुस्थितेः यथेवादिशब्दानां येनाऽन्वयः तस्यैवोपमानताप्रतीतिरिति यथेवादिशब्दा यद्यपि उपमानविशेषणानि तथापि यथा रामस्य पुस्तकमित्यत्र रामशब्दे संश्लिष्टा रामस्यैव स्वामित्वं प्रतिपादयन्ती अपि षष्ठी श्रुता एव राम-पुस्तकयोः सम्बन्धं प्रतिपादयति तथैव शब्दशक्तिविशेषस्वभावाद् यथेवादिशब्दा अपि उपमानोपमेययोः साधर्म्यं सम्बन्धं प्रतिपादयन्तीति यथेवादिशब्दोपादाने इवार्थे वतिप्रत्ययान्तपदोपादाने च उपमा श्रौती भवतीत्यर्थः । एवं वाक्यगा तद्धितगा च श्रौती उपमा स्पष्टीकृता । 'श्रौत्यार्थी च भवेद् वाक्ये समासे तद्धिते तथा' (सू० १२८) इति सूत्रेणोपात्तं क्रमं किमिति नानुगच्छतीति न जानीमहे । सूत्रानुसारं हि तद्धितगातः पूर्वं समासगा निरूपणीया ।

उपमा कीदृशे स्थले आर्थी भवतीत्याह—**'तेन तुल्यं मुखम्'** इत्यादिना । तेन तुल्यं मुखमित्यादौ तुल्यशब्दस्य उपमेये एव समानविभक्त्यन्ते विश्रान्तिरिति शब्दाद् उपमेयगतस्तुल्यत्वरूपो धर्मविशेष एव बुध्यते न तूपमानोपमेययोः सम्बन्धः तत् तुल्यम्

इति उभयत्राऽपि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यता-प्रतीतिरिति साधर्म्यस्य आर्थत्वात् तुल्यादिशब्दोपादाने आर्थी, तद्वत् "तेन तुल्यं क्रिया चेद् वतिः" (अष्टा० ५।१।११५) इत्यनेन विहितस्य वतेः स्थितौ।

"इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च" (अष्टा० २।१।४ वा०) इति नित्यसमासे इवशब्दयोगे समासगा।

क्रमेणोदाहरणम्—

स्वप्नेऽपि सलरेषु त्वां विजयश्रीर् न मुञ्चति।
प्रभावप्रभवं कान्त स्वाधीनपतिका यथा ॥उदा० ४७४॥

अस्य इत्यादौ उपमाने एव समानविभक्त्यन्ते तुल्यशब्दस्य विश्रान्तिरिति शब्दाद् उपमान-गतस्तुल्यतारूपो धर्मविशेप एव बुध्यते न तु [illegible] सम्बन्धः, इदञ्च तच् च तुल्यम् इत्यादौ उपमानोपमेययोर् द्वयोरपि समानविभक्त्यन्तयोस्तुल्यशब्दस्य विश्रान्तिरिति शब्दाद् उभयत्राऽपि तुल्यतारूपो धर्मविशेषः प्रतीयते, न तु उपमानोपमेययोः साधर्म्यरूपः सम्बन्ध इति एवमादौ शाब्दाद् बोधात् पश्चात् प्रतीयमानस्य साधर्म्यस्य आर्थत्वात् उपमा आर्थी भवतीत्यर्थः। एवमेव तुल्यार्थकवतिप्रत्ययान्तपदोपादानेऽपि उपमा आर्थी एव भवतीति बोध्यम्। एवम् वाक्यगा तद्धितगा च आर्थी उपमा स्पष्टीकृता।

समासगां श्रौतीमुपमां निरूपयति—**इवेन विभक्त्यलोप** इत्यादिना। "इवेन विभक्त्यलोपः पूर्वप्रकृतिस्वरत्वं च" इति (अष्टा०२।१।४ वा०, २।२।१८ वा०) कात्या-यनवार्त्तिकम् "इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" इति पतञ्जलिवाक्यम्। अतोऽत्र नित्यसमासग्रहणमनाकरम्। 'नित्यसमासे' इति मम्मटवचनमपि अप्रामाणिकम्। तथापि इवेन समासे इवशब्दे श्रूयमाणे सति श्रौती समासगा उपमा सम्भवतीत्यर्थो बोध्यः।

समासगा आर्थी उपमाऽपि अत्र पूर्वत्रैव वाऽपि श्रौत्याः समासगाया उपमायाः पश्चात् समनन्तरमेव निर्वक्तव्या, अन्यथा श्रौतोदाहरणम् इत्यस्या असङ्गतिः स्यात्, तथाऽपि सा किमिति वृत्तिकारेणोपेक्षितेति न विद्मः। उपमानवाचकपदेन सह तुल्य-सम-सदृक्-[illegible] समासे आर्थी समासगा उपमा सम्भवतीति बोध्यम्।

वाक्यगां श्रौतीं पूर्णाम् उपमाम् उदाहरति—**स्वप्नेऽपीत्यादिना**। हे राजन्, यथा स्वाभिप्रायानुकूलपतिका नायिका प्रकृष्टस्य **भावस्य** अनुरागस्य **प्रभवं** मूलं कान्तं न मुञ्चति तथा विजयश्रीर् युद्धेषु प्रतापमूलं त्वां स्वप्नेऽपि न मुञ्चतीत्यर्थः। अत्र स्वाधीन-पतिका उपमानम्, विजयश्रीः उपमेया, सम्बन्धभेदाद् [illegible] साधारणोऽ-परित्यागः साधारणधर्मः, यथाशब्दो द्योतक इति उपमानादीनां चतुर्णामेव शब्देनैवो-पादानात् पूर्णा, यथाशब्दप्रयोगात् श्रौती, वाक्यगा चाऽत्रोपमा बोध्या अत्र यद्धर्मवती स्वाधीनपतिका तद्धर्मवती विजयश्रीरिति साधर्म्यस्य बोधात् सादृश्यं प्रतीयते ॥ उदा० ४७४ ॥

चकित-हरिण-लोल-लोचनायाः क्रुधि तरुणारुणतारहारिकान्ति ।
सरसिजमिदमाननं च तस्याः सममिति चेतसि सम्मदं विधत्ते ॥ उदा० ४७५ ॥

अत्यायतैर् नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः ।
शौरिर् भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर् भुवनं बभार ॥
॥ उदा० ४७६ ॥

अवितथ-मनोरथ-पथ-प्रथनेषु प्रगुण-गरिमगीतश्रीः ।
सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य ॥ उदा० ४७७ ॥

वाक्यगाम् आर्थी पूर्णाम् उपमाम् उदाहरन्ति—चकितहरिणेत्यादिना । नायिका-प्रियसखी प्रति काचिद् नायिकामाननम्—चकितहरिणस्य लोचने इव लोले लोचने यस्यास्तस्या अस्यास्तव प्रियसख्याः नायिकायाः प्रणयकोपे सति तरुणस्य सूर्यसारथेः उत्कटा मनोहारिणी च कान्तिरिव कान्तिर् यस्य तादृशं मुखम् इदं नायकेन सरसि दृश्यमानं रक्तोत्पलं च समानम् **इति** एष विचारो न नायकस्य चेतसि सम्मदं करोतीत्यर्थः । अत्र सरसिजमुपमानम्, नायिकाननमुपमेयम्, तरुणारुणतारकान्तित्वं साधारणो धर्मः, समशब्द उपमाप्रतिपादक इति उपमानादीनां चतुर्णामेव शब्देनैवोपादानात् पूर्णा, समशब्दप्रयोगाद् आर्थी, समास-तद्धितानन्तर्गतत्वाद् वाक्यगा चाऽत्र उपमा बोध्या ॥ उदा० ४७५ ॥

समासगां श्रौती पूर्णाम् उपमामुदाहरन्ति—**अत्यायतै**रित्यादिना । काश्मीरक-शिवस्वामिकृते कप्फिणाभ्युदये (१।३९) पद्यमिदम् । यः प्रकृतो राजा महद्भिर्वर्द्धितः उद्धतानां नियमं कर्तृभिः प्रभाभिरुपलक्षितैः दिव्यैः अपायाभावप्रचुरैः लक्ष्म्या विलासस्य भवनैरिव स्थितैः साम-दान-भेद-दण्डरूपैः चतुर्भिरुपायैः, कृष्णः अत्यन्तदीर्घैः उद्धतानां दैत्यदानवानां नियमं कर्तृभिः प्रभाभिरुपलक्षितैः दिव्यैः लक्ष्मीविलासाधारभूतैश् चतुर्भिर् भुजैरिव अदो भुवनं पालयामासेत्यर्थः । अत्र भुजैरित्युपमानम्, उपायैरित्युपमेयम्, अत्यायतत्वादिः साधारणो धर्मः, इवशब्द उपमाप्रतिपादकः इत्येतेषां शब्देनैवोपादानाद् भुजैरिवेत्यत्र विभक्त्यलोपिसमासाच् चात्र पूर्णा श्रौती समासगा च उपमा बोध्या ॥ उदा० ४७६ ॥

समासगाम् आर्थीम् पूर्णाम् उपमाम् उदाहरन्ति—अवितथमनोरथेत्यादिना । हे राजन्, जनानां ये सफला मनोरथास्तेषां विस्तारेषु विषये प्रकृष्टानां गुणानां गरिम्णा लोकैर् गीता **श्रीः** सम्पत्तिर् यस्य तथाभूतः कल्पवृक्षतुल्यः स भवान् कस्य न अभिलषणीयः ? सर्वस्यैवाऽभिलषणीय इत्यर्थः । अत्र सुरतरुः उपमानम्, भवानित्युपमेयम्, अवितथमनोरथपथप्रथनविषयकप्रगुणगरिमगीतश्रीकत्वम् अभिलषणीयत्वं वा साधारणो धर्मः, सदृशशब्द उपमाप्रतिपादकः इति उपमानादीनां चतुर्णामेव शब्देनैवोपादानात् पूर्णा, सदृशशब्दप्रयोगाद् आर्थी, सदृशशब्दश्च समासान्तर्गत इति समासगा चाऽत्र उपमा बोध्या ॥४७७॥

गाम्भीर्यगरिमा तस्य सत्यङ् गङ्गाभुजङ्गवत् । (उदा० ४७८)
दुरालोकः स समरे निदाघाम्बररत्नवत् ॥उदा० ४७९॥

स्वाधीनपतिका कान्तं भजमाना यथा लोकोत्तरचमत्कारभूस् तथा जयश्रीम् त्वदासेवनेनेत्यादिना प्रतीयमानेन विना यद्यपि न उक्तेर् वैचित्र्यम्, वैचित्र्यञ्चाऽलङ्कारः, तथापि न ध्वनि-गुणीभूत-व्यङ्ग्यव्यवहारः । न खलु व्यङ्ग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिः, अपि तु वाच्यवैचित्र्यप्रतिभासादेव ।

रसादिस् तु व्यङ्ग्योऽर्थोऽलङ्कारान्तरं च सर्वत्राऽव्यभिचारीति अगणयित्वैव तद् अलङ्कारा उदाहृताः । तद्रहितत्वेन तु [illegible] विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम् ।

तद्धितगा श्रौतीं पूर्णाम् उपमा तद्धितगाम् आर्थी पूर्णाम् उपमां च एकेनैव पद्येनोदाहरति—गाम्भीर्यगरिमेत्यादिना । तस्य राज्ञो गाम्भीर्यस्य गरिमा (शन्तनुपत्न्याः) गङ्गाया उपपतेः समुद्रस्येव अस्ति; स हि राजा युद्धे निदाघसमयस्य सूर्य इव दुःखेनालोकयितुं शक्योऽस्तीत्यर्थः । अत्र पूर्वार्धे गङ्गाभुजङ्ग उपमानम्, तस्येत्युपमेयम्, गाम्भीर्यगरिमा साधारणो धर्मः, तत्र तस्येवेत्यर्थेऽनुशिष्टो वतिप्रत्यय उपमाप्रतिपादक इति पूर्णा श्रौती तद्धितगा उपमा; उत्तरार्धे निदाघसूर्य उपमानम्, राजा उपमेयः, दुरालोकत्वं साधारणो धर्मः, "तेन तुल्यं क्रिया चेद् वतिः" इत्यनुशिष्टो वतिप्रत्यय उपमाप्रतिपादक इति पूर्णा आर्थी तद्धितगा चोपमा बोध्या ॥४७८॥

ननु त्वदुक्तस्य "वैचित्र्यमलङ्कारः" इति अलङ्कारसामान्यलक्षणस्य ध्वनिगुणीभूतव्यङ्ग्यजन्यवैचित्र्यभिन्नं वैचित्र्यमलङ्कार इति तात्पर्यं स्वीकर्तव्यम्, अन्यथा ध्वनिषु गुणीभूतव्यङ्ग्येषु चालङ्कारतायाः प्रसक्तेः, एवं च सति स्वप्नेऽपि समरेष्वित्यादौ "स्वाधीनपतिका कान्तं भजमाना यथा लोकोत्तरमानन्दमनुभवति तथैव जयश्रीस्त्वदासेवनेन लोकोत्तरमानन्दमनुभवति" इत्यादिना व्यङ्ग्येन विना उक्तेर् वैचित्र्य न भवतीति एवमादौ कथमलङ्कारव्यवहारः ? [illegible] व्यवहार उचित इत्याशङ्का स्यात् तथापि स्वप्नेऽपि समरेष्वित्यादौ प्राथमिकी उत्कटा चारुत्वप्रतीतिर् न व्यङ्ग्यसंस्पर्शस्य पाश्चात्यात् परामर्शात् किन्तु वाच्यवैचित्र्यस्यैव प्राथमिकाद् उत्कटाभासादेवेति एवमादौ न ध्वनित्वेन न वा गुणीभूतव्यङ्ग्यत्वेन व्यपदेशः किन्तु उपमाद्यलङ्कारत्वेनैव व्यपदेशः, प्रधानतो व्यपदेशा भवन्तीति न्यायाद् इत्यभिप्रायेणाऽऽह—**स्वाधीनपतिके**त्यादि ।

'अव्यङ्ग्यन् त्ववरं स्मृतम्' (सू० ६) इति प्रथमे उल्लासे चित्रस्य अव्यङ्ग्यत्वमुक्तम्, षष्ठे उल्लासे च "अत्र च (शब्दचित्रार्थचित्रयोः काव्ययोः) शब्दार्थालङ्कारभेदाद् बहवो भेदाः (भवन्ति), ते च अलङ्कारनिर्णये निर्णेष्यन्ते" इति उक्तम्; अत्र तु अलङ्कारोदाहरणेषु ध्वनिगुणीभूतव्यङ्ग्यान्यतरयुक्तानि उदाहरणानि उपन्यस्तानि, न चेमानि चित्रोदाहरणानि भवितुमर्हन्ति इति व्याहता तवोक्तिः, पश्चान्निरूपणीययोः संसृष्टि-

(सू० १२९) तद्वद् धर्मस्य लोपे स्यान् न श्रौती तद्धिते पुनः ।

धर्मः साधारणः । तद्धिते कल्पवादौ तु आर्थी एव, तेन पञ्च ।

उदाहरणम्—

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश् चेतः सत्यं तस्याऽमृतं यथा ॥उदा० ४८०॥

सङ्करयोश्च प्रभावप्रभवमित्यादौ अनुप्रासादेरपि सत्त्वाद् अत्राऽपि प्रसङ्ग इति, एवमादौ उपमादिरलङ्कारः, एवमादौ एव च संसृष्टि-सङ्करौ अलङ्कारौ इति च सर्वैरपि ज्ञेयमे-वेत्यत्राह—**रसादिस्तु** इत्यादि । रसभावादिवन्निर्दुष्टत्वं न तद्योगः काव्येषु कियता-ऽप्यंशेन सर्वत्र भवति, अलङ्काराणां व्यतिकरोऽपि काव्येषु प्रायः सर्वत्रैव भवति इति तद्विविक्तोदाहरणान्वेषणेऽपि प्रयासो न कृतः, किन्तु अत्र प्रकरणेऽनिरूपणीयान् प्रस्तुतेषूदाहरणेषु वर्तमानानपि रसभावादीन् अलङ्कारांश्चोपेक्ष्य प्रस्तुतेषु उदाहरणेषु उत्कटतया वर्तमाना अत्र प्रकरणे निरूपणीयाश्च उपमादयोऽलङ्कारा एवाऽत्र उदाहृता बोध्याः, पुनश्च रसभावादिरहितत्वेन उदाह्रियमाणाः 'चन्द्रधवल. पट.' इत्यादयः उपमाद्यलङ्कारास् तु विनेयवैमुख्यं कुर्युरिति च रसभावाद्यनुगता एवाऽलङ्कारा अत्र उदाहृताः, अतः पूर्वापरविरुद्धमभिधानमिति नाऽऽशङ्कनीयमित्यर्थः । तत्तदलङ्कारलक्षणेभ्यस् ते ते चित्रकाव्यभेदा उदाहरणाऽप्रदर्शनेऽपि स्वरूपतो निर्णीता भवन्त्येवेति च नास्त्येवाऽनिर्णीतताप्रसङ्गश्चित्रकाव्यानामपीति भावः । यत् तु झडकीकरादिभिः रसाद्यनुपस्कारकस्य अनलङ्कारत्वं मम्मटस्याऽभिप्रेतमिति व्याख्यातम् तद् न, मम्मटमते वैचित्र्यमलङ्कार इत्येतावत एव अलङ्कारलक्षणत्वाद्, रसाद्युपस्कारकत्वस्य लक्षणे प्रवेशस्याऽभावात् ।

एवं षड्विधां पूर्णोपमां निरूप्य लुप्तोपमाभेदान् प्रदिदर्शयिषुस् तावद् धर्मलुप्ताभेदानाह—**तद्वद् धर्मस्ये**त्यादिना । साधारणधर्मस्य शब्देनाऽनुपादानेऽपि उपमायाः पूर्णोपमाया इवैव भेदाः स्युः, किन्तु लुप्तधर्मिकायां तस्या तद्धितगा श्रौती न भवतीति पञ्चैव लुप्तधर्मिकोपमाभेदा इत्यर्थः । साधारणधर्मोपादानं विना इवार्थकवतिप्रत्ययस्याऽसम्भवात् कल्पप्-देश्य-देशीयर्-बहुच्-छेषु तु धर्मविशेषसम्बन्धं विना धर्मोपादानाभावस्याऽसत्त्वाद् नोपमायाः श्रौतीत्वमित्याशयेनाह—**तद्धिते कल्पबादा**वित्यादि ।

वाक्यगां श्रौतीं धर्मलुप्तामुपमामुदाहरति—**धन्यस्ये**त्यादिना । हे चेतः, अनन्यसामान्येन सौजन्योत्कर्षेण शोभमानस्य धनार्हस्य तस्य महाजनस्य अमृतमिव वचनं सत्यमेव अनुपालयितुं योग्यमित्यर्थः । अत्रामृतवचसोः उपमानोपमेययोः माधुर्यहितकारित्वादिः प्रतीयमानोऽपि साधारणो धर्मः शब्देनाऽनुपात्त इति (करणीयत्वस्य तु अमृते बाधितत्वाद् न साधारण्यम्), यथाशब्दस्याऽसमस्तत्वमिति च धर्मलुप्ता श्रौती वाक्यगा उपमाऽत्र बोध्या ॥उदा० ४८०॥

आकृष्टकरवालोऽसौ साम्पराये परिभ्रमन् ।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ॥उदा० ४८१॥
करवाल इवाचारस् तस्य (उदा० ४८२)
वागमृतोपमा (उदा० ४८३) ।
विषकल्पं मनो वेत्सि यदि जीवसि तत् सखे ॥उदा० ४८४॥

(सू० १३०) **उपमानानुपादाने वाक्यगाऽथ समासगा** ॥८७॥

[उदाहरणम्—]
सअल-करण-पर-वीसाम-सिरि-विअरणं ण सरसकव्वस्स ।

वाक्यगाम् आर्थीम् धर्मलुप्तामुपमाम् उदाहर[illegible] । आकृष्ट-खड्गो युद्धे परिभ्रमन् असौ राजा शत्रुसेनया यमेन तुल्यो दृष्ट इत्यर्थः । अत्र राज-यमयोः उपमेयोपमानयोः प्रतीयमानः क्रूरत्वादिः साधारणो धर्मः शब्देन नोपात्त इति समशब्दोऽसमस्त इति च धर्मलुप्ता आर्थी वाक्यगा उपमाऽत्र बोध्या ॥उदा० ४८१॥

समासगां श्रौतीं धर्मलुप्ताम् उपमाम्, समासगाम् आर्थीं धर्मलुप्ताम् उपमाम्, तद्धितगाम् आर्थीं धर्मलुप्ताम् उपमां च एकेनैव पद्येनोदाहरति—**करवाल इवेत्यादिना** । हे सखे, तस्य दुष्टस्य आचारः खड्ग इव अस्ति, तस्य वाग् अमृतोपमा अस्ति, तस्य मनः विषाद् ईषद् एव न्यूनं (विषसदृशम्) अस्ति इति यदि जानासि तर्हि जीविष्यसि अन्यथा [illegible] त्वं तद्हृदयगतविषोपहतो मरिष्यसीत्यर्थः । **अत्र करवाल इवाचार** इत्यत्र करवालाऽऽचारयोः प्रतीयमानमपि घातुकत्वरूपं साधर्म्यं शब्देन नोपात्तम् इति, इवेन सह करवालशब्दस्य समास इति च धर्मलुप्ता श्रौती समासगा उपमा । **वागमृतोपमा** इत्यत्र वागमृतयोः प्रतीयमानमपि मधुरत्वरूपं साधर्म्यं शब्देन नोपात्तम् इति, उपमानवाचकेन अमृतशब्देन सह सादृश्यवाचकोपमाशब्दस्य समास इति च धर्मलुप्ता आर्थी समासगा उपमा । **विषकल्पं मनः** इत्यत्र विषमनसोः प्रतीयमानोऽपि अत्यन्ताहितकरत्वरूपः साधारणो धर्मः शब्देन नोपात्त इति, ईषदसमाप्तौ स्मर्यमाणस्य तद्धितप्रत्ययस्य कल्पपः सादृश्ये पर्यवसानमिति धर्मलुप्ता आर्थी तद्धितगा उपमाऽत्र बोध्या । अनिर्ज्ञाताकरस्य श्लोकस्याऽस्य श्रुतिस्मृतिभिन्नत्वात्—"**करवाल इवाचारस्तस्य वागमृतोपमा । विषकल्पं मन इति वेत्सि चेज् जीवसि ध्रुवम्**" इति स्फुटार्थकत्वेनाऽयं पठनीयः । यदि इदं न वेत्सि तर्हि तव जीवितमपि तद्विश्वासात् संशयितमेव स्यादिति चाऽत्र विवक्षितोऽर्थो बोद्धव्यः ॥उदा० ४८२-८४॥

उपमानलुप्तोपमाभेदौ आह—**उपमानानुपादाने** इत्यादिना । उपमानवाचकपदानुपादाने आर्थी वाक्यगा आर्थी समासगा इति द्विविधा उपमा भवतीत्यर्थः । उपमानानुपादाने श्रौती आर्थी वा काऽपि तद्धितगा तु न सम्भवतीति बोध्यम् ॥८७॥

वाक्यगाम् आर्थीम् उपमानलुप्ताम् उपमामुदाहरति—**सअल-करणेत्यादिना** । '**सकल-करण-पर-विश्राम-श्री-वितरणं न सरसकाव्यस्य । दृश्यतेऽथवा निशम्यते सदृशमंशांशमात्रेण**'

दीसइ अहव णिसम्मइ सरिसअं अंसंस-मेत्तेण ॥ उदा० ४८६ ॥

कव्वस्सेत्यत्र कव्वसममिति सरिसमित्यत्र गुणमिति पाठे एषैव समासगा ।

(सू० १३१) **वादेर् लोपे समासे सा कर्माधारक्यचि क्यङि ।**

कर्मकर्त्रोर् णमुलि ....।

वा शब्द उपमाद्योतक इति वादेरुपमाप्रतिपादकस्य लोपे सति—समासेन कर्मणोऽधिकरणाच्चोत्पन्नेन क्यचा, कर्तुः क्यङा, कर्मकर्त्रो उपपदयोर् णमुला च भवेत् ।

उदाहरणम्—

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।

नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ॥ उदा० ४८६ ॥

इति संस्कृतच्छाया । सरसस्य काव्यस्य अंशानाम् अंशमात्रेणापि (लेशतोऽपि) सदृशं सर्वेभ्य इन्द्रियेभ्यः परम-विश्रम-सम्पत्तेर् दायकं लोके न दृश्यते न च श्रूयते इत्यर्थः । अत्र वर्णनीयं काव्यमुपमेयम्, उपमानं तु नोपात्तमिति, सकल-करण-पर-विश्राम-श्री-वितरणत्वं साधारणो धर्मः, सदृशपदम् उपमाप्रतिपादकमिति उपमानलुप्ता आर्थी वाक्यगा उपमाऽत्र बोध्या । अत्र काव्यमेवोपमानम् उपमेयन्तु नोपात्तमिति उपमेयलुप्ताऽत्रोपमेति प्रतीयते । अत्र काव्यस्य वर्णनीयतया उपमेयतैव विवक्षितेति अन्ये समादधति ॥ उदा० ४८५ ॥

समासगाम् आर्थीम् उपमानलुप्ताम् उपमां निर्दिशति—**कव्वस्सेत्यत्रे**त्यादिना । **'सअल-करण-पर-वीसाम-सिरि-विअरणं ण सरसकव्वस्सम् । दीसइ अहव णिसम्मइ णूणं अंसंसमेत्तेण'** इति वृत्तिसूचितपाठान्तरयुक्ता गाथा । अंशांशमात्रेणाऽपि सरसकाव्यसमं सकलेन्द्रियपरमविश्रामदायकं लोके न दृश्यते नैव च श्रूयते इत्यर्थः । अत्र काव्यमुपमेयम् उपमानं नोपात्तम्, सकलेन्द्रियपरमविश्रामश्रीवितरणत्वम् साधारणो धर्मः; सदृश-पदम् उपमाप्रतिपादकम्, तच्च समासान्तर्गतमिति उपमानलुप्ता आर्थी समासगा उपमा बोध्या ॥ ४८६ ॥

उपमाप्रतिपादकलुप्तोपमां निरूपयति—**वादेर् लोपे** इत्यादिना ! वादेरुपमाद्योतकस्य पदस्य लोपे सति समासगा आर्थी, कर्मक्यज्विषया आर्थी, आधारक्यज्विषया आर्थी, कर्तृक्यङ्विषया आर्थी, कर्मणमुल्विषया आर्थी, कर्तृणमुल्विषया आर्थी चेति षड्विधा उपमा भवतीत्यर्थः । (सू० १३१) ।

उपमाप्रतिपादकलुप्ताम् आर्थी समासगाम् उदाहरति—**ततः कुमुदे**त्यादिना । महाभारते द्रोणपर्वणि (१८४।४६) चन्द्रोदयवर्णनमिदम् । ततः सितकमलानां नाथेन कामिनीकपोलेनेव पाण्डुना लोकस्य नेत्राणामानन्दस्य जनकेन चन्द्रेण ऐन्द्री (प्राची) दिक् शोभितेत्यर्थः । अत्र कामिनीगण्ड इव पाण्डुरिति विग्रहे "उपमानानि सामान्यवचनैः" (अष्टा० २।१।५५) इति उपमान-साधारणधर्मवाचकयोः समासे कामिनीगण्डपदार्थस्य तत्सदृशपरतया इवार्थस्य कामिनीगण्डपदार्थान्तर्गततया इवशब्दस्याऽप्रयोगाद् उपमाप्रति-पादकलुप्ता आर्थी समासगाऽत्र उपमा ॥ उदा० ४८७ ॥

तथा—

असितभुजगभीषणासिपत्रो रुहरुहिकाऽऽहितचित्ततूर्णचारः ।

पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत् ॥ उदा० ४८७ ॥

[कर्मक्यचि, आधारक्यचि, क्यङि च उपमाप्रतिपादकलुप्तोपमा यथा—]

पौरं सुतीयति जनं (उदा० ४८८) समरान्तरेऽसा-

वन्तःपुरीयति विचित्रचरित्रचुञ्चु (उदा० ४८९) ।

नारीयते समरसीम्नि कृपाणपाणे-

रालोक्य तस्य लसितानि सपत्नसेना ॥उदा० ४९०॥

उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानाम् एकसमासानुप्रवेशेन सर्वसमासोपमाख्यां प्राप्तामुपमामपि अत्रैवोदाहरति—**असितभुजगेत्यादिना** । अयं वीरः प्रतिद्वन्द्विनां विक्रमस्य दर्शने सति कृष्णसर्प इव भयङ्करः खड्गो यस्य तादृशः, तीव्रया प्रतिचिकीर्षोद्गत्या व्याप्तेन चित्तेन त्वरितः सञ्चारो यस्य तादृशः, रोमाञ्चितशरीरः, क्रोधोल्लसित-लौहित्यकपोलकान्तिश्च आसीदित्यर्थः । अत्र कृष्णसर्प उपमानम्, भीषणत्वं साधारणो धर्म; असिः उपमेयः, असितभुजगपदस्य तत्सदृशपरतया इवार्थस्य असितभुजगपदार्था-न्तर्गतत्वेन इव शब्दस्याऽप्रयोगाद् उपमानोपमेयसाधारणधर्मोपमाप्रतिप्रादकानाम् एकसमा-सानुप्रविष्टत्वाच्च उपमाप्रतिपादकलुप्ता आर्थी समासगा सर्वसमासोपमाख्या उपमाऽत्र बोद्धव्या ॥ उदा० ४८८ ॥

कर्मक्यज्विषयाम् आधारक्यज्विषयां कर्तृक्यङ्विषयां च आर्थीम् उपमाप्रतिपादक-लुप्ताम् उपमाम् एकेनैव पद्येनोदाहरति—**पौरं सुतीयतीत्यादिना** । विचित्रैश्चरितैर्विदि-तोऽसौ राजा स्वपुरवासिनं जनं सुतमिव आचरति, समरमध्ये अन्तःपुरे इव आचरति, खड्गपाणेरमुष्य राज्ञः समरे विलसितानि विलोक्य शत्रुसेना युद्धभूमौ नारी इव आचरती-त्यर्थः । अत्र **पौरं सुतीयति** इत्यस्य पौरं जनं सुतमिव स्नेहेन परिपालयतीत्यर्थः । अतोऽत्र पौरः उपमेयः, सुत उपमानम्, स्नेहेन परिपालनं साधारणो धर्मः । सुतशब्दस्य सुतसदृशपरतया सुतपदार्थान्तर्गतस्य सादृश्यस्य द्योतकः उपमाप्रति-पादक इवशब्दश्च वृत्तौ न प्रयुक्त इति **उपमाप्रतिपादकलुप्ता आर्थी कर्मक्यज्विषया उपमा**ऽत्र बोध्या । **समरान्तरे अन्तःपुरीयति** इत्यस्य समरमध्ये अन्तःपुरे इव स्वच्छन्दं गच्छतीत्यर्थः । अतोऽत्र समरमध्यम् उपमेयम्, अन्तःपुरमुपमानम् स्वच्छन्दगमनं साधा-रणो धर्मः, मनाद्यन्तधानुवृत्तित एव उपमायाः प्रतीतेः उपमाप्रतिपादक इवशब्दो न प्रयुक्त इति **उपमाप्रतिपादकलुप्ता आर्थी आधारक्यज्विषया** उपमाऽत्र बोध्या । **सपत्नसेना नारीयते** इत्यस्य शत्रुसेना नारी इव विस्मिताऽपि वशीभवतीत्यर्थः । अतोऽत्र शत्रुसेना

[कर्मोपपदकणमुल्विषया कर्त्रुपपदकणमुल्विषया च उपमाप्रतिपादकलुप्तोपमा यथा—]

मृधे निदाघ-घर्मांशुदर्शं पश्यन्ति तं परे । उदा० ४९१

स पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः ॥उदा० ४९२॥

(सू० १३२).... ....**एतद्-द्विलोपे** क्विप्-समासगा ॥८८॥

एतयोर् धर्म-वाद्योः

उदाहरणम्—

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः ।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ॥ उदा० ४९३ ॥

उपमेया, नारी उपमानम्, वशीभवनं साधारणो धर्मः, क्यङन्तप्रत्ययवृत्त्या एवोपमायाः प्रतीतेः उपमाप्रतिपादक इवशब्दो न प्रयुज्यते इति **उपमाप्रतिपादकलुप्ता आर्थी कर्तृक्यङ्विषया** उपमाऽत्र बोध्या ॥उदा० ४८८-९०॥

उपमाप्रतिपादकलुप्ताम् **आर्थी** कर्मोपपदकणमुल्विषयां कर्त्रुपपदकणमुल्विषयां च एकेनैव श्लोकेनोदाहरति—**मृधे निदाघे**त्यादिना । युद्धे शत्रवस्तं ग्रीष्मसूर्यं यथा पश्यन्ति तथा पश्यन्ति, स तु राजा युद्धे अर्जुनो यथा सञ्चरति तथा सञ्चरतीत्यर्थः । अत्र पूर्वार्धे ग्रीष्मसूर्य उपमानम्, राजा उपमेयः, दर्शनं साधारणो धर्मः, कृदन्तवृत्त्यैव साधर्म्यस्य प्रतीतेः उपमाप्रतिपादकशब्दस्य अनुपादानमिति **कर्मोपपदकणमुल्विषया आर्थी उपमाप्रतिपादकलुप्ता उपमा** । उत्तरार्धे तु पार्थ उपमानम्, राजा उपमेयः, सञ्चारः साधारणो धर्मः, कृदन्त-वृत्त्यैव साधर्म्यस्य प्रतीतेः उपमाप्रतिपादकशब्दस्य अनुपादानमिति **कर्त्रुपपदकणमुल्विषया आर्थी उपमाप्रतिपादकलुप्ता उपमा** ॥उदा० ४९१-९२॥

एवम् उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानाम् एकतमस्य लोपे त्रयोदशविधां लुप्तोपमां प्रदर्श्य तेषां मध्ये कयोश्चिद् द्वयोर्लोपे तां प्रदर्शयति—एतद्-द्विलोपे इत्यादिना । तत्र प्रथमं साधारणधर्म-वाद्योर् लोपे द्विलुप्तोपमाया भेदौ आह—**एतद्-द्विलोपे क्विप्-समासगेति** । एतयोः साधारणधर्म-वाद्योः द्वयोर् लोपे उपमा क्विब्गता आर्थी चेति द्विधा भवतीत्यर्थः । धर्मवाद्योर् लोपे वाक्यगा तद्धितगा श्रौती वा उपमा न सम्भवतीति बोध्यम् ।

क्विब्गताम् आर्थीं धर्म-वादिलुप्तामुदाहरति—सविता विधवतीत्यादिना । मनसि सुखेन दुःखेन वा आक्रान्ते सति यथाक्रमं सविता विधुरिव आचरति, विधुः अपि सविता इव आचरति, तथा रात्रयो दिनानि इव आचरन्ति, दिनानि च यामिन्य इव आचरन्ति इत्यर्थः । अत्र क्रमेण विधुः, सविता, दिनानि, रात्रय उपमानानि; सविता, विधुः, रात्रयः, दिनानि उपमेयानि; क्विबर्थ आचारः साधारणो धर्मः, क्विप् च लुप्त इति तदर्थोऽपि लुप्त इत्युपचारः, इवार्थस्य वृत्तौ प्रविष्टत्वाद् इव-शब्दस्याऽपि अनुपादानम्; एवं चाऽत्र क्विब्गता आर्थी धर्मवादिलुप्ता उपमा बोध्या ॥ उदा० ४९३ ॥

[illegible] दुराक्रमः ।
[illegible]प्रवृत्तोऽसौ राजते राजकुञ्जरः ॥ उदा० ४९४ ॥

(सू० १३३) धर्मोपमानयोर् लोपे वृत्तौ वाक्ये च दृश्यते ।

[उदाहरणम्—]

ढुण्ढुणन्तो मरीहसि कण्टअ-कलिआइँ केअइ-वणाइँ
[illegible] भमर भमन्तो न पाविहिसि ॥उदा० ४९५॥

'कुसुमेण समं' इति पाठे वाक्यगा ।

समासगताम् आर्थीं धर्म-वाऽऽदिलुप्ताम् [illegible]—**परिस्पन्दी** [illegible] । युद्धे प्रवृत्तः सन् शत्रूणां [illegible] आक्रमितुमशक्योऽसौ कुञ्जर इव राजा राजते इत्यर्थः । अत्र उपमानं कुञ्जरः, उपमेयो राजा, प्रतीयमानोऽपि [illegible] साधारणो धर्मः शब्देन नाऽत्र उपात्त इति, उपमाप्रतिपत्तिरपि समासवृत्तेरेवेति इवादेर-प्रयोग इति च समासगता आर्थी धर्म-वाऽऽदिलुप्ता उपमाऽत्र बोध्या इति मम्मटस्याऽऽशयः । अत्र मनोरथार्थे मनोराज्यदमप्रयुक्तमिति केचित् । यद्यपि 'वृन्दारकनागकुञ्जरैः पूज्यमानम्' (अष्टा० २।१।६२) इत्यत्र 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' (अष्टा० २।१।५६) इत्यनुवर्तते इति उपमाप्रतीतिरत्रोचिता, तथापि 'राजकुञ्जरः' इत्यस्य राज-श्रेष्ठ इत्येव अर्थबोधो लोके, तथा च अमरोऽपि—"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः" इति (३।१।५९); एवं च नात्रोपमाप्रतीतिरिति [illegible] विभावनीयं बुधैः ॥ उदा० ४९४ ॥

द्वयोर्लोपे धर्मोपमानयोर्लोपेन युक्तौ उपमाभेदौ दर्शयति—**धर्मोपमानयो**रित्यादिना । साधारणधर्मोपमानयोर् लोपे उपमा समासरूपवृत्तिविषया (समासगा) आर्थी, वाक्यगा आर्थी चेति द्वेधा भवतीत्यर्थः । एतेन च साधारणधर्मोपमानयोर् लोपे तद्धितगा श्रौती चोपमा न सम्भवतीति फलितम् ।

समासगाम् आर्थीं धर्मोपमानलुप्ताम् उपमामुदाहरति—**ढुण्ढुणन्तो** इत्यादिना । **'ढुण्ढुणन् मरिष्यसि कण्टक-कलितानि केतकीवनानि । मालतीकुसुमसदृक्षं भ्रमर भ्रमन् न प्राप्स्यसि'** इति संस्कृतच्छाया । क्रीडोद्याने प्रियेण सह विहरन्त्याः कस्याश्चिद् नायिकायाः समये समये नायिकान्तरं प्रति गतवन्तं प्रियमुद्दिश्य स्वगुणाद्यभिमानवशाद् अन्यापदेशेन सोपालम्भगर्वोक्तिरियम् । भ्रमर, कण्टकाचितानि केतकीवनानि अन्विच्छन् भ्रमन् त्वं मरिष्यसि अपि, किन्तु मालतीकुसुमसदृशम् अन्यत् कुसुमान्तरं नैव प्राप्स्यसी-त्यर्थः । अत्र मालतीकुसुमम् उपमेयम्, उपमानं तु नोपात्तम्, सौरभादिकः साधारणो धर्मोऽपि नोक्तः इति 'मालइ-कुसुम-सरिच्छं' इति समासे स्थितेयमिति च समासगा आर्थी धर्मोपमानलुप्ता उपमाऽत्र बोध्या ॥ उदा० ४९५ ॥

वाक्यगाम् आर्थीं धर्मोपमानलुप्ताम् उपमाम् उदाहरणनिर्देशेन सूचयति—**कुसुमेण समं** इत्यादिना । "**ढुण्ढुणन्तो मरीहसि कण्टअ-कलिआइँ के अइवणाइँ । मालइ-कुसुमेण**

(सू० १३४) **क्यचि वाद्युपमेयाऽऽसे** ·· ···· ···· ।
आसे = निरासे ।
[उदाहरणम्—]

अरातिविक्रमालोक-विकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्ड सहस्राक्षायुधीयति ॥ उदा० ४९६ ॥

अत्रात्मा उपमेयः ।
(सू० १३५)···· ···· ···· ··**त्रिलोपे च समासगा** ॥ ८९ ॥
त्रयाणां वादिधर्मोपमानानाम् ।
उदाहरणम्—
तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा ।
स्मरशरविसराऽञ्चितान्तरा मृगनयना हरते मुनेर् मनः ॥ उदा० ४९७ ॥

समं भमर भमन्तो ण पाविसिहि" इति पाठे मालतीकुसुमेन समम् इत्यत्र वाक्यगा आर्थी धर्मोपमानलुप्ता उपमा लब्धास्पदा भवतीत्यर्थः ।

द्वयोर्लोपे वादेर् उपमाप्रतिपादकस्य उपमेयस्य च अनुपादानेन निष्पन्नम् उपमाभेदं निर्दिशति—**क्यचि वाद्युपमेयासे** इति । वादेः उपमाप्रतिपादकस्य उपमेयस्य च अनुपादाने क्यज्विषया आर्थी वाद्युपमानलुप्ता उपमा भवतीत्यर्थः । वाद्युपमानलोपे काऽपि श्रौती वाक्यगा तद्धितादिगा चोपमा न सम्भवतीति बोध्यम् ।

क्यज्विषयाम् आर्थी वाद्युपमानलुप्ताम् उपमाम् उदाहरति—**अरातिविक्रमे**त्यादिना । शत्रूणां विक्रमस्य आलोकेन विकसनशीले लोचने यस्य तादृशः, खड्गेन भीषणो बाहुदण्डो यस्य तादृशो वीरो युद्धे आत्मानं **सहस्राक्षस्य** इन्द्रस्य **आयुध** प्रहरणं वज्रमिव आचरतीत्यर्थः । अयं श्रीधरनन्दनपाठानुसारी अर्थः । स सहस्रायुधीयति इति पाठे तु 'स वीरो युद्धे आत्मानं **सहस्रायुधं** कार्तवीर्यमिव आचरति' इत्यर्थः । अत्र नामधातुनान्तर्भूतो **प्रविष्ट** आत्मा उपमेयः, उपात्तो वज्रः सहस्रायुधो वा उपमानम्, दुर्जयत्वादिरूपम् आचारविशेषरूपं क्यच्प्रत्ययोक्तं साधारणो धर्मः, इवार्थोऽपि सहस्राक्षायुधसदृशपरे सहस्रायुधसदृशपरे वा सहस्राक्षायुधशब्दे सहस्रायुधशब्दे वाऽनुप्रविष्ट इति वाद्युपमेयलुप्ता आर्थी क्यज्विषयाऽत्र उपमा बोध्येति भावः ॥ उदा० ४९६ ॥

त्रिलुप्तामुपमां निर्दिशति—**त्रिलोपे** चेत्यादिना । उपमाप्रतिपादकानां वादिशब्दानां साधारणधर्मवाचकशब्दानाम् उपमानवाचकशब्दानाञ्चानुपादाने सति आर्थी समासगा उपमा सम्भवतीत्यर्थ. । एतेन त्रिलोपे काऽपि श्रौती वाक्यगा तद्धितगा चोपमा न सम्भवतीति च सूचितं बोध्यम् ॥ ८९ ॥

समासगां त्रिलुप्तामुपमामुदाहरति—**तरुणिमनी**त्यादिना । **तरुणिमनि** यौवनविषये कृतदृष्टिपाता न तु पूर्णं यौवनं प्राप्ता, ललिताय विलासाय वितीर्णो देहो यया सा, कामबाणसमूहव्याप्तहृदया हरिणाक्षी सा किशोरी मुनेर् मनो हरते इत्यर्थः । मृगनयने

अत्र "सप्तम्युपमान०" (अ० २।२।२३ वा०) इत्यादिना यदा समासलोपौ।

क्रूरस्य आचारस्य अयश्शूलत्वाऽध्यवसायाद् अयश्शूलेनान्विच्छतीति आयश्शूलिक इति अतिशयोक्तिर् न तु क्रूराचारोपमेय-तैक्ष्ण्यधर्म-वादीनां लोपे त्रिलोपेयमुपमा।

एवम् एकोनविंशतिर् लुप्ताः, पूर्णाभिः सह पञ्चविंशतिः।

'अनयेनेव राज्यश्रीर् दैन्येनेव मनस्विता। मम्लौ साऽथ विषादेन पद्मिनीव हिमाम्भसा' (उदा० ४९८) इति अभिन्ने साधारणे धर्मे, **'ज्योत्स्नेव नयनाऽऽनन्दः सुरेव मदकारणम्। प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी'** (उदा० ४९९)

इव नयने यस्याः सा मृगनयना इति समासे दीर्घापाङ्गत्व-शुभ्रत्व-कृष्णतारकत्वादेः साधारणधर्मस्य, उपमाप्रतिपादकस्य इवशब्दस्य उपमानवाचकस्य नयनशब्दस्य च लोपात् त्रिलोपे समासगेयमुपमा। यदा तु मृगपदं तल्लोचने लाक्षणिकमिति शर्ववर्ममताश्रयणं तदा नेदम् उदाहरणं भवतीति विचार्य कात्यायनमतानुसारेणेदमुदाहरणमित्यभिप्रेत्याऽऽह—अत्र **सप्तम्युपमाने**त्यादि। शर्ववर्ममतेऽपि उपमानोपमानवाचकस्य लोचनशब्दस्याऽनुपादानाद् यथोक्तमुदाहरणत्वं सम्भवतीति बोध्यम्। "कवयस्तु तरुणिमा इतीमनिचं प्रयुञ्जते। नाऽस्य लक्षणमस्ति" इति तृधातुवृत्तौ माधवीयधातुवृत्तिकारः (१।६८७)॥ उदा० ४९७॥

त्रिलोपे उपमानमात्रोपादाने तद्धितगाऽपि सम्भवतीति शङ्कां निरस्यन् आह—**क्रूरस्य आचारस्ये**त्यादि। अयःशूलेनाऽन्विच्छति—आयःशूलिकः (अ० ३।२।७६) इत्यत्र अर्थार्जनोपायः कश्चिदतिदारुण उपमेयः, तैक्ष्ण्यादिः साधारणो धर्मः, इवादिः उपमाप्रतिपादकः, एषां त्रयाणां लोपात् त्रिलोपोपमेयमिति केचिद् मन्यन्ते; किन्तु तत्र क्रूरस्याऽऽचारस्य अयःशूलत्वाध्यवसायात् अतिशयोक्तिरेव तत्र बोध्या, न तु त्रिलोपोपमेत्यर्थः। क्रूराचारश्चासौ उपमेयः तस्य, तैक्ष्ण्यरूपस्य साधारणधर्मस्य, वादेश्च लोपे या त्रिलोपोपमा सा नैवेत्यन्वयः।

उपमाया मुख्यान् भेदानुपसंहरति—**एवम् एकोनविंशति**रित्यादिना।

यद्यपि अन्येऽपि उपमाप्रभेदविशेषा कविप्रतिभाप्रसूता दृश्यन्ते, अदृष्टा अपि प्रभेदविशेषा अनन्तानां कविवराणाम् अप्रतर्क्यशक्तिभिः प्रतिभाभिः प्रसोतुं शक्यन्ते, तथापि दिक्प्रदर्शनन्यायेन कविशिक्षां भावकहृदयपरिष्कारं वा चिकीर्षुभिरस्माभिर् न ते सम्भवन्तः सर्वे प्रभेदविशेषा निरूपणीया निरूपयितुं शक्या इत्यभिप्रायेणाऽऽह—**अनयेनेवे**त्यादि। अनयेनेवेत्यादौ साधारणे धर्मे अभिन्ने सति एकस्यैवोपमेयस्य बहूनामुपमानानाम् उपादाने, ज्योत्स्नेवेत्यादौ साधारणे धर्मे भिन्ने सति एकस्यैवोपमेयस्य बहूनामुपमानानाम् उपादाने या मालोपमा; या च अनवरतेत्यादौ साधारणे धर्मे अभिन्ने सति मतिरिवेत्यादौ साधारणे धर्मे भिन्ने सति बहुषु उपमानोपमेयेषु उपमेयस्य यथोत्तरम् उपमानत्वे रसनो-

इति भिन्ने च तस्मिन् एकस्यैव बहूपमानोपादाने मालोपमा; यथोत्तरम् उप-
मेयस्य उपमानत्वे पूर्ववदभिन्नधर्मत्वे 'अनवरत-कनक-वितरण-जल-लव-भृत-
कर-तरङ्गितार्थितते । **भणितिरिव मतिर् मतिरिव चेष्टा चेष्टेव कीर्तिरति-**
विमला' (उदा० ५००) **'मतिरिव मूर्तिर् मधुरा मूर्तिरिव सभा प्रभावचिता ।**
तस्य सभेव जयश्री शक्या जेतुं नृपस्य न परेषाम्' (उदा० ५०१) इत्यादिका
रसनोपमा च न लक्षिता, एवंविधवैचित्र्यस्य बहुप्रकारसम्भवाद् उक्तभेदानतिक्रमाच्च च ।

(सू० १३६) उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।
अनन्वयः .... ।

पमा रुद्रटादिभिर् लक्षिता साऽस्माभिरुपेक्षिता कविकल्पनाद्भुतानाम् एवंविधानां वैचि-
त्र्यविशेषाणाम् आनन्त्याद् एतेषामपि पूर्वोक्तप्रभेदविशेषेष्वेवान्तर्भावसम्भवात् । उक्तप्रभेद-
प्रदर्शनेनैव कविशिक्षाया निर्वाहादिति भावः ।

अनयेनेवेत्यादेरर्थस्तु—अनीत्या राज्यलक्ष्मीरिव, दारिद्र्येण अभिमानित्वमिव, हिमो-
दकेन कमलिनीव सा नायिका विषादेन म्लाना बभूवेति । अत्र म्लानिरेव साधारणो धर्म
इति साधारणे धर्मे अभिन्ने सति मालोपमेयम् ॥ उदा० ४९८ ॥

ज्योत्स्नेवेत्यादेरर्थस्तु—इयं नितम्बिनी कान्ता चन्द्रिका इव नयनानन्दजनिका, सुरा
इव मदस्य कारणम्, प्रभुता इव वशीकृतसकलजना अस्ति इति । अत्र नयनानन्दजनकत्व-
मद-कारणत्व-वशीकृतसकलजनत्वानां साधारणधर्माणां नानात्वात् साधारणे धर्मे भिन्ने
सति मालोपमेयम् ॥ उदा० ४९९ ॥

अनवरत-कनकेत्यादेरर्थस्तु—निरन्तरं स्वर्णदानाय जल-बिन्दु-पूर्णे हस्ते **तरङ्गिता**
श्रेणीभूय प्राप्ता याचकपङ्क्तिर् यस्य तस्य उदारस्य पुरुषस्य भणितिरिव अतिविमला
मतिरस्ति, मतिरिव अतिविमला चेष्टा अस्ति, चेष्टा इव अतिविमला कीर्तिरस्ति इति ।
अत्र अतिविमलत्वमेकमेव सर्वासु उपमासु साधारणो धर्म इति साधारणे धर्मे अभिन्ने सति
रसनोपमेयम् ॥ उदा० ५०० ॥

मतिरिव मूर्तिरित्यादेरर्थस्तु—तस्य नृपस्य मतिरिव मधुरा तनुरस्ति, तनुरिव
प्रभावपूर्णा सभा अस्ति, सभा इव परेषां जेतुम् अशक्या जयश्रीः अस्ति इति । अत्र मधु-
रत्व-प्रभावपूर्णत्व जेतुमशक्यत्वरूपाणां साधारणधर्माणां नानात्वात् साधारणधर्मे भिन्ने
सति रसनोपमेयम् ॥ उदा० ५०१ ॥

यद्यपि पदार्थयोर् भेदे साधर्म्ये चाऽसति उपमानोपमेयभावो न सम्भवति, तथापि
यदा कविना कस्यचिद् वस्तुनः सदृशम् अन्यद् नास्ति इति तात्पर्येण एकस्यैव उपमानो-
पमेयभावः परिकल्प्यते तदा **अनन्वयाख्यो** वस्तुतः साधर्म्यद्वयस्यान्वयस्याभावाद् अन्वर्थना-
मा अलङ्कारो भवतीति उपमानिरूपणानन्तरम् उपमाविशेषरूपम् अनन्वयालङ्कारं
निरूपयति—**उपमानोपमेयत्वे** इत्यादिना । एकस्मिन्नेव वाक्ये प्रतिपादितः उपमानान्तर-

उपमानान्तरसम्बन्धाभावोऽनन्वयः।

उदाहरणम्—

न केवलं भाति नितान्तकान्तिर् नितम्बिनी सैव नितम्बिनीव।
यावद् विलासायुधलास्यवासास् ते तद्विलासा इव यद्विलासाः॥उदा०५०२॥

(सू० १३७) .... **विपर्यास उपमेयोपमा तयोः॥९०॥**

तयोः उपमानोपमेययोः; **विपर्यासः** परिवृत्तिः, अर्थाद् वाक्यद्वये इतरोपमान-व्यवच्छेदपरा। उपमेयेनोपमा उपमेयोपमा।

उदाहरणम्—

कमलेव मतिर् मतिरिव कमला तनुरिव विभा विभेव तनुः।
धरणीव धृतिर् धृतिरिव धरणी सततं विभाति बत यस्य॥उदा० ५०३॥

सम्बन्धाभावमूलकः एकस्यैव वस्तुनः उपमानोपमेयभाव अनन्वयोऽलङ्कारो भवतीत्यर्थः॥ १॥

अनन्वयलक्षणमाह—उपमानान्तरेत्यादिना। अन्वयः सम्बन्धः, अविद्यमानः उपमानान्तरसम्बन्धो यस्य सः अनन्वय इति अन्वर्थमिदं नामेत्यभिप्रायः।

अनन्वयमुदाहरति—**न केवलमि**त्यादिना। केवलम् अतिशयितकान्तिः सा नितम्बिनी एव सैव नितम्बिनी इव शोभते इति न, **यावद्** अपि तु **विलासायुधस्य** कामस्य लास्यानां वासाः ते तस्याः विलासा अपि तस्याः विलासा इवैव शोभन्ते इत्यर्थः। यावद् इति समुच्चयार्थकमव्ययम्। अत्र स्वेनैव नितम्बिन्यादिरूपेण वस्तुना स्वस्योपमेति अनन्वयोऽलङ्कारो बोध्यः॥उदा० ५०२॥ (२)

उपमाविशेषरूपम् उपमेयोपमालङ्कारं निरूपयति—**विपर्यास** इत्यादिना। उपमानोपमेययोः इतरोपमानाऽभावप्रतिपादनतात्पर्येण **विपर्यासः** परिवृत्तिः, अर्थात् पूर्ववाक्ये उपमेयतया उपात्तस्य उत्तरवाक्ये उपमानतयोपादानम्, पूर्ववाक्ये उपमानतयोपात्तस्य उत्तरवाक्ये उपमेयतयोपादानम् उपमेयोपमेत्यर्थः। एवं च 'उपमेयेन उपमानतां प्राप्तेन कारणात्मना उपमानस्योपमेयताया आपादने उपमेयोपमा नाम अलङ्कारो भवति' इत्यर्थः फलितः॥९०॥

उपमेयोपमाम् उदाहरति—**कमलेव मति**रित्यादिना। यस्य खलु नृपस्य सदा बुद्धिः लक्ष्मीः इव विभाति, लक्ष्मीश्च बुद्धिरिव विभाति; तनूरिव कान्तिर् विभाति, कान्तिरिव तनूर् विभाति; धृतिर् धरणीव विभाति, धरणी च धृतिरिव विभाति इत्यर्थः। अत्र स्पृहणीयत्व-प्रचितत्व-विस्तृतत्वानि साधारणा धर्माः। अत्र प्रथमवाक्यस्थयोः उपमानोपमेययोः द्वितीये वाक्ये परिवृत्त्या तत्-तृतीयसदृशव्यवच्छेदपरः परस्परसादृश्यमूलकोऽन्योन्योत्कर्षः प्रतिपाद्यते इत्युपमेयोपमाऽत्र बोध्या॥उदा० ५०३॥ (३)

मुख्येन अमुख्येन च प्रकारेण स्थितामुपमां निरूप्य औपम्याश्रितान् अलङ्कारान्

(सू० १३८) सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

समेन उपमानेन ।

उदाहरणम्—

[क] उन्मेषं यो मम न सहते जातवैरी निशाया-
मिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षाल्
लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥उदा० ५०४॥

[ख] लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्-पुरुष-सेवेव दृष्टिर् विफलतां गता ॥उदा० ५०५॥

प्रतिपिपादयिषुः उत्प्रेक्षां निरूपयन्ति—**सम्भावनमित्यादिना । प्रकृतस्य** उपमेयस्य **समेन** उपमानेन एकरूपतया यत् सम्भावनं सा उत्प्रेक्षेत्यर्थः । वस्तुतस्तु अलौकिकी (आहार्या) सम्भावनैवोत्प्रेक्षेति बोध्यम् । सम्भावनाप्रतिपादकाश्च—'मन्ये शङ्के ध्रुवं प्रायो नून-मित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिव-शब्दोऽपि तादृशः' इति दण्ड्युक्ता वेदितव्याः ।

सम्भवन्तीषु विविधासु उत्प्रेक्षासु द्रव्योत्प्रेक्षामुदाहरन्ति—**उन्मेषं यो ममेत्यादिना** । नायिकां प्रति चाटूक्तिरियम् । हे ललिततनु, यः सहजशत्रू रात्रौ मम (पद्मलक्ष्म्याः) विकासं न सहते तस्य इन्दोः सौन्दर्यदर्पः इन्दीवरदलतुल्यनयनया अनया नायिकया मुख-कान्त्या हठात् शान्तिं नीत इति हर्षाद् मन्ये पद्मलक्ष्मीः तव पादयोः लग्ना इत्यर्थः । अत्र उपमेयभूता या स्वाभाविकी पादशोभा सा हर्षात् पादयोः पतिता उपमानभूतपद्म-शोभा इति सम्भाव्यते इत्युत्प्रेक्षालङ्कारो बोध्य इति वदन्ति । वस्तुतस्तु हर्षस्य पद्म-शोभायाः पादपतनहेतुत्वेन लोकेऽप्रसिद्धेन सम्भावनाद् अत्र उत्प्रेक्षा बोध्या ॥ उदा० ५०४ ॥

क्रियोत्प्रेक्षामुदाहरन्ति—**लिम्पतीवेत्यादिना** । चारुदत्ते मृच्छकटिके च वार्षिकगाढा-न्धकारवर्णनमिदम् । अन्धकारः शरीरावयवान् लिम्पतीव, आकाशः कज्जलं वर्षतीव, (एतादृशोऽन्धकारोऽस्ति, अतः) दृष्टिः असतः पुरुषस्य सेवा इव विफलतां प्राप्ताऽस्ती-त्यर्थः । अत्र पूर्वार्धे क्रियोत्प्रेक्षैव, तिङन्तस्योपमानत्वाभावादिवशब्दस्य सम्भावनाप्रत्यायकत्वात्. तथा च महाभाष्यम् "न वै तिङन्तेनोपमानमस्ति" इति (३।१।७), कैय्यटश्च—"किन्तु तत्र सम्भावनार्थक इवशब्दः" इति । एवं चाऽत्र अचेतनस्य तमसो व्यापनं लेपनत्वेन सम्भावितम्, कृष्णस्य मेघस्य प्रवृत्तमधोऽधः प्रसरणं नभःकर्तृकाञ्जनवर्षत्वेन सम्भा-वितम् । उभयत्र लिम्पवर्षत्योः साध्यवसानया लक्षणया क्रमेण उपमेयभूतं व्यापनं प्रसरणं च उपस्थितं भवति । एवञ्च तमःकर्तृकाङ्गकर्मकं व्यापनमुपमेयं सकलवस्तु-मलिनीकरणत्वादिना साधारणधर्मेण निमित्तभूतेन उपमानभूतलेपनतया सम्भावितम्;

इत्यत्र व्यापनादि लेपनादिरूपतया सम्भावितम् ।

(सू० १३९) **ससन्देहस् तु भेदोक्तौ तदनुक्तौ च संशयः ॥९१॥**

भेदोक्तौ यथा—

> अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
> कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
> कृतान्तः किं साक्षान् महिषवहनोऽसाविति चिरं
> समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥उदा० ५०६॥

भेदोक्तावित्यनेन न केवलमयं निश्चयगर्भो यावन् निश्चयान्तोऽपि सन्देहः, स्वीकृतः, यथा—'**इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम् ।**

नभोऽपादानककृष्णमेघाधःप्रसरणम् उपमेयरूपम् अत्रोद्गमनादिना साधारणधर्मेण निमित्तभूतेन उपमानभूतनभःकर्तृकाञ्जनकर्मकवर्षणरूपतया सम्भावितमिति उत्प्रेक्षाऽत्र बोध्येत्यभिप्रायेणाऽऽह—**इत्यत्र व्यापनादी**त्यादि ॥ ५०५ ॥ (४)

उपमानकोटिक उत्कटः सन्देहः उत्प्रेक्षेति केचिन् मन्यन्ते, किन्तु उत्प्रेक्षा न सन्देहः, प्रकृतस्य उपमानेन सह सदृशताया ज्ञानेन जायमानः सन्देहः ससन्देहाख्योऽन्य एवालङ्कारो भवतीत्याह—ससन्देहस्त्वित्यादिना । स च ससन्देहः उपमानोपमेययोर् भेदस्य उक्तौ अनुक्तौ चेति द्वेधा भवतीति सूचयति—**भेदोक्तौ तदनुक्तौ** चेति । तदनुक्ताविंत्यत्र तच्छब्देन समासैकदेशस्य भेदस्य कथं परामर्श इति मम्मट एव जानातु । भेदोक्तौ तदभावे च संशय इति पाठो युक्तः । भेदस्योक्तौ निश्चयगर्भो निश्चयान्तश्चेति द्वेधा ससन्देहः, भेदस्याऽनुक्तौ तु संशयपर्यवसानः शुद्धः संशयो भवतीति सूचयिष्यति ग्रन्थकृत् ॥ ९१ ॥

भेदस्योक्तौ सत्यां ससन्देहमुदाहरति—**अयं मार्तण्डः किमि**त्यादिना । हे वीर, युद्धे त्वां विलोक्य प्रतियोद्धारः—अयं सूर्यः किम्, (किन्तु) स सूर्यः सप्तभिरश्वैर्युक्तो गतो वा भवति, (अयन्तु अनेकैरश्वैर्गत , अतो नाऽयं सूर्यः); तर्हि अयम् अग्निः किम् ? (किन्तु) एष अग्निः सर्वा दिशो नियतरूपेण न प्रसरति, (अनुकूलवातां दिशमेव प्रसरति); (अयं तु नियतरूपेण सर्वा दिशः प्रसरति, अतो नाऽयमग्निः); तर्हि अयं साक्षाद् यमः किम्, (किन्तु) असौ यमो महिषवाहनो भवति (अयं तु न महिषवाहनः, अतो नाऽयं यमः) इत्येवं प्रकारेण विकल्पान् कुर्वते इत्यर्थः । अत्र अयं मार्तण्डः तदन्यो वेत्यादिः उपमेयोपमानयोः संशयः सप्ताश्वगमहिषसम्बन्धाग्निरूपभेदे वीरे नास्तीति भेदे उक्ते सति पुनः आकारभेदेन संशयः, पुनः प्रकारान्तरेण निश्चयः, पुनः संशय इति निश्चयगर्भः ससन्देहोऽयं वेदितव्य ॥ उदा० ५०६ ॥

दृढनिश्चयपर्यवसानोऽपि ससन्देहो भेदोक्ति-ससन्देहत्वेन स्वीक्रियते इत्याह—**भेदोक्ताविंत्यनेने**त्यादिना । निश्चयान्तं ससन्देहमुदाहरति—**इन्दुः किमित्यादिना** । नायिकां

ललित-सविलास-वचनैर् मुखमिति हरिणाक्षि निश्चितं परतः (उदा० ५०७) [इति]. किन्तु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इति उपेक्षितो भट्टोद्भटेन।

तदनुक्तौ (भेदानुक्तौ) यथा—

अस्याः सर्गविधौ प्रजापतिरभूच् चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन् मनोहरमिदं रूपं पुराणो मुनिः॥उदा० ५०८॥

(सू० १४०) तद् रूपकमभेदो य उपमानोपमेययोः।

अतिसाम्याद् अपह्नुतभेदयोरभेदः।

प्रति चाटूक्तिरियम्। हे मृगनयने, एतत् (तव मुखम्) चन्द्रः किम्, किन्तु कलङ्कः क्व ? अतो न चन्द्रः; तर्हि एतत् (तव मुखम्) कमलं किम्, किन्तु जलं तर्हि कुत्र गतम् ? अतो न कमलम् इत्येवंप्रकारे विकल्पे जाते सति **परतः** पश्चात् ललितैः सविलासैश्च वचनैरेतद् मुखमिति निश्चितमित्यर्थः। अत्र मुखत्वेन जाते दृढे निश्चये पर्यवसानमिति निश्चयान्तोऽत्र ससन्देहालङ्कारः। यदि दृढनिश्चयान्तोऽपि ससन्देहस्तर्हि कथमयं भेदो भट्टोद्भटेन उपेक्षित इत्यत्राह—**किन्तु निश्चये**त्यादि। निश्चयगर्भे निश्चयस्य प्रतीयमानत्वात् तत्र चमत्कारः, निश्चयान्ते तु निश्चयस्य वाच्यत्वात् प्रस्फुटत्वाद् न चमत्कार इति मन्यमानेन भट्टोद्भटेन निश्चयान्तः ससन्देह उपेक्षित इत्यर्थः। प्रतीयमानस्य निश्चयस्य वाच्यस्य तस्य च चमत्कारे सत्यपि तारतम्ये वाच्येऽपि निश्चये चमत्कारोऽस्त्येवेति तत्राप्यलङ्कारत्वमस्माभिः स्वीक्रियते इति भावः॥ उदा० ५०७॥

सन्दिह्यमानयोः उपमेयोपमानयोर् भेदस्य अनुक्तौ ससन्देहमुदाहरति—**अस्याः सर्गविधा**वित्यादिना। विक्रमोर्वशीये उर्वशीमुद्दिश्य प्रयुक्ता पुरूरवस उक्तिरियम्। अस्याः उर्वश्याः सृष्टेर्विधाने ब्रह्मा कान्तिदायकश्चन्द्रोऽभूद् नु, अथवा ब्रह्मा अस्याः सर्गविधौ शृङ्गारैकरसः स्वयं मदनोऽभूद् नु, अथवा ब्रह्मा अस्याः सर्गविधौ ब्रह्मा मधुमासोऽभूद् नु; यतो हि सततवेदाभ्यासेनाहतप्रतिभो वनितादिविषयदर्शनानिर्लोलुपः पुराणो मुनिर् ब्रह्मा स्वरूपस्थः सन् मनोहरमिदमुर्वश्या रूपं निर्मातु कथं शक्नुयादित्यर्थः। अत्र उपमेयभूताद् ब्रह्मण उपमानभूतानां चन्द्रादीनां भेदो (वैधर्म्यम्) न प्रतिपादितमिति भेदानुक्तौ ससन्देहालङ्कारोऽत्र बोध्यः॥ उदा० ५०८॥ (५)।

उपमेये संशयात्मिकाम् उपमानबुद्धिम् उपजीवति ससन्देहे निरूपिते, उपमेये आरोपात्मिकाम् उपमानबुद्धिमुपजीवद् रूपकं निरूपयति—**तद् रूपक**मित्यादिना। अतिसाम्यादपह्नुतभेदयोः उपमानोपमेययोः आरोप्यमाणो योऽभेदः तद् रूपकमित्यर्थः।

(सू० १४१) समस्तवस्तुविषयं श्रौत आरोपितो यदा ॥९२॥

आरोपविषय इव आरोप्यमाणो यदा शब्दोपात्तस्तदा समस्तानि वस्तूनि विषयोऽस्येति समस्तवस्तुविषयम् ।

यथा—

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्यच्छलेन ॥**उदा० ५०९**॥

अत्र पादत्रये अन्तर्धानव्यसनरसिकत्वमारोपितधर्म एवेति रूपकपरिग्रहे साधकमस्तीति तत्-सङ्कराऽऽशङ्का न कार्या ।

(सू० १४२) श्रौता आर्थाश्च ते यस्मिन् एकदेशविवर्ति तत् ।

रूपकभेदान् प्रतिपादयिषुः आह—**समस्तवस्तुविषय**मित्यादि । यत्र उपमेये उपमानानामारोपः क्रियते ते आरोपविषया यथा शब्दोपात्ता भवन्ति यानि उपमानानि उपमेये आरोप्यन्ते ते आरोप्यमाणाः सर्वेऽपि शब्दोपात्ता भवन्ति चेत् तदा रूपकं समस्तवस्तुविषयम् इत्युच्यते इत्यर्थः । सकलानि आरोप्यमाणानि शब्दप्रतिपाद्यतया विषयो यत्र तत् **समस्तवस्तुविषयम्** इत्याह—**समस्तानी**त्यादिना । परीक्षसंस्करणे "श्रौत आरोपितो यदा" इति पाठः कारिकाया इति, "आरोपिता इति बहुवचनमविवक्षितम्" इति वृत्तिपाठोऽन्यत्र क्वचिदनुपलभ्यमानश्चेति बोध्यम् ॥ ९२ ॥

समस्तवस्तुविषयकं रूपकमुदाहरति—**ज्योत्स्नाभस्मे**त्यादिना । ज्योत्स्नारूपस्य भस्मनो लेपेन धवला, तारकारूपाणि अस्थीनि बिभ्रती, तिरोभावक्रीडाऽऽसक्तिरसिका इयं रात्रिरूपा कापालिकी योगिनी चन्द्ररूपे भिक्षापात्रीभूते कपाले कलङ्कस्यच्छलेन स्थापितं सिद्धाञ्जनचूर्णम् आविर्भावतिरोभावसाधनं धारयन्ती सती एकस्माद् द्वीपाद् अन्यं द्वीपं वारंवारं यातीत्यर्थः । अत्र रात्रिरुपमेया कापालिकी उपमानम्; रात्रिरेव कापालिकीत्यादौ सर्वत्र मयूरव्यसकादिः समासः, "रूपकसमासो मयूरव्यंसकादिषु ज्ञेयः" इति, 'अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः" (काशिका २।१।७२) इति च वचनात् । भस्मादीनां सर्वेषाम् आरोप्याणां शब्देनोपादानात् पादत्रये रूपकमलङ्कारः । चतुर्थे तुच्छलशब्दस्योपादानाद् अपह्नुतिरेवेति बोध्यम् । अत्र अन्तर्धानव्यसनरसिकत्वमारोपितस्यैव कापालिकीपदार्थस्य धर्मो न तु आरोपविषयस्य रात्रेर् धर्मः इति आरोपितप्राधान्यावगमात् पादत्रये रूपकमेव न तु उपमितसमासाश्रयणेनोपमात्वं न वा रूपकोपमयोः सन्देहसङ्कर इत्याह—**अत्र पादत्रये** इत्यादिना ॥ उदा० ५०९ ॥

अथ एकदेशविवर्ति रूपकं निरूपयति—**श्रौता आर्थाश्चे**त्यादिना । यत्र आरोप्यमाणेषु मध्ये केचन शब्देनैवोपात्ता भवन्ति केचन पुनः शब्देन अनुपात्ता अपि अर्थवशाद्

केचिदारोप्यमाणा शब्दोपात्ता केचिदर्थसामर्थ्यादवसेया इति एकदेशे विशेषेण वर्तनाद् एकदेशविवर्ति ।

यथा—

जस्स रणन्तेउरए करे कुणन्तस्स मण्डलग्ग-लअम् ।
रससम्मुही वि सहसा परम्मुही होइ रिउ-सेणा ॥उदा० ५१०॥

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम्, मण्डलाग्रलताया नायिकात्वं रिपुसेनायाश्च प्रतिनायिकात्वम् अर्थसामर्थ्यादवसेयमिति एकदेशे विशेषेण वर्तनाद् एकदेशविवर्ति ।

(सू० १४३) **साङ्गमेतद्** .... ।

उक्तद्विभेदं सावयवम् ।

(सू० १४४) .... **निरङ्गन्तु शुद्धम्** .... ।

यथा—

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।

आरोपितत्वेन निश्चिता भवन्ति तद् रूपकम् आरोप्यमाणप्रतिपादकत्वे एकदेशे विशेषेण-वर्तनाद् एकदेशविवर्तीत्युच्यते इति प्रदीपिकावृत्तिकारः ।

एकदेशविवर्ति रूपकम् उदाहरति—**जस्स रणे**त्यादिना । **'यस्य रणान्तःपुरे करे कुर्वतो मण्डलाग्रलताम् । रससम्मुखाऽपि सहसा पराङ्मुखी भवति रिपुसेना'** इति संस्कृतच्छाया । गाथासप्तशत्यां वेवरसम्पादितायां पद्यमिदम् (९८०) । यस्य राज्ञो रणरूपे स्त्र्यगारे खड्ग-लतारूपां नायिकां करे कुर्वतः सतः रसाविष्टाऽपि रिपुसेनारूपा प्रतिनायिका झटिति पराङ्मुखी भवतीत्यर्थः । अत्र रूपकस्यैकदेशविवर्तित्वं स्फुटीकरोति—**अत्र रणस्ये**त्यादिना । रणे अन्तःपुरत्वारोपस्य सामर्थ्याद् मण्डलाग्रलतायां नायिकात्वस्य रिपुसेनायां प्रतिनायिकात्वस्य चारोपोऽर्थाद् निश्चीयते, अन्यथा रणे अन्तःपुरत्वस्यारोपो अनिरूढः स्यादिति वोध्यम् ॥ उदा० ५१० ॥

पुनः प्रकारान्तरेण रूपकभेदौ निरूपयति—**साङ्गमेत**दित्यादिना । तत्र एतद् अनुपदं निरूपिते रूपकस्य भेदद्वये साङ्गरूपकत्वं वेदितव्यमित्यर्थः । यत्र प्रधानतया वर्णनीये तदुपकरणे च तत्तदुपमानारोपस्तत्र रूपकस्य साङ्गत्वं वोध्यम् ।

निरङ्गेषु रूपकेषु शुद्धं निरङ्गं रूपकं निरूपयति—**निरङ्गन्तु शुद्ध**मिति । यत्र केवले प्रधानतया वर्णनीये तदुपकारकेष्वपि तत्तदुपमानारोपः तत्र रूपकस्य निरङ्गत्वं वोध्यम् । तत्र च एकस्मिन् उपमेये एकस्यैवोपमानस्याऽऽरोपे शुद्धत्वं भवति ।

शुद्धं निरङ्गं रूपकमुदाहरति—**कुरङ्गीवाङ्गानी**त्यादिना । ध्वन्यालोकलोचने कस्याऽपि कवेः श्लोकत्वेन प्रतीकमात्रेणोद्धृतमिदं पद्यम् (३।३७) । सखी नायिकावृत्तान्तं काञ्चित् प्रति वर्णयति—हे सखि इयं नवयौवना नायिका यस्मात् कारणाद् गीतशब्देषु

अनिद्रं यच् चाऽन्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥उदा० ५११॥

(सू० १४५)···· ···· ···· ···· ····**माला तु पूर्ववत्** ॥९३॥

मालोपमायामिवैकस्मिन् बहव आरोपिताः । यथा—

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः ।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया
प्राणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया ॥उदा० ५१२॥

(सू० १४६) **नियतारोपणोपायः स्यादारोपः परस्य यः ।**

मृगीव अङ्गानि **स्तिमितानि** भावावेशातिशयवशाद् आर्द्राणि अपदानि स्तब्धानि विषयान्तर-ग्रहणविमुखानि च करोति, श्रुतामपि प्रियस्य वार्ता पुनः प्रष्टुं यस्मात् कारणात् सखीं प्रेरयति यस्माच् च कारणाद् निद्रायामनागतायामपि अन्तःकरणे अविद्यमाना निद्रा यस्मिन् कर्मणि यथा स्यात् तथा **स्वपिति** शय्यायां लुठति नेत्रमुद्रणं करोति तस्मात् कारणाद् अहं वेद्मि यद्—अहो मदनोऽस्या नायिकाया हृदि उद्गताम् अभिनवां प्रेमरूपां लतिकां सेक्तुं प्रवृत्त इति । अत्र मुख्ये वर्णनीये प्रेम्णि एव लतिकाया आरोपः कृतः, तदुपकारके अन्यस्मिन् कुत्रापि किमपि नाऽऽरोपितमिति रूपकस्य शुद्धत्वं बोध्यम् ॥उदा० ५११॥

निरङ्गस्य रूपकस्य मालारूपकाख्यं द्वितीयं भेदं प्रतिपादयति—**माला तु पूर्ववदिति** । मालोपमायां वृत्तौ पूर्वं प्रतिपादितायां यथा एकस्य उपमेयस्य बहूनामप्रस्तुतानाम् आरोपः क्रियते चेत् तद् मालारूपकमुच्यते इति सूत्रवृत्त्योरर्थः ॥ ९३ ॥

निरङ्गेषु रूपकेषु मालारूपकमुदाहरति—**सौन्दर्यस्य तरङ्गिणी**त्यादिना । कश्चिद् विधुरः प्रियां प्रशंसति—सा मदनुभूता प्रिया सौन्दर्यस्य नदी [illegible] तारुण्योत्कर्षस्य (समुदितस्यानन्दानुभवजन्य) आनन्दाविर्भावः, अङ्गशोभायाः वशीकरण-क्रिया, परिहासरहस्यानाम् उल्लासनाया वासभूमिः, **वक्राणां** साकूतानां गिरां **विद्या** सुसङ्घटिता ज्ञानशृंखला तत्त्वज्ञानं वा, ब्रह्मणो निस्सीमस्य निर्माणकौशलस्य सक्षात्कारः, मदनस्य (आत्मलाभाधारभूतत्वात्) प्राणाः, ललनानां चूडामणिश्चेत्यर्थः । अत्रैकस्या-मुपमेयभूतायां सौन्दर्यतरङ्गिण्यादीनामारोपात् मालारूपकत्वं बोध्यम् । नायिकायामेव सौन्दर्यतरङ्गिण्यादीनामारोपो न तु नायिकाङ्गभूतेऽन्यत्र क्वचित् कस्यचित् आरोप इति रूपकस्य शुद्धता बोध्या, 'कवयस्तु तरुणिमेतीमनित्त्वं प्रयुञ्जते, नास्य लक्षणमस्ति' इति तृधातुव्याख्याने सायणः (१।६८७) ॥उदा० ५१२॥

परम्परितरूपकं निरूपयति—**नियतारोपणे**त्यादिना । यत्र **नियते** मुख्ये वर्णनीये अप्रस्तुतारोपस्य साधारणधर्मसम्पादकत्वेन उपपादकतया परत्र तदुपमानाद्यप्रस्तुतारोप

तत् परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥९४॥

श्लिष्टे यथा—

> विद्वन्-मानस-हंस वैरि-कमला-सङ्कोच-दीप्त-द्युते
> दुर्गामार्गणनीललोहित समित्-स्वीकार-वैश्वानर ।
> सत्यप्रीति-विधान-दक्ष विजय-प्राग्भाव-भीम प्रभो,
> साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥उदा० ५१३॥

अत्र मानसमेव मानसम् कमलायाः सङ्कोच एव कमलानामसङ्कोचः, दुर्गाणाममार्गणमेव दुर्गाया मार्गणम्, समितां स्वीकार एव समिधां स्वीकारः, सत्ये प्रीतिरेव सत्यामप्रीतिः, विजयः परपराभव एव विजयोऽर्जुनः, एवमारोपण-निमित्तो हंसादेरारोपः।

यद्यपि शब्दार्थालङ्कारोऽयमित्युक्तम्, वक्ष्यते च, तथापि प्रसिद्ध्यनुरोधाद-त्रोक्तः; एकदेशविवर्ति हीदमन्यैरभिधीयते ।

क्रियते तत्र रूपकं परम्परितमुच्यते तच्च परम्परित रूपकम् आरोप्यारोपविषययोर् वाचके शब्दे श्लिष्टे सति आरोप्यारोपविषययोर् वाचके शब्दे **भेदभाजि** भिन्ने वा सति भवतीति द्विविधं भवतीत्यर्थः। इदं च द्विविधमपि परम्परितरूपकं प्रत्येकं शुद्धं (केवलम्) मालारूपं च भवतीति परम्परितरूपकं चतुर्धा बोध्यम् ॥ ९४ ॥

तत्र आरोप्यारोपविषयवाचकपदयोः श्लिष्टयोः सतोः मालारूपं परम्परितरूपकमुदा-हरति—**विद्वन्-मानसे**त्यादिना। राजानं प्रति कवेश्चाटूक्तिरियम्। विदुषां मानसमेव मानसं सरः तत्र हंसरूप, वैरिकमलासङ्कोच एव कमलाऽसङ्कोचः तत्र सूर्यरूप, (दुर्गाणां कोट्टानाम् अमार्गणम् अनन्वेषणम्) दुर्गाऽमार्गणमेव (दुर्गाया मार्गणम्) दुर्गामार्गणं तत्र नीलकण्ठरूप, समित्स्वीकार (युद्धस्वीकारः) एव समित्स्वीकारः (समिधामिन्धनानां खादनम्) तत्र वैश्वानररूप, सत्यप्रीतिविधानम् (तथ्यप्रीतिकरणम्) एव सत्यप्रीतिविधानम् (सत्याम् अप्रीतिकरणम्) तत्र दक्ष-प्रजापतिरूप, **विजयस्य** परपराभवस्य **प्राग्भाव** (कारणता) एव **विजयाद्** अर्जुनात् प्राग् **भावो** जन्म तत्र भीमसेनरूप हे श्रेष्ठवीर प्रभो, त्वं ब्राह्मं वत्सरशतम् उच्चैः **साम्राज्यं** चक्रवर्तित्वं कुरु इत्यर्थः। अत्र मानसादिपदश्लेषबलाद् विहितो मनःप्रभृतिषु सरोविशेषत्वाद्यारोपो राज्ञि हंसत्वाद्यारोपे निमित्तमिति श्लिष्टे वाचके परम्परितं रूपकमिदं बोध्यम्। एकस्मिन् सूत्रे बहूनां पुष्पाणामिव एकस्मिन् राज-रूपे प्रकृतेऽर्थे हंसादीनां बहूनाम् आरोपाद् अत्र रूपकस्य मालारूपत्वं च बोध्यम्। अत्र श्लेषः क्लिष्ट इति श्लेषविश्लेषणपूर्वकं परम्परितरूपकत्वं स्फुटीकरोति—**अत्र मानस-मेवे**त्यादिना ॥उदा० ५१३॥

शिलष्टपरम्परितरूपके श्लिष्टानां मानसादिपदानां परिवृत्त्यसहत्वाद् हंसादिपदानां च परिवृत्तिसहत्वात् केषाञ्चित् शब्दानां परिवृत्त्यसहत्वं केषांचिच् च परिवृत्तिसहत्वमिति श्लिष्टपरम्परितरूपकं शब्दार्थालङ्कार एवेति अस्माभिरपि **नवमे श्लेषविवेके** सूचितम्,

भेदभाजि यथा—

आलानं जयकुञ्जरस्य दृषदां सेतुर् विपद्-वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः।
सङ्ग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन् राजति वीरवैरिवनितावैधव्यदस् ते भुजः ॥उदा० ५१४॥

अत्र जयादेर् भिन्नशब्दवाच्यस्य कुञ्जरत्वाद्यारोपे भुजस्याऽऽलानत्वाद्यारोपो युज्यते।

'अलौकिकमहालोकप्रकाशितजगत्-त्रयः। स्तूयते देव सद्वंशमुक्तारत्नं न कैर् भवान्' (उदा० ५१५) इति; **'निरवधि च निराश्रयं च यस्य स्थितमनिर्वर्तित-**

प्राचीनैर्वा तथोक्तम्; वक्ष्यते चेदं सङ्करालङ्कारनिरूपणान्ते वृत्तौ; एवं च पुनरुक्तवदाभास इवाऽयमपि यद्यपि [illegible] एव पठनीयस्तथापि इदं भामहादिभि प्राचीनैरलङ्कारैः एकदेशविवर्ति इत्युच्यते अर्थालङ्कारमध्ये एव च गण्यते इति प्रसिद्ध्यनुरोधादस्माभिरपि अत्रोक्त इत्याह **यद्यपि शब्दे**त्यादिना।

आरोपविषयवाचकात् शब्दाद् आरोप्यवाचके शब्दे भिन्ने सति परम्परितं मालारूपकमुदाहरति—**आलानं जयकुञ्जरस्ये**त्यादिना। भट्टश्यामलपद्यत्वेन व्यक्तिविवेके उदाहृतं पद्यमिदम्। हे राजन्, जय एव कुञ्जरस्तस्य बन्धनस्तम्भः, विपत्तिरेव वारिधिस् तस्य शिलामयस्तरणमार्गः, करवाल एव **चण्डमहाः** सूर्यः तस्य उदयाचलः, **श्रीः** सम्पत्तिरेव **श्रीः** लक्ष्मीस्तस्या लीलार्थकमुपधानम्, सङ्ग्राम एव अमृतसागरः तस्य प्रमथनमेव क्रीडा तस्याः सम्पादने मन्दरः, वीरवैरिणां वनिताभ्यो वैधव्यस्य दायकस्ते भुजो राजतीत्यर्थः। अत्र आरोपविषयवाचकेभ्यो जयादिपदेभ्यः आरोप्यवाचकाः कुञ्जरादिशब्दा भिन्ना इति, भुजे आलानत्वादेरारोपे जयादौ कुञ्जरत्वादेः आरोपो निमित्तमिति, एकस्मिन् भुजे [illegible] इति च वाचके भेदभाजि सति परम्परितं मालारूपं रूपकमत्र बोध्यमित्यभिप्रायेणाऽऽह—**अत्र जयादे**रित्यादि ॥उदा० ५१४॥

अमालारूपमपि परम्परितं रूपकं भवतीत्याह—**अलौकिके**त्यादिना। तत्र अमालारूपं [illegible] परम्परितं रूपकमुदाहरति—**अलौकिके**त्यादि। हे राजन्, अलौकिको यो महान् आलोकः (आत्मज्ञानम्) तेन प्रकाशितं जगत्त्रयं येन तादृशः, **सद्वंशो** महत् कुलमेव **सद्वंशः** उत्कृष्टवेणुः मुक्तोत्पत्तिस्थानभूतस्तस्य **मुक्तारत्नं** मौक्तिकश्रेष्ठो भवान् कैर् न स्तूयते ? (सर्वैरेव स्तूयते इत्यर्थः)। अत्र आरोप्याऽऽरोपविषययोर् वेणुकुलयोः श्लिष्टेन वंशशब्देन अभिधानमिति, राज्ञि मुक्तारत्नत्वस्याऽऽरोपे **कुले वेणुत्व**स्यारोपो निमित्तमिति, न च राज्ञि बहूनामारोप्याणामारोप इति च अमालारूपं श्लिष्टारोप्यारोपविषयवाचकपदं परम्परितं रूपकं बोध्यम्। आरोपविषयवाचकात् शब्दाद् आरोप्यवाचके शब्दे भिन्ने सति परम्परितम् अमालारूपं रूपकमुदाहरति—**निरवधि चे**त्या-

कौतुकप्रपञ्चम्। प्रथम इह भवान् स कूर्ममूर्तिर् जयति चतुर्दशलोकवल्लिकन्दः' (उदा० ५१६) इति च अमालारूपकमपि परम्परितं द्रष्टव्यम्।

'किसलयकरैर् लतानां करकमलैः कामिनां मनो जयति। नलिनीनां कमलमुखैर् मुखेन्दुभिर् योषितां मदनः' (उदा० ५१७) इत्यादि रशनारूपकं न वैचित्र्यवदिति न लक्षितम्।

(सू० १४७) प्रकृतं यन् निषिध्याऽन्यत् साध्यते सा त्वपह्नुतिः।

उपमेयमसत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते साऽपह्नुतिः।

उदाहरणम्—

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्को नैवाऽयं विलसति शशाङ्कस्य वपुषि।

दिना। यस्य अवधिरहितम् आश्रयरहितं च अतएव अनिवर्तिताश्चर्यप्रसरं स्थितम् अस्ति, अर्थाद् यस्य देशकालपरिच्छेदरहिता अद्भुता स्थितिरस्ति स इह आद्यः कूर्ममूर्तिः भूर्भुवस्वरादिचतुर्दशलोकरूपाया लताया प्ररोहबीजकन्दरूपो भवान् जयतीत्यर्थः, **अत्र** आरोपविषयारोप्ययोर् लोकवल्ल्योर् वाचकयोः पदयोः पृथक् पृथगेव ग्रहणात् श्लेषरहितत्वात् लोके वल्लित्वस्याऽऽरोपो कूर्माकृतौ विष्णौ कन्दत्वस्याऽऽरोपे निमित्तम् इति, न च कमठाकृतौ विष्णौ वक्त्रतामारोप्यानामारोप इति च श्लेषरहितं परम्परितम् अमालारूपं रूपकमिदं बोध्यम् ॥उदा० ५१५-१६॥

रशनारूपकमुदाहृत्य तत्र वैचित्र्यविशेषाभावात् तस्याऽलक्षणीयत्वं प्रतिपादयति—**किशलयकरै**रित्यादिना। मदनो लतानां किसलयरूपैः करैः, योषितां कररूपैः कमलैः, कमलिनीनां कमलपुष्परूपैर् मुखैः योषितां मुखरूपैरिन्दुभिश्च कामिनां मनो जयतीत्यर्थः। अत्र किसलये करत्वम्, करे कमलत्वम्, कमले मुखत्वम्, मुखे इन्दुत्वमारोपितमिति पूर्वपूर्वेषामारोप्यमाणानां परपरत्र आरोपविषयत्वाद् रशनारूपकत्वं बोध्यम्। इदं च रशनारूपकोदाहरणं रुद्रटेन (८।५०) प्रतिपादितम्। किन्तु एतादृशेषु स्थलेषु उपमेयोत्कर्षप्रतिपादनाय उपमानीकृतानां पुनरुपमेयीकरणे उपमेयोत्कर्षस्य स्थगनाद् न वैचित्र्यविशेषवत्त्वमिति बोध्यम् ॥उदा० ५१७॥ (६)

औपम्यमूलकमेव अपह्नुतिनामकमलङ्कारमाह—**प्रकृतं यन् निषिध्ये**त्यादिना। उपमेयम् असत्यतया यद् व्यवस्थाप्यते उपमानं च यद् आहार्यनिश्चयविषयीक्रियते सा अपह्नुतिः इति सूत्रवृत्त्योः पिण्डीकृतोऽर्थः। वस्तुतस्तु किञ्चिदपह्नुत्य कस्यचित् प्रदर्शनमपह्नुतिरित्येवाऽपह्नुतिलक्षणं युक्तमित्याहुः. तथा च दण्डी—"अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनम्" (२।३०४) इति।

यत्र शब्देनैव असत्यत्वं प्रतिपाद्यते तां शाब्दीमपह्नुतिमुदाहरति—**अवाप्तः प्रागल्भ्य**मित्यादिना। शैलतनयां प्रति गिरीशस्योक्तिरियम्। हे शैलतनये, परिणतरुचः (परि-

अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ।।उदा० ५१८।।

इत्थं वा—

बत सखि कियदेतत् पश्य वैरं स्मरस्य
प्रियविरहकृशेऽस्मिन् रागिलोके तथाहि ।
उपवनसहकारोद्भासिभृङ्गच्छलेन
प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ।।उदा० ५१९।।

अत्र हि न सभृङ्गाणि सहकाराणि, अपि तु सकालकूटाः शरा इति प्रतीतिः ।
एवं वा—

अमुष्मिल्ँ लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्ट पृथुजघनभागे निपतितः ।
तदङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ।।उदा० ५२०।।

अत्र न रोमावलिः, अपि तु धूमशिखेति प्रतीतिः । एवमियं भङ्ग्यन्तरैरप्यूह्या ।

पूर्णस्य) चन्द्रस्य वपुषि **प्रागल्भ्यं** समुत्कटत्वं प्राप्तः अयम् पदार्थः कलङ्को नैव भवति, किन्तु इयं निशाभिधा चन्द्रकामिनी अमुष्य चन्द्रस्य विगलतः अमृतस्य स्रवणेन शीतले उषसि रतिश्रान्ता सती **गाढं** निश्चेष्टं यथा स्यात् तथा शेते इत्यर्थः । अत्र कलङ्कमसत्यं कृत्वा रात्रिः सत्यतया व्यवस्थापितेति अपह्नुतिरलङ्कारः । निषेधस्य नैवायमिति शब्देनैव प्रतिपादनात् शाब्दी अपह्नुतिः ।। उदा० ५१८ ।।

आर्थीम् अपह्नुतिमुदाहरति—**बत सखीत्यादिना** । सखी प्रति विरहिणी वदति—हे सखि, प्रियविरहेण कृशे अस्मिन् मादृशे कामिजने स्मरस्य कियदपरिमितं वैरमस्ति, तत् पश्य; तथाहि अनेन स्मरेण उपवनसहकारेषु शोभमाना ये भृङ्गास् तेषां छलेन सहकारपुष्परूपे बाणे कालकूटमग्रे निहितमित्यर्थः । अत्र भृङ्गान् असत्यान् कृत्वा कालकूटं सत्यतया व्यवस्थापितमित्यपह्नुतिरलङ्कारः । अत्र च शाब्दस्य निषेधस्याऽभावान् तस्य छलशब्दादर्थाल् लभ्यत्वाद् आर्थी अपह्नुतिर् बोध्या ।। उदा० ५१९ ।।

क्वचिद् निषेधेन अपह्नवः, क्वचिच् छलछद्मादिशब्दैरपह्नवः, क्वचिच् च पुनर् वस्त्वन्तररूपताविधायिशब्दनिबन्धनोऽपह्नव इत्येवम्प्रकारेणाऽस्याऽलङ्कारस्य बहुविधा बन्धविशेषशोभेति प्रदर्शयितुं पुनरप्युदाहरणान्तरमाह—**अमुष्मिल्ँ लावण्येत्यादि** । काचन गणिकादूती कामिनमुत्तेजयितु गणिकामन्निहित तं प्रति गणिकां प्रशंसति—हे नागरक, हरेण दग्धः कामदेवोऽस्याः हरिणाक्ष्याः अमुष्मिन् लावण्यामृतसरोरूपे पीने कटिपुरोभागे (तापशान्त्यै) नूनं निपतितः, यस्य कामस्य अङ्गाङ्गाराणां प्रशमस्य सूचिका इयं धूमशिखा अस्याः नाभिकुहरे रोमावलिरूपा परिणमतीत्यर्थः । अत्रापह्नुतिं प्रदर्शयति **अत्र न**

(सू० १४८) **श्लेषः स वाक्ये एकस्मिन् यत्राऽनेकार्थता भवेत्** ॥९५॥

एकार्थप्रतिपादकानामेव शब्दानां यत्राऽनेकोऽर्थः स श्लेषः ।

उदाहरणम्—

उदयमयते दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्-तेजःपुञ्जो विभाति विभाकरः ॥उदा० ५२१॥

अत्र अभिधाया अनियन्त्रणाद् द्वौ अपि अर्क-भूपौ वाच्यौ ।

(सू० १४९) **परोक्तिर् भेदकैः श्लिष्टैः समासोक्तिः** .... ।

प्रकृतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्याद्, न तु विशेष्यसामर्थ्या-दपि यदप्रकृतस्यार्थस्याऽभिधानं सा समासेन संक्षेपेणार्थद्वयकथनात् समासोक्तिः ।

उदाहरणम्—

लहिऊण तुज्झ बाहु-प्फंसं जीए स को वि उल्लासो ।
जअलच्छी तुह विरहे ण हूज्जउ दुब्बला णं सा ॥उदा० ५२२॥

रोमावलिरित्यादिना । अन्येऽपि प्रकारभेदा अपह्नुतेः सम्भवन्तीत्याह-**एवमि**त्यादिना ॥ उदा० ५२० ॥ (७)

अधुना विशेषण-विशेष्यविच्छित्त्याश्रयं गम्यौपम्यानुप्राणितमलङ्कारम् अर्थश्लेषं निरूपयति—**श्लेषः स वाक्य एकस्मि**न्नित्यादिना । अत्रैककृन्तसनफलद्वयन्यायेन अर्थयोः श्लेषः शब्दानां परिवृत्तिसहत्वं च तत्राऽर्थश्लेषेऽलङ्कारो बोध्यः ॥९५॥

अर्थश्लेषमुदाहरति—**उदय**मित्यादिना । **विभाकरः** सूर्यो विभाकराख्यो राजा च **उदयं** पूर्वाचलम् उन्नतिं च गच्छति, दिशां दिश्यजनानां च **मालिन्यम्** अन्धकारावरणं दारिद्र्यजं कुवेशत्वं च निराकुरुतेतराम्, **निद्रामुद्रां** निद्राजन्यां नेत्रमुद्रां निरुत्साहतां च नाशं नयति, **क्रियाः** उद्योगान् नित्यादिकर्माणि च प्रवर्तयति, **स्वैराचारप्रवर्तनस्य** अभि-सारादिप्रवृत्तेः निषिद्धाचरणप्रवृत्तेश्च करोति; अहो अहो, लसत्-तेजःपुञ्जो विभाकरो विभातीत्यर्थः । हरिणीवृत्तम् । अत्र शब्दानामभिधायाः संयोगाद्यैः प्रकरणेन चाऽनियन्त्र-णाद् उभयोरर्थयोर् वाच्यतया शब्दानां पर्यायपरिवृत्तिसहता च अर्थश्लेषो बोध्य इत्यभिप्रायेणाह—**अत्राभिधाया** इत्यादि ॥ उदा० ५२१ ॥ (८)

विशेषणविच्छित्त्याश्रयं गम्यौपम्यानुप्राणितं समासोक्त्यलङ्कारमाह—**परोक्तिर् भेदकै**रि-त्यादि । सूत्रार्थो वृत्तौ प्रस्फुटः ।

समासोक्तिमुदाहरति—**लहिऊण तुज्झे**त्यादिना । '**लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः । जयलक्ष्मीस्तव विरहे न भवतु दुर्बला ननु सा**' इति संस्कृतच्छाया । समरे पतितं राजानं प्रति कस्यचिदुक्तिः । हे वीर, तव बाहुस्पर्शं लब्ध्वा यस्याः स कोऽपि अनिर्वचनीयो हर्षोल्लासोऽभूत् सा जयलक्ष्मीस्तव विरहे कथं दुर्बला न भवतु ? इत्यर्थः ।

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति ।

(सू० १५०) .... **निदर्शना ।**

अभवन् वस्तुसम्बन्ध उपमापरिकल्पक ।।९६।।

निदर्शनं दृष्टान्तकरणम् ।

उदाहरणम्—

क्व सूर्यप्रभवो वंशः क्व चाऽल्पविषया मतिः ।
तितीर्षुर् दुस्तरं मोहादुडुपेनाऽस्मि सागरम् ।।उदा० ५२३।।

अत्र उडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमित्युपमा पर्यवस्यति ।

यथा वा—

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ।।उदा० ५२४।।

'प्रश्नावधारणाऽनुज्ञानुनयामन्त्रणे ननु' इत्यमरः । अत्र यद्यपि जयलक्ष्मीरिति पदं केवल-प्रस्तुतार्थाभिधायि किन्तु तद् विहाय अन्यानि सर्वाणि पदानि साधारणानि, अर्थाद् लब्ध्वा तवेत्यादि वाक्यात्मकं विशेषणं जयलक्ष्म्याः कान्तायाश्च साधारणमिति जयलक्ष्म्याः कान्ताव्यवहारप्रतीतिरिति समासोक्तिरत्र द्रष्टव्या इत्यभिप्रायेणाऽऽह—**अत्र जयलक्ष्मीशब्द-स्येत्यादि** । समासोक्तेर् न गुणीभूतव्यङ्ग्यकाव्यकोटौ प्रवेश इति प्राक् (उदा० १६४) प्रतिपादितं न विस्मर्तव्यम् ।।उदा० ५२२(१)।।

अधुना औपम्यपर्यवसायिनं निदर्शनालङ्कारमाह—**निदर्शनेत्यादिना** । यत्र अनुपपद्य-मानः पदार्थरूपयोर् वाक्यार्थरूपयोर् वा वस्तुनोरन्वयः तयोर् वस्तुनोः परस्परमौपम्यं कल्पयित्वा उपपन्नो भवति सा निदर्शना अलङ्कार इत्यर्थः । एवं च यत्र परस्परं निर-पेक्षयोर् वाक्ययोर् विम्बप्रतिविम्बभावस्तत्र दृष्टान्तालङ्कारः यत्र तु प्रकृतवाक्यार्थे वाक्या-र्थान्तरं प्रकृतपदार्थे पदार्थान्तरं चारोप्यते सामानाधिकरण्येन तत्र सम्बन्धानुपपत्तिमूला निदर्शनैवेति वदन्ति ।।९६।।

प्रथमं वाक्यार्थनिदर्शनामुदाहरति—**क्व सूर्यप्रभव** इत्यादिना । रघुवंशे पद्यमिदम् (१।२) सूर्यमूलो रघुवंशः क्व, अल्पज्ञाना मम बुद्धिः क्व, (तथापि यदहं सूर्यवंशं वर्ण-यितुमिच्छुरस्मि तद्) दुस्तरं सागरम् अज्ञानात् प्लवेन तर्तुमिच्छुरस्मीत्यर्थः । अत्र निद-र्शनां स्फुटीकरोति—**अत्रोडुपेनेत्यादिना** ।।उदा० ५२३।।

पदार्थनिदर्शनामुदाहरति—**उदयति विततेत्यादिना** । शिशुपालवधे (४।२०) रैवतकवर्ण-नमिदम् । पूर्णिमायां सूर्यचन्द्रयोरुदयास्तयोः, वितता ऊर्ध्वं प्रसृताः किरणा एव रज्जवो यस्य तादृशे सूर्ये उदयति सति, विततोर्ध्वरश्मिरज्जौ चन्द्रे अस्तं गच्छति च सति अयं रैवतको गिरिः विशेषेण लम्बमानेन घण्टाद्वयेन परिवारितस्य वारणेन्द्रस्य शोभां वहतीत्यर्थः । अत्र गिरिवहनीयायाः शोभायाः वारणेन्द्रशोभायाश्च अनुपपद्यमानः तादात्म्यसम्बन्धस्तयोः उपमां कल्पयतीति निदर्शना बोध्येत्यभिप्रायेणाऽऽह—**अत्र कथमन्यस्येत्यादि** । अत्र अन्य-लीलाया अन्यत्रारोपस् तल्लीलासदृशीं लीला वहतीत्युपमां गमयतीति बोध्यम् ।।उदा०५२४।।

अत्र कथमन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानम् ।

'दोर्भ्यां तितीर्षति तरङ्गवतीभुजङ्गमादातुमिच्छति करे हरिणाङ्कबिम्बम् ।
मेरुं लिलङ्घयिषति ध्रुवमेष देव यस्ते गुणान् गदितुमुद्यममादधाति' ॥
(उदा०५२५) इत्यादौ मालारूपाऽप्येषा द्रष्टव्या ।

(सू० १२१) स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च साऽपरा ।

क्रिययैव स्वस्वरूपस्वकारणयोः सम्बन्धो यदवगम्यते साऽपरा निदर्शना ।

यथा—

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्-कणश्चारुमारुतधुतः पतत्यधः ॥उदा० ५२६॥

अत्र पातक्रियया पतनस्य लाघवे सति उन्नतपदप्राप्तिरूपस्य च सम्बन्धः ख्याप्यते ।

(सू० १२२) अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ॥९७॥

मालारूपाऽपि निदर्शना भवतीत्याह—**दोर्भ्यां तितीर्षतीत्यादिना** । हे राजन्, यस्तव शौर्य-दया-दाक्षिण्यादीन् गुणान् गदितुमुद्यमं करोति स एष ध्रुवं भुजाभ्यां समुद्रं तितीर्षति, हस्ते चन्द्रमण्डलम् आदातुमिच्छति, सुमेरुपर्वतं च लङ्घयितुं वाञ्छति इत्यर्थः । अत्र 'यः तव गुणगणान् गदितुम् उद्यममादधाति' इति एको वाक्यार्थः 'एष तरङ्गवतीभुजङ्गं दोर्भ्यां तितीर्षति' इत्यादयोऽन्ये वाक्यार्थाः, तेषां च सम्बन्धोऽनुपपन्नः त्वद्गुणगणानां निश्शेषेण वर्णनं भुजाभ्यां सागरतरणं च तुल्यम्, एवमेव करे चन्द्रमण्डलग्रहणादिकमपीति औपम्यं कल्पयति इति वाक्यार्थनिदर्शनेयम् । दोर्भ्यां सागरतरणमिव, करे चन्द्रमण्डलादानमिव, मेरुलङ्घनमिव च त्वद्गुणगणवर्णनोद्यमकरणमिति अनेकौपम्यकल्पनादत्र मालारूपकनिदर्शना बोध्या ॥ उदा० ५२५ ॥

निदर्शनायाः प्रकारान्तरं भामहादिप्रतिपादितं (२।२५) निरूपयति—**स्वस्वहेत्वन्वयस्ये**-त्यादिना । क्रिययैव **स्वस्य** क्रियारूपस्य कार्यस्य **स्वहेतोः** क्रियाहेतोश्च **अन्वयस्य** कार्य-कारणभावरूपस्य सम्बन्धस्य प्रतिपादनम् अन्या **सा** निदर्शनेति सूत्रवृत्त्योः पिण्डीकृतोऽर्थः ।

क्रियामूलां निदर्शनामुदाहरति—**उन्नतं पदमित्यादिना** । उन्नतं पदं प्राप्यापि यो लघुः स अल्पेनैव हेतुना पतेदिति स्वदृष्टान्तेन प्रतिपादयन् शैलशिखरं प्राप्तो दृषत्-कणो मन्देन अनुकूलस्पर्शेन मारुतेन धुतः सन् अधः पततीत्यर्थः । अत्र पततीति क्रियया पतेदिति प्रतिपाद्यस्य पतनक्रियारूपस्य कार्यस्य तद्धेतोः उन्नतपदप्राप्तस्याऽपि वस्तुनो लघुत्वस्य च कार्य-कारणभावरूपः सम्बन्धः प्रख्याप्यते इति, उन्नतपदप्राप्तस्यापि लाघवं पाते हेतुर् यथा दृषत्कणस्येति दृष्टान्तेऽत्र पर्यवसानं भवतीति चाऽत्र निदर्शना बोध्या ॥उदा०५२६॥

अप्रस्तुतप्रशंसा विशेषस्य सादृश्यमूलकत्वात् सादृश्यमूलकालङ्कारप्रसङ्गेऽप्रस्तुत-प्रशंसामाह—**अप्रस्तुतप्रशंसे**त्यादिना । अप्रस्तुतस्य वर्णनया (स्वस्यामेवाऽविश्रान्तया) प्रस्तुतस्य आक्षेपः (प्रतिपादनम्) अप्रस्तुतप्रशंसेति सूत्रार्थः । स्वस्याम् अविश्रान्तत्वेन

अप्राकरणिकस्याऽभिधानेन प्राकरणिकस्याऽऽक्षेपोऽप्रस्तुतप्रशंसा । सा च—

(सू० १५३) कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस् तुल्ये तुल्यस्येति च पञ्चधा ॥९८॥

तदन्यस्य कारणादेः ।

क्रमेणोदाहरणम्—

(१) याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्-कृते
नो कार्या नितरां कृशाऽसि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्-पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहम् तया सूचितः ॥उदा० ५२७॥

[illegible] विश्रान्तत्वात् **प्रस्तुताश्रया** या अप्रस्तुतस्य **प्रशंसा** प्रकृष्टाभिप्राययुता वर्णना सा **सैव** अप्रस्तुतप्रशंसैव उच्यते इति सूत्रपदयोजना ॥ ९७ ॥

अप्रस्तुतप्रशंसायां प्रस्तुताऽप्रस्तुतयोः सम्बन्धं सूचयन् अप्रस्तुतप्रशंसाभेदान् प्रदर्शयति—**कार्ये निमित्त** इत्यादिना । कार्ये प्रस्तुते तदन्यस्य कारणस्य, कारणे प्रस्तुते तदन्यस्य कार्यस्य, सामान्ये प्रस्तुते तदन्यस्य विशेषस्य, विशेषे प्रस्तुते तदन्यस्य सामान्यस्य, तुल्ये कस्मिंश्चित् प्रस्तुते तदन्यस्य तुल्यस्य वचनमिति पञ्चधा अप्रस्तुतप्रशंसा भवतीत्यर्थः । एवं च अप्रस्तुतेन प्रस्तुतस्य आक्षेपे करणीये [illegible] सामान्य-विशेषभावः, सादृश्यञ्च सम्बन्धो भवतीति चोक्तं भवति ॥ ९८ ॥

(१) तत्र कार्ये प्रस्तुते सति कारणस्य वर्णनेन निष्पन्नाम् अप्रस्तुतप्रशंसामुदाहरति—**याताः किं न मिलन्तीत्यादिना** । अमरुशतके पद्यमिदम् । प्रस्थानाद् निवृत्तोऽसि किमु इति मित्रेण पृष्ट कश्चित् प्रतिवक्ति—देशान्तरं गता आगत्य पुनर् न मिलन्ति किम् ? मिलन्त्येव, अतस्त्वया प्रस्थितस्य मम कृते चिन्ता न कार्या; चिन्तया त्वं नितरा कृशाऽसि इत्येवं साश्रुनयने मयि कथयति सति तया लज्जास्तब्धतारकेण निपतद् एव पीतम् अश्रु येन तादृशेन चक्षुषा मां विलोक्य (वियोगेऽपि यदि प्रिया जीवति तर्हि याता अपि पुनर् मिलन्ति, अहन् तु वियोगे कथमपि न जीविष्यामीति ज्ञात्वाऽपि एवं प्रतारयतीति भावाद् जातेन) हास्येन भाविमरणोत्साह सूचित इत्यर्थः । अत्र प्रस्थानाद् निवृत्तोऽसि किमु इति पृष्टे प्रस्थाननिवृत्तिरूपे कार्ये प्रस्तुते प्रस्थाननिवृत्तेः कारणस्य प्रियायाः भाविमरणोत्साहरूपस्य अभिधानमिति, तस्य च प्रस्थाननिवृत्तिरूपे कार्ये एव तदुपपादकतया विश्रान्तिरिति अप्रस्तुतप्रशंसा बोध्या । '**अत्र प्रस्थानान् निवृत्तोसि किमु इति कार्ये पृष्टे कारणमभिहितम्** इति वक्तव्ये वृत्तौ अन्यथापाठः ग्रन्थकृतो लिपिकरस्य वा प्रमादाज् जातो बोध्यः, यथाश्रुतपाठे तु कारणविषयक एव प्रश्न इति कारणमप्रस्तुतं न स्यात् । **वस्तुतस्तु** नाऽस्मिन् अप्रस्तुतप्रशंसा विशेषे चमत्कार इति नास्यालङ्कारत्वं **युक्तं पश्यामः** ॥ उदा० ५२७ ॥

अत्र प्रस्थानात् किमिति निवृत्तोऽसीति कार्ये पृष्टे कारणमभिहितम् ।

(२) राजन् राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिता
कुब्जे भोजय मां कुमार सचिवैर्नाद्यापि किं भुज्यते ।
इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जराच्
चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ॥उदा० ५२८॥

अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गता इति कारणे प्रस्तुते कार्यमुक्तम् ।

(३) एतत् तस्य मुखात् कियत् कमलिनीपत्रे कणं वारिणो
यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि ।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तः शुचा ॥उदा० ५२९॥

---

(२) कारणे प्रस्तुते सति कार्यस्य वर्णनेन निष्पन्नाम् अप्रस्तुतप्रशंसामुदाहरति—**राजन् राजसुते**त्यादिना । कंचिद् राजानं प्रति कस्यचिच् चाटूक्तिरियम् । हे राजन्, त्वदागमनभिया त्वदरीणां पलायनात् शून्ये तव शत्रोर् भवने पान्थैः पञ्जराद् मुक्तो राजशुकः शून्यायां वलभौ (शुद्धान्ते) चित्रे अर्पितान् राजादीन् अवलोक्य 'हे राजन्, राजसुता मां न पाठयति, देव्योऽपि तूष्णीः स्थिताः' 'हे कुब्जे, मां भोजय, किम् एतर्ह्यपि कुमारैस्तद्वयस्यैश्च न भोजनं क्रियते ?' इत्येवंप्रकारेण राजादिकम् एकैकं भणतीत्यर्थः । 'शुद्धान्ते वलभी चन्द्रशाले सौधोर्ध्ववेश्मनि' इति रभसपालः । अत्र पथिकमुक्तशुक-भाषणरूपकार्यस्य कारणे शत्रुनृपपलायनरूपे प्रस्तुते सति शत्रुनृपपलायनजं शुकमोचन-शुकाभाषणादिकं कार्यं वर्णितं सत् कारणं स्वत एव आक्षिप्य तत्र विश्राम्यतीति अप्रस्तुतप्रशंसा बोध्या । अयमपि अप्रस्तुतप्रशंसाविशेषो नातिहृद्यः ॥ उदा० ५२८ ॥

(३) सामान्ये प्रस्तुते सति विशेषस्य वर्णनेन निष्पन्नामप्रस्तुतप्रशंसामुदाहरति—**एतत् तस्ये**त्यादिना । कस्यचिज् जडस्य कांचिद् वार्तां कुतश्चिच्छ्रुत्वा विस्मितं कञ्चित् प्रति तस्य जडस्याऽधिकतरां वार्तां जानतः कस्यचिदुक्तिरियं भल्लटशतके । स मूर्खः कमलिनीपत्रे स्थितं वारिणः कणं मुक्तामणिममंस्त इति यत् तस्य मूर्खस्य विषये कथयतः पुरुषस्य मुखात् श्रुतं त्वया, एतत् कियत् ? (किमधिकम् ? इदं तु अल्पमेव), अस्मादन्य-दपि यत् तस्य मूर्खस्य आचरितं तत् शृणु, स जडः तस्मिन् कमलिनीपत्रगते जलकणे मुक्तामणिबुद्ध्या तेन जडेन शनैरादीयमाने अङ्गुल्यग्रयोर्या लघ्वी स्पर्शरूपा क्रिया तया प्रविलयिनि (अङ्गुलिलग्ने) सति मम मुक्तामणिः कुत्र उड्डीय गत इति शोकेन रात्रौ कृतेऽपि बलान्नेत्रनिमीलने अन्तर् मनसा न निद्रातीत्यर्थः । अत्र अप्रस्तुतो जडममता-विशेषो वर्णितः प्रस्तुताम् अस्थाने जडैः क्रियमाणां ममत्वसम्भावनां प्रत्याययतीति अप्रस्तुत-प्रशंसा बोध्या । अयमपि अप्रस्तुतप्रशंसाप्रकारो नैव हृद्यः ॥ उदा० ५२९ ॥

अत्र अस्थाने जडानां ममत्वसम्भावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः ।

(४) सुहृद्वधूबाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन यः ।
स एव पूज्यः स पुमान् स नीतिमान् सुजीवितं तस्य स भाजनं श्रियः ॥
॥उदा० ५३०॥

अत्र कृष्णं निहत्य नरकासुरवधूनां यदि दुःखं शमयिष्यति तत् त्वमेव श्लाघ्य इति विशेषे प्रस्तुते सामान्यमुक्तम् ।

(५) तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः, श्लेषच्छाया, समासोक्तिः साहश्यमात्रं वा तुल्यात् तुल्यान्तरस्याक्षेपे हेतुः ।

क्रमेणोदाहरणम्—

(५–क) पुंस्त्वादपि प्रविचलेद् यदि यद्यधोऽपि
यायाद् यदि प्रणयने न महानपि स्यात् ।

---

(४) विशेषे प्रस्तुते सति सामान्यस्य वर्णनेन निष्पन्नाम् अप्रस्तुतप्रशंसामुदाहरति—**सुहृद्वधूबाष्पे**त्यादिना । अनिर्ज्ञाताकरं पद्यमिदं श्रीकृष्णेन नरकासुरे हते सति तन्मित्रं शाल्वं प्रति मन्त्रिण उक्तिरिति टीकाकाराः । यः कृतापकारस्य वैरिणः प्रत्यपकारेण मित्रवधूनाम् अश्रूणां प्रोञ्छनं करोति स एव पूज्यः, स एव पुरुषेषु गणेय स एव च समीचीननीतियुक्तः, तस्यैव जीवितं सुजीवितम्, स एव च श्रियः पात्रमित्यर्थः अत्र वर्ण्यमानम् अप्रस्तुतकल्पं सामान्यं 'कृष्णं निहत्य नरकासुरवधूनां यदि दुःखं शमयिष्यसि तदा त्वं श्लाघ्यः' इत्यर्थं विशेषरूपमाक्षिप्यैव विश्राम्यतीति अप्रस्तुतप्रशंसाप्रकारो नातिहृद्यः ॥ उदा० ५३० ॥

(५) इदानीं विचित्रतमस्य पञ्चमस्य अप्रस्तुतप्रशंसाप्रकारस्य निरूपणं करोति—**तुल्ये प्रस्तुते** इत्यादिना । **श्लेषच्छाया** श्लेषस्य अप्रस्तुतप्रशंसापृष्ठभूमित्वेन वर्तमानस्य **छाया** शोभा विच्छित्तिर्वा, समासोक्तिरूपं विशेष्येऽश्लिष्टेऽपि विशेषणानां श्लिष्टत्वम्, प्रतीयमानेनाऽपि केनचिद् धर्मेण [illegible] सादृश्यमिति च त्रयः प्रत्येकं तुल्यात् तुल्यान्तरस्य आक्षेपे हेतवो भवन्तीत्यर्थः ।

(५क) तत्र [illegible]—**पुंस्त्वादपी**त्यादिना । भल्लटशतके (७९) पद्यमिदम् । शत्रुणाऽपहृतं राज्यं प्रत्यावर्तयितुं कञ्चिन्नृपं प्रोत्साहयतो मंत्रिण उक्तिरियम् । यदि पुरुषत्वादपि च्युतो भवेत्, यदि **अधः** पाताललोकमपि प्राप्नुयात्, यदि याच्ञाप्रणयने लघुरपि स्यात् तथापि विश्वमुद्धरेदेवेति ईदृशी इयं **विक्** नीतिपद्धतिः केनाऽपि पुरुषोत्तमेन (मोहिनीरूपाङ्गीकारेण, कूर्ममूर्ति धृत्वा पातालं प्रति गमनेन, वामनरूपस्वीकारेण च) प्रख्यापितेत्यर्थः । अत्र अप्रस्तुतस्य पुरुषोत्तमस्य वर्णनं विशेषण-विशेष्यश्लेषच्छायामुपजीव्य प्रस्तुतस्य नीतिवित्पुरुषोत्तमस्य तत्सदृशं नीतिमूलकं

अभ्युद्धरेत् तदपि विश्वमिनीदृशीयं
केनाऽपि दिक् प्रकटिता पुरुषोत्तमेन ॥ उदा० ५३१ ॥

(५–ख) येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः ।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मना-
गस्त्वेवं जडधामता नु भवतो यद् व्योम्नि विस्फूर्जसे ॥ उदा० ५३२॥

(५–ग) आदाय वारि परितः सरितां मुखेभ्यः
किं नाम साधितमनेन दुर्णवेन ।

चरित्रमाक्षिपति, भवताऽपि तादृश्यैव पद्धत्या स्वपराक्रमबुद्धिमान्भविति भावं च व्यनक्तीति अप्रस्तुतप्रशंसा बोध्या । न चाऽत्र शब्दश्लेषः प्रकरणेन अभिधाया नियन्त्रणात् । न च ध्वनिः प्रस्तुतादर्थाद् अप्रस्तुतस्य प्रतीतावेव ध्वनित्वस्य स्वीकारात् ॥उदा०५३१॥

(५–ख) समासोक्तिहेतुकामप्रस्तुतप्रशंसामुदाहरति—येनाऽस्यभ्युदितेनेत्यादिना । क्षीणवित्तः कश्चिद् कृतापकारं सधनं कञ्चन उपजीवनार्थं शरणीकुर्वन् अथ च लज्जामननुभवन् केन चिदुच्यते पारोक्ष्येण । हे चन्द्र उदयं प्राप्तेन येन रविणा त्वं तेजोहीनता प्रापितः असि, तस्मिन् रवौ ते प्रत्यपकरणमेव उचितं भवति, पुनस्तस्यैव रवेः किरणानां ग्रहणं नैव उचितं भवति; यदि क्षीणकलेन त्वया एतत् रविकिरणग्रहणं कृतं चेत् ततोऽपि किम् किञ्चिदपि न लज्जसे ? यदि ततोऽपि नैव लज्जसे तर्हि एवमपि अस्तु, किन्तु आकाशे यद् सगर्वमुदेषि सा तु भवति जडतैव (शीतप्रभतैव) इत्यर्थः । अत्र अप्रस्तुतस्य चन्द्रस्य उपालम्भः 'येन रविनामकेन समृद्धेन पुरुषेण त्वं ग्लानिं प्रापितोऽसि तस्य त्वया प्रतिकर्तुं योग्यम्, न तु तस्य पादोपसङ्ग्रहणम्; यदि क्षीणधनेन [illegible] कृतमिति मन्यसे चेत् ततोऽपि त्वया लज्जा धार्या, यदि लज्जामपि न धारयसि चेत् तथा अस्त्वपि, गर्वेण शिरस उन्नमनं तु त्वया नैव कार्यम् तद् यत् कुरुषे सा तु तव मूढतैव' इति प्रस्तुतमर्थं विशेष्यवाचकस्य चन्द्रपदस्य अश्लिष्टत्वेऽपि विशेषणानां श्लिष्टत्वेन आक्षिपतीति अप्रस्तुतप्रशंसा समासोक्तिमारूढा बोध्या । समासोक्तौ प्रकृतेन अप्रकृतस्याऽभिधानम् अत्र तु तद्वैपरीत्यं बोध्यम् ॥ उदा० ५३२ ॥

सादृश्यमात्रमूलाम् अप्रस्तुतप्रशंसामुदाहरति—आदाय वारीत्यादिना । औचित्यविचारचर्चायां क्षेमेन्द्रेण धृतं भट्टेन्दुराजस्य पद्यमिदम् । कस्यचित् किराज्ञो दुर्व्यवहारेण प्रक्षुभितः कविराह—अनेन दुष्टेन लवणसमुद्रेण सर्वतो नदीना मुखेभ्यो वारि आदाय किंनाम साधितम् ? कुत्सितमेव कार्यं कृतमित्यर्थः । तथाहि—नदीमुखेभ्य आत्तं स्वादु अपि वारि तेन लवणीकृतम्, वडवाग्नेर्मुखे हुतम्, पातालकुक्षिकुहरे च विनिवेशितमित्यर्थः । अत्र अप्रस्तुतो लवणसमुद्रवडवानलपातालकुहरो वर्ण्यमानः सादृश्यात् प्रस्तुतम् 'अनेन प्रजाविनयाधान-रक्षणभरणादिकं पात्रदान-यज्ञाहरणादिकं चाऽकुर्वता किराज्ञा श्रमशीलेभ्यः

क्षारीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरे विनिवेशितं च ॥ उदा० ५३३ ॥

इयं च काचिद् वाक्येन प्रतीयमानार्थानध्यारोपेणैव, यथा—

(५-ग-१) अब्धेरम्भःस्थगितभुवनाभोगपातालकुक्षेः
पोतोपायादिह हि बहवो लङ्घनेऽपि क्षमन्ते ।
आहो रिक्त· कथमपि भवेदेष दैवात् तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ॥ उदा० ५३४ ॥

क्वचित् तु अध्यारोपेणैव, यथा—

(५-ग-२) कस् त्वम् भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं श्रूयताम् ।

कृषकेभ्यः उद्योगिभ्यो वणिग्भ्य. अन्येभ्यश्च न्याय्यचरित्रेभ्यो जनेभ्य आत्तः करस् [illegible]-धूर्त-[illegible] [illegible] व्ययीकृतम् दुर्द्धरेषु दुष्प्रयोज्येषु दुर्गमेषु कोषादिषु च लोकहितप्रयोगशून्यतया निक्षिप्तमिति सर्वथा धनं मोघं कृतम्' इति किंराजव्यवहारमाक्षिपतीति अप्रस्तुतप्रशंसा बोध्या ॥ उदा० ५३३ ॥

सादृश्यमूला अप्रस्तुतप्रशंसाऽपि पुन· त्रिविधा भवतीति [illegible]—**इयं च काचिदि**त्यादि । यत्र वाक्येन सम्भवत्स्वार्थकतया प्रतीयमानार्थारोपं विनैव विश्रान्तेन प्रतीयमानोऽर्थ आक्षिप्यते सा **प्रथमा विधा**; यत्र असम्भवत्स्वार्थकतया प्रतीयमानार्थारोपं विना अविश्रान्तेन वाक्येनैव अप्रस्तुते प्रस्तुतः प्रतीयमानोऽर्थ आरोप्यते सा **द्वितीया विधा**; यत्र कस्मिंश्चिदंशे वाक्येनैव प्रतीयमानार्थाध्यारोपेण कस्मिंश्चिदंशे तु अध्यारोपं विनैव प्रस्तुतोऽर्थ आक्षिप्यते सा **तृतीया विधा** बोध्या ।

(५-ग-१) तत्राद्यां विधामुदाहरति— **अब्धेरम्भःस्थगिते**त्यादिना । दुष्प्रभुसमृद्धिं परिहसन् [illegible]—इहलोके बहवो जनाः पोतरूपाद् उपायाज् जलेन आच्छादितौ भुवनविस्तार-पातालकुक्षी येन तस्य समुद्रस्य तरणे अपि समर्था भवन्ति, **आहो** यदि दैवात् कथञ्चिदयं समुद्रो रिक्तः स्यात् तदानीमस्य समुद्रस्य विशङ्कटस्य अवटकुहरस्य अवलोकनेऽपि को नाम समर्थः स्याद् इत्यर्थः । अत्र अध्यारोपं विनाऽपि विश्रान्तोऽप्रस्तुत सोऽयमर्थः 'उपमर्दनशीलस्य दुष्प्रभोर् वरं पूर्णतैव भवतु, न रिक्तता, रिक्ततापरिहाराय अधिकतरं लोकपीडनस्य प्रसङ्गाद्' इति [illegible] । सादृश्यमूला अनध्यारोपाऽत्र बोध्या ॥ उदा० ५३४ ॥

(५-ग-२) द्वितीयां विधामुदाहरति—**कस्त्वं भोः कथयामी**त्यादिना । अधमैः कर्मभिः राज्यं समृद्धिं च प्राप्य अधमकर्मपरिमार्जनाय यज्ञदानादिकं चिकीर्षुः सत्पात्रैः प्रत्याख्यातः कश्चिद् राजन्यबन्धुः प्रश्नोत्तररूपया अन्योक्त्या स्वं निर्वेदं प्रकाशयति । पथिको वृक्षं पृच्छति—भोः त्वं कः ? इति, वृक्षः उत्तरयति—कथयामि शृणु, मां दैवेन हतं शाखोटकाख्यं वृक्षं विद्धि इति; पुनः पथिक आह—वैराग्यादिव वदसि किं कारणम् ? इति,

वामेनाऽत्र वटस् तमध्वगजनम् सर्वात्मना सेवते
न च्छायाऽपि परोपकारकरणी मार्गस्थितस्याऽपि मे ॥उदा० ५३५ ॥
[क्वचित् तु अंशेनैवाध्यारोपाद्, यथा—]
(५-ग-३) सोऽपूर्वो रसनाविपर्ययविधिम् तत् कर्णयोश् चापलं
दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा ।
सम्यङ् निश्चितवानसि भ्रमर हे, यद् वारणोऽद्याप्यसा-
वन्तः शून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः ॥ उदा० ५३६ ॥

वृक्ष आह—साधु त्वया विदितम् इति; पथिक आह—कस्मादिदं तव वैराग्यम् ? इति, वृक्ष आह—ब्रवीमि, श्रूयताम्, अत्र प्रदेशे मार्गस्य वामेन भागेन वर्तमानो वटोऽस्ति तं सर्वः पथिकजनः सर्वात्मना सेवते, मम तु मार्गे एव स्थितस्यापि छायाऽपि पथिकैः परिह्रियते इति साऽपि परोपकारकरणी नास्तीत्यर्थः । अप्रस्तुतः सोऽयमर्थः 'कृत्स्नमपि राज्यमिति मया दीयमानं धनमपि विद्यातपोयोनिप्रभावाभिज्ज्वलिताः ब्राह्मणा न स्वीकुर्वन्ति अतो मम राज्यं धनं च व्यर्थं जातम्' इति प्रस्तुतं परिदेवनारूपमर्थमाक्षिपतीति अप्रस्तुतप्रशंसाऽत्र बोध्या । न ह्यचेतनेन वृक्षविशेषेण सह पथिकस्य उक्तिप्रत्युक्ती सम्भवत इति प्रस्तुतार्थाध्यारोपेणैव वाक्यं विश्रमं लभते इति अत्र सादृश्यमूलाया अप्रस्तुतप्रशंसाया द्वितीया विधा बोध्या ॥ उदा० ५३५ ॥

(५-ग-३) तृतीया विधामुदाहरन्ति—**सोऽपूर्व** इत्यादिना । भल्लटशतके (१८) पद्यमिदम् । दुराराधं धनिनं धनाशया सेवमानं प्रति कश्चिदन्योक्त्या आह—हे भ्रमर, यस्य वारणस्य स अपूर्वो गजानाम् अग्निदानात् (महाभा० १३।८५।३५-३६) जिह्वाग्रस्य कण्ठाभिमुखं स्थिततया जिह्वाविपर्ययस्य विधिः, कर्णयोस् तत् चापलम्, मदविस्मृतनिज-परमार्गा सा च दृष्टिः, अथवा भूयसा उक्तेन किम्, एतत् सर्वं त्वं सम्यङ् निश्चितवान् असि वारणस्य सततसेवया, तथापि अद्याऽपि सुषिरतया अन्तःशून्यः शुण्डादण्डो यस्य स वारणो यत् त्वया निषेव्यते अयं हे भ्रातः भ्रमर, कस्तव आग्रह इत्यर्थः । सोऽयमप्रस्तुतोऽर्थः 'अस्य धनिनोऽपूर्वम् अव्यवस्थितं वचनम्, दैत्युपदिष्टकर्णत्वम्, मदेन निज-परविवेकात् प्रच्युता दृष्टिः, एतत् सर्वं तस्यैतस्य सततसेवया त्वं सम्यङ् निश्चितवानसि, तथापि अद्यापि अदातृतया शून्यकरः सन्निहितेभ्यो देयं स्यादिति सन्निहितान् वारयिता अपि असौ त्वया निषेव्यते, अयं कस्तव दुराग्रहः' इति प्रस्तुतमर्थमाक्षिपतीत्यप्रस्तुतप्रशंसा-बोध्या । अत्र अंशेष्वेवाऽध्यारोप आवश्यक इति विभागं प्रदर्शयति—**अत्र रसने**त्यादिना । रसनाविपर्यासः शून्यकरत्वं च भ्रमरस्य गजासेवने न हेतुरिति तत्र प्रतीयमानाध्यारोप आवश्यकः, कर्णचापलं च भ्रमरस्य गजासेवने हेतुरेवेति तत्र प्रतीयमानाध्यारोपो नाऽवश्यकः, मदस्तु भ्रमरस्य गजस्य सेवने एव निमित्तमिति तत्र प्रतीयमानाध्यारोप अत्यावश्यक एवेति अत्रोदाहरणे अप्रस्तुते प्रस्तुतस्य अंशेनैवाध्यारोपाद् वाक्यार्थविश्रान्तिरिति सादृश्यमूलायाः अप्रस्तुतप्रशंसाया इयं तृतीया विधा बोध्या ॥ उदा० ५३६ ॥

(२) यच् च तदेवान्यत्वेनाध्यवसीयते साऽपरा, यथा—

अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ।
सामा सामण्ण-पआवइणो रेहच्चिअ ण होई ॥ उदा० ५३८ ॥

(३) यद्यर्थस्य यदिशब्देन चेच्छब्देन वोक्तौ यत् कल्पनम्, अर्थाद् असम्भविनोऽर्थस्य, सा तृतीया; यथा—

राकायामकलङ्कं चेदमृतांशोर् भवेद् वपुः।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥ उदा० ५३९ ॥

(४) कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी, यथा—

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापेन बाणेन।
चरमं रमणीवल्लभ, लोचनविषयं त्वया भजता ॥ उदा० ५४० ॥

(सू० १५५) ....**प्रतिवस्तूपमा तु सा ॥ १०० ॥**

सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः।

---

(२) द्वितीयाम् अतिशयोक्तिमुदाहरन्ति—**अण्णं लडहत्तणअं** इत्यादिना "**अन्यल्लटभत्वमन्येव काऽपि वर्तमानच्छाया। श्यामा सामान्यप्रजापते रेखैव न भवति**' इति संस्कृतच्छाया। वज्जालग्गाख्ये ग्रन्थे गाथासप्तशत्यां च (९६९) पद्यमिदम्। नायकं प्रति नायिकासखी दूती आह—मम सख्या मनोज्ञत्वमन्यदेव, तस्याः काऽपि अनिर्वचनीया प्रवृत्तिशोभाऽपि अन्यैव, सेयं श्यामा मम सखी सामान्यस्य प्रजापतेः आलेख्यरेखा(रचना) एव न भवतीत्यर्थः। अत्रलटभत्वादीनाम् अन्यत्राऽपि उपलभ्यमानानामेव सातिशयत्वेन भेदः प्रतिपादित इति द्वितीयाऽतिशयोक्तिर् बोध्या ॥ उदा० ५३८ ॥

तृतीयामतिशयोक्तिमुदाहरति—**राकायामकलङ्क**मित्यादिना। पौर्णमास्यां रात्रौ चन्द्रस्य मण्डलं यदि कलङ्करहितं स्यात् तदा तस्याः सुन्दर्या मुखं साम्यजन्यं पराभवं प्राप्नुयादित्यर्थः। अत्र लक्षणसमन्वयः स्फुटः। एवमेव 'यदि स्यात् मण्डले सक्तमिन्दोरिन्दीवरद्वयम्। तदोपमीयेतैतस्या वदनं लोललोचनम्' इत्यादावपि बोध्यम् ॥ उदा० ५३९ ॥

चतुर्थीमतिशयोक्तिमुदाहरति—**हृदयमधिष्ठित**मित्यादिना। दामोदरगुप्तकृते कुट्टिनीमते (९६) पद्यमिदम्। कुट्टिनी नायकं प्रतिवदति—हे रमणशीलानां वनितानां वल्लभ, मालत्या हृदयं प्रथमं मदनेन अधिष्ठितम्, तस्या दर्शनगोचरं गतवता त्वया पश्चात् तस्या हृदयमधिष्ठितमित्यर्थः। अत्र कारणस्य रमणीवल्लभाधिष्ठानस्य शीघ्रकारित्वं वक्तुं कार्यस्य मदनोद्गमस्य प्राथम्यं प्रतिपादितमिति कार्यकारणव्यत्यासरूपा चतुर्थी अतिशयोक्तिरियम्। अयं प्रकारः कार्यकारणयोः सहभावे—"सममेव समाक्रान्तं द्वयं द्विरदगामिना। तेन सिंहासनं पित्र्यं मण्डलं च महीभृताम्" इत्यादावपि बोध्यः ॥ उदा० ५४० (१२) ॥

प्रतीयमानौपम्यं प्रतिवस्तूपमालङ्कारं प्रतिपादयति—**प्रतिवस्तूपमा तु** सेत्यादिना।

साधारणो धर्मं उपमेयवाक्ये उपमानवाक्ये च कथितपदस्य दुष्टतयाऽभिहितत्वाच् शब्दभेदेन यद् उपादीयते सा वस्तुनो वाच्यार्थस्य उपमानत्वात् प्रतिवस्तूपमा; यथा—

देवीभावं गमिता परिवारपदं कथं भजत्येषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ॥ उदा० ५४१ ॥

'यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः । लवणमम्बु सदैव महोदधेः प्रकृतिरेष सतामविषादिता' (उदा० ५४२) इत्यादिर् मालाप्रतिवस्तूपमा द्रष्टव्या । एवमन्यत्राऽप्यनुसर्तव्यम् ।

साधारणधर्मस्य समानत्वेऽपि शब्दभेदेन प्रतिपादिताभ्यां साधारणधर्माभ्यां युक्तयोः इवादिपदप्रयोगाभावात् पृथग्वाक्यत्वेन स्थितयोः [illegible] वाक्यानां वा गम्यमानमौपम्यं प्रतिवस्तूपमेत्यर्थः । अथवा वृत्त्यनुरोधाद् 'वाक्यार्थयोर्वाक्यार्थाना वा उपमासम्पादकस्य एकस्यैव धर्मस्य भिन्नशब्दोपात्तत्वं प्रतिवस्तूपमेत्यर्थ ।' उपमानोपमेयव्यवस्था च प्रायः [illegible] । **प्रतिवस्तु** प्रतिवाक्यार्थम् **उपमा** साधारणधर्मो यस्या सा **प्रतिवस्तूपमेति** नामनिर्वचनम् । वाक्यार्थोपमायां इवादिशब्दप्रयोगाद् एकत्वं वाक्यस्य अत्र तु नेति ततोऽस्य भेदोऽवगन्तव्य ।

प्रतिवस्तूपमामुदाहरति—**देवीभाव**मित्यादिना । (का० अ० सू० वृ० ४।२।४) राजानं प्रति महिषीसख्या उक्तिरियम् । हे राजन्, कृताभिषेकराज्ञीत्वं प्रापिता इयं भोगिनीरूपतां कथं भजतु; न हि खलु दैवतप्रतिमारूपं रत्नं भूषणादिरूपेणोपभोगाय योग्यं भवतीत्यर्थः । अत्र दिव्यत्वं साधारणो धर्मः पूर्ववाक्ये देवीभावमितिपदेन उत्तरवाक्ये देवतरूपाङ्कितमिति पदेन उपात्त इति श्रीधरः । अन्ये तु परिवारपदेन परिभोगयोग्यपदेन च प्रतिपादितस्यैव [illegible] साधारणधर्मत्वं मन्यते । वस्तुतस्तु 'कथं भजतु' इत्यनेन 'न खलु योग्यम्' इत्यनेन च प्रतिपादितम् अनौचित्यमेव साधारणो धर्मः, तत्र वाक्यार्थगतसादृश्यरूपतायाः सत्त्वात् । एवञ्च देवतरूपाङ्कितस्य यथा परिभोगानर्हत्वं तथा देव्या भोगिनीरूपत्वमिति औपम्ये पर्यवसानं बोध्यम् ॥ उदा० ५४१ ॥

मालाप्रतिवस्तूपमा[illegible]पि [illegible]भवतीत्याह—**यदि दहत**ीत्यादिना । यदि अग्निर्दहति तद् (दहनम्) अग्नेः स्वभावेनैव सिद्धमिति तत्र किमद्भुतम्; यदि पर्वतेषु गौरवमस्ति तर्हि तदपि पर्वतानां स्वभावेनैव सिद्धमिति ततः किमाश्चर्यं स्यात्; समुद्रस्य जलमपि स्वभावादेव सदैव लवणं भवति तदपि नाऽनित्यमित्यनाश्चर्यकरम्, अविषादिताऽपि अन्येषु दुर्लभाऽपि सतां प्रकृतिरेवेति सत्सु तस्या उपलम्भेऽपि न विस्मयो भवतीत्यर्थः । अत्र स्वाभाविकवस्तुदर्शनस्य विस्मयाजनकत्वं साधारणो धर्मः, 'किमद्भुतम्' 'किं ततः' 'सदैव' 'प्रकृतिरेव' इतिशब्दैः प्रतिपाद्यते इति बहुषु वाक्येषु विभिन्नैः पदैः तस्यैव साधारणधर्मस्य प्रतिपादनाद् मालारूपा प्रतिवस्तूपमाऽत्र बोध्या । **एवमन्यत्रापी**त्यादिना 'चकोर्य

(सू० १५६) दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ॥ १०१ ॥
एतेषां साधारणधर्मादीनाम् । दृष्टोऽन्तो निश्चयो यत्रेति दृष्टान्तः ।
यथा—

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशोर् विकसति कुमुदं कुमुद्वत्याः ॥ उदा० ५४३ ॥

एष साधर्म्येण ।

एव निपुणाश्चन्द्रिकापानकर्मणि । विनाऽवन्नीर् न निपुणा मृदृगो रतनर्मणि' इत्यादौ वैधर्म्येऽपि प्रतिवस्तूपमा· 'हरवत् न विषमदृष्टिर्' इत्यादौ मालाव्यतिरेकादयोऽपि सूचिता इत्याहुः ॥ उदा० ५४२ ॥ (१३)

गम्यमानवाक्यौपम्यं दृष्टान्तालङ्कारं निरूपयति—**दृष्टान्तः पुनरित्यादिना** । एकस्मिन् वाक्ये उपात्तानां व्यक्तिद्वयगतानेकधर्मानुगमम् उपमानोपमेयसाधारणधर्मादिभावमापत्स्यमानपदार्थानाम् अन्यस्मिन् वाक्ये उपात्तैः तेनैव प्रकारेण उपमानोपमेयसाधारणधर्मादिभावमापत्स्यमानैः पदार्थैः प्रतिबिम्बनं वाक्यार्थद्वयगतकं दृष्टान्तोऽलङ्कार इत्यर्थः । प्रतिवस्तूपमायां साधारणधर्मस्यैक्यम्, अत्र तु भिन्नत्वम् इति ततोऽस्य भेदः, अर्थान्तरन्यासे वाक्यार्थयोः सामान्यविशेषभावस्याऽऽवश्यकाद् अत्र तदभावात् ततोऽप्यस्य भेदः, निदर्शनायाम् औपम्यकल्पनस्य असम्भवमूलकत्वाद् अत्र तु तस्य बिम्बप्रतिबिम्बभावमूलकत्वात् ततोऽप्यस्य भेदो बोध्यः । यत्र द्वितीयेन वाक्येन प्रथमस्य वाक्यस्य अर्थनिश्चये प्रामाण्यं स्फुटीक्रियते स दृष्टान्तोऽलङ्कार इति अन्वर्थनामा अयमलङ्कार इत्याह—दृष्टोऽन्त इत्यादिना ॥ १०१ ॥

अयं चाऽलङ्कारो बिम्बप्रतिबिम्बयोः साधर्म्यं वैधर्म्यं वोपादाय सम्भवतीति सूचयन् प्रथमं साधर्म्यमूलकं दृष्टान्तमुदाहरति—**त्वयि दृष्ट एवे**त्यादिना । हे नायक, त्वयि दृष्टमात्रे तस्या नायिकाया मनोभवेनाभिज्वलितं मनः शान्तं (प्रसन्नं) भवति; (अन्यत्राऽपि एतादृशोऽर्थो दृश्यते इति अयं निश्चित एवार्थः) तथाहि चन्द्रस्य आलोके जातमात्रे (चन्द्रे दृष्टमात्रे) कमलिन्याः कुसुमं विकसतीत्यर्थः । त्वयीति सप्तम्यन्तस्य निर्देशं कृत्वा हिमांशोरिति षष्ठ्यन्तस्य निर्देशाद् मनोभवज्वलितप्रतिबिम्बस्य रविकिरणज्वलितत्वस्य अनुक्त्या विसंस्थुलमिदं पद्यम् । अत्र नायक-चन्द्रयोः, नायिका-कुमुद्वत्योश्च सम्बन्धिपदार्थयोः, मनःकुसुमयोः उपमेयोपमानयोः, मनोभवज्वलित-सूर्यकिरणज्वलितत्वयोः सम्बन्धिपदार्थयोः, निर्वाण-विकासयोश्च अभावभावरूपयोः साधारणधर्मयोश्च बिम्बप्रतिबिम्बभाव इति अत्र दृष्टान्तोऽलङ्कारो बोध्यः । दृष्टान्तस्थले कुमुद्वत्याः कुसुमस्य हिमांशुदर्शने विकास इव, तस्या मनसः त्वद्दर्शने विकास इत्येवमादौ प्रतीयमानायाम् उपमायाः बिम्बप्रतिबिम्बभावमापन्नयोः पदार्थयोर्यथायथम् उपमेयोपमानादिकत्वं बोध्यम् ॥ उदा० ५४३ ॥

वैधर्म्येण तु—

तवाऽऽहवे साह[illegible] करं [illegible] ।
भटाः परेषां विशरारुतामगुर् दधत्यवाते स्थिरतां हि पांसवः ॥उदा० ५४४॥

(सू० १५७) सकृद् वृत्तिस् तु धर्मस्य प्रकृता प्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥ १०२ ॥

[illegible] अर्थाद् [illegible] धर्मः क्रियादिरेकवारमेव यदुपादीयते तदेकस्थस्यैव समस्तवाक्यदीपनाद् दीपकम्, यथा—

किवणाणं धणं णाआणं फणमणी केसराइ सीहाणं ।
कुलबालिआणं थणआ केत्तो घेप्पन्ति अमुआणं ॥ उदा० ५४५ ॥

कारकस्य च बह्वीषु क्रियासु सकृद् वृत्तिर् दीपकम्; यथा—

स्विद्यति कूणति वेल्लति वि[illegible] विलोकयति तिर्यक् ।
अन्तर् नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ॥उदा०५४६॥

वैधर्म्यमूलकं [illegible]रति—**तवाऽऽहवे** इत्यादिना । हे राजन् युद्धे साहसस्य कर्म एव वर्म यस्य तादृशस्य, पाणिं खड्गसमीपम् आनेतुमिच्छतः तव शत्रूणां भटा विशीर्णताम् ([illegible]) प्रापुः (अन्यत्राऽपीदृशोऽर्थो दृश्यते इति अयं निश्चत एवाऽर्थः) तथाहि धूलयो वातेऽप्रवृत्ते सति हि स्थिरतां दधति, (वाते प्रवृत्ते तु धूलयो दिक्षु विशीर्यन्त एव) इत्यर्थः । अत्र वैधर्म्यविपर्यये भट-पास्वोः [illegible] बिम्बप्रतिविम्बभाव इति दृष्टान्तत्वं बोध्यम् ॥ उदा० ५४४ ॥ (१४)

दीपकविशेषस्य [illegible] औपम्यमूलकालङ्कारप्रस्तावे एव दीपकं [illegible]—**सकृदि**[illegible] । बहूनाम् उपमानोपमेयानां क्रियारूपस्य गुणरूपस्य वाऽपि धर्मस्य वाक्ये सकृदेव उपस्थितिर् दीपकमिति प्रथमस्य दीपकप्रकारस्य लक्षणम्; तदेवाऽऽह—**प्राकरणिके**त्यादिना । प्रथमं [illegible]—**किवणाणे**त्यादिना । **'कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम् । कुलबालिकानां स्तनाः कुतो गृह्यन्ते अमृतानाम्'** इति संस्कृतच्छाया ।छिप्पन्ति इति पाठे छुप्यन्ते इति संस्कृतम् । अत्र प्रकृतानाम् उपमेयभूतानां कुलवधूस्तनानाम् अप्रकृतानाम् उपमानभूतानां कृपणधनादीनां च दुर्ग्रहस्वरूपस्य दुःस्पर्शत्वरूपस्य वा धर्मस्य वाक्ये 'कुतो गृह्यन्ते' इति 'कुतश्छुप्यन्ते' इति वा एकवारमेवोपस्थितिरिति दीपकत्वमत्र बोध्यम् ॥ उदा० ५४५ ॥

बह्वीनां क्रियाणां कारकत्वेन एकस्यैव [illegible] दीपकमिति द्वितीयस्य दीपकप्रकारस्य लक्षणम्, तदेवाऽऽह—**कारकस्य चे**त्यादिना । द्वितीयं दीपकप्रकारमुदाहरति—**स्विद्यति कूणती**त्यादिना । नवोढा वधूः (भर्तुः पल्यङ्के) स्वेदं प्राप्नोति,(दयितेपरिरम्भोद्यते) सङ्कुचिता भवति, (ततोऽपि प्रियेऽनिवर्तिनि सति) विपरिवर्तते, (ततो) विवलिता भवति, (ततो लज्जया) निमीलति, ([illegible]) कटाक्षेण विलोकयति, मनसि तु हृष्टा भवति, (ततश्च रागान्धा सति) [illegible]म्बितुमिच्छति चेत्यर्थः । अत्र अनेकासु क्रियासु वधूरिति एकस्यैव कर्तृकारकस्य उपस्थितिरिति दीपकत्वं बोध्यम् ॥ उदा०५४६ ॥

(सू० १५८) **मालादीपकमाद्यं चेद् यथोत्तरगुणावहम् ।**

पूर्वेण पूर्वेण वस्तुना उत्तरोत्तरं चेदुपक्रियते तत् मालादीपकम्, यथा—

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते
सम्प्राप्ते परिपन्थियोधनिवहे साम्मुख्यमासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनाऽपि भूमण्डलं
तेन त्वं नृपते त्वया सितयशस् तेनाऽपि लोकत्रयम् ॥ उदा० ५४७ ॥

(सू० २५९) **नियतानां सकृद् धर्मः सा पुनस् तुल्ययोगिता ॥१०३॥**

नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा क्रमेणोदाहरणम्—

(क) पाण्डु क्षामं वदनं हृदयं सरसं तवाऽलसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥ उदा० ५४८ ॥

(ख) कुमुद-कमल-नीलनीरजालिर् ललितविलासजुषोर् दृशोः पुरः का ।

[illegible] मालादीपकालङ्कारं प्रसङ्गादत्रैव निरूपयति—**मालादीपक**मित्यादिना । पूर्वेण पूर्वेण वस्तुना उत्तरस्योत्तरस्य स्वसम्बन्धेनोपरञ्जने सति एकस्य क्रियादेर्धर्मस्य बहुत्रोपस्थितिः मालादीपकम् इति मालादीपकलक्षणं बोध्यम् । उदाहरति—**सङ्ग्रामाङ्गण**मित्यादिना । हे नृपते, रणभूमिं प्राप्तेन त्वया धनुषि अधिज्ये कृते शत्रुभटसमूहे सम्प्राप्ते च सति शत्रुसाम्मुख्यं प्राप्तम्, तव धनुषा शराः प्राप्ताः तैश्च शरैः शत्रुशिरः प्राप्तम्, तेनाऽपि शत्रुशिरसा भूतलं प्राप्तम्, भूतलेन च त्वं प्राप्तः, त्वया च अवदातं यशः प्राप्तम् तेनाऽपि शुभ्रेण त्वद्यशसा लोकत्रयं प्राप्तमित्यर्थः । अत्र कोदण्डादिभिः पूर्वपूर्वैः शरादीनाम् उत्तरोत्तरेषां स्वसम्बन्धेनोपरञ्जनात् सर्वत्र प्राप्तिरूपाया एकस्या एव क्रियायाः सम्बन्धाच् च मालादीपकत्वं बोध्यम् ॥उदा० ५४७॥

औपम्यगर्भमेव तुल्ययोगितालङ्कारं दीपकमनन्तरमधुना निरूपयति—**नियतानामि**त्यादिना । प्रस्तुतेषु एव अप्रस्तुतेषु एव वा वस्तुषु एकस्यैव धर्मस्य उपस्थितिः साम्यव्यञ्जिका तुल्ययोगिता इति तुल्ययोगितालक्षणं बोध्यम् । तथा चोद्भटः—"उपमानोपमेयोक्तिशून्यैरप्रस्तुतैर् वचः । साम्याभिधायि प्रस्तावभाग्भिर् वा तुल्ययोगिता" (५।५८) इति ॥ १०३ ॥

प्रस्तुतेषु एव वस्तुषु एकस्यैव धर्मस्योपस्थित्या युक्तां तुल्ययोगितामुदाहरति—**पाण्डुक्षामामि**त्यादिना । हे सखि, तव पाण्डु (धूसरम्) क्षामं (दुर्बलायितं) च मुखम् आर्द्रं (स्निग्धं) हृदयम् अलसं शरीरञ्च तव हृदयस्याऽन्तर् वर्तमानं शरीरान्तरं प्राप्यैव चिकित्सितुं शक्यं रोगं निश्चिततयाऽऽवेदयतीत्यर्थः । अत्र विरहिण्या वर्णनीयतया प्रकृतानां विरहानुभावानां पाण्डुतादीनां धर्मत्वेन आवेदनक्रियारूपस्य साधारणस्य धर्मस्य सकृदुपस्थितिरिति तुल्ययोगितात्वं बोध्यम् ॥ उदा० ५४८ ॥

अप्रस्तुतेषु वस्तुषु अन्वितस्य एकस्यैव धर्मस्य उपस्थित्या युक्तां तुल्ययोगितामुदाहरति—**कुमुदकमले**त्यादिना । नायको नायिकां प्रति चाटूक्तिम् प्रयुङ्क्ते—हे कान्ते,

अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे त्वदाननस्य ॥उदा० ५४९॥

(सू० १६०) **उपमानाद् यदन्यस्य व्यतिरेकः स एव सः ।**

अन्यस्योपमेयस्य, व्यतिरेक आधिक्यम् । 'क्षीणः **क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते नित्यम् । विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु**' (उदा० ५५०) इत्यादौ उपमानस्योपमेयादाधिक्यमिति यत् केनचिदुक्तं तदयुक्तम् । अत्र यौवनगतास्थैर्यस्याधिक्यं हि विवक्षितम् ।

(सू० १६१) **हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते ॥ १०४ ॥**

शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत् त्रिरष्ट तत् ।

व्यतिरेकस्य हेतुरुपमेयगतमुत्कर्षनिमित्तम्, उपमानगतं निकर्षकारणं च, तयोर् द्वयोरुक्तिः; एकतरस्य द्वयोर् वाऽनुक्तिरित्यनुक्तित्रयम् । एतद् भेदचतुष्टयम् [illegible] शब्देन प्रतिपादिते । अर्थेन क्रमेणोक्तौ चत्वार एव

ललितविलासयुक्तयोस् तव नयनयो. पुरः श्वेतकमलानां रक्तारविन्दानां नीलोत्पलानां च पङ्क्तिः का नाम ? (प्रसन्नाया प्रणयकोपवत्याः प्रकृतिस्थायाश्च तव नयनयो शोभा श्वेतकमलादितिरस्करिणी अस्तीत्यर्थः); पुनश्च तव आननस्य पुरत पीयूषम्, चन्द्रः, पद्मं च युगपदेव निर्जितमित्यर्थ । अत्र पूर्वार्धे नायिकानयनोपमानत्वेन अप्रकृतानामेव कुमुदादीना धर्मतया [illegible], उत्तरार्धे च नायिकाननोपमानत्वेन अप्रकृतानाम् अमृतादीनां धर्मत्वेन [illegible], उभयत्र तुल्ययोगिता बोध्या । कुमुदादीनां कुत्सितत्वेन परस्परं साम्ये प्रतीते अमृतादीनां प्रतिहतत्वेन च परस्परं साम्ये प्रतीतेऽपि तस्य एकधर्मान्वयकृतचमत्कारपोषकतयैव स्थितिरिति नोपमाप्रसङ्ग इति च विवेक्तव्यम् ॥ उदा० ५४९ ॥ (१६) ।

औपम्यमूलकमेव व्यतिरेकालङ्कारं [illegible]—उपमानादित्यादिना । उपमानाद् उपमेयस्य आधिक्यं व्यतिरेकोऽलङ्कारो बोध्यः । ननु उपमानस्य उपमेयादाधिक्येऽपि व्यतिरेकः कैश्चिदिष्यते, तत्र क्षीणः क्षीणोऽपीत्यादि च उदाह्रियते, कथं त्वया उपमानादुपमेयस्यैवाधिक्ये व्यतिरेकः प्रतिपाद्यते [illegible]—**क्षीण क्षीणोऽपीत्यादि** । क्षीणः क्षीणोऽपीत्यादौ अपि न [illegible], किन्तु चन्द्रक्षय-यौवनक्षतयोरेवेति तत्र उपमानाच् चन्द्रक्षयाद् उपमेयस्य यौवनक्षयस्य अनिवर्तित्वेन आधिक्यात् तत्राऽपि उपमेयाधिक्यमूलक एव व्यतिरेक इति 'उपमानाद् उपमेयस्य आधिक्यं व्यतिरेकः' इत्येव व्यतिरेकलक्षणमित्याशयः ।

व्यतिरेकभेदान् प्रतिपादयति—**हेत्वोरुक्तावि**त्यादिना । उपमेयगतोत्कर्षनिमित्तस्य उपमानगतनिकर्षनिमित्तस्य च उक्तौ (१), उपमेयगतोत्कर्षनिमित्तस्यानुक्तौ (२), उपमानगतनिकर्षनिमित्तस्याऽनुक्तौ (३) उपमेयगतोत्कर्षनिमित्तस्य उपमानगतनिकर्षनिमित्तस्य चाऽनुक्तौ चेति प्रथमं चत्वारो भेदाः । श्रौत्याम् उपमायाम्, आर्थ्याम् उपमायाम्,

भेदाः । आक्षिप्ते चौपम्ये तावन्त एव । एवं द्वादश । एते च श्लेषेऽपि भवन्तीति चतुर्विंशतिर् भेदाः ।

क्रमेणोदाहरणम्—

अमिमात्रमहायस्य प्रभूतारिपराभवे ।
अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ॥ उदा० ५५१ ॥

अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेण युगपद् वाऽनुपादानेऽन्यद् भेदत्रयम् । एवमन्येष्वपि द्रष्टव्यम् । अत्र इव-शब्दस्य सद्भावाच् छाब्दमौपम्यम् ।

असिमात्रसहायोऽपि प्रभूतारिपराभवे ।
नैवान्यतुच्छजनवन् सगर्वोऽयं धृतेर् निधिः ॥ उदा० ५५२ ॥

तुल्यार्थेऽत्र वतिरिति आर्थमौपम्यम् ।

इयं सुनयना दासीकृत-तामरसश्रिया ।
आननेनाकलङ्केन जयतीन्दुं कलङ्किनम् ॥ उदा० ५५३ ॥

आक्षिप्तायामुपमायां च प्रत्येकम् उक्ताश्चत्वारो भेदा इति द्वादश भेदाः । एते च द्वादशाऽपि भेदाः श्लिष्टशब्दोपस्थापितसाधारणधर्मिकायाम् उपमायाम्, अश्लिष्टशब्दोपस्थापितसाधारणधर्मिकायामुपमायां चेति सङ्कलने चतुर्विंशतिधा व्यतिरेको बोध्यः । अत्र श्लेषोपमामूलके व्यतिरेके उभयानुपादानमूलका भेदा न सम्भवन्ति वैधर्म्यानुपादाने श्लेषस्य निरवलम्बनतायाः प्रसङ्गाद् इति रसगङ्गाधरकारप्रभृतयः ।

अश्लिष्टशब्दोपस्थापितसाधारणधर्मिकायां शाब्दयाम् उपमायां हेत्वोरुक्तौ व्यतिरेकमुदाहरति—**असिमात्रे**त्यादिना । महत्या धृत्या युक्तस्य खड्गमात्रसहायस्य अस्य वीरस्य राज्ञः प्रभूतानाम् अरीणां पराजये जाते सति अन्यस्य तुच्छस्य जनस्येव गर्वो न भवतीत्यर्थः । अत्र राजा उपमेयः, अन्यजन उपमानम्, प्रभूतारिपराभवोऽश्लिष्टशब्दोपस्थापितः साधारणो धर्मः, उपमेये महाधृतित्वम्, उपमाने तुच्छत्वं च क्रमेण उत्कर्षस्य अपकर्षस्य च हेतू उपात्ताविति उदाहरणावतरणिकायामस्मदीयायामुक्तो व्यतिरेको बोध्यः ॥ उदा० ५५१ ॥

अश्लिष्टशब्दोपस्थापितसाधारणधर्मिकायां शाब्द्याम् उपमायां अन्यानि व्यतिरेकोदाहरणानि सूचयति—**अत्रैव तुच्छे**त्यादिना ।

अश्लिष्टशब्दोपस्थापितसाधारणधर्मिकायाम् उपमायां हेत्वोरुक्तौ व्यतिरेकमुदाहरति—**असिमात्रसहायोऽपी**त्यादिना । श्लोकार्थः पूर्ववद् बोध्यः । अत्राऽपि पूर्ववद् अन्यान्युदाहरणानि बोद्धव्यानि ॥ उदा० ५५२ ॥

अश्लिष्टशब्दोपस्थापितसाधारणधर्मिकायाम् आक्षिप्तायाम् उपमायां हेत्वोरुक्तौ व्यतिरेकमुदाहरति—**इयं सुनयने**त्यादिना । इयं सुनयना नायिका निर्जितपद्मशोभेन निर्दोषेण आननेन कलङ्किनम् इन्दुं जयतीत्यर्थः । अत्र श्लेषाभावः, आननमुपमेयम्, इन्दु-

अत्रेवादितुल्यादिपदविरहेणाऽऽक्षिप्तैवोपमा ।

जितेन्द्रियतया सम्यग् विद्यावृद्धनिषेविणः ।
अतिगाढगुणस्याऽस्य नाब्जवद् भङ्गुरा गुणाः ॥ उदा० ५५४ ॥

अत्रेवार्थे वतिः, गुणशब्दः श्लिष्टः ।

अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः ।
न निशाकरवज् जातु कलावैकल्यमागतः ॥ उदा० ५५५ ॥

अत्र तुल्यार्थे वतिः, कलाशब्दः श्लिष्टः ।

रुपमानम्, उपमानोपमेययोः कलङ्कित्वाऽकलङ्कित्वे उत्कर्षापकर्षहेतू उपात्तौ, इवादिपदाभावेऽपि जयतिपदबलाद् औपम्यप्रतीतिरिति [illegible] अस्मदीयायाम् निर्दिष्टो व्यतिरेको बोध्यः ।। उदा० ५५३ ॥

पूर्वोक्ते एवोदाहरणे पूर्ववद् उत्कर्षापकर्षहेत्वो पर्यायेण युगपद् वा अनुपादानेन 'आननेन मनोज्ञेन जयतीन्दुं कलङ्किनम्' इति पाठे उपमेयगतोत्कर्षहेतोरनुक्तौ उदाहरणम्, 'आननेनाकलङ्केन जयत्यमृतदीधितिम्' इति पाठे उपमानगतापकर्षहेतोरनुक्तौ उदाहरणम्, 'आननेन मनोज्ञेन जयत्यमृतदीधितिम्' इति पाठे द्वयोरपि हेत्वोरनुक्तौ उदाहरणं बोध्यम् ।

एवं द्वादशविधान् अश्लेषोपमाव्यतिरेकान् संक्षेपेणोदाहृत्य श्लेषोपमाव्यतिरेकान् उदाहरति । तत्र [illegible] शाब्द्याम् उपमायां हेत्वोरुक्तौ व्यतिरेकमुदाहरति—**जितेन्द्रियतये**त्यादिना । जितेन्द्रियत्वं सम्पाद्य विद्यावृद्धान् निषेवितुः विरोधिभिरप्यनुच्छेद्यैरतिगाढैर् धैर्यादिभिर् गुणैर्युक्तस्य अस्य राज्ञो गुणाः कमलस्येव भङ्गुरा न सन्तीत्यर्थं । अत्रोदाहरणसङ्गतिं सूचयति—**अत्रेवार्थे** इत्यादिना ।। उदा० ५५४ ।।

पूर्वोक्ते उदाहरणे एव पूर्ववद् उत्कर्षापकर्षहेत्वो पर्यायेण युगपद् वा अनुपादानेन 'सत्कर्मनिरतस्याऽस्य नाब्जवद् भङ्गुरा गुणाः' इति पाठे उपमेयगतोत्कर्षहेतोरनुक्तौ उदाहरणम्, 'सत्कर्मनिरतस्याऽस्य न तामरसवद् गुणाः' इति पाठे द्वयोरपि हेत्वोरनुक्तौ उदाहरणम् बोध्यम् ।

श्लिष्टशब्दोपस्थापितसाधारणधर्मिकायाम् आर्थ्याम् उपमायां हेत्वोरनुक्तौ व्यतिरेकमुदाहरति—**अखण्डमण्डले**त्यादिना । अखण्डं समृद्धं मण्डलं राजचक्रं यस्य स श्रीमान् एष राजा कदाचिदपि निशाकरेण तुल्यं यथा स्यात् तथा कलानां गीत-वाद्य-नृत्या-ऽऽलेख्यादि-कौशलानां षोडशभागाना च विकलत्वं (नाशं) न प्राप्त इत्यर्थः । अत्र उदाहरणसङ्गतिं सूचयति—**अत्र तुल्यार्थे** वतिरित्यादिना ।। उदा० ५५५ ॥

पूर्वोक्ते एवोदाहरणे पूर्ववद् उत्कर्षापकर्षहेत्वोः पर्यायेण युगपद् वा अनुपादानेन 'बहुलारिगतोऽप्येष श्रीमानुद्धतविक्रमः' इति पाठे उपमेयगतोत्कर्षहेतोरनुक्तौ उदाहरणम्;

> नित्योदितप्रतापेन त्रियामामिलिनप्रभः ।
> भास्वताऽनेन भूपेन भास्वानेष विनिर्जितः ॥ उदा० ५५६ ॥

अत्र आक्षिप्तैवोपमा, भास्वतेति श्लिष्टः ।

यथा वा—

> स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं बिम्बप्रभाधरमकृत्रिमहृद्यगन्धम् ।
> यूनामतीव पिबतां रजनीषु यत्र तृष्णां जहार मधु नाननमङ्गनानाम्
> ॥ उदा० ५५७ ॥

'न निशाकरवज् जातु दृश्यतां वसुधाधिपः' इति पाठे उपमानगतापकर्षहेतोरनुक्तौ उदाहरणम्, एवं पाठे अखण्डमण्डलशब्दः श्लिष्टः; 'बहुलाग्निमत्त्वेन श्रीमानुद्धतविक्रमः । न निशाकरवज्जातु दृश्यतां वसुधाधिपः' इति पाठे द्वयोरपि हेत्वोरनुक्तौ उदाहरणम् । एवं पाठे बहुलशब्दः श्लिष्टः ।

श्लिष्टशब्दोपस्थापितसाधारणधर्मकत्वेन आक्षिप्तायाम् उपमायां हेत्वोरुक्तौ व्यतिरेकमुदाहरति—**नित्योदितप्रतापेने**त्यादिना । नित्यम् उदितः प्रभावो यस्य तेन **भास्वता** कान्तिमता रविरूपेण च अनेन भूपेन रात्रौ निमीलिता प्रभा यस्य स एष सूर्यो विनिर्जित इत्यर्थः । अत्र भास्वतेति शब्दः श्लिष्टः, भूप उपमेयः, सूर्यम् उपमानम्, नित्योदितप्रतापत्वं रात्रौ प्रभारहितत्वं च उपमेयोपमानयोः उत्कर्षापकर्षहेतू उपात्तौ, इवादिशब्दाभावेऽपि विनिर्जितपदेन औपम्यमाक्षिप्तमिति उदाहरणावतरणिकोक्तो व्यतिरेको बोध्यः ॥ उदा० ५५६ ॥

अस्मिन्नेवोदाहरणे पूर्ववद् उत्कर्षापकर्षहेत्वोः पर्यायेण युगपद् वाऽनुपादानेन 'समरासक्तमनसा त्रियामामीलितप्रभः' इति पाठे उपमेयगतोत्कर्षहेतोरनुक्तौ उदाहरणम्, 'नित्योदितप्रतापेन पङ्कजावलिनन्दनः' इति पाठे उपमानगतापकर्षहेतोरनुक्तौ उदाहरणम्, 'समरासक्तमनसा पङ्कजावलिनन्दनः' इति पाठे द्वयोरपि हेत्वोरनुक्तौ उदाहरणम् बोध्यम् ।

निर्जितादिशब्दाभावेऽपि श्लिष्टविशेषणमहिम्नैवौपम्याक्षेपेणाऽपि व्यतिरेकः सम्भवतीति वैचित्र्यदिक्प्रदर्शनाय उदाहरणान्तरमाह—**स्वच्छात्मते**त्यादि । इदं श्रीधरेणापठितमपि परीक्षपाठेऽस्ति । यत्र वसन्ते रात्रिषु अतीव मधु पिबताम् अङ्गनानां मुखं च चुम्बतां यूनां तृष्णां (मधुपानेच्छाम्) निर्मलस्वरूपत्वेन गुणेन प्रतिबिम्बितं चन्द्रबिम्बं यत्र तादृशं बिम्बफलस्य प्रभाया धरम्, अकृत्रिमेण हृद्येन गन्धेन युक्तं मधु जहार, किन्तु तादृशमेव अङ्गनानामाननं तृष्णां (बिम्बाधरपानेच्छां) न जहारेत्यर्थः । अत्र स्वच्छात्मतेत्यादिभिः श्लिष्टैर्विशेषणैर्मधुनोऽङ्गनानामाननस्य च साम्ये आक्षिप्तेऽपि मधु तृष्णां जहार अङ्गनानामाननं तृष्णां न जहारेति उपमानाद् मधुनः उपमेयस्य अङ्गनानामाननस्य स्पृहणीयत्वाधिक्याद् व्यतिरेको बोध्यः; तादृशस्य मधुनः उपमानस्य सर्वलोकसुलभत्वं तृष्णाहारित्वरूपापकर्षनिमित्तम्, तादृशस्य अङ्गनानामाननस्य उपमेयस्य पुण्यचयैकलभ्यत्वं तृष्णाऽह-

अत्र इवादीनां तुल्यादीनां च पदानामभावेऽपि श्लिष्टविशेषणैराक्षिप्तैवोपमा प्रतीयते।

एवञ्जातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्येऽपि भेदाः सम्भवन्ति। तेऽनयैव दिशा द्रष्टव्याः।

(मालाप्रतिवस्तूपमावद् मालाव्यतिरेकोऽपि सम्भवति, तस्याऽपि भेदा एवमूह्याः; दिङ्मात्रमुदाह्रियते, यथा—

हरवन् न विषमदृष्टिर् हरिवद् न विभो विधूतविततवृष.।
रविवन् न चातिदुःसहकरतापितभूः कदाचिदसि ॥ उदा० ५५८ ॥

अत्र तुल्यार्थे वतिः, विषमादयश्च शब्दाः श्लिष्टाः।

रणत्वरूपोत्कर्षनिमित्तं च अत्र नोक्तमिति [illegible]। उदाहरणमेव स्फुटीकरोति—**अत्रेवादीना**मित्यादिना ॥ उदा० ५५७ ॥

एवमेवाऽन्येऽपि व्यतिरेकवैचित्र्यप्रकाराः सम्भवन्तीत्याह—**एवञ्जातीयका** इत्यादिना। 'या शैशिरी श्रीस्तपसा मासेनैकेन विश्रुता। तपसा ता सुदीर्घेण दूराद् विदधतीमध.' इत्यत्र उद्भटकृतकुमारसम्भवे गौरीवर्णने तपसा श्लिष्टोक्तियोग्ये पदे पृथगुपात्ते उपमानापकर्षोपमेयोत्कर्षहेत्वोरनुक्तौ आक्षिप्ते औपम्ये व्यतिरेको बोध्यः। अत्र एकत्र **तपाः** शिशिरस्य प्रथमो मासः अन्यत्र **तपः** कृच्छ्रचान्द्रायणादि उभयत्रापि तृतीयैकवचने तपसेत्येव। एवमन्येऽपि व्यतिरेकवैचित्र्यप्रकाराः सम्भवन्तीति बोध्यम्।

अत्र श्री[illegible] केषुचित् काव्यप्रकाशादर्शेषु उपलभ्यमानं परीखेणाऽपि अस्थाने रूपान्तरेण च मूलपाठे पठितं **मालाप्रतिवस्तूपमावद**दित्यादि मालाव्यतिरेकप्रतिपादनं व्यतिरेकनिरूपणान्ते निवेश्य व्याख्यायते।

मालाप्रतिवस्तूपमानिरूपणान्ते 'एवमन्यत्राप्यनुसर्तव्यम्' इति अलङ्काराणामन्येषामपि यत्र मालारूपता सम्भवति तत्र मालारूपताऽपि योजनीयेति यत् सूचितमभूत् तस्य चरितार्थत्वायाऽऽह—**मालाप्रतिवस्तूपमावद**दित्यादि।

आर्थ्यां श्लेषोपमायां हेतोर् हेत्वोरेव वोक्तौ मालारूपं व्यतिरेकमुदाहरति—**हरवन् न विषमे**त्यादिना। हे राजन्, त्वं हर इव असमदृष्टिर् नाऽसि, श्रीकृष्णवत् प्रतिक्षिप्तमहावृषश्च नाऽसि, सूर्य इव अतिदुःसहैः करैस्तापिता भूर् येन तादृशश्च कदाचिदपि नाऽसीत्यर्थः। अत्र आर्थ्यां श्लेषोपमायाम् अपकर्षहेतोरुक्तौ व्यतिरेको बोध्यः; स च एकस्यैवोपमेयस्य बहूपमानापेक्षया आधिक्यस्य वर्णनाद् मालारूपो बोध्यः। अत्र विषमदृष्टित्वाभावेन समदृष्टित्वमाक्षिप्यते इति उत्कर्षहेतुरपि उक्त एवेति केचित्। एतत्पक्षे हेत्वोरुक्तावेव इदमुदाहरणम् ॥ उदा० ४५८ ॥ (१७)।

अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेरित्यादिषु व्यतिरेकोदाहरणेषु उपमेये उपमाने वा कस्यचिद् धर्मस्य निषेधस्योक्तत्वाद् व्यतिरेकस्य निषेधरूपत्वेन निषेधप्रसङ्गाद्

(सू० १६२) निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥ १०५ ॥
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।

विवक्षितस्य प्राकरणिकत्वाद् अनुपसर्जनीयकार्यस्य अशक्यवक्तव्यत्वम्, अतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेध इव निषेधो यः स वक्ष्यमाणविषयः उक्त-विषयश्चेति द्विविध आक्षेपः ।

क्रमेणोदाहरणम्—

(क) ए एहि किं वि कीए वि कएण णिक्किव भणामि अलमहवा ।
अविआरिअ-कज्जाऽऽरम्भ-आरिणि मरउ ण भणिस्सं ॥उदा० ५५९॥

(ख) ज्योत्स्नामौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रव
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः ।
अन्तर्मानसमास् त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे ॥ उदा० ५६० ॥

आक्षेपालङ्कारमाह—**निषेधो वक्तु**मित्यादिना । विवक्षितस्य अप्रधानीकर्तुमनर्हस्यार्थस्य अशक्यवक्तव्यत्वरूपं विशेषं प्रतिपादयितुं क्रियमाणः वक्ष्यमाणविषयो निषेधः, तथाविधस्यैव विवक्षितस्यार्थस्य अतिप्रसिद्धत्वरूपं विशेषं प्रतिपादयितुं क्रियमाणः उक्तविषयो निषेधश्च आक्षेपोऽलङ्कार इति सूत्रवृत्त्योः पिण्डीकृतोऽर्थः । अभिधित्सा-विवक्षा । निषेध इव निषेधः=निषेध इव प्रयुज्यमानोऽतात्त्विको निषेधः ।

वक्ष्यमाणविषयनिषेधरूपमाक्षेपमुदाहरति—**ए एही**त्यादिना । 'ए एहि किमपि कस्या अपि कृते निष्कृप भणामि अलमथवा । अविचारितकार्यारम्भकारिणि म्रियतां न भणिष्यामि' इति संस्कृतच्छाया । नायकं प्रति नायिकासखी आह—अरे निष्कृप, त्वम् आयाहि, कस्या अपि कृते किमपि [illegible] भणामि; अथवा अलम्, मातापित्रोः सम्मतिं तव प्रेम्णः स्थैर्यगाम्भीर्यादिकं किमप्यविचार्य त्वत्सम्पर्करूपकार्यारम्भकारिणी सा म्रियताम्, किमपि न भणिष्यामीत्यर्थः । अलमित्युक्तस्यार्थस्य न भणिष्यामि इति पुनरुक्तिः खेदातिशयद्योतनाय । अत्र नायिकासन्तापातिशयो वक्तुमिष्टो न चासौ विशेषेण वक्तुं शक्य इति व्यञ्जयितुं वक्ष्यमाणाया मरणावस्थाया अलमित्यादिना निषेधः कृत इत्याक्षे-पालङ्कारो बोध्यः ॥ उदा० ५५९ ॥

उक्तविषयनिषेधरूपमाक्षेपमुदाहरति—**ज्योत्स्नामौक्तिके**त्यादिना नायकं प्रति नायिकासखी आह—चन्द्रिका, मुक्ताहारः, चन्दनरसः, चन्द्रकान्तमणिजलम्, कर्पूरम्, कदली, मृणालवलयानि, कमलिनीपल्लवाश्च तस्या मानसे प्रकर्षेण दाहकरणसमर्थत्वेन वर्तमानेन त्वया हेतुभूतेन तस्या नायिकायाः कृते अग्निस्फुलिङ्गसमूहस्य कार्याय (दाहो-त्पादनाय) भवन्ति; आः, हन्त, अनेन उक्तेन किम्? अतो न ब्रूमहे इत्यर्थः । 'आस्तु स्यात् कोपपीडयोः' इति (३।३।२४०), 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः' इति (३।३।२४४) च अमरः । अत्र वियोगिनीनां ज्योत्स्नादिकं स्फुलिङ्गायते इत्यस्य अति-

(सू० १६३) **क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर् विभावना ॥ १०६ ॥**

हेतुरूपक्रियाया निषेधेऽपि तत्-फलप्रकाशनं विभावना ।

यथा—

कुसुमित-लताभिरहताऽप्यधत्त रुजमलिकुलैरदष्टाऽपि ।
परिवर्तते स्म [illegible] सा ॥ उदा० ५६१ ॥

(सू० १६४) **विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।**

मिलितेष्वपि कारणेषु [illegible] विशेषोक्ति ; (सा च) अनुक्तनिमित्ता, उक्तनिमित्ता, अचिन्त्यनिमित्ता च ।

क्रमेणोदाहरणम्—

(क) निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते ।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नाऽलिङ्गनतोऽङ्गना सा॥उदा०५६२॥

प्रगिद्धत्वरूपं विशेषं प्रतिपादयितु ज्योत्स्नादीनां स्फुलिङ्गोत्करत्वमुक्त्वा तन्निषेधः कृत इत्याक्षेपालङ्कारः । अत्र आक्षेपोदाहरणयोः अशक्यवक्तव्यत्वादिकं व्यङ्ग्यं वाच्योपस्कारकत्वेनैव स्थितमिति न गुणीभूतव्यङ्ग्यता शङ्क्या; [illegible] रामणीयकेन स्वतन्त्रस्य हि व्यङ्ग्यस्य [illegible] ॥ उदा० ५६० ॥ (१८)

निषेधप्रसङ्गाद् [illegible] विभावनामाह—**क्रियायाः प्रतिषेधेऽपी-त्यादिना** । कारिकावृत्त्योरर्थः स्फुटः । वैयाकरणा क्रियाया एव हेतुतां स्वीकुर्वते इति 'हेतोः प्रतिषेधेऽपि' इति वक्तव्ये 'क्रियायाः प्रतिषेधेऽपि' इति वचनम् । **विभावयति** प्रसिद्धकारणनिषेधेन कारणान्तरं कल्पयतीति व्युत्पत्त्या विभावनेति नाम्नः सार्थकता बोध्या ॥१०५॥

विभावनामुदाहरति—**कुसुमितलताभिरित्यादिना** । नायिकाया विरहावस्थाया वर्णनमिदम् । सा पुष्पिताभिः लताभिः अहताऽपि पीडाम् अन्वभूत्, भ्रमरकुलैः अदष्टाऽपि विपरिवर्तते स्म, नलिनीयुक्ताभिर् जललहरीभिरपि अलोलिताऽपि घूर्णते स्मेत्यर्थः । अत्र प्रसिद्धकारणनिषेधेऽपि कविनिकायप्रसिद्धस्य [illegible] हेतोर् विभावनात् फलव्यक्तिसमर्थनेन विभावनाऽलङ्कार ॥उदा० ५६१॥ (१९) ।

विभावनाविपर्ययात्मकत्वाद् विशेषोक्तेस् तां प्रतिपादयति—**विशेषोक्तिरखण्डेष्वि-त्यादिना** । कश्चिद् विशेषं वक्तुं प्रसिद्धेषु कारणेषु सत्स्वपि कार्याभावस्य प्रतिपादनं विशेषोक्तिरिति सूत्रवृत्त्योरर्थः । सा च त्रिधेति मम्मटः, अचिन्त्यनिमित्ताऽपि अनुक्तनिमित्तैवेति द्वैधैवेति श्रीधरः । अनुक्तनिमित्ता पुनर्द्वेधा अनुक्तस्य [illegible] च श्रीधरस्य मतम् ॥१०५॥

अनुक्तनिमित्तां विशेषोक्तिमुदाहरति—**निद्रानिवृत्तावित्यादिना** । निद्रानिवृत्तौ सत्यामपि, सूर्ये उदितेऽपि, सखीजने द्वारस्थानं प्राप्ते सत्यपि रमणे शिथिलीकृताश्लेषरसे सत्यपि सा अङ्गना आलिङ्गनाद् न विचचालेत्यर्थः । 'भुजङ्गो गणिकापतिः' इतिहेमचन्द्रः अत्र मन्मथोन्माथो निमित्तम्, स च नोक्त इति, निद्रानिवृत्त्याद्यालिङ्गनविचलनहेतौ

(ख) कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥उदा० ५६३॥
स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरताऽपि तनुं यस्य शम्भुना न हृतम् बलम् ॥उदा० ५६४॥

(सू० १६५) यथासङ्ख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥१०७॥

यथा—

एकस् त्रिधा वससि चेतसि चित्रमत्र
देव द्विषां च विदुषां च मृगीदृशां च ।

सत्यपि अभिलङ्घनविच्छेदाभावः प्रतिपादित इति अनुक्तनिमित्तात्र विशेषोक्तिर्ज्ञेया । **अत्र** निमित्तं व्यङ्ग्यं प्रकरणसामर्थ्यात् प्रतीतिपथमवतीर्णमपि न चारुत्वनिष्पादकमिति न हि गुणीभूतव्यङ्ग्यत्वमपि प्राप्नोतीति बोध्यम् । चारुताया व्यङ्ग्यस्य स्वातन्त्र्ये सत्येव गुणीभूतव्यङ्ग्यता सम्भवति न तु वाच्यातिरिक्तचमत्कारे इत्यावेदितमेव (द्र०, ध्व० लो० १।४) ॥उदा० ५६२॥

उक्तनिमित्तां विशेषोक्तिमुदाहरन्ति—**कर्पूर इवे**त्यादिना । बालरामायणे (३।११) पद्यमिदम् । यः कामः कर्पूर इव दग्धोऽपि चित्ताकर्षकतया सर्वेषु जनेषु शक्तिमानस्ति, तस्मै अकुण्ठितशक्तये कामाय नमोऽस्तु इत्यर्थः । अत्र शक्तिनाशकारणे शरीरदाहे सत्यपि शक्तिनाशकार्याभावः प्रतिपादित इति विशेषोक्तिर्ज्ञेया । कार्याभावे निमित्तम् अवार्यवीर्यत्वमुक्तमिति सा चात्रोक्तनिमित्ता ज्ञेया ॥उदा० ५६३॥

अचिन्त्यनिमित्तां विशेषोक्तिमुदाहरति—**स एक** इत्यादिना । भामहेनोदाहृतं पद्यमेतत् (३।२४) । यस्य तनुं हरताऽपि शम्भुना बलं न हृतम्, सः असहायोऽपि कामस् त्रीणि जगन्ति जयतीत्यर्थः । अत्र बलहरणकारणे तनुहरणे सत्यपि बलहरणकार्याभावः प्रतिपादित इति विशेषोक्तिर् ज्ञेया । तनुं हरताऽपि शम्भुना बलं कथ न हृतमिति बलाहरणे निमित्तमचिन्त्यं शास्त्रमात्रैकगम्यत्वाद् इति अचिन्त्यनिमित्तेयं विशेषोक्तिः ॥उदा० ५६४॥ (२०) ।

विशेषोक्तौ कारणसत्त्व-कार्याभावयोः क्रमस्य सम्बन्धोऽस्तीति तत्सङ्गत्या क्रममूलकं यथासङ्ख्यालङ्कारमाह—**यथासङ्ख्य**मित्यादिना । येन क्रमेण यावत्सङ्ख्याकाः ये पदार्थाः प्रथममुद्दिष्टास्तेषां तेनैव क्रमेण पश्चादुक्तैस्तावत्सङ्ख्याकैः पदार्थैः सम्बन्धो विचित्रः सन् यथासङ्ख्यालङ्कारो भवति इत्यर्थः । इदञ्च द्विगुणत्रिगुणादिभेदाद् वैचित्र्यमावहति । यथासङ्ख्य क्वचिदार्थं च भवति ॥१०७॥

यथासङ्ख्यमुदाहरन्ति—**एकस्त्रिधे**त्यादिना । हे राजन्, अत्र लोके त्वम् एकः सन् अपि शत्रूणां विदुषां प्रमदानां च चेतसि त्रिभिः प्रकारैर् वससि; कथं त्रिरूप इत्यत्राह—**क्रमेण** तापं प्रमोदरसं रतिं च वर्धयन् त्रिरूपो वससीत्यर्थः । **कैः** साधनैः त्रिरूपतां प्राप्त

तापं च सम्मदरसं च रतिं च पुष्णन्
शौर्योष्मणा च विजयेन च लीलया च ।।उदा० ५६५।।

(सू० १६६) **सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।**
यत् तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ।।१०८।।

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत् समर्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः । क्रमेणोदाहरणम्—

(क) निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम् ।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ।।उदा० ५६६।।

(ख) सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद् विधुः ।
तदनु भवतः कीर्तिः केनाऽप्यगीयत येन सा
प्रियगृहमगान् मुक्ताशङ्का क्व नाऽसि शुभप्रदः ।।उदा० ५६७।।

इत्यत्राह—क्रमेण शौर्योष्मणा, अभिविनीततया, लीलया चेति । अत्र प्रथममुपात्तानां त्रयाणाम् अनन्तरोपात्तैस्त्रिभिः द्विषां चेतसि शौर्योष्मणा तापं पुष्णन्, विदुषां चेतसि विनयेन सम्मदरसं पुष्णन् मृगीदृशां चेतदि लीलया रतिं पुष्णन् इत्यन्वयाद् यथासङ्ख्यं बोध्यम् ।।उदा०५६५।। (२१) ।

सामान्यक्रममूलके यथासङ्ख्ये उक्ते तत्-प्रसङ्गात् सामान्यविशेषादिक्रममूलकम् अर्थान्तरन्यासं लक्षयति—**सामान्यं** वेत्यादिना । सामान्यस्य विशेषेण साधर्म्यात् समर्थनम्, सामान्यस्य विशेषेण वैधर्म्यात् समर्थनम्, विशेषस्य सामान्येन साधर्म्यात् समर्थनम्, विशेषस्य सामान्येन वैधर्म्यात् समर्थनं वा अर्थान्तरन्यास इति सूत्रवृत्त्योः स्फुटोऽर्थः ।।१०८।।

सामान्यस्य विशेषेण साधर्म्यात् समर्थनमुदाहरति—**निजदोषे**त्यादिना । येषां मनो निजदोषेणावृतं तेषाम् अतिसुन्दरमेव असुन्दरं भाति; तथा हि कामलारूपपित्तविकारोपहतनयनो मुमूर्षुः पुरुषः शशिनमिव शुभ्रं शङ्खमपि पीतं पश्यतीत्यर्थः । अत्र निजदोषेत्यादेः सामान्यस्य पित्तोपहतत्वादिना विशेषेण विपरीतदर्शित्वरूपं साधर्म्यमादाय समर्थनाद् अर्थान्तरन्यासो बोध्यः ।।उदा० ५६६।।

विशेषस्य सामान्येन साधर्म्यात् समर्थनमुदाहरति—**सुसितवसने**त्यादिना । कञ्चन राजानं प्रति कस्यचन कवेश्चाटूक्तिरियम् । हे राजन्, कदाचन ज्योत्स्नाप्रकाशे सति सुश्वेतवस्त्रालङ्करणायां सुदृशि अभिसारिकायां स्वच्छन्द प्रियगृहं यान्त्यां सत्यां चन्द्रोऽस्तं गतोऽभूत्, ततः पश्चात् केनाऽपि भवतः कीर्तिर् अगीयत, येन कीर्तिगानेन हेतुना (कीर्तिव्याप्त्या औज्ज्वल्ये जाते) सा निःशङ्का प्रियगृहमगात्, अतस् त्वं क्व शुभप्रदो नाऽसि, सर्वत्रैव शुभप्रदोऽसीत्यर्थः । अत्र सुसितेत्याद्युक्तस्य विशेषस्य 'क्व नाऽसि शुभप्रदः' इति सामान्येन उपकारित्वरूपं साधर्म्यमादाय समर्थनादर्थान्तरन्यासो बोध्यः ।।उदा० ५६७।।

(ग) गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते ।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर् गडिः (लिः) ॥उदा० ५६८॥

(घ) अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।
त एव धन्याः सुहृदां पराभवं जगत्यदृष्ट्वैव हि ये क्षय गताः ॥ उदा० ५६९ ॥

(सू० १६७) **विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद् वचः ।**
वस्तुवृत्तेनाऽविरोधेऽपि विरुद्धयोरिव यदभिधानं स विरोध ।

(सू० १६८) **जातिश् चतुर्भिर् जात्याद्यैर् विरुद्धा स्याद् गुणैस् त्रिभिः॥१०९॥**
क्रिया द्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश ।

सामान्यस्य विशेषेण वैधर्म्यात् समर्थनमुदाहरन्ति—**गुणानामेवे**त्यादिना । कार्यभारवहनसमर्थः पुरुषो गुणानां दोषात् कार्यभारे नियुज्यते, अतः स सदैव कार्यभारपीडितो भवति; तथाहि गडिः (कर्मण्यकुशलोऽत्यन्तमलसः) गौः असञ्जातकिणस्कन्धः स्कन्धो यस्य तादृशः सन् सुखेन स्वपिति न तु धूर्वहनरूपकार्यभारे नियुज्यते इत्यर्थः । अत्र गुणानामित्यादिना प्रतिपादितं नियोगरूपं सामान्यम् असञ्जातेत्यादिना प्रतिपादितेन धूर्वहनरूपनियोगविशेषाभावेन वैधर्म्यमुपादाय समर्थ्यते इत्यर्थान्तरन्यासो बोध्यः ॥उदा० ५६८॥

विशेषस्य सामान्येन वैधर्म्यात् समर्थनमुदाहरन्ति—**अहो ही**त्यादिना । सुहृदं प्रति परिस्थितिवशात् कठोरमप्रियं वाक्यं वक्तुं प्रवृत्तस्य कस्यचिदुक्तिरियम् । अहो मम दीर्घेणायुषा बहु हि अपराद्धम्, यतो हि मया परिस्थितिपरवशेन ईदृशम् इदम् अप्रियमपि वस्तु **वाच्यं** जातम् । आयुषा अपराद्धमित्येव **वैधर्म्येण** समर्थयते–त एव जना धन्या ये जगति सुहृदां पराभवम् अदृष्ट्वैव (तान् प्रति अप्रियं कठोरं वाक्यमप्रयुज्यैव) आयुषः क्षयं प्राप्ता इत्यर्थः । अत्र **अहो ही**त्यादिना प्रतिपादितस्य 'बहु अपराद्धम्' इत्यात्मकस्य सामान्यस्य **त एव धन्या** इत्यादिना प्रतिपादितेन 'त एव धन्याः' इत्यात्मकेन विशेषेण वैधर्म्यमुपादाय समर्थ्यते इत्यर्थान्तरन्यासो बोध्यः ॥उदा०५६९॥ (२२) ।

समर्थनं विरोधमूलकानुपपत्तिसम्भावनाहेतुकम् इति तत्-प्रसङ्गाद् विरोधालङ्कारं निरूपयति—**विरोधः**, स इत्यादिना । वस्तुतो विरोधस्य अभावेऽपि विशेषाभिधानाय-विरुद्धत्वेन यद् वचनं स विरोध इति सूत्रवृत्त्योरर्थः । विरोधाभास इत्येवास्य समुचितं नाम ।

विरोधाभासभेदान् प्रतिपादयति—**जातिश् चतुर्भि**रित्यादिना । जातिर् जात्या विरुद्धत्वेन यद् उच्यते स **प्रथमो विरोधः**, जातिर् गुणेन विरुद्धत्वेन यत् उच्यते स **द्वितीयः**, जातिः क्रियया विरुद्धत्वेन यद् उच्यते स **तृतीयः**, जातिर् द्रव्येण विरुद्धत्वेन यद् उच्यते स **चतुर्थः**, गुणो गुणेन विरुद्धत्वेन यद् उच्यते स **पञ्चमः**, गुणः क्रियया विरुद्धत्वेन यद् उच्यते स **षष्ठः**, गुणो द्रव्येण विरुद्धत्वेन यद् उच्यते स **सप्तमः**, क्रिया क्रियया विरुद्धत्वेन यद् उच्यते स **अष्टमः**, क्रिया **द्रव्येण** विरुद्धत्वेन यद् उच्यते स

क्रमेणोदाहरणम्—

(क) अभिनव-नलिनी-किसलय-मृणाल-वलयादि दवदहनराशिः ।
सुभग कुरङ्गदृशोऽस्या विधिवशतस् त्वद्-वियोग-पवि-पाते॥उदा०५७०॥

(ग) गिरयोऽप्यनुन्नतियुजो मरुदप्यबलोऽब्धयोऽप्यगम्भीराः ।
विश्वम्भराऽप्यतिलघुर् नरनाथ तवान्तिके नियतम् ॥उदा० ५७१॥

(ग) येषां कण्ठपरिग्रहप्रणयितां सम्प्राप्य धाराधरस्
तीक्ष्णस् सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च ।
तेषां सङ्गर-रङ्ग-सक्त-मनसां राज्ञां त्वया भूपते,
पांशूनां पटलैः प्रसाधनविधिर् निर्वर्त्यते कौतुकम् ॥उदा० ५७२॥

नवमः, द्रव्यं द्रव्येण विरुद्धत्वेन यद् उच्यते स **दशम** इति दशधा विरोधाभासो ज्ञेय इत्यर्थः ।

(क) जातेर् जात्या विरोधस्य अवभासेन युक्तं विरोधमुदाहरति—**अभिनव-नलिनी**-त्यादिना । कस्याश्चिद् दूत्याः कंचिद् नायकं प्रति वचनमिदम् । हे सुभग, दैववशात् त्वद्वियोगरूपस्य वज्रस्य पाते जाते सति अस्याः कुरङ्गदृशः कृते अभिनवं नलिनीपल्लवम् मृणालस्य वलयम्, चन्द्रचन्दनादि च दावाग्ने राशिर् भवतीत्यर्थ । अत्र नलिन्यादिषु विरहोद्दीपकतया दवदहनत्वोपचारः कृते इति वस्तुतो विरोधस्य अभावेऽपि नलिनीत्वादीनां जातीना दहनत्वेन जात्या विरोध आमुखे भासते इति प्रथमो विरोधो (विरोधाभासो) बोध्यः ॥उदा० ५७० ॥

(ख) जातेर् गुणेन विरोधस्याऽवभासनेन युक्तं विरोधमुदाहरति—**गिरयोऽपी**-त्यादिना । कश्चिद् राजानं प्रति कवेश्चाटूक्तिरियम् । हे राजन्, तव समीपे पर्वता अपि अनुन्नताः, वायुरपि अबलः, समुद्रा अपि अगभीराः, पृथिवी अपि अतिलघ्वी इति नियतमस्तीत्यर्थः । वर्णनीयराजगतौन्नत्याद्यतिशयविवक्षया पर्वतादिषु अनुन्नत्यादय आरोपिता इति वस्तुतो विरोधस्याऽभावेऽपि पर्वतत्वादीनां जातीनाम् अनुन्नत्यादिभिर् गुणैर् विरोध आमुखे भासते इति अत्र द्वितीयो विरोधो बोध्यः ॥ उदा० ५७१ ॥

(ग) जातेः क्रियया सह विरोधस्याऽवभासेन युक्तं विरोधमुदाहरति—**येषां कण्ठे**-त्यादिना । हे भूपते, यस्तीक्ष्णः सोऽपि खड्गो येषां प्रतिनृपाणां कण्ठानां समालिङ्गने प्रणयितां प्राप्य अनुरक्तो भवति कमपि स्नेहं प्राप्नोति च तेषां [illegible]-चित्तानां राज्ञां त्वया धूलीनां पटलैः प्रसाधनविधिः क्रियते (तेषां धूलिपटलैर् धूसरत्वं खरस्पर्शत्वञ्च क्रियते) इति महदाश्चर्यमस्तीत्यर्थः । खड्गे रुधिरसम्पर्ककृतस्य लौहित्यस्य चिक्कणत्वस्य विवक्षितत्वाद् वस्तुतो विरोधस्याऽभावेऽपि खड्गत्वजातेरनुरागस्नेहप्राप्ति-क्रियाभ्यां विरोध आमुखे भासते इति तृतीयोऽत्र विरोधो (विरोधाभासो) बोध्यः । पांसूनां पटलैः प्रसाधनविधिर् निर्वर्त्यते कौतुकम् इत्यत्राऽपि धूलिधूसरत्वं क्रियते इत्यत्रैव

(घ) सृजति च जगदिदमवति च संहरति च हेलयैव यो नियतम् ।
अवसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदम् ॥उदा० ५७३॥

(ङ) सतत-मुसलाऽऽसङ्गाद् बहुतर-गृहकर्म-घटनया नृपते ।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥उदा० ५७४॥

(च) पेशलमपि खलवचनं दहतितरां मानसं सतत्त्वविदाम् ।
परुषमपि सुजनवाक्यं मलयजरसवत् प्रमोदयति ॥उदा० ५७५॥

तात्पर्याद् वस्तुतो विरोधस्याऽभावेऽपि गोमुत्वजातेः अलङ्करणक्रियया विरोध आमुखे भासते इति तृतीयो विरोधो बोध्यः ॥ उदा० ५७२ ॥

(घ) जातेर् द्रव्येण सह विरोधस्याऽऽभासेन युक्तं विरोधाभासमुदाहरति—**सृजति चेत्यादिना** । य इदं जगद् अनायासेनैव नियतं यथा स्यात् तथा सृजति, रक्षति, नाशयति च सोऽपि जनार्दनः अवसरवशात् शफराकारो रोहितमत्स्यो जात इति इदं विचित्रमस्तीत्यर्थः । अत्र परमेश्वरस्य मायया किं न सम्भवतीति तात्पर्येण परमेश्वरस्य मत्स्यरूपेणावतारस्य वर्णने वस्तुतो विरोधस्याऽभावेऽपि मत्स्यत्वजातेर् जनार्दनपदप्रतिपादितपरमात्मरूपद्रव्येण सह आमुखे विरोधो भासते इति चतुर्थो विरोधोऽत्र बोध्य इति मम्मटस्याशयः । मत्स्यावतारे हरेः 'अतो हरी रोहितमत्स्यतनौ' इति रोहितमत्स्यत्वं हरिवंशे प्रोक्तमिति महेश्वरभट्टाचार्यः । अत्र परमात्मनो द्रव्यत्वमिति लोकायतदृष्टिप्रधानानां कणादगोतमादीनां मतेन उदाहरणसङ्गतिः । वस्तुतस्तु परमात्मनो द्रव्यत्वस्य अश्रौतत्वाद् उदाहरणान्तरमेव देयम्; जात्यादिव्यवहारस्य श्रौतैः व्यवहारेऽवलम्बनीयत्वेऽपि परमात्मनो द्रव्यत्वस्यातथात्वाद् ॥ उदा० ५७३ ॥

(ङ) गुणस्य गुणेन सह विरोधस्य आभासेन युक्तं विरोधमुदाहरति—**सततमुसले**त्यादिना । कं चन राजानं प्रति कवेश्चाटूक्तिरियम् । हे राजन्, सततं मुसलेषु आसङ्गाद् अन्येषां बहुतराणां गृहकर्मणां सम्पादनेन च कठिनीभूताः द्विजपत्नीनां कराः त्वयि दातरि सति कमलवत् कोमला अभूवन्नित्यर्थः । अत्र कठिनीभूतानां कराणां राज्ञो दानाद् मुसलासङ्गादिनिवृत्त्या कालान्तरे कोमलत्वस्य प्राप्तौ वस्तुतो विरोधस्य वस्तुगत्या विरोधस्याभावेऽपि आमुखे करगत-कठिनत्व-कोमलत्वयोर् गुणयोः परस्परं विरोध आभासते इति पञ्चमो विरोधाभासो बोध्यः ॥उदा० ५७४॥

(च) गुणस्य क्रियया सह विरोधस्य आभासेन युक्तं विरोधमुदाहरति—**पेशलमपी**त्यादिना । कोमलमपि खलानां वचनं तत्-तत्त्वज्ञाना मनोऽतिशयेन दहति, कठोरमपि सुजनस्य वाक्यं तत्-तत्त्वज्ञानां मनश् चन्दनद्रव इव प्रमुदितं करोतीत्यर्थः । अत्र खल-सुजनयोर् वाक्ययोः कोमल-कठोरयोरपि दाहप्रमोदनक्रियाभ्यां खल-सुजनत्व-सम्बन्धात्स्याद् वस्तुतो विरोधस्य अभावेऽपि आपाततो विरोध आभासते इति षष्ठो विरोधो (विरोधाभासो) बोध्यः ॥ उदा० ५७५ ॥

(छ) क्रौञ्चाद्रिरुद्दामदृषद्दृढोऽयं यन्मार्गणानर्गलशातपाते ।
अभून् नवाम्भोजदलाभिजातः स भार्गवः सत्यमपूर्वसर्ग ॥उदा० ५७६॥

(ज) परिच्छेदातीतः सकलवचनानामविषय
पुनर् जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर् जडयति च तापं च कुरुते ॥उदा० ५७७॥

(झ) अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस् तृष्णातरलितमनोभिर् जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्-तिमि-निकरमापास्यति मुनिः ॥उदा० ५७८॥

(छ) गुणस्य द्रव्येण सह विरोधस्य आभासेन युक्तं विरोधमुदाहरति—**क्रौञ्चाद्रिरित्या-दिना**। यस्य भार्गवस्य बाणानाम् अप्रतिहते तीक्ष्णे पाते सति महतीभिः शिलाभिर् दृढोऽप्यसौ क्रौञ्चपर्वतः प्रत्यग्रकमलपत्रवत् कोमलोऽभूत् स भार्गवः सत्यमेव अद्भुतोऽव-तार इत्यर्थः। अत्र दृढस्यापि क्रौञ्चपर्वतस्य भार्गवपराक्रमातिशयात् कोमलत्वेन वस्तुतो विरोधस्याऽभावेऽपि क्रौञ्चपर्वतरूपद्रव्येण सह कोमलत्वगुणस्य आपाततो विरोधो भासते इति सप्तमो विरोधो (विरोधाभासो) ऽत्र बोध्यः ॥उदा० ५७६॥

(ज) क्रियायाः क्रियया सह विरोधस्य आभासेन युक्तं विरोधमुदाहरति—**परि-च्छेदातीत** इत्यादिना। मालतीमाधवप्रकरणे प्रथमेऽङ्के मकरन्दं प्रति माधवस्य स्वावस्था-कथनमिदम्। इयत्तामतिक्रान्तो वाचक-लाक्षणिक-व्यञ्जकादिवचनैः प्रतिपादयितुमशक्य इतः पूर्वं कदापि अस्मिञ् जन्मनि अनुभूतिविषयमप्राप्तो गुणदोषविवेकस्य आत्यन्तिकाद् नाशाद् उपचितेन महामोहेनाऽतिगभीरः (अतएव दुर्लङ्घ्यः) कोऽपि चेतोविकारो मम अन्तःकरणं मोहयति, मम सन्तापं च करोतीत्यर्थः। अत्र विरहावस्थावैचित्र्यस्वभावाद् आन्तरेण विकारेण क्षणे जडीकरणे अनन्तरेक्षणान्तरे च तापकरणेऽपि वस्तुतः तयोः क्रिययोः विरोधस्य अभावेऽपि अपाततस्तयोर् विरोधो भासते इति सप्तमो विरोधोऽत्र बोध्यः ॥ उदा० ५७७ ॥

(झ) क्रियाया द्रव्येण सह विरोधस्य आभासेन युक्तं विरोधमुदाहरति—**अयं वारा-मित्यादिना**। आश्रयनृपच्छत्रभङ्गे जाते आश्रितस्य कवेः पद्यमिदं प्रतीयते भल्लटशतके (१०८) अयं समुद्रो जलानां मुख्य आश्रय इति रत्नानाम् आकर इति च तृष्णायुक्तमनो-भिरस्माभि आश्रितः, (कथं नु नशिष्यन्नयं समुद्र आश्रित इत्यत्राऽऽह—) अगस्त्यो मुनिः स्वकरसम्पुट-गर्तकगतं (चुलुकगतं) ग्लायत्-तिमिमत्स्यसमूहम् एवं समुद्रं क्षणादेव अनेन प्रकारेण पास्यति इति को जानीते इत्यर्थः। अत्र अगस्त्यस्य अलौकिकशक्तिमाहात्म्याद् महाराशेः समुद्ररूपस्य जलस्याऽपि पानक्रियाया वस्तुतो विरोधस्याऽभावेऽपि समुद्रस्याऽपि

(ञ) समद-मतङ्गज-मदजल-निष्यन्द-तरङ्गिणी-परिष्वङ्गात् ।
क्षितितिलक त्वयि तटजुषि शङ्करजूटापगाऽपि कालिन्दी ॥उदा० ५७९॥

(सू० १६९) स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ॥११०॥

स्वयोस्तदेकाश्रययोः, रूपं वर्णः संस्थानं च ।

उदाहरणम्—

पश्चादंघ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाऽङ्गमुच्चै-
रासज्याऽभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय ।
घासग्रासाभिलाषादनवरत-चलत्-प्रोथ-तुण्डस् तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण॥उदा० ५८०॥

कथं पानमिति विरोध आमुखे भासते इति नवमोऽत्र विरोधो (विरोधाभासो) बोध्यः ॥ उदा० ५७८ ॥

(ञ) द्रव्यस्य द्रव्येण सह विरोधस्य आभासेन युक्तं विरोधमुदाहरति—**समद-मतङ्ग**जेत्यादिना । कवे राजानं प्रति चाटूक्तिरियम् । हे राजन्, त्वयि तट प्राप्ते सति समदानां गजानां मदजलस्य निस्यन्दरूपा या नदी तस्याः सम्बन्धाद् गङ्गाऽपि यमुना भवतीत्यर्थः । अत्र कालिन्दीपदं श्यामाभामात्रपरमिति वस्तुतो विरोधस्याऽभावेऽपि गङ्गारूपं जलमपि कथं कालिन्दीरूपं जलं स्यादिति आपाततो विरोधो भासते इति दशमोऽत्र विरोधो (विरोधाभासो) बोध्यः ॥ उदा० ५७९ ॥ (२३) ।

वस्तुस्वभावविरोधप्रतिभासरूपे विरोधाभासे निरूपिते वस्तुस्वभाववर्णनरूपमलङ्कारं स्वभावोक्तिं प्रतिपादयति—**स्वभावोक्तिस्त्व**त्यादिना । बालादीना पदार्थाना तत्-तत्पदार्थ-मात्रगत-प्रकृतिसिद्ध-क्रिया-वर्णा-ऽङ्गप्रत्यङ्गविन्यासविशेषादिवर्णनं कविप्रतिभाविशेष-मात्रविषयं स्वभावोक्तिरिति लक्षणवाक्यतात्पर्यार्थः । वर्णः शुक्लादिः, संस्थानम् अङ्गप्रत्यङ्ग-सन्निवेशविशेष. आकारो वा । **जातिः** इत्यस्यैवालङ्कारस्य नामान्तरं प्राचीनैर् व्यवहृतम् ॥ ११० ॥

स्वभावोक्तिमुदाहरति—**पश्चादंह्री** इत्यादिना । हर्षचरिते (३।५) पद्यमिदम् । शयनाद् उत्थितो घोटकः पश्चिमपादौ प्रसार्य, पृष्ठवंशान्त्यभागस्याविस्तृतम् अङ्गम् अतिशयेन दीर्घं कृत्वा, वक्रितकन्धरः सन् मुखमुरसि संयोज्य, धूलिभिः मलिनां कन्धरा-केसरावलिं विधूय, बालतृणग्रासवाञ्छया अनवरतं चलत् घोणाग्रं मुखं च यस्य तादृशः सन् मन्दं मन्दं शब्दायमानश्च सन् खुरेण भूमिं लिखतीत्यर्थः । अत्र कविप्रतिभासमुन्मी-लितवैशिष्ट्ययोर् घोटकक्रिया-रूपयोर् वर्णनात् स्वभावोक्तिर्बोध्या । सञ्चारिणी दीप-शिखेवेत्यादिना (रघुः ६।६७) पद्येन कालिदासो यथा दीपशिखाकालिदास इति प्रख्या-पितः, यथा च उदयति विततोर्ध्वेत्यादिना पद्येन (४।२०) माघो घण्टामाघ इति तथैवा-नेन पद्येन बाणस् तुरङ्गबाण इति ॥ उदा० ५८० ॥

(सू० १७०) व्याजस्तुतिर् मुखे निन्दा स्तुतिर् वा रूढिरन्यथा ।

व्याजरूपा, व्याजेन वा स्तुतिः । क्रमेणोदाहरणम्—

(क) हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो
लज्जावर्जनमन्तरेण न रमामन्यत्र सन्दृश्यते ।
यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥उदा० ५८१॥

(ख) हे हेलाजितबोधिसत्त्व, वचसां किं विस्तरैस् तोयधे,
नास्ति त्वत्-सदृशः परः परहितादाने गृहीतव्रतः ।
तृष्यत्-पान्थजनोपकार-घटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन् मरोः ॥उदा० ५८२॥

(सू० १७१) सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥१११॥

स्वभावोक्तौ उक्तायां तत्प्रसङ्गेन स्वभाववैपरीत्योपजीविवर्णनात्मिकां व्याजस्तु- [illegible] । यत्र आमुखे प्रतीयमानाऽपि निन्दा प्रमाणान्तराद् बाधिता सती स्तुतित्वमारोहति सा व्याजेन स्तुतिरित्येका व्याजस्तुतिः; यत्र आपाततः प्रतिपाद्यमानत्वेन प्रतीताऽपि प्रशंसा प्रमाणान्तरबाधिता सती निन्दात्वमारोहति साऽपि व्याजरूपा (असत्यरूपा) स्तुतिरिति कृत्वाऽन्या व्याजस्तुतिरिति सूत्रवृत्त्योः पिण्डितोऽर्थः ।

(क) तत्र स्तुतिपर्यवसायिनिन्दारूपां व्याजस्तुतिमुदाहरति—हित्वा त्वामित्यादिना । राजन्, यो भवान् युद्धाद्यनेकमार्गैरागत्य आश्रितायाः लक्ष्म्याः त्यागम् अन्यापेक्षया अधिकतरं कुरुते तं भवन्तं विहाय अन्यः अनुरोधस्वीकारविमुखमनसां शिरोमणिः नाऽस्ति, परित्यागरूपमपमानं प्राप्याऽपि यस्याः लक्ष्म्यास् त्वय्येव स्थिरताऽस्ति तां लक्ष्मीं विना अन्यत्र लज्जावर्जनमपि तादृशं न दृश्यते इति मन्ये इत्यर्थः । यद्यपि "अन्तरान्तरेण युक्ते" इत्यत्र साहचर्याद् वैदिकप्रयोगदर्शनाच्च अन्तरेणशब्दो मध्यवचनोऽवसीयते तथापि विनार्थकेन अन्तरेण-शब्देन योगेऽपि कवयो द्वितीयां प्रयुञ्जते । अत्र आश्रितत्यागनिन्दकीर्तनरूपनिन्दाव्याजेन दानशीलस्याऽपि तव लक्ष्मीवत्त्वमिति राज्ञस्स्तुतिः प्रतीयते इति प्रथमा व्याजस्तुतिरत्र ज्ञेया ॥ उदा० ५८१ ॥

(ख) निन्दापर्यवसायिस्तुतिरूपां व्याजस्तुतिमुदाहरति—हे हेलाजितेत्यादिना । कारुणिकतातिशयजितबोधिसत्त्व हे लवणसमुद्र, वचनानां विस्तरैः किं भवति ? त्वत्सदृशः परहितकरणदीक्षितोऽन्यो नास्ति, यतो हि त्वं [illegible] तिराशिरूपमहाभारस्य उद्वहने कृपया मरोः साहाय्यं करोषीत्यर्थः । अत्र समुद्रस्य व्याजरूपया (असत्यया) स्तुत्या निन्दा क्रियते इति द्वितीया व्याजस्तुतिर्बोध्या ॥ उदा० ५८२ ॥ (२५) ।

व्याजस्तुतौ स्तुतिनिन्दारूपयोर् द्वयोरर्थयोः स्तुतिरस्तीति तत्प्रसङ्गाद् अर्थद्वय-

एकार्थाभिधायकमपि सहार्थबलाद् यदुभयस्यावगमकं सा सहोक्तिः ।
यथा—

सह दिअह-णिसाहिँ दीहरा सासदण्डा
सह मणिवलयेहिँ वाहधारा गलन्ति ।
तुह सुहअ विओए तीअ उव्विग्गिरीए
सह अतणु-लदाए दुब्बला जीविनासा ॥उदा० ५८३॥

श्वासदण्डादिगतं दीर्घत्वादि शाब्दम्, दिवसनिशादिगतं तु सहार्थसामर्थ्यात् प्रतिपद्यते ।

(सू० १७२) **विनोक्तिः सा विनाऽन्येन यत्राऽन्यः सन् न नेतरः ।**

क्वचिदशोभनः क्वचिच्छोभनः । क्रमोदाहरणम्—

(क) अरुचिर् निशया विना शशी शशिना साऽपि विना महत् तमः ।
उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः ॥उदा० ५८४॥

प्रतीतिमतीं सहोक्तिं प्रतिपादयति—**सा सहोक्तिरि**त्यादिना । यत्र सहार्थान्वयबलाद् एककारकान्वितार्थकादपि शब्दात् कारकद्वयान्वितयोरर्थयोर् बोधो भवति सा सहोक्ति-रिति सूत्रवृत्त्योरर्थः । अस्याऽलङ्कारस्य लक्षणं रुय्यकोक्तं युक्ततरम्, तद् यथा—'उपमानोपमेययोरेकस्य प्राधान्यनिर्देशेऽपरस्य सहार्थसम्बन्धे सहोक्तिः' (२९) इति ॥ १११ ॥

सहोक्तिमुदाहरति—**सह दिअहे**त्यादिना । '**सह दिवसनिशाभिर् दीर्घाः श्वासदण्डाः सह मणिवलयैर् बाष्पधारा गलन्ति । तव सुभग वियोगे तस्या उद्विग्नायाः सह च तनुलतया दुर्बला जीविताशा**' इति संस्कृतच्छाया । कर्पूरमञ्जर्यां सट्टके (२।९) नायिका-विरहावस्थाया वर्णनमिदम् । हे सुभग, तव वियोगे उद्विग्नायाम् तस्या नायिकाया दण्डाकाराः श्वासाः दिवसैर् निशाभिश्च सह दीर्घा जाताः, तस्याः नेत्राम्बुधाराः मणि-वलयैः सह गलन्ति, तस्याः जीविताशा च तनुलतया सह दुर्बला जातेत्यर्थः । अत्र दीर्घ-गलन-दुर्बलशब्दानाम् एकैकार्थत्वेऽपि तेषां श्वासदण्डादिगतं दीर्घत्वादि अभिधेयम्, दिवसनिशादौ तु औपचारिकं दुःखदायित्वादिमूलकं दीर्घत्वादि इति दीर्घादिशब्दाः सहार्थान्वयबलाद् द्विविधानामपि दीर्घत्वादीनां बोधका इति सहोक्तिरत्र बोध्येत्याशये-नाऽऽह—**श्वासदण्डादी**त्यादि ॥ उदा० ५८३ ॥ (२६) ।

सहोक्तिविपरीततया विनोक्तेः सहोक्त्यनन्तरं विनोक्तिं निरूपयति—**विनोक्तिःसे**-त्यादिना । यत्र अन्येन विना अन्यः सन् (शोभनः) न भवति, यत्र वा अन्येन विना अन्यः सत इतरः (असन् = अशोभनः) न भवति सा विनोक्तिरित्यर्थः । क्लिष्टं खल्विदं सूत्रं मम्मटस्य ।

(क) यत्र अन्येन विना अन्यः शोभनो न भवति ता विनोक्तिमुदाहरति—**अरुचिर् निशये**त्यादिना । रात्र्या विना चन्द्रो दीप्तिशून्यो भवति, चन्द्रेण विना रात्रिरपि अन्धं

(ख) मृगलोचनया विना विचित्र-व्यवहार-प्रनिभा-प्रभा-प्रगल्भः ।
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः ॥उदा० ५८५॥

(सू० १७३) **परिवृत्तिर् विनिमयो योऽर्थानां स्यात् समासमैः ॥११२॥**

परिवृत्तिरलङ्कारः । उदाहरणम्—

(अ) लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्त्वा श्रयति भृशमामोदमसमम् ॥ उदा० ५८६ ॥

(आ) लतास् त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमरुदितमोहव्यतिकरम् ॥ उदा० ५८७ ॥

(इ) नानाविधप्रहरणैर् नृप सम्प्रहारे
स्वीकृत्य दारुणनिनादवतः प्रहारान् ।
दृप्तारिवीरविसरेण वसुन्धरेयं
निर्विप्रलम्भपरिरम्भविधिर् वितीर्णा ॥ उ० ५८८ ॥

तम एव भवति (नैव शोभते), रात्र्या चन्द्रेण च विना कामिनः कामिन्याश्च कामविलासो नैव शोभते इत्यर्थः । सुन्दरी वृत्तम् । अत्र अन्येन निशादिना विना अन्यस्य चन्द्रादेरशोभनता प्रतिपाद्यते इति प्रथमा विनोक्तिर् ज्ञेया ।। उदा० ५८४ ।।

(ख) यत्र अन्येन विना अन्योऽशोभनो न भवति तां विनोक्तिमुदाहरति—**मृगलोचनये**त्यादिना । अयं राजपुत्रो मृगलोचनया विना विचित्राणां व्यवहारप्रतिभाणां प्रभाभिः प्रगल्भोऽस्ति, तेन पापाशयेन वयस्येन विना चन्द्रावदाताभिप्रायश्चास्तीत्यर्थः । अत्र मृगलोचनया विना राजपुत्रस्य स्त्रीमोहराहित्येन व्यवहारप्रतिभाप्रागल्भ्यात्, दुष्टवयस्येन च विना राजपुत्रस्य दुर्भावनासम्पर्कवर्जनेन स्वच्छान्तःकरणत्वाच् च शोभनत्वं प्रतिपाद्यते इति द्वितीया विनोक्तिर् बोध्या ।। उदा० ५८५ ।। (२७) ।

विनोक्तौ यथा द्वयोः परस्परं निरूप्यता तथैव परिवृत्तावपीति विनोक्तिमनु परिवृत्ति लक्षयति—**परिवृत्तिर् विनिमय** इत्यादिना । समैर् न्यूनैरधिकैर् वा वस्तुभिर् यः पदार्थानां विनिमयः सा परिवृत्तिरित्यर्थः । परिवृत्तिशब्दोऽत्र क्रियामात्रवाचीति आशङ्कां परिवृत्तिरलङ्कार इति परिहरति ।

(अ-आ) समेन समस्य अधिकेन न्यूनस्य च परिवृत्तिमेकेनैव पद्येन उदाहरति—**लतानामेतासामि**त्यादिना । अयं वातः लतानाम् अभिमतं नृत्यं लताभ्यो दत्त्वा सञ्जातपुष्पाणामेतासां लतानाम् अनुपमं सुगन्धं भृशं गृह्णाति; लतास्तु पथिकानां दृशमाकृष्यादाय अहह तेभ्यः पथिकेभ्यः सहसा मानस्याः व्यथायाः, शारीर्याः पीडायाः, भ्रमेः, रुदितस्य, मोहस्य च व्यामिश्रं समूहं ददतीत्यर्थः । अत्र पूर्वार्धे वातः स्वस्य अनुकूलेन आमोदेन समेन लतानामनुकूलमेव समं लास्यं विनिमयते, द्वितीयेऽर्धे तु लताः स्वशोभाख्यापकतया स्वानुकूलया पथिकदृष्ट्या उत्तमया पथिकप्रतिकूलम् आधिव्याधिसमूहं न्यूनं विनिमयन्ते इति सूचयति—**अत्र प्रथमे** इत्यादिना ।। उदा० ५८६-८७ ।।

अत्र न्यूनेनोत्तमस्य ।

(सू० १७४) **प्रत्यक्षा इव यद् भावा क्रियन्ते भूतभाविनः ।**
तद् भाविकं .... ।

भूताश्च भाविनश् चेति द्वन्द्वः । भावः कवेरभिप्रायोऽत्रास्तीति भाविकम् ।

उदाहरणम्—

(क) आसीदञ्जनमत्रेति पश्यामि तव लोचने ॥ उदा० ५८९ ॥

(ख) भाविभूषणसम्भारां साक्षात् कुर्वे नवाकृतिम् ॥ उदा० ५९० ॥

अत्राऽद्येऽर्धे भूतस्य द्वितीये भाविनो दर्शनम् ।

(सू० १७५) .... **काव्यलिङ्गं हेतोर् वाक्यपदार्थता** ॥११३॥

वाक्यार्थता यथा—

न्यूनेनोत्तमस्य परिवृत्तिमुदाहरति—**नानाविधे**त्यादिना । हे राजन्, युद्धे नानाविधै-रायुधैः भयङ्करशब्दयुक्तान् तव प्रहारान् स्वीकृत्य गर्वितेन शत्रुवीरसमूहेन वियोगरहिता-लिङ्गनवती इयं भूमिस्तुभ्यं दत्तेत्यर्थः । अत्र प्रतिकूलतया न्यूनैः प्रहारैरभीष्टाया. पृथिव्या विनिमय इत्यभिप्रायेणाह-**अत्र न्यूनेने**त्यादिना ॥ उदा० ५८८ ॥ (२८)

परिवृत्तौ अन्योन्यधर्माणाम् अन्योन्यस्मिन् संसर्गस्यारोपः, भाविके तु तस्यैव धर्माणा कालान्तरसम्बन्धिनामपि तत्रैव संसर्गस्याऽऽरोप इति उभयोरपि समारोपमूलकत्वात् परिवृ-त्तिमनु भाविकं निरूपयति—**प्रत्यक्षा** इवेत्यादिना । भूता भविष्यन्तो वाऽपि भावा यत् पुरः स्फुरन्त इव दृश्यमाना बोध्यन्ते तद् भाविकमित्यर्थः । भूतभाविपदार्थानामपि प्रत्यक्ष-विषयतया प्रतिपादने कवेः इच्छा भावः, सोऽत्रास्तीति भाविकमिति नामनिर्वचनम् ।

(क-ख) प्रथमेऽर्धे भूतस्य भावस्य द्वितीये च भविष्यतो भावस्य दर्शनेन मुक्तमेकमेव पद्यं द्वयोरपि भाविकयोरुदाहरणत्वेनोपस्थापयति—**आसीदञ्जन**मित्यादि । अनिर्ज्ञाताकरं पद्यमिदम् । अत्र अनयोस्तव लोचनयोरञ्जनमासीदिति तव लोचने (इदानीमपि अञ्जन-युक्ते इव) चक्षुषैव साक्षात् कुर्वे; भाविनामलङ्काराणां सम्भारेण युक्ताञ्च तव आकृतिमपि इदानीमेव साक्षात् कुर्वे इत्यर्थः । लक्षणसमन्वयः स्फुटः । नखलु हृदयहारीदं पद्यम् । अभिनेयार्थे प्रबन्धे एव भाविकं स्वदते इति हेमचन्द्रादयोऽपि प्राहुः ॥ उदा० ५८९-९० ॥ (२९)

इदानीं हेतुनिवेशविशेषवैचित्र्यमूलान् अलङ्कारान् प्रारंभमाणः काव्यलिङ्गालङ्कारं निरूपति—**काव्यलिङ्गं हेतो**रित्यादिना । कारणस्य वाक्यार्थत्वेन पदार्थत्वेन वा काव्ये निबन्धने काव्यलिङ्गं नामाऽलङ्कारो भवतीत्यर्थः । अयमेव हेत्वलङ्कारः (उदा० १२६ वृत्तौ, १३० वृत्तौ कारणमालानूत्रवृत्तौ, सू० १८७), काव्यहेतुरप्ययमेव (उदा० १०६, वृत्तौ) । परिकरे पदार्थ-वाक्यार्थबलात् प्रतीतस्यार्थस्य वाच्यहेतुता अत्र तु पदार्थवाक्यार्थ-योरेव हेतुतेति अत्र वैशिष्टयं बोध्यम् । न चेदमनुमानं व्याप्त्याद्यदर्शनात् ॥ ११३ ॥

हेतोर् वाक्यार्थत्वे काव्यलिङ्गोदाहरणमाह—**वपुः प्रादुर्भावादि**त्यादि । मुञ्जस्य पद्यमिदमिति सुभाषितरत्नकोशकारः (श्लो० ३६) । हे त्रिपुरारे, अहं पूर्वस्मिन् कस्मि-

यत् प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे, नैवाऽस्मि क्षणमपि भवन्तं प्रणतवान् ।
नमन् मुक्तः सम्प्रत्यतनुरहमग्रेऽप्यनतिभाग्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥ उदा० ५९१ ॥

अनेकपदार्थता यथा—

प्रणयिसखी-सलील-परिहास-रसाऽधिगतैर्
ललित-शिरीष-पुष्प-हननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पतति शिरस्यकाण्डयमदण्ड इवैष भुजः ॥ उदा० ५९२ ॥

एकपदार्थता यथा—

भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालङ्कृतिम् ।

श्चिदपि जन्मनि नूनं त्वां न प्रणतवान् इतीदं मम वपुः प्रादुर्भावस्य दर्शनाद् मया अनुमितम्, (कस्मिंश्चिदपि जन्मनि यदि त्वत्प्रणामः कृतोऽभविष्यत् तर्हि ततो मुक्तेरवश्यम्भावात् ततः परं वपुःप्रादुर्भावो नैवाऽभविष्यदिति) इदानीं नमन् मुक्तोऽहं शरीररहितः सन् जन्मान्तरेऽपि नतिं नैव कर्ताहे इति इदम् अपराधद्वयं हे महेश, त्वया क्षन्तव्यमित्यर्थः । अत्र [illegible] धस्य हेत्वोः 'न प्रणतवान्' 'अनतिभाक्' इति [illegible] काव्यलिङ्गता बोध्या ॥ उदा० ५९१ ॥

हेतोरनेकपदार्थत्वे [illegible] इति—प्रणयिसखी-इत्यादि । मालतीमाधवे (५।३१) मालतीवधे उद्यतम् अघोरघण्टं प्रति माधवस्येयमुक्तिः । यद् मालतीशरीरं प्रणयिनीनां सखीनां सलीलात् परिहासरसात् प्राप्तैः शोभनशिरीषपुष्पहननैरपि क्लिश्यति तत्र मालतीशरीरे वधाय खड्गम् उद्गूरयमाणस्य तव शिरसि अयं सखड्गो मम भुजः अकालप्राप्तयमदण्ड इव पततीत्यर्थः । अत्र [illegible] हेतुः 'तव वपुषि वधाय शस्त्रमुपक्षिपतः' इति अनेकेषां पदानां क्रियापदाभावाद् वाक्यभावमप्राप्तानामर्थत्वेन निबद्धः शास्त्रोद्यमनपदार्थ इति काव्यलिङ्गताऽत्र बोध्या ॥ उदा० ५९२ ॥

हेतोरेकपदार्थत्वे काव्यलिङ्गमुदाहरति—भस्मोद्धूलने-इत्यादि । शिवप्रसादवतो जीवन्मुक्तस्योक्तिरियम् । हे भस्मालेप, भवते भद्रमस्तु; हे रुद्राक्षमाले, भवत्यै शुभमस्तु; शिवलयालङ्कारभूताया निश्श्रेणीपरम्परायाः शोच्यत्वमस्तु; यतो हि सेवया तुष्टेन शिवेन अद्य वयं भवत्सेवासुखानुभवच्छेदिनि मोक्षनामके विषयबोधशून्ये पदार्थे निक्षिप्यामहे इत्यर्थः । अत्र मोक्षस्य महामोहताया हेतुः सुखालोकोच्छेदित्वं समस्तैकपदार्थत्वेनोपनिबद्धमिति काव्यलिङ्गता बोध्या । एतेषूदाहरणेषु अपराधद्वये पूर्वापरजन्मनोरनमनं

अन्यायाकलनोज्झितेन विभुना युष्मत्स्वपर्यायमुक्ता-
ऽऽलोकोच्छेदिनि मोक्षनामनि महामोहे निलीयामहे ॥ उदा० ५९३ ॥

एषु अपराधद्वये दुर्वाररजस्तमोरञ्जनत्वम् भुजपाते शस्त्रोपक्षेपः, महामोहे सुखालोकोच्छेदित्वं च यथाक्रममुक्तरूपो हेतुः।

वाच्यवाचकभावविविक्तेनावगमनव्यापारेण यत् प्रतिपादनं तत् पर्यायेण भङ्ग्यन्तरेण भणनात् पर्यायोक्तम्।

(सू० १७६) **पर्यायोक्तं विना वाच्य-वाचकत्वे वचस् तु यत्।**

उदाहरणम्—

यं प्रेक्ष्य चिररूढाऽपि निवासप्रीतिरुज्झिता।
मदेनैरावणमुखे मानेन हृदये हरेः ॥उदा० ५९४॥

अत्र ऐरावणशक्रौ मद-मान-मुक्तौ जाताविति व्यङ्ग्यमपि शब्देनोच्यते· तेन यदेवोच्यते तदेव व्यङ्ग्यम्। यथा तु व्यङ्ग्यं न तथोच्यते; यथा गवि शुक्ले चलति दृष्टे '**गौः शुक्लश् चलति**' (उदा० ५९५) इति विकल्पः, यदेव दृष्टं तदेव विकल्पयति, न तु यथा दृष्टं तथा, अभिन्नासंसृष्टत्वेन दृष्टं भेदसङ्कराभ्यां विकल्पयति।

वाक्यार्थरूपं हेतुः, भुजपाते शस्त्रोपक्षेपोऽनेपकदार्थरूपो हेतुः, महामोहे मुखालोकोच्छे-दित्वमेकपदार्थरूपं हेतुरिति काव्यलिङ्गलक्षणसङ्गतिमित्याह—**एषु अपराधे**त्यादिना ॥ उदा० ५९३ ॥ (३०)।

कार्यादिद्वारा कारणादेर् गम्यस्य वर्णनं पर्यायोक्तमिति पर्यायोक्तेऽपि हेतोः सम्बन्धाद् हेत्वलङ्कारमनु पर्यायोक्तमाह—**पर्यायोक्त**मित्यादिना। वाच्यवाचकभावभिन्नेन अर्थ-सामर्थ्यात्मना व्यञ्जनाव्यापारेण वाच्यस्यैवार्थस्य यत् प्रतिपादनं तत पर्यायोक्तमित्यर्थः। अलङ्कारसर्वस्वे तु गम्यस्यापि पर्यायान्तरेणाऽभिधानं पर्यायोक्तमित्युक्तम् (सू० ३६)। व्यङ्ग्यस्याऽत्र वाच्यार्थोपस्कारकमात्रमिति न ध्वनित्वं न वा गुणीभूतव्यङ्ग्यत्वमिति बोध्यम्।

पर्यायोक्तमुदाहरति—**यं प्रक्ष्ये**त्यादिना। हयग्रीववधे पद्यमिदमिति केचित्। यं हयग्रीवं प्रेक्ष्य मदेन ऐरावतमुखे चिररूढाऽपि निवासप्रीतिस्त्यक्ता, मानेन च इन्द्रस्य हृदये चिररूढाऽपि निवासप्रीतिस्त्यक्ता। अत्र अभिधया योऽर्थः प्रतिपाद्यते स एवार्थः 'ऐरावतेन्द्रौ मद-मानमुक्तौ जातौ' इति भङ्ग्यन्तरं प्रकारान्तरेणार्थसामर्थ्याच्च अव-गम्यते इति पर्यायोक्तता बोध्या। उदाहरणसङ्गतिं प्रदर्शयति—**अत्र ऐरावणे**त्यादिना। 'ऐरावणशक्रौ मदमानमुक्तौ जातौ' इति यद् व्यङ्ग्यम् तदेव शब्देनाऽभिधयाऽपि बोध्यते, अतो यदेव अभिधया बोध्यते तदेव अर्थसामर्थ्यादपि गम्यते इति लक्षणसमन्वयो बोध्य इत्यर्थः। एवमपि येन प्रकारेण व्यञ्जनया प्रतिपाद्यते तेनैव प्रकारेण अभिधया न बोध्यते

(सू० १७७) **उदात्तं वस्तुनः सम्पत्** .... ।

सम्पत् सम्यग् योगः, यथा—

> मुक्ताः [illegible] सम्मार्जनीभिर्हृताः
> प्रातः प्राङ्गणसीम्नि [illegible] ।
> आराद् [illegible] कर्षन्ति केलीशुका
> यद् विद्वद्भवनेषु भोजनृपतेस् तत् त्यागलीलायितम् ॥उदा० ५९६॥

(सू० १७८) .... **महतां चोपलक्षणम्** ॥११४ ॥

उपलक्षणम् अङ्गभावः, अर्थाद् उपलक्षणीयेऽर्थे ।

इति एकस्याप्यर्थस्य प्रकारद्वयेन वैचित्र्येण प्रतिपादनेऽपि न दोष इत्याशयेनाऽऽह—**यथा तु** इत्यादि । एकस्यापि वस्तुन उपायभेदात् प्रकारभेदेन भाने दृष्टान्तमाह—**यथा गवी**-त्यादिना । यथा गोत्वे शुक्लत्वे चलने च निर्विकल्पकज्ञानेन भासमाने गौः शुक्लश्चलन-क्रियावानस्तीति [illegible], तत्र यद्यपि यदेव गोत्वादि दृष्ट तदेव द्रष्टा विकल्पयति, तथापि यथा वस्तूनि असंसृष्टत्वेन निर्विकल्पकज्ञाने भासन्ते तथैव असंसृष्ट-त्वेन तु न विकल्पयति, किन्तु [illegible] निर्विकल्पकज्ञानेन भासितानि अपि वस्तूनि भेदसंसर्गाभ्यां विकल्पयतीत्यर्थः । संसर्गानवगाहि ज्ञानं निर्विकल्पकम् प्राथ-मिकम्, संसर्गावगाहि ज्ञानं सविकल्पकं [illegible] च बोध्यम् । एवं च यथा निर्वि-कल्पकज्ञाने पूर्वं दृष्टानामपि वस्तूनां सविकल्पकज्ञाने पुनः प्रकारान्तरेण प्रतीतिः, तथा पर्यायोक्तेऽपि शब्देन अभिधया [illegible] अर्थसामर्थ्यात् पुनः प्रकारान्तरेण प्रतीतिरिति दृष्टान्तसङ्गतिः ॥ उदा० ५९४-५९५ ॥ (३१) ।

द्वितीयस्य उदात्तस्य [illegible] उपलक्षणतायामपि यथाकथंचिद् निमित्तत्व-संस्पर्शो भवतीति हेतुमूलकालङ्कार[illegible] एव उदात्तं लक्षयति—**उदात्तं वस्तुन** इत्या-दिना । अथवा मम्मटोक्तेषु अलङ्कारेषु रुद्रटोक्तेष्विव रुय्यकोक्तेष्विव सुसम्बद्धता नास्त्ये-वेति न सर्वत्र सङ्गतौ आग्रहः कर्तव्यः । यस्य कस्य चिद् [illegible] समृद्ध्या योगस्य वर्णनम् उदात्तं नामालङ्कारः इति प्रथमोदात्तलक्षणम् । उत्कर्षेण आत्तम् उदात्तम् ।

[illegible]—**मुक्ताः केली**त्यादि । अनिर्ज्ञाताकर्तृ [illegible] परङ्कस्याऽपिकवेः । विदुषां गृहेषु [illegible] हारेभ्यो गलिताः कूर्चकैरवहृता. प्रातःकाले अङ्गनप्रान्ते मन्दं-मन्दं चलन्तीनां बालानाम् पादानां रञ्जन्या लाक्षया रञ्जिताः मुक्ताः आराद् (दूरदेशे) दर्शनेन [illegible] सन्तः क्रीडाशुकाः यत् कर्षन्ति तद् भोजनृपतेस् त्यागस्य लीलायितम् [illegible] । अत्र विद्वद्भव-नरूपस्य वस्तुनोऽसम्भाव्यमानया समृद्ध्या योगस्य वर्णनादुदात्तालङ्कारो बोध्यः ॥उदा० ५९६॥

उदाहरणम्—

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी ।
निवसन् बाहुसहायश् चकार रक्षःक्षयं राम ॥उदा०५९७॥

नचाऽत्र वीरो रसस् तस्येहाऽङ्गत्वात् ।

(सू० १७९) तत्-सिद्धिहेतावेकस्मिन् **यत्राऽन्यत् तत्-करं भवेत् ।**
समुच्चयोऽसौ .... ।

तस्य प्रस्तुतस्य कार्यस्यैकस्मिन् साधके स्थिते साधकान्तराणि यत्र सन्ति स समुच्चयः ।

उदाहरणम्—

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम् ।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽक्षमो
नो सख्यश् चतुराः कथन् नु विरहः सोढव्य इत्थं शठः ॥उदा० ५९८॥

उदात्तालङ्कारस्य द्वितीयं प्रकारं लक्षयति—**महतामित्यादिना** । महापुरुषाणाम् उदात्तचरितानाम् अङ्गरूपवस्त्वन्तराङ्गभावेन उपनिबध्यमानं तदलङ्कार इत्यभिप्रायः ॥११४॥

तदिदं द्वितीयमुदात्तम् उदाहरति—**तदिदमरण्य**मित्यादिना । अनिर्ज्ञाताकरं दण्डकारण्यवर्णनपरं पद्यमिदम् । दशरथाज्ञापालनदृढयुक्तः स्वभुजमात्रसहायः (एककः) रामो यस्मिन् अरण्ये निवसन् रक्षसां क्षयं चकार तत् खलु इदमरण्यम् (रामस्य निवासेन पराक्रमेण च पूतम्) इत्यर्थः । अत्र रामस्योदात्तं चरित्रं दण्डकारण्यस्याङ्गतां नीतमिति लक्षणसमन्वयः । महाविपदाणां रसादीनां वर्णनीयवस्त्वङ्गभावो द्वितीयमुदात्तमिति वा लक्षणार्थः । तत्रापि इदमेवोदाहरणम् । वर्णनीये दण्डकारण्ये वीरो रसोऽङ्गतां प्राप्त इति तन्मते लक्षणसमन्वयः । द्वितीये व्याख्यानेऽपि अत्र चमत्कारजनने कर्तव्येऽपि रसादेरप्राधान्यमिति न ध्वनित्वं न वा गुणीभूतव्यङ्ग्यत्वमिति सम्भवत्येव चित्ररूपस्याऽप्यलङ्कारस्यैतल्लक्षणमित्याशयेनाह्—**न चात्रे**त्यादिना । यदि द्वितीयं व्याख्यानं ग्रन्थकृतोऽनभिमतमभविष्यत् तर्हि **न चात्रेत्यादि** व्यर्थमभविष्यत्, न हि अलङ्कारयुक्ते काव्ये रसध्वनेःस्थितावपि कश्चिद् दोष इति ॥उदा० ५९७ ॥ (३२) ।

हेतुनिर्देशविरोधवैचित्र्यमूलान् अलङ्कारान् प्रतिपादयन् हेतुसमुच्चयरूपं समुच्चयमलङ्कारं निरूपयति —तत्-सिद्धीत्यादिना । लक्षणं वृत्तौ स्फुटम् ।

समुच्चयोदाहरणं निर्दिशति—**दुर्वाराः स्मरमार्गणा** इत्यादिना । मयूरसूनोः शङ्ककस्य पद्यमिदमिति शार्ङ्गधरपद्धतौ सूच्यते ।कञ्चिद् युवकमुद्दिश्य प्ररूढरागाया अविवाहिताया युवत्या धात्रीं प्रति उक्तिरियम् । मदनवाणाः वारयितुमशक्याः, प्रियतमः स युवा दूरेऽस्ति, मनस् तं प्राप्तुम् अतीव उत्सुकम् अस्ति, प्रेम च अतीव उत्कटम् अस्ति, मदीयं

अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वन्ति, तदुपरि प्रियतमादूरस्थित्या-द्युपात्तम् ।

एष एव समुच्चयः सद्योगेऽसद्योगे सदसद्योगे च पर्यवस्यतीति न पृथग् लक्ष्यते । तथाहि—

कुलममलिनं भद्रा मूर्तिर् मतिः श्रुतिशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजंस् त एव तवाऽङ्कुशाः ॥उदा० ५९९॥

अत्र सतां योगः; उक्तोदाहरणे तु असतां योगः ।

शशी दिवसधूसरो विगतयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।

यौवनम् अपि नवम्, प्राणा अपि सुखेन बहिर् न यान्ति, पितृकुलञ्च अतिनिर्मलम् इति न स्वैरमभिसर्तुमपि उचितम्, स्त्रीत्वं च धैर्यविरोधि इति न च धैर्यं धारयितुं शक्यम्, वसन्तरूपोऽयं कालश्च विरहिणीशत्रुर् मन्मथसुहृदस्ति, दैवं च क्षमारहितम्. चतुराः सखीरूपा दूत्योऽपि न सन्ति, इत्थं सति अयं शठः (मर्मभेदी) विरहः कथन् नु खलु सोढुं शक्य इत्यर्थः । [illegible] कर्तुं समर्थेषु स्मरमार्गणेषु सत्सु अपि प्रियतमदूर-स्थित्यादयोऽन्येऽपि [illegible] उपात्ता इति समुच्चयोऽत्र बोध्य इत्याह—**अत्र विरहासहत्वमित्यादिना**। **विरहासहत्वं** विरहस्याऽसह्यत्वं [illegible] वा ॥उदा० ५९८॥

रुद्रटेन काव्यालङ्कारे सुखावहानां योगः, दुःखावहानां योगः, सतोर्योगः, असतोर्योगः, [illegible] इति प्रकारभेदेन समुच्चयोऽनेकधा लक्षितः(७।१९-२६), किन्तु अस्मल्लक्षित एक एव समुच्चयो नानाविधतां भजते इत्याह—**एष एवेत्यादिना**।

सतां योगे समुच्चयमुदाहरति—**कुलममलिन**मित्यादिना । हे राजन्, व्यभिचार-पातित्य-दारिद्र्यादि स्पर्शरहितङ् कुलम्, शोभनं शरीरम्, शास्त्रपरिष्कृता बुद्धिः, सर्वकार्य-समर्थं बाहुबलम्, समृद्धा सम्पत्तिः, अकुण्ठम् प्रभुत्वम् इति एते भावा प्रकृत्यैव शोभनाः अतोऽमीभिर् भावैरयं मनुष्यः सुतराम् अवलेपं धत्ते, तव तु ते एव भावाः दर्पधारणादि-प्रमादपतनप्रतिबन्धका भवन्तीत्यर्थः । अत्र निर्मलकुलरूपे असतां दर्पस्य सता दर्पाभावस्य च हेतौ सत्यैव सौन्दर्यादयोऽपि दर्पस्य अदर्पस्य च सम्पादकत्वेन उक्ता इति समुच्चयो बोध्यः । अत्र निर्मलकुलादयः सर्वे सन्त इति सद्योगे समुच्चयोऽत्र बोध्यः ॥उदा०५९९॥

असतां योगे समुच्चयः प्रथममेवोदाहृतः तत्र स्मरमार्गणादीनां शोभनानामपि विरहि-विषयतया अशोभनानां दुर्वारत्वादिप्रदर्शनेन 'कथं सोढव्य इत्थं शठः' इत्युक्त्या च अशो-भनत्वप्रकर्षप्रापितानां समुच्चयाद् इति सूचयित्वा सदसतोर्योगे समुच्चयमुदाहरति—

प्रभुर् धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥उदा० ६००॥

अत्र शशिनि धूसरे शल्ये शल्यान्तराणीति शोभनाशोभनयोगः ।

(सू० १४०) .... **स त्वन्यो युगपद् या गुणक्रियाः ॥११५॥**

गुणौ च क्रिये च गुणक्रिये च गुणक्रियाः ।

क्रमेणोदाहरणम्—

(क) विदलित-सकलाऽरि-कुलं तव बलमिदमभवदाशु विमलं च ।
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ॥ ६०१॥

शशी दिवसधूसर इत्यादिना । नीतिशतके पद्यमिदम् । भट्टवृद्धः पद्यमिदमिति सुभाषितावलौ वल्लभदेवः (३४५८) दिवसेन धूसरता प्राप्तश्चन्द्रः, अतीततारुण्या रमणी, हिमोपहतकमलं सरः, परिचितलिदिगताक्षरं च्चारुण्यमधर्यं शोभनाकृतेः पुरुषस्य मुखम्, इज्याध्ययनदानादिशून्यो धनसञ्चयमात्रतत्परोऽधिपः, सततं दरिद्रः सज्जनः, राजगृहं प्रविष्टो दुर्जनश्चेतीमानि सप्त मम हृदि लग्नानि शल्यानीत्यर्थः । अत्र धूसरे शशिनि हृदयशल्यकार्यकारिणि सति गलितयौवनकामिन्यादीन्यपि हृद्गतशल्यकार्यकारीणि उपात्तानीति समुच्चयो बोध्यः । अत्र च शशिनः शोभनत्वं प्रकृतिसौन्दर्यात् तस्यैवाऽशोभनत्वं च धूसरत्वप्रतिपादनात्, एवं चाऽस्य सदसद्रूपस्य तादृशैरेव कामिनीप्रभृतिभिर् योगाद् इह सदसद्योगः । यद्यपि नृपाङ्गनगतः खल इत्यत्र नृपाङ्गनगतत्वेन शोभनत्वं खलत्वेनाशोभनत्वम् इति, अत्र श्लोके तु विशेष्यस्य शोभनत्वं विशेषणस्य अशोभनत्वं प्रक्रान्तमिति प्रक्रमो भग्नः तथापि विपर्ययेणापि शोभनत्वाशोभनत्वे प्रदर्शयितुं तथा निबद्धमिति अदोषतेति केषाञ्चिदभिप्रायः; अन्ये तु नृपाङ्गनगत इत्यस्य विशेष्यत्वं खल इत्यस्य विशेषणत्वं विवक्षितमिति वदन्ति । वृत्तौ शोभनाऽशोभनयोग इत्यत्र शोभनाश्च अमी अशोभनाश्चेति विशेषणोभयपदः कर्मधारयः, न तु द्वन्द्वः, द्वन्द्वत्वे तु सहचरभिन्नत्वरूपस्य भग्नप्रक्रमत्वरूपस्य च दोषस्य प्रसङ्गादस्य भेदस्य अलङ्कारतायाः प्रतिपादनं व्याहतं स्यादिति च वदन्ति । विवेकयुक्ते मुद्रितपुस्तके तु 'शोभनाशोभनयोर् योगः' इति वृत्तौ पाठः । न च द्वन्द्वे व्याहतिः उक्तदोषापवादत्वेनाऽपि अस्यालङ्कारस्य स्थितेः सम्भवात् ॥ उदा० ६०० ॥

समुच्चयस्य प्रकारान्तरं गुणक्रियासमुच्चयमूलं दर्शयति—**स त्वन्य इत्यादिना** । या गुणक्रिया एककाले भवन्ति स तु अन्यप्रकारकः समुच्चय इत्यर्थः । गुणौ च क्रिये च गुणक्रियाः, गुणश्च क्रिया च गुणक्रिये इति द्वन्द्वः, ततः गुणक्रियाश्च गुणक्रिये च गुणक्रियाः इत्येकशेष इत्यभिप्रायेणाह—**गुणौ चेत्यादि** । द्विवचनमविवक्षितमिति गुणादीनां बहुत्वेऽपि समुच्चयो ज्ञेयः ॥११५॥

गुणसमुच्चयमुदाहरति—**विदलितेत्यादि** । रुद्रटेनोदाहृतं पद्यमिदम् (७।२८) ।

(ख) अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपार्धरम्यैः ॥उदा० ६०२॥

(ग) कलुषं च तवाऽहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥उदा० ६०३॥

'धुनोति चाऽसिं तनुते च कीर्तिम्' (उदा० ६०४) इत्यादेः, **'कृपाणपाणिश्च भवान् रणक्षितौ ससाधुवादाश्च सुराः सुरालये'** (उदा० ६०५) इत्यादेश्च दर्शनाद् 'व्यधिकरणे' इति 'एकस्मिन् देशे' इति च न वाच्यम् ।

(सू० १८१) एकं क्रमेणाऽनेकस्मिन् पर्यायो ···· ···· ।

एकं वस्तु क्रमेण अनेकस्मिन् भवति क्रियते वा स पर्यायः ।

क्रमेणोदाहरणम्—

हे नराधिप, खण्डितसकलशत्रुकुलम् इदं तव सैन्यम् आशु विमलम् अभवत् तानि प्रकृष्टाना खलानां मुखानि मलिनानि जातानि चेत्यर्थः । आर्या जातिः । अत्र विमलत्वस्य मलिनत्वस्य च यौगपद्यं चकाराभ्यां द्योत्यते इति गुणसमुच्चयो बोध्यः ॥उदा० ६०१॥

क्रियासमुच्चयम् उदाहरति---**अयमेकपदे** इत्यादिना । विक्रमोर्वशीये (४।१०) पुरूरवस उक्तिरियम् । तया प्रियया उर्वश्या ममाऽयम् अतीव दुस्सहो वियोगोऽकस्माद् उपस्थितश्च, इदानीमेव दिवसैश्च नवस्य मेघस्योदयाद् निरातपार्धतया रम्यैर् (वर्षर्तुसम्बन्धिभिः) प्राप्तव्यञ्चेत्यर्थः । मालभारिणी वृत्तम् । भवितव्यमिति प्राप्त्यर्थकस्य भूधातोः सकर्मकस्यापि कर्मणोऽविवक्षायां भावे तव्यत्प्रत्यये रूपम्; छेद्यम् भेद्यमित्यादाविव । एवं च आवश्यकत्वोपलक्षितं प्रापणमित्यर्थः । वियोगोपस्थिति-दिनप्राप्तिरूपयोः क्रिययोः समुच्चयोऽत्र बोध्यः ॥ उदा० ६०२ ॥

गुणक्रियासमुच्चयमुदाहरति---कलुषमित्यादिना । हे महीपतीन्द्र, श्वेतकमलतुल्यशोभं तव चक्षुः शत्रुविषये अकस्मात् क्रोधकषायं च, शत्रूणां शरीरे [illegible] प्रस्फुटं यथा स्यात् तथा पतितञ्चेत्यर्थः । अत्र कलुषत्व-पतनयोर् गुणक्रिययोः यौगपद्यं चकाराभ्यां द्योत्यते इति समुच्चयो बोध्यः ॥ उदा० ६०३ ॥

रुद्रटेन 'व्यधिकरणे वा यस्मिन् गुणक्रिये चैककालमेकस्मिन् । उपजायेते देशे समुच्चयः स्यात् ततोऽन्योऽसौ' (७।२७) इति उक्त्वा लक्षणे यद् 'व्यधिकरणे' इति 'एकस्मिन् देशे' इति च निवेशितं तदनावश्यकम्, धुनोतीत्यादौ एकाधिकरणे समुच्चयस्य दर्शनात्, कृपाणपाणिश्चेत्यादौ अनेकस्मिन् देशे च समुच्चयस्य दर्शनादित्याह—**धुनोतिचासिमित्यादिना** । (३३)

पर्यायस्य यौगपद्यवैपरीत्यात् समुच्चयानन्तरं पर्यायं निरूपयति—**एकं क्रमेणे**त्यादिना । लक्षणं वृत्तौ सुस्पष्टम् ।

(क) नन्वाश्रयस्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ कण्ठेऽधुना वससि वाचि पुनः
खलानाम् ॥ उदा० ६०६॥

यथा वा—

विम्बोष्ठ एव रागस् ते तन्वि पूर्वमदृश्यत ।
अधुना हृदयेऽप्येष मृगशावाक्षि लक्ष्यते ॥उदा० ६०७॥

रागस्य वस्तुतो भेदेऽपि एकतया अध्यवसितत्वाद् [illegible] ।

(ख) श्रोणीवन्धस् त्यजति तनुतां सेवते मध्यभागः
पद्भ्याम् मुक्तास् तरलगतयः संश्रिता लोचनाभ्याम् ।
धत्ते वक्षः कुचसचिवतामद्वितीयं च वक्त्रं
तद्गात्राणां गुणविनिमयः कल्पितो यौवनेन ॥उदा० ६०८॥

(क) एकस्य वस्तुनः क्रमेण अनेकस्मिन् भवनेन युक्तं पर्यायमुदाहरति—**नन्वाश्रये** त्यादिना । हे कालकूटाख्य विष, प्रथमं समुद्रस्य बुक्कायां वसमि, ततः परं महादेवस्य गले वससि, ततः परं पुनः खलानां वचने वससि इति उत्तरोत्तरविशिष्टस्थाना इयम् आश्रयरीतिः तव केन उपदिष्टेत्यर्थः । अत्र कालकूटस्य अनेकत्र भवन वर्णिनमिति पर्यायालङ्कारोऽत्र बोध्यः ॥ उदा० ६०६ ॥

आरोपवशादेकत्वं प्राप्तस्य वस्तुनोऽनेकस्मिन् भवनेऽपि पर्यायो भवतीति सूचयितुमुदाहरणान्तरमाह—**बिम्बोष्ठ एवे**त्यादि । पद्मगुप्तप्रणीते नवसाहसाङ्कचरिते पद्यमिदम् (६।६०) । हे तन्वि, प्रथमं तव बिम्बसदृशे ओष्ठे (अधरे) एव रागोऽदृश्यत, हे बालमृगाक्षि अधुना तु स एव रागस् तव हृदयेऽपि दृश्यते इत्यर्थः । अत्र एक एव रागः क्रमेण अधरे हृदये च भवतीति पर्यायो बोध्य इति ग्रन्थकर्तुराशयः । रागशब्दबोध्ययोर् लौहित्य-प्रेम्णोरेकत्वेनाध्यवसायाद् उदाहरणत्वमुपपद्यते इत्याह—**रागस्य वस्तुत** इत्यादिना । वस्तुतस्तु हृदयेऽपीति अपिशब्दाद् यौगपद्यमेव प्रतीयते न तु क्रम इति अस्य पर्यायोदाहरणत्वं चिन्त्यमेव ॥ उदा० ६०७ ॥

(ख) एकेन वस्तुना क्रमेण अनेकस्मिन् क्रियमाणेन युक्तं पर्यायमुदाहरति—**श्रोणीवन्ध** इत्यादिना। इदमुदाहरणं झङ्कीकरेण मूलेऽपठितमपि रुचक-श्रीधर-माणिक्यचन्द्र-सोमेश्वरादिभिः प्राचीनैः टीकाकारैः पाठविशेषत्वेनोल्लिखितमित्यस्माभिरपि मूले पठ्यते । यद्यपीदमुदाहरणं श्रीधरादिमते प्रथमम्, परीखेण च द्वितीयत्वेन पठितं तथापि उदाहरणक्रमौचित्यानुरोधादस्माभिरत्र पठ्यते । राजशेखरकृते बालभारते (१।२८) स्वयंवरसमये द्रौपदीं दृष्टवतो भीमस्योक्तिरियम् । द्रौपद्यास् त्रिकपार्श्वभागः कृशतां त्यजति, कटिभागः कृशतां सेवते, पादाभ्यां चञ्चलगतयस्त्यक्ताः, लोचनाभ्यां चञ्चलगतयः स्वीकृताः, उरः-

[यथा वा—]

तं ताण सिरि-सहोअर-रअणा-ऽऽहरणम्मि हिअअमेक्करसं ।
बिम्बाहरे पिआणं णिवेसिअ कुसुमबाणेन ।।उदा० ६०९।।

(सू० १८२) .... **ऽन्यस् ततोऽन्यथा ।**

अनेकमेकस्मिन् क्रमेण भवति क्रियते वा सोऽन्यः (पर्यायः) ।

क्रमेणोदाहरणम्—

(क) मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति ।
अथ प्रथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तदेव ।।उदा० ६१०।।

(ख) तद् गेहं नतभित्ति मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर् जरती नदन्ति करिणामेता घनाभा घटाः ।

स्थलं अद्वितीयत्वं (कुचरूपद्वितीयराहित्यम्) परित्यज्य कुचद्वितीयतां धत्ते, मुखम् अद्वितीयताम् (निरुपमत्वम्) धत्ते इति यौवनेन द्रौपदीगात्राणां परस्परं गुणविनिमयः कल्पित इत्यर्थः । अत्र श्रोणीबन्धादीनां प्राथमिकं तनुताद्याधारत्वमार्थम् इति तनुत्वादेरेकैकस्य श्रोणीबन्धादौ अनेकत्र स्थितिर् यौवनेन कल्पिता इति पर्यायो बोध्यः । एकस्थानस्थितस्य वस्तुनः स्थानान्तरप्राप्तिमात्रमत्र विनिमयपदेन विवक्षितं बोध्यम् ।। उदा० ६०८ ।।

एकत्र स्वयं स्थितस्य अन्यत्र क्रियमाणस्य चैकस्य वस्तुनः क्रमेणाऽनेकस्मिन् सम्बन्धेऽपि पर्यायो भवतीति पूर्वस्मिन्नुदाहरणान्तरमाह—**तं ताणेत्यादि** । **'तत् तेषां श्रीसहोदररत्नाहरणे हृदयमेकरसम् । बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन'** इति संस्कृतच्छाया । आनन्दवर्धनकृतायां विषमबाणलीलायां पद्यमिदम् । कौस्तुभाहरणविषये एकाग्रं तेषामसुराणां तद् हृदयम् मदेन प्रियाणां बिम्बाधरे निवेशितमित्यर्थः । अत्र हृदयं कौस्तुभे स्वतः स्थितं बिम्बाधरे मदनेन स्थापितमिति एकस्याऽनेकत्र क्रमेण सम्बन्धाद् उपर्युक्तप्रकारद्वयमिश्रः पर्यायो बोध्यः ।।उदा० ६०९।।

पर्यायस्य प्रकारान्तरमाह—**अन्यस् ततोऽन्यथेति** । पूर्वं यद् एकमनेकस्मिन् भवति क्रियते वा स पर्याय इति उक्तमिति अत्र तद्वैपरीत्येन यद् अनेकम् एकस्मिन् क्रमेण भवति क्रियते वा स पर्याय इत्यन्यविधोऽयं पर्याय इत्यर्थः ।

अनेकस्य एकस्मिन् क्रमेण भवने पर्यायमुदाहरति—**मधुरिमरुचिरमित्यादिना** । मधुरिम्णा रुचिरं खलाना वचनम् अहो प्रथमम् बहुलम् अमृतं प्रकाशयति, अथ विवेचनादूर्ध्वं तु तदेव खलवचनं मोहहेतुम् अन्तर् निलीय वर्तमानमिव हालहलाख्यं विषं प्रकटयतीत्यर्थः । अत्र एकस्मिन् खलवचने अमृतव्यञ्जकत्वस्य विषव्यञ्जकत्वस्य च स्थितेर् वर्णनात् पर्यायालङ्कारोऽत्र बोध्यः ।।उदा० ६१०।।

अनेकस्य एकस्मिन् क्रमेण स्थापने पर्यायमुदाहरति—**तद् गेहमित्यादिना** । ध्वन्यालोके उदाहृतं पद्यमिदम् (३।१६ वृत्तौ) । सुदाम्नो गृहमधिकृत्य कस्यचिदुक्तिरियमिति

स क्षुद्रो मुसलध्वनिः कलमिदं सङ्गीतकं योषिता—
माश्चर्यं दिवसैर् द्विजोऽयमियतीं भूमिं समारोपितः ॥उदा० ६११॥

अत्रैकस्यैव हानोपादानयोरविवक्षितत्वाद् न परिवृत्तिः।

(सू० १८३) **अनुमानं तदुक्तं यत् साध्य-साधनयोर् वचः ॥११६॥**

पक्षधर्मान्वयव्यतिरेकित्वेन त्रिरूपो हेतुः साधनम्। धर्मिण्ययोगव्यवच्छेदो व्यापकस्य साध्यम्। यथा—

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत् तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः।
तच् चक्रीकृतचापमञ्चितशरप्रेङ्खत्-करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदाऽऽसां स्मरः ॥उदा० ६१२॥

वदन्ति। अस्य द्विजस्य **तत्** पूर्वदृष्टं आनतकुड्यकं भवनम् इदञ्चेदानीं व्योमप्रविष्टशिखरं हर्म्यम्; **सा** पूर्वदृष्टा जरती गौः, इदानीं तु एता मेघतुल्या हस्तिना श्रेणयो नदन्ति; **स** पूर्वमनुभूतः (जनस्य दौर्बल्यात् कुट्टनीयधान्यस्य आल्प्याच्च) क्षुद्रो मुसलध्वनिः, इदानीं तु इदं प्रमदानां मधुरं गानवादननर्तनम् इति आश्चर्यमस्ति यत् कतिभिश्चिदेव **दिवसैः** द्विजः एतावती समृद्धिभूमिकां प्रापित इत्यर्थः। अत्र एकस्मिन् द्विजे तद्गेहैतन्मन्दिरादीनां बहूनां पदार्थानां क्रमेण सम्बन्धो दिवसैः सम्पादित इति वर्णनाद् उक्तप्रकारकः पर्यायो बोध्यः। अत्रोदाहरणे एकेन कृतयोः समर्पण-ग्रहणयोरविवक्षितत्वात् परिवृत्तिरलङ्कारो भवतीत्याह—**अत्रैकस्यैवे**त्यादिना ॥६११॥

यद्यपि पर्यायोऽनुपदं निरूपितस् तथापि समुच्चयदैपरीत्यात् तस्य निरूपणंप्रस्ता-वस्तु हेतुनिवेशविशेषवैचित्र्यमूलानामलङ्काराणामिति अनुमानेऽपि हेतोः सम्बन्धादनु-मानालङ्कारमाह—**अनुमानं तदुक्त**मित्यादिना। साध्यप्रतीतिनिमित्तत्वेन साधनस्य रमणी-यार्थविषयस्य वचनमनुमानमित्यर्थः। पक्षधर्मत्वेन अन्वयवत्त्वेन (सपक्षसत्त्वेन) व्यतिरेक-वत्त्वेन (विपक्षव्यावृत्तत्वेन) च सम्पन्नो यस्त्रिलक्षणो हेतुः स साधनमुच्यते इत्याह—**पक्षधर्मे**त्यादिना धर्मिणि पर्वतादौ पक्षे साधन-व्यापकस्य वह्न्यादेः अयोगव्यवच्छेदोऽस्तित्वं साध्यम्। एवं च पक्षे व्यापकस्य लिङ्गिनः संसर्गस्य नियमः साध्यत्वमिति बोध्यम्।

वस्तुसौन्दर्याद् हृदयस्यावर्जकम् आकारेण तार्किकानुमानतुल्यमनुमानमुदाहरति—**यत्रैता** इत्यादिना। यस्मात् खलु एता तरङ्गचञ्चलप्रान्तनयना यत्र भ्रुवं व्यापारयन्ति (कटाक्षेण पश्यन्ति) तत्रैव अमी कामसम्बन्धिनो मर्मवेधिनो बाणाः सन्ततं पतन्ति तस्मात् सत्यमेव आसाम् अग्रत एव क्रोधनः आकृष्टशरव्याप्रियमाणहस्त प्रमदाशासनप्रचारको मदनः प्रमदाशासनपराङ्मुखमधिकृत्य भृशमाकर्षणेन मण्डलीकृतं चापं यस्मिन् कर्मणि यथा स्यात् तथा धावतीत्यर्थः अत्र प्रमदानां कटाक्षेण स्मरबाणपतनं स्मरस्य प्रमदापुरो-गामित्वे साध्ये साधनत्वेनोक्तमित्यनुमानालङ्कारो बोध्यः ॥उदा० ६१२॥

साध्यसाधनयोः पौर्वापर्ये यथा न वैचित्र्यं किञ्चिदिति न तथा प्रदर्शितम्।
(१८४) **विशेषणैर् यत् साकूतैरुक्तिः परिकरस् तु सः।**
अर्थाद् विशेष्यस्य। उदाहरणम्—

महौजसो मानधना धनार्चिता धनुर्भृतः संप्रति लब्धकीर्तयः।
न संहतास् तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः
समीहितुम् ॥उदा० ६१३॥

यद्यपि अपुष्टार्थस्य [illegible] तन्निराकरणेन पुष्टार्थस्य स्वीकारः कृतः, तथापि एकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे [illegible] गणितः।

(सू० १८५) व्याजोक्तिश् छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ॥११७॥

अनुमानस्य [illegible] पि त्रिधैव प्रतिपादनमुचितम् रुद्रटेन तथैव कृतं (७।५६) चेति कथं त्वया तथा न क्रियते इत्यत्राह—**साध्यसाधनयो**रित्यादिना। (३५)।

अनुमानं लिङ्गाल् [illegible] परिकरेऽपि विशेष्यणेभ्यस् [illegible] मिति किञ्चित् सादृश्यमादाय अनुमानानन्तरं परिकरं निरूपयति—**विशेषणै**रित्यादिना। साभिप्रायैर् विशेषणैर् विशेष्यस्य परिपुष्टिः परिकरोऽलङ्कार इत्यर्थः। परिकरः सामग्री कार्योत्पत्त्यनुगुणं कारणम् इत्यर्थ इति अलङ्कारस्याऽस्य परिकर इत्यन्वर्थं नाम।

[illegible]—**महौजस** इत्यादिना। महातेजस्का मानिनो दुर्योधनेन धनेन पूरिता युद्धलब्धयशस्काः सङ्घभावमप्राप्ताः दुर्योधनहितार्थम् एकीभूय कार्यकारिणो धनुर्धरा योधमुख्यास् तस्य दुर्योधनस्य प्रियाणि प्राणपणेनाऽपि कर्तुं वाञ्छन्तीत्यर्थः। अत्र महौजस इत्यादिभिर् विशेषणैः [illegible] धनुर्भृत इत्यस्य परिपुष्टिरिति परिकरालङ्कारोऽत्र बोध्यः ॥उदा० ६१३॥

परिकरस्य [illegible]—**यद्यपी**त्यादिना। वैचित्र्यस्यैवालङ्कारत्वाद् बहूनां साभिप्रायाणां विशेषणानां योगे विशिष्टस्य वैचित्र्यस्योदयाद् न खल्वस्य भावात्मकस्य विशिष्टवैचित्र्यस्य [illegible] वैचित्र्यस्य स्वतो निरूप्यत्वादित्यभिसन्धिः।

एतावानेव ग्रन्थो मम्मटेन विरचितः शेषस्तु अलकेन पूरित इति रुचक-माणिक्यचन्द्र-श्रीधरादय आहुः, तथा चेयं प्राचीनेयं गाथा—'**कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः। प्रबन्धः पूरितः शेषो विधायालकसूरिणा**'' इति। (३६)।

परिकरे विशेष्यगतस्य अनुद्भिन्नस्य वस्तुनः (गुणस्य) प्रकाशनम्, व्याजोक्तौ तु उद्भिन्नस्य वस्तुनो गोपनमिति वैपरीत्यसम्बन्धमादाय परिकरानन्तरं व्याजोक्तिमाह—

निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनाऽपि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः। न चैषाऽपह्नुतिः प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहासम्भवात्।

उदाहरणम्—

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्-
रोमाञ्चादिविसंस्थुलाखिलविधिव्यासङ्गभङ्गाकुलः।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर् दृष्टोऽवताद् वः शिवः ॥उदा० ६१४॥

अत्र पुलक-वेपथु-सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः।

(सू० १८६) किञ्चित् पृष्टमपृष्टं च कथितं यत् प्रकल्पते।
तादृगन्यव्यपोहाय परिसङ्ख्या तु सा स्मृता ॥११८॥

प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृशवस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति सा भवेत् परिसङ्ख्या। अत्र च कथनं

व्याजोक्तिरित्यादिना। निगूढमपि वस्तुनो रूपं केन चिद् निमित्तेन प्रकटतां प्राप्तं सन् केनापि विशेषेण अपदेशेन (व्याजेन) वस्त्वन्तरप्रक्षेपरूपेण यद् अपलप्यते सा व्याजस्य वचनमिति कृत्वा व्याजोक्तिरित्युच्यते इत्यर्थः। प्रकृताप्रकृतसाम्यमूलकेऽपह्नवे अपह्नुतिर् व्याजोक्तौ तु न साम्यविवक्षेति अपह्नुतेर् व्याजोक्तिर् भिन्नेत्यभिप्रेत्याऽऽह—**न चैषे**त्यादि। भट्टोद्भटस्तु इमामपह्नुतिमेव मन्यते (का० अ० सा० स० ५।५) ॥११७॥

व्याजोक्तिमुदाहरति—**शैलेन्द्रप्रतिपाद्यमाने**त्यादिना। पार्वतीपरिणयोत्सवमधिकृत्य कविः प्राह—हिमालयेन दीयमानायाः पार्वत्या हस्तस्य **उपगूहनेन** स्पर्शेन उद्गच्छता रोमाञ्चादिना अव्यवस्थस्य (असमञ्जसस्य) अखिलविवाहविधेर् विरोधस्य भयेन आकुलः सन् हिमालयस्य करयोः शैत्यं दुःखदमिति उक्तवान् हिमालयान्तःपुरे मातृमण्डलेन नन्द्यादिभिर् गणैश्च सस्मितं दृष्टश्च शिवो वो रक्षतु इत्यर्थः। उपगूहनभेदाः कामशास्त्रतोऽवगन्तव्याः (२।२।६-२८)। हस्तस्पर्शोऽपि उपगूहनशब्देनात्र लक्षणया कल्पयितव्यः। अत्र पार्वतीकरस्पर्शजन्यस्य प्रोद्भिन्नस्य सात्त्विकभावरूपस्य रोमाञ्चादेः हिमालय-हिम-करस्पर्शनिमित्तकोक्त्या गोपनाद् व्याजोक्तिर् बोध्या इत्याह—**अत्र पुलके**त्यादिना ॥ उदा० ६१४ ॥ (३७)।

व्याजोक्तावपि कस्यचित् पदार्थस्य व्यपोहाय अपलाप इति तदनन्तरं व्यपोहेन युक्तां परिसङ्ख्यामाह—**किञ्चित् पृष्ट**मित्यादिना। अन्येन पृष्टम् अपृष्टं वा किञ्चित् कथितं सत् तादृशस्य अन्यस्य व्यपोहाय यत् प्रभवति सा परिसङ्ख्येत्यर्थः। **परि** वर्जनार्थं **सङ्ख्या** कथनम् इति परिसङ्ख्या। परेर्वजनार्थकत्वं पाणिनिरपि स्मरति 'परेर्वर्जने' (१।४।८८) इति। कथितस्य अन्यव्यपोहकत्वं कथं भवतीति प्रतिपादयति—**प्रमाणान्तरे**त्यादिना। शब्दो हि अनधिगतार्थबोधकतयोपादीयते इति प्रमाणान्तरेणावगतस्यैवार्थस्य

प्रश्नपूर्वकं तदन्यथा च परिदृष्टम्, तथोभयत्र व्यपोह्यमानस्य प्रतीयमानत्वं वाच्यत्वं चेति [illegible] भेदाः ।

क्रमेणोदाहरणम्—

(क) किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो [illegible] प्रभवति ॥ उदा० ६१५ ॥

(ख) किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस् तदपरः सदसद्-
विवेकम् ॥ उदा० ६१६॥

(ग) कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर् वसति ॥ उदा० ६१७ ॥

बोधनायोपादीयमानः शब्दो व्यर्थो मा भूदिति तेन यद् [illegible] व्यवच्छेदः सा परिसङ्ख्येत्यर्थः । [illegible] भजते । इयञ्च परिसङ्ख्या प्रश्नपूर्वकेन कथनेन व्यपोह्यस्य व्यपोह्यमानतया प्रतीतौ, प्रश्नपूर्वके कथने व्यपोह्यस्य व्यपोह्यमानतया उक्तौ, अप्रश्नपूर्वकेन कथनेन व्यपोह्यस्य व्यपोह्यमानतया प्रतीतौ, अप्रश्नपूर्वके कथने व्यपोह्यस्य व्यपोह्यमानतया उक्तौ चेति चतुर्धा भवतीत्याह—**अत्र च कथन**मित्यादिना ।। ११८ ।।

(क) प्रश्नपूर्वकेन कथनेन व्यपोह्यस्य व्यपोह्यमानतया प्रतीत्या युक्तां परिसङ्ख्यामुदाहरति—**किमासेव्य**मित्यादिना । मनुष्याणां सेवनीयं किम्? गङ्गायाः पापविधूननं तटम्; एकान्ते ध्येयं किम्? [illegible] साधनीयं किम्? पुण्यम्; अभिलषणीयं किम्? दया; येषु गङ्गातटादिषु आसक्त्या चित्तम् [illegible] विमुक्त्यै समर्थं भवतीत्यर्थः । अत्र गङ्गातटादेः सेव्यत्वादिकं शास्त्रान्तरत एव सर्वैर्ज्ञातमिति न [illegible] पद्यम्, किन्तु [illegible] व्यवच्छेदायेति परिसङ्ख्याऽत्र बोध्या । अत्र प्रश्नपूर्वकेन कथनेन व्यपोह्यस्य अन्यनदीतटसेवनादेः कार्यस्य [illegible] प्रतीतिरेव न शब्देनोक्तिरिति बोध्यम् ॥ उदा० ६१५ ॥

(ख) प्रश्नपूर्वके कथने व्यपोह्यस्य व्यपोह्यमानतयोक्त्या युक्तां [illegible]हरति—**किं भूषण**मित्यादिना । सुदृढं (स्थायि) भूषणं किम्? यशः, न तु रत्नम्; कार्यं किम्? शिष्टैरनुष्ठितं सुकृतम्, न तु दोषः; अकुण्ठितं चक्षुः किम्? प्रज्ञा, न तु नेत्रम्, यतो हि **ततः** प्रज्ञानो**ऽपरो**ऽन्यः कः सदसद्विवेकम् जानाति न कोऽपीति सैव अकुण्ठितं चक्षुरित्यर्थः । अत्र अवतरणिकोक्ता—परिसङ्ख्या स्फुटा ॥ उदा० ६१६ ॥

(ग) अप्रश्नपूर्वकेन कथनेन व्यपोह्यस्य व्यपोह्यमानतायाः प्रतीत्या युक्तां परिसङ्ख्यामुदाहरति—**कौटिल्य**मित्यादिना । हे प्रिये तव केशपाशे एव कौटिल्यं वसति (न तु

(ध) भक्तिर् भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥उदा० ६१८॥

(सू० १८७) **यथोत्तरं चेत् पूर्वस्य पूर्वस्यार्थस्य हेतुता ।**
तदा कारणमाला स्यात् .... ।

उत्तरम् उत्तरम् प्रति यथोत्तरम् ।

उदाहरणम्—

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥उदा० ६१९॥

'हेतुमता सह हेतोरभिधानमभेदतो हेतुः'(रुद्रट० ७।८२) इति हेत्वलङ्कारोऽत्र न लक्षितः । आयुर् घृतम् इत्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति वैचि-

---

हृदये), ते करयोश्चरणयोरधरे च ते रागो वसति (न तु परपुरुषविषये हृदि, न तु हृदि रोष इति श्रीधरः), तव कुचयुगले कठिनत्वं वसति (न तु हृदये), तव नयनयोश्चञ्चलत्वं वसति (न तु मनसि) इत्यर्थः । अत्र कोष्ठकान्तर् लिखिता अर्थाः प्रातीतिका एवेति अवतरणिकोक्ता परिसङ्ख्या स्फुटा ॥ ६१७ ॥

(ध) अप्रश्नपूर्वकं कथने व्यपोह्यस्य व्यपोह्यतयोक्त्या युक्तां परिसङ्ख्यामुदाहरति—**भक्तिर्भवे** इत्यादिना । महतां जनाना भक्तिः महादेवे प्रायेण दृश्यते न तु लौकिके धने, धने, आसक्तिश्च तेषां शास्त्रे प्रायेण दृश्यते, न युवतिरूपे कामस्यास्त्रे, नश्येत् किमु इति चिन्ता च यशसि विषये प्रायेण दृश्यते, न तु वपुषि विषये इत्यर्थः । अत्र चतुर्थ परिसङ्ख्यात्वं स्फुटम् ॥ उदा० ६१८ ॥ (३८)

प्रसङ्गप्राप्तान् अन्यान् अलङ्कारान् निरूप्य कारणनिवेशविशेषवैचित्र्यमूलानेवालङ्कारान् निरूपयन् कारणमालां प्रतिपादयति—**यथोत्तरं चे**दित्यादिना । उत्तरमुत्तरम् अर्थम् प्रति पूर्वस्य पूर्वस्यार्थस्य हेतुत्वं यदा भवति तदा कारणमालाऽलङ्कारो भवतीत्यर्थः । 'भवन्ति नरकाः पापात् पापं दारिद्र्यसम्भवम् । दारिद्र्यमप्रदानेन तस्माद् दानपरो भव' इत्यादौ पूर्वं पूर्व प्रति परस्य परस्य कारणतायामपि कारणमालैवेति वदन्ति ।

कारणमालामुदाहरति—**जितेन्द्रियत्व**मित्यादिना । जितेन्द्रियस्यैव विद्यावृद्धसेवेति जितेन्द्रियत्वं शिक्षायाः कारणम्, शिक्षायाः गुणप्रकर्षो भवतीति शिक्षा गुणप्रकर्षस्य कारणम्, गुणप्रकर्षेण लोकोऽनुरज्यते इति गुणप्रकर्षो लोकानुरागस्य कारणम्, सम्पदो लोकानुरागमूला इति लोकानुरागः सम्पदां कारणमित्यर्थः । अत्र लक्षणसमन्वयः स्फुटः ॥ उदा० ६१९ ॥

हेतुनिवेशविशेषवैचित्र्यमूलकेषु अलङ्कारेषु हेत्वलङ्कारोऽपि लक्षणीयः, लक्षितश्चायं रुद्रटेन 'हेतुमता सह हेतोरभिधानमभेदकृद् भवेद् यत्र । सोऽलङ्कारो हेतुः स्यादन्येभ्यः

अत्रोभयेषामपि परस्परजनकता मिथः श्रीसारतासम्पादनद्वारेण।

(सू० १८९) .... **उत्तरश्रुतिमात्रतः।**

प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ॥१९०॥

असकृद् यदसम्भाव्यमुत्तरं स्यात् तदुत्तरम्

प्रतिवचनोपलम्भादेव पूर्ववाक्यं यत्र परिकल्प्यते तदेकं तावद् उत्तरम्।

उदाहरणम्—

वाणिअअ हत्थि दन्ता केत्तो अह्माण वग्घकित्तीओ।

जाव लुलिआ-लअ-मुही घरम्मि परिसक्कए सुण्हा ॥उदा० ६२२॥

हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी, मूल्येन ताः प्रयच्छेति क्रेतुर्वचनमनुना वाक्येन समुन्नीयते।

न चैतत् काव्यलिङ्गम्, उत्तरस्य तादृरूप्यानुपपत्तेः, न हि प्रश्नस्य प्रतिवचनं जनको हेतुः; नापीदमनुमानम्, एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्यलङ्कारान्तरमेवोत्तरं साधीयः।

अन्योन्यमुदाहरति—**हंसाण सरेहीत्यादिना**। **'हंसानां सरोभिः श्रीः सार्यते अथ सरसां हंसैः। अन्योन्यमेवैते आत्मानं केवलं गरयन्ति'** इतिसंस्कृतच्छाया। हंसानां शोभा सरोभिः सारीक्रियते (उत्कृष्टा क्रियते), सरसां शोभा च हंसैः सारीक्रियते, एवं च एते परस्परं केवलमात्मानमेव गुरूकुर्वन्तीत्यर्थः। अत्र हंसानां सरसां च परस्परं परस्परशोभाजननद्वारा शोभाविशिष्टं परस्परं प्रति कारणत्वाद् अन्योन्यालङ्कारो बोध्य इत्यभिप्रायेणाह—**अत्रोभयेषाम**पीत्यादिना ॥उदा० ६२१॥ (४०)।

उत्तरात् प्रश्नस्य उन्नयनेऽपि निमित्तनिमित्तिभावो मूलमिति हेतुमूलकालङ्कारप्रकरणे उत्तरालङ्कारं प्रतिपादयति—**उत्तरश्रुतिमात्रत** इत्यादिना। उत्तरश्रवणादेव प्रश्नस्य कल्पनं यत्र क्रियते तद् **उत्तरम्**, अथवा अनेकवारं प्रश्नपूर्वकं यद् असम्भाव्यम् उत्तरं तद् उत्तरमिति कारिकार्थः।

प्रथम० उत्तरं गद्येन स्फुटीकरोति—**प्रतिवचने**त्यादिना।

प्रथममुत्तरमुदाहरति—**वाणिअअ हत्थी**त्यादिना। **'वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च। यावल् लुलितालकमुखी गृहे परिष्वक्कते स्नुषा'** इति संस्कृतच्छाया। हे वाणिजक, यावत् चञ्चलालकमुखी वधूटा गृहे विलसति तावत् (वधूमुखं वीक्षमाणस्य गृहेष्वेव निद्राणस्य पुत्रस्य मृगयादितो वैमुख्यात्) अस्माकं हस्तिदन्ताः व्याघ्रचर्माणि च कुतः स्युरित्यर्थः। उदाहरणे लक्षणसङ्गतिं दर्शयति—**हस्तिदन्ते**त्यादिना। अस्य पद्यरूपस्य उत्तरवाक्यस्य श्रवणादेव वृत्त्युक्तं प्रश्नवाक्यं कल्प्यते इति उत्तरालङ्कारोऽत्रेति बोध्यम् ॥उदा० ६२२॥

ननु उत्तरवाक्यार्थस्य प्रश्नहेतुत्वाद् इदं हेतोर्वाक्यार्थत्वे काव्यलिङ्गमेवेत्याशङ्कायामाह—**न चैतदि**त्यादि। काव्यलिङ्गस्य जनकहेतुविषयकत्वात् प्रश्नं प्रति उत्तरस्य च जनकहेतुत्वाभावाद् उत्तरवाक्यार्थस्य हेतुत्वानुपपत्तिरिति नेदं काव्यलिङ्गमित्यर्थः।

प्रश्नादनन्तरं [illegible] यदसम्भाव्यरूपं प्रतिवचनं स्यात् तदपरम् उत्तरम्। अनयोश्च [illegible] न [illegible] इति असकृदि[illegible] ।

[illegible]—

का विसमा देव्वगई किं लद्धव्वं जणो गुणग्गाही ।
किं सोक्खं सुकलत्तं किं दुग्गेज्झं खलो लोओ ॥उदा० ६२३॥

[illegible] एव तात्पर्यम्, इह तु वाच्ये एव विश्रान्तिरित्यनयोर् विवेकः।

(सू० १९०) **कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ॥१२१॥**
धर्मेण केनचिद् यत्र तत् सूक्ष्मं परिचक्षते ।

कुतोऽप्याकाराद् इङ्गिताद् वा । सूक्ष्मम् तीक्ष्णमतिसंवेद्य ।

नन्वत्र उत्तरात् प्रश्नस्य कल्पना इति अनुमानमिदमित्याशङ्कायामाह—**नापीदमि**त्यादि । एकधर्मिनिष्ठतया साध्यसाधनयोर् निर्देशे अनुमानमिति "अनुमानं तदुक्तं यत् साध्यसाधनयोर् वचः" (सू० १८३) इत्यत्रोक्तम् न चात्रोत्तरे साधनस्याप्युत्तरस्य साधनत्वेनोक्तिः, साध्यस्य तु केनापि रूपेण नोक्तिरिति नेदमनुमानमित्यर्थः । एवं च उत्तरं नाम अलङ्कारान्तरमेव इत्येव युक्ततरमित्याह—*अलङ्कारान्तरमि*त्यादि । **साधीयः** अतिशयेन साधु ।

तत्र वा सतीत्यादिकारिकांशं व्याचक्षाण द्वितीयम् उत्तरं निरूपयति—**प्रश्नादनन्तर**मित्यादिना । **लोकातिक्रान्तगोचरतया** अलौकिकविषयतया । द्वितीयस्योत्तरस्य फलितं लक्षणं तु—प्रश्नपूर्वक यद् अनेकवारम् असम्भाव्यम् उत्तरं तद् द्वितीयमुत्तरमिति ।

[illegible]—**का विसमेत्यादिना । 'का विषमा दैवगतिः किं लब्धव्यं जनो गुणग्राही । किं सौख्यं सुकलत्रं किं दुर्ग्राह्यं खलो लोकः'** इति संस्कृतच्छाया । उदाहरणपद्यार्थ स्फुटः; तत्र [illegible] इति स्फुटा । अन्यत्रेव प्रथमे प्रश्नेऽपि किं विषमम् इत्येव पाठः समुचितः, प्रश्ने सामान्यतयोपक्रमणस्य न्याय्यत्वात् । पुत्रो वा पुत्री वा जायते, तथापि किं जातमिति पृच्छन्तीति [illegible] (१।२।६९) ॥ उदा० ६२३ ॥

प्रश्नपरिसङ्ख्यातो द्वितीयस्योत्तरस्य भेदं प्रदर्शयति—**प्रश्नपरिसङ्ख्याया**मित्यादिना । (४१) ।

उत्तरे प्रश्नस्योन्नयनं सूक्ष्मेऽपि [illegible] सूक्ष्मालङ्कारमाह—**कुतोऽपी**त्यादिना । स्थूलबुद्धिभिरसंलक्ष्यस्य कुशाग्रीयबुद्धिभिराकाराद् इङ्गिताद् वा उपलब्धस्य सूक्ष्मस्यार्थस्य वैदग्ध्येन प्रकाशने सूक्ष्मोऽलङ्कारो बोध्यः । हृदयगताभिप्रायानुसारं स्वयमाविर्भूतोऽन्यहेतुकोऽपि वा रूपादेरन्यथाभाव आकारः,

उदाहरणम्—

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर् दृष्ट्वा भिन्नं कुङ्कुमं काऽपि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां
लिलेख ॥उदा० ६२४॥

अत्राऽऽकृतिमालोक्य कयाऽपि वितर्कितं पुरुषायितम् असिलतालेखनेन वैदग्ध्याद् अभिव्यक्तिम् उपनीतम्, पुंसामेव कृपाणपाणित्वयोग्यत्वात् ।

यथा वा—

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥उदा० ६२५॥

अत्र जिज्ञासितः सङ्केतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः ।

(सू० १९१) उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः ॥१२२॥

परः पर्यन्तभागोऽवधिर् यस्य धाराधिरोहिकया तत्रैवोत्कर्षस्य विश्रान्तिः ।

अन्यत् कुर्वाणस्याऽपि पुरुषस्य हृद्गताभिप्रायविशेषसूचकः शरीरगतवक्त्रगतचेष्टाविशेष इङ्गितम् ।

आकाराल् लक्षितस्य सूक्ष्मस्याऽर्थस्य वैदग्ध्येन प्रकाशने सूक्ष्मालङ्कारमुदाहरति—**वक्त्रस्यन्दी**त्यादिना । कस्याश्चिन्नायिकायाः काऽपि वयस्या नायिकायाः कण्ठे मुखात् स्यन्नानां स्वेदबिन्दूनां मालया भिन्नं कुङ्कुमं दृष्ट्वा तस्या नायिकाया पुरुषायितत्वं व्यञ्जयन्ती मन्दं हसित्वा नायिकाकरे खड्गाकारं लिलेखेत्यर्थः । अथ विपरीतरतौ वलगन्त्या एव वक्त्रस्यन्दिस्वेदात् कण्ठकुङ्कुमभेदः सम्भवतीति जानती चतुरा वयस्या कण्ठकुङ्कुमभेदरूपेणाकारेण लक्षितं सूक्ष्ममर्थं नायिकाकरे खड्गाकृतेर् लेखनेन वैदग्ध्येन अन्यासु वयस्यासु प्रकाशयतीति सूक्ष्मालङ्कारो बोध्य इत्याशयेनाऽऽह—**अत्राऽऽकृतिमि**त्यादिना ॥ उदा० ६२४ ॥

इङ्गिताल् लक्षितस्य सूक्ष्मस्यार्थस्य वैदग्ध्यप्रकाशने सूक्ष्मालङ्कारमुदाहरति—**सङ्केतकाले**त्यादिना । ध्वन्यालोके उदाहृतं (२।३६) पद्यमिदम् । चतुरया कयाचिद् नायिकया विटं सङ्केतकालजिज्ञासायुक्तमनसं केनाऽपि विटगतेनेङ्गितेन ज्ञात्वा **हसद्भ्याम्** उत्फुल्लाभ्यां नेत्राभ्याम् अर्पितम् आकूतम् (अभिप्रायविशेषः) यत्र तादृशं लीलाकमलं सङ्कोचितमित्यर्थः । सङ्केतकालमनसं विटं ज्ञात्वा इति वचनाद् विटसम्बन्धिन इङ्गितस्य ज्ञानमपि प्रतीयते, एवं च इङ्गितात् सङ्केतकालजिज्ञासां विदित्वा कमलनिमीलनरूपया लीलया सङ्केतकालसूचनेन सङ्केतकालजिज्ञासाया विदितत्वमभिव्यक्तमिति अत्र सूक्ष्मोऽलङ्कारो बोध्य इत्याशयेनाऽऽह—**अत्र जिज्ञासित** इत्यादिना ॥उदा० ६२५॥(४२)

सारोऽपि सूक्ष्मो भवतीति प्रसङ्गात् सूक्ष्मानन्तरं सारालङ्कारमाह—**उत्तरोत्तरमि**त्यादिना । पर्यन्तभागे विश्रान्तो धारावाहितया उत्तरोत्तरमुत्कर्षः सार इत्यर्थः ॥१२२॥

उदाहरणम्—

राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्[illegible] ॥उदा० ६२६॥

(सू० १९२) **भिन्नदेशतयाऽत्यन्तं कार्यकारणभूतयोः ।**
युगपद् धर्मयोर् यत्र ख्यातिः सा स्यादसङ्गतिः ॥१२३॥

इह यद्देश कारणं तद्देशमेव कार्यमुत्पाद्यमानं दृष्टं यथा धूमादि । यत्र तु हेतुफलभूतयोरपि धर्मयोः केनापि अतिशयेन [illegible] युगपदवभासनं सा तयोः स्वभावो[illegible]ङ्गतिः ।

उदाहरणम्—

जस्से अ वणो तस्से अ वेअणा भणइ तं जणो अलिअं ।
दन्तक्खअं कवोले बहूइ वेअणा सवत्तीणं ॥उदा० ६२७॥

सारोदाहरणं प्रदर्शयति—**राज्ये सार**मित्यादिना । राज्ये सारं पृथ्वी, पृथ्व्यां सारं पुरम्, पुरे सारं प्रासादः, प्रासादे सारं तल्पम्, तल्पे सारम् अनङ्गसर्वस्वरूपा वराङ्गनेत्यर्थः । अत्र पूर्वपूर्वापेक्षया उत्तरोत्तरस्य सारत्वेन उत्कर्षस्य अन्तिमे विश्रान्तत्वेन च वर्णनात् सारालङ्कार स्फुटः । अत्र 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इति कोषात् सारशब्दस्य पुंलिङ्गता समुचिता तथापि कवयो नपुंसकत्वेनापि एतस्मिन्नर्थे सारशब्दं प्रयुञ्जते । सारे अन्यव्यपोहे तात्पर्यस्याऽप्रतीतेर् न चाऽयं [illegible]वतीति बोध्यम् ॥ उदा० ६२६ ॥ (४३) ।

अ[illegible]ङ्गतावपि कारणस्य [illegible] कारणमूलकालङ्कारप्रसङ्गे एव असङ्गतिं [illegible]—**भिन्नदेश[illegible]**[illegible] । यत्र [illegible] धर्मयोरत्यन्तं भिन्नदेशतया एककाले अवभासनस्य कथनं भवति तत्र असङ्गतिरलङ्कारो भवतीत्यर्थः । असङ्गतिरिति नाम्नोऽन्वर्थतां [illegible]—**इह यद्देश**[illegible] ।

असङ्गतिमुदाहरति—**जस्सेअ वणो** इत्यादिना । **'यस्यैव व्रणस् तस्यैव वेदना भणति तज्जनोऽलीकम् । दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम्'** इति संस्कृतच्छाया । गाथासप्तशत्यां वेबरसम्पादितायां (९८१) पद्यमिदम् । यस्य व्रणो भवति तस्यैव वेदना भवतीति यज् जनो भणति तद् असत्यम्, यतो हि एकस्या वध्वाः कपोले प्रियकृतं दन्तक्षतं भवति वेदना तु तत्सपत्नीना भवतीत्यर्थः । अत्र क्षतवेदनाऽन्या अन्या च तद्दर्शनेर्ष्यासमुत्था वेदनेति वस्तुस्थितावपि वेदनयोरभेदस्याऽध्यवसायाद् [illegible]स् तामुपजीव्य अस्योदाहरणस्य सङ्गतिर्बोध्या । [illegible]भङ्गनिवारणाय च **जस्सेअ खअं तस्सेअ** इत्यादि पठनीयम् ॥ उदा० ६२७ ॥

भिन्नदेशकयोः एकदेशकत्वस्यापात इव एकदेशकयोर् भिन्नदेशकत्वस्य आपातेऽपि विरोध एवेति विरोधतो (विरोधाभासतो) न पृथग्भूतोऽयमलङ्कार [illegible]माह—

एषा च विरोधवाधिनी, न विरोधः, भिन्नाधारतयैव द्वयोरिह विरोधिनोः प्रतिभासात्। विरोधे तु विरोधित्वमेकाश्रयनिष्ठमनुक्तमपि पर्यवसितम् अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थिते। तथा चैव निदर्शितम्।

(सू० १९३) **समाधिः सुकरं कार्यं कारणान्तरयोगतः।**

साधनान्तरोपकृतेन कर्त्रा यदक्लेशेन कार्यमारब्धं सम्यगाधीयते स समाधिर् नाम।

उदाहरणम्—

मानमस्या निराकर्तुं पादयोर् मे पतिष्यत।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम्॥उदा० ६२८॥

(सू० १९४) **समं योग्यतया योगो यदि सम्भावितः क्वचित्**॥१९४॥

इदमनयोः श्लाघ्यमिति योग्यतया सम्बन्धस्य नियतविषयमध्यवसानं चेत् तदा समम्। उदाहरणम्—

एषा चेत्यादि। यद्यपि अत्राऽपि विरोधो भासते एव तथापि भिन्नाधारनिष्ठे विरोधित्वे पृथक् चमत्कृतिरिति एकाधारनिष्ठे विरोधित्वे विरोधः, भिन्नाधारनिष्ठे विरोधित्वे तु असङ्गतिरिति विषयस्य विभागाद् विरोधापवादत्वेनेयम् असङ्गतिः स्वीकृतेत्यभिप्रायः। एवं च उत्सर्गभूतो विरोधः अपवादभूतासङ्गतिविषयं परिहृत्य व्यवतिष्ठते इति बोध्यम्। तथा च विरोधस्य एकाधारनिष्ठेन विरोधित्वेन युक्तमुदाहरणम् असङ्गतेश्च भिन्नाधारनिष्ठेन विरोधित्वेन युक्तमुदाहरणमस्माभिः निदर्शितमित्याह—**तथा चैव निदर्शितमि**ति।

समाधौ कारणयोः सङ्गतिरिति प्रसङ्गाद् असङ्गत्यनन्तरं समाधिमाह— **समाधिः सुकरमि**त्यादिना। मुख्यसाधनावष्टम्भेन आरब्धं कार्यं साधनान्तरोपकृतेन कर्त्रा यत् सुखेन सम्यक् सम्पाद्यते स समाधिरित्युच्यते इत्यर्थः।

समाधिमुदाहरति—**मानमस्या** इत्यादिना। अस्या नायिकाया मानमपनेतुम् अस्याः पादयोः पतितुमारब्धवतः मम उपकाराय मद्भाग्येन खलु इदं मेघगर्जितमुद्भूतमित्यर्थः। अत्र पादपतनरूपप्रधानकारणावष्टम्भेन मानमपनेतुं प्रवृत्तेन नायकेन घनगर्जितरूपकारणान्तरोपकृतेन सुखेन मानोऽपनीयते इति प्रतीयते, अतोऽत्र समाधिरलङ्कारो बोध्यः॥ उदा० ६२८॥ (४५)।

समाधौ सम्यक् सम्पादनं समे सम्यग् योग इति सम्यक्त्वसाम्यात् समाध्यनन्तरं समं निरूपयति—**समं योग्यत**येत्यादिना। यत्र क्वचित् कयोश्चित् वस्तुनोर् योगः समुचितत्वेन सम्भाव्यते (सत्क्रियते) चेत् तत्र समं नामाऽलङ्कारो भवतीत्यर्थः। **नियतविषयम्** अभिरूपयोरेव अनभिरूपयोरेव वाऽपि द्वयोस् सङ्गतं विषयीकुर्वद् इदमनयोः श्लाघ्यमिति या उचितता तया जनित सम्बन्धस्य (उचितत्वेन) अध्यवसानं (निश्चयः) भवति चेत् तदा समालङ्कारो भवतीति वृत्तेरर्थः।

धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
रूपे देवोऽप्ययमनुपमो दत्तपादः स्मरस्य ।
जातं दैवात् सदृशमनयो सङ्गतं यत् तदेतच्
शृङ्गारस्योपनतमधुना राज्यमेकातपत्रम् ॥उदा० ६२९॥

यथा वा—

चित्रं चित्रं बत बत महच् चित्रमेतद् विचित्रं
जातो दैवादुचितरचनासंविधाता विधाता ।
यन् निम्बानां परिणतफल-स्फीतिरास्वादनीया
यच् चैतस्याः कवलनकलाकोविदः काकलोकः ॥उदा० ६३०॥

(सू० १९५) **क्वचिद् यदतिवैषम्यान् न श्लेषो घटनामियात् ।**
कर्तुः क्रियाफलावाप्तिर् नैवाऽनर्थश् च यद् भवेत् ॥१२५॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुण-क्रिये ।
क्रमेण च विरुद्धे यत् स एष विषमो मतः ॥१२६॥

अभिरूपयोरेव द्वयोर् योगे सममुदाहरति—**धातुः शिल्पे**त्यादिना । एषा मृगाक्षी नायिका धातुर् यद् निर्माणकौशलं तदतिशयस्य निदर्शनभूता निकषरेखा अस्ति; नायकोऽयं राजाऽपि मदनस्य रूपे दत्त पादो येन तादृश (पाठान्तरे विजययात्रार्थं दत्तं पत्रं येन तादृशः) अनुपम एव अस्ति; यद् दैवाद् अनयोरनुरूपं सङ्गतं जातं तद् एतद् अधुना शृङ्गारस्य एकच्छत्रं राज्यम् उपागतमित्यर्थः । अत्र रूपेण समृद्धयोर् नायकयोर् योगः समुचितो जात इति सत्कृतः, अतोऽत्र समालङ्कारो बोध्यः ॥उदा० ६२९॥

अनभिरूपयोरेव द्वयोर्योगे सममुदाहरति—**चित्रं चित्र**मित्यादिना । यत् खलु निम्बानां पक्वफलसमृद्धिः खादनीया कृताऽस्ति, यच्च खलु एतस्या पक्वनिम्बफलसमृद्धे-रास्वादनकलापण्डितः काकलोकः कृतोऽस्ति तद् दैवाद् विधाता उचितरचनाकर्ता जात इति एतद् अतीव चित्रमित्यर्थः । चित्र-बतशब्दयोर् द्वित्वं विस्मयातिशयबोधनाय । अत्र स्फीतिरिति [illegible] पाठो हेयः, "स्फायः स्फी निष्ठायाम्" (अष्टा ६।१।२२) इति निष्ठायामेव [illegible] । तथा [illegible]—'स्फातिर् वृद्धौ' इति (३।२।९) । 'स्त्रियां क्तिन्' (३।३।९४) इति सूत्रवृत्तौ भट्टोजिदीक्षितस्य यः स्फीतिशब्दसमर्थनप्रयासः स तु [illegible]नु-चित एव । अत्र अनभिरूपयोर् निम्बफलसमृद्धिकाकलोकयो संयोगस्य [illegible]त्वात् सममलङ्कारो बोध्यः ॥ उदा० ६३० ॥ (४६) ।

विषमस्य समविपरीतत्वात् समानन्तरं विषमं निरूपयति—**क्वचि**दित्यादिना । **क्व**चिद् यद् द्वयोर् वस्तुनोर् अतिवैषम्यात् तयोर्योगः उपपद्यमानत्वं न प्राप्नुयात् स प्रथमो विषमः, यत्र कर्तुः न केवलं स्वक्रियानुरूपफलप्राप्तिः किन्त्वनर्थप्राप्तिरपि भवति स द्वितीयो विषमः, कार्यं कारणगुणानुरूपं भवतीति सामान्ये नियमे सत्यपि यत् कार्य-

द्वयोरत्यन्तविलक्षणतया यद् अनुपपद्यमानतयैव योगः प्रतीयते, (२) यच् च किञ्चिदारभमाण. कर्ता क्रियायाः प्रणाशाद् न केवलमभीष्टं तत् फलं न लभेत यावद् अप्रार्थितमपि अनर्थं विषयमासाद्येत्, (३-४) तथा सत्यपि कार्यस्य कारणरूपानुकारे यत् तयोर् गुणौ च क्रिये च परस्परं विरुद्धतां व्रजतः स सम-विपर्ययात्मा चतूरूपो विषमः ।

क्रमेणोदाहरणम्—

(१) शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना ।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः ॥उदा० ६३१॥

(२) सिंहिकासुतसन्त्रस्तः शश. शीतांशुमाश्रित ।
जग्रसे साश्रयं तत्र तमन्य. सिंहिकासुतः ॥उदा० ६३२॥

(३) सद्यःकरस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस् त्रिलोक्याभरणं प्रसूते ॥उदा० ६३३॥

(४) आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
विरहस् त्वयैव जनितस् तापयतितरां शरीरं मे ॥ उदा० ६३४॥

अत्र आनन्ददानं शरीरतापनेन विरुध्यते ।

कारणगुणौ परस्परं विरुद्धौ भवतः स तृतीयो विषमः, यच् च कार्यकारणक्रिये परस्परं विरुद्धे भवतः स चतुर्थो विषम इति सूत्रवृत्त्योः सङ्कलितोऽर्थः ॥१२५-१२६॥

(१) तत्र प्रथमं विषममुदाहरति—**शिरीषाद**इत्यादिना । नवसाहसाङ्कचरिते पद्यम् (१६।२८) इदम् शिरीषपुष्पादपि मृदूनि अङ्गानि यस्याः सेय विशालनयना नायिका क्व, अयञ्च तुषानल इव कठोरो मदनरूपोऽग्नि क्व इत्यर्थः । अत्र नायिकायाः कोमलत्वातिशयाद् मदनानलस्य कर्कशत्वातिशयात् तयोर् योगोऽनुपपद्यमान एव प्रतीयते इति प्रथमो विषमो बोद्धव्यः ॥ उदा० ६३१ ॥

(२) द्वितीयं विषममुदाहरति—**सिंहिकासुते**त्यादिना । सिंहिपुत्राद् मृगेन्द्रात् सन्त्रस्तः शशः चन्द्रमाश्रितवान् तत्र तं शशम् अन्यः सिंहिकासुतो राहुः आश्रयेण सहितमेव ग्रस्त-वान् इत्यर्थः । अत्र आश्रयलाभाय प्रवृत्तस्य शशस्य न केवलमाश्रयालाभरूपा उपात्त-क्रियाफलाऽनवाप्तिः किन्तु महानर्थप्राप्तिर् जातेति वर्णितमिति अत्र द्वितीयो विषमो बोध्यः ॥ उदा० ६३२ ॥

(३) तृतीयं विषममुदाहरति—**सद्य करे**त्यादिना । तमाल इव कृष्णा खड्गरेखा यस्य राज्ञः करस्पर्शं प्राप्य सङ्ग्रामेषु सद्य एव शरच्चन्द्रशुभ्रं त्रिलोक्या आभरणं यशः सूते इत्यर्थः । अत्र कृष्णायाः खड्गलतायाः शुक्लं यश उत्पद्यमानं वर्णितमिति कार्य-कारणगुणयो परस्परं विरुद्धत्वाद् विषमोऽलङ्कारो बोध्यः ॥ उदा० ६३३ ॥

(४) चतुर्थं विषममुदाहरति—**आनन्दममन्दे**त्यादिना । हे कमलपत्रनयने, त्वम् इमम् अमन्दम् आनन्दं ददासि, किन्तु त्वयैव जनितो वियोगस् तु मम शरीरमतिशयेन

धातुः [illegible] मृगाक्षी
रूपे देवोऽप्ययमनुपमो दत्तपादः स्मरस्य ।
जातं दैवात् [illegible] सङ्गतं यत् तदेतच्
छृङ्गारस्योपनतमधुना राज्यमेकातपत्रम् ॥उदा० ६२९॥

यथा वा—

चित्रं चित्रं बत बत महच् चित्रमेतद् विचित्रं
जातो दैवादुचितर[illegible] विधाता ।
यन् निम्बानां [illegible]
यच् चैतस्याः कवलनकलाकोविदः काकलोकः ॥उदा० ६३०॥

(सू० १९५) **क्वचिद् यदतिवैधर्म्यान् न श्लेषो घटनामियात् ।**
कर्तुः क्रियाफलावाप्तिर् नैवाऽनर्थश् च यद् भवेत् ॥१२५॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुण-क्रिये ।
क्रमेण च विरुद्धे यत् स एष विषमो मतः ॥१२६॥

अभिरूपयोरेव द्वयोर् योगे [illegible]—**धातुः शिल्पे**त्यादिना । एषा मृगाक्षी नायिका धातुर् यद् निर्माणकौशलं तदतिशयस्य निदर्शनभूता निकषरेखा अस्ति; नायकोऽयं राजाऽपि मदनस्य रूपे दत्तः पादो येन तादृशः (पाठान्तरे विजययात्रार्थं दत्तं पत्रं येन तादृशः) अनुपम एव अस्ति; यद् दैवाद् अनयोरनुरूपं सङ्गतं जातं तद् एतद् अधुना शृङ्गारस्य एकच्छत्रं राज्यम् उपागतमित्यर्थः । अत्र रूपेण समृद्धयोर् नायकयोर् योगः समुचितो जात इति सत्कृतः, अतोऽत्र सममलङ्कारो बोध्यः ॥उदा० ६२९॥

अनभिरूपयोरेव द्वयोर्योगे [illegible]—**चित्रं चित्र**[illegible]यादिना । यत् खलु निम्बानां पक्वफलसमृद्धिः खादनीया कृताऽस्ति, यच्च खलु एतस्या पक्वनिम्बफलसमृद्धे-रास्वादन[illegible] काकलोकः कृतोऽस्ति तद् दैवाद् विधाता उचितरचनाकर्ता जात इति एतद् अतीव चित्रमित्यर्थः । चित्र-बतशब्दयोर् द्वित्वं विस्मयातिशयबोधनाय । अत्र स्फीतिरिति झडकीकर-शिवप्रसादभट्ट[illegible] पाठो हेयः, "स्फायः स्फी निष्ठायाम्" (अष्टा ६।१।२२) इति निष्ठायामेव [illegible] । तथा [illegible]—'स्फातिर् वृद्धौ' इति (३।२।९) । 'स्त्रियां क्तिन्' (३।३।९४) इति सूत्रवृत्तौ भट्टोजिदीक्षितस्य यः स्फीतिशब्दसमर्थनप्रयासः स तु अ[illegible]दनु-चित एव । अत्र अनभिरूपयोर् निम्बफलसमृद्धिकाकलोकयोः संयोगस्य सत्कृतत्वात् सममलङ्कारो बोध्यः ॥ उदा० ६३० ॥ (४६) ।

विषमस्य समविपरीतत्वात् समानन्तरं विषमं निरूपयति—**क्वचि**दित्यादिना । **क्व**चिद् यद् द्वयोर् वस्तुनोर् अतिवैधर्म्यात् तयोर्योगः उपपद्यमानत्वं न प्राप्नुयात् स प्रथमो विषमः, यत्र कर्तुः न केवलं स्वक्रियानुरूपफलाप्राप्तिः किन्त्वनर्थप्राप्तिरपि भवति स द्वितीयो विषमः, कार्यं कारणगुणानुरूपं भवतीति सामान्ये नियमे सत्यपि यत् कार्य-

द्वयोरत्यन्तविलक्षणतया यद् अनुपपद्यमानतयैव योगः प्रतीयते, (२) यच् च किञ्चिदारभमाणः कर्ता क्रियायाः प्रणाशाद् न केवलमभीष्टं तत् फलं न लभेत यावद् अप्रार्थितमपि अनर्थं विषयमासादयेत्, (३-४) तथा सत्यपि कार्यस्य कारणरूपानुकारे यत् तयोर् गुणौ च क्रिये च परस्परं विरुद्धतां व्रजतः स समविपर्ययात्मा चतूरूपो विषमः।

क्रमेणोदाहरणम्—

(१) शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः ॥उदा० ६३१॥

(२) [illegible] शश [illegible] ।
जग्रसे साश्रयं तत्र तमन्यः [illegible] ॥उदा० ६३२॥

(३) सद्यःकरस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा।
तमालनीला [illegible]दिन्दुपाण्डु यशस् त्रिलोक्याभरणं प्रसूते ॥उदा० ६३३॥

(४) आनन्दममन्दमिमं [illegible] ददासि त्वम्।
विरहस् त्वयैव जनितस् तापयतितरां शरीरं मे ॥ उदा० ६३४॥

अत्र आनन्ददानं शरीरतापनेन विरुध्यते।

कारणगुणौ परस्परं विरुद्धौ भवतः स तृतीयो विषमः, यच् च कार्यकारणक्रिये परस्परं विरुद्धे भवतः स चतुर्थो विषम इति सूत्रवृत्त्योः सङ्कलितोऽर्थः ॥१२५-१२६॥

(१) तत्र प्रथमं विषममुदाहरति—**शिरीषाद**पीत्यादिना। नवसाहसाङ्कचरिते पद्यम् (१६।२८) इदम् शिरीषपुष्पापेक्षयाऽपि मृदूनि अङ्गानि यस्याः सेयं विशालनयना नायिका क्व, अयञ्च तुषानल इव कठोरो मदनरूपोऽग्निः क्व इत्यर्थः। अत्र नायिकायाः कोमलस्यातिशयाद् मदनानलस्य कर्कशत्वातिशयात् तयोर् योगोऽनुपपद्यमान एव प्रतीयते इति प्रथमो विषमो बोद्धव्यः ॥ उदा० ६३१॥

(२) द्वितीयं विषममुदाहरति—**सिंहिकासुते**त्यादिना। सिंहिपुत्राद् मृगेन्द्रात् सन्त्रस्तः शशः चन्द्रमाश्रितवान् तत्र तं शशम् अन्यः सिंहिकासुतो राहुः आश्रयेण सहितमेव ग्रस्तवान् इत्यर्थः। अत्र आश्रयलाभाय प्रवृत्तस्य शशस्य न केवलमाश्रयालाभरूपा उपात्तक्रियाफलाऽनवाप्तिः किन्तु महानर्थप्राप्तिर् जातेति वर्णितमिति अत्र द्वितीयो विषमो बोध्यः ॥ उदा० ६३२॥

(३) तृतीयं [illegible]—**सद्यः करे**त्यादिना। तमाल इव कृष्णा खड्गरेखा यस्य राज्ञः करस्पर्शं प्राप्य सङ्ग्रामेषु सद्य एव शरच्चन्द्रशुभ्रं त्रिलोक्या आभरणं यशः सूते इत्यर्थः। अत्र कृष्णायाः खड्गलतायाः शुक्लं यश उत्पद्यमानं वर्णितमिति कार्यकारणगुणयो परस्परं विरुद्धत्वाद् विषमोऽलङ्कारो बोध्यः ॥ उदा० ६३३॥

(४) चतुर्थं विषममुदाहरति—**आनन्द**मित्यादिना। हे कमलपत्रनयने, त्वम् इमम् अमन्दम् आनन्दं ददासि, किन्तु त्वयैव जनितो वियोगस् तु मम शरीरमतिशयेन

एवम्—'**विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये। मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा**' (उदा० ६३५) इत्यादावपि विषमत्वं यथायोगमनुसर्तव्यम् ।

(सू० १९६) **महतोर् यन् महीयांसावाश्रिताश्रययोः क्रमात् ।**
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥१२७॥

आश्रितम् आधेयम्, आश्रयस् तदाधार तयोर् महतोरपि विषये तदपेक्षया तनू अपि आश्रयाश्रयिणौ [illegible] यथाक्रमं यदधिकरणतां व्रजतस् तदिदं द्विविधमधिकं नाम ।

क्रमेणोदाहरणम्--

(क) अहो विशालं भूपाल भुवनत्रितयोदरम् ।
मातुमशक्योऽपि यशोराशिर् यदत्र ते ॥उदा० ६३६ ॥

तापयतीत्यर्थः । अत्र कारणभूता कमलपत्रनयना आनन्दयति, कार्यभूतो वियोगस् तु तापयतीति कारणकार्यसम्बद्धयोः आनन्दन-तापनयोः क्रिययो. परस्परं विरुद्धत्वाद् विषमोऽलङ्कारो बोध्य ॥ उदा० ६३४ ॥

प्रकारान्तरेणाऽपि विपमोऽलङ्कारः सम्भवतीति प्रदर्शयितुम् [illegible]—**एवं-विपुलेने**त्यादिना । यस्य जलशायिनो विष्णोः (श्रीकृष्णस्य) विपुलेन उदरेण प्रलय-काले चतुर्दशैव भुवनानि पीतानि स श्रीकृष्णः कयाचिद् एकया नगरकामिन्या मदविभ्र-मेण तिर्यग् विलोकने अर्धमात्रस्य प्रयुक्तया असकलया एकया दृष्टया पीतः (सतृष्ण विलोकितः) इत्यर्थ । अत्र पानपदार्थयोर् भेदेऽपि अभेदस्योपचारात् कुक्षि-शरीरयोः अवयवावयविनोः [illegible] वैषम्यमिति विषमोऽलङ्कार इति केचित्; सागरशयत्वं [illegible] विषमम् यस्य कुक्षिरेव सकलभुवनपान-समर्थस् तस्य सम्पूर्णस्याऽवयविनः स्त्रिया दृशोऽर्धेन पानमिति चापरं विषममिति अन्ये; हीनेन स्त्रिया अर्धेन लोचनेन गुरु पानरूपं कार्यं कृतमिति विपमत्वमिति श्रीधरः । एवमे-वान्येऽपि विपमप्रकारविशेषा लक्ष्यानुसारं कल्पनीया [illegible]—**यथायोगमनुसर्तव्य**मिति ॥ उदा० ६३५ ॥ (४७) ।

अधिकेऽपि आश्रयाश्रयिणोर् वैपम्यमस्तीति विषमानन्तरम् अधिकं निरूपयति—**महतोर् यदि**त्यादिना । महत आधेयस्य सम्बन्धे आधेयापेक्षया तनोरपि आधारस्य वर्ण-[illegible] यद् आधेयान् महीयस्त्वं वर्ण्यते तत् प्रथमम् अधिकम्; महत आधारस्य सम्बन्धे आधारापेक्षया तनोरपि आधेयस्य [illegible] यद् आधाराद् महीयस्त्वं वर्ण्यते तद् द्वितीयम् अधिकमिति सूत्रवृत्त्योः सङ्कलितः स्फुटोऽर्थः ॥१२७॥

आधारस्य महीयस्त्वस्य वर्णनेऽधिकमुदाहरति—**अहो विशाल**मित्यादिना । हे भूपाल

(ख) युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत ।
　　तनौ ममुस् तत्र न कैटभद्विषस् तपोधनाभ्यागमसम्भृता मुदः ॥६३७॥

(सू० १९७) **प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ।**
　　या तदीयस्य तत्-स्तुत्यै प्रत्यनीकं तदुच्यते ॥१२८।

निगृहीतुमपि विपक्षं साक्षाद् निरसितुमसमर्थेन केनाऽपि यत् तमेव प्रतिपक्षम् उत्कर्षयितुं तदीयस्य तिरस्करणं तदनीकप्रतिनिधितुल्यत्वात् प्रत्यनीकमभिधीयते । यथाऽनीकेऽभियोज्ये तत्-प्रतिनिधिभूतमपरं मूढतया केनचिद् अभियुज्यते तथेह प्रतियोगिनि विजेये तदीयोऽन्यो विजीयते इत्यर्थः ।

उदाहरणम्—

　　त्वं विनिर्जितमनोभवरूपः सा च सुन्दर भवत्यनुरक्ता ।
　　पञ्चभिर् युगपदेव शरैस्तां ताडयत्यनुशयादथ कामः ॥उदा० ६३८॥

अहो भुवनत्रितयोदरं विशालं खलु, यतो हि अत्र भुवनत्रितये विस्तृततया सम्मातुमशक्योऽपि तव यशसो राशिः सम्माति (स्थातुमवकाशं लभते) इत्यर्थः । अत्र वर्णनीयस्य यशस उत्कर्षं प्रतिपादयितुम् आधेयस्य यशसो वैपुल्येऽपि तदपेक्षया तनोरपि भुवनत्रितयरूपस्याधारस्य महत्त्वमुक्तम् भुवनत्रितये यशसो मानस्य वचनादिति अत्र प्रथमम् अधिक बोध्यम् ॥उदा० ६३६॥

आधेयस्य महीयस्ताया वर्णनेऽधिकमुदाहरति —**युगान्तकाले**त्यादिना । शिशुपालवधे (१।२३) पद्यमिदम् । प्रलयकाले स्वोदरे प्रवेशितः स्वात्मरूपः प्रपञ्चो येन तस्य श्रीकृष्णस्य यस्या तनौ जगन्ति विकासपूर्वकमेव स्थितानि अभूवन् तस्यामेव तनौ तपोधनस्य नारदस्य आगमनेन जाताः प्रीतयो न सम्मिता इत्यर्थः । अत्र वर्णनीयायाः प्रीतेः प्रकर्षं दर्शयितु कैटभारितनुरूपस्य आधारस्य वैपुल्येऽपि तदपेक्षया तन्वीनामपि प्रीतीनाम् आधेयानाम् महत्त्वमुक्तं तनौ प्रीतीनाम् अमानस्य वर्णनाद् इति अत्र द्वितीयम् अधिकम् बोध्यम् ॥उदा० ६३७॥ (४८)

प्रत्यनीकेऽपि प्रतिपक्ष-तदीययोः कश्चिद् आश्रिताश्रयभावोऽपेक्ष्यते इति आश्रयाश्रयिभावापेक्षिणोऽधिकादनन्तरं प्रत्यनीकं प्रतिपादयति—**प्रतिपक्षमि**त्यादिना । अपकारपरमपि विपक्षं साक्षात् प्रतिकर्तुमशक्तेन क्रियमाणा विपक्षसम्बन्धिनोऽन्यस्य तिरस्क्रिया विपक्षस्य स्तुत्यै यद् वर्ण्यते तत् प्रत्यनीकमित्यर्थः । सूत्रे तत्-स्तुत्यै इति पदं वृत्तौ तमेवप्रतिपक्षमुत्कर्षयितुम् इति कथनञ्च अनभिमतान्वयभ्रान्तिहरम् अलङ्कारैकीदोषसाक्षि । अनीक-[illegible] ग्रन्थस्य प्रतिपक्षसम्बन्धिन अनीक (=सैन्य) प्रतिनिधितुल्यत्वात् प्रतिपक्षसम्बन्धितिरस्कारस्य प्रत्यनीकाभियोगतुल्यत्वात् (अनीकप्रतिनिध्यभियोगतुल्यत्वात्) च लक्षणयाऽयमलङ्कारः प्रत्यनीकमुच्यते इत्यर्थः ॥१२८॥

प्रत्यनीकमुदाहरति—**त्वं विनिर्जिते**त्यादिना । नायकं प्रति नायिकादूती आह हे

यथा वा—

यस्य किञ्चिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रह ।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनाऽपि बाधते ॥उदा० ६३९॥

इन्दोरत्र तदीयता सम्बन्धिसम्बन्धात् ।

(सू० १९८) **समेन लक्ष्मणा वस्तु वस्तुना यन् निगूह्यते ।**
निजेनाऽऽगन्तुना वाऽपि तन् मीलितमिति स्मृतम् ॥१२९॥

सहजम् आगन्तुकं वा किमपि साधारणं यत् लक्षणं तद्-द्वारेण किञ्चिद् वस्तु केन चिद् वस्तुना वस्तुस्थित्यैव बलीयस्तया तिरोधीयते तद् मीलितमिति द्विधा स्मरन्ति ।

क्रमेणोदाहरणम्—

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो
विलासभरमन्थरः गतिरतीव कान्त मुखम् ।

सुन्दर, त्वं ... सा च मदीया सखी त्वयि अनुरक्ता भवति, अतो द्वेषादिव कामः तां नायिकां पञ्चभिरेव शरैः युगपदेव प्रहरतीत्यर्थः । अत्र स्वरूपगुण-प्रतिस्पर्धितया शत्रुभूतस्य नायकस्य अपकारं कर्तुमसमर्थः कामो नायकेऽनुरक्ता तदीयां नायिकां प्रतिकुर्वाणो वर्ण्यते नायकधैर्योत्कर्षप्रतिपादनायेति प्रत्यनीकम् बोध्यम् । ॥उदा० ६३८॥

न केवलं प्रतिपक्षेण सह साक्षात् सम्बद्धस्य प्रतिपक्षप्रतिनिधेः प्रतिकरणे किन्तु प्रतिपक्षेण सह परम्परासम्बन्धेन सम्बद्धस्य प्रतिनिधेः प्रतिकरणेऽपि प्रत्यनीकं सम्भवतीति प्रदर्शयितुमुदाहरणान्तरमाह—**यस्य किञ्चिदि**त्यादिना । कायस्य निग्रहेण शिरश्छेदनरूपेण हेतुना गृहीतो विरोधो येन तादृशो वैरनिर्यातने चतुरो राहुः यस्य कृष्णस्य किञ्चिदपि अपकर्तुमसमर्थः सन् कमनीयस्य मोहिनीरूपधारिणः श्रीकृष्णस्य वक्त्रेण सदृशी आकृतिर् यस्य तं चन्द्रम् अधुनाऽपि उपरागच्छलेन बाधते इत्यर्थः । अत्र कृष्णस्य (विष्णोः) साक्षात् प्रतिकर्तुमशक्तेन राहुणा कृतस्य कृष्णसम्बन्धिना मोहिन्यवतारेण सह सादृश्य-सम्बन्धेन सम्बद्धस्य (कृष्णेन सह परम्परासम्बन्धेन सम्बद्धस्य) चन्द्रस्य प्रतीकारस्य वर्णनात् प्रत्यनीकालङ्कारोऽत्र बोध्य इति सूचयति—**इन्दोर**त्रेत्यादिना ॥उदा० ६३९॥ (४९)

तिरस्कारप्रसङ्गात् प्रत्यनीकानन्तरं मीलितं निरूपयति—**समेन लक्ष्मणे**त्यादिना । यत्र केनचिद् बलीयसा वस्तुना निजम् आगन्तुकं वा वस्तुद्वयसाधारणं लक्षणमुपादाय तद्द्वारा किञ्चिद् वस्तु विगूह्यते तत्र मीलितमलङ्कारो बोध्यः इति सूत्रवृत्त्योः सङ्कलितोऽर्थः ॥१२९॥

तत्र वस्तुद्वयसाधारणं निजं लक्षणमुपादाय वस्तुना वस्तुनो तिरोधाने मीलितमुदाहरति—**अपाङ्गे**त्यादिना । अस्या मृगदृशो नेत्रे प्रान्तभागे तरले, वाण्यो मधुरैर् वक्रार्थैश्च

इति स्फुरितमङ्गके मृगदृशः स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥उदा० ६४०॥

अत्र दृक्-तरलतादिकम् अङ्गकस्य लिङ्गं स्वाभाविकं साधारणं च मदोदयेन तत्रापि एतस्य दर्शनात् ।

ये कन्दरासु निवसन्ति सदा हिमाद्रेस्
त्वत्-पात-शङ्कितधियो विवशा द्विषस् ते ।
अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधोऽप्यभिज्ञः ॥उदा० ६४१॥

अत्र तु सामर्थ्यादवसितस्य शैत्यस्यागन्तुकत्वान् तत्-प्रभवयोरपि कम्पपुलकयोस्तादृरूप्यम् । समानतया च भयेष्वपि तयोरुपलक्षितत्वात् ।

(सू० १९९) **स्थाप्यतेऽपोह्यते वाऽपि यथापूर्वं परम् परम् ।
विशेषणतया यत्र वस्तु सैकावली द्विधा ॥१३०॥**

पूर्वम् पूर्वं प्रति यथोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन यत् स्थापनं

वर्णैर् युक्ताः, गतिश्च विलासातिशयेन मन्थरा, मुखञ्च अतीव मनोहरम् इति अस्या मृगनयनाया नायिकायाः कोमले अङ्गे लीलया (कर्त्र्या) स्वत एव स्फुरितम्, तस्माद् अत्र नायिकाङ्गे प्राप्तस्थानोऽपि मधुपानजन्यो मदोदयो न विविक्ततया ज्ञायते इत्यर्थः । अत्र दृक्-तरलत्वादिकं तरुण्यङ्गके स्थितं लीलाजन्यत्वाद् लीलाया स्वाभाविकमेव लक्षणम्, मदोदयस्यापि दृक्-तरलत्वादिकं लक्षणमेवेति लीलायुताङ्गक-मदोदययोः साधारणमेवेदं दृक्-तरलत्वादिकं लक्षणम्, अतो लीलायुताङ्गरूपेण प्रसिद्धतया बलीयसा वस्तुना मदोदयसाधारणं निजं दृक्-तरलत्वादिकं लक्षणमुपादाय मदोदयरूपं वस्तु निगूह्यते इति मीलित [illegible]—अत्र **दृक्-तरलतादी**त्यादि ॥ उदा० ६४० ॥

वस्तुद्वयसाधारणम् आगन्तुकं लक्षणमुपादाय वस्तुना वस्तुनो तिरोधाने मीलितमुदाहरति—**ये कन्दरास्वि**त्यादिना । हे राजन्, ये त्वदाक्रमणशङ्काक्रान्तधियस् तव शत्रवो विह्वलाः सन्तो हिमालयस्य गुहासु सदा निवसन्ति, रोमाञ्चितं सकम्पं च अङ्गम् उद्वहतामपि सतां तेषां भीतीनां वितर्कवानपि जनोऽभिज्ञो न भवति (जाड्येनैव रोमाञ्चः कम्पश्च जनितः स्यादिति दृढतरया बुद्ध्या व्यवधानाद्) इत्यर्थः । अत्र जाड्यभयसाधारणं रोमाञ्चादिकं लक्षणमुपादाय हिमवति प्रसिद्धेन जाड्येन भयं निगूह्यते इति मीलितं बोध्यमित्याशयेनाह—**अत्र त्वि**त्यादिना ॥उदा० ६४१॥ (५०) ।

मीलिते वस्तुनो निगूहनम् एकावल्यां तु विशेषणदानेन उत्कटतीकरणमिति मीलितविपरीतत्वाद् मीलितानन्तरम् एकावलीं निरूपयति—**स्थाप्यतेऽपोह्यते** वेत्यादिना । यत्र पूर्वम्पूर्वं वस्तु प्रति यथोत्तरस्य वस्तुनः पूर्वपूर्ववस्तुमात्रव्यापकविशेषणतया विधिमुखेन निषेधमुखेन वा प्रतिपादनं क्रियते सा एकावली बोध्येति सूत्रवृत्त्योः परिनिष्ठितोऽर्थः ॥ १३० ॥

निषेधो वा सम्भवति, सा द्विधा बुधैरेकावलीति भण्यते । क्रमेणोदाहरणम्—

(क) पुराणि यस्यां सवराङ्गनानि वराङ्गना [illegible]ङ्ग्यः ।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासः कुसुमायुधस्य ॥उदा० ६४२॥

(ख) न तज् जलं यन् न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो न गुञ्जितं तन् न जहार यन् मनः
॥उदा० ६४३॥

पूर्वत्र पुराणां वराङ्गनाः, तासाम् अङ्गविशेषणमुखेन रूपम्, तस्य विलासाः, तेषामपि अस्त्रमिति अमुना क्रमेण विशेषणं विधीयते । उत्तरत्र निषेधेऽप्येवमेव योज्यम् ।

(सू० २००) **यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः ।**
स्मरणम् ... . ।

यः पदार्थः [illegible] नियतो यदा कदाचिद् अनुभूतोऽभूत् स काला-

---

(क) तत्र पूर्वम् पूर्वम् प्रति यथोत्तरस्य वस्तुनः [illegible] विशेषणतया विधिमुखेन प्रतिपादने [illegible]—**पुराणि यस्या**मित्यादिना । नवसाहसाङ्कचरिते पद्मगुप्तविरचिते उज्जयिनीवर्णनपरं पद्यमिदम् (१।२२) । यस्याम् उज्जयिन्या **पुराणि** गृहाणि [illegible] युक्तानि सन्ति, [illegible] सन्ति, रूपं च समुन्मीलितेन सता विलासेन युक्तम् अस्ति, विलासश्च मदनस्य अस्त्रमस्तीत्यर्थः । अत्र गृहादेः पूर्वपूर्वस्य वराङ्गनादि उत्तरोत्तरं विशेषणतया [illegible] स्थाप्यते इति अत्र प्रथमा एकावली बोध्या ॥ उदा० ६४२ ॥

(ख) पूर्वं पूर्वं प्रति उत्तरोत्तरस्य वस्तुनः [illegible] निषेधमुखेन प्रतिपादने [illegible]रति—**तज् जल**मित्यादिना । भट्टिकृते रावणवधे शरद्वर्णनपद्यमिदम् (२।१९) । किं बहुना उक्तेन, तत्र शरत्-काले तत्र जलं न बभूव यत् शोभनैः पङ्कजैर् युक्तं न बभूव, (सर्वमपि जलं सुचारुभिः पङ्कजैर् युक्तमेव बभूव), तत् पङ्कजमपि न बभूव यत् खलु निलीनेन भ्रमरेण युक्तं न बभूव, (सर्वमपि कमलं निलीनषट्पदमेव बभूव), असौ भ्रमरोऽपि न बभूव यो मधुरेण गुञ्जितेन युक्तो न बभूव, (सर्वोऽपि भ्रमरो मधुरेण गुञ्जितेन युक्तो बभूव), तद् गुञ्जितमपि न बभूव, यद् मनो न जहार (सर्वमपि गुञ्जितं मनो जहार) इत्यर्थः । अत्र जलादेः सुचारुपङ्कजत्वादि विशेषणं प्रतिषेधमुखेन निबद्धमिति द्वितीया एकावली बोध्या । द्वयोरप्युदाहरणयोर् लक्षणसङ्गतिमाह—**पूर्वत्र पुराणा**मित्यादिना ॥उदा० ६४३॥ (५१) ।

इदानी पुनर् गम्यमानसादृश्यमूलकान् अलङ्कारान् निरूपयन् स्मरणालङ्कारं निरूपयति—**यथानुभव**मित्यादिना । सदृशानुभवात् पूर्वमनुभूतस्य सदृशस्य वस्तुनः स्मृतिः स्मरणं नाम अलङ्कार इति सूत्रवृत्त्योः सङ्कलितोऽर्थः ।

न्तरे स्मृतिप्रतिबोधाधायिनि तत्-समाने वस्तुनि दृष्टे सति यत् तथैव स्मर्यते तद् भवेत् स्मरणम्। उदाहरणम्—

[illegible] यदम्भः प्लावितं चलदृशां लहरीभिः।
तद्भवैः कुहरुतैः सुरकन्याः स्मारिताः सुरतकण्ठरुतानाम्
॥उदा० ६४४॥

यथा वा—

कर-जुअ-गहिअ-जसोआ-त्थण-मुह-विणिवेसिआ-ऽहर-उडस्स।
सं[illegible]रिअ-पञ्चजण्णस्स णमह कण्हस्स रोमञ्चं ॥उदा० ६४५॥

(सू० २०१)······ ··· ···· **भ्रान्तिमानन्यसंवित् तत्-तुल्यदर्शने** ॥१३१॥

तदिति अन्येति अप्राकरणिकं निर्दिश्यते, तेन समानम् अर्थाद् इह प्राकरणि-[illegible], तस्य तथाविधस्य दृष्टौ सत्यां यदप्राकरणिकतया संवेदनं स भ्रान्तिमान्।

स्मर[illegible]—**निम्ननाभिविवरे**[illegible]। आनिर्ज्ञाताकरम् अप्सरोजलक्रीडावर्णनपरं पद्यमिदम्। चञ्चलाक्षीणामप्सरसां गभीरेषु नाभिविवरेषु जलतरङ्गैर्यज् जलं प्लावितं तद्भवैः [illegible] सुरतकालभवेन कण्ठध्वनिना सदृशैः अप्सरसो रतिकूजितानां स्मारिता इत्यर्थः। रुतानामित्यत्र 'अधीगर्थदयेशां कर्मणि' (अष्टा २।३।५२) इति प्रामाण्यात् कर्मत्वं बोध्यम्। स्मारिता इत्यत्र घटादिषु पठितस्य स्मरतेर् मित्त्वेऽपि मितां ह्रस्वः (६।४।९२) इति न ह्रस्वः, तस्य व्यवस्थितविभाषात्वस्याश्रयणात्। अत्राध्यानाभावादेव न मित्त्वम्। **सुरतकण्ठरुतानाम्** सुरतवि[illegible] [illegible]वा कण्ठावटश्वभ्रगर्ता इति कोषादितिकेचित्। अत्र सुरतध्वनिसदृशकुहरुतानुभवेन पूर्वमनुभूतानां सुरतध्वनीना स्मरणस्य वर्णनात् स्मरणालङ्कारो बोध्यः॥ उदा० ६४४॥

शरीरान्तरेऽनुभूतस्य स्मरणे वर्णितेऽपि स्मरणालङ्कार एवेत्यभिप्रायेणोदाहरणान्तरमाह—**कर-जुअ** इत्यादि। **'कर-युग-गृहीत-यशोदा-स्तन-मुख-विनिवेशिता-ऽधर पुटस्य। संस्मृत-पांचजन्यस्य नमत कृष्णस्य रोमांचम्'** इति संस्कृतच्छाया। गाथासप्तशत्यवेबरसम्पादितायां पद्यमिदम् (९७४)। करयुगेन गृहीतस्य यशोदायास्तनस्य चूचुके स्थापितोऽधरपुटो येन तस्य अतएव च संस्मृतः पाञ्चजन्यः शङ्खो येन तादृशस्य कृष्णस्य रोमाञ्चं यूयं नमतेत्यर्थः। अत्र शङ्खसदृशे स्तनेऽनुभूते शरीरान्तरेऽनुभूतस्य पाञ्चजन्यस्य स्मृतिर् वर्णितेति स्मरणालङ्कारो बोध्यः॥ उदा० ६४५॥ (५२)।

भ्रान्तेः स्मृतिपूर्वकत्वमिति धर्ममीमांसकप्रसिद्धेः स्मरणानन्तरं भ्रान्तिमन्तं निरूपयति—**भ्रान्तिमानि**त्यादिना। अप्राकरणिकपदार्थत्वेन यत्र संवेदनं तत्र भ्रान्तिमानलङ्कार इति सूत्रवृत्त्योः सङ्कलितोऽर्थः॥१३२॥

न चैष रूपकं प्रथमा वाऽतिशयोक्तिः, तत्र वस्तुतो भ्रमस्याऽभावात्; इह चार्थानुगमेन संज्ञायाः प्रवृत्तेस् तस्य स्पष्टमेव प्रतिपन्नत्वाद् ।

उदाहरणम्—

कपाले मार्जारः पय इति करान् लेढि शशिनस्
तरुच्छिद्रप्रोतान् बिसमिति करी सङ्कलयति ।
रतान्ते तल्पस्थान् हरति वनिताऽप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ॥उदा० ६४६॥

(सू० २०२) **आक्षेप उपमानस्य प्रतीपमुपमेयता ।**
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धना ॥ १३२ ॥

अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थक्येन यद् उपमानमाक्षिप्यते, यदपि च तस्यैवोपमानतया प्रसिद्धस्य उपमानान्तरविवक्षया अनादरार्थम् उपमेयभावः कल्प्यते, तद् उपमेयस्योपमानं प्रति [illegible] वाद् उभयरूपं प्रतीपम् । क्रमेणोदाहरणम्—

(क) लावण्यौकसि सप्त तापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।

रूपके प्रथमायाम् अतिशयोक्तौ च वस्तुतो भ्रमो न भवति, अत्र तु वस्तुतो भ्रमस्य वर्तमानता स्वीक्रियते इत्यत्रास्याऽलङ्कारस्य नामैव साक्षीति रूपकात् प्रथमाया अतिशयोक्तेश्च पृथगेवायमलङ्कार इत्याह—**न चैष** इत्यादिना ।

भ्रान्तिमन्तमुदाहरति—**कपाले मार्जार** इत्यादिना । सुभाषितरत्नकोशे (९०५) पद्यमिदम्, सरस्वतीकण्ठाभरणे चेदं पद्यमुदाहृतम् (३।३८) भासस्येद पद्यमिति वदन्ति । अवकरस्थाने स्फुटितघटादिशकले बहुलीभूतान् शशिनः किरणान् पयो मत्वा मार्जारो लेढि, तरूणां छिद्रेषु प्रविष्टान् शशिनः किरणान् बिसं मत्वा हस्ती ग्रहीतुं प्रवर्तते, रतितल्पमूर्च्छितान् शशिनः किरणान् गौरं प्रतनु क्षौमम् (अंशुकम्) मत्वा वनिता परिधित्सया आक्रष्टु प्रवर्तते इति अहो अयं प्रभया प्रहृष्टश्चन्द्र इदं सर्वं जगद् विप्लुतं कुरुते इत्यर्थः । अत्र दुग्धादिना अप्राकरणिकेन समानाना चन्द्रकिरणाना दर्शने सति तेषाम् अप्राकरणिकदुग्धत्वादिना बिडालादिकृतं ज्ञानं वर्णितमिति भ्रान्तिमानलङ्कारोऽत्र बोध्यः ॥उदा० ६४६॥ (५३) ।

सादृश्यमूलकालङ्कारप्रसङ्गे प्रतीपं निरूपयति—**आक्षेप** इत्यादिना । उपमेयवैभवेन गतार्थत्वाद् उपमानस्य व्यर्थतायाः प्रतिपादनेन निन्दनम् आक्षेप इति स प्रतीपस्य प्रथमः प्रकारः; तिरस्कारजन्यया [illegible] प्रवृत्ता प्रसिद्धस्योपमानस्य उपमेयतायाः कल्पना प्रतीपस्य द्वितीयः प्रकारः, उभयविधञ्चेदम् प्रतीपम् उच्यते इत्यर्थः । प्रतीपमिति अलङ्कारनाम निर्वक्ति—उपमेयस्योपमानं **प्रतिकूलवर्तित्वाद्** इति ॥१३२॥

इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ उदा० ६४७ ॥

(ख) ए एहि दाव सुन्दरि, कण्णं दाऊण सुणसु वअणिज्जं।
तुज्झ मुहेण किसोअरि चन्दो उपमिज्जइ जणेण ॥ उदा० ६४८ ॥

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वाद् उपमित्यनिष्पत्त्या वअणिज्जं इति वचनीयपदाभिव्यङ्ग्यो तिरस्कारः ।

क्वचित् तु निष्पन्नैव उपमितिक्रिया अनादरनिबन्धनम्; यथा—

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि भद्रे ।
सन्तीदृशानि दिशि दिशि सरस्सु ननु नीलनलिनानि ॥ उदा० ६४९ ॥

आक्षेपस्य प्रथमेन प्रकारेण निष्पन्नं प्रतीपमुदाहरन्ति—**लावण्यौकसी**त्यादिना । हे राजन्, लावण्यकोपगृहरूपे, प्रतापगौरवपूर्णे, दातृणां मुख्ये, पृथ्वीभारवहनसमर्थभुजयुगले च त्वयि सृष्टे सति वेधसा किमिति खलु पुनश्चन्द्रो निर्मितः स्यात्, कस्मै प्रयोजनाय वा सूर्यो रचितो भवेत्, कि विचार्य वा अयं चिन्तामणिरुत्पादितः स्यात्, किमिति वा व्यर्थमेव इमे महेन्द्र-मलय-सह्य-शक्तिमदृक्ष-विन्ध्य-पारियात्र-नामानः कुलपर्वताः सृष्टाः स्युरित्यर्थः । अत्र उपमानत्वेन प्रसिद्धानाम् इन्द्वादीनां कार्यं कर्तुं वर्णनीयो राजैव लावण्यादिनिदानभूतत्वात् समर्थ इतीन्दुप्रभृतीनां कैमर्थक्यमूलक आक्षेप इति प्रतीपत्वं बोध्यम् ॥उदा० ६४७॥

प्रतीपस्य द्वितीयः प्रकारः पुनर् द्वेधा भवति—उपमित्यनिष्पत्तिजन्यतिरस्कारमूलया उपमेयत्वकल्पनया युक्तत्वेन, उपमितिनिष्पत्तिजन्यतिरस्कारमूलया उपमेयत्वकल्पनया युक्तत्वेन चेति । प्रथममुदाहरन्ति—**ए एही**त्यादिना । **'अयि एहि तावत् सुन्दरि कर्णं दत्त्वा शृणु वचनीयम् । तव मुखेन कृशोदरि चन्द्र उपमीयते जनेन'** इति संस्कृतच्छाया । श्रीधरवामनादिभिर् धृतः शृणुष्व इति संस्कृतपाठश्चिन्त्यः । अयि सुन्दरि, आयाहि, कर्णं दत्त्वा शृणु तावत् त्वयि लोकस्य परिवादम्, (कः स परिवाद इत्यत्राह—) हे कृशोदरि, लोकेन तव मुखेन चन्द्र उपमीयते इत्यर्थः ! अत्युत्तमगुणत्वाद् निरुपमेयस्यापि तव मुखस्य चन्द्ररूपोपमेयसत्त्वप्रतिपादनमेव लोके प्रसृतं त्वयि वचनीयमिति भावः । अत्र उपमानत्वेन प्रसिद्धस्य चन्द्रस्योपमेयतेति प्रथमश्चन्द्रस्य तिरस्कारः, कल्प्यमाना चन्द्रस्य उपमेयताऽपि अनौचित्यप्रवृत्तत्वात् स्वस्याऽसम्मतत्वेन पराभिमतत्वेन उपस्थापितेति व्यज्यमानया वस्तुत उपमितेरनिष्पत्त्या चन्द्रस्य सुतरां तिरस्कार इति प्रतीपत्वं बोध्यमित्याशयेनाह—**अत्र मुखेने**त्यादिना ॥ उदा० ६४८ ॥

निष्पन्नोपमितिजन्यतिरस्कारमूलया उपमेयत्वकल्पनया युक्तं प्रतीपमुदाहरन्ति—**गर्वमसंवाह्य**मित्यादिना । हे भद्रे, अधिकतरत्वाद् वोढुमप्यशक्यम् इमं गर्वं लोचनयुगेन निमित्तभूतेन अर्थाद् [illegible] किमपि नास्ति लोके इति अभिमन्य किमिति

इहोपमेयीकरणमेव उत्पलानामनादरः ।

अनयैव रीत्या यदसामान्यगुणयोगान्न उपमानभावमपि अनुभूतपूर्वि तस्य तद्-कल्पनायामपि भवति प्रतीपमिति प्रत्येतव्यम् यथा—

अहमेव गुरु सुदारुणानामिति हालाहल तात मा स्म दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनाम् ॥उदा० ६५०॥

अत्र हालाहलस्योपमानत्वमसम्भाव्यमेवोपनिबद्धम् ।

(सू० २०३) **प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया ।
ऐकात्म्यं बध्यते योगात् तत् सामान्यमिति स्मृतम्** ॥१३३॥

अताहशमपि तादृक्तया विवक्षितुं यद् अप्रस्तुतपदार्थेन सम्पृक्तम् अपरित्यक्तनिजगुणमेव **तदेकात्मतया निबध्यते तत्** समानगुणस्सम्बन्धात् **सामान्यम्** ।

वहसि ? ननु च सत्येव खलु सर्वासु दिक्षु सरस्सु एताभ्या त्वल्लोचनाभ्यां सदृशानि नीलकमलानीत्यर्थः । अत्र उपमानत्वेन प्रसिद्धानाम् उत्पलानाम् अनादरायैव उपमेयत्वेन कल्पनेति प्रतीपं दर्शयितुमवतरति—**इहोपमेयीकरण** इत्यादि ॥ उदा० ६४९ ॥

प्रकारान्तरेणाऽपि प्रतीपं भवतीत्याह—**अनयैव रीत्ये**त्यादिना । असदृशत्वेन प्रसिद्धत्वाद् उपमानत्वेनाऽपि अव्यवहृतस्य वस्तुनस्तिरस्कारार्थम् उपमानत्वेन कल्पने कृतेऽपि प्रतीपत्वं बोध्यमित्यर्थः । एवं च येन केनाऽपि प्रकारेण उपमानत्वेन अभिमतस्य वस्तुनस्तिरस्कारे प्रतीपमिति केचन मन्यन्ते ।

उपमानत्वेन कल्पनात् तिरस्कारे गम्ये प्रतीपमुदाहरति—**अहमेवेत्यादिना** । हे तात हालाहल, सुदारुणाना पदार्थानां मध्ये अहमेव उत्कटतम इति विचार्य मा खलु गर्व कृथाः, यतो हि अस्मिन् लोके भवता सदृशानि दुर्जनानां वचनानि भूयः (पुनः पुनः उपलभ्यानि यथा स्यु तथा) सन्तीत्यर्थः । अत्र उत्कटतमद्रु खहेतो सद्योमारकस्य हालहलस्य सदृशे अविद्यमानेऽपि तत्-सदृशमत्त्वप्रतिपादनेन तस्य उपमानीकरणमपि तत्-तिरस्कारव्यञ्जकमिति प्रतीपत्वं बोध्यम् । **असम्भाव्यम्** पूर्वम् अहमेवेत्यादिना असाधारणत्वस्याभिधानाद् असम्भाव्यमानमित्यर्थः ॥ उदा० ६५० ॥

क्रमप्राप्तमलङ्कारान्तरं लक्षयन् सामान्यालङ्कारमाह—**प्रस्तुतस्ये**त्यादिना । अप्रस्तुतेन अतुल्यमपि सत् प्रस्तुतम् अप्रस्तुतेन तुल्यमिति प्रतिपादयितुं प्रस्तुतम् अप्रस्तुतेन योगात् तद्गुणसम्पर्काद् अप्रस्तुतैकात्मतां प्राप्तं यद् वर्ण्यते तत् सामान्यमित्यर्थः । समानयोर् भावः सामान्यमिति नामनिरुक्तिं सूचयति—**समानगुणे**त्यादिना ।

उदाहरणम्—

मलयज-रस-विलिप्त-तनवो नव-हार-लता-विभूषिताः
सिततर-दन्तपत्र-कृत-वक्त्र-रुचो रुचिरामलांशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ॥उदा० ६५१॥

अत्र प्रस्तुत-तदन्ययोरन्यूनानतिरिक्ततया निबद्धं धवलत्वम् एकात्मताहेतुः, अत एव पृथग्भावेन न तयोरुपलक्षणम् ।

यथा वा—

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि ।
भृङ्गाः सलीलं यदि नाऽपतिष्यन् कोऽवेदयिष्यन् नवचम्पकानि॥उदा०६५२॥

अत्र निमित्तान्तरजनिताऽपि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सहते, प्रतीतत्वात् तस्य, प्रतीतेश्च बाधायोगात् ।

(सू० २०४) **विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः ।**
एकात्मा युगपद् वृत्तिरेकस्याऽनेकगोचरा ॥१३४॥

सामान्यमुदाहरति—**मलयजरसे**त्यादिना । काव्यालङ्कारसूत्रवृत्तौ (४।३।१०) उदाहृतं पद्यमिदम् । प्रसृतकौमुदीके शशिनि पृथिवीं धवलां कुर्वति सति चन्दनद्रवलिप्ताङ्ग्यो नवीनमुक्तादामविभूषिताः श्वेततरहस्तिदन्त-ताटङ्क-सम्पादितमुखकान्तयो रम्यनिर्मल शुभ्रवस्त्राश्चेति (कौमुद्या एकात्मतां प्राप्ताः सत्यः) अलक्ष्मतां गताः परसन्दर्शनभयरहिताः अभिसारिकाः सुखेनैव प्रियनिवासस्थानं प्रयान्तीत्यर्थः । अत्र मलयजरसविलेपनादीनां चन्द्रप्रभया सह 'अविभाव्यतां गताः' इत्यभेदप्रतीतिर् दर्शिता इति रुय्यकश्रीधरादयः । अत्र प्रस्तुतानाम् अभिसारिकाणाम् अप्रस्तुतानां चन्द्रिकाणां च समानत्वेन निबद्धं धवलत्वम् एकात्मताहेतुरिति न पार्थक्यस्य प्रतीतिरित्यन्ये ॥ उदा० ६५१ ॥

उत्तरकाले पार्थक्यस्य प्रतीतावपि पौर्वकालिकीम् एकात्मतामादायापि सामान्यं सम्भवतीति प्रदर्शयितुमुदाहरणान्तरमाह—**वेत्रत्वचे**त्यादि । यदि युवतीनाम् अवतंसेषु भृङ्गाः सखेलं न अपतिष्यन् तर्हि वेत्रस्य त्वचा तुल्या (गौरी) कान्तिर् यासां तासां युवतीनां कर्णाग्रात् कपोलप्रदेशे आगतानि अवतंसरूपाणि तानि नवचाम्पकपुष्पाणि युवतीत्वग्वर्णतुल्यवर्णत्वाद् असंलक्ष्यतां गतानि को नाम पार्थक्येन वेदितुं समर्थोऽभविष्यद्, न कोऽपीत्यर्थः । उत्तरकाले भेदस्य प्रतीतावपि पूर्वाम् अभेदप्रतीतिमादाय सामान्यत्वमुपपादयति—**अत्र निमित्तान्तरे**त्यादिना ॥६५२॥ (५५) ।

विशेषस्य नाम्ना सामान्यविपरीतत्वात् सामान्यानन्तरं विशेषालङ्कारं निरूपयति—**विना प्रसिद्ध**मित्यादिना । प्रसिद्धम् आधारं विनाऽपि आधेयस्य विशिष्टा स्थितिर् यद्

अन्यत् प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः ।
तथैव करणञ्चेति विशेषस् त्रिविधः स्मृतः ॥१३५॥

(क) प्रसिद्धाधारपरिहारेण यद् आधेयस्य विशिष्टा स्थितिरभिधीयते स प्रथमो विशेषः; उदाहरणम्—

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिव कवयो नः ते वन्द्याः ॥ उदा० ६५३ ॥

(ख) एकमपि वस्तु यदेकेनैव स्वभावेन युगपद् अनेकत्र वर्तते स द्वितीयः; उदाहरणम्—

सा वसइ तुज्झ् हिअए साच्चिअ अच्छीसु सा अ सवणेसु ।
अम्हारिसाण सुन्दर, ओआसो कत्थ पावाणं ॥ उदा० ६५४ ॥

यदपि च किञ्चिद् रभसेनारभमाणस् तेनैव यत्नेनाऽशक्यमपि कार्यान्तरमारभते सोऽप्यपरो विशेषः; उदाहरणम्—

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजताऽनवद्यविद्यम् ।
विधिना ससृजे नवो मनोभूर् भुवि सत्यं सविता वृहस्पतिश्च ॥उदा०६५५॥

वर्ण्यते प्रथमो विशेषः, एकस्यैव वस्तुनोऽनेकेषु वस्तुषु एकस्मिन्नेव काले एकात्मा (एकस्वरूपा) वृत्तिर् यद् वर्ण्यते स द्वितीयो विशेषः, अन्यत् किञ्चित् कार्यं सहसा कुर्वतः कस्यचित् कर्तुर् अन्यस्यापि वस्तुनः तेनैव यत्नेन सम्पादनं यद् वर्ण्यते स तृतीयो विशेष इति विशेषालङ्कारोऽयं त्रिधा मत इत्यर्थः ॥१३४-३५॥

प्रथमं विशेषं गद्येनाऽपि प्रतिपाद्य उदाहरति—**दिवमपी**त्यादिना । रुद्रटकाव्यालङ्कारे उदाहृतं पद्यमिदम् (९।६) स्वर्गं गतानामपि येषां कवीनाम् अनल्पैर् गुणगणैर् युक्ताः गिर आकल्पं लोकान् रञ्जयन्ति ते कवयः कथं न प्रणम्याः स्युरित्यर्थः । अत्र कविरूपं लोकप्रसिद्धमाधारं विनाऽपि आधेयानां कविगिरामिह लोके जनरञ्जनसमर्था विशिष्टा स्थितिर् वर्णितेति प्रथमो विशेषो ज्ञेयः ॥ उदा० ६५३ ॥

द्वितीयं विशेषं गद्येनाऽपि प्रतिपाद्य उदाहरति—**सा वसइ** इत्यादिना '**सा वसति तव हृदये सैवाऽक्ष्णोः सा च श्रवणयोः । अस्मादृशानां सुन्दर अवकाशः कुत्र पापानाम्**' इति संस्कृतच्छाया । गाथासप्तशत्यां पद्यमिदम् (९४७) । सपत्न्यामासक्तं कान्तं प्रति नायिकाया उक्तिरियम् । हे सुन्दर, सा मम सपत्नी एव तव चित्ते निवसति, सा एव तव अक्ष्णोरपि निवसति, सा एव तव श्रवणयोरपि निवसति, अस्मादृशीनां पापानां कृते कुत्र अवकाशः (स्थानं) सम्भवेद्, न कुत्रापीत्यर्थः । अत्र एकस्या एव सपत्नीरूपाया युवत्या एकस्मिन्नेव काले चित्तादिषु अनेकेषु कान्तास्वभावेनैव स्थितेर् वर्णनाद् द्वितीयो विशेषो बोध्यः । सर्वत्र वसतीत्यस्यान्वयाच् चित्तादौ निवासानां यौगपद्यं गम्यते ॥ उदा० ६५४ ॥

यथा वा—

गृहिणी सचिवः सखी मिथ. प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ।।उदा० ६५६।।

सर्वत्र चैवंविधे विषयेऽतिशयोक्तिरेव प्राणत्वेनाऽवतिष्ठते तां विनाऽलङ्का- [illegible] । अत एवोक्तम्—**'सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते । यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना'** (भा० का० अ० २।८५) इति ।

तृतीयविशेषं गद्येनाऽपि प्रतिपाद्य उदाहरति—**स्फुरदद्भुते**त्यादिना । हे राजन्, प्रकाशमानम् अद्भुतं रूपं यस्य तादृशम् उद्गतप्रतापानलम् अवदातश्रुतं त्वां सृजता ब्रह्मणा सत्यम् भुवि नवः कामदेवः सृष्टः, नूतनः सूर्यश्च निर्मित , नवीनो बृहस्पतिरपि उत्पादित इत्यर्थः । अत्र अत्यादरेण कञ्चिद् विशिष्टं राजानं सृजतो विधेस्तेनैव प्रयत्नेन आनुषङ्गिकरूपेण मनोभुवः सवितुर् बृहस्पतेश्च सर्जनमसम्भाव्यमपि जातमिति वर्णित-मिति तृतीयो विशेषो बोध्य. ।। उदा० ६५५ ।।

सृष्टौ उदाहृत्य संहारेऽपि तृतीयं विशेषं प्रसङ्गात्कार्यमुदाहरति—**गृहिणी सचिव** इत्यादिना । अथवा पूर्वस्योदाहरणस्य यथासङ्ख्येनाऽपि युक्तत्वात् शुद्धमुदाहरणान्तर-माह—**गृहिणी**त्यादिना । रघुवंशे अजविलापे (८।६७) पद्यमिदम् । हे इन्दुमति, त्वं मम गृहिणी धीसचिव कर्मसचिवश्च, रहस्यसखी, ललिते कलाविधौ प्रिया शिष्या च इति त्वां हरता करुणारहितेन मृत्युना बत मे किं न हृतम्, सर्वमेव हृतमित्यर्थ. । अत्र गृहिणी-हरणरूपमेकं कार्यं कुर्वाणेन मृत्युना तेनैव यत्नेन सचिवादिहरणरूपं कार्यान्तरमपि कृत-मिति वर्णनात् तृतीयो विशेषो बोध्यः । अत्राऽप्रकरणं काक्वाक्षिप्तं व्यङ्ग्यमिति इदमप्य-स्योदाहरणस्य वैशिष्ट्यम् बोध्यम् ।। उदा० ६५६ ।।

ननु आधारं विनाऽऽधेयस्य स्थितेरसम्भवाद्, एकस्य समानेन रूपेण एकदैव अनेकत्र स्थितेरपि खपुष्पतुल्यत्वाद्, एकेन यत्नेन अनेककार्यकरणस्याऽपि अशक्यत्वाद् उक्तेषु त्रिष्वपि विशेषेषु वाक्यार्थ एव न स्थिरीभवतीति भित्त्यभावे चित्रस्येव वाक्यार्थस्थैर्याभावे अर्थवैचित्र्यस्य निरवकाशत्वाद् एतेषां विशेषाणामलङ्कारत्वमनुपपन्नमिति मन्दानामा-शङ्कामपि सरलतरशैलीकोऽलकः समादधाति—**सर्वत्र चैवंविधे** इत्यादिना । एवंविधे काव्यरूपे विषये सर्वत्रैव कविप्रतिभाप्रसूता लोकातिगा उक्तिरेव काव्यप्राणत्वेन तिष्ठति, एतादृशी लोकातिगामुक्तिं विना वार्तारूपा लौकिकोक्तिमुपादाय अलङ्कार्यस्य काव्यस्य अलङ्काराणां वैचित्र्यविशेषाणां च असम्भवादित्यर्थः । चित्रमपि काव्यकोटौ अन्तर्भावयतो यत्किञ्चिद्वैचित्र्यप्रदर्शनार्थमेतो काव्यत्वं स्वीकुर्वाणस्य मम्मटस्य कृतेः पूरणे अलकस्ये-यमुक्तिरुचितैव । उक्तेऽर्थे भामहसम्मतिं प्रदर्शयति—**अत एवोक्त**मित्यादिना । अतिश-योक्ति निरूप्य तत्प्रसङ्गेन भामहः प्राह—**सा** अतिशयोक्तौ वर्तमाना एषा लोकातिग-त्वाद् वक्रा उक्तिरेव खलु महनीया अस्ति यया सर्वत्र काव्यमात्रे अर्थो विभाव्यते

(सू० २०५) **स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।**
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ॥१३६॥

वस्तु तिरस्कृतनिजरूपं केनाऽपि समीपगतेन प्रगुणया स्वगुणसम्पदा उपरक्तं तत्-प्रतिभासमेव यत् समासादयति स तद्गुणः, तस्य अप्रकृतस्य गुणोऽत्राऽस्तीति ।

उदाहरणम्—

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर् यत्र रुचं रुचा स्वामानिन्यिरे वंशकरीरनीलैः ॥उदा० ६५७॥

अत्र रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां प्रगुणवर्णता ।

(सू० २०६) **तद्रूपाऽननुहारश् चेदस्य तत् स्यादतद्गुणः ॥**

यदि तु तदीयं वर्णं सम्भवन्त्यामपि योग्यतायामिदं न्यूनगुणं न गृह्णीयात् तदा भवेत् तद्गुणो नाम । उदाहरणम्—

धवलोसि जइ वि सुन्दर तह वि तुए मज्झ रञ्जिअं हिअअं ।
राअ-भरिए वि हिअए सुहअ णिहित्तो ण रत्तो सि ॥उदा० ६५८॥

(अलङ्क्रियते), अतोऽस्याः लोकोत्तरायाः उक्तेः सम्पादने कविप्रभृणा यत्नः कार्यः, अनया लोकोत्तरया उक्तया विना किं नाम काव्यसौन्दर्यमिति ॥उदा० ६५६॥(५६) ।

सामान्ये तद्गुणे च गुणसम्बन्धात् पुनरपि सामान्यप्रसङ्गेनैव तद्गुणं निरूपयति—**स्वमुत्सृज्ये**त्यादिना । वस्तु परगुणेनाभिभवात् स्वं गुण त्यक्त्वा अत्युज्ज्वलगुणेन युक्तस्य तस्य परस्य सामीप्यात् तस्य अत्युज्ज्वलगुणस्य वस्त्वन्तरस्य गुणेन युक्ततां प्राप्तम् इति यद् वर्ण्यते स तद्गुण इति भण्यते इति सूत्रवृत्त्योः सङ्कलितोऽर्थः ॥१३६॥

तद्गुणमुदाहरति—**विभिन्नवर्णा** इत्यादिना । रैवतकवर्णनप्रसङ्गे शिशुपालवधे (४।१४) पद्यमिदं सूर्याश्ववर्णनपरम् । **गरुडाग्रजेन** अरुणेन वर्णभेदं (रक्तत्व) प्रापिता सूर्यस्य रथे योजिता अश्वा यत्र रैवतकपर्वते स्थितैः वंशाङ्कुरहरितैः रत्नैः (मरकतमणिभि) परितः स्फुरन्त्या स्वेषा हरितया रुचा अश्वानां स्वां स्वाभाविकी हरिता रुच प्रापिता इत्यर्थः । अत्र सूर्याश्वा अरुणवर्णेनाभिभवात् स्वं हरितं गुणं त्यक्त्वा प्रकृष्टगुणस्य सामीप्यात् प्रकृष्टगुणस्य अरुणस्य गुणं शोणत्वं प्राप्ता इति; एवं शोणीभूता अश्वा पुना रैवतकस्थमरकतमणिवर्णाभिभवात् स्वं शोणत्व त्यक्त्वा प्रकृष्टगुणानां रैवतकस्थमरकतमणीनां गुणं वंशाङ्कुरहरितत्वं प्राप्ता इति वर्णनाद् द्विगुणितस् तद्गुणो बोध्य इत्याशयेनाह-**अत्र रवितुरगे**त्यादि ॥उदा० ६५७॥ (५७)।

तद्गुणप्रसङ्गात् तद्गुणविपरीतमतद्गुणं निरूपयति—**तद्रूपे**त्यादिना । अत्र न्यूनगुणस्य पदार्थस्य प्रकृष्टगुणपदार्थरूपाऽननुकरणं यत्र वर्ण्यते सोऽतद्गुण इति प्रथमं अतद्गुणसूत्रव्याख्यानम् ।

अत्र अतिरक्तेनाऽपि मनसा संयुक्तो न रक्ततामुपगत इति अतद्गुणः।

किञ्च तदिति अप्रकृतम्, अस्य इति च प्रकृतमत्र निर्दिश्यते, तेन यद् अप्रकृतस्य रूप प्रकृतेन कुतोऽपि निमित्ताद् नाऽनुविधीयते सोऽतद्गुण इत्यपि प्रतिपत्तव्यम्, यथा—

> गाङ्गमङ्ग सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जत।
> राजहंस तव सैव शुभ्रता चीयते न च न चाऽपचीयते ॥उदा०६५९॥

(सू० २०७) **यद् यथा साधितं केनाऽप्यपरेण तदन्यथा ॥ १३८ ॥**

तथैव तद् विधीयेत स व्याघात इति स्मृतः।

येनोपायेन यद् एकेन उपकल्पितं तस्याऽन्येन विजिगीषुतया तदुपायकमेव यदन्यथाकरणं स साधितवस्तुव्याहृतिहेतुत्वाद् व्याघात। उदाहरणम्—

प्रथमव्याख्यानुमारिणम् अतद्गुणमुदाहरति—**धवलोसीत्यादिना**। '**धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रञ्जितं हृदयम्। रागभरितेऽपि हृदये शुभग निहितो न रक्तोऽसि**' इति संस्कृतच्छाया। गाथासप्तशत्या पद्यमिदम् (७६५)। हे सुन्दर, यद्यपि त्वं गौरःअसि तथापि त्वया मम हृदये निवसता मम हृदय रञ्जितम्, किन्तु हे प्रमदानां प्रिय, रागेण भरिते मम हृदये निहितोऽपि त्वं रक्तो नाऽसीत्यर्थः। अत्र उत्तरार्धे रक्तिमरहितत्वेन न्यूनगुणस्य नायकस्य अति[illegible] वर्णितमिति अतद्गुणो बोध्यः, पूर्वार्धे तु विरोधाभास एवेत्यभिप्रायेणाह—**अत्रातिरक्तेनेत्यादि**। अत्र अप्रकृतेन नायकेन स्वहृदयवृत्तान्तनिवेदनस्य विवक्षितत्वात् प्रकृतस्य हृदयस्य गुणो नाऽनुहृत इति अप्रकृतस्य प्रकृतगुणाननुहरणे अतद्गुणस्येदमुदाहरणमिति गोविन्दठक्कुरप्रभृतयो मन्यन्ते, किन्तु इदं वृत्त्यनुकूलं न प्रतिभाति ॥उदा० ६५८॥

अतद्गुणस्य प्रकारान्तरं निरूपयति—**किञ्च तदितीत्यादिना**। यदा सूत्रे तदिति अप्रकृतम् अस्य इति च प्रकृतं निर्दिश्यते तदा अप्रकृतस्य रूपं प्रकृतेन न अनुविधीयते इति यद् वर्ण्यते सोऽतद्गुण इति सूत्रार्थो भवतीति इदमपि अतद्गुणस्य प्रकारान्तरं स्वीकर्तव्यमित्यर्थः।

अतद्गुणस्य द्वितीयं प्रकारमुदाहरति—**गाङ्गमङ्गेत्यादिना**। अङ्ग (हे) राजहंस, गङ्गाया जलं श्वेतमस्ति, यमुनाया जलं कालमस्ति, तत्र उभयत्र निमज्जतम् तव शुभ्रता पूर्ववदेव भवति, सा तव शुभ्रता श्वेते गङ्गाजले निमज्जनेन न उत्कृष्यते, न च काले यमुनाजले निमज्जनेन वा अपकृष्यते इत्यर्थः। अत्र वर्ण्यतया प्रकृतेन राजहंसेन गङ्गायमुनयोरप्रकृतयोर् गुणस्य अग्रहणं वर्णितमिति अतद्गुणस्य द्वितीयः प्रकारो बोध्यः ॥उदा० ६५९॥ (५८)।

गुणपरिवर्तनप्रसङ्गात् कार्यपरिवर्तनयुक्तं व्याघातालङ्कारमाह—**यद् यथेत्यादिना**। केनाप्येकेन कर्त्रा यद् वस्तु येन उपायेन येन रूपेण साधितम् अपरेण कर्त्रा तद् वस्तु

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीः स्याः स्तुमो वामलोचनाः ॥ उदा० ६६० ॥

(सू० २०८) **सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ॥ १३२ ॥**

एतेषां समनन्तरमेवोक्तस्वरूपाणाम् अलङ्काराणां यथासम्भवमन्योन्यनिर- पेक्षतया यद् इह शब्दभागे एव अर्थविषये एव उभयत्राऽपि वा सहावस्थानं सैकार्थसमवायस्वभावा संसृष्टिः ।

तत्र शब्दालङ्कारसंसृष्टिः—

कुसुमसौरभलोभपरिभ्रमद्-भ्रमर-सम्भ्रम-सम्भृतशोभया ।
वनितया विदधे कलमेखलाकलकलोऽलकलोलदृशाऽन्यया ॥ उदा० ६६१ ॥

तेनैव उपायेन अन्यथा क्रियते इति यद् वर्ण्यते स व्याघात इत्यर्थः । **उपकल्पितम्** साधितम् । विजिगीषुतया प्रतिस्पर्धिन्येत्यर्थः । अन्यथाकरणस्य [illegible] हेतु- त्वाद् अन्यथाकरणरूपोऽयमलङ्कारो व्याघात इत्युच्यते इत्याह— [illegible] ।

व्याघातोदाहरणं प्रदर्शयति—**दृशा दग्धमि**त्यादि । विरूपाक्षेण दृशा दग्धं मदनं या वामलोचना दृशैव जीवयन्ति विरूपाक्षस्य जेत्रीः ताः वामलोचनाः स्तुम इत्यर्थः । अत्र महादेवेन दृशा दग्धो मदनो वामलोचनाभिर् दृशैव प्रत्युज्जीव्यते इति वर्णनाद् व्याघातो बोध्यः ॥ उदा० ६६० ॥ (५९)

यद्यपि अलङ्काराणां सङ्करे यथा अलङ्कारस्वरूपे चमत्कारजनकत्वे च नरसिंहन्यायेन स्फुटं वैलक्षण्यं न तथा संसृष्टौ, तथापि स्वतन्त्राणामपि [illegible] एक- स्मिन्नेव विभावादिरूपेऽर्थे पद्ये वाक्ये वा आश्रितानाम् अलङ्काराणाम् इष्टानां स्थितौ भवत्येव चमत्कारकत्वे कोऽप्यतिशय इति मत्वा शब्दार्थोभयगतत्वेन त्रिविषयामपि संसृष्टिम् ऐकध्येनैव [illegible]ति—**सेष्टा संसृष्टि**[illegible]दिना । एतेषां निरूपितानाम् अलङ्काराणाम् अलङ्कारयोर् वा परस्परं विविक्तत्वेन स्वरूपनिष्पत्तौ चमत्कारजनकत्वे च परस्परानपेक्ष- त्वेनाऽपि स्थितानां या एकत्र विभावादिकेऽर्थे वृत्ते वाक्ये वा परस्परशोभाजनकत्वेन इष्टा स्थितिः सा संसृष्टिरलङ्कार इत्यर्थः । एवं च परस्परनैरपेक्ष्यरूपस्य लक्षणस्य अभि- न्नत्वाच् शब्दार्थोभयरूपविषयभेदेन त्रिरूपाया अपि संसृष्टेः "संसृष्टया चैकरूपया" (सू० ६५) इति प्रागुक्तमेकरूपत्वं न विरुध्यते ।

[illegible]—**कुसुमसौ**[illegible] । शिशुपालवधे (६।१४) ऋतु- वर्णने [illegible] । काञ्च्यां ग्रथितानां कुसुमाना सौरभस्य लोभेन भ्रमतां भ्रमराणां भयेन वर्धिता शोभा यस्याः तया, अलकैः पुनः पुनर् दृशः पुरतो लुठद्भिः चञ्चला दृशो यस्याः तया अन्यया वनितया भ्रमरनिवारणाय काञ्च्याः प्रकम्पनेन मधुरः काञ्चीकलकलो विहित इत्यर्थः । अत्र एकस्मिन्नेव पद्ये पूर्वार्धे मकारानुप्रासः, तृतीये चरणे लकारानुप्रासः, चतुर्थचरणे लकलो-लकलो इति यमकम् इति, एतेषाञ्च परस्पर-

अर्थालङ्कारसंसृष्टि —

लिम्पतीव तमोऽङ्गानि वर्षतीवाऽञ्जनं नभः ।
[illegible] दृष्टिर् विफलतां गता ॥ उदा० ६६२ ॥

पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे ।

शब्दार्थालङ्कारयोस्तु संसृष्टिः—

सो णत्थि एत्थ गामे जो एअं महमहन्त-लाअण्णं ।
तरुणाण हिअअलूडिं परिसक्कन्तीं णिवारेइ ॥ उदा० ६६३ ॥

अत्रानुप्रासो रूपकं चाऽन्योन्यानपेक्षे, संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात् ।

निरपेक्षत्वेऽपि एकपद्यगततया आलम्बनविभावभूतनायिकारूपैकार्थोत्कर्षकतया च स्थितिरिति एतेषां संसृष्टिरत्र बोध्या ॥ उदा० ६६१ ॥

अर्थालङ्कारसंसृष्टिमुदाहरति—**लिम्पतीवेत्यादिना** । चारुदत्ते (१।१९) मृच्छकटिके च (१।३४) वार्षिकगाढान्धकारवर्णनमिदम् । अन्धकारः शरीरावयवान् लिम्पतीव, आकाशः कज्जलं वर्षति इव, (एतादृशोऽन्धकारोऽस्ति. अतः) दृष्टिः असतः पुरुषस्य सेवेव विफलता प्राप्ताऽस्तीत्यर्थः । अत्र पूर्वार्धे उत्प्रेक्षा, उत्तरार्धे उपमा इति, एतयोश्च परस्परनिरपेक्षत्वेऽपि एकपद्यगततया अन्धकाररूपैकार्थोत्कर्षप्रतिपादकतया च स्थितिरिति एतयोः संसृष्टिर् बोध्या । एतेन **पूर्वत्रे**त्यादिर् वृत्तिग्रन्थोऽपि व्याख्यात एव ॥ उदा० ६६२ ॥

शब्दार्थालङ्कारयो संसृष्टिमुदाहरति—**सोणत्थी**त्यादिना । **'स नास्त्यत्र ग्रामे य एतां सर्वतः प्रसरल्लावण्याम् । तरुणानां हृदयलुण्टाकीं परिष्वक्कमाणां निवारयति'** इति संस्कृतच्छाया । गाथासप्तशत्यां वेबरसम्पादितायां पद्यमिदम् । य एनां सर्वतः प्रसरल्लावण्यां तरुणानां हृदयस्य लुण्टाकीं स्वानुरूप-रमणान्वेषणाय इतस्ततश्च परिसर्पन्तीं तरुणी पुरुषान्तराद् व्यावर्तयति स्वस्मिन् स्थिरां करोति तादृशो युवा अत्र ग्रामे नास्ति इत्यर्थः । अत्र पूर्वार्धे णत्थि एत्थ इत्यत्र मह-मह इत्यत्र च अनेकस्य व्यञ्जनस्य एकवारं सादृश्याच् छेकानुप्रासः, उत्तरार्धे नायिकायां लुण्टाकीत्वस्यारोपाद् रूपकञ्चेति, एतयोश्च परस्परनिरपेक्षत्वेऽपि एकपद्यगततया आलम्बनविभावभूतनायिकारूपैकार्थोत्कर्षकतया च स्थितिरिति एतयोः शब्दार्थालङ्कारयोः संसृष्टिर् बोध्या । **संसर्गश्चे**त्यादौ वृत्तौ एकेनैव वाक्येन पद्येन वा सबन्ध एवाऽत्र एकार्थसमवाय इति प्रतिपादितम्, तथापि सूत्रे **इष्टा स्थिति**रिति इष्टत्वं स्थितिविशेषणम् । इष्टत्वं च काव्यार्थोपस्कारकत्वमेव ज्याय इति अस्माभिः विभावादिरूपम् एकम् अर्थम् आदायापि एकार्थसमवायः प्रदर्शितः ॥ उदा० ६६३ ॥ (६०) ।

(सू० २०९) अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः ।

एते एव तु यदि अत्र आत्मनि [illegible] परस्परम् अनुग्राह्यानुग्राहकत्तां दधति स एषां सङ्कीर्यमाणस्वरूपत्वात् सङ्करः ।

उदाहरणम्—

> आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे
> लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते ।
> शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
> राजन् गुञ्जाफलानां स्रज इति शबरा नैव हार हरन्ति ॥उदा० ६६४॥

अत्र तद्गुणमपेक्ष्य भ्रान्तिमत्ता प्रादुर्भूतम् तदाश्रयेण च तद्गुण. सचेतसां [illegible]निमित्तमित्यनयोरङ्गाङ्गिभावः ।

अलङ्काराणां परस्परोपकारकतया एकत्र वाक्ये पद्ये विभावादिरूपेऽर्थे वा सम्बन्धे सति नरसिंहन्यायेन अलङ्कारस्य स्वरूपे चमत्कारजनकत्वे च वैलक्षण्यं भवतीति भट्टोद्भटादिभिः [illegible] पृथगलङ्कारत्वेन स्वीकृतं सङ्करं निरूपयति—**अविश्रान्ती**त्यादिना । प्राचीनेषु आलङ्कारिकेषु मध्ये भामहेन संसृष्टिरेवोल्लिखिता; उद्भटेन सङ्करोऽपि उल्लिखितः, समृष्टिसङ्करयोर् भेदश्च सूचितः, [illegible] संज्ञया संसृष्टिसङ्करयोः प्रतिपादनं कृतम्, भोजेनाऽपि संसृष्टिरेवोल्लिखिता । अर्वाचीनेषु जयदेवः संसृष्टिं खण्डितवान्, शोभाकरादिभिरपि सङ्करस्यैव ग्रहणं कृतम् । आत्मनि एव अविश्रान्तानाम् अर्थात् [illegible] परस्परम् अङ्गाङ्गिभावेन एकत्र वाक्ये, पद्ये, विभावादिरूपैकार्थे वा स्थितिः सङ्कर इत्यर्थः । **सङ्कीर्यमाणस्वरूपत्वाद्** [illegible] परस्पर[illegible] इति यावत् ।

अङ्गाङ्गिभावसङ्करमुदाहरति—**आत्ते सीमन्ते**त्यादिना । हनुमत्-कविकृतायां खण्डप्रशस्तौ पठ्यमानमपीदम् अनिर्ज्ञातकर्तृकं पराजितराजपत्नीदुरवस्थावर्णनपरं पद्यम् इदम् । हे राजन्, वने गत्वरीणा तव शत्रोः पत्नीनां मरकतमणियुक्ते सीमन्तस्थे रत्ने गृहीते सुवर्णस्य ताटङ्कपत्राख्ये कर्णाभरणविशेषे च हृते, काञ्च्यामपि अपहृतायाम्, मणिपादाङ्गदे च झटिति अवमोचिते सति शबराः तासां राजपत्नीना पक्वबिम्बसदृशस्य अधरस्य कान्त्याः सङ्क्रमणेन रक्तवर्ण मुक्तागुणं तु 'इमास् तु आरण्यकै. सुलभा गुञ्जाफलमालाः' इति विचार्य न हरन्तीत्यर्थः । पद्ये शोणान् हारानिति, स्रगिति हीतिवा पाठः समुचितः । अत्र बिम्बोष्ठकान्त्या शोणमिति यस् तद्गुणस् तम् आश्रित्य गुञ्जाफलानां स्रज इति भ्रान्तिमान् उद्भूतः, [illegible] च तद्गुणः कविना उत्पादित इति तद्गुणोऽपि भ्रान्तिमन्तमपेक्ष्यैव उद्भूतः [illegible] च प्रभूततरचमत्कृतिजनकत्वञ्चाऽऽधिरूढ इति परस्पराङ्गाङ्गिभावेन अनयोरेकत्र पद्ये

यथा वा—

जटाभाभिर् भाभि: करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविभवः ।
परिप्रेङ्खन्-तारा-परिकर-कपालाङ्किततले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ॥उदा० ६६५॥

उपमा रूपकम् उत्प्रेक्षा श्लेषश् चेति चत्वारोऽत्र पूर्ववद् अङ्गाङ्गितया प्रतीयन्ते । कलङ्क एवाक्षवलयम् इति रूपकपरिग्रहे करधृतत्वमेव साधकप्रमाणतां प्रतिपद्यते । अस्य हि रूपकत्वे तिरोहितकलङ्करूपम् अक्षवलयमेव मुख्यतयाऽवगम्यते तस्यैव च करग्रहणयोग्यतया सार्वत्रिकी प्रसिद्धिः । श्लेषच्छायया तु कलङ्कस्य करधारणम् असदेव प्रत्यासत्त्या उपचर्य योज्यते, शशाङ्केन कलङ्कस्य मूर्त्या एव उद्वहनात् । कलङ्काक्षवलयमिवेति तूपमायां कलङ्कस्योत्कटतया प्रतिपत्तिः, न चास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्येऽपि उपचार एव शरणं स्यात् ।

[illegible]राजपत्नीरूपैकार्थसम्बद्धतया च स्थितिरिति सङ्करोऽत्र बोध्यः ॥ उदा० ६६४ ॥

न केवलं द्वयोरेव किन्तु बहूनामप्यलङ्काराणाम् एवंविधः सङ्करो भवतीति प्रदर्शयितुम् उदाहरणान्तरमाह—**जटाभाभिरित्यादि** । भर्तृमारस्वतस्येदं पद्यमिति सुभाषितावलौ उक्तम् (पद्य० १९९९) जटातुल्याभिः पिङ्गाभिः कान्तिभिरुपलक्षित: किरणरूपेण धृतं कलङ्करूपं रुद्राक्षवलयं येन सः, (स्वप्रयुक्तायाः) वियोगिनां विपत्तेर् हेतोरिव कलितेन वैराग्येण शुभ्रः (शुक्लाशयश्च), भस्मेव आपाण्डुः शशी परितः प्रेङ्खन् यः तारासमूहः तद्रूपैः कपालैरङ्कितं तलं यस्य तस्मिन् व्योम्नि श्मशाने इव चरतीत्यर्थः । अत्र जटाभाभिरिति पितृवने इव इति च उपमा, कलङ्काक्षवलय इति तारापरिकरकपालानि इति च रूपकम्, वियोगिव्यापत्तेरिवेति उत्प्रेक्षा, वैराग्यविशद इति श्लेषः; तत्र च उपमा श्लेषस्योत्थापकतया तस्योपकारिणी, श्लेषोऽपि रूपकोत्प्रेक्षयोरुत्थापकतया उपकारकः, तैस्तु समस्तैः साक्षात् परम्परया च यथासम्भवम् उपमा उपक्रियते, एवम् उपकृताया एव अस्या उपमायाः सहृदयहृदयावर्जकत्वादित्याह—**उपमा रूपक**मित्यादिना । कलङ्काक्षवलय इत्यत्र मयूरव्यंसकादित्वेन रूपकसमास उपमितसमासो वेति सन्देहसङ्करोऽयं न रूपकमित्याशङ्क्य निराकरोति—**कलङ्क एवे**त्यादिना । कलङ्क एव अक्षवलयम् इति रूपके आश्रिते एव अक्षवलयस्य प्राधान्यात् तस्य करधृतत्वस्योक्तिः सङ्गच्छते, कलङ्कोऽक्षवलयमिवेत्युपमितसमासे आश्रिते तु उपमेयस्य कलङ्कस्य प्राधान्यात् तस्य च करधृतत्वस्याप्रसिद्धेः करधृतत्वोक्तिर् न सङ्गच्छते इति रूपकमेवाश्रयणीयं नोपमेति न सन्देहसङ्कर इत्यर्थः । कलङ्के करधृतत्वस्याभावे आरोपविषयत्वेनाऽपि करधृतकलङ्कस्य

एवंरूपश्च सङ्करः शब्दालङ्कारयोरपि दृश्यते, यथा—

राजति तटीयमभिहतदानवरासाऽतिपातिसारा वनदा ।

गजता च यूथविरतदानवरा सातिपातिसारा वनदा ॥उदा० ६६६॥

अत्र यमकम् अनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे ।

(सू०२१०) **एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ॥१३९॥**

द्वयोर् बहूनां वा अलङ्काराणामेकत्र समावेशेऽपि विरोधाद् न यत्र युगपद्

प्रतिपादनं कथं सङ्गच्छते तर्हि इत्यत्राह—**श्लेषच्छायये**त्यादि । शशाङ्केन कलङ्कस्य मध्यशरीरेणैव उद्वहनाद् यद्यपि कलङ्के करधृतत्वं नास्ति तथाऽपि रूपके आश्रिते आरोपविषयस्य करधृतकलङ्कस्य अप्राधान्यात् अप्रधाने च उपचारस्य उचितत्वात् करपदश्लेषेण किरणे [illegible] किरणकलङ्कयोश्च प्रत्यासत्तेः सत्त्वात् कलङ्केऽप्रधाने करधृतत्वं कथञ्चिदुपचर्यते इत्यर्थः । तर्हि उपमापक्षेऽपि कलङ्कस्य करधृतत्वमुपचारेणोपपद्यते एवेति कथमुपमायाः परित्यागे रूपकमेवाश्रीयते इत्यत्राऽऽह—**कलङ्कोऽक्षवलय**मित्यादि । कलङ्कोऽक्षवलयम् इव इति [illegible] कलङ्कस्य उपमेयतया प्राधान्यम्, प्रधाने च [illegible], 'गुणे त्वन्याय्यकल्पना (अप्रधाने एव अन्याय्याया लक्षणायाः कल्पना, न मुख्ये)' इति न्यायात्; अतो नोपमा आश्रयणीया, किन्तु रूपकमेवाश्रयणीयमित्यर्थः ॥उदा० ६६५॥

शब्दालङ्कारयोरपि अङ्गाङ्गि[illegible] भवतीति उक्त्वा तदुदाहरणमाह—**राजतितटी**मित्यादि । रत्नाकरकृते हरविजयकाव्ये (५।१३७) पर्वतवर्णनप्रस्तावे पद्यमिदम् । **अभिहतो**ऽभिघातं प्रापितो दानवानां **रासः** सिंहनादो येन तादृश हे हर, **अतिपाती** शीघ्रगामी आरावयुक्तो नदो यस्यां सा एतादृशी इयं तटस्थली राजति, स्वम् अविरतेन दानजलेन **वरा** श्रेष्ठा **सारा** बलिष्ठा **वनदा** वनखण्डिका सा **गजता** गजसमूहश्च यूथम् अतिशयेन पातीत्यर्थः । द्वितीय-चतुर्थपादगतं दानेत्यादियमकं द्वितीयचतुर्थपादगतो दक्षिणतो वामतो वाऽपि पठने तुल्यतां प्राप्नुवन् अनुलोमप्रतिलोमाख्यश् चित्रालङ्कारभेदश्च इतरेतरविविक्तत्वेन न निर्वर्तेते इति पादयमकानुलोमप्रतिलोमयोः प्रत्येकमेव दुष्करतया [illegible] तत्राप्युक्तप्रकारेण तयोः साहित्यन्तु अधिकतरं विदग्धमनोहारीति तयोः परस्परा[illegible] च [illegible] प्राप्ते इति तयोरत्र अङ्गाङ्गिभावसङ्करः इत्याशयेनाह—**अत्र यमक**मित्यादि । वस्तुतस्तु शब्दालङ्कारसंसृष्टिरेवाऽत्र साधीयसीति सङ्केते रूपकः, यद् वाऽत्र शब्दालङ्कारद्वयमेकवाचकानुप्रविष्टमिति वक्ष्यमाणस् तृतीयः सङ्करोऽत्र ज्ञेय इति अलङ्कारसर्वस्वकारः ॥उदा०६६६॥

सङ्करस्य द्वितीयं प्रकारं सन्देहसङ्कराख्यं निरूपयति—**एकस्य चे**त्यादिना । एकत्र पद्ये वाक्ये विभावादावर्थे वा द्वयोर् बहूनां वाऽलङ्काराणां समावेशेऽपि परस्परं कवितात्पर्यविषयत्वे विरुद्धत्वाद् यत्र तेषां न एकस्मिन् काले अवधृता स्थितिः, न वा

अवस्थानम्, न चैकतरस्य परिग्रहे साधकं तदितरस्य वा परिहारे बाधकमस्ति येन एकतर एव परिगृह्येत स निश्चयाभावरूपो द्वितीयः सङ्करः, समुच्चयेन सङ्करस्यैवाऽऽक्षेपात् ।

उदाहरणम्—

> जह गहिरो जह रअण-निब्भरो जह अ णिम्मलच्छाओ ।
> तह किं विहिणा एसो सुरस वाणीओ जलणिही ण कओ ॥उदा० ६६७॥

अत्र समुद्रे प्रस्तुते विशेषणसाम्याद् अप्रस्तुतार्थप्रतीतेः किमसौ समासोक्तिः किमब्धेरप्रस्तुतस्य मुखेन कस्यापि तत्समानगुणतया प्रस्तुतस्य प्रतीतेरियमप्रस्तुतप्रशंसेति सन्देहः ।

यथा वा—

> नयनानन्ददायीन्दोर् बिम्बमेतत् प्रसीदति ।
> अधुनाऽपि निरुद्धाशमवशीर्णमिदं तमः ॥ उदा० ६६८ ॥

एकतरस्यापि स्थितेर् निश्चयः तस्य परिग्रहे साधकमानस्य तदितरस्य निराकरणे बाधकप्रमाणस्य वाऽप्यभावात् स सन्देहसङ्कर इत्यर्थः । सूत्रस्थेन समुच्चयार्थकेन चकारेण सङ्करस्यैवाऽनुकर्षणं सूच्यते इत्याह—**समुच्चयेने**त्यादिना ॥१३९॥

द्वयोरलङ्कारयोः संदेहसङ्करमुदाहरति—**जह गहिरो** इत्यादिना । '**यथा गभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः । तथा किं विधिनैष सुरसपानीयो जलनिधिर् न कृतः**' इति संस्कृतच्छाया एष समुद्रो विधिना यथा गम्भीरो रत्नपूर्णः स्वच्छकान्तिश्च कृतः, तथा मधुरपानीयः किमिति न कृतः स्यादित्यर्थः । **सुरसवाणीओ** इत्यस्य सुरसवाणीक इति च संस्कृतच्छाया, मधुरवचन इति तस्यार्थः, एतेन च न पुरुषरूपार्थप्रतीत्यसम्भवः । अत्र समुद्रस्य प्रस्तुतत्वाप्रस्तुतत्वयोरनिश्चयात् तस्य प्रस्तुतत्वे गभीरादिविशेषणसाम्यादप्रस्तुतस्य पुरुषस्य प्रतीतेः समासोक्तिः, समुद्रस्य अप्रस्तुतत्वे तु अप्रस्तुतसमुद्रवर्णनद्वारा समुद्रसमगुणस्य कस्यापि पुरुषस्य प्रतीतिरिति तुल्ये प्रस्तुते अप्रस्तुतस्य तुल्यस्य कथनादप्रस्तुतप्रशंसा इति सन्देहात् सन्देसङ्करो बोध्य इत्याशयेनाऽऽह—**अत्र समुद्रे** इत्यादिना । एकस्य एकदैव प्रस्तुतत्वाप्रस्तुतत्वयोरसम्भवाद् अनयोर् युगपद् असम्भवः । प्रकरणज्ञाने सति तु एकतरस्य परिग्रहे अन्यस्य परिहारे च साधकं बाधकं च प्रकरणमेव स्यात्, प्रकरणज्ञानाभावात् तु तदपि नेति बोध्यम् ॥ उदा० ६६७॥

बहूनां सन्देहसङ्करमुदाहरति-**नयनानन्दे**त्यादिना । नेत्रानन्दजनकं चन्द्रस्येदं मण्डलं विशदं भवति, किन्तु अधुनाऽपि इदं निरुद्धदिशं तमो नष्टं नास्तीति, अथवा नेत्रानन्दजनकम् इदं नायिकामुखरूपं चन्द्रमण्डलं प्रसन्नं भवति, तथापि अधुनाऽपि निरुद्धाभिलाषं विरहजन्यमूढतारूपमिदं तमो नष्टं नास्तीत्यर्थः । अत्र कामोद्दीपकः कालो वर्तते इत्यस्य व्यङ्ग्यस्यार्थस्यैव भङ्ग्यन्तरेण प्रतिपादनात् पर्यायोक्तम्, अथवा वदनस्येन्दुबिम्बतयाऽ-

अत्र च किं कामस्योद्दीपकः कालो वर्तते इति भङ्ग्यन्तरेणाभिधानात् पर्यायोक्तम्, उत वदनस्य इन्दुबिम्बतयाऽध्यवसानाद् अतिशयोक्ति, किं वा एतदिति वक्त्रं निर्दिश्य तद्रूपारोपवशाद् रूपकम्, अथवैतयोः समुच्चयविवक्षायां दीपकम्, अथवा तुल्ययोगिता, किमु प्रदोषसमये विशेषणसाम्याद् आननस्य अवगतौ समासोक्तिः, आहो स्विद् मुखनैर्मल्यप्रस्तावाद् अप्रस्तुतप्रशंसेति बहूनां सन्देहादयमेव सङ्करः ।

यत्र तु न्याय-दोषयोः अन्यतरस्य अवतारस् तत्र एकतमस्य निश्चयाद् न संशयः; न्यायश् च साधकत्वम् अनुकूलता, दोषोऽपि बाधकत्वं प्रतिकूलता: तत्र— **'सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः'** (उदा० ६६९) इत्यत्र मुख्यतयाऽवगम्यमाना हासद्युतिर् वक्त्रे एवाऽनुकूल्यं भजते इत्युपमायाः साधकम्, शशिनि तु न तथा प्रतिकूलेति रूपकं प्रति तस्या अबाधकता, **'वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गतः'** (उदा० ६७०) इत्यत्र अपरत्वमिन्दोरनु-

---

ध्यवसानाद् निगीर्याध्यवसानरूपाऽतिशयोक्तिः, अथवा एतत्पदेन पुरोवर्तिनो युवतीवक्त्रस्य निर्देशेन तत्रेन्दुमण्डलत्वारोपाद् रूपकम्, अथवा नयनानन्ददायि इन्दोर् बिम्बं नयनानन्द-दायि एतद् युवतीवदनञ्च प्रसीदतीति एकस्य प्रस्तुतत्वेन अन्यस्य अप्रस्तुतत्वेन विवक्षया क्रियादीपकम्, अथवा उभयोः प्रस्तुतत्वेन अप्रस्तुतत्वेन वा विवक्षया तुल्ययोगिता, अथवा रजनीमुखे चन्द्रबिम्बे वर्ण्यमाने विशेषणसाम्यात् तरुणीवदनस्य अवगतौ समासोक्तिः, अथवा मुखनैर्मल्यवर्णनप्रस्तावे तुल्ये तरुण्या निर्मले मुखे प्रस्तुते अप्रस्तुतस्य चन्द्रस्य वर्णनाद् अप्रस्तुतप्रशंसेति एतेषु पक्षेषु कस्याऽपि साधने वा प्रमाणस्य प्रकरणादेरभावात् सन्देह एवेति अयमपि **अयमेव** सन्देहरूप एव सङ्कर इत्याह-**अत्र च किमि**त्यादिना ॥ उदा० ६६८ ॥

"उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् समुदितं व्याख्यानं भवति" (व्या० म० भा०, पस्पशाह्निके) इति हि व्याख्यानविदो वदन्तीति **एकस्य च ग्रहे न्याये**त्यादिसूत्र-व्याख्याङ्गत्वेन सूत्रप्रत्युदाहरणप्रदर्शनायाह—**यत्र तु न्याये**त्यादि । यत्र एकतरस्य एकतमस्य वा साधकम् अन्यस्य अन्येषां वा बाधकं भवति तत्र तु एकतरस्य एकतमस्य वा निश्चय एव भवतीति न सन्देहसङ्करस्याऽवसर इत्यर्थः । साधकमानेनैकतरनिश्चये उदाहरणमाह— **सौभाग्यं वितनोती**त्यादि । हासकान्तिः मुखचन्द्रस्य सुभगत्वं चन्द्रिकाचन्द्रस्य सौभाग्यमिव विस्तारयतु इत्यर्थः । अत्र हासद्युतिर्वक्त्रे एव स्वभावाद् अनुकूला इति वक्त्रस्य प्राधान्ये-नाऽवगमाय वक्त्रं शशीवेति [illegible] उपमा स्वीकार्या, न चेदं बाधक-मानेनैकतरनिश्चयस्योदाहरणं हासपदेन लक्षणया विकासस्याऽपि बोधयितुं शक्यत्वात् ज्योत्स्नासदृशी विकासशोभा **वक्त्ररूपशशिनः सौभाग्यं** वितनोतीति वाक्यार्थस्याप्युपपद्य-मानत्वेन हासद्युतेर् बाधकत्वस्याऽभावादिति बोध्यम् । प्रपञ्चार्थं पुनरपि साधकमानेनैव

गुणं न तु वक्त्रस्य प्रतिकूलमिति रूपकस्य साधकतां प्रतिपद्यते, न तूपमाया बाधकताम्; "**राजनारायणं लक्ष्मीस् त्वामालिङ्गति निर्भरम्**" (उदा० ६७१) इत्यत्र पुनर् आलिङ्गनम् उपमां निरस्यति सदृशं प्रति प्रेयसीप्रवृत्तस्यालिङ्गनस्य असम्भवात्; "**पादाम्बुजं भवतु नो विजयाय मञ्जु-मञ्जीरशिञ्जितमनोहरमम्बिकायाः**' (उदा० ६७२) इत्यत्र मञ्जीरशिञ्जितम् अम्बुजे प्रतिकूलम् असम्भवादिति रूपकस्य बाधकम्, न तु पादेऽनुकूलमिति उपमायाः साधकमिति वाच्ये, विध्युपमर्दिनो बाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः। एवमन्यत्रापि सुधीभिः परीक्ष्यम् ।

एकतरनिश्चये उदाहरणमाह—**वक्त्रेन्दा**वित्यादि । 'किं पद्मस्य रुचिं वहन्ति नयनानन्दं विधत्ते न किं वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् । वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतो दर्पस् स्यादमृतेन चेदिह तवाप्यस्त्येव बिम्बाधरे' इति रत्नावलीस्थं (३:१३) पूर्णं पद्यम् । इन्दुकार्याणां सर्वेषां सम्पादके त्वद्वक्त्ररूपे इन्दौ सति यदयमाकाशे इन्दुरभ्युद्यतः तद् मयि अमृतमस्तीति दर्पेण स्यात्, किन्तु अमृतमपि त्वद्वक्त्ररूपे इन्दावपि अधररूपेण स्थितमस्त्येवेत्यर्थः । अत्र वक्त्रेन्दुरित्यत्र इन्दोः प्राधान्ये प्रतीते एव अपरत्वं समुपपद्यते अपरत्वस्य प्रथमापेक्षित्वाद् इति इन्दोः प्राधान्याय वक्त्रमेव इन्दुरिति मयूरव्यंसकादिसमासाश्रयणाद् रूपकं स्वीकार्यम् । इन्दुकार्यसम्पादके इन्दुतुल्ये अन्यस्मिन् सति किं तदतिरिक्तेन मुख्येन चन्द्रेणेति वाक्यार्थस्य यथाकथञ्चिद् उपपादयितुं शक्यत्वाद् अपरत्वस्य न चोपमाबाधकत्वमिति नेदं बाधकमानैकतरनिश्चयस्योदाहरणमिति च सूचयति **नतूपमाया** इत्यादिना । बाधकमानेन एकतरस्य निश्चये उदाहरणमाह—**राजनारायणं**त्यादि । हे नृप, राजरूपं नारायणं त्वां लक्ष्मीर् गाढमालिङ्गतीत्यर्थः । अत्र राजा नारायण इवेति उपमितसमासे राज्ञः प्राधान्याद् नारायणसदृशस्यापि राज्ञो लक्ष्मीकर्तृकम् आलिङ्गनं नोपपद्यते सत्याः प्रेयस्याः पतिसदृशं प्रत्यालिङ्गनस्याऽसम्भवाद् इति उपमा बाधिता भवति इति नारायणस्य प्राधान्येन लक्ष्मीकर्तृकस्यालिङ्गनस्योपपादनाय राजैव नारायण इति रूपकसमासमाश्रित्य रूपकत्वं स्वीक्रियते इत्याह—**इत्यत्र पुनरि**त्यादिना । प्रपञ्चार्थं पुनरपि बाधकमानेनैकतरस्य निश्चये उदाहरणमाह—**पादाम्बुज**मित्यादि । 'आनन्द-मन्थर-पुरन्दर-मुक्त-माल्यं मौलौ हठेन निहितं महिषासुरस्य । पदाम्बुजं भवतु नो विजयाय मञ्जु मञ्जीरशिञ्जितमनोहरमम्बिकायाः।' इति धर्माचार्यकृतपञ्चस्तवीस्थं पूर्णं पद्यम् (३।१) । आनन्देन मन्थरं यथास्यात् तथा पुरन्दरेण मुक्तानि (समर्पितानि) माल्यानि (कुसुमानि) यत्र तादृशं महिषासुरस्य मौलौ हठेन आरोपितं मञ्जुनो मञ्जीरस्य शिञ्जितेन मनोहरम् अम्बिकाया अम्बुजसदृशं चरणम् अस्माकं विजयाय भवतु इत्यर्थः । अत्र अम्बुजस्य प्राधान्ये मञ्जुमञ्जीरशिञ्जितमिति विशेषणं नोपपद्यते इति पादरूपम् अम्बुजमिति रूपकं नाश्रीयते इत्याह—**इत्यत्र मञ्जीरे**त्यादिना । यद्यपि मञ्जुमञ्जीरशिञ्जितमनोहरत्वं पादस्यैवाऽनुकूलमिति तस्य उपमाया साधकत्वमपि

(सू० २११) स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम् ।
व्यवस्थितं च ... . ।

अभिन्ने च पदे स्पष्टतया यद् उभावपि शब्दार्थालङ्कारौ व्यवस्थां समासादयतः सोऽप्यपरः सङ्करः ।

उदाहरणम्—

स्पष्टोल्लसत्-किरणकेसर-सूर्यबिम्ब-
विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतार-
[illegible] सञ्चुकोच ॥ उदा० ६७३ ॥

अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ ।

भवत्येव तथापि [illegible] साधकत्वाद् [illegible] बाधकत्वस्य लौकिकेन न्यायेनैव उत्कटतया प्रतीतेः प्रधानेनैव च व्यपदेशस्य युक्ततरत्वाद् अत्र मञ्जुमञ्जीरशिञ्जितमनोहरत्वस्य रूपकबाधकत्वेन प्रतिपादनं कृतमित्याशयेनाह—**ननु पादेऽनुकूल-**मित्यादि । अनेनैव प्रकारेण अन्यत्रापि सुधीभिः साधकत्वस्य बाधकत्वस्य च परीक्षा कर्तव्या [illegible] एव च सन्देहसङ्करत्वं यथार्हं [illegible] **एवमन्यत्रे**त्यादिना ॥उदा० ६६९-७२॥

सङ्करस्य तृतीयं प्रकारं समानपदप्रतिपाद्यसङ्करम् [illegible] वाच- [illegible] **अत्रे**त्यादिना । एकत्रैव विषये (आश्रये) शब्दालङ्कारौ अर्थालङ्कारौ शब्दार्थालङ्कारौ च स्पष्टौ सन्तौ यत् सम्यक् स्थितौ भवतः सः अपरः (तृतीयः) सङ्कर इति सूत्रवृत्त्योः परिष्कृतोऽर्थः । तत्र 'कलकलोऽलकलोलदृशाऽन्यया' इत्यत्र [illegible] 'वक्त्रारविन्दमधुलुब्धमधुव्रताश्च धावन्त्यमी [illegible]' इत्यादौ रूपकातिशयोक्त्योरर्थालङ्कारयोरेकाश्रयानुप्रवेशो बोध्यः । शब्दालङ्कारयोः अर्थालङ्कारयोश्च एकाश्रयानुप्रवेशसङ्करौ नोदाहृतौ नाऽपि लेशेनापि सूचितौ अलकेनेति तस्येमौ प्रकारौ न सम्मतौ इति प्रतिभाति ।

शब्दार्थालङ्कारयोरेकाश्रयानुप्रवेशसङ्करमुदाहरति—**स्पष्टोल्लसदि**त्यादिना । रत्नाकरकविकृते हरविजयमहाकाव्ये सन्ध्यावर्णनमिदम् (१९।१) । अथ स्पष्टं यथा स्यात् तथा उल्लसन्तः किरणा एव केसरा यस्य तादृशं सूर्यबिम्बमेव विस्तीर्णा कर्णिका (बीजकोषरूपमध्यभागः) यस्य तादृशम्, मिथः सम्बद्धा अष्टौ दिश एव दलकलापो यस्य तादृशम्, उषायाः (रात्रेः) आगमनेन बद्धा अन्धकाररूपा मधुपानामावलिर् यत्र तादृशं दिवसरूपं कमलं सञ्चुकोचेत्यर्थः । अत्र किरणकेसरेत्यत्र सूर्यबिम्बविस्तीर्ण [illegible], दिग्दलकलापेत्यत्र च रूपकानुप्रासयोरेकाश्रयानुप्रवेशात् तृतीयः सङ्कर इत्याह—**अत्रैकपदे**त्यादिना । ॥उदा० ६७३॥

(सू० २१२) ··· ···· **तेनाऽसौ त्रिरूपः परिकीर्तितः ॥ १४० ॥**

तदयम् अनुग्राह्यानुग्राहकतया, सन्देहेन, एकपदप्रतिपाद्यतया च व्यवस्थितत्वात् त्रिप्रकारतयैव सङ्करो व्याकृतः, प्रकारान्तरेण तु न शक्यो व्याकर्तुम् आनन्त्यात् तत्प्रभेदानाम् इति प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलङ्काराः ।

कुतः पुनरेष नियमो यद् एषां तुल्येऽपि काव्यशोभातिशयहेतुत्वे कश्चिदलङ्कारः शब्दस्य, कश्चिद् अर्थस्य, कश्चिच् च उभयस्येति चेत् ? उक्तमत्र यथा काव्ये दोषगुणालङ्काराणां शब्दार्थोभयगतत्वेन व्यवस्थायाम् अन्वयव्यतिरेकौ एव प्रभवतो निमित्तान्तरस्याऽभावात् ततश् च योऽलङ्कारो यदीयौ भावाभावौ अनुविधत्ते स तदलङ्कारो व्यवस्थाप्यते इति ।

यस् तु भिन्नपदाभिधेयतया शब्दार्थगतालङ्कारसङ्करः 'शब्दार्थवर्त्यलङ्कारा वाक्ये एकत्र भासिनः' (का० अ० सा० स० ५।१२) इत्यादि वदता भट्टोद्भटेन स्वीकृतः स तु संसृष्टौ अङ्गाङ्गिभावसङ्करे वाऽन्तर्भवतीति भट्टोद्भटेनोक्तं सङ्करस्य चतुर्विधत्वं नोपपद्यते इत्याशयेन निगमयति—**तेनाऽसौ त्रिरूप** इत्यादिना । **तेनाय**मिति पाठो युक्ततरोऽदसो विप्रकृष्टार्थनिर्देशकत्वात् सङ्करस्य च निरूप्यमाणत्वेन बुद्धौ आसन्नत्वात् । सूत्रवृत्त्योरर्थः स्फुटः । ननु ध्वनेः सङ्करविशेषाणां गणना कृता तथैव अनुप्रास-यमक-चित्रोपमा-रूपकाद्यलङ्कारविशेषाणाम् एकैकं द्वयोर् द्वयोर् बहूनां वा साङ्कर्येण जायमानानां सङ्करविशेषाणां गणना किमिति न क्रियते इत्यत्राऽऽह—**प्रकारान्तरेणे**त्यादि । **प्रकारान्तरेण** अनुप्रास-यमकयोः, यमक-चित्रयोः, अनुप्रास-यमक-चित्राणाम् अनुप्रासोपमयोः, अनुप्रासोपमारूपकाणाम् इत्यनेन प्रकारेण सङ्करो व्याकर्तुं न शक्योऽलङ्काराणां च कविशिक्षोपयोगि दिक्प्रदर्शनरूपं प्रतिपादनं सम्पूर्णमित्याह—**प्रतिपादिता** इत्यादिना ।

शब्दार्थौ काव्यम्, काव्यशोभाकरा धर्मा अलङ्काराः इति सर्वेषाम् अप्यलङ्काराणां शब्दार्थोभयगतत्वं युक्तम्, तथापि कथं कश्चिदलङ्कारः शब्दस्य कश्चिदर्थस्य कश्चिच् च उभयस्येति प्रतिपाद्यते त्वया इति प्रश्नमुत्थापयति परमतदूषणेन स्वमतस्य प्रतिष्ठापनाय—**कुतः पुन**रित्यादिना । श्लेषव्यवस्थापनप्रसङ्गे 'इह दोषगुणालङ्काराणां शब्दार्थगतत्वेन यो विभागः स अन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते' इति उक्तमेव शब्दार्थालङ्कारविभागनिमित्तं स्मारयति—**उक्तमत्रे**त्यादिना । शब्दस्य परिवृत्त्यसहत्वे शब्दगतत्वम्, अर्थस्य परिवृत्त्यसहत्वे अर्थगतत्वम्, उभयस्य परिवृत्त्यसहत्वे उभयगतत्वं व्यवस्थाप्यते इति परमार्थः ।

ननु कथं तर्हि हि-शब्दहेतुकस्यार्थान्तरन्यासस्य, अपि-सह-विनेत्यादि शब्दहेतुकानां विशेषादीनाम्, इवादिशब्दहेतुकानां श्रौतीनाम् उपमानाम्, 'सकलकलं पुरमेतज् जातं सम्प्रति सुधांशुबिम्बमिव' इत्यादिकानां शब्दाश्रितानाम् उपमासमुच्चयादीनां च शब्दार्थोभयान्वयव्यतिरेकानुविधायिनाम् अलङ्काराणां त्वया अर्थालङ्कारमध्ये प्रतिपादनं

एवं च यथा पुनरुक्तवदाभासः परम्परितरूपकं च उभयोर् भावाऽभावानुविधायितया उभयालङ्कारौ तथा हि-शब्दहेत्वर्थान्तरन्यासप्रभृतयोऽपि द्रष्टव्याः, अर्थस्य तु वैचित्र्यमुत्कटतया प्रतिभासते इति ते अर्थालङ्कारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः।

योऽलङ्कारो यदाश्रितः स तदलङ्कार इत्यपि कल्पनायाम् अन्वयव्यतिरेकौ अवश्यम् आश्रयितव्यौ, तदाश्रयणमन्तरेण विशिष्टस्य आश्रयाश्रयिभावस्याऽभावाद् इति अलङ्काराणां यथोक्तनिमित्त एव परस्परव्यतिरेको ज्यायान्।

क्रियते ? इत्यत्राऽऽह—**एवं च यथे**त्यादि। यद्यपि हि शब्दहेत्वर्थान्तरन्यासादयोऽपि पुनरुक्तवदाभास-परम्परितरूपके इव शब्दार्थोभयालङ्कारा एव तथापि तेषु अर्थवैचित्र्यस्यैव उक्तत्वाद् वस्तुस्थितिमनपेक्ष्यैव अर्थालङ्कारमध्ये ते प्रतिपादिता इत्यर्थः।

उद्भट-रुद्रट-तिलकादिमतं दूषयित्वा स्वमतं स्थिरं कर्तुमाह—**योऽलङ्कारो यदाश्रित** इत्यादि। साक्षात् शब्दाश्रितत्वस्य यमकखड्गबन्धादिषु अभावात्, साक्षाद् अर्थाश्रितत्वस्य च उत्प्रेक्षा-समासोक्त्यादौ असम्भवात्, यथा-कथञ्चिद् आश्रितत्वं तु यमकादेरपि अर्थेऽप्यस्ति, उपमादेरपि शब्देऽप्यस्ति इति यथाकथञ्चिदाश्रितत्वमादाय व्यवस्थाया असम्भवात् परिवृन्त्यसहशब्दाश्रितत्वं परिवृन्त्यसहार्थाश्रितत्वं च वक्तव्यं स्यात्, न चैतादृश आश्रयाश्रयिभाव सुनिरूपः, अतः [illegible] अलङ्काराणां शब्दार्थगतत्वेन परस्परभेदः स्वीकर्तुमुचित इत्यर्थः। यद्यपि अलङ्कारसर्वस्वकारादय 'अलङ्कारस्य कविप्रतिभागतत्वेऽन्वयव्यतिरेकौ न निबन्धनम्, तौ तत्-कार्यत्वे प्रयोजकौ, न तु तदलङ्कारत्वे, अन्यथा श्रौतोपमादीनामपि शब्दालङ्कारताप्रसङ्गः स्यात्; लोकवद् आश्रयाश्रयिभाव एव विभागव्यवस्थाया निमित्तम्' इत्याहुस्तथापि आश्रयाश्रयिभावनिरूपणेऽपि अन्वयव्यतिरेकनियमयोरेव शरणीकरणीयत्वाच्च शब्दार्थालङ्कारविभागे अलङ्कारविशेषाणां शब्दार्थान्वयव्यतिरेकानुविधायित्वमेव मूलमिति मन्तव्यम्। 'अत्रैकस्मिन् पदे-परिवर्तित' 'नाऽलङ्कार इति शब्दाश्रय' इत्यादि नवमोल्लासान्ते वदतो मम्मटस्येदमेव-मतम् आश्रयाश्रयिभावकल्पनाया अनावश्यकात् शब्दशरीरोऽलङ्कार शब्दालङ्कारः, अर्थशरीरोऽलङ्कारोऽर्थालङ्कार, उभयशरीरोऽलङ्कार उभयालङ्कार इत्येववक्तुमुचितम्, स्वरूपगतस्यैव भेदनिमित्तस्य निर्देशार्हत्वात्, अन्वयव्यतिरेकौ तु चमत्कारभूमिनिर्णयनिमित्ततयैवोपयोक्तव्यौ न तु भेदहेतुत्वेनेति अस्माकं पक्षः ॥१४०॥

केचिद् भामहप्रभृतयः उपमादोषादीन् अलङ्कारदोषान् अलङ्कारप्रकरणे प्रतिपादयन्ति स्म, तेषां दोषप्रकरणं मम्मटस्येव विस्तृतं व्यवस्थितं च नाऽभूदिति केचनाऽलङ्कारदोषा तेषां दोषप्रकरणेन अगतार्था अपि भवन्ति स्मेति तेषाम् अलङ्कारप्रकरणेऽलङ्कारदोषविवेचनं क्रियताऽप्यंशेन उचितमेवाऽभूत्, तथापि क्रियताप्यंशेन तत्र पुनरुक्तिरपि अभूदेव; मम्मटेन तु सर्वेऽपि काव्यदोषा सूक्ष्मेक्षिकया सुव्यवस्थितरूपेण दोषोल्लासे एव निरूपिताः,

(सू० २१३) **एषां दोषा यथायोगं सम्भवन्तोऽपि केचन ।**
उक्तेष्वन्तः पतन्तीति न पृथक् प्रतिपादिताः ॥१४१॥

तथाहि—

[अ] अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोध इति ये त्रयोऽनर्थास् ते प्रसिद्धिविरुद्धताम् अपुष्टार्थत्वं प्रतिकूलवर्णतां च यथाक्रमं न व्यतिक्रामन्ति, तत्स्वभावत्वात् ।

क्रमेणोदाहरणम्—

(क) चक्री चक्रारपङ्क्तिं हरिरपि च हरीन् धूर्जटिर् धूर्ध्वजान्तान्
अक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः ।
रंहः सङ्घः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात् स्यन्दनो वः
॥उदा० ६७४॥

अत्र कर्तृकर्मप्रतिनियमेन स्तुतिः अनुप्रासानुरोधेनैव प्रतिपादिता न पुराणेतिहासादिषु तथा प्रतीतेति प्रसिद्धिविरोधः ।

एवं च ये च प्राचीनैः प्रतिपादिता अलङ्कारदोषास् ते सर्वेऽपि दोषोल्लासे प्रतिपादितेषु दोषेष्वेव अन्तर्भूता भवन्तीति तत्-तदलङ्कारनिरूपणप्रस्तावे ते ते सम्भवन्तोऽप्यलङ्कार-दोषा नोल्लिखिता इत्याह—**एषां दोषा** इत्यादिना ॥१४१॥

सर्वेषाम् अलङ्कारदोषाणाम् उक्तेषु दोषेषु अन्तर्भावस्य दिशं प्रदर्शयितुं तावद् अनुप्रासदोषाणामुक्तेषु दोषेषु अन्तर्भावं प्रदर्शयति—[अ] **अनुप्रासस्येत्या**दिना । अनुप्रासस्य प्रसिद्ध्यभावो दोष उक्तायां प्रसिद्धिविरुद्धतायाम् अन्तर्भवति, अनुप्रासस्य वैफल्यं दोष उक्ते अपुष्टार्थत्वे अन्तर्भवति, अनुप्रासस्य वृत्तिविरोधो दोषः प्रतिकूलवर्णतायामन्तर्भवति उभयेषां परस्परं तुल्यस्वरूपत्वादित्यर्थः ।

(क) प्रसिद्ध्यभावाख्यानुप्रासदोषदुष्टतया परैरुदाहरणीये पद्ये प्रसिद्धिविरुद्धत्वरूपं सामान्यमेव दोषं प्रदर्शयितु तादृशं पद्यमुपन्यस्यति—**चक्री चक्रारे**त्यादि । सूर्यशतके पद्यमिदम् (७१) । तिग्मरश्मेः सूर्यस्य सदा आयोजितस्य यस्य रथस्य चक्रगतानाम् अराणां पङ्क्तिं प्रीतिप्रसन्नो विष्णुः प्रतिदिनं स्तौति, अश्वान् प्रीतिप्रसन्न इन्द्रः प्रतिदिनं स्तौति, यानमुखस्थस्य ध्वजस्य प्रान्तभागान् प्रतिप्रसन्नो महादेवः प्रतिदिन स्तौति, चक्रनाभिस्थं पिण्डं प्रतिप्रसन्नश्चन्द्र स्तौति, सारथिम् अरुणं प्रीतिप्रसन्नो वरुणः प्रतिदिनं स्तौति, युगंधराग्रं प्रीतिप्रसन्नः कुबेरः प्रतिदिनं स्तौति, वेग प्रतिप्रसन्नः सुराणां सङ्घः प्रतिदिनं स्तौति स सूर्यस्य रथो युष्मान् रक्षतु इत्यर्थः । अत्र विष्णुरेव चक्रारपङ्क्तिमेव स्तौति, इन्द्र एव अश्वानेव स्तौतीत्यादिकेन कर्तृकर्मनियमेन स्तुतिः कविना अनुप्रासार्थमेव निबद्धा न तु तथा स्तुति पुराणे इतिहासे वा प्रसिद्धाऽस्तीति प्रसिद्धिविरोधसामान्यमेवाऽत्र दोषो बोध्य इत्याह—**अत्र कर्तृकर्मप्रतिनियमेने**त्यादिना ।

(ख) **भण तरुणि**, रमणमन्दिरमानन्द-स्यन्दि-सुन्दरेन्दुमुखि।
यदि सल्लीलोल्लापिनि, गच्छसि तत् किं त्वदीयं मे ॥*॥
अनणु-रणन्-मणि-मेखलमविरल[illegible]रम्।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥६७५॥

अत्र वाच्यस्य विवेच्यमानं न किञ्चिदपि चारुत्वं प्रतीयते इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम्।

(ग) **अकुण्ठोत्कण्ठया पूर्णम् इत्यादौ** (उदा० ६७६) शृङ्गारे परुषवर्णाडम्बरः पूर्वोक्तया नीत्या विरुध्यते इति परुषानुप्रासेऽत्र प्रतिकूलवर्णता वृत्तिविरोधः।

[आ] यमकस्य पादत्रयगतत्वेन यमनम् अप्रयुक्तं दोषः, यथा—

भुजङ्गमस्येव मणिः सदम्भा ग्राहावकीर्णेव नदी सदम्भाः।
दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः प्रमुखे सदम्भाः ॥उदा० ६७७॥

(ख) वाच्यार्थचारुत्वस्य असम्पादकतया विफलेन अनुप्रासेन युक्तयोः पद्ययोः अपुष्टार्थत्वेन सामान्येनैव दोषेण युक्तत्वं प्रदर्शयति—**भण तरुणी**त्यादिना। रुद्रटकाव्यालङ्कारे उदाहृते पद्ये इमे (३।२२,२३)। सङ्केतितरतिवेश्मगमनाय कृतनिश्चयां तरुणीं प्रति ग्रामतरुणस्येयमुक्तिः। आनन्दस्यन्दि सुन्दरचन्द्रतुल्यवदने सल्लीलयालवक्तुं कुशले हे तरुणि, त्वं यदि मत्-सङ्केतितं रतिवेश्म यासि तर्हि मम मनोरथाः **पूर्णा एवे**ति मम हृदयेन समाश्वसितव्यम्, किन्तु तथापि त्वदीयम् अविरत-रणन्-मणिमेखलम् निरन्तरशब्दायमानमञ्जीरञ्च हिण्डनम् अकारणमेव मह्यं तीव्रां समुत्कण्ठां ददातीत्यर्थः। **रमणमन्दिरं** रमणस्य प्रेयसो मन्दिरमिति व्याख्याने तु [illegible] स्यात्। यद्यपि उपर्युक्ते व्याख्याने न कश्चित् दोष इति रुद्रटस्येदमुदाहरणं मधुरवृत्तेः सुसङ्गतमेव तथापि नमिसाधुकृते 'कश्चिद् परमहिलां निजदयितगृहं व्रजन्ती वीक्ष्याऽऽह—भण वद त्वमेव हे तरुणि, यदि त्वं निजदयितमन्दिरं व्रजसि तत् किं त्वदीयं परिसरणं मे निष्प्रयोजनमेव रणरणकं हृदयाकुलत्वं कुरुते' इत्यादिके व्याख्याने तु भावविरहस्य व्यञ्जकम् उक्तं वाच्यार्थं प्रति अनणुरणन्मणिमेखलमिति अविरल[illegible]मिति च परिसरणविशेषणद्वयं नोपकारमिति अकारणमिति च वर्तमाने सुतरामनुपकारकमिति उक्तं विशेषणद्वयं केवलमनुप्रासार्थमेव उपात्तमिति तद् अपुष्टार्थमेवेति वृत्तिवैफल्यमपुष्टार्थत्वे एवाऽन्तर्भवतीत्याशयः। **विवेच्यमानम्** अनुप्रासयुक्तविशेषणद्वयप्रदानेन अतिरेच्यमानम्, उत्कर्षं प्रापितमिति यावत्, परीखपाठे तु **विचिन्त्यमानमिति** पाठः, सच 'उक्तेन विशेषणद्वयेन कीदृशं चारुत्वं वर्धितमिति विचारितं चारुत्वं न किञ्चिदपि वर्धितं प्रतीयते' इत्यर्थकल्पनेन वाक्येऽन्वितः कार्यं ॥उदा० ६७५॥

वृत्तिविरोधरूपानुप्रासदोषयुक्तत्वेन पराभिमते पद्ये प्रतिकूलवर्णतां प्रदर्श्य वृत्तिविरोधस्य प्रतिकूलवर्णत्वान्तर्गतत्वं व्युत्पादयितुमाह—**अकुण्ठोत्कण्ठ**येत्यादि। 'अकुण्ठोत्कण्ठया पूर्णमाकण्ठ कलकण्ठि माम्। कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर' इति सप्तमे

(इ) उपमायाम् उपमानस्य जातिप्रमाणगतं न्यूनत्वम् अधिकता वा तादृशी अनुचितार्थत्वं दोषः। धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वम् अधिकपदत्वं च न व्यभिचरतः । क्रमेणोदाहरणम्—

(क) चण्डालैरिव युष्माभिः साहसं परमं कृतम् ॥उदा० ६७८॥

(ख) वह्निस्फुलिङ्ग इव भानुरयं चकास्ति ॥उदा० ६७९॥

उल्लासे (उदा० २७३) प्रतिकूलवर्णत्वे उदाहृतं पद्यमिदम् । हे कलकण्ठि दूति, त्वमुत्तरोत्तरं वर्धमानया अप्रतिहतया उत्कण्ठया कण्ठपर्यन्तं व्याप्तं मां कम्बुकण्ठ्यास् तस्या नायिकायाः कण्ठे क्षणमात्रमपि आश्लिष्टं कुरु, मम तदालिङ्गनौत्सुक्यजन्यकण्ठपीडा [illegible]रेत्यर्थः। अत्र टवर्गीयवर्णानां शृङ्गारव्यञ्जने या प्रतिकूलता सैव पराभिमतो वृत्तिविरोधोऽपीति अनुप्रासस्य वृत्तिविरोध उक्ताद् दोषाद् व्यतिरिक्तो नेत्यभिप्रायः । **पूर्वोक्तया नीत्या** [illegible] ॥उदा० ६७६॥

भामहोक्तस्य [illegible] (२।१९) यमकदोषस्य क्लिष्टत्वेऽन्तर्भावः स्फुट इति तमुपेक्ष्य पादत्रयगतत्वरूपस्य यमकदोषस्य अप्रयुक्तत्वेऽन्तर्भावं प्रतिपाद्य अप्रयुक्तत्वदोषयुक्तं यमकमुदाहरति—भुजङ्गमस्येत्यादिना । सदम्भाः सकपटाः खलः सद् **अम्भः** तेजो यस्य तादृशो भुजङ्गमस्य मणिरिव, ग्राहैर् युक्ता स्वच्छजला नदी इव च लोकचित्तस्य दुर्बोधत्वं (भुजङ्गममणेर् दुष्प्रापत्वं नद्या गम्भीरत्वं च) निश्चितवतोऽपि जनस्य चेतः प्रथमं तु आकर्षन्त्येवेत्यर्थः । अत्र सदम्भा इति यमकस्य पादत्रयगतस्य यमकस्य च [illegible] अप्रयुक्तमेव दोषो बोध्य इत्यभिप्रायः । तथा चाहुः—'यमकं तु विधातव्यं न कदाचिदपि त्रिपाद्' इति ॥उदा० ६७७॥

अथ मेधाव्युपज्ञानां भामहप्रोक्तानाम् (२।३९-४०) वामनानूदितानाम् (४।२।८) उपमादोषाणा सामान्येष्वेव दोषेषु अन्तर्भावं प्रदर्शयितुमाह—**उपमायामुपमानस्येत्यादि** । उपमायाम् उपमानस्य (क) जातिगतं न्यूनत्वम्, (ख) प्रमाणगतं न्यूनत्वम्, (ग) जातिगता अधिकता (घ) प्रमाणगता अधिकता च अनुचितार्थत्वरूपे सामान्ये दोषे अन्तर्भवन्ति; उपमायां सामान्यधर्मस्य (ङ) न्यूनत्वं हीनपदत्वरूपे सामान्यदोषे (च) अधिकत्वं च अधिकपदत्वरूपे सामान्यदोषे एव अन्तर्भवतीत्यर्थः ।

(क) उपमायाम् उपमाने वर्तमानस्य जातिगतस्य न्यूनत्वस्य अनुचितार्थत्वेऽन्तर्भावमुदाहरति—चण्डालैरिवेत्यादिना । काव्यालङ्कारसूत्रवृत्तौ (४।२।९) पद्यांशोऽयम् । चण्डालत्वजातेः धर्मदृष्ट्या लौकिकदृष्ट्यैव वाऽपि न्यूनतया तदुपमानकत्वे उपमेयस्य दुष्कर्मकारित्वं व्यज्यते इति उपमेयः कदर्थितोऽत्रेति अनुचितार्थत्वमेवाऽत्र बोध्यम् । दुष्कर्मकारित्वे एव व्यञ्जनीये सति तु नाऽनुचितार्थत्वं न च दोष इति विवेक्तव्यम् ॥ उदा० ६७८ ॥

(ख) उपमायाम् उपमाने वर्तमानस्य प्रमाणगतन्यूनत्वस्य अनुचितार्थत्वेऽन्तर्भावमुदाहरति—**वह्निस्फुलिङ्ग** इत्यादिना । काव्यालङ्कारसूत्रवृत्तौ पद्यांशोऽयम् (४।२।९) अयं

(च) स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान् निशायां संसृज्यमानः शशिनेव मेघः ॥
उदा० ६८३॥

अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यते इत्यधिकपदत्वम् ।

लिङ्ग-वचन-भेदोऽप्युपमानोपमेययोः साधारणं चेद् धर्ममन्यरूपं कुर्यात् तदैकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वम् उपमेयत्वं वा प्रतीयमानेनाऽपि धर्मेण प्रतीयते इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमत्वम्; यथा—

(१) चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे ॥ उदा० ६८४॥

(च) उपमायाम् उपमानगतस्य धर्मस्य अधिकता अधिकपदत्वे एव सामान्ये दोषे [illegible]—स पीतवासा इत्यादि । भामहेनोदाहृतं (२।५८) प्रहेलिकानुत्पन्न[illegible] (२।१९) रामशर्मणः पद्यमिदम् । पीनवसनो गृहीतशृङ्गनिर्मितचापः स कृष्णः विद्युता मणिधनुषा च युक्तो निशायां शशिना सन्निहितो मेघ इव सुन्दरं च भयङ्करं च स्वरूपं प्रापेत्यर्थः । तत्र उपमेये कृष्णे पीतवसनस्य शार्ङ्गस्य चेति द्वयोरेव योगो वर्णितः, उपमाने मेघे तु [illegible] विद्युतः, शार्ङ्गस्थानीयस्य मणिधनुषश्चातिरेकेण उपमेयगतप्रतिरूपरहितस्य चन्द्रस्याऽपि योगो वर्णित इति उपमानगतं धर्माधिक्यम् औपम्यं कदर्थयतीति अधिकधर्मवाचकानि शशिसम्बन्धप्रतिपादकानि पदानि अधिकानि [illegible]—अत्रोपमेयस्ये[illegible] । अस्य दोषस्य परिहाराय कृष्णेऽपि शङ्खस्य योगः प्रतिपादनीय इति सू[illegible]निर्देशे इति ॥ उदा० ६८३ ॥

[illegible] भग्नप्रक्रमत्वेऽन्तर्भावं प्रतिपादयति—लिङ्गवचनेत्यादिना । यत्र उपमानोपमेययोर् लिङ्गे वचने वा भेदः साधारणधर्मवाचकपदम् एकतरेण लिङ्गेन वचनेन वाऽवरुध्य तं धर्मम् उपमाने उपमेये वा एकत्रैव अन्वयाय योग्यं सम्पादयति तत्र साधारणधर्मत्वेनाऽभिमतस्यापि धर्मस्य उपमाने उपमेये वा एकत्रैव अन्वयस्य प्रतीतिर् भवतीति वाच्यस्य साधारणधर्मस्याभावेऽपि [illegible] कथञ्चित् सविशेषणस्य उपमानत्वं निर्विशेषणस्य उपमेयत्वं सविशेषणस्य उपमेयत्वं निर्विशेषणस्य उपमानत्वं वा प्रतीयते इति सविशेषणत्वेन प्रक्रान्तस्य औपम्यस्य निर्विशेषणत्वेनोपसंहाराल् लिङ्गविपरिणामबलाद् वचनविपरिणामबलाद् वा सत्यपि पार्यन्तिके प्रक्रान्तनिर्वाहे आमुखे प्रक्रान्तस्यानिर्वाह इति एतादृशस्य [illegible] उपमानोपमेयवचनभेदस्य च भग्नक्रमत्वमेव पर्यवस्यतीत्यर्थः ।

(१) उपमानोपमेययोर् लिङ्गस्य भेदे उपमादोषस्य भग्नप्रक्रमत्वेऽन्तर्भाव इत्यत्रोदाहरणमाह—चिन्तारत्नमिवेत्यादि । हे पुरुषश्रेष्ठ, त्वं मन्दभाग्यस्य मम हस्ताच् चिन्तितार्थदं रत्नम् इव च्युतोऽसीत्यर्थः । अत्र उपमेयः पुंलिङ्गः, उपमानं नपुंसकलिङ्गम्, तयोः

(२) सक्तवो भक्षिता देव शुद्धा कुलवधूरिव ॥उदा० ६८५॥

यत्र तु नानात्वेऽपि लिङ्गवचनयोः सामान्याभिधायि पदं स्वरूपभेदं नापद्यते न तत्रैतद्दूषणावतारः, उभयथाऽप्यस्यानुगमक्षमस्वभावत्वात्; यथा—

(१) गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः ॥उदा० ६८६॥

(२) तद्-वेषोऽसदृशोऽन्याभिः स्त्रीभिर् मधुरताभृतः।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥उदा० ६८७॥इति।

साधारणधर्मत्वेनाभिमतस्याऽपि च्यवनस्य च्युत इति पुंलिङ्गोपरुद्धतया उपमेये **एव** शाब्दोऽन्वयः, एवं च वाक्यार्थपर्यालोचनया लिङ्गवचनपरिमाणानाम् उपमानगतत्वेनाऽपि प्रतीतावपि आमुखे साधारणत्वेन प्रतीतेरभावाद् उपमेये उपात्तस्य धर्मस्य उपमानेऽनिर्वाहाद् भग्नप्रक्रमता बोध्या ॥ उदा० ६८४ ॥

उपमानोपमेययोर् वचनस्य भेदे उपमादोषस्य भग्नप्रक्रमत्वेऽन्तर्भाव इत्यत्रोदाहरणमाह—**सक्तवो भक्षिता** इत्यादि। हे राजन्, कुलवधूरिव शुद्धाः सक्तवः खादिताः इत्यर्थः। अत्र उपमेयाः सक्तवो बहुवचनान्ता. उपमानभूता कुलवधूः [illegible], उभयोः साधारणधर्मत्वेन विवक्षितस्य शुद्धत्वस्य शुद्धा इति [illegible] उपमेये एव शब्दोऽन्वयः, एवं च [illegible] [illegible]नाम् उपमानगतत्वेनाऽपि प्रतीतावपि आमुखे साधारणत्वेन प्रतीतेरभावाद् उपमेये उपात्तस्य धर्मस्य उपमानेऽनिर्वाहाद् भग्नप्रक्रमता बोध्या ॥ उदा० ६८५ ॥

[illegible] भेदेऽपि [illegible] स्वरूपे लिङ्गद्वयेऽपि वचनद्वयेऽपि च समानरूपे सम्भवति सति तु नेमौ पराभिमतौ उपमादोषौ, न च भग्नप्रक्रमतेत्याह—**यत्र तु नानात्वेऽपी**त्यादिना।

उपमानोपमेययोर् लिङ्गस्य भेदेऽपि सामान्यधर्माभिधायिनः पदस्य एकरूपतया उभयत्र तस्याऽन्वये सुलभे सति तु तस्य लिङ्गभेदस्य अदोषतैवेत्यत्रोदाहरणमाह—**गुणैरनर्घ्यैरि**त्यादिना। समुद्रः अमूल्यै रत्नैरिव स विद्वान् अमूल्यैर् गुणैः प्रसिद्धोऽस्तीत्यर्थः। अत्र उपमानोपमेययोः रत्नगुणयोर् लिङ्गस्य भेदेऽपि तयोः सामान्यधर्मस्य अनर्घ्यत्वस्य वाचकम् 'अनर्घैः' इति पदं पुंसि नपुंसके च तुल्यरूपमिति तस्य रत्नैरित्यनेन नपुंसकेन गुणैरित्यनेन पुंसा चाऽन्वयः सुलभ इति न काऽपि प्रा[illegible]नि न कोऽपि दोषः ॥ उदा० ६८६ ॥

उपमानोपमेययोर् वचनस्य भेदेऽपि साधारणधर्मवाचकपदस्य एकरूपतया उभयत्र तस्याऽन्वये सुलभे सति तु तस्य व[illegible]—तद्वेष इत्यादिना। मधुरतया पूरितोऽन्यस्त्रीवेषैरसमानस् तस्या नायिकाया वेषो मधुरतायुक्त अन्यस्त्रीविभ्रमैरसदृशास् तस्या नायिकाया विभ्रमा इव परां शोभां दधतेस्मेत्यर्थः। अत्र वेषपक्षे मधुरतया भृत इति विभ्रमपक्षे मधुरतां बिभ्रति ये ते इति अर्थस्य भेदेऽपि

कालपुरुषविध्यादिभेदेऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीति असावपि भग्नप्रक्रमतयैव व्याप्तः, यथा—

(१) अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती ।
पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना ॥उदा० ६८८॥

अत्र चेतना प्रसादमाप्नोतीति न पुनरापेति कालभेदः ।

मधुरताभृत इति पदरूपं समानमेवेति, वेषपक्षे न समानमिव पश्यन्ति यं स इति विभ्रमपक्षे न समानमिव पश्यन्ति यान् ते इति च अर्थस्य भेदेऽपि असदृश इति पदस्य रूपं समानमेवेति, वेषपक्षे 'दध धारणे' इत्यस्य लडात्मनेपदप्रथमपुरुषैकवचने, विभ्रमपक्षे दधातेर् लडात्मनेपदप्रथमपुरुषबहुवचने रूपमिति अर्थभेदेऽपि दधते इति रूपं समानमेवेति च एतेषाम् उपमाने उपमेये चोभयत्र शाब्दोऽन्वयः समान इति न काऽपि प्रतीतिविरमतेति न कोऽपि दोषः ॥ उदा० ६८७ ॥

उपमानोपमेययोः सामान्यस्य धर्मस्य वाचकानां पदानां कालपुरुषविध्यादिभेदाद् भेदेन तेषां शाब्देऽन्वये उपमानोपमेययोर् मध्ये एकत्रैव सम्भवति सति च उपमा दुष्टा भवतीति सामान्यशब्दभेदरूपस्य उपमादोषस्य प्रपञ्चने रुद्रटेन ये उपमादोषा लक्षिताः (११।२६, २७), विवृताश्च नमिसाधुना तेऽपि भग्नप्रक्रमतायामेवान्तर्भवन्तीत्याह—**कालपुरुषे**त्यादिना । काल-पुरुष-विध्याद्यैक्यस्थले औपम्यप्रतीतिर् आरम्भावसानयोर् यथैकरूपतया निष्ठां प्राप्नोति तथा सामान्यधर्माभिधायिनः पदस्य काल-पुरुष-विध्यादिभेदे एकरूपतया निष्ठां न प्राप्नोतीति कालादिभेदमूलकानामुपमादोषाणामपि भग्नप्रक्रमान्तर्गतत्वमेवेत्यर्थः ।

उपमानोपमेययोः सामान्यधर्मस्य वाचकं पदं कालभेदाद् भिन्नमिति तस्य शाब्देऽन्वये उपमानोपमेययोर् मध्ये एकत्रैव सम्भवति सति य उपमादोषस् तस्य भग्नप्रक्रमतायामन्तर्भावे दर्शयति—अतिथिं नामेत्यादि । रघुवंशे (१७।१) पद्यमिदम् । कुमुद्वती नाम महिषी धीः चरमाद् रात्रेर् यामात् प्रसादमिव ककुत्स्थगोत्रापत्यात् कुशात् अतिथिं नाम पुत्रं प्रापेत्यर्थः । अत्र प्रापणं सामान्यधर्मत्वेन विवक्षितं किन्तु तद्वाचि प्रापेति पदं परोक्षभूतकालरूपार्थनिर्देशकमिति, धीः प्रसादं प्राप्नोति न तु प्रापेवेति वर्तमानकालिकमिति च उपमाने तस्य साधारणधर्मस्य अन्वयो व सुलभः । तत्र यद्यपि तात्पर्यबलाद् यथा धीः प्रसादं प्राप्नोति तथा कुमुद्वती पुत्रं प्रापेत्यर्थोऽवगम्यते तथापि तत्र वर्तमानकालेन प्रक्रमः परोक्षभूतेन समापनम् इति भग्नप्रक्रमता स्फुटैवेति अयमप्युपमादोषो भग्नप्रक्रमान्तर्गत एवेति बोध्यम् ॥ उदा० ६८८ ॥

उपमानोपमेययोः साधारणस्य धर्मस्य वाचकं पदं पुरुषभेदाद् भिन्नमिति तस्य शाब्देऽन्वये उपमानोपमेययोर् मध्ये एकत्रैव सम्भवति सति यः सामान्यशब्दभेदविशेषरूपो रुद्रटोक्तः (११।२४-२७) उपमादोषः सोऽपि भग्नप्रक्रमतायामेवान्तर्भवतीत्यत्रोदाहरणं

(२) प्रत्यग्र-मज्जन-विशेष-विविक्त-मूर्तिः
कौसुम्भ-राग-रुचिर-स्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रवालविटपिप्रभवा लतेव ॥ उदा० ६८९॥

अत्र लता विभ्राजते न तु विभ्राजसे इति सम्बोध्यमाननिष्ठस्य परभागस्य असम्बोध्यमानविषयतया व्यत्यासात् पुरुषभेदः ।

(३) **'गङ्गेव प्रवहतु ते सदैव कीर्तिः'** (उदा० ६९०) इत्यादौ च गङ्गा प्रवहति न तु प्रवहतु [illegible] विधेः । एवञ्जातीयकस्य चान्यस्यार्थस्य उपमानगतस्याऽसम्भवाद् विध्यादिभेद. ।

[illegible]—प्रत्यग्रमज्जनेत्यादि । रत्नावल्यां वासवदत्तां प्रति वत्सराजस्योक्तिरियम् (१।२०) । हे सखि, सद्यः कृतेन स्नानेन विशिष्टया कान्त्या युक्तं शरीरं यस्याः सा, कौसुम्भरागेण रुचिरेण सञ्चलता अंशुकान्तेन युक्ता, कामदेवं पूजयन्ती त्वं सद्यःकृतेन सेचनेन विशेषतस् स्वच्छा आकृतिर् यस्याः सा, [illegible] रुचिरैः प्रभाकिरणैः कान्ता समुद्रं शोभयन्ती बाले विद्रुमविटपिनि जाता लता इव शोभसे इत्यर्थः । अत्र विभ्राजनमपि सामान्यधर्मत्वेन विवक्षितम्, किन्तु तद्वाचि विभ्राजसे इति पदं मध्यमपुरुषत्वेनाऽवरुद्धमिति तस्य साधारणधर्मस्य [illegible] उपमानभूतायां लतायां सम्बन्धो न सुलभः । तत्र वाक्यतात्पर्यबलाद् यद्यपि यथा लता विभ्राजते तथा त्वं विभ्राजसे इत्यर्थोऽवगम्यते तथापि तत्र प्रथमपुरुषेणोपक्रमो मध्यमपुरुषेण समापनम् इति भग्नप्रक्रमता स्फुटैवेति [illegible] भग्नप्रक्रमतायामेव अन्तर्भवतीति बोध्यम् । अत्र सम्बोध्यमानविषयान्वययोग्यस्य विभ्राजसे इत्यस्य पदस्य यः परोंऽशः 'से' इति, तस्य [illegible] प्रत्यपि अन्वयोन्मुखत्वेन प्रयोगाद् व्यत्यास इति पुरुषभेदः इत्याह—**अत्र लतेत्यादिना** ॥ उदा० ६८९ ॥

उपमानोपमेययोः साधारणस्य धर्मस्य वाचकं पदं विधिविशिष्टत्व-तद्रहितत्वादिना भिन्नमिति तस्य शाब्देऽन्वये उपमानोपमेययोर् मध्ये एकत्रैव सम्भवति सति य उपमादोषो रुद्रटेनोक्तः सोऽपि भग्नप्रक्रमतायामेवान्तर्भवतीत्यत्रोदाहरणमाह—**गङ्गेवेत्यादि** । तव कीर्तिः सर्वदैव गङ्गा इव प्रवहतु इत्यर्थः । अत्र प्रवहणं सामान्यधर्मत्वेन विवक्षितम्, किन्तु तद्वाचकं प्रवहतु इति पदम् [illegible] गङ्गा प्रवहति न तु तत्र प्रवहतु इति विधेः प्रसर इति च तस्य सामान्यधर्मस्य गङ्गारूपे उपमाने सम्बन्धो दुर्लभः । तत्र वाक्यतात्पर्यबलाद् यद्यपि यथा गङ्गा प्रवहति तथा तव कीर्तिर् निरन्तरं प्रसरतु इति अर्थोऽवगम्यते तथापि तत्र विध्यादिविशिष्टत्वरहितत्वेन प्रक्रमस् तद्-युक्तत्वेन चोपसंहार इति भग्नप्रक्रमता स्फुटैवेति अयमप्युपमादोषो भग्नप्रक्रमतायामेवान्तर्भवतीति बोध्यम् । अत्र अप्रवृत्तप्रवर्तनात्मनो विधेर् निमित्तात् सामान्यधर्म-

ननु च समानमुच्चारितं प्रतीयमानं वा धर्मान्तरमुपादाय पर्यवसितायाम् उपमायाम् उपमेयस्य प्रकृतधर्माभिसम्बन्धत्वाद् न कश्चन कालादिभेदोऽस्ति; यत्राऽप्युपात्तेनैव सामान्य धर्मेणोपमाऽवगम्यते यथा—**'युधिष्ठिर इवाऽयं सत्यं वदति'** (उदा० ६९१) इति तत्र युधिष्ठिर इव सत्यवादी सत्यं वदतीति प्रतिपत्स्यामहे; सत्यवादी सत्यं वदतीति च न पौनरुक्त्यमाशङ्कनीयम्, **'रैपोषं**

वाचकशब्दभेदः, तन्मूलकश्चोपमादोषः, स च भग्नप्रक्रमतायामेवान्तर्भवतीति अभिप्रेत्याह—**अप्रवृत्तप्रवर्तनात्मनो विधेरिति** । ननु कथमत्र सामान्यधर्मस्य भेद इत्यत्राऽऽह—**एवञ्जातीयकस्ये**त्यादिना । विधिसदृशस्य निमन्त्रणादिकस्य अन्यस्य चार्थस्य सिद्धस्वरूपेषु उपमानेषु समन्वीयमानस्य असम्भवाद् विध्यादिना उपाधिना सामान्यधर्मस्य भेद इत्यर्थः । अत्र प्रदीपकृता नागेशादिना वामनेन च वर्णितोऽर्थोऽसङ्गत एव । एवं च विध्यादिना उपाधिना सामान्यधर्मस्य भेदाद् उपमादोषोऽयं नाऽसम्यक्, किन्तु तस्य भग्नप्रक्रमतायामेवाऽन्तर्भाव इति अलकस्य भावो बोध्यः ॥ उदा० ६९० ॥

ननु काल-पुरुष-विध्यादिभेदेन भेदमापन्नं सामान्यत्वेनाऽभिमतं धर्मं विहाय तादृशभेदरहितं प्रत्यग्रमज्जनेत्यादौ (उदा० ६८८) इव विभ्राजनादिना सहैव उच्चारितं विविक्तमूर्तित्वादिकं धर्मान्तरम् अथवा सहोच्चारितेन शब्देनाऽप्रतिपादितमपि गम्यमानं कञ्चिदन्यमेव साधारण धर्ममादाय निर्वृत्तायाम् उपमायाम् उपमेयस्य वासवदत्तादिकस्य त्वमादिपदार्थस्यैव प्रकृतेन कालपुरुषविध्यादिभेदेन भेदमापन्नेन विभ्राजनादिना सम्बन्धो न तु उपमानस्य लतादेरपीति न तत्र कालादिभेदकृतदोषावतारः इत्याह—**ननु च समान**मित्यादिना । ननु तत्र मा भूद् दोषावतारः, यत्र तु काल-पुरुष-विध्यादिभेदेन भेदमापन्नं सामान्यत्वेनाऽभिमतं धर्मं विहाय अन्यः साधारणो धर्मः सहोच्चारितशब्दबोध्योऽथवाऽवगम्यमानोऽपि नास्तीति कालपुरुष-विध्यादिभेदेन भेदमापन्नेनैव साधारणत्वेनाऽभिमतेन धर्मेण उपमा निर्वर्त्याऽस्ति तत्र त्वयं दोषः स्यादेवेति अस्य उपमादोषस्य निरूपणं यत् क्रियते यच्चाऽस्य भग्नप्रक्रमतायाम् अन्तर्भावणं क्रियते तदुचितमेवेत्यपि न वक्तुं शक्यते इत्याह—**यत्राप्युपात्तेनैवे**त्यादिना । यत्रापि युधिष्ठिर इवाऽयं सत्यं वदतीत्यादौ अन्यस्य साधारणधर्मस्य अभावात् कालपुरुषविध्यादिभेदेन भेदमापन्नेनैव सत्यवदनादिना साधारणत्वेनाऽभिमतेन धर्मेण उपमानिर्वृत्तिर् भवति इति त्वयोच्यते तत्राऽपि युधिष्ठिर इव सत्यवादी अयं सत्यं वदतीत्यादिर् अर्थो बुध्यते इति एवमादावपि प्रतीयमानेन कालपुरुषविध्यादिभेदरहितेन सत्यवदनशीलत्वादिना एव उपमानिर्वृत्तिरिति नास्त्येवैतादृशस्य उपमादोषस्यावकाशः, एवं च अकाण्डताण्डवायित एवाऽयं काल-पुरुष-विध्यादिभेदभिन्नसाधारणधर्मरूपस्य उपमादोषस्य गगनकुसुमायितस्य भग्नप्रक्रमतायाम् अन्तर्भावणे प्रयास इत्यभिप्रायः । ननु युधिष्ठिर इव सत्यवादी अयं सत्यं वदतीत्यर्थे स्वीकृते तत्र पुनरुक्तिर् दोषः स्यादित्यत्राऽऽह—**सत्यवादी सत्य**मित्यादि । रैपोषं पुष्णातीत्यादौ धनेन पोषणं यथा

पुष्णातीतीतिवद् (उदा० ६९२) युधिष्ठिर इव सत्यवदनेन सत्यवादी अयम् इत्यर्थाविगमात् । सत्यमेवैतत्, किन्तु स्थितेषु प्रयोगेषु समर्थनमिदम्, न तु सर्वथा निरवद्यम्, प्रस्तुतवस्तुप्रतीतिप्रतीतिविघातादिति सचेतस एवाऽत्र प्रमाणम् ।

असादृश्याऽसम्भवौ अपि उपमायाम् अनुचितार्थतायामेव पर्यवस्यतः, यथा—

(१) ग्रथ्नामि काव्यशशिनं [illegible] ॥उदा० ६९३॥

अत्र काव्यस्य शशिनाऽर्थानां रश्मिभिः साधर्म्यं कुत्राऽपि न प्रतीतमित्यनुचितार्थत्वम् ।

स्यात् तथा पुष्णातीत्यर्थस्य बोधाद् यथा न पुनरुक्तिः तथा युधिष्ठिर इव सत्यवादी यथा स्यात् तथा सत्यं वदतीत्यस्य परमार्थस्य बोधाद् न पुनरुक्तिरित्यर्थः । अत्र अलकेन युधिष्ठिर इवाऽयं सत्यं वदतीत्यस्य युधिष्ठिर इव सत्यवदनेन सत्यवादी अयम् इत्यर्थो निर्दिष्टः, अतस्तेन प्रथमान्तार्थविशेष्यकः शाब्दबोधः स्वीकृत इति प्रतिभाति, तथापि तेन अनुपदमेव 'युधिष्ठिर इव सत्यवादी अयं सत्यं वदति' इति रूपेणाऽप्यर्थो वर्णित इति रैपोषं पुष्णातीत्यस्यार्थश्च न निर्ज्ञात इति च भातीति अस्माभिर् [illegible]-नुसारमेव क्रियाविशेष्यकशाब्दबोधं स्वीकृत्य रैपोषं पुष्णातीत्यस्य वै[illegible]ञ्ज समादृत्याऽर्थः प्रतिपादित इति सुधीभिर् बोध्यम् । उक्तेन प्रकारेण साधारणे धर्मे काल[illegible] उपमादोष एव नास्तीति तस्य भग्नप्रक्रमतायाम् अन्तर्भावणस्य प्रयासोऽपि व्यर्थ एवेति आक्षेपसारः, तत्र उत्तरमाह—**सत्यमेवैतदि**त्यादिना । अन्यैर् गुणैः पूजां प्राप्तवतां महतां कवीनां काव्ये स्थितेषु एतादृशेषु उपमाप्रयोगेषु इदम् उपपादनं प्रयोक्तव्यम्, न तु इदम् उपपादन सर्वथा दोषरहितम् इति स्वीकृत्य [illegible] एतादृशा उपमाप्रयोगा कर्तव्या एवेति वक्तुं शक्यम्, एतादृशेषु उपमाप्रयोगेषु कालादेः उपमानोपमेययोः एकतरस्मिन् एव अन्वयाद् एकतरस्मिन् भङ्गेन जाताया भग्नप्रक्रमताया सहृदयानुभवविषयत्वादिति भावः । भग्नप्रक्रमतानुभवेन वैरस्ये लब्धास्पदे एतादृशोपपत्ते कल्पनया समर्थनाय प्रयासोऽपि हर्म्ये पाटच्चरैर् लुण्ठिते यामिकाना जागरणस्य वृत्तान्तम् अनुहरिष्यतीत्यपि बोध्यम् ।

मेधाव्युपज्ञेषु "हीनताऽसम्भवो लिङ्गवचोभेदो विपर्ययः । उपमानाधिकत्वं च तेनाऽसदृशताऽपि च" (२।३९) इति भामहप्रोक्तेषु उपमादोषेषु असादृश्याऽसम्भवयोरपि अनुचितार्थतायामन्तर्भाव इत्याह—**असादृश्यासम्भवावि**त्यादिना ।

असादृश्यरूपोपमादोषस्य अनुचितार्थत्वेऽन्तर्भावे उदाहरणमाह—**ग्रथ्नामीत्यादि** । काव्यालङ्कारसूत्रवृत्तौ उदाहृतः पद्यांशोऽयम् (२।४।१६) । अर्था रश्मय इव अर्थरश्मयः, वितता अर्थरश्मयो यस्य तादृशं काव्यं शशीव काव्यशशी तं ग्रथ्नामीत्यर्थः । अत्र ग्रथ्नामीत्यस्याऽन्वयाय उपमितसमास एवाऽऽश्रयणीय इति बोध्यम् । अत्र काव्यस्य शशिना सह अर्थाना रश्मिभिश्च सह साधर्म्यस्य लोकप्रतीतताया अभावाद् एतादृशम् औपम्यम् अनुचितमिति अनुचितार्थतायामेव असादृश्यरूपस्य उपमादोषस्याऽन्तर्भाव इत्यर्थः । केचित्

(२) निष्पेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात् ॥
उदा० ६९४ ॥

अत्राऽपि ज्वलन्त्योऽम्बुधाराः सूर्यमण्डलाद् निष्पतन्त्यो न सम्भवन्तीति उपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति ।

(ई) उत्प्रेक्षायामपि सम्भावनं ध्रुवेवादय एव शब्दा वक्तुमुत्सहन्ते न यथा शब्दोऽपि, केवलस्याऽस्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वात्. तस्य चाऽस्याम् अविवक्षितत्वाद् इति तत्राऽशक्तिरस्याऽवाचकत्वं दोष ; यथा—

उद्ययौ दीर्घिकागर्भात् कुड्मलं मेचकोत्पलम् ।
नारीलोचनचातुर्यशङ्कासङ्कुचितं यथा ॥उदा० ६९५॥

तु कष्टार्थोदाहरणे महाकाव्यव्योम्नीत्यादौ (उदा० ३२३) [illegible] इव अत्राऽपि आह्लादकत्वादिना साधर्म्येण काव्यशशिनोः औपम्यम् अक्षतमिति नाम्यौपम्यस्य अनौचित्यं किन्तु अप्रयुक्तत्वमेवाऽत्र दोष इति वदन्ति, परन्तु प्रयुक्तानामेव औपम्यानां प्रयोगे वैरस्यमेव स्यादिति औपम्ये अप्रयुक्तत्वदोषो न स्वीकर्तव्यः, लोकप्रतीतिविषय-त्वानर्हस्य औपम्यस्य प्रयोगेऽनुचितार्थत्वमेव दोषः स्वीकर्तुमुचितः ॥उदा० ६९३॥

असम्भवरूपोपमादोषस्य अनुचितार्थतायामन्तर्भावे उदाहरणमाह—निष्पेतुरास्यादिवे-त्यादि । भामहेनोदाहृतं शाखवर्धनस्य पद्यमिदम् (२।४७) । तस्य वीरस्य धनुर्मण्डलमध्य-गताद् मुखादिव दीप्ताः बाणाः मध्याह्नगतात् परिवेषयुक्तात् सूर्यात् अतिशयेन ज्वलन्त्यो वारिधारा इव [illegible] । तूणाद् वाणानाम् आकर्षणे विलम्बः स्यादिति मत्वा शीघ्रपतनप्रतिपादनाय मुखादिव इति उत्प्रेक्षा प्रयुक्ता । अत्र सूर्य-मण्डलाद् निष्पतन्त्यो ज्वलन्त्योऽम्बुधारा असम्भविन्य इति असम्भविनोऽर्थस्य निबन्धनं च अनुचितमेवेति अस्य असम्भवरूपस्योपमादोषस्य [illegible] अनुचित[illegible]मेवान्तर्भाव इत्याशयः ॥उदा० ६९४॥

(ई) प्राचीनालङ्कारिकाभिमतस्य अशक्तशब्दत्वरूपस्य उत्प्रेक्षादोषस्य अवाचकत्वेऽ-न्तर्भावं [illegible]—उत्प्रेक्षायामपि [illegible] । केवलो यथाशब्दः साधर्म्यमेव प्रतिपाद-यितुं शक्नोति, उत्प्रेक्षायां च साधर्म्यं न प्रतिपादनीयम्, किन्तु सम्भावना प्रतिपादनीया, यथा–शब्दश्च सम्भावनाया अवाचक इति उत्प्रेक्षायां सम्भावनावाचकत्वाभिप्रायेण यथा-शब्दप्रयोगे अवाचकत्वमेव दोष इति न तदतिरिक्तः अशक्तशब्दत्वरूप उत्प्रेक्षादोषः स्वीकरणीय इत्यर्थः ।

अशक्तशब्दत्वरूपस्य उत्प्रेक्षादोषस्याऽवाचकत्वेऽन्तर्भावे उदाहरणमाह—उद्ययावि-त्यादि । मुकुलितं नीलोत्पलं सुन्दरीनयनचातुर्यम् मत्तोऽधिकमिति शङ्कया सङ्कुचितमिव वापीमध्याद् उद्ययौ इत्यर्थः । अत्र यथा–शब्दस्य सम्भावनावाचकत्वाभावेऽपि सम्भावना-वाचकत्वमभिमन्य प्रयोगाद् अवाचकत्वमेव दोषो बोध्यः ॥उदा० ६९५॥

(उ) उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितं [illegible], तत्-समर्थनाय यद् अर्थान्तरन्यासोपादानं तदालेख्यमिव [illegible] समीचीनमिति निर्विषयत्वम् एतस्य अनुचितार्थतैव दोषः, यथा—

दिवाकराद् रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैश्शिरसां सतीव ॥उदा० ६९६॥

अत्राचेतनस्य तमसो दिवाकरात् त्रास एव न सम्भवति कुत एव तत्-प्रयोजितम् अद्रिणा [illegible] सम्भावितेन तु रूपेण [illegible] न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्-समर्थनायां यत्नः ।

(ऊ) [illegible] समासोक्तिः अनुक्तमपि उपमानविशेषं प्रकाशयतीति तस्याऽत्र पुनरुपादाने प्रयोजनाभावाद् अनुपादेयतायां यत् तदुपादानं तद् अपुष्टार्थत्वं पुनरुक्तता वा दोषः; यथा—

(उ) निर्विषयत्वरूपम् [illegible] एवान्तर्भवतीत्याह—**उत्प्रेक्षितमपी**त्यादिना । उत्प्रेक्षितं वस्तु लौकिकेन रूपेण रहितमिति स्वयमेव [illegible], तत्समर्थनाय यद् अर्थान्तरन्यासोपादानं तत् तु गगनतले चित्रलेखनाय प्रवर्तनमिव अतीव असङ्गतम् इति एतस्य असङ्गतस्य अर्थान्तरन्यासस्य यद् निर्विषयत्वं सा अनुचितार्थता एवं दुष्टिर् नाऽन्येत्यर्थः ।

उत्प्रेक्षितार्थसमर्थकार्थान्तरन्यासदूषणस्य निर्विषयत्वरूपस्य अनुचितार्थतायाम् अन्तर्भावे उदाहरणमाह—**दिवाकरादि**त्यादिना । यो हिमाद्रिः दिवसे दिवाकरात् त्रस्तम् अत एव गुहासु लीनम् अन्धकारं दिवाकराद् रक्षति, यतो हि शरणं प्राप्ते क्षुद्रेऽपि शरणं प्राप्ते सज्जने इवैव अनवनतशिरसां महतां ममत्वं भवतीत्यर्थः । अत्र प्रतिपादितोऽन्धकारस्य त्रास एव वस्तुतो लोके न भवति, न च अद्रिकृतम् अन्धकारस्य परित्राणम्, अतोऽस्य समर्थनं गगने [illegible] प्रयास एव; उत्प्रेक्षितत्वेन रूपेण प्रतीयमानस्य च वस्तुनो न लौकिकोपपत्त्यपेक्षा इति उत्प्रेक्षितत्वेन रूपेण प्रतीतस्याऽर्थस्य समर्थनमपि अनावश्यकमेवेति उत्प्रेक्षितस्य समर्थनायार्थान्तरन्यासोपादानं सर्वथा व्यर्थमेवेति एतादृशस्याऽर्थान्तरन्यासस्य अनुचितार्थतेत्याह—**अत्राचेतनस्ये**त्यादिना ॥६९६॥

(ऊ) अनुपादेयोपमानोपादानरूपो यः [illegible], अपुष्टार्थत्वे पुनरुक्तत्वे वाऽन्तर्भावो भवतीत्याह—**साधारणधर्मे**त्यादिना । समासोक्तौ प्रस्तुताप्रस्तुतसाधारणधर्मविशेषणमाहात्म्यादेव अनुक्तोऽपि उपमानविशेषः प्रतीयते इति समासोक्तौ उपमानविशेषस्य शब्देनोपादाने किमपि प्रयोजनं न भवति; एवं च उपमानविशेषस्य अनुपादेयतायां सत्यामपि यत् तदुपादानं तत् प्रस्तुतार्थापोषणाद् अपुष्टार्थत्वं नाम दोषः, यदि तु प्रस्तुतार्थापोषकस्य [illegible] उच्यते तदा स्वयं प्रतीतस्याप्यर्थस्य शब्देन

स्पृशति तिग्मरुचौ ककुभः करैर् दयितयेव विजृम्भिततापया ।
अतनुमानपरिग्रहया स्थितं रुचिरया चिरयापि दिनश्रिया ॥उदा० ६९७॥

अत्र तिग्मरुचेः ककुभां च यथा सदृशविशेषणवशेन व्यक्तिविशेषपरिग्रहे च नायकतया व्यक्तिस् तथा ग्रीष्मदिवसश्रियोऽपि प्रतिनायिकात्वेन भविष्यतीति किं दयितयेति स्वशब्दोपादानेन ?

श्लेषोपमायाम् तु स विषयो यत्रोपमानस्योपादानमन्तरेण साधारणेष्वपि विशेषणेषु न तस्याः प्रतीतिः, यथा—'**स्वयं च** पल्लवाताम्रभास्वत्करविरा-**जिता । प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा**' (उदा० ६९८) इति ।

पुनरुपादानाद् अर्थपुनरुक्तत्वमेवाऽत्र दोषः स्वीकर्तव्य इत्यर्थः ।

अनुपादेयोपमानोपादानरूपस्य समासोक्तिदोषस्य अर्थपुनरुक्ततायाम् अन्तर्भावमुदा-हरति—**स्पृशति तिग्मरुचा**वित्यादिना । रत्नाकरकविकृते हरविजये (३।३७) ग्रीष्मवर्णन-परं पद्यमिदम् । सूर्ये करैः आशाः स्पृशति सति विवृद्धतापया दयितया इव रुचिरया दीर्घया च ग्रीष्मदिवसशोभया सुदीर्घमानपरिग्रहया सत्या आसितमित्यर्थः । अत्र स्त्रीस्पर्श-[illegible] पुल्लिङ्गवत्त्वेन च यथा सूर्यस्य नायकतया प्रतीतिः पुरुषकरस्पर्शविषयत्वरूपनायिकातुल्यविशेषणवशेन स्त्रीलिङ्गवत्त्वेन च यथा आशानां च नायिकात्वस्य प्रतीतिः तथैव विजृम्भिततापवत्त्व—सुदीर्घमानपरिग्रहत्वरूप-प्रतिना-यिकातुल्यविशेषणवशेन स्त्रीलिङ्गवत्त्वेन च ग्रीष्मदिवसश्रियोऽपि प्रतिनायिकात्वेन प्रतीतिर् भविष्यत्येवेति ग्रीष्मदिवसश्रियः प्रतिनायिकात्वं शब्देनैव बोधयितुं तदुपमान-भूताया दयिताया ग्रहणं व्यर्थमेवेति अनुपादेयस्योपमानस्य उपादानाद् अर्थपुनरुक्तत्व-रूपमेवाऽत्र दोष इत्याह—**अत्र तिग्मरुचे**रित्यादिना ।

ननु स्पृशतीत्यादौ श्लेषोपमा न तु समासोक्तिरिति कुतोऽत्र समासोक्तिदोषः ? कुतश्च समासोक्तिदोषस्य अर्थपुनरुक्ततायामन्तर्भावे उदाहरणत्वमस्य ? इत्याशङ्काया-माह—**श्लेषोपमायाम्** इत्यादिना । यत्र उपमानोपमेयसाधारणेषु विशेषणेषु सत्सु अपि उपमानस्योपादानं विना तस्याः श्लेषोपमाया अर्थाद् विशेषणानाम् उपमानोपमेयसाधारण-तायाः प्रतीतिर् न भवतीति समासोक्तिविषयता न सम्भवति तत्र श्लेषोपमा स्वीक्रियते; अत्र तु दयितारूपोपमानोपादानं विनाऽपि विजृम्भिततापयेत्यादिविशेषणानाम् उपमेयो-पमानसाधारणता स्फुटं प्रतीयते इति समासोक्तिविषयता सम्भवतीति स्पृशतीत्यादौ समासोक्तिरेवेति अत्र अनुपादेयस्योपमानस्योपादानं समासोक्तिदूषणमेव; एवं च अर्थपुन-रुक्ततायामेवेदं [illegible] स्पृशतीत्यादि पद्यम् उदाहरणं भवत्ये-वेत्याशयः । उपमानोपमेयसाधारणेषु विशेषणेषु सत्स्वपि उपमानस्योपादानं विना विशेषणानाम् उपमानोपमेयसाधारणतायाः प्रतीतेरभावेन युक्तं समासोक्तिविषयताविनिर्मु-क्तं श्लेषोपमाविषयं [illegible]—यथा स्वयं चेत्यादिना । उद्भटकृते कुमारसम्भवे पार्वत्या

(ऋ) अप्रस्तुतप्रशंसायामपि उपमेयमनयैव नीत्या प्रतीतं न पुनः प्रयोगेण कदर्थतां नेयम्; यथा—

> आहूतेषु विहङ्गमेषु मशको नाऽऽयान् पुरो वार्यते
> मध्येवारिधि वावसंस् तृणमणिर् धत्ते मणीनां रुचम् ।
> खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
> धिक् सामान्यमचेतनं प्रभुमिवाऽनामृष्टत्त्वतान्तरम् ॥ उदा० ६९९ ॥

वर्णनमिदम् । पार्वती न केवलं हिमालयेन महता सम्बन्धेनैव श्लाघ्या, किन्तु स्वयमपि पल्लवैरिव आताम्रैः [illegible] विराजिता, **अस्वापो** [illegible] फलं स्नानसन्ध्या-वन्दनादिकं तत्र लुब्धे जने **हितप्रदा** इष्टदात्री या प्रभातसन्ध्या सेव पल्लवौ इव आताम्रौ अरुणौ भास्वन्तौ दीप्तिमन्तौ यौ करौ ताभ्यां विराजिता, सुखेन प्राप्यते इति स्वापं न स्वापमस्वापं तस्मिन् फले मोक्षादिके लुब्धास् तेषाम् **ईहितप्रदा** इष्टदात्री अस्तीत्यर्थः । अत्र उपमानानुपादानेन 'स्वयं च [illegible]-प्रदा' इति गद्यपाठे न हि [illegible] प्रतीयते इति नाऽत्र समासोक्तिविषयता, किन्तु उपमानोपादानेन श्लेषोपमाविषयतैवाऽत्रोचितेति बोध्यम् ॥ उदा० ६९७-६९८ ॥

प्रतीयमानस्य प्रस्तुतस्य स्वपदेनोपादाने वैयर्थ्यरूपो [illegible] तस्याऽपि अर्थपुनरुक्ततायामेवाऽन्तर्भावं [illegible]—अप्रस्तुतप्रशंसायाम् [illegible] । अप्रस्तुत-प्रशंसायाम् प्रस्तुताऽप्रस्तुतयोर् उपमेयोपमानयोस् साधारणानां विशेषणानां बलात् स्वशब्दे-नोपादानं विनैव प्रतीतम् प्रस्तुतम् उपमेयं स्वपदेनाऽनुपादेयमपि यत् पुनरुपादीयते तद् [illegible], किन्तु तदपि स्वयम्प्रतीतस्याऽर्थस्य शब्देन पुनरुपादानाद् अर्थपुनरुक्तारूपमेवेत्याशयः ।

अनुपादेयोपमेयोपादानरूपस्य [illegible] अर्थपुनरुक्ततायामन्तर्भावे उदा-हरणमाह—**आहूतेषु विहङ्गमेष्वित्यादि** । विहङ्गमेषु आहूतेषु सत्सु अहमपि विहङ्गम इति पुर आयान् मशको न वार्यते, समुद्रस्य तले चिरं वसन् तृणाकर्षकः काचमणिविशेषः (तुच्छो वा मणिस् तृणमणिः) अहमपि रत्नाकरस्थो मणिरिति मणीनां गौरवं धत्ते, खद्योतोऽपि अहमपि तेजस्वीति तेजस्विनां मध्ये प्रचलितुं न सङ्कोचं कुरुते; अतस् तत्त्वानां महदपि अन्तरम् अनाकलितवद् इदम् अचेतनं [illegible] सामान्यम् अविवेकिनं प्रभुमिव धिग् इत्यर्थः । अत्र अनामृष्टतत्त्वान्तरत्वादिविशेषणविशिष्टम् अप्रस्तुतं सामान्यं द्वारीकृत्य अचेतसः प्रभोः स्फुटा अभिव्यक्तिरिति स्वशब्देनोपादानं विनैव प्रतीतस्य प्रस्तुतस्य उपमेयत्वेनाऽभिमतस्य प्रभोः स्वशब्देनोपादानं व्यर्थमेवेति अनुपादेयस्योपमेयस्योपादानाद् अर्थपुनरुक्तता एवाऽत्र दोष इत्यभिप्रायेणाऽऽह—**अत्राचेतस** इत्यादि ॥ उदा० ६९९ ॥

अत्राऽचेतसः प्रभोरप्रस्तुतविशिष्टसामान्यद्वारेणाऽभिव्यक्तेरयुक्तमत्र पुनः कथनम्।

तदेतेऽलङ्कारदोषा यथासम्भविनोऽन्येऽपि एवञ्जातीयाः पूर्वोक्तयैव दोषजात्याऽन्तर्भाविता न पृथक्प्रतिपादनमर्हन्ति इति सम्पूर्णमिदं काव्यलक्षणम्।

इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत्।
न तद् विचित्रं यदमुत्र सम्यग् विनिर्मिता सङ्घटनैव हेतुः ॥॥

इति काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम दशम उल्लासः ॥१०॥

समाप्तश्चाऽयं काव्यप्रकाशः ॥

अत्रोल्लिखिताः एवम्प्रकारका अन्येऽपि महिमभट्टादिभिरन्यैः प्रतिपादिताः अलङ्कार-दोषाः अत्र सप्तमे उल्लासे निरूपितेष्वेव दोषेषु अन्तर्भवन्तीति तेषां पृथक् प्रतिपादनम् अनावश्यकमिति एतावता ग्रन्थेन शब्दा-ऽर्थ-दोष-गुणा-ऽलङ्काराणां सम्यङ् निरूपितत्वात् 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति (सू० ३) काव्यलक्षणवाक्य सर्वथा निराकाङ्क्षं जातमिति उक्तं काव्यलक्षणं सम्यक् पूर्णमित्याह—तदेतेऽलङ्कारदोषा इत्यादिना। यथासम्भविन इति प्रयोगश्चिन्त्यः। महिमभट्टेन हि सर्वेऽपि पद-पदार्थ-वाक्य-वाक्यार्था-ऽलङ्कारादिगता रसबहिरङ्गदोषा अनौचित्यमूलकेषु विधेयाविमर्श-प्रक्रम-भेद-क्रमभेद-वाच्यावचना-ऽवाच्यवचनरूपेषु दोषेषु अन्तर्भाविता इति न विस्मरणीयम्।

काव्यप्रकाशग्रन्थवैशिष्ट्यं प्रतिपादयति—इत्येष **मार्ग** इत्यादिना। रसा-ऽलङ्कार-रीति-ध्वनिप्रभृतिभिः प्रकारैर् विभिन्नोऽपि काव्यविदां मार्गोऽत्रग्रन्थे यद् एकरूपः उपलभ्यते तद् विचित्रं नास्ति, यतः खलु अत्र यथौचिति सामान्य-विशेष-उद्गमा-उद्भिन्नत्वादिना सम्यक् समन्वयेन कृता तेषां विदुषां विभिन्नानां मार्गाणां सङ्घटनैव अत्र अलङ्कारशास्त्र-मार्गस्यैकरूपतयोपलब्धौ हेतुरित्यर्थः। अत्र च 'ग्रन्थश्चाऽयं राजानकमम्मटेन कथमप्य-समाप्तत्वाद् राजानकाऽलकेन च पूरितावशेषत्वाद् द्विखण्डोऽपि अखण्डतया यद् अवभासते तत्र सङ्घटनैव समीचीना हेतुः, न हि सुघटितस्य सन्धिबन्धः कदाचिदपि लक्ष्यते 'इत्यर्थशक्त्या ध्वन्यते' इति रुचक-माणिक्यचन्द्र-श्रीधरादयः सर्वेऽपि प्राचीनाः टीकाकृतः। निदर्शनाकृत् काश्मीरको राजानक आनन्दकविस्तु अत्र प्राचीनौ परम्परयाऽऽगतौ "कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः। प्रबन्धः पूरितः शेषो विधायाऽलकसूरिणा" इति, अन्येनाप्युक्तम्—"काव्यप्रकाशदशकेऽपि निबन्धकृद्भ्यां द्वाभ्यां कृतेऽपि कृतिनां रसतत्त्व-लाभः। लोकेऽपि विश्रुतमिदं नितरां रसालं बन्धप्रकाररचितस्य तरोः फलं यत्" इति च श्लोकावप्युदाजहारेति शम् ॥

अथ विवृतिकारवंशादिवर्णनम्। विनश्वरोऽज्ञो दुःख्यल्पोऽहमितिभ्रममूर्छितान्। लोकान् समुद्दिधीर्षन्त्यश् श्रुतयो लोकगोचरैः ॥१॥ वाक्यैर् जन्माद्यस्य यतस् तद्ब्रह्मेति प्रदर्श्य च। सम्भावनान् ततस् सच्चिदानन्द इति यज्जगुः ॥२॥

जागरादिष्वनुगतेः प्रोच्च्य यस्य विरुद्धताम्। गत्यन्तरस्याभावात् तु नेति नेतीति यत् पुनः ॥३॥ अञ्जसा निर्दिदिक्षन्ति यस्य सर्वात्मतामपि। प्रतिपाद्य प्रत्यगात्माभिन्नत्वमनुगासति ॥४॥ स्वप्रकाश-स्वतस्सिद्धात्मरूपत्वाद्धियत्तर च। नास्ति लौकिक- [illegible] मनागपि॥५॥ तस्मिन्नद्धा निष्प्रपञ्चे प्रपञ्चोऽयङ्कथञ्च न। भासतेऽनादिकन् तत्तर हिरण्याण्डहि निर्बभौ ॥६॥ पञ्चभिस् तु महाभूतैर् युक्तलैलोक्यवर्त्तिरभिस्तथा। इदं स्थूलं शरीरन् तु वैराजं यस्य स प्रभुः ॥७॥ वैश्वानरो विश्वरूपोऽन्तर्यामी पुरुषस् स्वभूः। हिरण्यगर्भो ब्रह्मेति चोक्तस् तस्य प्रशासिता ॥८॥ एतमेके वदन्त्यग्निम् मनुमन्न्ये प्रजापतिम्। इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् (मनु० १२।१२३) ॥९॥ सौम्यप्राणोपासकत्वात् सौम्यप्राणात्मको हि यः। वसिष्ठाख्य ऋषिस् तस्माज् जनिलँ लेभे कथञ्चन ॥१०॥ यस्य तत्वाद्ध्यात्मिकन् तत्त्वन् निर्दिदिक्षन्त्यसौ श्रुतिः। उर्वश्यान् तु जनिम् मैत्रावरुणाभ्याम् प्रवक्ति च (ऋ० ७।३३।११) ॥११॥ सोऽयम् पुरातनो धाता वसिष्ठानाम् महानृषिः। दाशतय्यास् सप्तमस्य द्रष्टा यो मण्डलस्य च ॥१२॥ शक्ति-प्रभृतयो मन्त्रद्द्रष्टारो बहवस् सुताः। तस्य ख्यातास् सप्तमादि-मण्डलेषु हि तत्र च ॥१३॥ यो मित्राबरुणोऽस्माकम् प्रवरर्षिः वसिष्ठजः। मन्त्रद्रष्टा न स्मृतस् स कात्त्यायन-श्रुतर्षिणा ॥१४॥ कुण्डिनोऽपि वसिष्ठस्य वंश्यो मन्त्रदृगेव च। नैव तेन स्मृतो मन्त्रद्द्रष्ट्रत्वेन कथञ्चन ॥१५॥ प्प्रवर्षितया ह्येतौ सर्वैः कल्पविधायिभिः। आश्वलायनमुख्यैश् च प्प्रवराद्ध्यायिभिस् तथा ॥१६॥ कात्त्यायनादिभिस् सर्वैस् स्मृतौ पौराणिकैरपि। लैङ्गे (१।६३।९१।९२) मात्स्ये (१४५।११०-१११) वायवीये (५९।१०६) ब्रह्माण्डे (२।३३।११६) ऽपि च कीर्तितौ ॥१७॥ ऋषिभिर् मन्त्रकृद्भिर् हि प्प्रवरा विहितास् समैः। प्प्रवरर्षितया चैतौ सर्वेषां सम्मताविति ॥१८॥ मन्त्रकृत्त्वन् निश्चिनुम एतयोस् सुदृढं वयम्। [illegible] वा-शब्दान् बहुशस् तु तान् ॥१९॥ रिक्ततामपि चैकत्तरोपलभ्य तु सुविस्मिताः। अनुमायागमभ्रंशं सप्तमे मण्डलेऽथवा ॥२०॥ अष्टमादिषु कुत्तराऽपि मन्त्रास् ताभ्यां प्रकाशिताः। स्युरेवेति वयम् मन्न्यामहे कात्त्यायनोऽपि च ॥२१॥ शौनको ब्राह्मणादुक्तेराकृतेरुपदेशतः ऋचां सङ्गृह्य चोन्नीय विकल्प्य च ऋषीन् यतः ॥२२॥ पराहतुस् तन् न न भवेत् स्खलितन् तु तयोरपि। श्रुतर्ष्यीरिति ह्यस्माकम् मतिश् शाखान्तरेऽथवा ॥२३॥ ताभ्याम् प्रकाशिता मन्त्रास् स्युर्लुप्ता हन्त तेऽपि च। इत्त्यागमानुगमने ह्याम्नाये च प्रमादिनः ॥२४॥ स्वगोत्र-प्प्रवर्षिभ्यान् दृष्टस्यैव मनोरपि। [illegible]ने वा प्रत्त्याऽभिज्ज्ञानेन च वर्जितान् ॥२५॥ दक्षिणीयतमांश् चाऽपि (बृ० दे० ५।१५८-१५९) वसिष्ठान् कुण्डिनानिमान्। उपलभ्य गतिञ् चित्तालँ लौकिकीम् मन्महे वयम् ॥२६॥

गण्यष्यर्षेः कुण्डिनस्य तस्य वंशे समुद्गतः। हिमवत्-खण्ड-मद्ध्यस्थे नेपाल इति विश्रुते ॥२७॥ सुदेशेऽन्तर्गतेऽद्व्यत्वे दिग्तुङ्गाचलमण्डिते। कृष्णायाः पूर्वतः कर्मदायाः पश्चिमतस् स्थिते ॥२८॥ माहेन्द्र्या शुक्लया पूते पादैर्गौरीगुरोर् युते।

मुकुन्दसेनवंश्यैश् च महीपालैस् सुपालिते ॥२९॥ ख्याते जनपदे चुँद्द्या नद्द्या उत्तर-तस् स्थिते । ताम्म्रकूटाभिधे ग्गरामे तपोवननिभे शुभे ॥३०॥ [illegible]-कौद्रि-वाटीभिः परिशोभिते । क्षेत्त्रैर् नदीमातृकैश् च शालेयैश् च समर्धिते ॥३१॥ वनैः पशव्व्यैर् यज्ज्ञीयकाष्ठयुक्तैस् समन्ततः । परिक्षिप्ते [illegible]युक्तैर् नानाविधैर् जनैः ॥३२॥ समाकीर्णे वसन् सम्म्यग् राज्ज्ञा लोकैश् च पूजितः । सूर्योपाद्ध्याय-नामाऽभूत् स्वाद्ध्यायी भूसुरोत्तमः ॥३३॥ सुनन्दनम् तस्स्य पुत्त्रस् तस्स्य चेन्द्द्रमणिम् सुतः । तस्स्य विष्णुहरिम् सूनुर् मणिकण्ठस् तु तत्-सुतः ॥३४॥ स्थानेश्श्वरस् तस्स्य पुत्त्रस् तस्स्यर्षीश्श्वर आत्मजः । वालानन्दस् तस्स्य सुतस् तस्स्याग्नीश्श्वर उद्वहः ॥३५॥ कुलोद्वहस् तस्स्य जातश् चिरञ्जीवी वहुष्ष्वपि । अग्ग्रजेषु जातमात्त्र-मृते-ष्ष्वतिश्श्रुतादिभिः ॥३६॥ लोकोत्तरैर् गुणौघैश् च युक्त इत्त्यपि वीक्षितः । गाङ्गेय इव विद्द्वद्भिर्, महर्षिश्शापचोदितः ॥३७॥ कश्चिद् भुवं समायात इति चाऽऽतर्-कितो जनैः । पित्त्राऽयन् तु चिरञ्जीव्व्यादिति गोर्वग्तोलितः ॥३८॥ [illegible]-धाम् प्राप्तो भूमिदानेन मानितः । राज्ज्ञा हरकुमारेण सेनवंश्येन, तत्-कृतम् ॥३९॥ अनुपाल्ल्य नृपैस् साहिवंश्यैश् च प्रतिपालितः । [illegible]-विद्द्याधुरन्धरः ॥४०॥ षट्कर्मा कर्मयोगी च षड्भिः पुत्त्रैस् समावृतः । सद्गार्-हस्थ्य-सुकृत्त्याव्स्थायाँ यो निदर्शनतामितः ॥४१॥ यश् च नप्तानन्[illegible]प्य भानुं राम-कथागुरुम् । नैपालकजनस्तुत्त्यान् परमाचार्यताङ्गतः ॥४२॥ यदीयोऽयम् चाऽनुवंश्या-माचार्यपदवीन् दधत् । बहुशाखो [illegible] ॥४३॥ पुत्त्रा धनञ्जयस् तस्स्य काशीनाथश् च शेखरः । तुलसीरामको गङ्गादत्तश् चेन्द्रविलासकः ॥४४॥ धनञ्जयसुतो भानु-भक्तो भाषाकविर् महान् । विश्श्रुतो राष्ट्रमान्न्योऽभूद् ग्रन्थै रामायणादिभिः ॥४५॥ शेखरो नाम वै पद्मनाभोऽभूद् गृह्यधर्मवित् । षड्ग्नेर्[1] गृहिणो दीप्त्रस् तृतीयोऽग्निरिवोज्ज्वलः ॥४६॥ तस्स्य पुत्रो देवदत्तः कनीयान् गणकोत्तमः । यो विनिन्न्ये सुतान् शास्त्रे ज्येष्ठन् तत्र विशेषतः ॥४७॥ ज्येष्ठोऽसौ विश्श्वनाथाक्ख्यः काशिक्क्याम् बालशास्त्रिणः । सुशिष्ष्याद् दिननाथाक्ख्यादधीत्त्य श्श्रुतविस्तरम् ॥४८॥ उपलेभे यो द्वितीयो बालशास्त्रीत्त्यमानि च । देवदत्तस् सुतास् सत्सु भर्तृषु प्रत्त्यपीपदन् ॥४९॥ दौहित्रा यस्स्य गुणिनः पुत्रीषु पञ्चसूद्गताः । सुखं शास्त्रधुरावँ वोढुं शक्ता राजधुरामपि ॥५०॥ लोकनाथो देवदत्त-तनयो मद्ध्यमाग्ग्रियः । ज्यौतिषे राजकार्ये च निपुणस् सुकृतप्प्रियः ॥५१॥ विनीय वेदनाथाक्ख्यम् भ्रातरं राजकर्मणि । उत्सृज्ज्य पुत्रांस्त्रीन् बालान् पुत्रीमेकां सतीं जनीम् ॥५२॥ सूर्योपरागे गङ्गायां स्नात्त्वा कृत्त्वा विसूचिकाम् । निमित्तन् देहमुत्सृज्ज्य वाराणस्स्यावँ व्यमुच्च्यत ॥५३॥ तत्-पुण्य-पुञ्ज-

---

१. आवसत्थ्यगार्हपत्त्याऽऽहवनीय-दक्षिणाग्नि-सभ्याः पञ्च अग्नयः, पुत्रसंस्कारक-सीमन्तोन्नयनादिकं कर्म शान्तिकपौष्टिकादि कर्म च यत्र क्रियते सोऽग्निशालायाः बहिः प्रणेयो लौकिकोऽग्निष् षष्ठः ।

पुष्टाऽपि क्षामा मूर्त्या धनेन च । धृत्या चेशावलम्बेन सोत्साहा नियमिन्यपि ॥५४॥ नारिकेलसमाकारा धर्मप्राणा मनस्विनी । यशोदाख्या तस्य पत्नी कृच्छ्राद् बालान् बभार सा ॥५५॥ तत्र ज्येष्ठ उमानाथो मेधावी वाक्पटुर् गुणी । ज्येष्ठात् पितृव्यात् प्रतिभोन्मेषम् प्राप्य ततो गुरून् ॥५६॥ उपास्य टेकनाथादीन् [illegible] । स [illegible] कुम्भीधान्यो दृढव्रतः॥५७॥ वेदादिसंहितान् सर्वास् सम्यगालोड्य यत्नतः । ताभ्यन् सारं समुद्धृत्य कृतवाञ् शास्त्रकाव्यकम् ॥५८॥ गोपीनाथो मद्ध्यमस् तु मातुः कष्टं विलोकितुम् । अशक्तस् तल् लघूकर्तुमिव बाल्ये तनुञ् जहौ ॥५९॥ कन्यसस् सुगृहीताख्यो नरनाथः कुशाग्री । [illegible] लिपिञ् जग्राह लीलया ॥६०॥ ज्येष्ठात् पितृव्यादमरकोषं सर्वमधीत्य च । कण्ठस्थमेव तङ्कृत्वा व्याकृतिञ् चापि किञ्चन ॥६१॥ अधीत्वाथो कान्तिपुरीङ् गत्वा स्थित्वा समाद्द्वये । स्वाग्रजाद् मोदनाथाच् च टेकनाथाच् च व्याकृतिम् ॥६२॥ अधीत्य कालिदासाच् च देवीदत्ताच् च काव्यकम् । वैद्यकाद्ध्ययनप्रेष्यमाणाग्रज निवेदनात् ॥६३॥ प्राप्य राज्यः पाकशालामपि रुग्णो गृहयँ ययौ । तत्रैव ज्येष्ठात् पितृव्यादवशिष्टान् तु व्याकृतिम् ॥६४॥ अधीत्य पूर्णवँ विदधेऽद्ध्ययनवँ व्याकृतेस् तु सः । मनोहराच् चाऽधिजगे कान्तिपुर्यां हि ज्यौतिषम् ॥६५॥ पश्चादधीत्यायुर्वेदम् पुरुषार्थस्य साधनम् । स्वं शरीरन् तथाऽन्येषां रक्षन् कीर्तिं समार्जयत् ॥६६॥ पित्रोः पुण्यात् [illegible] च रक्षणात् । [illegible] ॥६७॥ [illegible] पितुर् मुखमात्रमपि ह्ययम् । पौरुषस्याऽनुगन् दिष्टमिति प्रख्यापयन्जने ॥६८॥ विद्द्यया च कृतितत्वेन सुकृतेन धनेन च । प्रजया यशसा चापि [illegible] ॥६९॥ आत्मजा अत्र भवतस् सप्त भोजश् शिवः क्रमात् । साम्बो विश्वो जयश् चापि विजयस् सोम इत्यपि ॥७०॥ वयसा धीगुणैश् चाऽपि ज्येष्ठो भोजो युवैव सः । सपत्नीकोपि निस्तोको ह्यऽकस्मादजहात् तनुम् ॥७१॥ धियो गुणैरनवरा ममेवेऽवरजास् समे । साम्बादयस् सुशीलाश् च तोषयन्ति गुरून् परम् ॥७२॥ द्वितीयोऽहं शिवस् तातपादादेव च लब्धवान् । शक्तिन् च प्रतिभोन्मेषं श्रुतञ् चाऽपि समासतः ॥७३॥ अद्ध्यापकेभ्यो ऽन्येभ्यश्चाऽधीत्य दिग्दर्शनन् ततः । लब्ध्वा विद्याविवृद्ध्यर्थम् प्रयते च यथामति ॥७४॥

सोऽहङ् काव्य-प्रकाशस्य व्याख्यानानि बहून्यपि । पठित्वा तत्र केषाञ्चिद् विद्द्वन्मात्राधिगम्यताम् ॥७५॥ केषाञ् चित् तु पुनर् बालमात्रस्य स्पृहणीयताम् । विलोक्य विदुषाञ् चैव बालानाञ् च कृते हितम् ॥७६॥ न चातिविस्तृतं नातिसङ्क्षिप्तं सारगर्भकम् । पदवाक्या-ऽभिसन्धीनां स्फोरकवँ विशदं स्फुटम् ॥७७॥ प्रमाणवाक्यैः पूर्वेषायँ युक्तं सत्तुलनात्मकम् । न केवलम् परोक्तस्यैवार्थस्य प्रतिपादकम् ॥७८॥ व्याख्यानमिदमाहार्षमुपग्राह्यतया नवम् । भूयादिदम् बुभुत्सूनावँ विदुषाञ् च समम् प्रियम् ॥७९॥ काश्मीरकैर् वाङ्गकैश् च मैथिलैः काशिकैरपि ।

क—परिशिष्टम्

काव्यप्रकाशसूत्राणाम् अनुक्रमणिका

ख—परिशिष्टम्

काव्यप्रकाशोदाहरणानाम् अनुक्रमणिका

ग-परिशिष्टम्

काव्यप्रकाशस्थानां महत्त्वपूर्णानां पदानां विषयाणां च अनुक्रमणिका

सङ्क्षिप्तसङ्केतविवरणम्

अ = अलङ्कारः ।
अथर्व = अथर्ववेदशौनकसंहिता ।
अध्या० = अध्यायः ।
अष्टा० = अष्टाध्यायी ।
उ०=उल्लासः ।
उदा०=उदाहरणम् ।
उ०रा०च०=उत्तररामचरितम् ।
उ०रा०च०प्र०=उत्तररामचरित-प्रस्तावना ।
ऋ०=ऋग्वेदशाकलसंहिता ।
ऋ०प्रा०=ऋग्वेदप्रातिशाख्यम् ।
का०=कारिका ।
का०अ०सू०वृ०=काव्यालङ्कार-सूत्रवृत्तिः ।
का०प्र०सू०=काव्यप्रकाशसूत्रम् ।
का०सा०स०उदा०=काव्यालङ्कारसार-सङ्ग्रहोदाहरणम् ।
का०सू०=कामसूत्रम् ।
कि०=किरातार्जुनीयम् ।
कुन्त० = कुन्तककाव्यालङ्कारः (वक्रोक्तिजीवितम्) ।
कु०स०=कुमारसम्भवम् ।
खै०=खैस्ताब्दाः (क्रैस्ताब्दाः) ।
गा०स०ग्र०मा०=गायकवाडसंस्कृत-ग्रन्थमाला ।
त०वा०=तन्त्रवार्त्तिकम् ।
तृ०सं०=तृतीयसंस्करणम् ।
तै०ब्रा० = तैत्तिरीयब्राह्मणम् ।
द०रू०अ०=दशरूपकावलोकः ।
दो०=दोषः ।
द्र०=द्रष्टव्यम् ।
ध०मी०सू०=धर्ममीमांसासूत्रम् (जैमिनिकृतम्) ।
ध्व०=ध्वन्यालोकः ।
ध्व०लो०=ध्वन्यालोकलोचनम् ।
ना०अ०=नामलिङ्गानुशासनम् (अमरकोशः) ।
ना०शा०=नाट्यशास्त्रम् ।
न्या०सू०=न्यायसूत्रम् ।
प०=पण्डितः ।
पङ्=पङ्क्तिसङ्ख्या ।
पि०सू०=पिङ्गलच्छन्दस्सूत्रम् ।